A 47 S

CC-0. In Public Domain. Digitized by eGangotri

विज्ञापन ।

इस असार संसार मे वेद शास्त्र पुराण इतिहास का सारांश रूप तथा मोह तम तिरोहण के अर्थ तरुणतर अति प्रचण्ड मार्तण्ड और अज्ञान तिमिरान्ध जनसमूह को ज्ञानाञ्जन का अञ्जनूटा यह अनूठा जो गीताशास्त्र सो समरभूमि मे बंधुवध निमित्तसे व्याकुल अर्जुन को देख श्रीकृष्ण भगवानने उपदेशदिया था सोई श्रीनारायण का अवतार श्रीवेदव्यासने महाभारत के बीच भीष्मपर्व मे प्रकाश किया है और उसका तात्पर्य भी स्वामी श्रीशङ्कराचार्य्यने भाष्य करिके कहा फेर शङ्करभाष्य का भी टीका आनन्दगिरि ने किया और परम ज्ञान वान श्रीधरस्वामीने भी गीता पर सुबोधिनीनाम तिलक किया है परन्तु ए सब संस्कृत मे हैं इससे पण्डित छोड और लोगों के समझमे नहीं आवते हैं इस कारण से कान्यकुब्ज श्रीयुत शिवनन्दन पांडे के उद्योग औ उपदेश तथा रुपये खरच सेऔ कान्यकुब्ज श्रीयुतविश्वेश्वरनाथ पांडेजी की मदत औ रुपये खरचसे तथा वैश्यवंश अवतंश श्रीयुत परमधार्म्मिक जैनीलालजीके रुपये औ उत्साहसे और श्रीयुत वैश्यकुलभूषण श्री जगुल किसोरजी के रुपये खरचसे तथा वैश्यवंश उजागर नागर श्रीयुत नाहरमलजी के रुपयों से औवैश्यकुल दीप श्रीडेढ़राज के रुपये औ सहायता से तथा वैश्यकुल कुमुद के सुहृदायक चन्द्र समान श्रीच न्द्रभानजीके धन से और श्रीमोती राम जी महाराज की मदत से तथा श्री सोनीराम रामदयाल औ श्रीभगवान दास जी की उत्साहसे काब्यकुब्ज पण्डित श्रीजगन्नाथशुक्ल ने परम धार्म्मिक परोपकारी इन सब लोगों की आज्ञानुसार मनभावनी नाम भाषा टीका करके श्रीमद्भगवद्गीता शाङ्करभाष्य आनन्दगिरि कृत टीका औ श्रीधरस्वामी के तिलक समेत यथामति शुद्ध करके सम्वत् १८२७ मे श्रीभुवन चन्द्र वसाकके ज्ञानरत्नाकर छापेखाने मे दूसरी वार बडेअक्षरोंमे छपवाया है ।

गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्मा द्विनिःसृता ॥

CC-0. In Public Domain. Digitized by eGangotri

Price Rs. 3-0-0

श्रीमद्भगवद्गीता ।



ाङ्करभाष्यमुपक्रमणिका

यणःपरोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
त्तस्मिन्नेलोकाःसप्तद्वीपाचमेदिनी॥१॥

आनन्दगिरिकृतटीका ।

ामृतवर्षिणीम् । हेरम्बदेहिप्रतूहच्छेड्व्यूहनिवारि
प्रसूतंनिष्ठाद्वयंतंविश्वविभागनिष्ठम् । साध्येतराभ्यांपरि
नतोस्मि ॥२॥ प्रत्यञ्चमच्युतंनत्वागुरूनपिगरीयसः ।
साध्यविवेचनम् ॥३॥
योपेयभूतनिष्ठाद्वयमधिकृत्यप्रवृत्तंगीताशास्त्रंव्याचिख्या
ापप्लवोपशमनादिप्रयोजन प्रसिद्धयेप्रामाणिकव्यवहार
रणंमङ्गलाचरणंसम्पादयन्अवशेषेणेतिहासपुराणयो
द्येणैकवाक्यतामभिप्रेत्यपौराणिकश्लोकमेकमेवान्तर्य्यामि
णइति आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंत

भाषा अनुवाद

ोकेइच्छारहतीहै किदुखदूरहोयऔनिरन्तरसुखमिलै
विनाजानेबऊतेरेलोगअनेकअनेकयतनकरिवेदपुराण
पनेमनोरथकोनपऊंचे तबपरमदयालुभगवानवासुदेव
कअतिउत्तमउपायरूपगीताशास्त्रअर्जुनकोउपदेशकिया
ाननिष्ठाकाकारणरूपजोकर्मनिष्ठाआर्थात्कर्मकेद्वाराज्ञ
ोदोनोंनिष्ठामेप्रवृत्तकहेकहताऊ आजोगीताशास्त्रतिस
गवानभाष्यकारशंकराचार्यसकलइतिहासपुराणोंकेसा
र्थात्किसीसेविरोधनहींहै यहजनातेऊयेग्रंथकेआर
काप्रतिपादक कहेकह राणकाश्लोकमङ्गला

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

स्यताःपूर्वंतेननारायणःस्मृतइतिस्मृतिसिद्धःस्थूलदृशांनारायणशब्दार्थःसूक्ष्मदर्शि
नःपुनराचष्टेनरशब्देनचराचरात्मकंशरीरजातमुच्यतेतत्रनित्यसन्निहिताःचि
दाभासाजीवानाराइतिनिरुच्यतेतेषामयनमाश्रयोनियामकोऽन्तर्य्यामीनारायण
इतियमधिकृत्यान्तर्य्यामिब्राह्मणंश्रीनारायणाख्यमत्राम्नायश्चाधीयतेतदनेनशास्त्र
प्रतिपाद्यंविशिष्टंतत्त्वमादिष्टंभवति ननुपरस्यात्मनोमायासम्बन्धादन्तर्य्यामित्वं
शास्त्रप्रतिपाद्यत्वंचवक्तव्यमन्यथाकूटस्थासङ्गविषयाद्वितीयस्यतद्योगात्तथाचशुद्धता
सिद्धौकथंयथोक्तापरदेवताशास्त्रादावनुस्मर्य्यतेशुद्धस्यहितत्त्वत नुस्मरणमभीष्टफ
लवदभीष्टंतत्राहपरोव्यक्तादितिअव्यक्तमव्याकृतंमायेत्यनर्थान्त तस्मात्परोव्यति
रिक्तःतेनासंस्पृष्टोयमपरःअक्षरात्परतःपरइतिश्रुतेः गृहीत तत्त्वतोमायासम्ब
न्धाभावेपिकल्पनयातदीय सङ्गतिमङ्गीकृत्यान्तर्य्यामित्यादिकम् यमयस्मादीश्वर
स्यव्यतिरेकोविवक्षितस्तस्मिन्नव्यक्तेसाक्षिसिद्धेपिकार्य्यलिङ्गकम मानमुपन्यस्यति
अण्डमितिअपञ्चीकृतपञ्चमहाभूतात्मकंहैरण्यगर्भंतत्त्वमण्डमि यभिलप्यतेतदव्य
क्तात्पूर्वोक्तादुत्पद्यतेप्रसिद्धादिश्रुतिस्मृतिवादेषुहिरण्यगर्भस्यमू कारणादुत्पत्ति
स्तथाचकार्य्यलिङ्गादव्यक्ताभिव्यक्तिरित्यर्थः हिरण्यगर्भेश्रुतिस्मृति तमधिगतेपिका
र्य्यलिङ्गकमनुमानमस्तीतिमन्वानोविराडुत्पत्तिमुपदर्शयति अण्ड इति उक्तस्या
ण्डस्यहिरण्यगर्भाभिधानीयस्यान्तरिमेभूरादयोलोकाविराडात्मकावर्त्तन्तेकार्य्यं
हिकारणस्यान्तर्भवतितेनहिरण्यगर्भान्तर्भूताभूरादयोलोकाविराड़ात्मानस्तेनस्त
ष्टाइति तल्लिङ्गाद्धिरण्यगर्भसिद्धिरित्यर्थः लोकानेवपञ्चीकृतपञ्चमहाभूतात्मक
विराडात्मत्वेनव्युत्पादयतिसप्तद्वीपेति साप्तथिवीअभवदितिश्रुतौविराजोजन्मस
ङ्कीर्त्तितमित्यङ्गीकारादशेषद्वीपोपेताप्तथिवीत्यनेनसर्व्वलोकात्मकोविराडेवोच्यतेच
शब्देनविराजोहि हिरण्यगर्भपूर्व्वोक्ताण्डात्मन्यन्तर्भावस्ततःसम्भवोनुक्ष्यतेपरमा
त्माहिस्वज्ञानद्वारा जगदशेषमुत्पाद्यस्वात्मन्येवान्तर्भावाखण्डैकरससच्चिदानन्दा
त्मनास्वेमहिम्नितिष्ठतीत्यर्थःअत्रचनारायणशब्देनाभिधेयमुक्तंनर एवनाराजीवा
स्वम्पदवाच्याःतेषामयनमधिष्ठानंतत्पदवाच्यं परंब्रह्मतथाचकल्पितस्याधिष्ठाना
तिरिक्तस्वरूपाभावाद्वाच्यस्यकल्पितत्वेपिलक्ष्यस्यब्रह्मणोवास्तवत्वाद्ब्रह्मा त्मैक्यंविषयेवा
क्यंचतेतेनार्थाद्विषयविषयिभावःसम्बन्धोपिध्वनितःपरोव्यक्तादित्यनेनमायासं स्प
र्शाभावोक्त्यासर्व्वानर्थनिवृत्तेरापरमानन्दाविर्भावलक्षणोमोक्षोपिविवक्षितस्तेनचत
त्कामस्याधिकारोद्योतितःपरिशिष्टेनतुशब्देनवस्तुनोवास्तवमद्वितीयत्वमावेदितं

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यमुपक्रमणिका ।

सभगवान्सृष्ट्वेदंजगत्तस्यचस्थितिंचिकीर्षुर्मरीच्यादीनग्रेसृष्ट्वाप्रजापतीन् प्रवृत्तिलक्षणंधर्म्मंग्राहयामासवेदोक्तंततोऽन्यांश्चसनकसनन्दनादीनुत्पाद्यनिवृत्ति धर्म्मंज्ञानवैराग्यलक्षणंग्राहयामास ।

आनन्दगिरिकृतटीका

तेनचवस्तुद्वारापरमविषयत्वंतज्ज्ञाननिष्ठायास्तदुपायभूतकर्म्मनिष्ठायाश्चावान्तर विषयत्वमित्यर्थादुक्तमित्यवधेयम् ।

ननुनैवंसाध्यसाधनभूतंनिष्ठाद्वयमत्रभगवताप्रतिपाद्यतेब्रह्मणाभ्यर्थितस्यभगव तोभूमिभारापहारार्थंवसुदेवेनदेवक्यामाविर्भूतस्यतादर्थ्येनमध्यमंपुरुषासुतंप्रथितम हिमानंप्रेरयितुंधर्म्मयोरिहानुद्यमानत्वादतोनास्यशास्त्रस्यनिष्ठाद्वयंपरापरविष यभावमनुभवितुमलमितितन्नभगवतोधर्म्मसंस्थापनस्वाभाव्यधौव्याद्धर्मद्वयस्थापनार्थ मेवप्रादुर्भावाभ्युपगमाद्भूभारपरिहारस्यचार्थिकत्वादर्जुनंनिमित्तीकृत्याधिकारिणं स्वधर्मप्रवर्तनद्वाराज्ञाननिष्ठायामवतारयितुंगीताशास्त्रस्यप्रणीतत्वादुचितमस्यनि ष्ठाद्वयविषयत्वमिति परिहरतिसभगवानित्यादिनाधर्म्मद्वयमर्जुनायोपदिदेशेत्यन्ते नभाष्येणतत्रनेदंगीताशास्त्रं व्याख्यातुमुचितमाप्तप्रणीतत्वानिर्द्धारणात्तथाविधशा स्त्रान्तरवदित्याशंक्यमङ्गलाचरणस्योद्देश्यं दर्शयन्नादौशास्त्रप्रणेतुराप्तनिर्द्धारणार्थं सर्व्वज्ञत्वादिप्रतिज्ञापूर्व्वकंसर्व्वजगज्जनयितृत्वमाह सभगवानिति प्रकृतोनारायण ाख्योदेवःसर्व्वज्ञः सर्वेश्वरःसमस्तमपिप्रपञ्चमुत्पाद्यव्यवस्थितोनचतस्यानाप्तत्व मीश्वरानुगृहीतानामाप्तत्वसिद्ध्यातस्यपरमाप्तत्वसिद्धेरित्यर्थः ननुभगवतासृष्टम पिचातुर्वर्ण्यादिविशिष्टं हिरण्यगर्भादिलक्षणजगन्नव्यवस्थितिमास्थातुंशक्यतेव

भाषा अनुवाद

उसकाअर्थयहहैकिजोअव्यक्तनाममायाजगत्कीप्रकृतितिससेस्थावरजङ्गमकी शरीरसमूहमेअधिष्ठितकहेटिकेजोसकलजीवउनकेआश्रयभूतअन्तर्यामीनारा यणहैं औरउसीमायासेअंडाकारयहब्रह्माण्डप्रगटभयाहै किजिसब्रह्माण्डके भीतरसकललोकऔरसातद्वीपसमुद्रसमेतयहवसुन्धराएथिवीधरीभईहै॥१॥

सोईनारायणजगतकोसिर्जनकरिइससृष्टिकेपालनकरनेकेलियेमरीचिअत्रि आदिदशप्रजापतियोंकोपहलेउत्पन्नकिया औरउनकोवेदविहितप्रवृत्तिलक्षण धर्मकीशिक्षादिया फेरसनकादिकोंकोउपजायउनकोज्ञानवैराग्यनिवृत्तिलक्ष णधर्मउपदेशकिया ।

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यमुपक्रमणिका ।

द्विविधोहिवेदोक्तोधर्मः प्रवृत्तिलक्षणोनिवृत्तिलक्षणश्च तत्रैकोजगतः स्थितिकारणं प्राणिनांसाक्षादभ्युदयनिःश्रेयसहेतुर्यःसधर्मः ब्राह्मणाद्यैर्वर्णिभिराश्रमिभिःश्रेयोर्थिभिरनुष्ठीयमानोदीर्घेणकालेनअनुष्ठातॄणांकामोद्भवाद्वीयमानविवेकविज्ञानहेतुकेनाधर्मेणाभिभूयमानेधर्मेप्रवर्द्धमानेचाधर्मे जगतःस्थितिंपरिपालयिषुःसम्प्रादिकर्त्तानारायणाख्योविष्णुर्भोमस्यब्राह्मणोब्रह्मणत्वस्यरक्षणार्थंदेवक्यांवसुदेवादंशेनकृष्णःकिलसम्बभूवब्राह्मणत्वस्यहिरक्षणेनरक्षितःस्याद्वैदिकोधर्मःतदधीनत्वाद्वर्णाश्रमभेदानाम् ।

आनन्दगिरिकृतटीका ।

स्थापकाभावान्नचपरस्यैवेश्वरस्यव्यवस्थापकत्ववैषम्यादिप्रसङ्गात्तत्राहतस्यचेतिसृष्टस्य जगतोमर्य्यादाविरहितत्वशङ्कितेतदीयांव्यवस्थांकर्तुमिच्छन्व्यवस्थापकमालोच्यतत्रस्यापिक्षत्रत्वेनप्रसिद्धंधर्मन्तथाविधधर्ममधिगम्यसृष्टवानित्यर्थः सृष्टस्यधर्मस्यसाध्यत्वभावतयासाधयितारमन्तरेणासम्भवात्तस्यैवतदनुष्ठातृत्वानभ्युपगमात्प्राणिप्रभेदानामधर्मप्रायाणांतदयोगात्कुतस्तदीयासृष्टिरित्याशंक्याह मरीच्यादीनिति तेषांभगवतासृष्टानांप्रजासृष्टिहेतूनांयागदानादिप्रवृत्तिसाध्यंधर्ममनुष्ठातुमधिकृतानांस्वकीयत्वेनतदुपादानमुपपन्नमित्यर्थः चैत्यवन्दनादिभ्योविशेषंविशिनष्टि वेदोक्तमिति ननुनैतावताजगदशेषमपिव्यवस्थापयितुंशक्यतेप्रवृत्तिमार्गस्यपूर्वोक्तधर्मंप्रतिनियतत्वेपिनिवृत्तिमार्गस्यतेनव्यवस्थापनायोग्यत्वात्तत्राह ततोन्यांश्चेति निवृत्तिरूपस्यधर्मस्यशमदमाद्यात्मनोगमकमाह ज्ञानेतिविवेकवैराग्यातिशयेशमाद्यतिशयोगम्यतेततोविवेकादितस्यगमकमित्यर्थः ।

धर्मवज्रविदांविवाददर्शनाज्जगतःस्थेम्नेकारणीभूतधर्मान्तरमपिसृष्टव्यमस्ती

भाषा अनुवाद

सोवैदिककहेवेदविहितधर्मदोप्रकारकाहै पहलाजगतकोस्थितिकरनेवाला जिसकोप्रवृत्तिलक्षणकहतेहैं दूसरामुक्तिकादेनहारनिवृत्तिलक्षणहै जिसको ब्राह्मणआदिचारोंवरणऔआश्रमीचारोंअपनेकल्याणकेअर्थअनुष्ठानअर्थात्धारणकरतेहैं ।

जगतमेलोगोंकीकामनावशतेविवेकज्ञानकेनाशकअधर्मकीवृद्धिभईतोजगतकी स्थितिकहेपालनकीइच्छाकरिकेवहीआदिकर्तानारायणब्राह्मणऔब्राह्मणकेअधीनवेदविहितधर्मकीरक्षाकेनिमित्तदेवकीकेगर्भमेवसुदेवजीसेअंशरूपप्रगटभये।

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यमुपक्रमणिका।

सचभगवान्ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिःसदासम्पन्नस्त्रिगुणात्मिकांवैष्णवीं स्वांमायांमूलप्रकृतिंवशीकृत्याजोऽव्ययोभूतानामीश्वरोनित्यशुद्धबुद्धमुक्तस्वभावोपिस न्स्वमायायादेहवानिवजातइवलोकानुग्रहंकुर्वन्लक्ष्यतेस्वप्रयोजनाभावोपिभूतानु

आनन्दगिरिकृतटीका।

त्याशंक्याह द्विविधोहीति अतिप्रसङ्गाप्रसङ्गव्याहृत्तयेप्रकृतंधर्मंलक्षयतिप्राणिना मिति प्रवृत्तिलक्षणोधर्मोभ्युदयार्थिनांसाक्षादभ्युदयहेतुःनिःश्रेयसार्थिनाम्परम्पर यानिःश्रेयसहेतुर्निवृत्तिलक्षणस्तुधर्मःसाक्षादेवनिःश्रेयसहेतुरितिविभागःज्ञानस्यै वनिःश्रेयसहेतुत्वेपियमादीनांज्ञानद्वारामोक्षहेतुत्वंज्ञानातिरिक्तव्यवधानाभावाच्च साक्षादित्युक्तं यद्येवंधर्मोलक्ष्यतेतर्हिवर्णित्वमाश्रमित्वञ्चोपेक्ष्यसर्वैरेवपुरुषार्थो र्थिभिर्द्वावपिधर्मौयथायोग्यमनुष्ठेयावित्यनुष्ठातृनियमार्थमिदमित्याशंक्याह ब्राह्मणा द्यैरिति अर्थित्वाविशेषेपिश्रुतिस्मृतिपर्य्यालोचनयानुष्ठानात्नियमसिद्धिरित्यर्थः नित्यनैमित्तिकेषुजावज्जीवमनुष्ठानङ्काम्येषुकरणाशैरागाधीनाप्रवृत्तिरितिकर्तव्य तांशेवैधीतिविभागेपिकदाचिदेवानुष्ठानमितिविभागमभिप्रेत्याह दीर्घेणेति अथ यथोक्तधर्मवशादेवजगतोविवृद्धितस्थितिसिद्धेर्भगवतोनारायणस्यादिकर्तुरनेकानर्थ कलुषितशरीरपरिग्रहासम्भवादन्यस्यैवकस्यचिदनाप्तस्यवैषम्यदैर्घृण्यवतोविग्रहप रिग्रहद्वारेणगीताशास्त्रप्रणयनमिति कुतोस्याप्तप्रणीतत्वंतत्राह अनुष्ठातृणामिति अथवायथोक्तशङ्कायान्दीर्घेणेत्यारभ्योत्तरं महताकालेन कृतत्रेतात्यये द्वापरावसाने साधकानां कामक्रोधादिपूर्वकादविवेकाद्धर्मबाहुल्याद्धर्माभिभवाद्धर्माभिवृद्धेश्च जगतोमर्य्यादाभेदेतदीयांमर्य्यादामात्मनिर्मितां पालयितुमिच्छन्प्रकृतोभगवानेत दर्थंनचातुर्वर्ण्यादिसंरक्षणार्थं लीलामयंमायाशक्तिप्रयुक्तंस्वेच्छाविग्रहंजगृह्णेत्यर्थः भौमस्यब्रह्मणोगुप्तैर वसुदेवाद्जीजनत्इति स्मृतिमनुसृत्यप्रदृश्यमनूद्यव्याचष्टे भौमस्येतिअंशेनेति स्वेच्छानिर्मितेनमायामयेनस्वरूपेणेत्यर्थः किलेत्यस्मिन्नर्थेपौरा णिकीप्रसिद्धिरीनूद्यतेनहिभगवतोव्यतिरिक्तस्येदंजन्मेतियुज्यतेबहुविधागमवि रोधादितिभावः ननुवैदिकधर्मसंरक्षणार्थंभगवतोजन्मयदायदाहिधर्मस्येत्यादि

भाषा अनुवाद

सोईभगवानसदाज्ञानऐश्वर्यशक्तिबलवीर्यतेजसेसम्पन्नकहेयुक्तअपनीवैष्णवीत्रि गुणमयीमायाकोअपनेवशकरकेऔरआपमुक्तरूपमायाकेद्वारादेहधारीउत्पन्नभ येऐसेदेखपडेथेकिअपनेकिसीप्रयोजनकेविनाभीलोगोंपरअनुग्रहप्रकाशकरिके।

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष उपक्रमणिका

जिष्टत्तयावैदिकंहिधर्म्मद्वयमर्जुनायशोकमोहमहोदधौनिमग्नायोपदिदेशगुणाधिकैर्हिगृहीतोऽनुष्ठीयमानश्चधर्मःप्रचयंगमिष्यतीति । तंधर्मंभगवतायथोपदिष्टंवेदव्यासःसर्व्वज्ञोभगवान्गीताख्यैःसप्तभिःश्लोकशतैरुपनिबबन्ध ।

आनन्दगिरिकृतटीका ।

दर्शनात् किमिदंब्राह्मणत्वस्यरक्षणार्थमितितत्राह ब्राह्मणत्वस्यहीति तथापिवर्णाश्रमभेदव्यवस्थापनंविनाकथंयथोक्तधर्मरक्षणमित्याशङ्क्याह तदधीनत्वादिति ब्राह्मणंहिपुरोधायक्षत्रादिप्रतिष्ठांप्रतिपद्यते याजनाध्यापनयोस्तद्धर्मत्वात्तद्द्वारा चवर्णाश्रमभेदव्यवस्थापनादतोब्राह्मण्येरक्षितेसर्वमपिसुरक्षितंभवतीत्यर्थः ।

नन्वेमपिभगवतोनारायणस्यशरीरादिमत्त्वेसत्यस्मदादिभिरविशेषादनीश्वरत्वप्रसक्तिरित्यासङ्क्यज्ञानादिकृतंविशेषमाह सचेति ज्ञानंज्ञप्तिरर्थपरिच्छित्तिरैश्वर्य्यमीश्वरत्वंस्वातन्त्र्यंशक्तिस्तदर्थनिर्वर्त्तनसामर्थ्यंबलंसहायसम्पत्तिः वीर्य्यं पराक्रमवत्त्वंतेजस्तुप्रागल्भ्यमधृष्यत्वंएतेचषड्गुणाःसर्व्वविषयाः सर्व्वदाभगवतिवर्त्तन्तेतथाचतस्यशरीरादिमत्त्वेपि नस्मदादिसाम्यमित्यर्थः अथैवमपिकथमीश्वरस्यानादिनिधनस्यनित्यशुद्धबुद्धमुक्तस्वभावस्यस्वभावविपरीतंजन्मादिसम्भवति नहिभूतानामीशितास्वतन्त्रःस्वात्मनोऽनर्थं स्वयमेवसम्पादयितुमर्हतिनचास्यदेहादिग्रहेकिमपिफलमुपलभ्यतेतत्राह त्रिगुणात्मिकामिति सिसृक्षितदेहादिगतवैरूप्यसिद्ध्यर्थमिदंविशेषणंतस्याव्यापकत्वंवक्तुंवैष्णवीमित्युक्तम् ईश्वरपारवश्यन्तस्यादर्शयतिस्वामिति तस्याश्चप्रतिभासमात्रशरीरत्वमेवनतुवस्तुत्वमित्याह मायामिति तस्याःनानाविधकार्य्याकारेणपरिणामित्वंसूचयतिमूलप्रकृतिमिति ईश्वरस्यप्रकृत्यधीनत्वंवारयतिवशीकृत्वेति नित्यत्वंकार्य्याकारविरहितत्वंशुद्धत्वमकारणत्वंबुद्धत्वमजडत्वंमुक्तत्वम् अविद्याकामकर्मपारतन्त्र्यराहित्यंनचनित्यत्वादयःसंसारावस्थायामसन्तोमोक्षावस्थायांसम्भवन्तीतियुक्तमित्याह स्वभावइति देहग्रहेप्राधान्यंमायायादर्शयितुंपुनःस्वमाययेत्युक्तं सवाअयंपुरुषोजायमानःशरीरमभिस

भाषा अनुवाद

जिसमेंदोधर्मकोसबलोगजानिकरिग्रहणकरेंक्योंकिबडोंकेआचरनकियेधर्मकोसबलोगग्रहणकरेंगेयहविचारिश्रीकृष्णजीनेमंग्रामकेबीचशोकसागरमेंनिमग्नअर्जुनसेवेदोक्तप्रवृत्तिनिवृत्तिदोनोप्रकारकेधर्मउपदेशकियाथा सोईभगवतकाकहाउपदेशसातसैश्लोकमेसर्व्वज्ञभगवानवेदव्यासयहगीतानिबंधकियाअर्थात्बनाया

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं उपक्रमणिका

तदिदंगीताशास्त्रंसमस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेयार्थंतदर्थाविष्करणायानेकै र्विवृतपदपदार्थवाक्यार्थन्यायमप्यत्यन्तविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपल भ्याहंविवेकतोऽर्थनिर्द्धारणार्थंसंक्षेपतोविवरणंकरिष्यामि।

आनन्दगिरिकृतटीका।

म्यद्यमानइति श्रुतिमाश्रित्याह देहवानिति इवकाराभ्यांदेहादेरवस्तुत्वेनकल्पि तत्वंद्योत्यते धर्मद्वयोपदेशद्वारा प्राणिवर्गस्याभ्युदयनिश्रेयसतत्परत्वापादनंलोका नुग्रहःयद्यपिकूटस्थःस्वतन्त्रोनित्यत्वादिलक्षणश्चाहमीश्वरःस्वतोदृश्यते तथापि यथोक्तमायाशक्त्यादेहादिगृहीत्वाप्राणिनामनुग्रहमादधानो नस्वभावविपर्य्ययंपर्य्ये तीत्यर्थः ननुप्रयोजनमनुद्दिश्यनमन्दोपिप्रवर्त्ततइति न्यायादीश्वरस्याप्तकामतयाक्ष तकृत्यस्यप्रयोजनाभावादनुग्राह्याणाञ्चाद्वैतवादे व्यतिरिक्तानामसत्त्वान्नधर्मद्वयमु पदेष्टुमुचितमितितत्राह स्वप्रयोजनेति कल्पितभेदभाञ्जिभूतान्युपादायतदनुग्र हेच्छयाचैत्यवन्दनादिविलक्षणंधर्मद्वयमर्जुनंनिमित्तीकृत्याप्तकामोपि भगवानुपदि ष्टवानित्यर्थः अर्जुनस्योपदेशापेक्षास्तीतिदर्शयितुंविषिनष्टिशोकेति ननुभूतानुग्रहे कर्त्तव्येकिमित्यर्जुनायधर्मद्वयंभगवतोपदिश्यतेतत्राह गुणाधिकैरिति प्रचयंगमि ष्यतीतिमत्वाधर्मद्वयमर्जुनायउपदिदेशेतिसम्बन्धः अथतथापिसुगतोपदिष्टधर्म वदयमपि भगवदुपदिष्टोधर्मोनप्रामाणिकोपादेयतामुपगच्छेदित्यासङ्क्यवेदोक्त त्वान्नास्यतत्तुल्यत्वमित्युक्तंनित्यमिप्रेत्यशिष्टपरिगृहीतत्वाच्चमैवमित्याह तंधर्ममिति अधर्मेधर्मबुद्धिर्व्वेदव्यासस्यजातेत्याशङ्क्याह सर्व्वज्ञइति कृष्णद्वैपायनंविद्धिव्यासंना रायणंप्रभुमितिस्मृतेः सज्जनोपकारकभगवदवतारत्वाच्च व्यासस्यनान्यथाबुद्धिरि त्याह भगवानिति गीताशास्त्रस्याप्तप्रणीतत्वमपाकृत्यव्याख्येयत्वमुपपादितमुपसंह रति तदिदमिति पौरुषेयस्यवचसोमूलप्रमाणाभावेनाप्रामाण्यमिति मत्वाविघ्न ष्टिसमस्तेति शास्त्रान्तरैरेवतदर्थप्रतिपत्तिसम्भवेकिमितिव्याख्यानमित्याशङ्क्याह दुर्विज्ञेयार्थमितिपदच्छेदः पदार्थोक्तिर्विग्रहोवाक्ययोजनाशङ्क्षेपस्यसमाधानव्या

भाषा अनुवाद

सकलवेदोंकेअर्थकासारभंग्रहस्वरूपइसगीताकातात्पर्यार्थलोगोंकोअतिदुर्गेय कहेजानबेयोगनहींहै इसीसेवक्ताओंनेयद्यपिइसगीताकाअर्थप्रकाशकियातौभी साधारणलोगउसकाउलटासुलटाभावअर्थग्रहणकरलेतेहैं यहजानियथावतकहे ठीकठीकअर्थनिर्धारणकरनेकेलियेहममंक्षेपसेविवरणकरनेमेप्रवृत्तभयेहै॥

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं उपक्रमणिका

तस्यास्यगीताशास्त्रस्यसंक्षेपतःप्रयोजनंपरंनिःश्रेयससहेतुकस्यसंसारस्यात्यन्तोपरमलक्षणंतच्चसर्वकर्मसन्न्यासपूर्वकादात्मज्ञाननिष्ठारूपाद्धर्माद्भवतितदर्थमेवगीतार्थधर्ममुद्दिश्यभगवतैवोक्तं सद्विधर्ममुपर्याप्तोब्रह्मणः पदवेदनंइत्यनु

आनन्दगिरिकृतटीका।

ख्यानंपञ्चलक्षणमित्यादिक्रमेणास्यशास्त्रस्यपूर्वाचार्यैर्व्याख्यातत्वात्किमर्थमिदमारभ्यते गतार्थत्वात्तत्राह तदर्थेति गीताशास्त्रार्थस्यप्रकटीकरणार्थंपदविभागस्तदर्थोक्तिःसमासद्वारावाक्यार्थनिर्देशस्तत्रापेक्षितोन्यायश्चाक्षेपसमाधानलक्षणोवृत्तिकारैर्दर्शितस्तत्रापितथाविधमेव शास्त्रंशास्त्रपरिचयशून्यैःसमुच्चयासमुच्चयवादिभिर्विरुद्धार्थत्वेन अनेकार्थत्वेनचगृहीतमालक्ष्यतद्बुद्धिमनुरोद्धुमिदमारब्धव्यमित्यर्थः येषांप्राचीनेव्याख्यानेबुद्धिरप्रविष्टातेषांसम्प्रतितने एतस्मिन्नसौप्रवेक्ष्यतीति कुतो नियमस्तत्राह विवेकतइति पूर्वव्याख्यानेतत्तदर्थनिर्द्धारणार्थोपन्यासःसङ्कीर्णवर्त्मातीतिनतत्रकेषाञ्चिन्मनीषासमुन्मिषति प्रकृतेत्वसम्प्रकीर्णतयातत्प्रदार्थनिर्णयोपयोगिन्यायोविस्तियते नेतावन्मन्दमध्यमयोरपिबुद्धिरवतरतीत्यर्थः किञ्चानपेक्षितादिकग्रन्थसद्भावान्नप्राचीनेव्याख्यानेश्रोतृणांप्रवृत्तिरतत्वपेक्षितात्पग्रन्थेविवरणे प्रायशःसर्वेषांप्रवृत्तिःस्यादितिमत्वाह संक्षपतइति।

ननुअनाप्तप्रणीतत्वाद्यभावेपिनेदंशास्त्रव्याख्येयंविषयाद्यनुबन्धस्यानभिहितत्वेन शास्त्रत्वाभावादित्याशङ्क्यसर्वव्यापारणांप्रयोजनार्थत्वादादौप्रयोजनमाह तस्येतिप्रसाधितप्रामाण्यस्यव्याख्यत्वेनमनसिसन्निहितस्यगीताशास्त्रस्यसंक्षेपतःसंग्रहःसम्भिण्डितत्वमेकवाक्यत्वंतेनेदंपरमंफलंयन्निश्चितंश्रेयोनिःश्रेयसंकैवल्यंअवान्तरफलन्तुतत्रतत्रावान्तरवाक्यभेदेनमनोनिग्रहादिविवक्ष्यतेनिःश्रयसञ्चद्विविधंनिरतिशयसुखाविर्भावोनिःशेषानर्थोच्छित्तिश्चतत्राद्यमुदाहरतिपरमिति द्वितीयंदर्शयतिसहेतुकस्येति संसारोपरमस्यात्यन्तिकत्वंप्रतियोगिनःसंसारस्यपुनरुत्पत्त्ययोग्यत्वंतच्चसाप्रमूर्च्छादिव्यवच्छेदार्थविशेषणंतदेवसाधयितुंसहेतुकस्येत्युक्तं उक्तंफलसमुच्चितादेकाकिनोवाकर्मणः स्यादितितस्यैवशास्त्रप्रतिपाद्यतेत्याशङ्क्याभिधेयमभिधित्समानःसमाधत्तेतच्चेति आत्मज्ञाननिष्ठाशेषत्वेनकर्मनिष्ठाब्रोच्यतेप्राधान्येन

भाषा अनुवाद

दुखरूपईससंसारसेउपरतिरूपजोनिर्वाणकहेमुक्तिसोईगीताशास्त्रप्रयोजनहै परन्तुसर्वकर्मपरित्यागमूलकज्ञाननिष्ठारूपनिवृत्तिधर्मकेअनुष्ठानकरनेसेवहप्रयोजनसिद्धहोताहै अनुगीताआदिग्रन्थोंमे भगवानआपयहीसकलअभिप्राय

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यमुपक्रमणिका ।

तासुकिञ्चान्यदपितत्रैवोक्तं नैवधर्म्मीनचाधर्म्मीनचैवहिशुभाशुभी यःस्यादेकासनेलीनस्तुष्णींकिञ्चिदचिन्तयन् ज्ञानंसन्न्यासलक्षणमितिच दृहापिचान्ते उक्तमर्जुनायसर्व्वधर्मान्परित्यज्यमामेकंशरणंव्रजेति अभ्युदयार्थोपियःप्रवृत्तिलक्षणोधर्म्मोवर्णाश्रमांश्चोद्दिश्यविहितःसचदेवादिस्थानप्राप्तिहेतुरपिसन्नीश्वरार्पणबुद्ध्यानुष्ठीयमानसत्त्वशुद्धयेभवतिफलाभिसन्धिवर्जितः शुद्धसत्त्वस्यचज्ञाननिष्ठायोग्यताप्राप्तिद्वारेणज्ञानोत्पत्तिहेतुत्वेनचनिःश्रेयसहेतुत्वमपिप्रतिपद्यते तथाचेम

आनन्दगिरिकृतटीका

त्वात्मज्ञाननिष्ठैवात्रप्रतिपाद्यतेइत्यर्थः ननुशेषिणीनिष्ठाकुतोनभवतिसन्न्यासात्कर्म्मनिष्ठायाःशेषत्वात्तत्राह सर्व्वेति सन्न्यासद्वारेणासकृदनुष्ठितश्रवणादेःशेषिणीनिष्ठासिद्ध्यतिशेषत्वञ्चकर्म्मणस्तत्परम्परायत्वमित्यर्थः ननुयज्ञदानतपःकर्म्मनत्याज्यंकार्य्यमेवतदितिवाक्यशेषात्समुच्चितमात्मज्ञानमत्रप्रतिपाद्यतेनेत्याहतथेति सर्व्वकर्म्मसन्न्यासपूर्व्वकमात्मज्ञाननिष्ठारूपंधर्म्मंनिःश्रेयससाधनंप्रयोजनंप्रागुक्तंपरामृशतिइममेवेति वक्तृभेदादभिप्रायभेदाशङ्कांवारयतिभगवतैवेति उक्तमनुगीतास्वितिसम्बन्धःब्राह्मणःपदंपूर्व्वोक्तंनिःश्रेयसंतस्यवेदनंलाभस्तत्रविशिष्टोज्ञाननिष्ठारूपोधर्म्मःसमर्थोभवतीत्यर्थः यज्ञदानादिवाक्यस्यतुतत्त्वाख्यानावसरेतात्पर्य्यंवक्ष्यते कर्म्मत्यागस्यभगवतोभिप्रेतत्वेवाक्यान्तरमनुगीतागतमेवोदाहरतितत्रवेति धर्माधर्म्मापूर्व्वासंसर्गित्वेहेतुमाहनैवेति क्रियाद्वयसम्बन्धाभावात्तन्निवृत्तापूर्व्वाभ्याससम्बन्धेप्राप्तमर्थमाह यःस्यादिति वागादिवाह्यकरणव्यापारविरहितत्वंतूष्णीमित्युच्यतेकिञ्चिदचिन्तयन्नित्यन्तःकरणव्यापाराभावोभिप्रेतःद्विविधकरणव्यापारविरहितःसन्प्रागुक्तोयोधिकारीकेवलमेकस्मिन्नद्वितीयेब्रह्मण्यासनमवस्थानंतत्रलीनस्तस्मिन्नेवसमाधिभागीस्यात्तस्यासम्प्रज्ञातसमाधिनिष्ठस्यसर्व्वकर्मत्यागहेतुकंज्ञानंमुक्तिहेतुर्भवतीत्यर्थः नकेवलमनुगीतास्वेवयथोक्तंज्ञानमु

भाषा अनुवाद

प्रमाणरूपप्रगटदेखायाहै औरजोवर्णआश्रमकेविषयमेजगतकास्थितिसाधनकहेसहायककर्मनिष्ठारूपप्रवृत्तिलक्षणधर्मइसमेकहींकहींकहाहै वहयद्यपिदेवादिलोकप्राप्तिकाहेतुहै परतौभीईश्वरार्पणबुद्धिसेकियाजुआचित्तशुद्धिकेसाथज्ञाननिष्ठाकीयोग्यताकेद्वारानिर्वाणमुक्तिकासाधनहोताहै यहबातइसीग्रन्थमेंपीछूसेकहीजायगी ।

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यसूपक्रमणिका ।

मर्थमभिसन्धायवक्ष्यति ब्रह्मणयाधायकर्माणियतचित्ताजितेन्द्रियाःयोगिनःकर्म कुर्वन्तिसङ्गंत्यक्त्वात्मशुद्धयेइति इमंद्विप्रकारंधर्मंनिःश्रेयसप्रयोजनंपरमार्थत्वञ्च वासुदेवाख्यंपरब्रह्माभिधेयभूतंविशेषतोऽभिव्यञ्जयन्विशिष्टप्रयोजनसम्बन्याभिधे यवद्गीताशास्त्रंयतस्तदर्थावज्ञानेन समस्तपुरुषार्थसिद्विरतस्तद्विवरणेयत्नःक्रियते मया अत्रच धृतराष्ट्रउवाच धर्मक्षेत्रइत्यादि ।

आनन्दगिरिकृतटीका

क्तंकिन्तुप्रकृतेपिशास्त्रसमाप्तिप्रवसरेदर्शितमित्याह इहापीति नन्वत्रनिवृत्तिलक्ष णधर्मात्मेकंससन्न्यासमात्मज्ञानमेवनप्रतिपाद्यतेकुरुकर्मेवतस्मात्त्वंइत्यादौप्रवृत्ति लक्षणस्यापिधर्मस्यवक्ष्यमाणत्वाद्धर्मयोश्चप्रकृतत्वाविशेषात्तत्राह अभ्युदयार्थोपीति ननुवर्णिभिराश्रमिभिश्चानुष्ठेयत्वेनान्यत्रविहितस्यापितस्यनयुक्तंमोक्षसाधनत्वाधि कारेविधानंदेवादिस्थानप्राप्तिहेतुत्वेनमोक्षम्प्रतिपक्षत्वात् सत्यंतथापिफलाभिलाष मन्तरेणेश्वरार्पणधियाकृतस्यवुद्धिशुद्धिहेतुत्वात्तस्येहवचनमित्याह सचदेवादीति फलाभिसन्धिद्वाराकृतःसन्निधिशेषः प्रवृत्तिलक्षणधर्मस्योक्तरीत्याचित्तशुद्धिहेतु त्वेपिमोक्षहेतुत्वेनकृतोमोक्षाधिकारेनिर्देशःस्यादित्याशङ्क्याह शुद्धेति प्रतिपाद्य तेप्रागुक्तोधर्मइतिशेषः यदुक्तफलाभिसन्धिवर्जितमीश्वरार्पणबुद्ध्यानुष्ठितंकर्मबुद्धि शुद्धयेभवतीतितत्रवाक्यशेषमनुकूलयतितथाचेति ।

शास्त्रस्यप्रयोजनंससाधनमुक्तमानूद्यविषयंदर्शयतिइममितिदर्शितेनफलेन शास्त्रस्यनिष्ठाद्वयद्वारासाध्यसाधनभावःसम्बन्धोविषयेणविषयविषयित्वमिति विव क्षित्वाह विशेषतइति एवमनुबन्धत्रयविशिष्टंशास्त्रंव्याख्यानार्हमित्युपसंहरति विशिष्टेति सिद्धेव्याख्यानयोग्यत्वेव्याख्येयत्वेफलितमाह यतइति एवंगीताशा स्त्रस्य साध्यसाधनभूतनिष्ठाद्वयविषयस्यपरापराभिधेयप्रयोजनवतोव्याख्येयत्वंप्रति पाद्यव्याख्यातुकामःशास्त्रंतदेकदेशस्य प्रथमाध्यायस्यद्वितीयाध्यायैकदेशसहितस्य तात्पर्य्यमाह अत्रचेति गीताशास्त्रेप्रथमाध्यायेप्रथमश्लोककथासम्बन्धप्रदर्शनपरे क्षितेसतीतियावत् ।

भाषा अनुवाद

इसीभांतिनिर्वाणमुक्तिकाकारणरूपदोप्रकारकाधर्मऔवासुदेवजोपरब्रह्म परमारथतत्वसोईविशेषरूपसेप्रगटकरतेविशेषप्रयोजनअभिधेयऔसम्बन्धविशि ष्टइसगीताशास्त्रकेअर्थज्ञानसेसबपुरुषार्थसिद्धहोतेहैं इसलियेइसकातात्पर्य्य कहनेकोमैयत्नकरताहूं इसविषयमेधृतराष्ट्रनेकहाकिहेसंजयइत्यादि ।

CC-0. In Public Domain. Digitized by eGangotri

स्वामिकृतटीका उपक्रमणिका

शेषाशेषमुखव्याख्याचातुर्य्यन्त्वेकवक्त्रतः दधानमद्भुतंवन्देपरमानन्दमाधवम्॥१॥ श्रीमाधवंप्रणम्यीमाधवंविश्वेशमादरात् तद्भक्तियन्त्रितःकुर्व्वेगीताव्याख्यांसुबोधिनीम्॥२॥ भास्यकारमतंसम्यक्तद्व्याख्यातुर्गिरस्तथा यथामतिसमालोक्य गीताव्याख्यांसमारभे॥३॥ गीताव्याख्यायतेयस्याःपाठमात्रादयत्नतः सेयंसुबोधिनीटीकासद्भ्येयामनीषिभिः॥४॥

इहखलुसकललोकहितावतारःपरमकारुणिकोभगवान् देवकीनन्दनस्तत्त्वज्ञानविजृम्भितशोकमोहभंगितविवेकतयानिजधर्मपरित्यागपरधर्म्माभिसन्धिनमर्जुनंधर्म्मज्ञानरहस्योपदेशव्याजेनतस्माच्छोकमोहसागरादुद्दधार तमेवभगवदुपदिष्टमर्थंकृष्णद्वैपायनःसप्तभिःश्लोकशतैरुपनिबबन्ध तत्रचप्रायशःश्रीकृष्णमुखाद्विनिःसृतानेवश्लोकानलिखत्कांश्चित् तत्प्रकृतयेस्वयञ्चव्यरचयत्यथोक्तगीतामाहात्म्ये गीतासुगीताकर्त्तव्याकिमन्यैःशास्त्रविस्तरैः यास्वयंपद्मनाभस्यमुखपद्माद्विनिःसृतेत्यादि अत्रतावद्धर्मक्षेत्रे इत्यादिनाविषीदन्निदमब्रवीदित्यन्तेनग्रन्थेन श्रीकृष्णार्जुनसंवादप्रस्तावायकथानिरूप्यते।

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता ।

प्रथम अध्यायः ।

धृतराष्ट्र उवाच ।

धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः मामकाःपाण्डवाश्चैवकिमकुर्वतसञ्जय ॥१॥

आनन्दगिरिकृतटीका ।

तत्रैवमक्षरयोजनाधृतराष्ट्रउवाचेति धृतराष्ट्रोहिप्रज्ञाचक्षुर्वाह्यचक्षुरभावाद्यमर्थंप्रत्यक्षयितुमनीशःसन्नभ्यासवर्त्तिनं सञ्जयमात्मनोहितोपदेष्टारंपृच्छति धर्मक्षेत्रइति धर्मस्यतद्वेश्चक्षेत्रेसंभिदृद्विकारणंयदुच्यतेकुरुक्षेत्रमिति तत्रसमवेताःसङ्गतायुयुत्सवोयोद्धुकामास्तेचकेचिन्ममदीयाः दुर्य्योधनप्रभृतयःपाण्डवाश्चापरेयुधिष्ठिरादयस्तेचसर्व्वेयुद्धभूमौसङ्गताःभूत्वाकिंअकुर्व्वत कृतवन्तः ॥१॥

स्वामिकृतटीका ।

धृतराष्ट्रउवाच धर्मक्षेत्रइत्यादि भोःसञ्जयधर्मभूमौकुरुक्षेत्रेधर्मक्षेत्रइति कुरुक्षेत्रविशेषणंएषामादिपुरुषःकश्चित्कुरुनामाबभूवतस्यकुरोर्धर्मस्थानेमामकामत्पुत्त्राःपाण्डुपुत्त्राश्चयुयुत्सवोयोद्धमिच्छन्तः समवेतामिलिताःसन्तःकिमकुर्व्वत किंकृतवन्तः ॥१॥

भाषा अनुवाद ।

नेत्रहीनधृतराष्ट्रयुद्धमेसन्देहकरतेभयेप्रशंसाबाक्यसेधर्मक्षेत्रकुरुक्षेत्रकाविशेषणदेकरआत्महितकारीसञ्जयसेपूछाकि हेसञ्जयधर्मक्षेत्रधर्मभूमिजोकुरुक्षेत्रतहांमेरेपुत्त्रदुर्य्योधनआदिक औरपाण्डुकेपुत्त्रयुधिष्ठिरादिसबयुद्धकीइच्छाकरिइकट्ठेहोक्याकरतेहैं इससेयहआयाकिधृतराष्ट्रकेपूर्व्वपुरुषोंमेकोईकुरुनामराजाथेजिनकायहकुरुक्षेत्रधर्मस्थानहै यहांधर्मवृद्धिहोयसंग्रामछोड़मेलकरकेराज्यकाविभागतोनकरदेंयगेयहभीतरीअभिप्रायहै औररणभूमिमेसैन्यदलदेखिसशङ्कितकौनहै क्याधीरवीरभीष्मपितामहकेसाथमेरीप्रबलसेनाकोदेखिशत्रुवोंकोभयभईयाहिंसाकीभयदोनोमानिसंग्रामसेनिवृत्तहोजायंगेयहधृतराष्ट्रपूछतेहैं ॥१॥

CC-0. In Public Domain. Digitized by eGangotri

सञ्जयउवाच।

दृष्ट्वातुपाण्डवानीकंव्यूढंदुर्योधनस्तदा आचार्यमुपसङ्गम्यराजावचनमब्रवीत् २
पश्यैतांपाण्डुपुत्त्राणामाचार्यमहतींचमूं व्यूढांद्रुपदपुत्त्रेणतवशिष्येणधीमता ३

आनन्दगिरिकृतटीका।

किमस्मदीयंप्रबलंवलंप्रतिलभ्यधीरपुरुषैर्भीष्मादिभिरधिष्ठितंपरेषांभयमा विरभूत्यद्यापक्षद्वयहिंसानिमित्ताधर्मभयमासीद्येनएतेयुद्धादुपरमेरन्निति एवं पुत्रपरवश्यपुत्रस्नेहाभिनिविष्टस्यधृतराष्ट्रस्यप्रश्नेसञ्जयस्यप्रतिवचनं दृष्ट्वेत्यादि पाण्डवानांभयप्रसङ्गोनास्तीत्येतत्तुशब्देनद्योत्यतेप्रत्युतदुर्योधनस्यैवराज्ञोभयंप्रभृतं प्रादुर्बभूवपाण्डवानां पाण्डुसुतानांयुधिष्ठिरादीनामनीकंसैन्यंधृष्टद्युम्नादिभिरति धृष्टैर्व्यूह्याधिष्ठितंदृष्ट्वाप्रत्यक्षेणप्रतीत्यवस्तहृदयोदुर्योधनोराजा तदातस्यांसंग्रामो द्योगावस्थायामाचार्यंद्रोणनामानमात्मःशिक्षितारंरक्षितारञ्चश्लाघयन्नुपसंगम्य तदीयंसमीपं विनयेनप्राप्यभयोद्विग्नहृदयत्वेपि तेजस्वित्वादेववचनमर्थसहितं वाक्यमुक्तवानित्यर्थः॥२॥तदेववचनमुदाहरतिपश्येति एतामस्मदभ्यासेमहापुरुषा नपिभवत्प्रमुखानपरिगणय्यभयलेशशून्यामवस्थितांचमूमिमांसेनां पाण्डुपुत्त्रैर्युधि ष्ठिरादिभिरानीतांमहतीमनेकाक्षौहिणीसहितामक्षोभ्यांपश्येताचार्यदुर्योधनो नियुक्तनियोगद्वाराचतस्मिन्परैषामवज्ञांविज्ञापयन्क्रोधातिरेकमुत्पादयितुमुत्स

स्वामिकृतटीका

सञ्जयउवाचदृष्ट्वेत्यादि पाण्डवानामनीकंसैन्यंव्यूढंव्यूहरचनयाधिष्ठितंदृष्ट्वा द्रोणाचार्यसमीपंगत्वाराजादुर्योधनोवक्ष्यमाणंवचनमुवाच ॥२॥ तदेववचनमाह पश्यैतामित्यादिनवभिःश्लोकैःपश्येत्यादि हेआचार्यपाण्डवानांमहतींबिततांचमुं सेनांपश्यतवशिष्येणद्रुपदपुत्रेणधृष्टद्युम्नेनव्यूढांव्यूहरचनया धिष्ठिताम् ॥३॥

भाषा अनुवाद।

तबसञ्जयनेकहाकिहेराजापाण्डुपुत्रयुधिष्ठिरादिकासैन्यदलव्यूहाकाररचना रचितयुद्धकेलियेतयारखड़ादेखिराजादुर्योधनद्रोणाचार्यकेनिकटजायकरवच्य मानयहवातकही इससेयहजनायाकिभयऔरशङ्कातुमारेहीपुत्रकोभईहै ॥२॥

सोईदुर्योधनकीकहोसबबातेंसञ्जयधृतराष्ट्रकेप्रतिनवश्लोकसेकहतेहैं किहे आचार्यदेखियेतोयहयुधिष्ठिरकासैन्यदलजिसकोआपकाशिष्यद्रुपदकापुत्रबुद्धिनि धानधृष्टद्युम्नेरचाहै सोमहात्माआपकेसामनेबड़ेविस्तारसेयुद्धकरनेकोतयारनि ड़रखड़ाहै ॥३॥

CC-0. In Public Domain. Digitized by eGangotri

अत्रशूरामहेष्वासाभीमार्जुनसमायुधि युयुधानोविराटश्चद्रुपदश्चमहारथः ४
धृष्टकेतुश्चेकितानःकाशीराजश्चवीर्यवान् पुरुजित्कुन्तिभोजश्चसैव्यश्चनरपुङ्गवः ५

आनन्दगिरिकृतटीका।

हते परकीयसेनायावैशिष्ट्याभिधानद्वारापरापरपक्षेपि त्वदीयमेवबलमिति सूचयन्नाचार्यस्यतन्निरसनंसुकरमिति मन्वानःसन्नाह व्यूढामिति राज्ञोद्रुपदस्य पुत्रस्तवशिष्योधृष्टद्युम्नोलोकेख्यातिमुपगतः स्वयञ्चशस्त्रास्त्रविद्यासम्पन्नोमहामहिमःतेनव्यूहमापाद्याधिष्ठितामिमाञ्चमूङ्किमितिनप्रतिपद्यसेकिमितिवाम्टश्यसीत्यर्थः ॥३॥

अन्येपिप्रतिपक्षेपराक्रमभाजोबहवःसन्तीत्यनुपेक्षणीयत्वंपरपक्षस्यविवक्षयन्नाह अत्रेति तस्यांहिप्रतिपक्षभूतायांसेनायांशूराःस्वयमभीरवःशस्त्रास्त्रकुशलाःभीमार्जुनाभ्यांसर्वसम्मतिपन्नवीर्याभ्यांतुल्याःयुद्धभूमावुपलभन्ते तेषांयुद्धगौरवंविशदीकर्तुं विशिनष्टिमहेष्वासाइतिइषुरस्यतेऽस्मिन्नितिव्युत्पत्त्याधनुरुच्यतेतच्चमहद्भन्यैरप्रधृष्यंतद्विद्यतेयेषांतेराजानस्तथाविवक्षन्ते यानेवपरसेनामध्यमध्यासीनान्परपक्षानुरागिणोराज्ञोविज्ञापयति युयुधानइत्यादिनासौभद्रोद्रौपदेयाश्चेत्यन्तेन ॥४॥ किञ्चधृष्टकेतुरिति स्पष्टम् ॥५॥

स्वामिकृतटीका

अत्रेत्यादि अत्रास्यांचम्बाद्दषवोबाणाअस्यन्तेक्षिप्यन्तेएभिरितिद्दष्वासाधनूंषिमहान्तद्दष्वासायेषांतेमहेष्वासाःभीमार्जुनौ तावदत्रातिप्रसिद्धौयोद्धारौताभ्यांसमाःशूरा सन्ति तानेवनाभिमर्निर्दिशतियुयुधानद्दतियुयुधानःसात्यकिः ॥४॥

किञ्चधृष्टकेतुरितिचेकितानोनामएकोराजानरपुङ्गवःनरश्रेष्ठःसैव्यः ॥५॥

भाषा अनुवाद।

औरइससेनाकेबीचयुद्धकरनेमेभीमअर्जुनकेसमानधनुषधारीमहाबलीऔर औरकितनेयोद्धाहैं तिनकेनामदुर्योधनद्रोणाचार्यसेकहतेहैं कियुयुधानजोसात्यकीऔरराजाविराटमहारथीद्रुपदराजा ॥४॥ औरधृष्टकेतुचेकितानराजाऔबलवानकाशीराजऔपुरुजितराजाकुन्तिभोजऔसैव्यये सबराजानरश्रेष्ठऔबलवान्हैं ॥५॥

CC-0. In Public Domain. Digitized by eGangotri

युधामन्युश्चविक्रान्तउत्तमौजाश्चवीर्यवान् सौभद्रोद्रौपदेयाश्चसर्व्वएवमहारथाः ६
अस्माकन्तुविशिष्टायेतान्निबोधद्विजोत्तमनायकाममसैन्यस्यसंज्ञार्थंतान्ब्रवीमिते ७

आनन्दगिरिकृतटीका।

तेषांसर्वेषामपिमहाबलपराक्रमभाक्त्वादनुपेक्ष्यत्वंपुनर्विवक्षतिसर्वएवेति॥६॥
यद्येवंपरकीयं बलमतिप्रभूतं प्रतीत्यातिभीतवदभिदधासिहन्तसन्धिरेवपरै रिष्यतामलंविग्रहाग्रहेणेत्याचार्य्याभिप्रायमाशङ्क्याब्रवीति अस्माकमिति तुशब्देना न्तरुत्पन्नमपिस्वकीयंभयंतिरोदधानो धृष्टतामात्मनोद्योतयति येखल्वस्मत्पक्षेव्यव स्थिताःसर्वेभ्यःसमुत्कर्षजुषस्तान्मयोद्यमानान्निबोधनिश्चयेन मद्वचनादवधारयेत्य र्थःयद्यपित्वमेवत्रैवर्णिकेषुत्रैविद्यवृद्धेषुप्रधानत्वात्प्रतिपत्तुंप्रभवसितथापिमदीयसै न्यस्ययेमुख्यास्तानहंतेतुभ्यंसंज्ञार्थमसंख्येषुतेषुमध्येकतिचिन्नामभिर्गृहीत्वापरिशि ष्टानुपलक्षयितुंविज्ञापनंकरोमिनत्वज्ञातंकिञ्चित्तवज्ञापयामीतिमत्वाहद्विजोत्त मेति॥७॥

स्वामिकृतटीका।

युधामन्युरितिविक्रान्तोयुधामन्युर्नामैकःसौभद्रोऽभिमन्युःद्रौपदेयाद्रौपद्यांप ञ्चभ्योयुधिष्ठिरादिभ्योजाताःपुत्राःप्रतिविन्ध्यादयःपञ्चमहारथादीनांलक्षणंएकोद शसहस्राणियोधयेद्यस्तुधन्विनांशस्त्रशास्त्रप्रवीणश्चमहारथइतिस्मृतःअमितान्यो धयेद्य तुसंप्रोक्तोतिरथस्तुसःरथीचैकेनयोयोद्धातन्न्यूनोऽर्द्धरथस्तसः॥६॥ अस्माक मितिनिबोधद्विजस्वनायकानेतारःसंज्ञार्थंसम्यक्ज्ञानार्थमित्यर्थः॥७॥

भाषा अनुवाद।

पराक्रमीयुधामन्यूनामराजाऔरबलवानउत्तमौजानामएकराजाऔर सुभद्राकेपुत्रअभिमन्यूद्रौपदीकेगर्भसेयुधिष्ठिरादिपांचसेउत्पन्नप्रतिविन्धादि पांचभाईएसबमहारथीवीरहैं महारथीकालक्षणजोअस्त्रशस्त्रमेनिपुणहोदशह जारधनुर्धारीयोद्धोंकेसाथअकेलायुद्धकरसकेउसीकोमहारथीकहतेहै औरअ संख्ययोद्धोंकेसाथयुद्धकरनेमेजोसमर्थउसेअतिरथीशास्त्रमेकहतेऔरएकयोद्धाके साथयोयुद्धकरेसोरथीहै उससेभीकमअर्द्धरथीकहावैहै॥६॥ जोप्रबलशत्रुसेना दलदेखिडरेसेबोलतेहोतोमेलक्योंनकरलोलडाईसेक्याफलहैऐसाद्रोणाचार्यने कहेइसशङ्कासेदुर्योधनकहताहै किमेरेपक्षमेजोनायककहेसेनापतिहैं वेसब आपसेछिपेनहींहै तौभीउनकेनामआपकोस्मरनकरानेकेलियेमैकहताहूं॥७॥

CC-0. In Public Domain. Digitized by eGangotri

भवान्भीष्मश्चकर्णश्चकृपश्चसमितिञ्जयः अश्वत्थामाविकर्णश्चसौमदत्तिर्जयद्रथः ८
अन्येचबहवःशूरामदर्थेत्यक्तजीविताः नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः ९
अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितं पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितं १०

आनन्दगिरिकृतटीका ।

तानेवस्वसेनानिविष्टान्पुरुषधौरेयानात्मीयभयपरिहारार्थंपरिगणयतिभवा नित्यादिना ॥८॥ द्रोणादिपरिगणनस्वपरिग्रिष्टपरिसंख्यार्थत्वंव्यावर्त्तयति अन्ये चेति सर्वेपिभवन्तमारभ्यमदोयष्टतनायांप्रविष्टाःस्वजीवितादपिमह्यंस्पृहयन्तीत्याह मदर्थइति यत्तुतेषांशूरत्वमुक्तंतदिदानीविशदयति नानेतिनानाविधान्यनेकप्रका राणिशस्त्राण्यायुधानिप्रहरणानिप्रहरणसाधनानियेषांतेतथा बहुविधायुधसम्प त्तावपितत्प्रयोगेनैपुण्याभावेतद्वैफल्यमितिचेन्नेत्याह सर्वइति ॥९॥

स्वामिकृतटीका ।

तानेवाह भवानितिद्वाभ्यांभवान्द्रोणाचार्यसमितिंसंग्रामंजयतीतितथासौमद त्तिःसोमदत्तस्यपुत्रोभूरिश्रवाः ॥८॥ मदर्थेमत्प्रयोजनार्थंजीवितंत्यक्तुमध्यवसिताद त्यर्थःनानाअनेकानिशस्त्राणिप्रहरणसाधनानियेषांतेयुद्धेविशारदानिपुणाः ॥९॥

भाषा अनुवाद ।

सोईयेदोश्लोकसेकहतेहैं किसंग्रामविजयोआपश्रीभीष्मपितामहकर्णकृपा चार्यअश्वत्थामाविकर्णऔसोमदत्तकापुत्रभूरिश्रवाऔजयद्रथयेसबवीरअपनीओ रहै ॥८॥ अवकहतेहैं किऔरऔरभीधीरवीरशूरजोमेरेअर्थप्राणपरित्याग करनेकोनिश्चयकरिराखेहैं औरनानाप्रकारकेअस्त्रशस्त्रचलानेवालेयुद्धविद्यामे विशारदकहेअतिनिपुणवेसबलोगभीइधरहैं ॥९॥ इसकेअनन्तरदुर्योधननेजो कहासोईधृतराष्ट्रसेसञ्जयकहतेहैं किऐसेऐसेशूरवीरोंसेभरीपूरीऔरभीष्मपि तामहसेरक्षितभीहमारीसेनाअपर्याप्तकहेपाण्डवकीसेनाकेसाथयुद्धकरनेमेंअस मर्थसीजानीजातीहै औरविपक्षपाण्डवोंकाअपूर्णदलआलसीभीमसेनसेरक्षितप र्याप्तअर्थात्समरमेंसमर्थसादेखपडैहै दूसराअर्थदुर्योधनअपनेहृदयकोनिडरता प्रकाशकनतेऊयेद्रोणाचार्यसेकहतेहैं किहमाराग्यारहअक्षौहिणीसैन्यदलम हात्मावुद्धिमानपितामहजिसकोहरतरहसेरक्षाकरतेहैं निसन्देहशत्रुवोंकापरा भवकरनेकोसमर्थहै औरइनविचारोंकीएकतोसातअक्षौहिणीसेनाथोड़ीसेना दूसरेचपलबुद्धिमहागर्वारभीमसेनसेपरिपालितहोकहोहमारासामनाक्याकरे गीपराभवकरनातोबड़ीदूरहै ॥१०॥

CC-0. In Public Domain. Digitized by eGangotri

अयनेषुचसर्व्वेषुयथाभागमवस्थिताः भीष्ममेवाभिरक्षन्तुभवन्तःसर्व्वएवहि॥११॥

आनन्दगिरिकृतटीका ।

राजापुनरपिस्वकीयभयाभावेहेत्वन्तरमाचार्य्यंप्रत्यावेदयतिअपर्य्याप्तमिति अस्माकंखल्विदमेकादशसंख्याकाक्षौहिणीपरिगणितमपरिमितंबलंभीष्मेणचप्रथितमहामहिम्नासूक्ष्मबुद्धिनासर्व्वतोरक्षितंपर्य्याप्तंपरेषांपुनस्तदल्पसप्तसङ्ख्यकाक्षौहिणीपरिमितबलंभीमेनचचपलबुद्धिनाकुशलताविकलेनपरिपालितमपर्य्याप्तमस्माकमभिभवितुमसमर्थमित्यर्थःअथवातदिदमस्माकंबलंभीष्माधिष्ठितमपर्य्याप्तमपरिमितमक्षय्यमक्षोभ्यमेतेषांपाण्डवानांबलंभीमेनाभिरक्षितंपर्य्याप्तंपरिमितंसोढुंशक्यमित्यर्थः अथवातत्पाण्डवानांबलमपर्य्याप्तंनालमस्माकमस्मद्भयंभीष्माभिरक्षितं भीष्मेणाभिरक्षितोऽस्मैपरबलनिवृत्तयेऽर्थमितितदेवतथोच्यतेइदंपुनरस्मदीयंबलमेतेषांपाण्डवानांपर्य्याप्तंपरिभवेसमर्थंभीमाभिरक्षितंभीमोदुर्ब्बलहृदयोयस्मादस्मैपरबलनिवृत्तयेऽर्थमभिरक्षितःतस्मादस्माकंनकिञ्चिदपिभयकारणमस्तीत्यर्थः॥१०॥

स्वकीयबलस्यभीष्माधिष्ठितत्वेनबलिष्ठत्वमुक्त्वाभीष्मशेषत्वेनतदनुगुणत्वंद्रोणादीनांप्रार्थयतेअयनेष्विति कर्त्तव्यविशेषद्योतोचशब्दःसमरसमारम्भसमयेयोद्धानांयथाप्रधानंयुद्धभूमौ पूर्व्वापरादिदिग्विभागेनावस्थितिस्थानानिनियम्यन्तेनान्यत्रायनान्युच्यन्तेसेनापतिश्च सर्व्वसैन्यमधिष्ठायमध्येतिष्ठतितेषुसर्व्वेषुप्रकल्पितंप्रविभागमप्रत्याख्यायभवानस्मत्त्रामाकर्णश्चेत्येवमादयोभवन्तःसर्व्वेवस्थिताःसन्तोभीष्म

स्वामिकृतटीका ।

ततःकिमत आहअपर्य्याप्तमित्यादि तत्तथाभूतैर्वीरैर्युक्तमपिभीष्मेणाभिरक्षितमपिअस्माकंबलंसैन्यंअपर्य्याप्तंतैःसहयोद्धुमसमर्थंभातिइदन्त्वेतेषांपाण्डवानांबलंभीमाभिरक्षितंसैन्यंपर्य्याप्तंसमर्थंभाति॥१०॥ तस्माद्भवद्भिरेवंवर्त्तितव्यमित्याह अयनेष्विति अयनेषुव्यूहप्रवेशमार्गेषुयथाभागंविभक्तांस्वांस्वांरणभूमिंअपरित्यज्यावस्थिताःसन्तोभीष्ममेवाभिरक्षन्तुयथान्यैर्युद्ध्यमानःदृष्टतःकैश्चिन्नहन्येतथारक्षन्तुभीष्मबलेनास्माकंजीवनमितिभावः॥११॥

भाषाअनुवाद ।

इससेअबतुमसबलोगोंकोयहीकरनाउचितहै किशत्रुकेसैन्यदलकेभीतरप्रवेशकरनेकोक्रमसेअलगअलगहोअपनीअपनीरनभूमिपरखडेहोकरभीष्मजीकीसबरक्षाकरो जिसमेंऔरकोईशत्रुकीओरकायोधापोकूसेइनकोनमारनेसकैइसकीअभिप्राययहहै किभीष्महीकेबलसेहमाराजीवनहै तोउनकीरक्षाकरनीअवश्यहै

CC-0. In Public Domain. Digitized by eGangotri

तस्यसञ्जनयन्हर्षंकुरुवृद्धःपितामहः सिंहनादंविनद्योच्चैःशङ्खंदध्मौप्रतापवान् १२
ततःशङ्खाश्चभेर्यश्चपणवानकगोमुखाः सहसैवाभ्यहन्यन्तसशब्दस्तुमुलोऽभवत् १३

आनन्दगिरिकृतटीका ।

मेवसेनापतिंसर्व्वतोरक्षन्तुतस्यहिरक्षणेसर्व्वमस्मदीयंबलंरक्षितं स्यात्प्रवलनिवृत्तप्रर्थत्वेनतस्यास्माभीरक्षितत्वादित्यर्थः ११ तमेवमाचार्यंप्रतिसम्बोधंकुर्व्वन्तंभयाविष्टंराजानं दृष्ट्वातदभ्यासवर्त्तीपितामहस्तदुद्वेगनुरोधार्थं दूत्यंकृतवानित्याह तस्येति राज्ञोदुर्य्योधनस्यहर्षंबुद्विगतसुल्लासविशेषंपरपरिभवद्वारास्वकीयविजयद्वारकंसम्यगुत्पादयन्भयंतदीयमपनिनीषुरुच्चैःसिंहनादंकृत्वाशङ्खमापूरितवान्किमितिदुर्य्योधनस्यहर्षमुत्पादयितुंपितामहोयततेकुरुवृद्धत्वात्तस्यकुरुराजत्वात्पितामहत्वाच्चास्यदुर्य्योधनभयापनयनार्थाप्रवृत्तिरुचितातदुपजीवितयातद्वशत्वाच्चतस्यसिंहनादेशङ्खशब्देचपरेषांहृदयव्यथांसम्भाव्यते दूरादेवारिनिवहंप्रतिभयजननलक्षणप्रतापत्वादित्यर्थः ॥१२॥राजाभिप्रायंप्रतीत्यभीष्मप्रवृत्तप्रनन्तरंतत्सहैस्तैस्तैराजभिःशङ्खादयोवाद्यविशेषाःकटितिशब्दवन्तःसम्पादिताःसचशङ्खादिप्रयुक्तशब्दस्तुमुलोवज्रलंभयंपरेषांपरिद्योनयन्नासीदित्याह ततइति ॥१३॥

स्वामिकृतटीका ।

तदेवंबज्रमानयुक्तंराजवाक्यंश्रुत्वाभीष्मःकिंकृतवान्तदाह तस्येत्यादि तस्यराज्ञोहर्षंकुर्वन्पितामहोभीष्मउच्चैर्महान्तंसिंहनादंकृत्वाशङ्खंदध्मौवादितवान्१२
तदेवंसेनापतेर्भीष्मस्ययुद्धोत्सवमालोक्यसर्व्वतोयुद्धोत्सवःप्रवृत्तइत्याह ततइत्यादिनापणवामर्दनाआनकागोमुखाश्चवाद्यविशेषाःसहसातत्क्षणादेवाभ्यहन्यन्तवादिताःसशब्दःशङ्खादिशब्दस्तुमुलोमहानभूत ॥१३॥

भाषा अनुवाद ।

तवतोऐसीराजादुर्योधनकीसनमानकीवातैंसुनिभीष्मजीनेजोकियासोकहतेहैं किदुर्योधनकेसन्तुष्टहोनेकेकारनकुरुवंशकेवृद्धपितामहउछलकेआगेवढ़िसिंहनादकरिशङ्खवडेघुघुकारशब्दसेवजाया ॥१२॥ भीष्मपितामहकीयुद्धमेंऐसीउत्साहदेखिसकलसेनाकेसरदारलोगजिसभांतियुद्धउत्सवमेंप्रवृत्तभयेसोईकहतेहैं कितदनन्तरशङ्खभेरीकहेतूरहीपणवजोमृदङ्गअनकजोनगारागोमुखबाद्यविशेषतत्कालएकवारगीजोसभांनेवजायातोवहशब्दएकवड़ाआश्चर्यभूतभयानकघूघूकारभया ॥१३॥

CC-0. In Public Domain. Digitized by eGangotri

ततःश्वेतैर्हयैर्युक्तेमहतिस्यन्दनेस्थितौ माधवःपाण्डवश्चैवदिव्यौशङ्खौप्रदध्मतुः १४
पाञ्चजन्यंहृषीकेशोदेवदत्तंधनञ्जयः पौण्डंदध्मौमहाशङ्खंभीमकर्म्माटकोदरः १५
अनन्तविजयंराजाकुन्तीपुत्त्रोयुधिष्ठिरः नकुलःसहदेवश्चसुघोषमणिपुष्पकौ १६
काश्यश्चपरमेष्वासःशिखण्डीचमहारथः धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः १७

आनन्दगिरिकृतटीका

एवंदुर्य्योधनपक्षेप्रवृत्तिमालक्ष्यपरिसरवर्त्तिनौकेशवार्जुनौश्वेतैर्हयैरतिवलपराक्रमैर्युक्तेमहत्यप्रधृष्येरथेव्यवस्थितावप्राकृतौशङ्खौपूरितवन्तावित्याह ततःश्वेतैर्हयैरिति॥ १४॥तयोःशङ्खयोर्दिव्यत्वमेवापादयतिपाञ्चजन्यमितिकेशवार्जुनयोर्युद्धाभिमुखंदृष्ट्वासंहृष्टःसारस्येनसमररसिकोभीमसेनोपियुद्धाभिमुखोऽभूदित्याहपौण्ड्रमिति ॥१५॥ एतेषांइदृशींप्रवृत्तिंप्रतीत्यपरिपालनावकाशमासाद्यराज्ञोयुधिष्ठिरस्यापिप्रवृत्तिंदर्शयतिअनन्तेति ज्यायसांभ्रातॄणामनुसरणमावश्यकमितिमत्वातयोर्यवीयसोर्भ्रात्रोरपिप्रवृत्तिमाहनकुलइति॥१६॥अन्येषामपितत्पक्षीयाणांराज्ञामैकमत्यंविज्ञापयन्धृतराष्ट्रस्यदुराशांसञ्जयोव्युदस्यतिकाश्यश्चेत्यादिना १७

स्वामिकृतटीका

ततःपाण्डवसैन्येप्रवृत्तंयुद्धोत्सवमाहततइत्यादिपञ्चभिःस्यन्दनेरथेस्थितौसन्तौकृष्णार्जुनौशङ्खौप्रकर्षेणदध्मतुर्व्वादयामासतुः॥ १४॥तदेवविभागेनदर्शयन्नाह पाञ्चजन्यमितिपाञ्चजन्यादीनिनामानिश्रीकृष्णादिशङ्खानांभीमंघोरंकर्म्मयस्यसः। अनन्तेति नकुलःसुघोषंनामशङ्खंदध्मौसहदेवोमणिपुष्पकंनाम॥ १६॥ काश्यश्चेति काश्यःकाशीराजःकथम्भूतःपरमःश्रेष्ठाइत्यासोधनुर्यस्यसः ॥१७॥

भाषाअनुवाद।

तिसकेबादिपाण्डवोंकीसेनामेयुद्धकीतयारीपाचश्लोकसेकहतेहैं किइधरहंसऐसेश्वेतवरनचारहयसंयुक्तसूर्यसेप्रकाशमानरथपरविराजमानश्रीकृष्णऔअर्जुननेभीअतिउत्तमअपनेदोनोशङ्खधुधुकारे१४ अबकिसनेकौनशङ्खवजायासोकहतेहैं किपाञ्चजन्यनामकश्रीभगवानऔअर्जुनदेवदत्तनामशङ्खवजायाफेरभीमकर्म्माभीमसेनभयानकमहशङ्खपौण्ड्रनामवजाया॥ १५॥अनन्तविजयनामशङ्खकुन्तीनन्दनयुधिष्ठिरनेवजाया औरसुघोषनामशङ्खनकुल औमणिपुष्पनामसहदेवनेवजाया॥१६॥ औरधनुर्धारीकाशीराजशिखण्डीऔधृष्टद्युम्नतथाविराटराजाऔरयुद्धमेअपराजितजोसात्यकी ॥ १७॥

CC-0. In Public Domain. Digitized by eGangotri

द्रुपदोद्रौपदेयाश्चसर्व्वशःपृथिवीपते सौभद्रश्चमहाबाहुःशङ्खान्दध्मुःपृथक्पृथक् १८
सघोषोधार्त्तराष्ट्राणांहृदयानिव्यदारयत् नभश्चपृथिवीञ्चैवतुमुलोऽभ्यनुनादयन्१९
अथव्यवस्थितान्दृष्ट्वाधार्त्तराष्ट्रान्कपिध्वजः प्रवृत्तेशस्त्रसम्पातेधनुरुद्यम्यपाण्डवः
केशंतदावाक्यमिदमाहमहीपते ॥२०॥

आनगिरिकृतटीका।

द्रुपदइति परमेष्वासादिविशेषलक्षणचतुष्टयंप्रत्येकंसम्बध्यते ॥१८॥ तैस्तैरा
जभिःशङ्खानापूरयद्भिरापादितोमहान्घोषस्तुमुलोऽतिभैरवोनभश्चान्तरीक्षंपृथि
वीञ्चभूवनंलोकत्रयंसर्व्वमेव विशेषानुक्रमेणनादयन्नादयुक्तंकुर्व्वन्धार्त्तराष्ट्राणांदु
र्य्योधनादीनांहृदयान्यन्तःकरणानिव्यदारयत्विदारितवान्युज्यतेहितत्प्रेरितश
ङ्खघोषश्रवणात्त्रैलोक्याक्रोशेतमुपपद्यवतांतेषांहृदयेषुदोधूयमानत्वंतदाहसघोष
इति॥१९॥दुर्य्योधनादीनांधार्त्तराष्ट्राणामेवंभयप्राप्तिंप्रदर्श्यपार्थादीनांपाण्डवानां
तद्वैपरीत्यमिदानीमुदाहरति अथेत्यादिना भीतिप्रत्युपस्थितेरनन्तरंपलायनेप्रा
प्तेपि धैर्य्यमुत्पाद्यव्यवस्थितानप्रचलितानेवपरान्प्रत्यक्षेणोपलभ्यहनूमन्तंवानरवरं
ध्वजलक्षणत्वेनादायावस्थितोऽर्जुनोभगवन्तमाह इतिसम्बन्धः किमाहेत्यपेक्षाया
मिदंवक्ष्यमाणंहेतुमद्वचनमित्याह वाक्यमिति कस्यामवस्थायामिदमुक्तवानिति

स्वामिकृतटीका।

द्रुपदइति हेपृथिवीपतेधृतराष्ट्र॥१८॥ सचशङ्खानांनादस्त्वदीयानांमहाभयं
जनयामासेत्याह सघोषइत्यादि धार्त्तराष्ट्राणांत्वदीयानांहृदयादिविदारितवान्
किंकुर्वन्नभश्चपृथिवीञ्चाभ्यनुनादयन्प्रतिध्वनिभिरापूरयन्१९ एतस्मिन्समये
श्रीकृष्णमर्जुनोविज्ञापयामासेत्याह अथेत्यादिचतुर्भिःश्लोकैःअथेति अथानन्तरं
महाशब्दानन्तरंव्यवस्थितान्युद्योद्योगेऽवस्थितान्कपिध्वजोऽर्जुनः ॥२०॥

भाषा अनुवाद।

औरद्रुपदराजःतथाद्रौपदीकेपांचपुत्रप्रतिविन्ध्यादिऔरसुभद्राकेपुत्रमहाबा
हुअभिमन्युजीहेपृथ्वीनाथधृतराष्ट्रयेसबकेसबभिन्नभिन्नशङ्खध्वनिकरनेलगे १८
वहीउनसबोंकीशङ्खध्वनिनेआकाशऔपृथिवीतलमेंव्याप्तहोतीहुई प्रतिध्वनिरूप
सेतुमारेपुत्रऔपक्षपातियोंकेहृदयकोविदीर्णकरदिया ॥१९॥ इससमयमेअर्जु
ननेश्रीकृष्णजीकोजोजनायासोचारश्लोकसेसञ्जयप्रगटकरतेहैं किहेमहाराज
धृतराष्ट्रइसप्रकारशङ्खध्वनिहोनेपरभीतुमारेपुत्रलोगोंकीउत्साहयुद्धमेदेखिकर
कपिध्वजअर्जुननेधनुषचढ़ायउसकालभगवानसेयहबातकहीसोआगेकहतेहैं २०

CC-0. In Public Domain. Digitized by eGangotri

अर्जुनउवाच ।

सेनयोरुभयोर्मध्येरथंस्थापयमेऽच्युत २१ यावदेतान्निरीक्षेहंयोद्धुकामानवस्थितान्
कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे २२

आनन्दगिरिकृतटीका ।

तत्राह प्रवृत्तइति शस्त्राणामिषुप्रासप्रभृतीनांसम्पातःसमुदायस्तस्मिन्प्रवृत्तेप्रयो गाभिमुखेसतीतियावत् किंकृत्वाभगवन्तंप्रत्युक्तवानिति तदाहधनुरितिमहीपति शब्देनराजाप्रज्ञाचक्षुःसञ्जयेनसंबोध्यते ॥२०॥

तदेवगाण्डीवधन्विनोवाक्यमनुक्रामति सेनयोरितिउभयोरपिसेनयोःसन्निहि तयोर्मध्येमदीयंरथंस्थापयेत्यर्जुनेनसारथ्येसर्व्वेश्वरोनियुज्यतेकिंहिभक्तानामशक्यं यद्भगवानपितन्नियोगं अनुतिष्ठतियुक्तंहिभगवतोभक्तपारवश्यंअच्युतेतिसम्बोधन तयाभगवतःस्वरूपंनकदाचिदपिप्रच्युतिंप्राप्नोतीत्युच्यते २१ मध्येरथंस्थापयेत्युक्तं तदेवरथस्थापनस्थानंनिर्धारयतियावदितिएतान्प्रतिपक्षत्वेनप्रतिष्ठितान्भीष्मद्रो णादीनस्माभिःसार्द्धंयोद्धुमपेक्षावतोयावद्भत्वा निरीक्षितुमहंक्षमःस्यांतावतिप्रदेशे रथस्यस्थापनंकर्त्तव्यमित्यर्थःकिञ्चप्रवृत्तेयुद्धप्रारम्भेवहवोराजानोऽमुष्यांयुद्धभूमावु पलब्धन्तेतेषांमध्येकैःसहमयायोद्धव्यंनहिक्वचिदपिममगतिप्रतिहतिरस्तीत्याहकै र्म्मयेति॥२२॥ प्रतियोगिनामभावेकथंतवयुद्धौत्सुक्यंफलवद्भवेदितितत्राहयोत्स्यमा नानिति येकेचिदेतेराजानोनानादेशेभ्योऽलक्षुद्धेसमवेतास्तानाहं योत्स्यमा नान्परिगृहीतप्रहरणोपायानतितरांसंग्रामसमुत्सुकानुपलभे तेनप्रतियोगिनां बाहुल्यमित्यर्थः तेषामस्माभिःसहपूर्ब्बवैराभावेकथंप्रतियोगित्वं कल्प्यतेतत्राह धार्त्तराष्ट्रस्येति धृतराष्ट्रपुत्रस्यदुर्य्योधनस्यदुर्बुद्धेःस्वरक्षणोपायमप्रतिपद्यमानस्य

स्वामिकृतटीका ।

तदेववाक्यमाहसेनयोरित्यादि॥२१॥ ननुत्वंयोद्धानतुयुद्धप्रेक्षकस्तत्राहकैर्मयेत्यादि कैःसहमयायोद्धव्यं॥२२॥

भाषा अनुवाद ।

श्रीकृष्णसेअर्जुनइतनीहीबातकहीकिहेअच्युतदोनोदलकेबीचमेरेरथकोख ड़ाकरो ॥२१॥ जोकहोकिख्यातमासगीरहोतुमतोआपयोद्धालड़नेवालेहोइससे सेनाकेमध्यरथकिसलियेखड़ाकियाजायगाइसबातपरकहतेहैं किउतनीदेररथ खडाकरोजबतकहमदेखेंकियुद्धकीकामनाकरिकेखड़ीभईसेनाकेबीचकिसकेसाथ लड़नाहमेंउचितहैं औरकिसकेसाथनहीं॥२२॥

CC-0. In Public Domain. Digitized by eGangotri

योत्स्यमानानवेक्षेहंयएतेत्रसमागताः धार्त्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः २३

सञ्जयउवाच।

एवमुक्तोहृषीकेशोगुड़ाकेशेनभारत सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमं २४
भीष्मद्रोणप्रमुखतःसर्व्वेषाञ्चमहीक्षितां उवाचपार्थपश्यैतान्समवेतान्कुरुनिति२५

आनन्दगिरिकृतटीका।

युद्धायसंरम्भंकुर्व्वतोयुद्धेयुद्धभूमौस्थित्वाप्रियंकर्त्तुमिच्छवोराजानःसमागताःदृश्यन्ते तेनतेषामौपाधिकमस्मत्प्रतियोगित्वमुपपन्नमित्यर्थः२३ एवमर्जुनेनप्रेरितोभगवान हिंसारूपंधर्ममाश्रित्यप्रायशोयुद्धात्तंनिवर्त्तयिष्यतीति धृतराष्ट्रस्यमनीषांदुदूषयिषुःसञ्जयोराजानंप्रत्युक्तवानित्याह सञ्जयइति भगवतोहिभूभारापहारार्थंप्रवृत्तस्यार्जुनाभिप्रायप्रतिपत्तिद्वारेणस्वाभिसन्धिम्प्रतिलभमानस्यपरोक्तिमनुसृत्यस्वाभिप्रायानुकुलमनुष्ठानमादर्शयति एवमिति॥२४॥भीष्मद्रोणादीनामन्येषाञ्चराज्ञामन्तिकेरथंस्थापयित्वाभगवान्किंकृतवानितितदाह उवाचेति एतानभ्यासेवर्त्तमानान्कुरुन्कुरुवंशप्रसूतान्भवद्भिःसार्द्धंयुद्धार्थंसङ्गतान्पश्यदृष्ट्वाचयैःसहात्रयुयुत्सातवोपावर्त्ततेतैःसाकंयुद्धंकुरुनोखल्वेतेषांशस्त्रास्त्रशिक्षावतांमहीक्षितामुपेक्षोपपद्यतेसारथ्येतुनमनःखेदनीयमित्यर्थः॥२५॥

स्वामिकृतटीका।

योत्स्यमानानिति धार्त्तराष्ट्रस्यदुर्य्योधनस्यप्रियंकर्त्तुमिच्छन्तोयइहसमागतास्तानहंद्रक्ष्यामियावत्तावदुभयो सेनयोर्मध्येमेरथंस्थापयेत्यन्वयः॥२३॥ ततःकिंवृत्तंइत्यपेक्ष्यायांसञ्जयउवाचएवमुक्तइत्यादि गुडाकानिद्रातस्याईशेनजितनिद्रेणार्जुनेनएवमुक्तःसन्हेभारतहेधृतराष्ट्र॥२४॥भीष्मेति महीक्षितांराज्ञाञ्चप्रमुखतःम्मुसखेरथंस्थापयित्वाहेपार्थएतान्कुरुन्पश्येति श्रीभगवानुवाच॥२५॥

भाषा अनुवाद।

दुर्बुद्धिदुर्योधनकामनोरथसिद्धकरनेकेअर्थजोराजालोगइसयुद्धभूमिपरआयइकठ्ठेभयेहैं उनकोजवतकहमदेखैंतवलोंरथदोनोसेनाकेमध्यमेस्थापनकरो२३ तिसकेवादक्याभयायहकहतेहुये सञ्जयवोलेकिहेमहाराजधृतराष्ट्रअर्जुकीयहप्रार्थनासुनिश्रीकृष्णदोनोसेनाकेवीचमेउत्तमरथकोलेजायकरखड़ाकिया॥२४॥ भीष्मद्रोणतथाऔरऔरराजावोंकेसामनेरथकोखड़ाकरिश्रीभगवाननेकहाकियुद्धकरनेकेहेतुएकट्ठीहुयीयहकुरुवंशीयोंकीसेनाकोदेखोऔरजिनकेसाथयुद्धअनुचितभानिमनमलीनभयातिनकेसाथयुद्धकरनाहीपडेगा क्योंकि संग्राममेशस्त्रधारीराजोंकेसामनेसेहटजानायहउपहांसक्षत्रीकेयोग्यकामनहीं है॥२५॥

6055
Sri Pratap Singh
CC-0. In Public Domain. Digitized by eGangotri

तत्रापश्यत्स्थितान्पार्थःपितॄनथपितामहान् आचार्य्यान्मातुलान्भ्रातॄन्पुत्रान् पौत्रान्सखींस्तथा श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपि २६ तान्समीक्ष्यसकौन्तेयःसर्व्वान्बन्धूनवस्थितान् कृपयापरयाविष्टोविषीदन्निदमब्रवीत् २७ अर्जुन उवाच दृष्ट्वेमान्स्वजनान्कृष्णयुयुत्सून्समवस्थितान् सीदन्तिममगात्राणिमुखञ्च परिशुष्यति ॥२८॥

आनन्दगिरिकृतटीका।

एवंस्थितेमहानधर्म्मोहिंसेतिविपरीतबुद्ध्यायुद्धादुपरिरंसापार्थस्यसंप्रवृत्तेति कथयति अथेत्यादिना सम्पश्याभगवदभ्यनुज्ञानेसमरसमारम्भायसंवृत्तेसतीत्येतदुच्यतेसेनयोरुभयोरपिस्थितान्पार्थोऽपश्यदितिसम्बन्धः अथशब्दस्तथाशब्दपर्यायः श्वशुराःभार्य्याणांजनयितारःसुहृदोमित्राणिकृतवर्म्मप्रभृतयः ॥२६॥ सेनाद्वयेव्यवस्थितान्यथोक्तान्पितृपितामहादीनालोक्यपरमकृपापरवशःसन्नर्जुनोभगवन्तमुक्तवानित्याह तानिति विषीदन्यथोक्तानांपित्रादीनांहिंसासंरम्भनिबन्धनविषादमुपतापंकुर्व्वन्नित्यर्थः ॥२७॥ तदेवेदंशब्दवाच्यंवचनमुदाहरति दृष्ट्वेति आत्मीयं बन्धुवर्गंयुद्धेच्छयायुद्धभूमावुपस्थितमुपलभ्यशोकप्रवृत्तिंदर्शयति सीदन्तीति देवांश स्यैवार्जुनस्यानात्मविदः स्वपरदेहेष्वात्मात्मीयाभिमानवतस्तत्प्रियस्ययुद्धारम्भेतन्मृत्युप्रसङ्गदर्शिनःशोकोमहानासीदित्यर्थः ॥२८॥

स्वामिकृतटीका।

ततःकिंवृत्तमित्याह तत्रेत्यादि पितॄन्पितव्यानित्यर्थःपुत्रान्पौत्रानितिदुर्योधनादीनांयेपुत्राःपौत्राश्चतानीत्यर्थःसखीन्मित्राणिसुहृदःकृतोपकाराश्चापश्यत् २६ ततःकिंकृतवानित्याह तानिति सेनयोरुभयोरेवंसमीक्ष्यकृपयामहत्यागृहीतोविषण्णःसन्निदमर्जुनोऽब्रवीदित्युत्तरस्यार्द्धश्लोकवाक्यार्थःआविष्टोव्याप्तः॥२७॥ किमब्रवीदित्यपेक्षायामाह दृष्ट्वेमानित्यादियावदध्यायसमाप्ति हेकृष्ण योद्धुमिच्छतःपुरतःसम्यगवस्थितान्स्वजनान्बन्धुजनान्दृष्ट्वामदीयानिगात्राणिकरचरणादीनिसीदन्तिविसीर्य्यन्ते ॥२८॥

भाषा अनुवाद।

तहांखडेजेयेचचादाहाआचार्य्यमामाभाईभतीजेपोतेनातीओमित्रबन्धुससुरमुहृदोंकोदोनोतरफअर्जुननेदेखा॥२६॥ सोकुन्तीपुत्रअर्जुनउनसबबंधुवोंकोलड़नेकेलियेसंग्राममेखडेदेखपरमकृपासेयुक्तअतिकातरस्वभावहो विषादकरतेभयेयहवचनबोले॥२७॥उससमयअर्जुननेजोकहासोसञ्जयकहतेहैं कितबअर्जुन

CC-0. In Public Domain. Digitized by eGangotri

योत्स्यमानानवेक्षेऽहंयएतेत्रसमागताः धार्त्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्षवः २३

सञ्जयउवाच।

एवमुक्तोहृषीकेशोगुड़ाकेशेनभारत सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमं २४

भीष्मद्रोणप्रमुखतःसर्व्वेषाञ्चमहीक्षितां उवाचपार्थपश्यैतान्समवेतान्कुरूनिति२५

आनन्दगिरिकृतटीका।

युद्धायसंरम्भंकुर्व्वतोयुद्धेयुद्धभूमौस्थित्वाप्रियंकर्त्तुमिच्छवोराजानःसमागताःदृश्यन्ते तेनतेषामौपाधिकमस्मत्प्रतियोगित्वमुपपन्नमित्यर्थः२३ एवमर्जुनेनप्रेरितोभगवान हिंसारूपंधर्ममाश्रित्यप्रायशोयुद्धात्तंनिवर्त्तयिष्यतीति धृतराष्ट्रस्यमनीषांदुदूषयिषुःसञ्जयोराजानंप्रत्युक्तवानित्याह सञ्जयइति भगवतोहिभूभारापहारार्थंप्रवृत्तस्यार्जुनाभिप्रायप्रतिपत्तिद्वारेणस्वाभिसन्धिम्प्रतिलभमानस्यपरोक्तिमनुरुध्यस्वाभिप्रायानुकुलमनुष्ठानमादर्शयति एवमिति॥२४॥भीष्मद्रोणादीनामन्येषाञ्चराज्ञामन्तिकेरथंस्थापयित्वाभगवान्किंकृतवानितितदाह उवाचेति एतानभ्यासेवर्त्तमानान्कुरून्कुरुवंशप्रसूतान्भवद्भिःसार्द्धंयुद्धार्थंसङ्गतान्पश्यदृष्ट्वाचयैःसहास्मयुत्सातवोपावर्त्ततेतैःसाकंयुद्धंकुरुनोखल्वेतेषांशस्त्रास्त्रक्षिप्रावतांमहीक्षितामुपेक्षोपप्रद्यतेसारथ्येतुनमनःखेदनीयमित्यर्थः॥२५॥

स्वामिकृतटीका।

योत्स्यमानानिति धार्त्तराष्ट्रस्यदुर्य्योधनस्यप्रियंकर्त्तुमिच्छन्तोयइहसमागतास्तानहंद्रक्ष्यामियावत्तावदुभयो सेनयोर्मध्येमेरथंस्थापयेत्यन्वयः ॥२३॥ ततःकिंवृत्तंइत्यपेक्ष्यायांसञ्जयउवाचएवमुक्तइत्यादि गुडाकानिद्रातस्याईशेनजितनिद्रेणार्जुनेनएवमुक्तःसन्हेभारतहेधृतराष्ट्र॥२४॥भीष्मेति महीक्षितांराज्ञाञ्चप्रमुखतःसुसखेरथंस्थापयित्वाहेपार्थएतान्कुरून्पश्येति श्रीभगवानुवाच॥२५॥

भाषा अनुवाद।

दुर्बुद्धिदुर्योधनकामनोरथसिद्धकरनेकेअर्थजोराजालोगइसयुद्धभूमिपरआयइकट्ठेभयेहैं उनकोजबतकहमदेखैंतबलोंरथदोनोसेनाकेमध्यमेस्थापनकरो२३ तिसकेबादक्याभयाहकहतेऊये सञ्जयबोलेकिहेमहाराजधृतराष्ट्रअर्जुनकीयहप्रार्थनासुनिश्रीकृष्णदोनोसेनाकेबीचमेउत्तमरथकोलेजायकरखड़ाकिया॥२४॥ भीष्मद्रोणतथाऔरऔरराजावोंकेसामनेरथकोखड़ाकरिश्रीभगवाननेकहाकियुद्धकरनेकेहेतुएकट्ठीऊयीयहकुरुवंशीयोंकीसेनाकोदेखोऔरजिनकेसाथयुद्धअनुचितभानिमनमलीनभयातिनकेसाथयुद्धकरनाचीपडेगा क्योंकि संग्राममेशस्त्रधारीराजोंकेसामनेसेहटजानायहउपहांसक्षत्रीकेयोग्यकामनहीं है॥२५॥

6055
Sri Pratap Singh
CC-0. In Public Domain. Digitized by eGangotri

तत्रापश्यत्स्थितान्पार्थःपितॄनथपितामहान् आचार्य्यान्मातुलान्भ्रातॄन्पुत्रान् पौत्रान्सखींस्तथा श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपि २६ तान्समीक्ष्यसकौन्तेयःसर्व्वान्बन्धूनवस्थितान् कृपयापरयाविष्टोविषीदन्निदमब्रवीत् २७ अर्जुन उवाच दृष्ट्वेमान्स्वजनान्कृष्णयुयुत्सून्समवस्थितान् सीदन्तिममगात्राणिमुखञ्च परिशुष्यति ॥२८॥

आनन्दगिरिकृतटीका।

एवंस्थितेमहानधर्म्मोहिंसेतिविपरीतबुद्ध्यायुद्धादुपरिरंसापार्थस्यसंप्रवृत्तेति कथयति अथेत्यादिना सम्पश्याभगवद्भ्यनुज्ञानेसमरसमारम्भायसंवृत्तेसतीत्येतदुच्यतेसेनयोरुभयोरपिस्थितान्पार्थोऽपश्यदितिसम्बन्धः अथशब्दस्तथाशब्दपर्यायः श्वशुराःभार्य्याणांजनयितारःसुहृदोमित्राणिकृतवर्म्मप्रभृतयः ॥२६॥ सेनाद्वयेव्यवस्थितान्यथोक्तान्पितृपितामहादीनालोक्यपरमकृपापरवशःसन्नर्जुनोभगवन्तमुक्तवानित्याह तानिति विषीदन्यथोक्तानांपित्रादीनांहिंसासंरम्भनिबन्धनविषादमुपतापंकुर्व्वन्नित्यर्थः ॥२७॥ तदेवेदंशब्दवाच्यंवचनमुदाहरति दृष्ट्वेति आत्मीयं बन्धुवर्गंयुद्धेच्छयायुद्धभूमावुपस्थितमुपलभ्यशोकप्रवृत्तिंदर्शयति सीदन्तीति देवांश्चैवार्जुनस्यानात्मविदः स्वपरदेहेष्वात्मात्मीयाभिमानवतस्तत्प्रियस्ययुद्धारम्भेतन्मृत्युप्रसङ्गदर्शिनःशोकोमहानासीदित्यर्थः ॥२८॥

स्वामिकृतटीका।

ततःकिंवृत्तमित्याह तत्रेत्यादि पितॄन्पितृव्यानित्यर्थःपुत्रान्पौत्रानितिदुर्य्योधनादीनांयेपुत्राःपौत्राश्चतानीत्यर्थःसखीन्मित्राणिसुहृदःकृतोपकाराश्चापश्यत् २६ ततःकिंकृतवानित्याह तानिति सेनयोरुभयोरेवंसमीक्ष्यकृपयामहत्यागृहीतोविषण्णःसन्निदमर्जुनोऽब्रवीदित्युत्तरस्यार्द्धश्लोकवाक्यार्थःआविष्टोव्याप्तः॥२७॥ किमब्रवीदित्यपेक्षायामाह दृष्ट्वेमानित्यादियावदध्यायसमाप्ति हेकृष्ण योद्धुमिच्छतःपुरतःसम्यगवस्थितान्स्वजनान्बन्धुजनान्दृष्ट्वामदीयानिगात्रानिकरचरणादीनिसीदन्तिविसीर्य्यन्ते ॥२८॥

भाषा अनुवाद।

तहांखडेऊयेचचादाआचार्य्यमामाभाईभतीजेपोतेनातीऔमित्रबन्धुससुरमुहृदोंकोदोनोतरफअर्जुननेदेखा॥२६॥ सोकुन्तीपुत्रअर्जुनउनसबबंधुवोंकोलड़नेकेलियेसंग्राममेखडेदेखिपरमकृपासेयुक्तअतिकातरस्वभावहो विषादकरतेभयेयहवचनबोले॥२७॥उससमयअर्जुननेजोकहासोसञ्जयकहतेहैं कितबअर्जुन

CC-0. In Public Domain. Digitized by eGangotri

वेपथुश्चशरीरेमेरोमहर्षश्चजायते गाण्डीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते २९
नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः निमित्तानिचपश्यामिविपरीतानिकेशव ३०
नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे नकांक्षेविजयंकृष्णनचराज्यंसुखानिच ३१
किंनोराज्येनगोविन्दकिंभोगैर्जीवितेनवा येषामर्थेकांक्षितंनोराज्यंभोगाःसुखा

आनन्दगिरिकृतटीका।

अङ्गेषुव्यथासुखेपरिशोषश्चेत्युभयंशोकलिङ्गमुक्तंसंप्रतिवेपथुप्रभृतीनिभीतिलिङ्गान्युपन्यस्यति वेपथुश्चेति रोमहर्षोरोम्नांगात्रेषुपुलकितत्वं॥२९॥ किञ्चाधैर्य्यमपिसंदृत्तमित्याह नचेति मोहोपिमहान्भवतीत्याह भ्रमतीवेति विपरीतनिमित्तप्रतीतेरपि मोहोभवतीत्याह निमित्तानीति तानिविपरीतानिनिमित्तानियानि वामनेत्रस्फुरणादीनि॥३०॥ युद्धेस्वजनहिंसयाफलानुपलम्भादपितस्मादुपरिरंसा जायतइत्याह नचेति प्राप्तानांयुयुत्सूनांहिंसयाविजयोराज्यंसुखानिचलब्धुंशक्या नीतिकुतोयुद्धादुपरतिरित्याशङ्क्याह नकांक्षइति॥३१॥

स्वामिकृतटीका।

किञ्चवेपथुश्चेत्यादि वेपथुःकम्पःरोमहर्षोरोमाञ्चःस्रंसतेनिपततिपरिदह्यते सर्वतःसन्तप्यते॥२९॥अपिचनचशक्नोमित्यादि विपरीतानिनिमित्तानिअनिष्टसूचकानिशकुनादीनिपश्यामि॥३०॥ किञ्चनचेत्यादि आहवेयुद्धेस्वजनंहत्वाश्रेयःफलंनपश्यामि विजयादिकंफलंकिंनपश्यसीतिचेत्तत्राह नकाङ्क्षइति॥३१॥

भाषा अनुवाद।

कृष्णसेबोलेकिहेश्रीकृष्णयुद्धकीइच्छाकरिसंग्रामभूमिमेखडेहूयेइनस्वजनबंधुवोंकोदेखिमेरेहाथपांवढीलेहोगयेऔर सारीशरीरमेपसीनाहोआयामुखभीसूखताजाताहैं२८ औरदेहकांपतीहैरोंवांखडेहोहोउठतेहाथसेगांडीवधन्वाभीगिरापड़ताहैसर्व्वांगकीखालजलीसीजातीहै॥२९॥औरमेरेअवखडेहोनेकीसामर्थ्यभीनहींरहीमेरामनभ्रमताहै औरनिमित्तअसगुनउलटेदेखताहूंवाईंआंखऔरहाथभीफरकतेहैं॥३०॥मैकल्याननहींदेखताजुंस्वजनबन्धुवोंकोसंग्राममेंमारकेहेकृष्णनहींचहियेहमैविजयऔरनराज्यतथासुखकीभीईच्छानहींहैं॥३१॥

क्याकरनाहै हमैराज्यलेकरहेगोविन्दऔरभोगसेक्याहैं औरजीनेसेभीहमैक्याप्रयोजनहैं किजिनकेवास्तेहमराज्यभोगसुखकीआकांक्षाकरतेहै वेईपाण्डव

CC-0. In Public Domain. Digitized by eGangotri

निच ३२ तइमेऽवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिच आचार्य्याःपितरःपुत्त्रास्तथैवच पितामहाः ३३ मातुलाःश्वशुराःपौत्त्राःश्यालाःसम्बन्धिनस्तथा एतान्नहन्तुमिच्छामिघ्नतोपिमधुसूदन ३४ अपित्रैलोक्यराजस्यहेतोःकिन्नुमहीकृते निहत्यधार्त्तरा ष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन ॥ ३५॥

आनन्दगिरिकृतटीका।

किमितिराज्यादिकंसर्व्वाकांक्षितत्वात्नकाङ्क्षसेतेनहिपुत्त्रभ्रात्रादीनांस्वास्थ्य माधातुंशक्यमित्याशङ्क्याह किमिति राज्यादीनामाक्षेपेहेतुमाह येषामिति ३२ तानेवविशिनष्टिआचार्य्याइति॥ ३३॥मातुलाइति श्यालाभार्य्याणांभ्रातरोधृष्टद्यु म्नप्रभृतयः वध्येष्वपिस्वराज्यपरिपन्थिष्वाततायिषुकृपावृद्ध्यास्वधर्म्मात्युद्धात्पूर्व्वो क्तमोहादिवशात्प्रच्युतिंप्रदर्शयति एतानिति जिघांसन्तंजिघांसीयादितिन्याया देतेषांहिंसानदोषायेत्याशङ्क्याह घ्नतोपीति॥ ३४॥पृथिवीप्राप्त्यर्थंहिहननमेतेषा मिष्यतेनचतत्प्राप्तिःसमीहितेतिकैमुतिकन्यायेनदर्शयतिअपीति नहिमहदपित्रै लोक्यलक्षणंराज्यंलब्धुंस्वजनहिंसायैमनोमदीयंस्पृहयति पृथिवीप्राप्त्यर्थंपुनर्व्वन्धु बधंनअहंधामीति किंवक्तव्यमित्यर्थः दुर्य्योधनादीनांशत्रूणांनिग्रहेप्रीतिप्राप्तिसम्भ वाद्युद्धंकर्त्तव्यमित्याशङ्क्याह निहत्येति॥ ३५॥

स्वामिकृतटीका।

एतदेवप्रपञ्चयति किंनोराज्येनइत्यादिसार्द्धद्वयेन॥ ३२॥इमेइतियदर्थमस्मा कंराज्यादिकमपेक्षितंतेएतेप्राणधनादित्यागमङ्गीकृत्ययुद्धार्थमवस्थिताःअतःकिम स्माकंराज्यादिभिःकृत्यमित्यर्थः ॥ ३३॥ ननुयदिकृपयात्वमेतान्नहंसितर्हित्वामेते राज्यलोभेनहनिष्यन्त्येवअतस्त्वमेवैतान्हत्वाराज्यंभुङ्क्ष्वेति तत्राह एतानित्या दिसार्द्धेन घ्नतोपिअस्मान्मारयतोपिएतान् ॥ ३४॥ अपीति त्रैलोक्यराज्यस्यापि हेतोःतत्प्राप्त्यर्थमपिहन्तुनेच्छामिकिंपुनर्महीमात्रप्राप्तयेइत्यर्थः॥ ३५॥

भाषा अनुवाद।

प्राणधनछोड़करमेरेसामनेसंग्राममेखड़ेहैं औरआचार्यपितृपितामहपुत्रपौत्र सकलदेखपड़ेहैं॥ ३२॥ ३३॥

जोकहोकिकृपाकरिकेचाहोतुमउन्हेंछोड़ोपरवेसबसंग्राममेंअबतुम्हैंमारें हींगेबिनमारेकिसीतरहनछोड़ेंगेइससेतुमइनसबकोसंहारकरिराज्यभोगकरो नकरोतोहेमधुसूदनयेलोगचाहेंहमैंमारेंपरन्तुमारतेऊये भीमादानातीपोतेभ तीजेससुरेसम्बन्धीइनकोहममारनेकीइच्छानहीं करतेहैं ॥ ३४॥ जिनकोहम तीनलोककीराज्यसम्पदाकेवास्तेभीमारनेकीइच्छानहींरखतेतोहेजनार्दनकेवल

CC-0. In Public Domain. Digitized by eGangotri

पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः तस्मान्नार्हावयंहन्तुन्धार्त्तराष्ट्रान्सबान्ध
वान् स्वजनंहिकथंहत्वासुखिनःस्याममाधव ३६

आनन्दगिरिकृतटीका ।

यदिपुनरमीदुर्य्योधनादयोननिगृह्येरन्भवन्तस्तर्हितैर्निगृहीतादुःखिताःस्यु
रित्याशंक्याह पापमेवेति यदिमेदुर्य्योधनादयोनिर्दोषानेवास्मान्युद्धभूमौहन्युस्तदै
तानग्निदोगरदश्चेत्यादिलक्षणोपेतानाततायिनोनिर्दोषस्वजनहिंसाप्रयुक्तं पापंपू
र्वमेवप्राप्निःसमाश्रयेदित्यर्थः अथवायद्यप्येतेभवन्वाततायिनस्तथाप्येतानतिशो
च्यान्दुर्य्योधनादीन्हिंसित्वातत्कृतंपापमस्मानेवाश्रयेदतोनास्माभिरेतेहन्तव्या
इत्यर्थः अथवागुरुभ्रातृसुहृत्प्रभृतीनेतान्हत्वावयंभाततायिनःस्यामःततश्चैतान्ह
त्वातत्कृतंपापमाततायिनोऽस्मानेवसमाश्रयेदिति युद्धादुपरमणमस्माकंश्रेयस्क
रमित्यर्थः फलाभावादनर्थसम्भवाच्चपरहिंसानकर्त्तव्याइत्युपसंहरति तस्मादिति
किञ्चराज्यसुखमुद्दिश्ययुद्धमुपक्रम्यतेनचस्वजनपरित्यागेसुखमुपपद्यतेतेन नकर्त्त
व्ययुद्धमित्याह स्वजनंहीति॥३६॥

स्वामिकृतटीका ।

ननुचअग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः क्षेत्रदारापहारीचषडेतेआतता
यिनः इतिस्मरणादग्निदाहादिभिःषड्भिर्हेतुभिरेतेतावदाततायिनःआततायि
नाञ्चबधोयुक्तएवआततायिनमायान्तंहन्यादेवाविचारयन्नाततायिबधेदोषोऽन्तु
र्भवतिकश्चनेतिवचनात्तत्राह पापमेवेत्यादिसार्द्धेन आततायिनमायान्तमित्यादि
कमर्थशास्त्रंतच्चधर्मशास्त्रात्तुदुर्ब्बलंयथोक्तंयाज्ञवल्क्येन स्मृत्योर्व्विरोधेन्यायस्तुबलवा
न्व्यवहारतः अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमितिस्मृतिःइतितस्मादाततायिनामप्ये
तेषामाचार्य्यादीनांबधेऽस्माकंपापमेवभवेत्अन्याय्यत्वात् अधर्मत्वाच्चैतद्वधस्यअमुत्र
वेहवानसुखंस्यात्इत्याह स्वजनंहीति॥३६॥

भाषा अनुवाद ।

पृथिवीभरकोराज्यकेहेतुदुर्य्योधनआदिकोनाशकरिकेहमारीक्याप्रीति अर्थात्
कौनबड़ाकार्य्यसिद्धहोगातात्पर्य्य यहकिकुटुम्बकोनाशकरिहमकोसंसारकासुख
नहींहैं ३५श्लोकहोकिघरमेआगलगावेयाविषपिलायभारेअथवाबधकरनेकोखड्ग
उठावे औरधनहरनकरेयाभूमिछीनलेऔरस्त्रीहरिलेनेवालायेछवोआततायी
कहातेहैं इनकेमारनेमेदोषनहींहै ऐसाशास्त्रअर्थात्नीतिमेलिखाहै इसवातपर
अर्जुनउत्तरदेतेहैं कियहआपकीअभिप्रायकेवलनीतियुक्तहै परधर्मशास्त्रकीअपे

CC-0. In Public Domain. Digitized by eGangotri

यद्यप्येतेनपश्यन्तिलोभोपहतचेतसः कुलक्षयकृतंदोषंमित्रद्रोहेचपातकम् ३७
कथंनज्ञेयमस्माभिःपापादस्मान्निवर्त्तितुं कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन ३८

आनन्दगिरिकृतटीका।

कथंतर्हिपरेषांकुलक्षयेस्वजनहिंसायाञ्चप्रवृत्तिस्तत्राह यद्यपीति लोभोपहतबुद्धित्वात्तेषांकुलक्षयादिप्रयुक्तदोषप्रतीत्यभावात् प्रवृत्तिविस्रम्भःसम्भवतीत्यर्थः॥३७॥परेषामिवास्माकमपिप्रवृत्तिविस्रम्भःसम्भवेदितिचेन्नेत्याह कथमिति कुलक्षयेतिकुलक्षयेमित्रद्रोहेचदोषंप्रपश्यद्भिरस्माभिस्तद्दोषशब्दितं पापंकथंनज्ञातव्यं तद्ज्ञानेतत्परिहारासम्भवादतोस्मात्पापान्निवृत्त्यर्थंतज्ज्ञानमपेक्षितमिति पापपरिहारार्थिनामस्माकंनयुक्तायुद्धेप्रवृत्तिरित्यर्थः॥३८॥

स्वामिकृतटीका।

ननुचैतेषामपिबन्धुबधोदोषेसमानेयथैवेतेबन्धुबधमङ्गीकृत्यापियुद्धेप्रवर्त्ततेतथैवमवानपिप्रवर्त्ततांकिमनेनविषादेनेत्याह तद्यपीतिद्वाभ्यां राजलोभेनोपहतंभ्रष्टविवेकंचेतोयेषांतेएतेदुर्य्योधनादयोयद्यपिदोषंनपश्यन्ति॥३७॥कथमिति तथाप्यस्माभिर्दोषंप्रपश्यद्भिरस्मात्पापान्निवर्त्तितुंकथंनज्ञेयनिवृत्तावेववुद्धिःकर्त्तव्येत्यर्थः३८

भाषा अनुवाद।

न्यायहनीतिपक्षदुर्बलहै याज्ञवल्कनेकहाहै किनीतिऔधर्मकाजहांविरोधहोतहांस्मृतिमूलकयुक्तिबलवतीहै औरअर्थशास्त्रसेधर्मशास्त्रप्रबलहै इससेआततायिस्वरूपआचार्य्यआदिककोनाशकरनेसेहमकोअवश्यमहापापहोगाऔरइनलोगोंकावधअयोग्यऔअधर्मतथालोकपरलोकमेअयशऔदुःखकामूलहै तोकहोहेमाधवहम अपनेस्वजनकोविनाशकरिकेकैसेसुखीहोंगेइससेबन्धुसमेतधृतराष्ट्रकेपुत्रोंकोमारनेकोमेरीसामर्थनहीहै॥३६॥जोकहोकियहवाततोदोनोओरसमानहैं परन्तु वेलोगइसकोनमानिकेजैसेयुद्धकरनेकोतयारखड़ेहैं तैसेतुमभीसंग्रामइनकेसायकरोइसबातमेंहेदकरनेकाक्याप्रयोजनहै इसपरकहतेहैं किराज्यलोभसेविचाररहितदुर्य्योधनआदिकुलक्षयकृतदोषऔमित्रद्रोहसेजोपातकअशुभरूपतिसेनहीदेखतेऔरनहीगिनतेहैं॥३७॥ तौभीहेजनार्दनहमलोगकुलक्षयकृतदोषकोजानिबुझकेइसमहापापसेक्योनशान्तहोंय अर्थात्हमकोयुद्धसेनिवृत्तहोनाहीं उचितहै॥३८॥

CC-0. In Public Domain. Digitized by eGangotri

कुलक्षयेप्रणश्यन्तिकुलधर्माःसनातनाः धर्मेनष्टेकुलंकृत्स्नमधर्मोभिभवत्युत ३९
अधर्माभिभवात्कृष्णप्रदुष्यन्तिकुलस्त्रियः स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसङ्करः ४०
सङ्करोनरकायैवकुलघ्नानांकुलस्यच पतन्तिपितरोह्येषांलुप्तपिण्डोदकक्रियाः ४१

आनन्दगिरिकृतटीका ।

कोसौकुलक्षयेदोषोयद्दर्शनाद्युष्माकंयुद्धादुपरतिरपेक्ष्यतेतत्राह कुलेतिकुल स्यहिक्षयेकुलसम्बन्धिनश्चिरन्तनाधर्मास्तत्तदग्निहोत्रादिस्त्रियासाध्यानाशमपया न्तिकर्तुरभावादित्यर्थः धर्मनाशेपिकिंस्यादितिचेत्तत्राह धर्मइति कुलप्रयुक्तेधर्मे कुलनाशादेवनष्टकुलक्षयकरस्यकुलपरिशिष्टमखिलमपितदीयोऽधर्माऽभिभवत्यध र्मभूयिष्ठंतस्यकुलंभवतीत्यर्थः॥ ३९॥ कुलक्षयकृतेऽवशिष्टकुलस्याधर्मप्रवणत्वेकोदो षःस्यादितितत्राह अधर्मेति पापप्रचुरेकुलेप्रसूतानांस्त्रीणांप्रदुष्टत्वेकिंप्रदुष्यति तत्राह स्त्रीष्विति॥ ४०॥वर्णसङ्करस्यदोषपर्य्यवसायितामादर्शयति सङ्करइति कुलक्षयकराणांदोषान्तरंसञ्चिनोतिपतन्तीति कुलक्षयकृतांपितरोनिरयगामि नःसम्भवन्तीत्यत्रहेतुमाह लुप्तेति पुत्रादीनांकर्तृणामभावात्लुप्तापिण्डस्योदकस्य चक्रियायेषां तेतथाततश्चप्रेतत्वपराहुत्तिकारणाभावान्नरकपतनमेवावश्यकमाप द्येदित्यर्थः॥ ४१॥

स्वामिकृतटीका ।

तमेवदोषंदर्शयतिकुलक्षयइत्यादि सनातनाःपरम्पराप्राप्ताः उतअपिअवशिष्टं कृत्स्नमपिकुलंअधर्मोभिभवति प्राप्नोतीत्यर्थः॥ ३९॥ततश्चअधर्माभिभवादित्यादि ॥ ४०॥एवंसतिसङ्करइत्यादि एषांकुलघ्नानांपितरःपतन्तिह्रियस्मात्लुप्ताःपिण्डो दकक्रियाःयेषांतेतथा॥ ४१॥

भाषा अनुवाद ।

सोईकुलक्षयकृतदोषकहतेहैं किकुलक्षयकरनेसेसनातनजोकुलधर्मसोनष्ट होताहैऔरधर्महानिहोनेसेबाकीजोकुलउसेअधर्मग्रसलेताहै ३९ अधर्मकेजोर सेकुलकामिनीसबभ्रष्टआचारनीहोतीहैं औरस्त्रियोंकेदुष्टआचरनकरनेसेवरन सङ्करपैदाहोतेहैं ४० तोफिरिवरनसङ्करकुलघानियोंकेकुलकोनरकका हेतुहो तेहैं औरउससेकुलनाशकोंकेपितरपिण्डापानीसेरहितहोनरकमेपड़तेहैं ४१

CC-0. In Public Domain. Digitized by eGangotri

दोषैरेतैःकुलघ्नानांवर्णसङ्करकारकैः उत्साद्यन्तेजातिधर्माःकुलधर्माश्चशाश्वताः४२
उत्सन्नकुलधर्माणांमनुष्याणांजनार्दन नरकेनियतंवासोभवतीत्यनुशुश्रुम ४३
अहोवतमहत्पापंकर्तुंव्यवसितावयं यद्राज्यसुखलोभेनहन्तुंस्वजनमुद्यताः ४४

आनन्दगिरिकृतटीका ।

कुलक्षयकृतामेतैरुदाहृतैर्दोषैःवर्णसङ्करहेतुभिर्जातिप्रयुक्ताश्चधर्माःसर्वैस सुत्साद्यन्तेतेनकुलक्षयकारणादुद्वादुपरतिरेवश्रेयसीत्याह दोषैरिति॥ ४२॥किञ्च जातिधर्मेषुकुलधर्मेषुचउत्सन्नेषुतत्तद्धर्मवर्जितानांमनुष्याणामनधिकृतानांनरकप तनध्रौव्यादनर्थकरमिदमेवहेयमित्याह उत्सन्नेति यथोक्तानांमनुष्याणांनरकपा तस्यावश्यकत्वेप्रमाणमाह इत्यनुशुश्रुमेति ॥४३॥ राज्यप्राप्तिप्रयुक्तसुखोपभोगल ब्धतयास्वजनहिंसायांप्रवृत्तिरस्माकंगुणदोषविभागविज्ञानवतामतिकष्टेतिपरिभ्र ष्टहृदयःसन्नाह अहोवतेति ॥४४॥

स्वामिकृतटीका ।

उक्तदोषमुपसंहरति दोषैरित्यादिद्वाभ्यां उत्साद्यन्तेलुप्यन्तेजातिधर्मावर्णध र्माःकुलधर्माश्चेतिचकारादाश्रमधर्मादयोपिगृह्यन्ते॥४२॥ उत्सन्नेति उत्सन्ना: कुलधर्माःयेषामिति उत्सन्नजातिधर्मादीनामप्युपलक्षणंअनुशुश्रुमश्रुतवन्तोवयं प्रायश्चित्तमकुर्वाणाःपापेष्वभिरतानराः अपश्चात्तापिनःपापान्निरयान्यान्तिदा रुणानित्यादिवचनेभ्यः॥४३॥बन्धुबधाध्यवसायेनसन्तापमानआह अहोवतेत्यादि स्वजनंहन्तुमुद्यताइतियत्एतन्महत्पापंकर्तुमध्यवसायात्कृतवन्तोवयं अहोवत दृष्टत्कष्टमित्यर्थः ॥४४॥

भाषाअनुवाद ।

कुलघातियोंकेवरनसङ्करकरनेवालेइनदोषोंसेसनातनीजातिधर्मऔकुलध र्मआश्रमधर्मसबउच्छिन्नहोजातेहैं इससेकुलनाशकारीयुद्धसेनिवृत्तहोनाहीप रमकल्यानहै४२औरहेजनार्दन जिनमनुष्योंकेकुलधर्मऔजातिधर्मउच्छिन्नहो गयेउनकोनिरन्तरघोरनरकमेवासकरनीहोतीहै यहमैनेपुराणइतिहासऔर धर्मशास्त्रमेसुनाहै॥४३॥ देखोगुणदोषकेविशेषज्ञानवानहोकेभीजोहमराज्यसु खकेलोभसेस्वजनबन्धुलोगोंकोसंग्राममेमारनेकोतयारहोगयेकिऐसेमहापापक र्मकरनेकाउद्योगकियाहाययहबड़ाकष्टऔरविषादभयाबन्धुबधसेमहापापछोड औरकहोक्याहाथलगनाहै ॥४४॥

CC-0. In Public Domain. Digitized by eGangotri

यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः धार्त्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत् ४५

सञ्जयउवाच ।

एवमुक्त्वार्जुन.संख्येरथोपस्थउपाविशत् विसृज्यसशरंचापंशोकसंविग्नमानसः४६

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे श्रीकृष्णार्जुनसंवादेसैन्य दर्शनोनामप्रथमोऽध्यायः ॥१॥

आनगिरिकृतटीका ।

तदेवंयुद्धेविमुखःसन्परपरिभवप्रतीकाररहितोवर्त्तेथास्तर्हित्वाशस्त्रपरिग्र हरहितंशत्रुशस्त्रपाणयोधार्त्तराष्ट्रानिभीयुरित्याशङ्क्याह यदीति प्राणत्राणादपि प्रकृष्टोधर्मःप्राणभृतामहिंसेतिभावः॥४५॥यथोक्तमर्जुनस्यवृत्तान्तंसञ्जयोधृतराष्ट्रं राजानंप्रतिप्रवेदितवान्तमेवप्रवेदनप्रकारंदर्शयति एवमिति प्रदर्शितेनप्रका रेणभगवन्तंप्रतिविज्ञापनंकृत्वाशोकमोहाभ्यांपरिभूतमानसःसन्नर्जुनःसंख्येयुद्धम ध्येशरेणसहितंगाण्डीवंत्यक्त्वानयोत्स्येहमिति ब्रुवन्मध्येरथस्यसन्त्रासमेवश्रेयस्क रंमत्वोपर्युपविष्टवानित्यर्थः ॥४६॥ इतिआनन्दगिरिटीकायांप्रथमोऽध्यायः ॥१॥

स्वामिकृतटीका ।

एवंसन्तप्तःसन्मृत्युमेवाशंसमानआह यदिमामित्यादि अकृतप्रतीकारंदृष्ट्वा तुष्णीमुपविष्टंमांयदिहनिघ्नन्तितर्हितद्धननंमम क्षेमतरंअत्यन्तहितंभवेत्पापान्नि वृत्तेः॥४५॥ततःकिंवृत्तमित्यपेक्षायांसञ्जयउवाच एवमुक्तेत्यादि संख्येसंग्रामेरथो पस्थे रथस्योपरिउपाविशत्उपविवेश शोकेनसंविग्नंप्रकम्पितंमानसं चित्तंयस्य तथा ॥४६॥ इतिश्रीधरस्वामिकृतायांप्रथमोऽध्यायः ॥१॥

भाषा अनुवाद ।

औरजोकहोकियुद्धसेविमुखवेहथियारतुमकोसंग्राममेधृतराष्ट्रकेपुत्रमिलका रसाधीटलेंगेतोवहमारनाउनकाऔरमेरामरनामेरेवास्तेकल्यानकरहोगाकि जिसमेपापकासञ्चारभीनहींहै॥४५॥ अर्जुनकावृत्तान्तसञ्जयधृतराष्ट्रसेकहतेभ येकिहेराजन्धृतराष्ट्रफेरतोअर्जुनश्रीभगवानसेऐसीबातैंकहिकरकेऔरशोकस न्तापसेव्याकुलऔरपीड़ितमनसहाउदासजयकीआससेनिराशहोहाथसेधन्वावा नकोभीत्यागकररथकेउपरबैठगये ॥४६॥

इतिश्रीभगवद्गीतायांकान्यकुब्जजगन्नाथशुक्लविरचितायांमनभावनीनामटी कायांश्रीकृष्णार्जुनसंवादेसैन्यदर्शनोनामप्रथमोऽध्यायः ॥१॥ सम्वत् १९२९ ॥

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता।

द्वितीयोऽध्यायः।

सञ्जयउवाच।

तन्तथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदन्तमिदंवाक्यमुवाचमधुसूदनः॥ १॥

आनन्दगिरिकृतटीका।

अहिंसापरमोधर्मोभिक्षाशनञ्चेत्येवंलक्षणयाबुद्ध्यायुद्धवैमुख्यमर्जुनस्यश्रुत्वास्व पुत्राणांराज्यैश्वर्यमप्रचलितमबधार्य्यस्वस्यहृदयंधृतराष्ट्रंदृष्ट्वातस्यदुराग्रामपनेष्या मीतिमनीषयासञ्जयस्तंप्रत्युक्तवानित्याह सञ्जयइति परमेश्वरेणस्मार्य्यमाणोपि क्षत्याक्षत्येसहसानार्जुनः सस्मारविपर्य्ययप्रयुक्तस्यशोकस्यदृढ़तरमोहहेतुत्वात्तथा पितंभगवान्नोपेक्षितवानित्याह तन्तथेति तंप्रकृतंपार्थंतथास्वजनमरणप्रसङ्गदर्श नेनकृपयाकरुणयाविष्टमधिष्ठितमश्रुभिः पूर्णेसमाकुलेचेक्षणेयस्यतं अश्रुव्याप्ततर लाक्षंविषीदन्तंशोचन्तमिदंवक्ष्यमाणंवाक्यं सोपपत्तिकंवचनंमधुनामानमसुरंसू दितवानितिमधुसूदनोभगवानुक्तवान्नतुयथोक्तमर्जुनमुपेक्षितवानित्यर्थः॥ १॥

स्वामिकृतटीका।

द्वितीयेशोकसन्तप्तमर्जुनंब्रह्मविद्यया प्रतिबोध्यहरिश्चक्रेस्थितप्रज्ञस्यलक्षणं ततःकिंवृत्तमित्यपेक्षायां सञ्जयउवाच तंतथेति अश्रुभिःपूर्णेआकुलेईक्षणेयस्यतं तथाउक्तप्रकारेणविषीदन्तमर्जुनम्प्रतिमधुसूदनइदंवाक्यमुवाच॥ १॥

भाषा अनुवाद।

अहिंसापरमधर्महै इससेभिक्षाकरिनिर्वाहकरनाउचितहै सञ्जकेमुखसे ऐसीबातेंअर्जुनकीकहीसुनिऔरयुद्धसेविमुखजानिअपनेपुत्रोंकाअचलराज्यमा निमनप्रसन्नस्वस्थहृदयराजधृतराष्ट्रकोदेखिफेरिसञ्जयधृतराष्ट्रकीउसदुष्टआशा कोदूरकतेयहबोलेहेराजन्इसप्रकारकृपायुक्तअश्रुधारापूर्णलोचनविषादकरते हुयेअर्जुनसेदुखमोचन श्रीभगवानब्रह्मविद्याजोज्ञानतिससेप्रबोधकरतयहवचम कहतेभये॥ १॥

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच ।

कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन २
माक्लैव्यंगच्छकौन्तेयनैतत्त्वय्युपपद्यते क्षुद्रंहृदयदौर्ब्बल्यंत्यक्त्वोत्तिष्ठपरन्तप ३

आनन्दगिरिकृतटीका ।

किन्तद्वाक्यमित्यपेक्षायामाह श्रीभगवानिति कुतोहेतोस्त्वात्वांसर्व्वक्षत्रियप्रवरं कश्मलंमलिनंशिष्टगर्हितंयुद्धात्पराङ्मुखत्वंविषमेसभयस्थानेसमुपस्थितंप्राप्तमनार्य्यैःशास्त्रार्थमविद्भिर्जुष्टंसेवितमस्वर्ग्यंस्वर्गानर्हंप्रत्यवायकारणमिहचाकीर्त्तिकरमयशस्करमर्जुननाम्नाप्रख्यातस्यतवनैतत्युक्तमित्यर्थः॥२॥ पुनरपिभगवानर्जुनंप्रत्याह क्लैव्यमिति क्लैव्यंक्लीवभावमधैर्य्यंमास्मगमःमागाः हेपार्थपृथातनयनहित्वयिमहेश्वरेणापिक्षताहवेप्रख्यातपौरुषेमहामहिमन्येतदुपपद्यते क्षुद्रंक्षुद्रत्वकारणंहृदयदौर्ब्बल्यंमनसोदुर्ब्बलत्वमधैर्य्यंत्यक्त्वोत्तिष्ठयुद्धायोपक्रमंकुरु हेपरन्तपपरंशत्रुत्तापयतीतितथासम्बोध्यते ॥३॥

स्वामिकृतटीका

तदेववाक्यमाह कुतइति कुतोहेतोस्त्वात्वांविषमेसङ्कटेइदंकश्मलमुपस्थितमयंमोहःप्राप्तोयतआर्यैरसेवितमस्वर्ग्यमधर्म्यमयशस्करञ्च २ माक्लैव्यमिति तस्मात् हेपार्थक्लैव्यंकातर्य्यंमागच्छनप्राप्नुहियतस्त्वय्येतन्नोपपद्यतेयोध्यंनभवतिक्षुद्रंतुच्छंहृदयदौर्ब्बल्यंकातर्य्यंत्यक्त्वायुद्धायोत्तिष्ठ हेपरन्तपशत्रुतापन् ॥३॥

भाषाअनुवाद ।

अर्जुनकोकातरदेखियहवचनश्रीकृष्णबोलेकिहेअर्जुनऐसेअसमयमेलड़ाईकेबीच मूरखकायरशास्त्रहीनमनुष्योंकेयोग्यजोलोकमेंदुर्यशकरनेवालाकर्महैं औरअस्वर्ग्यजिससेस्वर्गजायऔरनरकमिलैऐसाकश्मलकहेमोह अर्जुनइसनामसेभूतलप्रसिद्धवीरतुमऐसेकोआयकरप्राप्तहुआयहबड़ाहीआचरजहैं॥२॥फेरभीभगवान अर्जुनसेकहतेहैं किहेपरन्तपशत्रुसंहारकरनेवालेअर्जुनहेकौन्तेयकुन्तीपुत्रवीर भावछोड़इसक्लीवकहेनपुंसककेभावकोनगहोयहतुमारेयोग्यनहींहै इसआचरनमेतुमारीशोभाजगतमेकुछनहींइससेइसक्षुद्रकहे तुच्छहृदयकीदुर्ब्बलताकहेकादरपनकोछोड़करउठोऔरधीरजधरिसमैकेअनुसारकार्यकरो कुन्तीपुत्रसम्बोधनभेजनायाकिमातृस्वभावकन्याकोहोतापुत्रकोपितृस्वभावहीउचितहैऔपरन्तपसेसोचायाकिउठकरशत्रुवोंकोमारलोतुमअनेकवारसंग्राममेजयपायेहो॥३॥

CC-0. In Public Domain. Digitized by eGangotri

अर्जुनउवाच।

कथंभीष्ममहंसंख्येद्रोणञ्चमधुसूदन इषुभिःप्रतियोत्स्यामिपूज र्हावरिसूदन४

आनन्दगिरिकृतटीका।

एवंभगवताप्रतिबोध्यमानोपिशोकाभिभूतचेतस्त्वाद्प्रतिबुध्यमानःसन्नर्जुनःस्वाभिप्रायमेवप्रकृतंभगवन्तंप्रत्युक्तवान्कथमित्यादिनाभीष्मंपितामहंद्रोणञ्चाचार्य्यंसंख्येरणेहेमधुसूदनइषुभिःयत्रवाचापियोत्स्यामीतिवक्तुमनुचितंतत्रकथंवाणैर्योत्स्यइतिभावः सायकैस्तेकथंप्रतियोत्स्येतौहिपूजार्हौकुसुमादिभिरर्चनयोर्ध्यौहेअरिसूदनसर्व्वानेवारीन्यत्नेनसूदितवानितिभगवानेवंसम्बोध्यते४ राज्ञोधर्म्मोपियुद्धेगुर्व्वादिवधेष्टत्तिमात्रफलत्वंगृहीत्वापापमारोप्यब्रूतेगुरूनितिगुरून्भीष्मद्रोणादीन्भावादींश्चात्मप्राप्तान्अहिंसित्वामहानुभावान्महामाहत्व्यान्श्रुताध्ययनसम्पन्नान्श्रेयःप्रशस्ततरंयुक्तंभोक्तुमभ्यवहर्तुंभैक्ष्यंभिक्षाणांसमूहंभिक्षाशनंनृपादीनांनिषिद्धमपिइह

स्वामिकृतटीका।

नाहंकातरत्वेनयुद्धादुपरतोऽस्मिकिन्तुयुद्धस्यान्याय्यत्वाद्धर्मत्वाच्चेत्याह अर्जुनउवाच कथमिति भीष्मद्रोणौपूजार्हौपूजायामर्हौयोग्यौतौप्रतिकथमहंयोत्स्यामितत्रापीषुभिर्यत्रवाचापियोत्स्यामीतिवक्तुमनुचितंतत्रवाणैः कथंयोत्स्यामीत्यर्थः हेअरिसूदनशत्रुविमर्दन४ नर्हितानहत्वातवदेहयात्रापिनस्यादितिचेत्तत्राहगुरूनिति गुरून्द्रोणाचार्य्यादीनहत्वापरलोकविरूद्धगुरुवधमकृत्वेहलोकेभिक्षान्नमपिभोक्तुंश्रेयउचितंविपश्चेतुनकेवलंपरत्रदुःखंकिन्त्विहैवच नरकदुःखमनुभवेयमित्याह हत्वेति गुरून्हत्वेहैवरुधिरेणप्रदिग्धान्प्रकर्षेणलिप्तान्अर्थकामात्मकान्

भाषा अनुवाद।

इसप्रकारभगवतसेप्रबोधकरायेभीगयेअर्जुनतौभीशोकग्रस्तअपनेमनकामनोरथप्रकाशकरतेहुये कृष्णभगवानसेफेरकहनेलगेकिहेमधुसूदनपूजाकरनेकेयोग्यजोभीष्मपितामहऔरद्रोणाचार्य्यतिनसेसंग्राममेवाणोंसेकैसेयुद्धकरें औउनकोमारैंजिनसेवचनसेभीसंग्रामकरनेकीवातनहींकरसकतेहैं हेअरिसूदनकहेशत्रुनाशनअभिप्राययहकियत्नकहेंउपायसेशत्रुनाशकरनेवाले॥ ४॥ फेरभीअर्जुनकहतेहैं कियद्यपियुद्धकरनाराजोंकाधर्महै तौभीलोभसेजीविकाहीकेअर्थवेअनर्थरूपपापकरतेहैं औरजोकहोकिइनलोगोंकोविनामारेतुमारीदेहयात्राकहेजीवनवृत्तिभोजनवस्त्रभीनचलेगानिर्व्वाहकहोकैसेसंसारमेहोगाइसवातपर

CC-0. In Public Domain. Digitized by eGangotri

गुरून्हत्वाहिमहानुभावान्श्रेयोभोक्तुंभैक्ष्यमपीहलोके हत्वार्थकामांस्तुगुरूनिहैव भुञ्जीयभोगान्रुधिरप्रदिग्धान्॥

आनन्दगिरिकृतटीका।

लोकेव्यवहारभूमौनहिगुर्वादिहिंसयाराज्यभोगोऽपेक्ष्यतेकिन्त्वहत्वागुर्वादीनर्थ कामानेवभुञ्जीयनमोक्षमनुभवेयमिहैवभोगोनस्वर्गे अर्थकामानेवविशिनष्टिभो गानितिभुञ्जतद्गतिभोगास्तान्रुधिरप्रदिग्धान्लोहितलिप्तानिवात्यन्तगर्हितानतो भोगान्गुरुबधादिसाध्यान्परित्यज्यभिक्षासनमेवयुक्तमित्यर्थः॥ क्षत्रियाणांस्वधर्म त्वाद्युद्धमेवश्रेयस्करमित्याशङ्क्याह नचैतदिति एतदपिनजानीमोभैक्ष्ययुद्धयोःक तरन्नोऽस्माकंगरीयःश्रेष्ठंकिंभैक्ष्यंहिंसाशून्यत्वादुतयुद्धंस्वदृत्तित्वादितिसन्दिग्धाच जयस्थितिःकिंसाम्यमेवोभयेषांयद्वावयंजयेमातिशयेमहियदिवानोऽस्मान्धार्त्तरा ष्ट्रादुर्योधनादयोजयेयुःजातोपिजयोनफलवान्यतोयान्बन्धून्हत्वानजिजीविषा मोजीवितुंनेच्छामस्तेएवावस्थिताःप्रमुखेसम्मुखेधार्त्तराष्ट्राधृतराष्ट्रस्यापत्यानितस्मा

स्वामिकृतटीका।

भोगानभुञ्जीयाशीयांयद्वाअर्थकामानितिगुरूणांविशेषणंअर्थतृष्णाकुलत्वादेतेताव द्युद्धान्ननिवर्त्तेरंस्तस्मादेतद्वधःप्रसज्येतैवेत्यर्थः तथाचयुधिष्ठिरंप्रतिभीष्मोक्तंअर्थ स्यपुरुषोदासोदासस्त्वर्थानकस्यचित् इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैरिति॥ किञ्चयद्यधर्ममङ्गीकरिष्यामस्तथापिकिमस्माकंजयःपराजयोवागरीयान्भवे दितिनज्ञायतदित्याहनचैदितिद्वयोर्मध्येनोऽस्माकंकतरत्किन्नामगरीयोऽधिकतरंभ विष्यतीतिनविद्मःतदेवद्वयंदर्शयतियद्वेतियद्वाएतान्वयंजयेमजेष्यामःयदिवानोऽस्म

भाषा अनुवाद।

कहतेहैंकिजिसलियेमहानुभावमहात्मागुरूलोगोंकोनमारकेभीषमांगखानाभीमे रेजानलोकमेश्रेयकहेअतिउत्तमकल्यानरूपहै औरनहींगुरूआदिवडेलोगोंको मारिउनकेलोहूसेलपेटेभोगहमचाहतेक्योंकिजोकहोकिपरलोकमेजोहोगासोहो गाकिसनेदेखातोपरलोकहीमेदुःखनहींहैयहांभीदुर्यशऔसन्तापरूपदुःखहैऔर जोकहोकिलोकमेतोसुखमिलेगातोतुच्छसुखकेहेतुमुक्तिऔरस्वर्गलोकमेयशकौन छोडेगा॥ और जोहमअधर्मअङ्गीकारकरैंतौभीतोहमारीजययापराजयहोगी यहभीहमनहींजानतेहैंकिदोनोमेंसेक्याहोगासोईकहतेहैंकिहोयहमीरणमेउन कोजीतलेंनतुवावेईसबहमेजीतैंपरन्तुहमारीजीतहोनेसेभीविचारदेखोकिवहह

CC-0. In Public Domain. Digitized by eGangotri

नचैतद्विद्मःकरतन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः यानेवहत्वानजिजीविषा मस्तेवस्थिताः प्रमुखेधार्त्तराष्ट्राः ६ कार्पण्यदोषोपहतस्वभावःपृच्छामित्वांधर्मसम्मू ढ़चेताः यच्छ्रेयःस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेहंसाधिमांत्वांप्रपन्नं ७

आनन्दगिरिकृतटीका ।

ह्नैच्याद्युद्धस्यश्रेष्ठत्वंनसिद्धमित्यर्थः ॥६॥ समधिगतसंसारदोषजातस्यातितरांनि र्विण्णस्यमुमुक्षोरुपसन्नस्यात्मोपदेशसंग्रहणेऽधिकारंसूचयति कार्पण्येति योऽल्पां स्वल्पामपिस्वर्गतिंनेच्छतेसकृपणस्तद्विपरीतोऽखिलोऽनात्मविदप्राप्तपरमपुरुषार्थ तयाकृपणोभवतियोवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः तस्यभावःकार्पण्यंदैन्यंतेनदोषेणोपहतोदूषितःस्वभावश्चित्तमस्येतिविग्रहः सोऽहं दृच्छाभ्यनुयुञ्जेत्वात्वांधर्मसंमूढ़चेताःधर्मेधारयतीतिपरंब्रह्मतस्मिन्संमूढ़मविवेक तांगतंचेतोयस्यमेतितथाहमुक्तः किंश्रेयस्यन्निश्चितमैकान्तिकमनापेक्षिकंश्रेयः स्यान्नरोगनिवृत्तिवदनैकान्तिकमनात्यन्तिकं स्वर्गवदापेक्षिकंवातन्निःश्रेयसंमेम ह्यंप्रब्रूहिनापुत्रायाशिष्यायेतिनिषेधात्नप्रवक्तव्यमिति मामंस्थाःयतःशिष्यस्तेहं

स्वामिकृतटीका ।

नेतेजयेयुर्जेष्यन्तीति किञ्चास्माकंजयेऽपिफलतःपराजयएवेत्याह यानिति यानेव हत्वाजीवितुंनेच्छामस्तएवैतेसम्मुखेऽवस्थिताः ॥६॥ कार्पण्येत्यादि तस्मादेतान् हत्वाकथंजीविष्यामइतिकार्पण्यंदोषःकुलक्षयकृतः ताभ्यामुपहतोऽभिभूतःस्वभा वःशौर्यलक्षणोयस्यसोऽहंत्वांपृच्छामितथाधर्मेसंमूढ़ंचेतोयस्यसःयुद्धंत्यक्त्वाभिक्षाट नमपिक्षत्रियस्यधर्मोऽधर्मोवेतिसन्दिग्धचित्तःसन्नित्यर्थःअतोमेयन्निश्चितंश्रेयःस्या त्तद्ब्रूहिकिञ्चतेऽहंशिष्यःशासनार्होऽतस्त्वांप्रपन्नंशरणङ्गतंमांशाधिशिक्षय ॥७॥

भाषा अनुवाद ।

मारीहारहीहैक्योंकिजिनकोनाशकरिकेहमऔरसंसारमेप्राणधारणकरनाहीं चाहतेसोईधृतराष्ट्रकेपुत्रसवरणभूमिमेहमारेसामनेयुद्धकेअर्थखडेहैं६इनकुटुम्ब केलोगोंकाबधकरिकेअपनेप्राणकैसेकरिराखैंगेइससचिन्ताकोकार्पण्यकहतेऔर दोषजोकुलक्षयकृतपापहै यहीदोनोबातोंसेहमारीशूरतानष्टहोगईइससेधर्म विचारमेहमारीबुद्धिभ्रष्टहैं किसंग्रामछोड़भिक्षान्नभोजनकरनाक्षत्रियकोउचित किअनुचितइससन्देहसेव्याकुलहोहमआपसेपूछतेहैं किजिससेअत्यन्तपरमक ल्यानहमारोहोसोआपकृपाकरिकहोक्योंकिहमआपकेशिष्यऔशरणागतहैं श रणागतपरदयाकरनामहात्माकोउचितहै ॥७॥

CC-0. In Public Domain. Digitized by eGangotri

नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणां अवाप्यभूमावसपत्नमृद्धं राज्यंसुराणामपिचाधिपत्यं॥८॥ सञ्जयउवाचएवमुक्त्वाहृषीकशंगुड़ाकेशःसरन्तपःनयोत्स्यइतिगोविन्दमुक्त्वातूष्णींबभूवह ॥९॥

आनन्दगिरिकृतटीका ।

भवामिशाध्यनुशाधिमांनिःश्रेयसंत्वामहंप्रपन्नोस्मि॥७॥कुतोनिःश्रेयसमवेच्छसि तत्राह नहीति तस्मान्नप्रपश्यामिकिंनप्रपश्यसिसमापनुद्यादपनयेत्यच्छोकमुच्छोषणंप्रतपनमिन्द्रियाणांतन्नपश्यामि ननुशत्रून्निहत्यराज्येप्राप्तेशोकनिवृत्तिस्तेभविष्यतिनेत्याह अवाप्येति अविद्यमानःसपत्नःशत्रुर्यस्यतद्युक्तंराज्यंराज्ञःकर्मप्रजारक्षणप्रशासनादितदिदमस्यांभूमाववाप्यापिशोकापनयकारणंनपश्यामीत्यर्थःतर्हि देवेन्द्रत्वादिप्राप्तौशोकापनयस्तेभविष्यतिनेत्याह सुराणामपीति तेषामाधिपत्यं अधिपतित्वंस्वाभ्यमिन्द्रत्वंब्रह्मत्वंवातदवाप्यापिममशोकोनापगच्छेदित्यर्थः॥८॥

एवमर्ज्जुनेनखाभिप्रायंभगवन्तम्प्रतिप्रकाशितंसञ्जयोराजानमावेदितवानित्याह सञ्जयइति एवम्प्रागुक्तप्रकारेणभगवन्तंप्रत्युक्त्वापरन्तपोऽर्जुनोनयोत्स्येनसम्प्रहरिष्येअत्यन्तासह्यशोकप्रसङ्गादितिगोविन्दमुक्त्वातूष्णीमब्रुवन्बभूवकिलेत्यर्थः॥९॥

स्वामिकृतटीका ।

त्वमेवविचार्य्ययद्युक्तंतत्कुर्व्वितिचेत्तत्राह नहिप्रपश्यामीति इन्द्रियाणामुच्छोषणमतिशोषकरंमदीयंशोकंयत्कर्मअपनुद्यापनयेत्तदहंनपश्यामीतियद्यपिभूमौनिष्कण्टकंसमृद्धंराज्यंप्राप्स्यामितथासुरेन्द्रत्वमपियदिप्राप्स्यामि एवमभीष्टंतत्सर्व्वमवाप्यापिशोकापनोदनोपायंनप्रपश्यामीत्यर्थः॥८॥ एवमुक्त्वार्जुनःकिंकृतवानित्यपेक्षायां सञ्जयउवाच एवमिति ॥९॥

भाषा अनुवाद ।

जोकहोकितुमीविचारकरकेजोकरनेयोग्यहोसोकरोतिसपरकहतेहैं कि इन्द्रियोंकीचैतन्यशक्तिकानाशकरनेवालाजोयहशोकहमैआयकेप्राप्तभयाहै सो किसीउपायसेदूरहोगायहहमकिसीभांतिनहींदेखतेहैं औरयद्यपिहमनिष्कण्टकपृथिवीभरकाराज्यकरैंयादेवाधिपत्यकहेस्वर्गराज्यइन्द्रपदप्राप्तकरैं तौभीइसशोकसागरकेपारजानेकीउपायहमनहींदेखतेहैं॥८॥इसप्राकारकीबातेंभगवानसेकहकरअर्जुननेफेरक्याकियासोसञ्जयधृतराष्ट्रसेकहतेहैंकिनिद्राविजयीशत्रुनाशनधनंजयअर्ज्जुनभगवानसेकहाकिहेगोविन्दहमयुद्धनकरेङ्गेजोहोयसोहोययहकहिकरमौनहीरहे॥९॥

CC-0. In Public Domain. Digitized by eGangotri

तमुवाचहृषीकेशःप्रहसन्निवभारत सेनयोरुभयोर्मध्येविषीदन्तमिदंवचः १०

श्रीभगवानुवाच।

शाङ्करभाष्यम्।

दृष्ट्वातुपाण्डवानीकमित्यारभ्यनयोत्स्यइतिगोविन्दमुक्त्वातूष्णींबभूवहेत्येतदन्तः प्राणिनां शोकमोहादिसंसारदुःखबीजभूतदोषोद्भवकारणहेतुप्रदर्शनार्थत्वेनव्याख्येयोग्रन्थस्तथाह्यर्जुनेनराज्यगुरुपुत्रमित्रसुहृत्स्वजनसम्बन्धिबान्धवेष्वहमेषांममैतेइत्येवंभ्रान्तिप्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तावात्मनःशोकमोहौप्रदर्शितौ कथंभीष्ममहंसङ्ख्येइत्यादिना शोकमोहाभ्यांह्यभिभूतविवेकविज्ञानःस्वतएवक्षात्रधर्मेयुद्धेप्रवृत्तोपितस्माद्युद्धादुपरतमपरधर्मञ्चभिक्षाजीवनादिकंकर्तुंप्रवृत्तेः

आनन्दगिरिकृतटीका।

तमर्जुनंसेनयोर्वाहिन्योरुभयोर्मध्येविषीदन्तंविषादंकुर्वन्तमतिदुःखंशोकमोहाभ्यांअभिभूतंस्वधर्म्मात् प्रच्युतप्रायंप्रतीत्यप्रहसन्निवोपहासंकुर्वन्निवतदाश्वासार्थंहेभारतभारतान्वयइत्येवंसम्बोध्यभगवानिदंप्रश्नोत्तरंनिःश्रेयसाधिगमसाधनंवचनमूचिवानित्याह तमुवाचेति ॥१०॥

तदेववचनमुदाहरतिश्रीभगवानितिअतीतसन्दर्भस्येत्यनर्थंविवक्षित्वातस्मिन्नेववाक्यविभागमवगमयतिदृष्ट्वात्विति धर्मसंमूढेनेकुरुक्षेत्रेइत्यादिराद्यश्लोकस्तावदेकंवाक्यंशास्त्रस्यकथासम्बन्धपरत्वेनपर्य्यवसानात्दृष्ट्वेत्यारभ्ययावत्तूष्णींबभूवहेतितावच्चैकंवाक्यंहृतआरभ्यइदंवचइत्येतदन्तोग्रन्थोभवत्यपरंवाक्यमितिविभागःनन्वाद्यश्लोकस्ययुक्तमेकवाक्यत्वंप्रकृतशास्त्रस्यमहाभारतेऽवतारावद्योतितत्वादन्ति

स्वामिकृतटीका।

ततःकिंकृतमित्यतआह तमुवाचेति प्रसन्नमुखःसन्नित्यर्थः ॥१०॥

भाषा अनुवाद।

तिसकेअनन्तरव्याभयासोकहतेहैं किदोनोसेनाकेबीचमेंविषादकोप्राप्तभयेअर्जुनकोसम्बोधनकरिभगवानहंसतेऊयेवक्षमानयेवचमकहनेलगेहेभारतधृतराष्ट्र॥१०॥ यहग्रन्थप्रथमअध्यायकेप्रथमश्लोकसेलेकरऔरद्वितीयअध्यायकेदशवेंश्लोकतकजोतीनवाक्यहैं तिसकेमध्यसेप्रथमअध्यायकेदूसरेश्लोकसेलेकेद्वितीयअध्यायकेनवयेंश्लोकपर्य्यन्तवाक्यव्याख्याकरनेकेयोग्यहैं क्योंकिउसमेंप्राणियोंकासंसारिकदुःखकाकारणभूतशोकमोहादिरूपदोषकीउत्पत्तिकाहेतुअहङ्कारकाकारणरूपअविद्यावर्णनकीहै औरराज्यआदिमेममतारूपभ्रान्तिज्ञाननिमित्तस्नेह

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम् ।

तथाचसर्व्वप्राणिनां शोकमोहादिदोषाविष्टचेतसांस्वभावतएवस्वधर्मपरित्यागःप्रतिषिद्धसेवाचस्यात् स्वधर्मेप्रवृत्तानामपितेषांवाङ्मनःकायादीनांप्रवृत्तिःफलाभिसन्धिपूर्व्विकैवसाहङ्काराचभवतितत्रैवंसतिधर्माधर्मोपचयादिष्टानिष्टजन्मसुखदुःखादिप्राप्तिलक्षणःसंसारोऽनुपरतोभवतीतिअतःसंसारबीजभूतौशोकमोहौतयोश्चसर्व्वकर्मसंन्यासपूर्व्वकादात्मज्ञानात्नान्यतोनिवृत्तिरिति तदुपदिदिक्षुःसर्व्वलोकानुग्रहार्थंअर्जुनंनिमित्तीकृत्याह भगवान्वासुदेवःअशोच्यानित्यादि ।

आनन्दगिरिकृतटीका ।

मस्यापिसम्भवत्येकवाक्यत्वमर्जुनस्यासार्थतयाप्रवृत्तत्वादित्याहप्राणिनामिति शोकोमानसस्तापोमोहोविवेकाभावआदिशब्दस्तदवान्तरभेदार्थःसएवसंसारस्य दुःखात्मनोबीजभूतोदोषस्तस्योद्भावेकारणमहङ्कारोममकारस्तद्धेतुरविद्याचतत्प्रदर्शनार्थत्वेनेतियोजना संगृहीतमर्थंविवृणोतितथाहीति राज्यंराज्ञःकर्मपरिपालनादिपूजार्हागुरवोद्रोणादयःपुत्राःस्वेनोत्पादिताःसौभद्रादयःसम्बन्धान्तरमन्तरेणस्नेहगोचरागुरुपुत्रप्रभृतयोमित्रशब्देनोच्यन्तेउपकारनिरपेक्षतया स्वयमुपकारिणोहृदयानुरागभाजोभगवत्प्रमुखाःसुहृदःस्वजनाज्ञातयोदुर्य्योधनादयःसम्बन्धिनःश्वशुरश्यालप्रभृतयोद्रुपदधृष्टद्युम्नादयःपरम्परयापितृपितामहादिष्वनुरागभाजोराजानोवान्धवास्तेषुयद्योक्तंप्रत्ययंनिमित्तीकृत्यस्नेहोयश्चतैःसहविच्छेदोयश्चैतेषामुपाघातेपातकंयाचलोकगर्हासर्व्वंतन्निमित्तंययोरात्मनःशोकमोहयोस्तावेतौसंसारबीजभूतौकथमित्यादिनादर्शितावित्यर्थःकथंपुनरनयोःसंसारबीजयोरर्जुनेसम्भा

भाषा अनुवाद ।

औउसकेवियोगसेउत्पन्नस्नेहमोहभीदेखायाहै अर्जुनअपनाक्षत्रियकाजोधर्मयुद्धकरनातिसमेआपहीप्रवृत्तहोकेभीजिसशोकमोहकेद्वारा विवेकज्ञानसेरहितहोकरयुद्धसेविरतऔरपरधर्मभिक्षामेप्रवृत्तभयेथे ठीकहैशोकमोहयुक्तप्राणीमात्रबुद्धास्वधर्मछोड़परधर्मअङ्गीकारकरलेतेहैं जोस्वधर्ममेप्रवृत्तहैं वेभीफलकीकामनासेअहङ्कारपूर्व्वकप्रवृत्तहोतेहैं ॥ उससेधर्मअधर्मकीप्रबलताकेहेतुउत्तमअधमजोनिमेजन्मऔरसुखदुःखआदिप्राप्तिरूपसंसारकिसीप्रकारछूटतानहींइससेशोकमोहयेदोनोसंसारकेकारणहैंकेवलसंन्यासपूर्व्वकआत्मज्ञाननिष्ठाकेविनाशोकमोहकेनिवारनकीऔर उपायनदेखिभगवानवासुदेवलोककेउपरअनुग्र

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम्।

तत्रकेचिदाहुः सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेवकेवलात्कैवल्यंनप्राप्यतएवकिंतर्ह्यग्निहोत्रादिश्रौतस्मार्त्तकर्मसहितात् ज्ञानात्कैवल्यप्राप्तिरि

आनन्दगिरिकृतटीका।

वनाऽपपद्यतेनहिप्रथितमहामहिम्नोविवेकविज्ञानवतः स्वधर्मंप्रवृत्तस्यतस्यशोकमोहावनर्थहेतूसम्भावितावित्याशङ्क्यविवेकतिरस्कारेणतयोर्विहिताकरणप्रतिषिद्धाचरणकारणत्वादनर्थाधायकयोरस्तितस्मिन्सम्भावनेत्याह शोकमोहाभ्यामिति भिक्षयाजीवनंप्राणधारणमादिशब्दादशेषकर्मसन्न्यासलक्षणंपरिव्राज्यमात्माभिध्यानमित्यादिगृह्यतेकिञ्चार्जुनेदृश्यमानौशोकमोहौसंसारबीजंशोकमोहत्वादस्मदादिनिष्ठशोकमोहवदित्युपलब्धौशोकमोहौप्रत्येकंपक्षीकृत्यानुमातव्यमित्याहतथाचेतिशोकमोहादीत्यादिशब्देनमिथ्याभिमानस्नेहगर्हादयो गृह्यन्तेस्वभावतश्चित्तदोषसामर्थ्यादित्यर्थः अस्मदादीनामपिस्वधर्मेप्रवृत्तानांविहिताकरणत्वाद्यभावान्नशोकादेः संसारबीजतेतिदृष्टान्तस्यसाध्यविकलतेतिचेत्तत्राह स्वधर्मइति कामादीनामित्यादिशब्दाद्विशिष्टानीन्द्रियाण्यादीयन्तेफलाभिसन्धिस्तद्विषयेऽभिलाषः कर्तृत्वभोक्तृत्वाभिमानोऽहङ्कारः प्रागुक्तप्रकारेणवागादिव्यापारेसतिकिंसिध्यतितत्राहतत्रेति शुभकर्म्मानुष्ठानेनधर्म्मोपचयादिष्टदेवादिजन्मततः सुखप्राप्तिः अशुभकर्मानुष्ठानेनाधर्म्मोपचयादनिष्टतिर्य्यगादिजन्मततोदुःखप्राप्तिः व्यामिश्रकर्म्मानुष्ठानादुभाभ्यांधर्म्माधर्म्माभ्यांमनुष्यजन्मततः सुखदुःखेभवतः एवमात्मकः संसारसन्ततेरावर्त्ततइत्यर्थः अर्जुनस्यान्येषाञ्चशोकमोहयोः संसारबीजत्वमुपपादितमुपसंहरति इत्यतइति तदेवंप्रथमाध्यायस्यद्वितीयाध्यायैकदेशसहितस्यात्मज्ञानोत्पत्तिनिवर्त्तनीयशोकमोहाख्यसंसारबीजप्रदर्शनपरत्वंदर्शयित्वावक्ष्यमाणसन्दर्भस्यसहेतुसंसारनिवर्त्तकसम्यक्ज्ञानोपदेशेतात्पर्य्यंदर्शयति तयोश्चेति तद्यथोक्तंज्ञानमुपदिदिक्षुरुपदेष्टुमिच्छन्भगवानाहेति सम्बन्धः सर्वलोकानुग्रहार्थंयथोक्तंज्ञानंभगवानुपदिदि

भाषा अनुवाद।

हकरि अर्जुनको उपलक्षकरिकेइसगीताशास्त्रमेंसोईज्ञाननिष्ठाको उपदेशकरतेहैं

इसविषयमेंकोईकहतेहैंकिसर्वकर्मपरित्यागकरिकेकेवलआत्मज्ञानसेमुक्तिनहींहोतीपरन्तुश्रुतिस्मृतिविहितकर्मनिष्ठाकेसहितजोतत्त्वज्ञाननिष्ठाउससेकैवल्यप्राप्तिहोतीहै इसमेंप्रमाणइसीगीताकेदूसरेअध्यायमें ३३।४७ आदिश्लोकोंमेंकहाहै और युद्धआदिकर्मभीत्रलोकोंअधर्मनहींवलूउसकेनकरनेमेंदोषहैयहभी

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम्।

तिसर्व्वासुगीतासुनिश्चितोऽर्थइति ज्ञापकञ्चाऽऽरभ्यार्थस्य अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि कर्मण्येवाधिकारस्तेकुरुकर्मैवतस्मात्त्वमित्यादि हिंसादियुक्तत्वाद्वैदिकंकर्म्मअधर्म्मायेतीयमप्याशङ्कानकार्य्याकथंचत्वंकर्म्मयुद्धलक्षणं गुरुभ्रातृपुत्रादि

आनन्दगिरिकृतटीका।

क्षतीत्ययुक्तंअर्जुनंप्रत्येवोपदेशादित्याशङ्क्याह अर्जुनमिति नहितस्यामवस्थायामर्जुनस्यभगवतोयथोक्तज्ञानमुपदेष्टुमिष्टंकिन्तुस्वधर्मानुष्ठानाद्बुद्धिशुद्धयतरकालमित्यभिप्रेत्योक्तंनिमित्तीकृत्येति।

सर्व्वकर्मसन्न्यासपूर्व्वकादात्मज्ञानादेवकेवलात्कैवल्यप्राप्तिरिति गीताशास्त्रार्थःस्वाभिप्रेतोव्याख्यातःसम्प्रतिदृष्टिकृतामभिप्रेतंनिरसितुमनुवदति तत्रेति निर्द्धारितशास्त्रार्थःसतिसम्भवापराम्रष्यतेतेषामुक्तिमेवविदुषस्तादात्विकमभ्युपगमंप्रत्यादिशतिसर्व्वकर्मेति वैदिकेनकर्मणासमुच्चयंव्युदसितुंमात्रपदंस्मार्त्तेनकर्मणासमुच्चयंनिरसितुमवधारणं अभ्याससम्बन्धंधुनोतेकेवलादिति नैवेत्येवकारःसम्बध्यते केनतर्हिप्रकारेणज्ञानंकैवल्यप्राप्तिकारणमित्याशङ्क्याह किंतर्हीति किंतत्प्रमापकमित्याशङ्क्यइदमेवशास्त्रमित्याह इतिसर्व्वास्विति यथाप्रयाजानुयाज्याद्युपकृतमेवदर्शपूर्णमासादिस्वर्गसाधनंतथाश्रौतस्मार्त्तकर्म्मोपकृतमेवब्रह्मज्ञानंकैवल्यंसाधयतिविमतंमेतिकर्त्तव्यताकमेवस्वफलसाधकंकारणत्वाद्दर्शपौर्णमासादिवत् तदेवंज्ञानकर्मसमुच्चयपरंशास्त्रमित्यर्थःइतिपदमाऽऽरभ्यत्यनेनपूर्व्वेणसम्बध्यते पौर्व्वापर्य्यपर्य्यालोचनायांशास्त्रस्यसमुच्चयपरत्वंननिर्द्धारितमित्याशङ्क्याह ज्ञापकञ्चेति नकेवलंज्ञानंमुक्तिहेतुरपितुसमुच्चितमित्यस्यार्थस्यस्वधर्मानुष्ठानेपापप्राप्तिवचनसामर्थ्यलक्षणंलिङ्गंमकमित्यर्थःशास्त्रस्यसमुच्चयपरत्वेलिङ्गवद्वाक्यमपिप्रमाणमित्याह कर्मण्येवेति तत्रैववक्यान्तरमुदाहरति कुरुकर्मेति ननुनहिंस्यात्

भाषा अनुवाद।

इसीद्वितीयअध्यायके ३२ श्लोकमेंनिश्चयकरिकेकहाहै।

तोऊपरकीउक्तअभिप्रायअत्यन्तअसत्है जिसहेतुज्ञाननिष्ठाऔकर्मनिष्ठादोनोपृथक्पृथक्कहाहै अर्थात्इसीद्वितीयाध्यायके ११ श्लोकसेलेकर ३१श्लोकतकजोपरमार्थतत्त्वनिरूपणकियागयाहै तद्विषकबुद्धिकानामसांख्यबुद्धिऔरसोईबुद्धियुक्तज्ञानीकोभीसांख्यकहतेहैं औरयहीसांख्यबुद्धिउत्पन्नहोनेकेपूर्व्वदेहादिव्यतिरिक्तकहेभिन्नजोआत्माउसकोकर्तृत्वआदिअपेक्षाकरिकेधर्मअधर्मविचारपूर्व्वक

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

हिंसादिलक्षणमत्यन्ततरमपिस्वधर्म्मइतिकृत्वानाधर्म्मायतदकरणेचततःस्वधर्म्मंकी र्त्तिञ्चहित्वापापमेवात्स्यसीतिब्रुवतायाबज्जीवादिश्रुतिचोदितानांस्वकर्म्मणांपश्वा दिहिंसालक्षणान्चकर्मणांप्रागेवनाधर्मत्वमिति सुनिश्चितमुक्तंभवतीति।

आनन्दगिरिकृतटीका।

सर्व्वभूतानिइत्यादिनाप्रतिसिद्धत्वेनहिंसादेरनर्थहेतुत्वावगमात्तदुपेतंवैदिकंकर्म्मा धर्म्मायेतिनानुष्ठातुंशक्यतेतथाचतस्यसापेक्षज्ञानेनसमुच्चयोनसिध्यतीतिसांख्यमत माशङ्क्यपरिहरतिहिंसादीति आदिशब्दादुच्छिष्टभक्षणंगृह्यतेयथोक्ताशङ्कानक र्त्तव्येत्यनाकांक्षापूर्व्वकंहेतुमाहकथमित्यादिना स्वशब्देनक्षत्रियोविवक्ष्यतेयुद्धाकर णेक्षत्रियस्यप्रत्यवायश्रवणात्तस्यतंप्रतिनित्यत्वेनावश्यकर्त्तव्यत्वंप्रतीतेर्गुर्व्वादिहिंसायु क्तमतिक्रूरमपिकर्मनाधर्म्मायेतिहेत्वन्तरमाहतदकरणेचेति आचार्य्यादिहिंसायु क्तमतिक्रूरमपियुद्धंनाधर्म्मायेतिब्रुवताभगवताश्रौतानांहिंसादियुक्तानामपिकर्मणां दूरतोनाधर्मत्वमितिस्पष्टमुपदिष्टंभवतिसामान्यशास्त्रस्यव्यर्थहिंसानिषेधार्थत्वात् क्रतुविषयेचोदितहिंसायास्तद्विषयत्वात्कुतोवैदिककर्म्मानुष्ठानानुपपत्तिरित्यर्थः ज्ञानकर्म्मसमुच्चयात्कैवल्यसिद्धिरित्युपसंहर्त्तुमितिशब्दः यत्तावद्ब्रह्मज्ञानंस्वेतिकर्त्त व्यताकंस्वफलसाधकंकरणत्वादितिअनुमानंतद्दूषयतितदसदितिनहिशुक्तिकादि ज्ञानमज्ञाननिवृत्तौस्वफलेसहकारिकिञ्चिदपेक्षतेतथाचव्यभिचारादसाधकंकर णत्वमित्यर्थः यत्तुगीताशास्त्रेसमुच्चयस्यैवप्रतिपाद्यतेतिप्रतिज्ञातंतदपिविभागवच नविरुद्धमित्याहज्ञानेति सांख्यबुद्धिर्योगबुद्धिश्चेतिबुद्धिद्वयं तत्रसांख्यबुद्ध्याश्रयांज्ञान निष्ठांव्याख्यातुंसांख्यशब्दार्थमाह अशोच्यानित्यादिनाइति अशोच्यानित्यादिना स्वधर्म्ममपिचावेक्ष्येत्येतदन्तंवाक्यंयावद्ग्रन्थविवक्षितावताग्रन्थेनयत्परमार्थभूतमात्मत

भाषाअनुवाद।

बुद्धिहैसोईबुद्धियुक्तकर्म्मीपुरुषकोनामयोगीहैइसप्रकारउभयनिष्ठादिखाईहैंउन केवीचसांख्यनामज्ञाननिष्ठाऔजोगरूपकर्मनिष्ठायेदोनोभीआगेपृथक२कहीजा यंगीइसीमेसांख्यबुद्धिकाआश्रयज्ञाननिष्ठाऔयोगबुद्धिकाआश्रयकर्म्मनिष्ठायेदोनो निष्ठाएककालमेएकपुरुषकरकेअनुष्ठानकरनाकिसीप्रकारसंभवनहीं होतायही शतपथब्राह्मणमेकहाहै योज्ञानऔकर्म्मसमुच्चयअभिप्रेतहोतोयेसवविभागवचन औरकिसीप्रकारसंभवनहींहै औरइसप्रकारअर्जुकोप्रश्नभीठीकनहीं होतीहै

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

तदसत्ज्ञानकर्मनिष्ठयोर्विभागवचनात्बुद्धिद्वयाश्रययोरशोच्यानित्यादिना ग्रन्थेनभगवतायावत्स्वधर्ममपिचावेक्ष्यत्येतदन्तेनग्रन्थेनयत्परमार्थात्मतत्त्वनिरूपणंकृतंतत्सांख्यंतद्विषयाबुद्धिरात्मनोजन्मादिषड्विक्रियाभावादकर्त्तात्येतिप्रकरणार्थनिरूपणात्याजायतेसासांख्यबुद्धिः सायेषांज्ञानिनासुचिताभवतितेसांख्याः एतस्याबुद्धेर्जन्मनःप्रागात्मनोदेहादिव्यतिरिक्तस्यकर्त्तृत्वभोक्तृत्वाद्यपेक्षोधर्माधर्मविवेकपूर्वकोमोक्षसाधनानुष्ठाननिरूपणलक्षणोयोगः तद्विषयाबुद्धिर्योगबुद्धिःसायेषांकर्मिणासुचिताभवतितेयोगिनः तथाचभगवताविभक्तेद्वेबुद्धीनिर्दिष्टेएषातेऽभिहितासाख्येबुद्धिर्योगेत्विमांशृणुयेति तयोश्चसांख्यबुद्ध्याश्रयांज्ञानयोगेननि

आनन्दगिरिकृतटीका ।

त्वंभगवतानिरूपितंतद्यथासम्यक्व्याख्यायतेप्रकाश्यतेसावैदिकीसम्यक्बुद्धिःसंख्यातयाप्रकाश्यत्वेनसम्बन्धिप्रकृतंतत्त्वंसांख्यमित्यर्थः सांख्यशब्दार्थमुक्त्वातत्प्रकाशिकांबुद्धिंतद्वतश्चसांख्यान्व्याकरोति तद्विषयेति तद्विषयाबुद्धिःसांख्येबुद्धिरितिसम्बन्धःतामेवप्रकटयति आत्मनइति नजायतेम्रियतेवेत्यादिप्रकरणार्थनिरूपणद्वारेणात्मनःषड्भावयति क्रियासम्भवान्कूटस्थोसाविति सावुद्धिरुत्पद्यतेसासांख्यबुद्धिःतत्पराःसन्न्यासिनःसांख्याइत्यर्थः सम्प्रतियोगबुद्ध्याश्रयांकर्मनिष्ठांव्याख्यातुकामोयोगशब्दार्थमाह एतस्यादिति यथोक्तबुद्ध्युत्पत्तौविरोधादेवानुष्ठानायोगात्तस्यास्तन्निवर्त्तकत्वात्पूर्वमेवतदुत्पत्तेरात्मनश्चदेहादिव्यतिरिक्तत्वाद्यपेक्षयाधर्माधर्मंनिष्कृष्यतेनेश्वराराधनरूपेणकर्मणापुरुषोमोक्षायायुज्यतेयोग्यःसम्पद्यतेतेनमोक्षसिद्धये

स्वामिकृतटीका ।

देहात्मनोरविवेकात्अस्यैवंमोहोभवतीतितद्विवेकप्रदर्शनार्थंश्रीभगवानुवाच

भाषाअनुवाद ।

क्योंकिज्ञानऔ कर्म्मएककालएकपुरुषकोनितान्तअसम्भवयहपूर्वनकहनेसेअर्जुन किसप्रकारकर्म्मसेज्ञानकोश्रेष्ठजानिभगवानसेमिथ्याआक्षेपकरेंगेऔरसर्वउपदेशमेंज्ञानऔकर्म्मदोनोंकेमध्यमेंजोश्रेयहोसोहमकोकहो इसप्रकारएकविषयकप्रश्नहींवाकहोंकिसतरहसंभवहैजोभगवतकेउक्तवचनकाअर्थनसमझकेअर्जुनऐसीप्रश्नकियेहोंतौभीभगवानकेऐसेप्रतिवचनसंभवहोतेनहीं चलीकास्वधर्म्म जोयुद्धरूपस्मृतिविहितकर्मतिसकेसहितज्ञानसंपादनकरनाविहितकर्मनहीं क्योंकिसो

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ष्ठांसांख्यानां विभक्तांवक्ष्यतिपुरावेदात्मनामयाप्रोक्तेतितथाचयोगबुद्ध्याश्रयांकर्म योगेननिष्ठांविभक्ताञ्चवक्ष्यतिकर्मयोगेनयोगिनामित्येवंसांख्यबुद्धिं योगबुद्धिञ्चाश्रित्यद्वेनिष्ठेविभक्तेभगवतैवोक्तेज्ञानकर्मणोः कर्तृत्वाकर्तृत्वैकत्वानेकत्वबुद्ध्याश्रययोरेकपुरुषाश्रयत्वासम्भवंपश्यता यथैतद्विभागवचनंतथैवदर्शितंज्ञातपथीयेब्राह्मणेएतमेवप्रव्राजिनोलोकमिच्छन्तोब्राह्मणाःप्रव्रजन्तीतीसर्वकर्मसंन्यासंविधाय तच्छेषेणकिंप्रजयाकरिष्यामोयेषांनोऽयमात्मायंलोकइति तदेवचप्राग्दारपरिग्रहात्पुरुषस्यात्माप्राक्ततोधर्मजिज्ञासोत्तरकालंलोकत्रयसाधनंपुत्रंद्विप्रकारञ्च वित्तंमानुष्यंदैवञ्चतत्रमानुष्यंवित्तंकर्मरूपंपितृलोकप्राप्तिसाधनंविद्याञ्च दैवंवि

आनन्दगिरिकृतटीका।

परम्परयासाधनीभूतप्रागुक्तधर्मानुष्ठानात्मकोयोगइत्यर्थः अथयोगबुद्धिंविभजन् योगिनोविभजतेतद्विषयेति उक्तेबुद्धिद्वयेभगवतोऽभिमतंदर्शयति तथाचेति सांख्यबुद्ध्याश्रयाज्ञाननिष्ठेत्येदपि भगवतोभिमतमित्याह तयोश्चेति ज्ञानमेवयोगोज्ञानयोगस्तेनहिब्रह्मणायुज्यतेतादात्म्यमापद्यतेतेनसन्न्यासिनांनिष्ठानिश्चयेनस्थितिस्तात्पर्य्येणपरिसमाप्तिस्तांकर्मनिष्ठातोव्यतिरिक्तांनिष्ठयोर्मध्येनिष्कृष्यभगवान्वक्ष्यतीति योजना लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघज्ञानयोगेनसांख्यानामित्येतद्वाक्यमुक्तार्थविषयमर्थतोनुवदति पुरेति योगबुद्ध्याश्रयाकर्मनिष्ठेत्यत्रापिभगवदनुमतिमादर्शयति तथाचेति कर्मैवयोगःकर्मयोगस्तेनहिबुद्धिशुद्धिद्वारामोक्षहेतुज्ञानायपुमान्युज्यतेतेननिष्ठांकर्मिणांज्ञाननिष्ठातोविलक्षणां कर्मयोगेनेत्यादिनावक्ष्यति भगवानितियोजना निष्ठाद्वयंबुद्धिद्वयाश्रयंभगवताविभज्योक्तमुपसंहरति एवमिति कयापुनरनुपपत्त्याभगवतानिष्ठाद्वयंविभज्योक्तमित्याशङ्क्याह

भाषा अनुवाद।

होनेसेश्रीकृष्णकेप्रतिअर्जुनकाइसप्रकारकाअनुयोगकरनाकभीसंभवहोतानहीं इसीसेगीताशास्त्रमेलेशमात्रभीश्रौतयास्मार्तकर्मकेसहितज्ञानकेसंपादनका प्रतिपादनकरनेकोकोईभीसमर्थनहोंगे अज्ञानकिंवारागआदिदोषवशतेकर्ममेंप्रवृत्तमनुष्यकोयज्ञदानतपआदिके द्वारासत्त्वशुद्धिपूर्वकपरमार्थतत्त्वज्ञानहोनेसेपरलोकसंग्रहकेअर्थजोफेरिकर्ममेंप्रवृत्तिहोयतोउसकर्मकोकर्मनहींकहतेहैंसुतरांतिसकेसहितज्ञानकासंपादननहींहोताहै जैसेभगवानश्रीकृष्णकेसकलकर्म

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

त्तंदेवलोकप्राप्तिसाधनंसोऽकामयतेतिअविद्याकामवतएवसर्व्वाणिकर्म्माणिश्रौता दीनिदर्शितानितेभ्योव्युत्थायप्रव्रजन्तीतिव्युत्थानमात्मानमेव लोकमिच्छतोऽकाम स्यविहितं तदेतद्विभागवचनमनुपपन्नंस्यात्यदिश्रौतकर्मज्ञानयोः समुच्चयोभि प्रेतःस्याद्भगवतः

नचअर्जुनस्यप्रश्नउपपन्नोभवतिज्यायसीचेत्कर्मणस्तेइत्यादिएकपुरुषानुष्ठेय त्वासम्भवंबुद्धिकर्मणोर्भगवतापूर्व्वमनुक्तंकथमर्ज्जुनोऽश्रुतंबुद्धेश्चकर्मणोज्यायस्त्वं भग वत्यध्यारोपयेत्सत्यैवज्यायसीचेत्कर्मणस्तेमतावुद्धिरितिकिञ्चयदिबुद्धिकर्मणोःस र्व्वेषांसमुच्चयउक्तःस्यात् अर्जुनस्यापिसउक्तएवेतियच्छ्रेयएतयोरेकंतन्मेब्रूहिसुनि श्चितमितिकथमुभयोरुपदेशेसत्यन्यतरविषयएवप्रश्नःस्यात्नहिपित्तप्रशमनार्थिनो

आनगिरिकृतटीका ।

ज्ञानकर्मणोरिति कर्महिकर्तृत्वाद्यनेकत्ववृद्ग्राह्यंज्ञानंकर्तृत्वैकत्ववृद्ग्राह्यंतदु भयमित्यंविरुद्धसाधनसाध्यत्वान्नैकावस्थस्यैवपुरुषस्यसम्भवत्ययोयुक्तमेवतयोर्व्विभा गवचनमित्यर्थः भगवदुक्तविभागवचनस्यमूलत्वेनश्रुतिमुदाहरति तथेति तत्त्वज्ञान निष्ठाविषयंवाक्यंपठति एतमेवेति प्रकृतमात्मानंनित्यविज्ञप्तिस्वभावंवेदितुमिच्छ न्तःविविधेपिकर्मफलेवैतृष्ण्यभाजःसर्व्वाणिकर्माणिपरित्यज्यज्ञाननिष्ठाः भवन्ती तिपञ्चमलकारस्वीकारेणसन्न्यासविधिंविवक्षित्वात्तस्यैवविधेः विशेषेणार्थवादेन किंप्रजयेत्यादिनामोक्षफलंज्ञानमुक्तमित्यर्थःननुफलाभावात्प्रजाक्षेपोनोपपद्यतेपुत्रे णैतल्लोकजयस्यवाक्यान्तरसिद्धत्वादित्याशङ्क्यविदुषांप्रजासाध्यमनुष्यलोकस्यात्मव्य तिरेकेणाभावादात्मनश्चासाध्यत्वादाक्षेपोयुक्तिमानिति विवक्षित्वाह येषामिति

भाषा अनुवाद ।

समुचितनहींऔजैसेकाम्यकर्ममेकामनानरहनेसेसोऔरकाम्यकर्म नहींहोसक ताजिसहेतुउसमेफलाभिसन्धिनहीहै

तोफेरिजोजनकआदिराजाकर्मकेद्वारामुक्तहुयेयहवर्णनकियाहैसोकेवल लोकसंग्रहकेअर्थमात्रहै अर्थात्सबकर्मकापरित्यागहोनेसेभीगुणऔगुणीज्ञानवश तेकर्मआभासकेसाथउनकीमुक्तिभईथी अर्थात् कर्मकेत्यागमेअधिकारहोनेसेभी कर्मत्यागनकरिकेउसकेसहितनिर्व्वाणपदप्राप्तकियाऔरजोकहोकिजनकादिरा जापूर्व्वमे तत्त्वज्ञानीनहींथेतौभीज्ञानके साधनभूतसकलकर्मईश्वरकोअर्पणकरने

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

वैद्येनमधुरंशीतलञ्चभोक्तव्यमित्युपदिष्टेतयोरन्यतरत्पित्तप्रशमनकारणंब्रूहीति प्रश्नःसम्भवति अथार्जुनस्यभगवदुक्तवचनार्थविवेकानवधारणनिमित्तःप्रश्नःकल्प्येततथापिभगवताप्रश्नानुरूपंप्रतिवचनंदेयंमयाबुद्धिकर्मणोः समुच्चयउक्तःकिमर्थमित्यंत्वंभ्रान्तोसीतिनतुपुनःप्रतिवचनमनुरूपंपृष्टादन्यदेवद्वेनिष्ठेमयापुराप्रोक्तेइतिवक्तुंयुक्तं नापिस्मार्त्तेनैवकर्मणाबुद्धेःसमुच्चयेऽभिप्रेतेविभागवचनादिसर्व्वमुपपन्नंकिञ्चक्षत्रियस्ययुद्धंस्मार्त्तंकर्मस्वधर्मइतिजानतस्तत्किंकर्मणिघोरेमां नियोजयसीत्युपालम्भोऽनुपपन्नस्तस्मात् गीताशास्त्रेऽपिस्मार्त्तेनवाकर्मणा आत्मज्ञानस्यसमुच्चयोनकेनचिद्दर्शयितुंशक्यः

यस्यत्वज्ञानाद्रागादिदोषतोवा कर्मणिप्रवृत्तस्ययज्ञेनदानेनतपसावाविशुद्धसत्त्वस्यज्ञानमुत्पन्नंपरमार्थतत्त्वविषयमेकमेवेदंसर्व्वं ब्रह्माकर्त्तृचेतितस्यकर्मणि कर्मप्रयोजनेचनिवृत्तेपिलोकसंग्रहार्थंयत्नपूर्व्वंयथाप्रवृत्तिस्तथैवकर्मणिप्रवृत्तस्ययत् प्रवृत्तिरूपंदृश्यतेनतत्कर्मयेनबुद्धेःसमुच्चयः स्यात्यथाभगवतोवासुदेवस्यचत्रधर्मं चेष्टितंनज्ञानेनसमुच्चीयतेपुरुषार्थसिद्धयेतद्वत्तत्फलाभिसन्धिग्रहङ्कारभावस्यतुल्यत्वात्विदुषःतत्त्वविन्नाहं करोमीतिमन्यतेनचतत्फलमभिसन्धत्तेयथाचस्वर्गादि

आनन्दगिरिकृतटीका ।

इतिज्ञानंदर्शितमितिशेषः तस्मिन्नेवब्राह्मणेकर्मनिष्ठावाक्यंदर्शयति तत्रैवेतिप्राक्तत तत्त्वमतत्वदर्शित्वेनाज्ञत्वंसचब्रह्मचारीसन्गुरुसमीपेयथाविधिवेदमधीत्यार्थज्ञानार्थंधर्मंजिज्ञासांकृत्वातदुत्तरकालंलोकत्रयप्राप्तिसाधनंपुत्रादित्रयंसोकामयतजाया मेस्यादित्यादिनाकामितवानितिश्रुतमित्यर्थः वित्तविभजतेद्विप्रकारमिति तदेव

भाषा अनुवाद ।

सेउनकीसत्त्वशुद्धिअथवाज्ञानकी उत्पत्तिभईथीभगवानइसगीताशास्त्रमेयहीप्रतिपादनकरिकेपीछेसोईप्रकारशुद्धसत्वगुणमनुष्यकोज्ञाननिष्ठानिरूपण कियाहैइससेकेवलतत्वज्ञानसेजीमुक्तिहोतीऔरउसमेंजोकर्मकी सहायताकीअपेक्षानकरेयहीइसगीताशास्त्रकानिश्चितअर्थहैयहअर्थआगेप्रकरणपायकेदेखायाजायगाइसप्रकारगीताशास्त्रकातात्पर्यअर्थनिर्णयकियागयापरन्तुअबधर्ममेंव्यग्रमिथ्याभ्रमविशिष्टकहेयुक्तमहत्शोकसागरमेंडूबे अर्जुनकोआत्मज्ञानकेविनाउद्धारहोनेकीऔरउपायनदेखिभगवानश्रीकृष्णअर्जुनकेप्रतितत्वज्ञानकाउपदेशकरतेहैंकि

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

कामार्थिनोऽग्निहोत्रादिकर्मलक्षणधर्मानुष्ठानायाहिताग्नेः काम्यएवाग्निहोत्रादौप्रवृत्तस्यसामिक्रतेविनष्टेपिकामेतदेवाग्निहोत्राद्यनुतिष्ठतोपिनतत्काम्यमग्निहोत्रादिभवतितथाचदर्शयतिभगवान्कुर्वन्नपिनकरोतिनलिप्यतेइति अत्रयज्ञपूर्वैः पूर्वतरंकृतंकर्मणैवहिसंसिद्धिमास्थिताजनकादयइतितत्तुप्रविभज्यविज्ञेयं तत्कथंयदितावत्पूर्वेजनकादयः तत्त्वविदोपिप्रवृत्तकर्माणः स्युस्तेलोकसंग्रहार्थं गुणागुणिषुवर्त्तन्तइतिज्ञानेनैवसंसिद्धिमास्थिताः कर्मसन्न्यासेप्राप्तेपिकर्मणास हैवसंसिद्धिमास्थितानकर्मसन्न्यासंकृतवन्तइत्येषोऽर्थः अथनतेतत्त्वविदईश्वरसमर्पितेनकर्मणासाधनभूतेन संसिद्धिंसत्त्वशुद्धिंज्ञानोत्पत्तिलक्षणांवासंसिद्धिमास्थिताजनकादयइतिव्याख्येयं एतमेवार्थंवक्ष्यतिभगवान्सत्त्वशुद्धयेकर्मकुर्वन्तीतिस्वकर्मणातमभ्यर्च्यसिद्धिंविन्दति मानवाइत्युक्त्वासिद्धिप्राप्तस्यचपुनर्ज्ञाननिष्ठांवक्ष्यतिसिद्धिंप्राप्तोयथाब्रह्मेत्यादिनातस्माद्गीतासुकेवलादेवतत्त्वज्ञानान्मोक्षप्राप्तिःनकर्मसमुच्चितादितिनिश्चितोऽर्थःयथाचायमर्थस्तथाप्रकरणशोविभज्यतत्रतत्रदर्शयिष्यामः

तत्रैवन्धर्मसंमूढचेतसोमिथ्याज्ञानवतोमहतिशोकसागरे निमग्नस्यार्जुनस्यात्मज्ञानादुद्धरणमपश्यन्भगवान्वासुदेवस्ततःकृपयार्जुनमुद्धारयिषुरात्मज्ञानायावतारयन्नाह

आनन्दगिरिकृतटीका ।

प्रकारद्वैरूप्यमाहमानुष्यमिति मानुष्यंवित्तंव्याचष्टेकर्मरूपमिति तस्यफलपर्य्यवसायित्वमाहपितृलोकेति दैवंवित्तंविभजतेविद्याञ्चेति तस्यापिफलनिष्ठत्वमाहदेवेति कर्मनिष्ठाविषयत्वेनोदाहृतश्रुतेस्तात्पर्य्यमाहअविद्येति अत्रस्यकामनाविशिष्टस्यैवकर्मणिसोकामयतेत्यादिनादर्शितानीत्यर्थः ज्ञाननिष्ठाविषयत्वेनदर्शितश्रुतेरपितात्पर्य्यंदर्शयतितेभ्यइति कर्मसुविरक्तस्यैवसन्न्यासपूर्विकाज्ञाननिष्ठाप्रागुदाहृतश्रुत्यादर्शितेत्यर्थः अवस्थाभेदेनज्ञानकर्मणोर्भिन्नाधिकारत्वस्यश्रुतत्वात्तन्मूलेनभगवतोविभागवचनेनशास्त्रस्यसमुच्चयपरत्वप्रतिज्ञातमपवाधितमितिसाधितंकिञ्चसमुच्चयोज्ञानस्यशौतेनस्मार्त्तेनवाकर्मणाविवक्ष्यतेयदिग्रथमंतत्राहतदेतदिति

समुच्चयेऽभिप्रेतेप्रश्नानुपपत्तिंदोषान्तरमाहनचेति तामेवानुपपत्तिंप्रकटयतिएकपुरुषेति यदिसमुच्चयःशास्त्रार्थोभगवताविवक्षितस्तदाज्ञानकर्मणोरेकेनपुरुषेणानुष्ठेयत्वमेवतेनोक्तमर्जुनेनचश्रुतं तत्कथंतदसम्भवमनुक्रमश्रुतञ्चमिथ्यैव

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

श्रोताभगवत्यारोपयन्नचतदारोपार्हतेकिमितिमां कर्मण्येवातिक्रूरेयुद्धलक्षणेनि योजयसिइतिप्रश्नोऽवकल्पतेतथाचप्रश्नालोचनयाप्रष्टृप्रतिवक्तॄणां शास्त्रार्थतयास मुच्चयोभिप्रेतोनभवतीतिप्रतिभातीत्यर्थः किञ्चसमुच्चयपक्षेकर्मापेक्षयाबुद्धेर्ज्यायस्त्वंभगवतापूर्व्वमनुक्तमर्जुनेनचाश्रुतंकथमसौतस्मिन्नारोपयितुमर्हतितत्रानुवादवचनंश्रोतुरनुचितमित्याहबुद्धेश्चेति इतश्चसमुच्चयःशास्त्रार्थोनसम्भवत्यन्यथाप्रश्चमादावर्जुनस्यप्रश्नानुपपत्तेरित्याहकिञ्चेति ननुसर्वान्प्रत्युक्तोपिसमुच्चयेनार्जुनं प्रत्युक्तोसाविततदीयप्रश्नोपपत्तिरित्याशङ्क्याहयदीति एतयोः कर्मतत्त्यागयोरितियावत् ननुकर्मापेक्षयाकर्मत्यागपूर्व्वकस्यज्ञानस्यप्राधान्यात्तस्य श्रेयस्त्वात्तद्विषयप्रश्नोपपत्तिरितिचेन्नेत्याहनहीति तथैवसमुच्चयेपुरुषार्थसाधनेभगवतादर्शितेसत्यन्यतरगोचरोनप्रश्नोभवतीतिशेषः समुच्चयेभगवतोक्तेपितदज्ञानादर्जुनस्य प्रश्नोपपत्तिरितिशङ्कतेअथेति अज्ञाननिमित्तंप्रश्नमङ्गीकृत्यापिप्रत्याचष्टेतथापीति भगवतोभ्रान्त्यभावेनपूर्व्वापरानुसन्धानसम्भावादित्यर्थः प्रश्नानुरूपत्वमेवप्रतिवचनस्यप्रकटयतिमयेति व्यावर्त्यमंशमादर्शयतिनत्विति प्रतिवचनस्यप्रश्नानुरूपत्वमेवस्पष्टयतिदृष्टादिति औतेनकर्मणासमुच्चयोज्ञानस्येतिपक्षंप्रतिक्षिपपक्षान्तरंप्रतिक्षिपतिनापीतिश्रुतिस्मृत्योर्ज्ञानकर्मणोर्विभागवचनमादिशब्दगृहीतं बुद्धेर्ज्यायस्त्वंपञ्चमादौप्रश्नोभगवत्प्रतिवचनंसर्वमिदंश्रौतेनेवस्मार्त्तेनापिकर्मणाबुद्धेःसमुच्चयेविरुद्धंस्यादित्यर्थः द्वितीयपक्षासम्भवेहेत्वन्तरमाहकिञ्चेतिसमुच्चयपक्षे प्रश्नप्रतिवचनयोरसम्भवान्नेदंगीताशास्त्रंतत्परमित्युपसंहरतितस्मादितिविशुद्धब्रह्मात्मज्ञानंस्वफलसिद्धौनसहकारिसापेक्षमज्ञाननिवृत्तिफलत्वाद्रज्जादितत्त्वज्ञानवत्अथवाबन्धःसहायानपेक्षेणज्ञानेननिवर्त्तते अज्ञानात्मकत्वात्रज्जुसर्पादिवदितिभावः

ननुकुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहमितिवक्ष्यमाणत्वात्कथंगीताशास्त्रेसमुच्चयोनास्तितत्राहयस्यत्विति चोदनासूत्रानुसारेणविधितोऽनुष्ठेयस्यकर्मणोधर्मत्वाद्व्यापारमात्रस्यतथात्वाभावात्तत्त्वविदश्च वर्णाश्रमाभिमानशून्यस्याधिकारप्रतिपत्त्यभावाद्रागादिप्रवृत्तीनामविद्यालेशतोजायमानानां कर्माभासत्वात्कुर्य्याद्विद्वानित्यादिवाक्येनसमुच्चयप्रापकमितिभावः वाशब्दस्त्वर्थेद्वितीयस्तुविविदिषावाक्यस्यसाधनान्तरसंग्रहार्थः सांसारिकंज्ञानंव्यावर्त्तयतिपरमार्थेति तदेवाभिनयतिएकमितप्रवृत्तिरूपमितिरूपग्रहणमाभासत्वप्रदर्शनार्थंकर्माभाससमुच्चयस्तु

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

यादृच्छिकत्वान्नमोक्षंफलयतीतिशेषःकिञ्चज्ञानिनोवागादिप्रवृत्तिर्नज्ञानेनतत्फ
लेनसमुच्चीयतेफलाभिसन्धिविकलप्रवृत्तित्वादहङ्कारविधुरप्रवृत्तित्वाद्वाभगवत्प्र
त्तिवदित्याहयथेतिहेतुद्वयस्यासिद्धिमाशङ्क्यपरिहरतितत्त्वविदितिकूटस्थंब्रह्मैवा
हमितिमन्वानोविद्वान्प्रवृत्तिंतत्फलंवानैव स्वगतत्वेनपश्यतिरूपादिवद्दृश्यद्रष्टृधर्म
त्वायोगात्किन्तुकार्य्यकारणसंघातत्वेनैवप्रवृत्तत्रादिप्रतिपद्यतेततस्तत्त्वविदोव्याख्य
नमिच्छाटनादौअहङ्कारस्यतत्प्रादिफलाभिसन्धेश्चाभासत्वान्नासिद्धंहेतुद्वयमित्यर्थः
ननुज्ञानोदयात्प्रागवस्थायामिवोत्तरकालेपिप्रतिनियतप्रवृत्तत्रादर्शनान्नतत्त्वदर्शी
निष्ठप्रवृत्तत्रादेराभासत्वमितितत्राहयथाचेतिस्वर्गादिरेवकाम्यमानत्वात्कामस्तद
र्थिनःस्वर्गादिकामस्याग्निहोत्रादेरपेक्षितस्वर्गादिसाधनस्यानुष्ठानार्थमग्निमाधाय
व्यवस्थितस्यतस्मिन्नेवकाम्येकर्मणिप्रवृत्तस्याङ्गतेकेनापि हेतुनाकामेविनष्टेदेवा
ग्निहोत्रादिनिर्वर्त्तयतोनतत्काम्यंभवतिनित्यकाम्यविभागस्यस्वाभाविकत्वाभावात्
कामोपबन्धानुपबन्धकृतत्वात्तथाविदुषोपिविध्यधिकाराभावाद्रागादिप्रवृत्तीनांक
र्माभासतेत्यर्थःविद्वत्प्रवृत्तीनांकर्माभासत्वमित्यत्रभगवदनुमतिमुपन्यस्यतितथाचेति
ननुविद्वद्व्यापारेपिकर्मशब्दप्रयोगदर्शनात्सद्व्यापारस्यकर्माभासत्वानुपपत्तेःसमुच्च
यसिद्धिरितितत्राहयच्चेति ज्ञानकर्मणोःसमुच्चित्यैवसंसिद्धिहेतुत्वेप्रतिपन्नेकुतो
विभज्यार्थज्ञानमितिपृच्छतितत्कार्यमिति तत्रकिंजनकादयोपितत्त्वविदःप्रवृत्तक
र्माणःस्युराहोस्विदतत्त्वविदइतिविकल्प्यप्रथमंप्रत्याहयदीति तत्त्वावित्त्वेकथंप्र
वृत्तकर्मत्वंकर्मणामकिञ्चित्करत्वादित्याशङ्क्याहतेलोकेति तेषामुक्तप्रयोजना
र्थमपिनप्रवृत्तिर्युक्तासर्वलाप्युदासीनत्वादित्याशङ्क्याहगुणाइति इन्द्रियाणांविष
येषुप्रवृत्तिद्वारातत्त्वविदांप्रवृत्तकर्मत्वेपिज्ञानेनैवतेषांमुक्तिरित्याहज्ञानेनेति उ
क्तमेवार्थंसंक्षिप्यदर्शयतिकर्मेति कर्मणेत्यादौबाधितानुवृत्तत्राभावोगृह्यते इती
यमनुवदतिअथेति तत्रवाक्यार्थंकथयतिईश्वरेति विभज्यविज्ञेयत्वंवाक्यार्थस्यो
क्तमुपसंहरतिइतिव्याख्येयमितिकर्मणांचित्तशुद्धिद्वाराज्ञानहेतुत्वमित्युक्तेर्थेवाक्य
शेषंप्रामाणयतिएतमेवेति योगिनःकर्मकुर्वन्तीत्यादिवाक्यमर्थतोनुवदतिसत्वे
तिस्वकर्मणाइत्यादौसाक्षादेवमोक्षहेतुत्वंकर्मणांवक्ष्यतीत्याशङ्क्याहस्वकर्मणेति स्व
कर्मानुष्ठानादीश्वरप्रसादद्वाराज्ञाननिष्ठायोग्यतालभ्यते ततोज्ञाननिष्ठयामुक्ति
स्तेननसाक्षात्कर्मणां मुक्तिहेतुतेत्यग्रेस्फुटीभविष्यतीत्यर्थः तत्त्वज्ञानोत्तरकालं
कर्मासम्भवेफलितमुपसंहरतितस्मादिति ननुयद्यपिगीताशास्त्रंतत्त्वज्ञानप्रधान

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

मेकंवाक्यंतथापितन्मध्येश्रूयमाणंकर्मतदङ्गमङ्गीकर्त्तव्यंप्रकरणप्रामाण्यादितिसमु
च्चयसिद्धिरुक्तवाहयथाचेति अर्थशब्देनात्मज्ञानमेवकेवलंकैवल्यहेतुरितिगृह्यते
टीकाकृताभिप्रायंप्रत्याख्यायस्वाभिप्रेतःशास्त्रार्थः समर्थितःसंप्रत्यशोच्यानित्य
स्वात्प्राक्तन ग्रन्थसन्दर्भस्य प्रागुक्तंतात्पर्य्यार्थमनूद्याशोच्यानित्यादेः स्वधर्ममपि
चावेक्ष्येत्येतदन्तस्य समुदायस्यतात्पर्य्यमाहतत्रेति अत्रहिशास्त्रेत्रीणिकाण्डा
न्यष्टादशसंख्याकानामध्यायानांषट्कत्रितयमुपादाय त्रैविध्यात्तत्रपूर्वषट्कात्म
कंपूर्व्वकाण्डंत्वम्पदार्थंविषयीकरोतिमध्यमषट्करूपं मध्यमकाण्डंतत्पदार्थंगोच
रयतिअन्तिमषट्कलक्षणमन्तिमंकाण्डंतत्त्वंपदार्थयोरैक्यं वाक्यार्थमधिकरोति
तज्ज्ञानसाधनानितत्रतत्रप्रसङ्गादुपन्यस्यन्तेतज्ज्ञानस्य तदधीनत्वात्तत्त्वज्ञानमे
वकेवलंकैवल्यसाधनमितिचसर्व्वत्रविगीतं एवंपूर्व्वोक्तरीत्यागीताशास्त्रार्थपरिनि
श्चितेसतीतियावत्धर्मेसंमूढंकर्त्तव्याकर्त्तव्यविवेकविकलंचेतोयस्यतस्यमिथ्याज्ञान
वतोऽहङ्कारममकारवतः शोकाख्यसागरेदुरुत्तरेप्रविश्यक्लिश्यतोमाभूदात्मैक्यलक्ष
णवाक्यार्थज्ञानमात्मज्ञानंतदतिरेकेणोद्धरणासिद्धेःतमतिभक्तमतिस्निग्धं शोका
दुद्धर्त्तुमिच्छन्भगवान्यथोक्तज्ञानार्थं तंअर्जुनमवतारयन्पदार्थपरिशोधनेप्रवर्त्त
यन्नादौत्वम्पदार्थंशोधयितुमशोच्यानित्यादिवाक्यमाहेतियोजना

यस्याज्ञानं तस्यभ्रमोयस्यभ्रमस्तस्यपदार्थपरिशोधनपूर्व्वकंसम्यक्ज्ञानंवाक्या
दुदेतीतिज्ञानाधिकारिणमभिप्रेत्याहअशोच्यानित्यादीति यत्तुकैश्चिदात्मावाअ
रेद्रष्टव्यइत्याद्यात्मयाथात्म्यप्रदर्शनविधिवाक्यार्थमनेन श्लोकेनव्याचष्टेस्वयंहरिरित्यु
क्तंतदयुक्तंश्रुतियोग्यतैकार्थसमवेतश्रेयःसाधनतायाः परामृशतनियोगस्यवावि
ध्यर्थस्यात्रप्रतीयमानस्यकल्पनाहेत्वभावात्नचदर्शनेपुरुषतन्त्वत्वरहितेविधेयया
गादिविलक्षणे विधिरुपपद्यतेऽत्यान्तभूतस्याहार्थत्वात्तव्योनविधिमधिकरोती
त्यभिप्रेत्यव्याचष्टेनशोच्यादृति कथंतेषामशोच्यत्वमित्युक्तेभीष्मादिशब्दवाच्यानां
शोच्यत्वंतत्पदलक्ष्याणांवेतिविकल्पाद्यंदूषयतिसहृत्तत्वादिति येभीष्मादिशब्दै
रुच्यन्तेतेश्रुतिस्मृत्युदीरितविगीताचारवत्त्वान्नशोच्यतामभ्युपेरन्नित्यर्थः द्वितीयं
प्रत्याहपरमार्थेति अरजतेरजतबुद्धिवदशोच्येषुशोच्यबुद्धाभ्रान्तोसीत्याहता
निति अनुशोचनप्रकारमभिनयन्भ्रान्तिमेवप्रकटयतितेम्रियन्तइति पुत्रभा
र्य्यादिप्रयुक्तंसुखमादिशब्देनगृह्यतेइत्यनुशोचितवानसीतिसम्बन्धः विरुद्धार्थाभि
धायित्वेनापिभ्रान्तत्वमर्जुनस्यसाधयतित्वंप्रज्ञावतामिति उत्सन्नकुलधर्माणा

CC-0. In Public Domain. Digitized by eGangotri

अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे गतासूनगतासूंश्चनानुशोचन्तिपण्डिताः

शाङ्करभाष्यम्।

अशोच्यानित्यादि अशोच्याअशोच्याभीष्मद्रोणादयःसद्वृत्तत्वात्परमार्थरूपेण चनित्यत्वात्तानशोच्यानन्वशोचोऽनुशोचितवानसि तेभ्वियन्तेऽन्निमित्तमहंतैर्विनाभूतःकिंकरिष्यामिराज्यसुखादिनेति त्वंप्रज्ञावतांवुद्धिमतांवादांश्चवचनानिच भाषसेतदेतन्मौढ्यंपाण्डित्यविरुद्धमात्मनिदर्शयन्मत्तइवेत्यभिप्रायः यस्माद्गतासून् गतप्राणान्मृतान्अगतासूनगतप्राणान्जीवतश्चनअनुशोचन्तिपण्डिताः आत्मज्ञाःपण्डाआत्मविषयावुद्धिर्येषांतेहिपण्डिता पाण्डित्यंनिर्विद्येतिश्रुतेः परमार्थतस्तुनित्यानशोच्याननुशोचस्यतोमूढोसीत्यभिप्रायः ॥ ११ ॥

आनन्दगिरिकृतटीका।

मित्यादीनिवचनानि किमेतावताक्षलितमितितदाहृतदेतदितितन्मौढ्यमशोच्येषुशोच्यदृष्टित्वमेतत्पाण्डित्यंवुद्धिमतांवचनभाषित्वमितियावत् अर्जुनस्यपूर्वोक्तभ्रान्तिभावेनिमित्तमात्मज्ञानमित्याहयस्मादिति ननुसूक्ष्मवुद्धिभावेमेवपाण्डित्यंनत्वात्मज्ञत्वंहेत्वभावादित्याशङ्क्याहतेहीति पाण्डित्यंपण्डितभावमात्मज्ञानंनिर्विद्यनिश्चयेनलब्धावाल्येनतिष्ठासेदिति वृहदारण्यकश्रुतिमुक्तार्थामुदाहरतिपाण्डित्यमिति यथोक्तंपाण्डित्यराहित्यंकथंमयावगतमित्याशङ्क्यकार्य्यदर्शनादित्याहपरमार्थतस्त्विति यस्मादित्यस्यापेक्षितंदर्शयतिअतइति ॥ ११ ॥

स्वामिकृतटीका।

अशोच्यानित्यादि शोकस्याविषयीभूतानेववन्धूनन्वशोचोऽनुशोचितवानसि दृष्ट्वेमान्स्वजनान्कृष्णेत्यादिनातत्रकृतस्त्वाक्श्मलमिदंविषमेसमुपस्थितमित्यादिना मयावोधितोऽपिपुनश्चप्रज्ञावतांपण्डितानांवादान् शब्दान् कथंभीष्ममहंसंख्ये

भाषा अनुवाद।

प्रथमअध्यायके २८ श्लोकसेलेकरतुमजोकुटुम्बकेजनोंका शोककरतेहोसोवैसवतुमारेशोचनेकेयोग्यनहींहैंऔरद्वितीयअध्यायके २ श्लोकसेलेकेहमसेप्रबोधकराये अर्थात्समझायेभीगयेतुमजोपण्डितमानी केसमानयेवचनउच्चारनकरतेअर्थात्कहतेहो किंभीष्मकोसंग्राममेंकैसेमारै इससेयहप्रतीतिहोतीहैकितुमयथार्थपण्डितनहीहौजिसहेतुवुद्धिमानपण्डितजोहैवेगतप्राणअगतप्राणअर्थात्मरेऔरजीवतेकोनहींशोचतेहैंकिवन्धुविहीनहमकैसेजिऐंगे ॥ ११ ॥

CC-0. In Public Domain. Digitized by eGangotri

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः नचैवनभविष्यामःसर्व्वेवयमतःपरं ॥१२॥

शाङ्करभाष्यम्।

कुतस्तेऽशोच्याः यतोनित्याःकथंनतुएवजातुकदाचिदहंनासंकिन्त्वासमेवअतीतेषुदेहोत्पत्तिविनाशेषुघटादिषुवियदिवनित्यमेवाहमासमित्यभिप्रायः तथानत्वंनासीः किन्त्वासीरेवतथानेमेजनाधिपाःनासन् किंत्वासन्नेवतथानचैवनभविष्यामः किन्तुभविष्यामएवसर्व्वेवयमतोस्माद्देहविनाशादुत्तरकालेपिनित्येष्वपिकालेषुनित्याआत्मस्वरूपेणेत्यर्थःदेहभेदानुवृत्यावाऽबहुवचनंनात्मभेदाभिप्रायेण ॥१२॥

आनन्दगिरिकृतटीका।

नित्यत्वमशोच्यत्वेकारणमितिसूचितंविवेचयितुंप्रश्नपूर्व्वकंप्रतिजानीतेकुतइत्यादिना नित्यत्वमसिद्धंप्रमाणाभावादितिचोदयतिकथमिति आत्मानजायतेप्रागभावशून्यत्वान्नरविषाणवदितिपरिहरतिनत्वेवेति किञ्चात्मानित्योभावत्वे

स्वामिकृतटीका।

इत्यादीन् केवलंभाषसेनतुपण्डितोऽसियतःपण्डितागतासून् गतप्राणान्वन्धून गतासूंश्चजीवतोपिवन्धुहीनाएतेकथं जीविष्यन्तीतिनानुशोचन्ति पण्डिताः विवेकिनः ॥ ११ ॥

अशोच्यत्वेहेतुमाह नत्वेवाहमिति यथाहंपरमेश्वरोजातुकदाचिल्लीलाविग्रहस्याविर्भावतिरोभावतोनासमितितुनैवापित्वासमेवानादित्वात् नचत्वंनासीनाभूरपित्वासीरेवइमेचजनाधिपानृपानासन्नितितुनापित्वासन्नेवमदंशत्वात्तथातःपरमितउपरिनभविष्यामोनस्यास्यामइतिचनैवापितुस्यास्यामएवेतिजन्ममरणशून्यत्वादशोच्य इत्यर्थः ॥ १२ ॥

भाषा अनुवाद।

भीष्मआदिकेप्रतिजोशोचकरनाअनुचितहै इसमेश्रीभगवानकारणकहतेहैंकिदेखोहमपरमेश्वरहमाराशरीरधारण करनाकेवललीलाकेअर्थहैइससेइसदेहकेहोनेजानेवशतेहमकभूपूर्व्वमेनहींरहेथेयहसभवनहींहोताजिसहेतुहमअनादिऔरहमारेअंशतेउत्पन्नतुमऔरयेसबराजालोगभीकभीनहींरहेथेयहभीसभवनहींहैइससेहमसबजैसेपहलेथेतैसेअबभीहैं फेरिआगेभीहमसबहोंयगेइससेआत्मस्वरूपकेजन्मऔमरणकास्वभावहैतौफिरिस्वजनविनाशकहोशोककाविषयकैसेहैनहींहैं ॥१२॥

CC-0. In Public Domain. Digitized by eGangotri

देहिनोऽस्मिन्यथादेहेकौमारंयौवनंजरा तथादेहान्तरप्राप्तिर्धीरस्तत्रनमुह्यति१३

आनन्दगिरिकृतटीका ।

सत्यजातत्वाद्व्यतिरेकेघटवदित्यनुमानान्तरमाहनचैवेति यत्तुकैश्चिदात्मयाथात्मं जिज्ञासितंभगवानुपदिशतिनत्वित्यादिनाश्लोकचतुष्टयेनेत्यादिष्टं तदसद्विशेषवच नेहेत्वभावात्सर्व्वत्रैवात्मयाथात्म्यप्रतिपादनाविशेषादित्याशयेनपदच्छेदः पदार्थो क्तिर्विग्रहोवाक्ययोजनेतित्रितयमपिव्याख्यानाङ्गंप्रतिपाद्यतिनत्वित्यादिना नन्वा त्मनोदेहोत्पत्तिविनाशयोरुत्पत्तिविनाशप्रसिद्धेरुक्तमनुमानद्वयं प्रसिद्धिविरुद्ध तयाकालात्ययापदिष्टमिष्टमितिनेत्याहअतीतेष्विति चराचरव्यपाश्रयस्त्वित्यादि तिन्यायेनात्मनोजन्मविनाशप्रसिद्धेरौपाधिकजन्मविनाशाविषयत्वान्निरुपाधिकस्य तस्यजन्मादिराहित्यमितिभावः यद्यपितवेश्वरस्यजन्मराहित्यं तथापिकथंसमे त्याशङ्क्याहतथेति तथापिभीष्मादीनांकथंजन्माभावस्तत्राहतथानेमइति द्वितो यमनुमानंप्रपञ्चयन्नुत्तरार्द्धंव्याचष्टेतथेत्यादिना ननुदेहोत्पत्तिविनाशयोरात्म नोजन्मनाशाभावेपिमहास्वर्गमहाप्रलययोस्तस्याग्निविष्फुलिङ्गदृष्टान्तश्रुत्याजन्म विनाशावेष्टव्यावित्याशङ्क्यनात्माश्रुतेरितिन्यायेनपरिहरतिविष्वपीति यावद्वि कारन्तुविभागोलोकवदितिन्यायेनभिन्नत्वाद्विकारित्वमात्मनामनुमीयतेभिन्नत्व च्चवऊवचनप्रयोगप्रमितमित्याशङ्क्याहदेहेति ॥१२॥

ननुपूर्व्वंदेहंविहायापूर्व्वंदेहमुपादानस्य विक्रियावत्त्वेनोत्पत्तिविनाशवत्वा विभ्रमःसमुज्जृम्भेदितिशङ्कतेतत्रेति अशोच्यत्वप्रतिज्ञायांनित्यत्वेहेतूक्तेसतीति

भाषा अनुवाद ।

जोकहोकितुमईश्वरतुमाराजन्मऔरविनाशनहोनासम्भवहै परन्तुहमलो गजीवहैंइससेहमाराजन्ममरणप्रसिद्धहै इसविषयमेभगवानकहतेहैंकिदेखोदे हाभिमानीजीवकोइसस्थूलशरीनमेजैसेकौमारयौवन औटद्धावस्थाप्राप्तहोतीहैं परन्तुजीवस्वरूपकोनहीं औरयहीसबअवस्थोंकेमध्यमेपूर्व्वअवस्थाकेगये और और अवस्थाप्राप्तभयेभीसंस्कारवशतेसोइहमहैं यहज्ञानरहताहैतैसेहीजीवकीस्थूल देहनाशहोलिङ्गशरीरकेद्वारादेहान्तरप्राप्तिहोनेसेभीआत्माकानाशनहींदेखो तुर्तकेभयेबालककोपूर्व्वसंस्कारवशतेजन्महोतेमात्र दूधपीनेमेप्रवृत्तिदेखपडतीहै इसीसेस्थूलदेहकेजन्मनाशभयेधीरपुरुषमूढ़नहीं होतेअर्थात्आत्माकाजन्ममर णअङ्गीकारनहींकरतेहैं ॥ १३ ॥

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम् ।

तत्रकथमिवनित्यआत्मेतिदृष्टान्तमाहदेहिनः देहोऽस्यास्तीतिदेहीतस्यदेहि नोदेहवतःआत्मनःअस्मिन् वर्त्तमानेदेहेयथायेनप्रकारेणकौमारं कुमारभावोवा ल्यावस्थायौवनंयूनोभावोमध्यमावस्थाजरावयोहानिर्जीर्णावस्थादृत्येताः तिस्रोऽव स्थाअन्योन्यविलक्षणास्तासांप्रथमावस्थानाशेननाशोद्वितीयावस्थोपजनेनोपजनमा त्मनः किंतर्ह्यविक्रियस्यैवद्वितीयातृतीयावस्थाप्राप्तिरात्मनोदृष्टायथातद्वदेवदेहाद न्योदेहोदेहान्तरंतस्यप्राप्तिर्देहान्तरप्राप्तिरविक्रियस्यैवात्मनइत्यर्थः धीरोधीमां स्तत्रैवसतिनमुह्यतिनमोहमापद्यते ॥ १३ ॥

आनन्दगिरिकृतटीका ।

यावत् अवस्थाभेदेसत्यपिवस्तुतोविक्रियाभावादात्मनोनित्यत्वमुपपन्नमित्युत्तर श्लोकेनदृष्टान्तावष्टम्भेनप्रतिपादयतीत्याहदृष्टान्तमिति नकेवलमागमादेवात्म नोनित्यत्वंकिन्त्ववस्थान्तरवज्जन्मान्तरेपूर्वसंस्कारानुवृत्तेश्चेत्याहदेहिनइति देह वत्त्वंतस्मिन्नहंममाभिमानभावत्वंतासामितिनिर्धारणेषष्ठीआत्मनः श्रुतिस्मृत्युपप त्तिभिर्नित्यत्वज्ञानं धीमानित्यत्रधीर्विवक्ष्यतेएवंसतीतितत्त्वतोविक्रियाभावान्नित्य त्वेसमधिगतेसतीत्यर्थः ॥ १३॥

आत्मनःश्रुत्यादिप्रमितेनित्यत्वेतदुत्पत्तिविनाशप्रयुक्तशोकमोहाभावेऽपिप्रका रान्तरेणशोकमोहौ स्यातामित्याशङ्क्यामनूद्योत्तरत्वेनश्लोकमवतारयतियदीत्या दिना शीतोष्णयोस्ताभ्यांसुखदुःखयोश्चप्राप्तिंनिमित्तीकृत्ययोमोहादिर्दृश्यतेतस्या न्वयव्यतिरेकाभ्यांदृश्यमानत्वमाश्रित्यलौकिकविशेषणमशोच्यानित्यत्वयोर्विद्याधि कारीसूचितस्तस्यतितिक्षुःसमाहितोभूत्वेतिश्रुतेःतितिक्षुत्वंविशेषणमिहोपदिश्य तेव्याख्येयं पदमुपादायकरणव्युत्पत्यातस्येन्द्रियविषयत्वंदर्शयतिमात्राइत्यादिना

स्वामिकृतटीका ।

नन्वीश्वरस्यतवजन्ममरणशून्यत्वंसत्यमेवजीवानान्तुजन्ममरणेप्रसिद्धेतत्राह देहिनइति देहिनोदेहाभिमानिनोजीवस्ययथास्मिन्स्थूलदेहेकौमाराद्यवस्था स्तद्देहनिबन्धनाएवात्मनः पूर्वावस्थानाशेऽवस्थान्तरोत्पत्तावपिसएवाहमितिप्रत्य भिज्ञानात्तथैवैतद्देहनाशे देहान्तरप्राप्तिरपिलिङ्गदेहनिबन्धनैवनतुतावतात्मनो नाशोजातमात्रस्यपूर्वसंस्कारेणस्तन्यपानादौप्रवृत्तिदर्शनात् अतोधीरोधीमांस्तत्र तयोर्देहनाशोत्पत्तेरनमुह्यतिआत्मैवसतोजातश्चेतिनमन्यतइति ॥ १३॥

CC-0. In Public Domain. Digitized by eGangotri

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्वभारत ॥१४॥

शाभाङ्करभ्यम् ।

यद्यप्यात्मविनाशनिमित्तोमोहोनसम्भवतिनित्यआत्मेतिविजानतस्तथापिशीतोष्णसुखदुःखप्राप्तिनिमित्तोमोहोलौकिकोदृश्यतेसुखवियोगनिमित्तोमोहोदुखःसंयोगादिनिमित्तश्चशोकइत्येतदर्जुनस्यवचनमाशङ्क्याहमात्रास्पर्शाइति मात्राआभिर्मीयन्तेशब्दादयइतिश्रोत्रादीनीन्द्रियाणिमात्राणांस्पर्शाशब्दादिभिः संयोगास्तेशीतोष्णसुखदुःखदाःशीतमुष्णंसुखंदुःखञ्चप्रयच्छन्तीति अथवा स्पृश्यन्तेइतिस्पर्शाविषयाः शब्दादयःमात्राश्चस्पर्शाश्चशीतोष्णसुखदुःखदाः शीतंकदाचित् सुखंकदाचिद्दुःखंतथोष्णमप्यनियतस्वरूपं सुखदुःखेपुनर्नियतरूपेयतोनव्यभिचरतोऽतस्ताभ्यांपृथक्शीतोष्णयोर्ग्रहणंयस्मात्तेमात्राःस्पर्शादयः आगमापायिनःआगमापायशीलाःतस्मादनित्याउत्पत्तिविलयरूपत्वात्अतस्तान् शीतोष्णादींस्तितिक्षस्वप्रसहस्वतेषुहर्षविषादंमाकार्षीरित्यर्थः ॥ १४ ॥

आनन्दगिरिकृतटीका ।

षष्ठीसमासंदर्शयन्भावव्युत्पत्त्यास्पर्शशब्दार्थमाहमात्राणामिति तेषामर्थक्रियामादर्शयतितेशीतेति संप्रतिशब्दद्वयस्यकर्मव्युत्पत्त्याशब्दादिविषयपरत्वमुपेत्यसमासान्तरंदर्शयन्विषयाणांकार्य्यंकथयतिअथवेति ननुशीतोष्णप्रदत्तेःसुखदुःखप्रदत्वस्यसिद्धत्वात्किमितिशीतोष्णयोःसुखदुःखाभ्यांपृथग्ग्रहणमितितत्राहशीतमिति विषयेभ्यस्तुपृथक्कथनंतदन्तर्भूतयोरेवतयोःसुखदुःखहेत्वोरानुकूल्यप्राप्ति

भाषाअनुवाद ।

जोकहोकिहमभीष्मआदिकेप्रतिशोकनहींकरतेहैं परन्तुउनकेवियोगमेहमैदुःखभोगकरनाहोगाइसलियेहमअपनेकोशोचतेहैं इसवातपरकहतेहैंकिसकलवस्तुजिसकेद्वारापरिमानकीजांयऐसीजोसबइन्द्रियवृत्तिकहेसंयोगऔरउनकेद्वाराजोविषयोंकास्पर्शहोनायहीशीतउष्णादिद्वारासुखदुःखदेताहै किन्तुवेअनित्यहैं इससेउनकोसहोजैसेजलघर्मआदिसंयोगसेकालस्वभाववशतेशीतउष्णहोनेसेसुखदुःखमूलहोताहैंतेमेइष्टऔरअनिष्टप्राप्तहोनेसेसुखदुःखहोताहीहैपरन्तुवहअनित्यऔरमिथ्याहैइससेतुमकोउनकासहनाउचितहै तुमधीरपुरुषकोउनमेहर्षविषादकरनावड़ाहीअयोग्यहै ॥१४॥

CC-0. In Public Domain. Digitized by eGangotri

यंहिनव्यथयन्त्येतेपुरुषंपुरुषर्षभ समदुःखसुखंधीरंसोऽमृतत्वायकल्प्यते ॥१५॥

शाङ्करभाष्यं

शीतोष्णादीन्सहतःकिंस्यादितिश्रृणुयंहीतियंहिपुरुषंसमेदुःखसुखेयस्यतंस मदुःखसुखंसुखदुःखप्राप्तौहर्षविषादरहितंधीरंधीमन्तं नव्यथयन्तिनचालयन्ति नित्यात्मदर्शनादेतेयथोक्ताःशीतोष्णादयःसनित्यानित्यस्वरूपदर्शननिष्ठाद्वन्द्वसहि ष्णुरमृतत्वायअमृतभावायमोक्षायेत्यर्थःकल्प्यतेसमर्थोभवति १५

आनन्दगिरिकृतटीका।

कूल्ययोरुपलक्षणार्थंअध्यात्मंहिशीतमुष्णंवानुकूल्यंप्रातिकूल्यंवासम्पाद्यवाह्याविष याःसुखादिजनयन्ति ननुविषयेन्द्रियसंयोगस्यात्मनिसदासत्त्वात्तत्प्रयुक्तशीतादेर पितथात्वात्तन्निमित्तौहर्षविषादौतस्मिन्नापन्नावित्याशङ्क्योत्तरार्द्धं व्याचष्टेयस्मा दित्यादिना अत्रचकौन्तेयभारतेतिसम्बोधनाभ्यासुभयकुलशुद्धस्यैवविद्याधिकारि त्वमितिएतदेवद्योत्यते १४

अधिकारिविशेषणंतितिक्षुत्वंनोपयुक्तंकेवलस्यतस्यपुमर्थाहेतुत्वादितिशङ्कते शीतेति विवेकवैराग्यादिसहितंतन्मोक्षहेतुज्ञानद्वारातदर्थमितिपरिहरतिश्रृ ण्वति तितिक्षमाणस्यविवक्षितंलोभमुपलक्षयतियंहीति हर्षविषादरहितमि त्यनेनशमादिसाधनसम्पन्नत्वमुच्यतेधीमन्तमिति नित्यानित्यविवेकभागित्वमेतद्यो

स्वामिकृतटका।

ननुतानहंनशोचामिकिन्नुतद्वियोगादिदुःखभाजंमामेवेतिचेत्तत्राहमात्रास्प र्शाइति मीयन्तेज्ञायन्तेविषयाआभिरितिमात्रादिन्द्रियवृत्तयस्तासांस्पर्शाविषयैः सहसम्बन्धास्तेशीतोष्णादिप्रदाभवन्तितेत्वागमापायवत्त्वादनित्याअस्थिराअतस्तां स्तितिक्षस्वसहस्वयथाजलातपादिसंसर्गास्तत्कालकृताःस्वभावतः शीतोष्णादि प्रयच्छन्तिएवमिष्टसंयोगवियोगाअपि सुखदुःखादिप्रयच्छन्तितेषाञ्चास्थिरत्वात् सहनंतवधीरस्योचितंनतुतन्निमित्तहर्षविषादपारवश्यमित्यर्थः ॥१४॥

भाषाअनुवाद।

किसहेतुसेउपायअवलम्बनकरिशीतउष्णवारनकरनेसेउनकासहनाउचि तहैंउसमेवडाफलहैयहकहतेहैंकिहेपुरुषश्रेष्ठअर्जुनजिनधीरपुरुषोंकोसुखदुख समानभावअर्थात् शीतउष्णामेक्लेशनहीहोतासोईविक्षेपरहितपुरुषधर्मज्ञानके द्वारामोक्षप्राप्तिकेअधिकारीहैं ॥१५॥

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

इतश्चशोकमोहावकृत्वाशीतोष्णादिसहनंयुक्तंयस्मात्नासतइति नासतोऽविद्यमानस्यशीतोष्णादेःसकारणस्यनविद्यते नास्तिभावोभवनमस्तितानस्तिशीतोष्णादिसकारणंप्रमाणैर्निरूप्यमाणंवस्तुसञ्जवतिविकारोहिसःविकारश्च व्यभिचरतियथाघटादिसंस्थानंचक्षुषानिरूप्यमाणंमृद्व्यतिरेकेणानुपलब्धेरसत्तया सर्वोविकारःकारणव्यतिरेकेणानुपलब्धेरसज्जन्मप्रध्वंसाभ्यांप्रागूर्द्ध्वञ्चानुपलब्धेःकार्य्यस्य घटादेर्मृदादिकारणस्यतत्कारणस्यच तत्कारणव्यतिरेकेणानुपलब्धेरसत्त्वं तदसत्त्वेसर्व्वाभावप्रसङ्गइतिचेन्नसर्व्वत्रबुद्धिद्वयोपलब्धेः सदुद्धिरसदुद्धिरितियद्विषयाबुद्धिर्नव्यभिचरतितत्सत्यद्विषयाव्यभिचरतितदसत्इतिसदसद्विभागेबुद्धितन्त्रेस्थितेसर्व्वत्रैवबुद्धोसर्व्वैरुपलभ्यतेसमानाधिकरणेन नीलोत्पलवत् सन्घटःसन्पटःसन्हस्तीत्येवंसर्व्वतयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरतितथाचदर्शितं नतुसदुद्धिःतस्मात्घटादिबुद्धिविषयेसन् व्यभिचारात्नतुसदुद्धिविषयोऽव्यभिचारात्पटेविनष्टेघटबुद्धौव्यभिचरन्त्यांसदुद्धिरपिभिचरतीति चेत्नपटदावपिसदुद्धिदर्शनात् विशेषणविषयैवसासदुद्धिरपिनविनश्यतिअथसदुद्धिवत्घटबुद्धिरपिघटान्तरेदृश्यतेइतिचेन्नपटादावदर्शनात्सदुद्धिरपिनष्टेघटेनदृश्यतइतिचेत् नविशेष्याभावात्सदुद्धिःविशेषणविषयासतीविशेष्याभावेविशेषणानुपपत्तौकिंविषयास्यान्नतुपुनःसदुद्धिर्विषयाभावात्एकाधिकरणत्वंघटादिविशेष्याभावेनयुक्तंइतिचेत् नसदिदमुदकमितिमरीच्यादावन्यतराभावेपि सामानाधिकरण्यदर्शनात्तस्माद्देहादेर्बन्ध्यस्यचसकारणस्यासतोनविद्यतेभावइतितथासतश्चआत्मनःअभावोऽविद्यमानतानविद्यतेसर्व्वत्राव्यभिचारादित्यवोचामएवमात्मानात्मनोः सदसतोरुभयोरपिदृष्टःउपलब्धोऽन्तोनिर्णयःसत्सदेवासदसदेवेतितुअनयोर्यथोक्तयोस्तत्त्वदर्शिभिः तदितिसर्व्व

आनन्दगिरिकृतटीका।

भयंवैराग्यादेरुपलक्षणं नित्यात्मदर्शनंत्वमर्थज्ञानंसाधनचतुष्टयवन्तमधिकारिणमनूद्यत्वंपदार्थज्ञानवतस्तस्यमोक्षौपयिकवाक्यार्थज्ञानयोग्यतामाहसनित्येति १५

स्वामिकृतटीका।

तत्प्रतीकारप्रयत्नादपितत्सहनमेवोचितंमहाफलत्वादित्याहयंहीति एतेमात्रास्पर्शायंपुरुषं नव्यथयन्तिनाभिभवन्तिसमेदुःखसुखेयस्तं सतैरविचिप्यमाणोधर्मज्ञानद्वारामृतत्वायमोक्षायकल्पतेयोव्योभवति ॥१५॥

CC-0. In Public Domain. Digitized by eGangotri

नासतोविद्यतेभावोनाभावोविद्यतेसतः उभयोरपिदृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः १६

शाङ्करभाष्यं

नामसर्वज्ञब्रह्मतत्त्वस्यनामतदितिताद्भावस्तत्त्वंब्रह्मणोयाथात्म्यंतद्दृष्टुंशीलंयेषांतेतत्त्व दर्शिनस्तैस्तत्त्वदर्शिभिस्तत्त्वमपितत्त्वदर्शिनांदृष्टिमाश्रित्यशोकंमोहञ्चहित्वा शीतोष्णादीनिनियतानियतरूपाणिद्वन्द्वानि विकारोयमसन्नेवमरीचिजलवन्मिथ्याव भासतेतिमनसिव्यवस्यतितित्त्वत्येत्यभिप्रायः १६

आनन्दगिरिकृतटीका ।

अधिकारिविशेषणेतितित्तुत्वे हेत्वन्तरपरत्वेनोत्तरश्लोकमवतारयतिइत श्चेति ईतःशब्दार्थमेवस्फुटयतियस्मादिति यतःशीतादेःक्लेशादिहेतोरनात्मनो नास्तिवस्तुत्वंवस्तुनश्चात्मनोनिर्विकारत्वेनैकरूपत्वंअतोमुमुक्षोर्विशेषणंतितित्तुत्वं युक्तमित्याहनेत्यादिना कार्यस्यासत्त्वेपिकारणस्यसत्त्वेनात्यन्तसत्त्वासिद्धिरित्या शङ्क्यविशिनष्टिसकारणस्येति नासतइत्युपादायपुनर्नकारानुकर्षणमन्वयार्थं असतःशून्यस्यास्तित्वप्रसङ्गाभावादप्रसक्तप्रतिषेधप्रसक्तिरित्याशङ्क्याहनहीति वि मतमतात्त्विकमप्रामाणिकत्वात्रज्जुसर्पवत्नहिधर्मिग्राहकस्यप्रत्यक्षादेस्तत्त्वावेद कंप्रामाण्यंकल्प्यतेविषयस्यदुर्निरूपत्वादतोऽनिर्वाच्यंद्वैतमित्यर्थः कथंपुनरध्यक्ष्या दिविषयस्यशीतोष्णादिद्वैतस्यदुर्निरूपत्वेनानिर्वाच्यत्वंतत्राहविकारोहीति तत श्चविमतंमिथ्याआगमापायित्वात्सम्प्रतिपन्नवदितिफलितमाहविकारश्चेति वा चारम्भणश्रुतेःद्वैतमिथ्यात्वेअनुग्राहकत्वंदर्शयितुंचकारः किञ्चकार्य्यंकारणाद्भि न्नमभिन्नम्वेतिविकल्प्याद्यंदूषयतियथेति निरूप्यमाणमन्तर्बहिश्चेतिशेषःविमतं कारणान्नतत्त्वतोभिद्यतेकार्य्यत्वाद्घटवदित्यर्थः इतोपिकारणाद्वैतेननास्तिकार्य्यं आदावन्तेचयन्नास्तिवर्त्तमानेपितत्तथेतिन्यायादित्याहजन्मेति यदिकार्य्यंकार

भाषा अनुवाद ।

औरजोकहोकितौभीअतिदुःसहशीतउष्णाकैसेकरसहैं औरजोवडाक्लेश करिसहैंतोकदाचितआत्माकानाशहोसकताहैंयहशङ्काकरिकहतेहैं किविचार सेतोवेसहेजायसकतेहैं जैसेअतितुच्छऔरअनात्मधर्मअर्थात्शरीरकेधर्मजोशीत उष्णप्रभृतिउनकाआत्मासेकुछसम्बन्धनहींहै औरसत्स्वभावजोआत्माउसका कभूविनाशहोतानहीं यथार्थदर्शीतत्त्वज्ञानीइसीप्रकारसतऔरअसतदोनोंपदार्थ कीनिर्णयकियाहैइससेविवेकज्ञानकेद्वाराशीतउष्णआदिकोतुमसह्यकरो ॥ १६॥

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

णादभिन्नं तदात्मभेदेनामत्वेपूर्व्वस्मादविशेषःतादात्म्येनावस्थानन्तुनयुक्तंतस्या पिकारणव्यतिरेकेणाभावात् कार्य्यकारणविभागविधुरेवस्तुनिकार्य्यकारणपर म्परायाविभ्रमत्वादित्यभिप्रेत्याहसदादिति कार्य्यकारणविभागहीनं वस्त्वेवना स्तीतिमन्वानश्चोदयति तदसत्त्वइति अनुवृत्तव्यावृत्तबुद्धिद्वयदर्शनादनुवृत्तेचव्या वृत्तानांकल्पितं सर्वंभेदकल्पनाधिष्ठानमकार्य्यकारणंवस्तुसिध्यतीतिपरिहरति नसर्व्वत्रेति सम्प्रतिसतोवस्तुत्वेप्रमाणमनुमानमुपन्यस्यतियद्विषयेति यद्यावृत्ते ष्वनुवृत्तंतत्तदर्थंसत्यथासर्पधारादिष्वनुगतोरज्वादेरिदमंशःविमतंसत्यमव्यभि चारित्वात्संप्रतिपन्नवदित्यर्थः व्यावृत्तस्यकल्पितत्वेप्रमाणमाह यद्विषयेत्यादि ना यद्यावृत्तंतन्मिथ्यायथासर्पधारादिविमतंमिथ्याव्यभिचारित्वात्संप्रतिपन्नवदि त्यर्थइत्यनुमानद्वयमनुसृत्यसतोकल्पितत्वंअसतश्चकल्पितत्वंस्थितमितिशेषः ननु नेदमनुमानद्वयमुपपद्यते समस्तद्वैतवैतथ्यवादिनोविभागाभावादनुमानादिव्यव हारानुपपत्तेस्तत्राहसदसदिति उक्तेविभागेबुद्धिद्वयाधीनेस्थितेसत्यनुमानादिव्य वहारोनिर्व्वहतिप्रातिभासिकविभागेनवियोगात्परमार्थस्यैव तद्धेतुत्वेकेवलव्यति रेकाभावादित्यर्थः कुतःसदसद्विभागस्यबुद्धिद्वयाधीनत्वंबुद्धिविभागस्यापितवाभा वात्तत्राहसर्व्वत्रेति व्यवहारभूमिःसम्प्रत्यर्थः बुद्धिभागस्यापिकल्पितस्यैववोध्यवि भागप्रतिभासहेतुतेतिभावः बुद्धिद्वयमनुरुध्यसदसद्विभागेसतःसामान्यरूपतया विशेषाकाङ्क्षायांसामान्यविशेषेद्वेवस्तुनीवस्तुभूतेस्यातामितिचेत्तत्राहसमानाधि करणइति पदयोःसामानाधिकरण्यंबुद्ध्यारूपचर्य्यतेसोयमितिसामानाधिकरण्यव दवृटःसन्दृत्यादिसामानाधिकरण्यमेकवस्तुनिष्ठंवस्तुभेदेघटपटयोरिव तदयोगादि त्यर्थः नीलमुत्पलमितिवद्धर्म्मधर्म्मिविषयतयासामानाधिकरण्यस्यसुवचत्वान्नवस्त्वै क्यविषयत्वमितिचेन्नेत्याहननीलेति नहिसामान्यविशेषयोर्भेदेचतद्भावोभेदाभे देचतद्भावोभेदाभेदौचविरुद्धावतोजातिव्यक्त्योःसामानाधिकरण्यंनीलोत्पलयोरि वनगौणंकिन्तुव्यावृत्तमनुवृत्तेकल्पितमित्येकनिष्ठमित्यर्थः सामान्यविशेषयोरुक्त न्यायंगुणगुण्यादावतिदिशत्येवमिति तुल्यौहितत्रापिविकल्पदोषावितिभावः सा मानाधिकरण्यानुपपत्त्याद्वेवस्तुनीसामान्यविशेषावितिपक्षं प्रतिक्षिप्यविशेषावेवव स्तुनीतिपक्षंप्रतिक्षिपतितयोरिति बुद्धिव्यभिचाराद्धेयव्यभिचारेपिकथंव्यावृत्ता नांविशेषाणामवस्तुत्वमित्याशङ्क्याहतथाचेति विकारोहिसदित्यादाविति शेषः न

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

चैकंवस्तुसामान्यविशेषात्मकमेकस्यद्वैरूप्यविरोधादित्यभिप्रेत्य सामान्यमेकमेववस्तुतद्व्देरव्यभिचारात्वोध्यस्यापिसतस्तथात्वादित्याहनत्विति व्यभिचरतीतिपूर्व्वेणसम्बन्धः विशेषाणांव्यभिचारित्वेसतश्चाव्यभिचारित्वेफलितमुपसंहरतितस्मादिति असत्त्वंकल्पितत्वं तच्छब्दार्थमेवस्फोरयतिव्यभिचारादिति सद्बुद्धिविषयस्यसतोऽकल्पितत्वेतच्छब्दोपात्तमेवहेतुमाहअव्यभिचारादिति सद्बुद्धिव्यभिचारद्वारावोध्यस्यापिव्यभिचारात्तद्व्यभिचारित्वहेतोरसिद्धिरितिशङ्कते घटेविनष्टइति सद्बुद्धेर्घटमात्रबुद्धिवद्घटविषयत्वाभावान्नघटनाशेव्यभिचारोस्तिइतिपरिहरतिनपटादाविति सद्बुद्धेरघटविषयत्वेनिरालम्बत्वायोगात्विषयान्तरंवक्तव्यमित्याशङ्क्याहविशेषणेति सतोऽकल्पितत्वहेतोरव्यभिचारित्वस्यासिद्धिमुद्भृत्यविशेषाणांकल्पितत्वहेतोर्व्यभिचारित्वस्यासिद्धिंशङ्कतेसदिति यथासद्बुद्धिर्घटेनष्टेपटादौदृष्टत्वात्अव्यभिचारिणी अव्यभिचारःसतोदर्शितस्तथाघटबुद्धिरपिघटेनष्टेघटान्तरे दृष्ट्वेत्यव्यभिचारात्घटेव्यभिचारासिद्धौविशेषान्तरेष्वपिकल्पितत्वहेतोःव्यभिचारोनसिध्यतीत्यर्थः घटबुद्धेर्घटान्तरेदृष्टत्वेपिपटादावदृष्टत्वेनव्यभिचारात्पटादिविशेषेष्वपिव्यभिचारित्वसिद्धिरित्युत्तरमाहनपटादाविति विशेषाणामेवंव्यभिचारित्वेसतोपि तदुपपत्तेरव्यभिचारित्वहेत्वसिद्धितादावस्त्रमितिशङ्कतेसद्बुद्धिरिति घटादिनाशदेशेतदुपरक्ताकारेणसत्त्वाभानेपिनासत्त्वंघटाद्यभावाधिष्ठानतयाभानादित्याहनविशेष्येति यथासर्व्वगताजातिरित्यत्रखण्डमुण्डादिव्यक्तभावदेशेगोत्वं व्यञ्जकाभावान्नव्यज्यतेनगोत्वाभावात्तथासत्त्वमपिघटादिनाशेव्यञ्जकाभावान्नभातिनस्वरूपाभावादित्युक्तमेवप्रपञ्चयतिसदित्यादिना सप्रतियोगिकविशेषणत्वव्यभिचारेपिस्वरूपाव्यभिचारादुक्तंसतःसत्यत्वमितिभावः द्वयोःसतोरेवविशेषणविशेष्यत्वदर्शनात्घटसतोरपिविशेषणविशेष्यत्वेद्वयोःसत्त्वध्वांव्यात्घटादिविकल्पितत्वानुमानंसामानाधिकरण्यधीवाधितमितिचोदयति एकेति अनुभवमनुसृत्यवाधितविषयत्वमुक्तानुमानस्यनिरस्यतिनेत्यादिना घटादेःसतिकल्पितत्वानुमानस्यदोषराहित्येफलितमुपसंहरतितस्मादिति प्रथमपादव्याख्यानपरिसमाप्तावितिशब्दः ननुनेदंव्याख्यानंभाष्यकाराभिप्रेतंसर्व्वंहैतशून्यत्वविवक्षायांशास्त्रतद्भाष्यविरोधात्केनापिपुनर्दुर्व्विदग्धेन स्वमनीषिकयोत्प्रेक्षितमेतदितिचेत्मैवंकिमिदंद्वैतप्रपञ्चस्यशून्यत्वंकिन्तुच्छत्वंकिंसद्विलक्षणत्वं नाद्योऽनभ्यु

CC-0. In Public Domain. Digitized by eGangotri

अविनाशितुतद्विद्धियेनसर्व्वमिदंततं विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति १७

आनन्दगिरिकृतटीका।

पगमात् द्वितीयानभ्युपगमेतुतवैवशास्त्रविरोधोभाष्यविरोधश्चसर्व्वंहिशास्त्रंतङ्गाह्यं चद्वैतस्य सत्यत्वानधिकरणत्वसाधनेनाद्वैतसत्यत्वेपर्य्यवसितमितिवैविद्यद्वैतवत वप्रतिष्ठापितंतथाचप्रच्छेपाशङ्कासंप्रदायपरिचयाभावादितिद्रष्टव्यं अनात्मजात स्यकल्पितत्वेनावस्तुत्वप्रतिपादनपरतया प्रथमपाद्व्याख्यायद्वितीयपादमात्मनःस र्व्वकल्पनाधिष्ठानस्याकल्पितत्वेनवस्तुत्वप्रसाधनपरतयाव्याकरोतितथेति नन्वा त्मनःसदात्मनोविशेषेषुविनाशिषुतदुपरक्तस्यविनाशः स्यादित्याशङ्क्यविशिष्टनाशे पिस्वरूपानाशस्योक्त्वान्नैवमित्याहसर्व्वेति ननुकदाचिदसद्देवपुनःसत्त्वमाप द्यतेप्रागसतोघटस्यजन्मनासत्त्वाभ्युपगमात्सच्चकदाचिदसत्त्वं प्रतिपद्यतेस्थिति कालेसतोघटस्यपुनर्नाशेनासत्त्वाङ्गीकारादेवं सदसतोरव्यवस्थितत्वाविशेषादुभयो रपिहेयत्वमुपादेयत्वंवातुल्यंस्यादितितत्राहएवमिति तुशब्दोद्दृष्टशब्देनसम्बध्य मानोदृष्टिमवधारयतिनहिप्रागसतोघटस्यसत्त्वमसत्त्वेस्थिते सत्त्वप्राप्तिविरोधाद सत्त्वनिवृत्तिश्चसत्त्वप्राप्तप्राचेत् प्राप्तमितरेतराश्रयत्वमन्तरेणैवसत्त्वापत्तिमसत्व निवृत्तावसत्त्वमनवकाशिमवेत्एतेनसतोऽसत्त्वापत्तिरपिप्रतिनीतेतिभावः कथं तर्हिसतोऽसत्त्वमसतश्चसत्त्वंप्रतिभातिइत्याशङ्क्य तत्तदर्शनाभावादित्याहतत्वेति तस्यभावस्तत्वंनचतच्छब्देनपरामर्शयोग्यंकिञ्चिदस्ति प्रकृतंप्रतिनियतमित्याशङ्क

स्वामिकृतटीका।

ननुतथापिशीतोष्णादिकमतिदुःसहंकथंसोढव्यंअत्यन्तं तत्सहनेचकदाचिदा त्मनोनाशः स्यादित्याशङ्क्यतत्त्वविचारतः सर्व्वंसोढुंशक्यमित्याशयेनाहनासतोवि द्यतइति असतोऽनात्मधर्मत्वादविद्यमानस्यशीतोष्णादेरात्मनिभावःसत्तानविद्य तेतथासतःसत्स्वभावस्यात्मनोऽभावोविनाशोनविद्यतेएवमुभयोः सदसतोरन्तो निर्णयोदृष्टःकैःतत्त्वदर्शिभिर्व्वस्तुयाथार्थ्यवेदिभिःएवम्भूतविवेकेनसहस्वेत्यर्थः ॥१६॥

भाषा अनुवाद।

अविनाशीसतवस्तुकास्वरूपसामान्यसेवर्णन करिकेफेरिविशेषरूपसेकहते हैंजोइसअनित्यदेहमेसाक्षीरूपव्याप्तहोकररहाहै वहीआत्माकोअविनाशीजा नोजिसहेतुउसअव्ययआत्माकेविनाशकरनेकोकिसीकीसामर्थ्यनहींहै ॥१७॥

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

किंपुनस्तत्यत्सदेवसर्व्वदास्तीत्युच्यतेअविनाशीति अविनाशिनविनष्टुंशीलं यस्येतितुशब्दःसतोविशेषणार्थः तद्द्विविजानीहिकिंयेनसर्व्वमिदंजगत्ततंव्याप्तंस दाख्येनब्रह्मणासाकाशमाकाशेनेवघटादयः विनाशमदर्शनमभावमव्ययस्यनव्येति उपचयापचयौनयातिइत्यव्ययं तस्याव्ययस्यनैतत्सदाख्यं ब्रह्मस्वेनरूपेणव्येतिनव्य भिचरतिनिरवयवत्वाद्देहादिवत् नाप्यात्मीयेनात्मीयाभावात्यथादेवदत्तोधनहा न्याव्येतिनत्वेवंब्रह्मव्येत्यतोऽव्ययस्यास्यब्रह्मणोविनाशंनकश्चित्कर्त्तुमर्हतिनकश्चित् आत्मानंविनाशयितुंशक्नोतिईश्वरोयात्माहिब्रह्मस्वात्मनिचक्रियाविरोधात् ॥१७॥

आनन्दगिरिकृतटीका।

व्याचष्टेतदित्यादिना ननुसदसतोरन्यथात्वंकेचित्प्रतिपद्यन्तेकेचित्तुतयोरुक्तानि र्णयमनुस्मृत्यतथात्वमेवाभिगच्छन्तितत्रकेषांमतमेषितव्यमितितत्राहत्वमप्रीति १६

ननुसदितिसामान्यंस्वरूपंवाप्रथमेतस्यविशेषसापेक्षतया प्रलयदशायामशेष विशेषविनाशेविनाशःस्यान्नचात्मादयोविशेषास्तदापिसन्तीतिवाच्यं आत्मातिरि क्तानांविशेषाणांकार्य्यत्वाङ्गीकारात् प्रलयावस्थायामनवस्थानादात्मनस्तुसामान्या त्मनोधर्म्मित्वादुक्तदोषाद्द्वितीयेतुस्वरूपस्यव्यावृत्तत्वेकल्पितत्वाद्विनाशित्वमनुवृत्त त्वेनतस्यैवसामान्यतयाप्रागुक्तदोषानुशक्तिरितिमन्वानश्चोदयतिकिंपुनरिति सा मान्यविशेषभावशून्यमखण्डैकरसंसद्देवेत्यादिश्रुतिप्रसिद्धं सर्व्वविक्रियारहितंवस्तु प्रकृतंसद्विवक्षितमित्युत्तरमाहउच्यतइति आत्मनःसदात्मनोविनाशराहित्यवि ज्ञानेसर्व्वजगद्व्यापकत्वंहेतुमाहयेनेतिआत्मनोविनाशाभावेयुक्तिमाहविनाशमिति आत्मनोविनाशमिच्छतास्वतोवापरतोवानाशस्तस्यैष्यतेनाद्यइत्याह अविनाशीति देहादिद्वैतमसदुच्यतेतत सतोविशेषणंस्वतोनाशराहित्यं तस्यद्योतकोनिपातइ त्याहतुशब्दइति आकांक्षापूर्व्वकंविशेष्यंदर्शयतिकिमित्यादिना विमतमविनाशि व्यापकत्वादाकाशवत्नहिप्रसिद्धमपीतिभावः नद्वितीय इत्याहविनाशमिति नखल्वस्यविनाशंकर्त्तुंकश्चिदर्हतीतिसम्बन्धः विनाशस्यसा वशेषत्वनिरवशेषत्वाभ्यांद्वैराश्यमाश्रित्य व्याकरोतिअदर्शनमितिनकश्चिदस्या भावंकर्त्तुंशक्नोतीत्यत्रहेतुमाहअव्ययस्येतिब्रह्महिस्वरूपेणव्येति स्वसम्बन्धिनावे तिविकल्प्याद्यंदूषयतिनैतदिति नहि निरवयवस्य सावयवापचयरूपव्ययःसम्भव तीत्यत्रवैधर्म्म्यंदृष्टान्तमाहदेहादिवदिति द्वितीयंनिरस्यतिनापीति तदेवव्यति

CC-0. In Public Domain. Digitized by eGangotri

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोप्रमेयस्य तस्माद्युध्यस्व भारत १८

शाङ्करभाष्यम् ।

किंपुनस्तदसत् यत्स्वात्मसतांव्यभिचरतीत्युच्यते अन्तवन्त इति अन्तोविनाशो विद्यते येषांते अन्तवन्तो यथा मृगतृष्णिकादौ सद्बुद्धिरनुवृत्ता प्रमाणनिरूपणान्ते विच्छिद्यते सतस्या अन्तस्तथेमे देहाः स्वप्नमायादेहादिवच्चान्तवन्तो नित्यस्य शरीरिणः शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनोऽन्तवन्त इत्युक्ता विवेकिभिरित्यर्थः नित्यस्यानाशिन इति नपुनरुक्तं नित्यस्य द्विविधत्वाल्लोके नाशस्य च यथा देहो भस्मीभूतोऽदर्शनं गतो नष्ट उच्यते विद्यमानोपि यथा अन्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते तत्रानाशिनो नित्यस्येति द्विविधेनापि नाशेनासम्बन्धोऽस्येत्यर्थः अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनस्तन्माभूदिति नित्यस्यानाशिनो नेत्याह अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादिप्रमाणैरपरिच्छेद्यस्येत्यर्थः नन्वागमेनात्मापरिच्छिद्यते प्रत्यक्षादिना च पूर्व्वं नात्मनः स्वतः सिद्धत्वात् सिद्धे ह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति नहि

आन्दगिरिकृतटीका ।

रेकदृष्टान्तेन स्पष्टयति यथेति द्विविधेपि व्ययायोगे फलितमाह अत इति किञ्च ब्रह्मपरतो ननश्यत्यात्मत्वाद्घटवदित्याह न कश्चिदिति आत्मत्वहेतोरसिद्धिमुद्धरति आत्मा हीति तदात्म्यश्रुतिरत्र हीति हेतू क्रियते अस्तु तर्हि स्वयमेव ब्रह्म स्वात्मनो नाशकमुद्बन्धनादिदर्शनान्नेत्याह स्वात्मनीति १७

स्वामिकृतटीका ।

तत्र सत्स्वभावमविनाशि वस्तु सामान्येनोक्तं विशेषतो दर्शयत्यविनाशित्विति येन सर्व्वमिदमागमापायधर्मात्मकं देहादि ततं साक्षित्वेन व्याप्तं तत्त्वात्मस्वरूपमविनाशि विनाशशून्यविद्धि जानीहि तत्र हेतुमाह विनाशमिति ॥१७॥

भाषा अनुवाद ।

उत्पत्तिविनाशधर्मविशिष्टदेहादिकी अनित्यता देखावते हैं कि नित्य अर्थात् सदा एकरूपसे स्थित और इसीसे अविनाशी औ अपरिमेय कहे जानवे जोग नहीं ऐसा देही कहे आत्मा है और सुखदुख आदिधर्म विशिष्ट नश्वर विनाशी यह देह है ऐसा तत्त्वज्ञानी कहते हैं . इसीसे जो स्वरूपसे आत्मा का विनाश या सुखदुख आदिका सम्बन्ध नहीं है तो मोहजनित शोक को परित्याग करिके युद्धमे प्रवृत्त होउ और अपना क्षत्री का परमधर्म जो युद्ध सो कभूं छोडना नहीं ॥१८॥

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम्।

पूर्वमित्यमहमित्यात्मानंअप्रमायपश्चात्प्रमेयपरिच्छेदाय प्रवर्त्ततेनह्यात्मानामकस्यचिदप्रसिद्धोभवतिशास्त्वंत्वन्यंप्रमाणंअतद्धर्माध्यारोपणमात्रनिवर्त्तत्वेन प्रमाणत्वमात्मनःप्रतिपद्यतेनत्वज्ञातार्थज्ञापकत्वेनतथाचश्रुतिःयत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्व्वान्तरइतियस्मादेवंनित्योऽविक्रियश्चआत्मातस्मात् युद्ध्यस्वयुद्धादुपरमंमाकार्षीरित्यर्थःनह्यत्वयुद्धकर्त्तव्यताविधीयतेयुद्धेप्रवृत्तएवह्यसौ शोकमोहप्रतिबद्धस्तूष्णीमास्तेऽतस्तस्यकर्त्तव्यप्रतिबन्धापनयनमात्रंभगवताक्रियतेतस्माद्युद्ध्यस्वेत्यनुवादमात्रंनविधिः १८

आनन्दगिरिकृतटीका।

सदसतोरनन्तरप्रकृतयोःस्वरूपाव्यभिचारित्वेनपरमार्थतयासन्निर्धारितमिदानीमसन्निर्हिधारयिषयाप्रच्छतिकिंपुनरिति असदेवेति निर्द्धारितत्वात् प्रश्नस्यनिरवकाशत्वमाशङ्क्यशून्यंव्यावर्त्तयविवक्षितमसन्निर्धारयितुं तस्यसावकाशत्वमाह यत्स्वात्मेति देहादेरनात्मवर्गस्यप्रकृतासच्छब्दविषयतेत्याहउच्यतइति तेषांस्वातन्त्र्यंव्युदस्यतिनित्यस्येति आकाशादिव्यावृत्त्यर्थंविशिनष्टिशरीरिणइति परिणामनित्यत्वंव्यवच्छिनत्तिअनाशिनइति तस्यप्रत्यक्षाद्यविषयत्वमाहअप्रमेयस्येति देहादेरवस्तुत्वादात्मनश्चैकरूपत्वाद्युद्धेस्वधर्म्मेप्रवृत्तस्यापितवनहिंसादिदोषसम्भावनेत्याहतस्मादिति ननुदेहादिषुसदुद्धेरनुवृत्तेस्तस्याविच्छेदाभावात् कथमन्तवत्त्वंतेषामिष्यतेतत्राहयथेति तथेमेदेहाःसदुद्भिभाजोपिप्रमाणतोनिरूपणायामवसानेविच्छेदादन्तवन्तोभवन्तीतिशेषः देहत्वादिनाचजाग्रद्देहादेरन्तवत्त्वंसम्प्रतिपन्नवदनुमातुंशक्यमित्याहस्वप्नेति शरीरादेरन्तवन्त्वेपिप्रवाहरूपेणात्मनस्तत्सम्बन्धस्यानन्तत्वमाशङ्क्याहनित्यस्येति प्रवाहस्यप्रवाहिव्यतिरेकेणानिरूपणान्नतदात्मनादेहाद्यभावेसम्बन्धसिद्धिरित्यभिसन्धायोक्तं विवेकिभिरिति पदद्वयस्यैकार्थत्वमाशङ्क्यनिरस्यतिनित्यस्येत्यादिना नित्यत्वस्यद्वैविध्यसिद्ध्यर्थंनाशद्वैविध्यंप्रतिज्ञातंप्रकटयति यथेत्यादिना नाशस्यनिरवशेषत्वेनसावशेषत्वेनचसिद्धेर्द्वैविध्येफलितमाहतत्रेति विशेषणाभ्यांकूटस्थनित्यत्वमात्मनोविवक्षितमित्यर्थःअन्यतरविशेषणमात्रोपादानेपरिणामिनित्यत्वमात्मनःशङ्क्यतेत्यनिष्टापत्तिमाशङ्क्याहअन्यथेति औपनिषदत्वविशेषणमाश्रित्याप्रमेयत्वमाक्षिपतिनन्विति इतश्चात्मतोनाप्रमेयत्वमित्याहप्रत्यक्षादिनेतितेनचागमप्रवृत्तप्रेक्षयापूर्व्वावस्थाया

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

मात्मैवपरिच्छिद्यतेतस्मिन्नेवाज्ञानत्वसंभवादज्ञातज्ञापकं प्रमाणमितिचप्रमाण लक्षणादित्यर्थः एतद्प्रमेयमित्यादिश्रुतिमनुस्त्यपरिहरतिनेत्यादिना कथंमा नमनपेक्ष्यात्मनःसिद्धत्वमित्याशङ्क्योक्तंविष्टणोतिसिद्धेहीति प्रमित्सोःप्रमेयमिति शेषः तदेवव्यतिरेकमुखेनविशदयतिनहीति आत्मनःसर्वलोकप्रसिद्धत्वाच्चत स्मिन्नप्रमाणमन्वेषणीयमित्याहनह्यात्मेति प्रत्यक्षादेरनात्मविषयत्वात्तत्रचाज्ञा तज्ञाततायाव्यवहारसम्भवात्तत्प्रामाण्यस्यचव्यावहारिकत्वाद्विशिष्टे तत्प्रवृत्तावपि केवलेतद्प्रवृत्तेर्यद्यपिनात्मनितत्प्रामाण्यं तथापितद्धितश्रुत्याशास्त्रस्यतत्प्रवृत्तिर वश्यम्भाविनीत्याशङ्क्याहशास्त्रन्विति शास्त्रेणप्रत्यग्भूतेब्रह्मणिप्रतिपादितेप्रमाता दिविभागस्यव्यावृत्तत्वाद्युक्तमस्यान्तत्वमपौरुषेयतया निर्दोषत्वाच्चागमस्यप्रामाण्य मित्यर्थः तथापिकथमस्यप्रत्यगात्मनिप्रामाण्यंतस्यस्वतःसिद्धत्वेनाविषयत्वाद्ज्ञात ज्ञापनायोगादित्याशङ्क्यस्वतोभासमानोपिप्रतीचौमनुष्योहं कर्त्ताहमित्यादिनाम नुष्यत्वकर्तृत्वादीनामतद्धर्माणामध्यारोपणेनात्मनिप्रतीयमानत्वात् तन्मात्रनिव र्त्तकत्वेनात्मनोविषयत्वमनापाद्यैवशास्त्रंप्रामाण्यंप्रतिपद्यतेसिद्धन्तुनिवर्त्तकत्वादि तिन्यायादित्याहअतद्धर्मेति घटादाविवस्फुरणातिशयजनकत्वेनकिमित्यात्मनिशा स्त्रप्रामाण्यं नेष्टमित्याशङ्क्यजड़त्वाजड़त्वाभ्यांविशेषादितिमत्वाह नह्यितिब्राह्मा त्मनोमनापेक्षामन्तरेणस्वतः स्फुरणेप्रमाणमाहतथाचेतिसाक्षादन्यापेक्षामन्तरे णापरोक्षदपरोक्षस्फुरणात्मकंयद्ब्रह्मनचतस्यात्मनोर्थान्तरत्वंसर्वाभ्यन्तरत्वेनसर्व वस्तुसारत्वात्तमात्मनंव्याचष्टेतियोजनाअप्रमेयत्वनाविनाशित्वप्रतिपाद्यफलितंनि गमयतियस्मादिति स्वधर्मनिष्टत्तिहेतुनिषेधेतात्पर्यंदर्शयतियुद्धादिति आत्मनो नित्यत्वादिस्वरूपमुपपाद्ययुद्धकर्त्तव्यत्वविधानात् ज्ञानकर्मसमुच्चयोत्रभातीत्याश ङ्क्याहनहीति युद्धस्वेतिवचनात्तत्प्रवर्त्तकत्वविधिरस्तीत्याशङ्क्याहयुद्धइति कथं तर्हिकथंभीष्ममहमित्याद्यर्जुनस्ययुद्धोपरमपरंवचनमितितत्राहशोकेति यदि स्वतोयुद्धेप्रवृत्तिःतर्हिभगवद्वचनस्यकागतिरित्याशङ्क्याहतस्येति भगवद्वचनस्य प्रतिबन्धनिवर्त्तकत्वे सत्यर्जुनप्रवृत्तेःस्वाभाविकत्वफलितमाहतस्मादिति ॥ १८॥

अविनाशितुतद्विद्धीत्यत्रपूर्वार्द्धेनतत्पदार्थसमर्थनमुत्तरार्द्धेननिरीश्वरवादस्यप रिणामवादस्यवानिराकरणमात्मनि जन्मादिप्रतिभानस्यौपचारिकत्वप्रदर्शनमन्त वन्तइत्यादिवचनमितिकेचित्अस्तुनामायमपिपन्थाःपूर्वोक्तस्यगीताशास्त्रार्थस्योत्

CC-0. In Public Domain. Digitized by eGangotri

यएनंवेत्तिहन्तारंयश्चैनंमन्यतेहतम् उभौतौनविजानीतोनायंहन्तिनहन्यते १९

शाङ्करभाष्यम्।

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रंनप्रवर्त्तकमित्येतत्पार्थस्य साक्षीभूतेऽनुचावानिनायभगवान्यत्तुमन्यसेयुद्धेभीष्मादयोमयाहन्यन्तेअहमेवतेषां हन्तेत्येषाबुद्धिर्दृष्टैवतेकथंयएनमिति यएनंप्रकृतंदेहिनंवेत्तिविजानातिहन्तारंह ननक्रियायाःकर्त्तारंयश्चैनमन्योमन्यतेहतंदेहहननेनहतोऽस्मितिहननक्रियायाः कर्मभूतंतावुभौनविजानीतोनज्ञातवन्तौ अविवेकेनात्मानमहंप्रत्ययविषयंहन्ताऽहं हतीस्मअहमितिदेहहननेनआत्मानंयौविजानीतस्तावात्मस्वरूपानभिज्ञावित्यर्थः य स्मादयमात्माहन्तिनहननक्रियायाःकर्त्ताभवतिनचहन्यते नचकर्मभवतीत्यर्थअवि क्रियत्वात् १९

आनन्दगिरिकृतटीका।

प्रेक्षामात्रमूलत्वंनिराकर्तुंमन्वद्वयंभगवानानीतवानितिश्लोकद्वयस्यसङ्गतिंदर्शयति शोकमोहादीति तत्प्रथममन्वस्यसङ्गतिमाहयत्विति प्रत्यक्षनिबन्धनत्वादमु ष्यावुद्वेर्दृष्टात्वमयुक्तमित्याक्षिपतिकथमिति प्रत्यक्षस्याज्ञानप्रसूतत्वेनाभासत्वात् तत्कृतावुद्विर्नप्रमेतिपरिहरतियएनमिति हन्ताचेन्मन्यतेहन्तुइत्याद्यास्चमर्थ तोदर्शयित्वाव्याचष्टेयएनमिति हन्तारंहतञ्चात्मानंमन्यमानस्यकथमज्ञानमित्या शङ्क्याहहन्ताहमिति हन्तृत्वादिज्ञानमज्ञानमित्यत्रहेतुमाहयस्मादिति आ त्मनोहननंप्रतिकर्तृत्वकर्मत्वयोरभावेहेतुंदर्शयतिअविक्रियत्वादिति १९

स्वामिकृतटीका।

तदेवंभीष्मादिमृत्युनिमित्तः शोकोनिवारितोयज्ञात्मनोहन्तृत्वनिमित्तंदुःख मुक्तं एतान्नहन्तुमिच्छामीत्यादिना तदपितद्देवनिर्निमित्तमित्याह यएनमिति

भाषाअनुवाद।

भगवानकीइसबातसेमहात्माभीभ्रमितामहादिकके मृत्युहेतकजोअर्जुनको शोकआयकेप्राप्तभयाथासोदूरभयाअबकुटुम्बकेबधकरनेहारेहमहैं यहदुखप्रथम अध्यायके ३४ श्लोकमेकहाहै सोउसदुखकेउत्पन्नहोनेमेकोईहेतुनहींहै यहप्र तीतिकरावतेहैं कियहआत्मानकिसीसेमरताऔरनकिसीकोमारताहै औरजो इसकोहन्ताजानताऔरइसकोहतमानतावेदोनोकुछभीनहींजानतेहैं १९

CC-0. In Public Domain. Digitized by eGangotri

नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः अजोनित्यःशाश्वतोऽयंपुरा णोनहन्यतेहन्यमानेशरीरे २०

शाङ्करभाष्यं

कथमविक्रियःआत्मेतिद्वितीयोमन्त्रः नजायतेनोत्पद्यतेजनिलक्षणातुवस्तुवि क्रियानात्मनोविद्यतइत्यर्थःतथानम्रियतेवा तत्रवाशब्दश्चार्थेनम्रियतेचेत्यन्याविना शलक्षणाविक्रियाप्रतिषिध्यतेकदाच्छब्दःसर्वविक्रियाप्रतिषेधैःसंबध्यते नकदा चिज्जायतेनकदाचिन्म्रियतइत्येवं यस्मादयमात्माभूत्वाभवनक्रियामनुभूयपश्चाद भविताअभावंगन्तानभूयःपुनस्तस्मान्नम्रियतेयोहिभूत्वानभवितासम्रियतइत्युच्यते लोकेवाशब्दान्नशब्दाच्चायमात्माभूत्वा वाभवितादेहवन्नभूयःपुनस्तस्मान्नजायतेयो ह्यभूत्वाभवितासजायतइत्युच्यतेनैवमात्माऽतोनजायते यस्मादेवंतस्मादजोयस्मा

स्वामिकृतटीका ।

एनमात्मानमात्मनोहननक्रियायांकर्मत्ववत् कर्तृत्वमपिनास्तीत्यर्थः तत्रहेतुर्नाय मिति १९

भाषा अनुवाद ।

आत्माकानाशनहीं यहवातषडभावविक्रियाकहेविकारकाअभावकथनकेद्वा राद्दढकरतेहैं किआत्माकाजन्महोतानहीं अर्थात्उसकाजन्मरूपविकारनहीं औरकभीमरताभीनहीं अर्थात्विनाशरूपविकारनहींऔरआत्माउत्पन्नहोकेवि द्यमानहैयहभीनहीं अर्थात्वर्त्तमानरूपविकारनहींजोजन्मैसोईवर्त्तमानहोता यहतोअजऔपूर्वसेसदासर्वदाविराजमानहै इसकाफेरिजन्मलेविद्यमानहोना असम्भवहै औरयहनित्यसदाएकरूपअर्थात्इसकावृद्धिरूपविकारनहींऔरयह शाश्वतअर्थात्क्षयरहितऔपुराणअर्थात्इसकापरिणामनहीं परिणामकहतेरू पान्तरहोनेकोआत्मापुरातनहोकेभीनयासाहोता देखोपरिणतहोकेभीरूपान्त रकोप्राप्तनहींहोताहैं ज्योंकात्योंहीरहताऔरभीकहतेकिपहलेनहींथाअवभ याऔरबढ़ताहैयहकुछबातआत्मामेनहींहै इसअर्थमेभीवृद्धिरूपविकाररहितहो ताहै इसविषयमेअजऔनित्ययेदोनोशब्दोंकेरहनेसे औरकुछकहनेकाप्रयोजन नहींइसीप्रकारआत्माकाजन्मविद्यमानतावृद्धिपरिणामअपक्षय औविनाशये छविकारोंकाअभावसांख्यशास्त्रमेनिर्णयकियाहैअबजोवाकीसोकहतेहैंकिशरी रहतहोनेसेभीआत्माहतहोतानहींजिससेवहअविनाशीहै २०

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

न्नम्रियतेतस्मान्नित्यश्चयद्यप्याद्यन्तयोर्विक्रिययोःप्रतिषेधेसर्व्वाविक्रियाःप्रतिषिद्धा भवन्तितथापिमध्यभाविनीनांविक्रियाणांतदर्थैः स्वशब्दैरेवप्रतिषेधःकर्त्तव्यइत्य नुक्तानामपियौवनादिसमस्तविक्रियाणांप्रतिषेधोयथास्यादित्याहशाश्वतइत्यादिना शाश्वतइत्यपक्षयलक्षणाविक्रियाप्रतिषिद्ध्यतेशश्वद्भवः शाश्वतीनापक्षीयतेस्वरूपेण निरवयत्वान्निर्गुणत्वाच्चनापिगुणक्षयेनापक्षयः अपक्षयविपरीतापिवृद्धिलक्षणा विक्रियाप्रतिषिध्यतेपुराणइति योह्यवयवागमेनोपचीयतेसवर्द्धतेऽभिनवइतिचो च्यतेअयंत्वात्मानिरवयवत्वात्पुरापिनवएवेति पुराणोनवर्द्धतइत्यर्थःतथानहन्यते नविपरिणम्यतेहन्यमानेविपरिणम्यमानेपि शरीरेहन्तिरत्वविपरिणामार्थेद्रष्ट व्योऽपुनरुक्ततायैनविपरिणमतइत्यर्थःअस्मिन्मन्त्रेषडभावविकारालौकिकवस्तुवि क्रियाआत्मनिप्रतिषिध्यन्तेसर्व्वप्रकारविक्रियारहितआत्मेति वाक्यार्थःयस्मादेवंत स्मादुभौतौनविजानीतइतिपूर्व्वेणमन्त्रेणास्यसम्बन्धः २०

आनन्दगिरिकृतटीका।

तदेवसाधयितुंनजायतेम्रियतेवाविपश्चिदित्यादिमन्त्वान्तरमवतारयतिकथ मिति सर्व्वविक्रियाराहित्यप्रदर्शनेनहेतुंविशदयन् मन्त्रमेवपठतिनजायतइति जन्ममरणविक्रियाद्वयप्रतिषेधंसाधयतिनायमिति अयमात्माभूत्वानभवितानचा भूत्वाभूयोभवितेतियोजना नकेवलंविक्रियाद्वयमेवाननिषिध्यतेकिन्तुसर्व्वमेवावि क्रियाजातमित्याहअजइति वाच्यमर्थमुक्त्वा विवक्षितमर्थमाह जनिलक्षणेति विकल्पार्थत्वंव्यावर्त्तयतिवेति निष्पन्नमर्थंनिर्द्दिशतिनेत्यादिना सम्बन्धमेवाभि नयतिनकदाचिदिति अन्त्यविक्रियाभावेहेतुत्वेननायमित्यादिव्याचष्टेयस्मादिति उक्तमेवव्यनक्तियोहीति आत्मनितुभूत्वापुनरभवनाभावान्नास्तिमृत्युरित्यर्थः आ त्मनोजन्माभावेपिहेतुरिहैवविवक्षितइत्याहवाशब्दादिति अभूत्वेतिक्रेदःदेहव दितिव्यतिरेकोदाहरणं उक्तमेवार्थंसाधयतियोहीति जन्माभावेतत्पूर्व्विकास्ति त्वविक्रियापिनात्मनोस्तीत्याहयस्मादिति प्राणवियोगादात्मनोमृतेरभावेसावशे षनाशाभाववन्निरवशेषनाशाभावोपिसिध्यतीत्याहयस्मादिति ननुजन्मनाशयो र्निषेधेतदन्तर्गतानाविक्रियान्तराणामपिनिषेधसिद्धेस्तन्निषेधार्थंनपृथक्प्रयतितव्य मितितत्राहयद्यपीति स्वशब्दैर्मध्यवर्त्तिविक्रियानिषेधवाचकैरितियावत् आ र्थिकेपिनिषेधेनिषेधस्यसिद्धतयाशब्दोनिषेधो नपृथगर्थवानित्याशङ्क्याहअनुक्ता

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

यएनंवेत्तिहन्तारमित्यनेनमन्त्रेणहननक्रियायाः कर्त्ताकर्मचनभवतीतिप्रतिज्ञायनजायतइत्यनेनाविक्रियत्वेहेतुमुक्त्वाप्रतिज्ञातार्थमुपसंहरतिवेदाविनाशिनमितिवेदविजानातिअविनाशिनमन्त्रभावविकाररहितंनित्यंविपरिणामरहितं

आनन्दगिरिकृतटीका ।

नामिति नित्यशब्देनशाश्वतशब्दस्यपौनरुक्त्यंपरिहरन् व्याकरोतिशाश्वतइत्यादिना अपक्षयोहिस्वरूपेणवास्याद्गुणापचयतोवेति विकल्पक्रमेणदूषयति नेत्यादिना पुराणपदस्यागतार्थत्वंकथयतिअपक्षयेतितद्वैवस्फुटयतियोहीति नम्रियतेवेत्यनेनचतुर्थपादस्यपौनरुक्त्यमाशङ्क्यव्याचष्टे तथेत्यादिना ननुहिंसार्थोहन्तिःश्रूयतेतत्कथंविपरिणामोनिषिध्यतेतत्राहहन्तिरिति हिंसार्थत्वसम्भवेकिमित्यर्थान्तरंहन्तेरिष्यतेतत्राहअपुनरुक्तायाइति हिंसार्थत्वेस्मतिनिषेधेनपौनरुक्त्यंस्यात्तन्निषेधार्थंविपरिणामार्थत्वमेष्टव्यमित्यर्थः पूर्वावस्थात्यागेनावस्थान्तरापत्तिर्विपरिणामःतदर्थश्चेदत्रहन्तिरिष्यतेतदानिष्पन्नमर्थमाहनेति नजायतेइत्यादिमन्त्रार्थमुपसंहरतिअस्मिन्निति षण्णांविकाराणामात्मनिप्रतिषेधेफलितमाहसर्व्वेति आत्मनःसर्व्वविक्रियाराहित्येपिकिमायातमित्याशङ्क्याहयस्मादिति २०

स्वामिकृतटीका ।

नहन्यतइत्येतदेवषड्भावविकारशून्यत्वेनद्रढयतिनेति नजायतइतिजन्मप्रतिषेधःनम्रियतइतिविनाशप्रतिषेधःवाशब्दौचार्थेनचायंभूत्वाऽत्यद्यभविताभवतिअस्तित्वंभजतेकिन्तुप्रागेवस्वतःतद्रूपइतिजन्मानन्तरास्तित्वलक्षणद्वितीयविकारप्रतिषेधस्तत्रहेतुःयस्मादजः योहिजायतेसजन्मानन्तरमस्तित्वंभजते नतुयःस्वत एवास्तिसभूयोऽन्यदस्तित्वंभजतइत्यर्थः नित्यःसर्व्वदैकरूपइतिवृद्धिप्रतिषेधःशाश्वतःशश्वद्भवइत्यपक्षयप्रतिषेधः पुराणइतिविपरिणामप्रतिषेधःपुरापिनवएवनतुपरिणामतोरूपान्तरंप्राप्यनवोभवतीत्यर्थः यद्वाभवितेत्यस्यानुषङ्गंकृत्वाभूयोऽधिकंयथाभवतितथानभवितेतिवृद्धिप्रतिषेधःअजोनित्यइतिचोभयंवृद्ध्याद्यभावेहेतुरितिनपौनरुक्त्यं तदेवंजायतेअस्तिवर्द्धतेविपरिणमतेअपक्षीयतेनश्यतीत्येवंसांख्यादिभिरुक्ताःषड्भावविकारानिरस्ताःयदर्थमेते विकारानिरस्तास्तंप्रस्तुतंविनाशाभावमुपसंहरतिनहन्यतेहन्यमानेशरीरइति २०

CC-0. In Public Domain. Digitized by eGangotri

वेदाविनाशिनंनित्यंयएनमजमव्ययं कथंसपुरुषःपार्थकंघातयतिहन्तिकं ॥२१॥

शाङ्करभाष्यं

योवेदेतिसम्बन्धः एनंपूर्व्वेणमन्त्रेणोक्तलक्षणमजंअव्ययंउपजनापक्षयरहितंकथं केनप्रकारेणसविद्वान् पुरुषोऽधिकृतोहन्तिहननक्रियांकरोतिकथंवाघातयतिह न्तारंप्रयोजयति नकथञ्चित्कञ्चित्हन्तिनकथञ्चित्कञ्चित्घातयतीत्युभयवा क्षेपएवार्थः प्रश्नार्थासम्भवात्हेत्वर्थस्यअविक्रियत्वस्यचतुल्यत्वाद्विदुषः सर्व्वकर्म्म प्रतिषेधएवप्रकरणार्थोऽभिप्रेतोभगवताहन्तेस्त्वाक्षेपउपाहरणार्थत्वेन विदुषःकि ञ्चित्कर्मासम्भवेहेतुविशेषंपश्यन्कर्माण्याक्षिपतिभगवान् कथंसपुरुषइति ननू क्तमेवआत्मनोऽविक्रियत्वंसर्व्वकर्म्मासम्भवकारणविशेषः सत्यमुक्तोनतुसकारण विशेषेऽन्यत्वाद्विदुषोऽविक्रियत्वादात्मनइति नन्वविक्रियंस्थाणुं विदितवतःक र्मनसम्भवतीतिचेन्नविदुषआत्मत्वान्नदेहादिसंघातस्यविद्वत्ता अतःपारिशेष्याद संहतआत्माविद्वानविक्रियइतितस्यविदुषःकर्म्मासम्भवादाक्षेपोयुक्तः कथंसपुरुषइ तियथावृद्धाद्याहृतस्यशब्दाद्यर्थस्याविक्रिय एवसन्बुद्धिवृत्तिविवेकविज्ञानेनावि द्ययोपलब्धआत्माकल्प्यते एवमेवात्मानात्मविवेकज्ञानेनबुद्धिवृत्त्याविद्ययाअसत्य रूपयैवपरमार्थतोऽविक्रियएवात्माविद्वानुच्यते विदुषःकर्मासंभाववचनाद्यानि कर्म्माणि शास्त्रेणविधीयन्तेतान्यविदुषोविहितानीति भगवतानिश्चयोऽवगम्यते ननु विद्याप्यविदुष एवविधीयते विदितविद्यस्यपिष्टपेषणवद्विद्याविधाना नर्थक्यात् तत्राविदुषः कर्म्माणिविधीयन्तेनविदुषइति विशेषोनोपपद्यतेइति चेन्नानुष्ठेयस्य भावाभावविशेषोपपत्तेरग्निहोत्रादि विध्यर्थज्ञानोत्तरकालम

भाषा अनुवाद।

पूर्ब्बश्लोकमेआत्माकोषडविकाररहितकहादूसमेआत्माहननक्रियाजोमार नाद्दसकाकर्त्ताकहेकरनेवालानहींहै यहबातअच्छीप्रकारसेसिद्धभईसोईकह तेहैं किजोकोईइसआत्माकोघटनेवढनेसेरहिततथाजन्महीनऔ अविनाशीजा नतेहैं हेअर्जुनवेकिसवास्तेकिसीकोसारेंगे कारणयहकिआत्माअविनाशीकेव धकीउपायनहींहै औआपप्रेरणाकरिऔरकिसीसेकिसीकोभीकिसलियेघात करावेगा इससेश्रीकृष्णजीकोयहअभिप्रायजानीगईकिभीष्मआदिकेवधमेप्रयोज करूपदोषहमैकभीदीजोनहींअर्थात्तुमारेकहनेसेयहकामहमनेकियाहैऐसाक हियोनहीं २१

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ग्निहोत्रादिकर्म्मानेकसाधनोपसंहारपूर्व्वकमनुष्ठेयकर्त्तृकं ममकर्त्तव्यमित्येवंप्र
कारविज्ञानवतोऽविदुषोयथानुष्ठेयंभवति नतुतथानजायत इत्यात्मस्वरूपविध्यर्थ
ज्ञानोत्तरकालभाविकिञ्चिदनुष्ठेयंभवति किन्तुनाहंकर्त्तानभोक्तेत्याद्यात्मैकत्वाक
र्त्तृत्वादिविषयज्ञानादन्यत्नोत्पद्यतइत्येषविशेषउपपद्यते यःपुनःकर्त्ताहमिति
वेत्तात्मानंतस्यममेदं कर्त्तव्यमितिश्रवश्यम्भाविनीबुद्धिःस्यात्तदपेक्षयासोधिक्रियत
इतितंप्रतिकर्म्माणिसम्भवन्तिसचाविद्वान् उभौतौनविजानीतइतिवचनात्विशे
षितस्यचविदुषः कर्माक्षेपवचनात्कथंसपुरुषइतिस्माद्विशेषितस्यअविक्रियात्म
दर्शिनोविदुषोमुमुक्षोश्च सर्व्वकर्मसन्यासएवाधिकारोऽतएवभगवान्नारायणःसां
ख्यान्विदुषोऽविदुषश्चकर्मिणः प्रविभज्यद्वेनिष्ठेग्राहयतिज्ञानयोगेन सांख्यानां
कर्मयोगेनयोगिनामितितथाचपुनायाहभगवान् व्यासोद्वाविमावथपन्थानावित्या
दितथाचक्रियापथश्चैवपुरस्तात्पश्चात्संन्यासश्चेत्येतमेवविभागं पुनःपुनर्द्दर्शयिष्य
तिभगवानऋतत्त्वविदहंकारविमूढात्मा कर्त्ताहमितिमन्यतेतत्ववित्तुनाहंकरो
मीतितथाचसर्व्वकर्माणिमनसासंन्यस्यास्तइत्यादितत्रकेचित् पण्डितमन्यावदन्ति
जन्मादिषड्भावविक्रियारहितोऽविक्रियोऽकर्त्तैकोहमात्मेतिनकस्यचित् ज्ञानमुत्
पद्यतेयस्मिन्सतिसर्व्वकर्मसन्न्यासउपदिश्यतेतन्न नजायतइत्यादिशास्त्रोपदेशान
र्थक्यप्रसङ्गात्तथाचशास्त्रोपदेशसामर्थ्याद्धर्म्मास्तित्वविज्ञानं कर्त्तुश्चदेहादिसम्बन्धि
ज्ञानञ्चोत्पद्यतेतथाचशास्त्रात् तस्यैवात्मनोऽविक्रियत्वाकर्त्तृत्वैकत्वादिविज्ञानं
कस्मान्नोपपद्यतेइतिप्रष्टव्यास्ते करणगोचरत्वादितिचेन्न मनसैवानुद्रष्टव्यमिति
श्रुतेःशास्त्राचार्य्योपदेशजनितशमदमादिसंस्कृतं मनआत्मदर्शनेकरणंतथाचतद
धिगमायःनुमानेआगमेचसतिज्ञानंनोत्पद्यतेइति साहसमानमेतत्ज्ञानञ्चोत्पद्य
मानतद्विपरीतमज्ञानंअवश्यंबाधतइत्यभ्युपगन्तव्यं तच्चाज्ञानंदर्शितहन्ताहंहतो
स्मीत्युभौतौनविजानीतइत्यत्रचात्मनोहननक्रियायाः कर्त्तृत्वं कर्म्मत्वंहेतुकर्त्तृत्व
ञ्चाज्ञानकृतंदर्शितंतच्चसर्व्वक्रियास्वपिसमानं कर्त्तृत्वादेरविद्याकृतत्वमविक्रिय
त्वादात्मनःविक्रियावान्हिकर्त्तात्मनःकर्म्मभूतमन्यं प्रयोजयतिकुर्व्वितितदेतदविशे
षेणविदुषःसर्व्वक्रियासुकर्त्तृत्वंहेतुकर्त्तृत्वञ्चप्रतिषेधतिभगवान्विदुषः कर्म्माधिका
राभावप्रदर्शनार्थंवेदाविनाशिनं कथंसपुरुषइत्यादिनाक्षपुनर्व्विदुषोधिकारइत्येत
दुक्तंपूर्व्वमेवज्ञानयोगेनसांख्यानामितितथाचसर्व्वकर्मसंन्यासं वक्ष्यतिसर्व्वकर्माणि

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम् ।

मनसेत्यादिना ननुमनसेतिवचनान्नवाचिकानांकायिकानाञ्चसन्न्यासइतिचेत्न सर्व्वकर्म्माणीतिविशेषितत्वात्मानसानामेव सर्व्वकर्म्मणामितिचेन्नमनोव्यापारपूर्व्वकत्वाद्वाक्कायव्यापाराणांमनोव्यापाराभावेकर्म्मानुपपत्तेः शास्त्रीयाणांवाक्कायकर्म्मणांकारणानिमानसानिमनोव्यापाराणिवर्ज्जयित्वान्यानिसर्व्वकर्म्माणिमनसासन्न्यस्यास्तइतिचेन्ननैवकुर्व्वन्नकारयन्इति विशेषणात्सर्व्वकर्मसंन्यासोऽयंभगवतोक्तमरिष्यतोनजीवतइतिचेन्ननवद्वारेपुरेदेहीआस्तेइति विशेषणानुपपत्तेः नहिसर्व्वकर्मसंन्यासेनस्थितस्यतद्देहे आसनंसम्भवत्यकुर्व्वतोऽकारयतश्चदेहे संन्यस्येतिसम्बन्धोनदेहेआस्तइतिचेन्नसर्व्वात्मनोऽविक्रियत्वावधारणात् शासनक्रियायाश्चाधिकरणापेक्षत्वात्तदनपेक्षत्वाच्चसंन्यासस्यसंपूर्व्वस्तुन्यासशब्दोत्यागार्थोननिक्षेपार्थः तस्माद्गीताशास्त्रेआत्मज्ञानवतःसन्न्यासएवाधिकारोनकर्म्मणीतितत्रतत्रोपरिष्टादात्मज्ञानप्रकरणेदर्शयिष्यामः २१

आनन्दगिरिकृतटीका ।

पूर्व्वश्लोकार्धस्यैवोत्तरत्वापिप्रतिभानात् पौनरुक्त्यमाशंक्यवृत्तानुवादपूर्वकमुत्तरश्लोकमवतारयति यएनमित्यादिना कर्त्तृत्वाद्यभिमानविरोधाद्द्वैतकूटस्यात्मनिश्चयसामर्थ्यात्प्राग्विदुषःसंन्यासंविद्यापरिपाकार्थमभ्यनुजानाति वेदेति पदद्वयस्यपूर्वमेवपौनरुक्त्यमाह अविनाशिनमित्यादिना प्रश्नोपिसम्भवतिकिमितितत्रउल्लेखेनव्याख्यायतेतत्राह उभयत्रेतिउत्तरत्रप्रतिवचनादर्शनान्नात्रप्रश्नःसम्भवतीत्यर्थःविवक्षितंप्रकरणार्थंनिगमयति हेत्वर्थस्येति अविक्रियत्वंहेत्वर्थस्यविदुषःसर्व्वकर्म्मनिषेधेसमानत्वादितियावत्यदिविदुषःसर्व्वकर्म्मनिषेधोभिमतस्तर्हिकिमितिहन्त्यर्थएवाक्षिप्यतेतत्राह हन्तेरिति उक्तंहेतुमाक्षेप्तुंपृच्छति विदुषइति अभिप्रायमप्रतिपद्यमानोहेतुविशेषंपूर्व्वोक्तंस्मारयति नन्विति उक्तमङ्गीकृत्याक्षिपति सत्यमितिविदुषोविज्ञानात्मनोब्रह्मणश्चवेद्यस्यविरुद्धधर्म्मत्वेनदृष्टन्तहिनवह्निन्नत्वाद्विदुषःसर्व्वकर्म्मत्यागेनअसौकारणविशेषःस्यादित्याह अन्यत्वादिति अविक्रियत्वादितिच्छेदः तथापिकूटस्थमविक्रियंब्रह्मप्रतिपद्यमानस्यकुतोविक्रियासम्भवेत्ब्रह्मप्रतिपत्तिविरोधादित्याशंक्याह नन्विति अयमात्माब्रह्मेत्यादिश्रुत्यासमाधत्तेनविदुषइतिकिञ्चविद्वत्ताविशिष्टस्यवाकेवलस्यवा नाद्योविशिष्टस्यविद्वत्तायांविशेषणस्यापितद्ब्रह्मसङ्गान्नचविशेषणीभूतसंघातस्याचेतनत्वाद्विद्व

आनन्दगिरिकृतटीका ।

त्तायुक्तेत्याह नदेहादीति द्वितीयेतुजीवब्रह्मविभागासिद्धिरित्याह अतइतिकि ञ्चप्रामाणिकविरुद्धधर्मवत्त्वस्यासिद्धत्वात्प्रातिभासिकस्यच विम्बप्रतिविम्बयोरनै कान्त्याद्भेदानुमानायोगात् जीवब्रह्मणोरभेदसिद्धिरित्यभिप्रेत्यस्खलितमाह इतित स्येति नन्वविक्रियस्यब्रह्मरूपतयासर्व्वकर्मासम्भवेविदुषोविहत्तापिकथंसम्भवति नहिब्रह्मणोऽविक्रियस्यविद्यालक्षणाविक्रियास्वीक्रियाभवितुमर्हतितत्राह यथेति अदृष्टेन्द्रियादिसहकृतमन्तःकरणंप्रदीपप्रभावद्विषयपर्य्यन्तंपरिगतंवुद्विवृत्तिरुच्य तेतत्रप्रतिविम्बितंचैतन्यंअभिव्यञ्जकवुद्विवृत्तेरविवेकाद्विषयज्ञानमितिव्यवह्रियते तेनात्मोपलब्धाकल्प्यतेतच्चाविद्याप्रयुक्तमिथ्यासम्बन्धनिवन्धनं तथैवाध्यासिकस म्बन्धेनब्रह्मात्मैक्याभिव्यञ्जकवाक्योत्थवुद्विवृत्तिद्वारावित्रानात्माव्यपदिश्यते नचमि थ्यासम्बन्धेनपारमार्थिकाविक्रियत्वविहतिरस्तीत्यर्थः अहंब्रह्मेतिवुद्विवृत्तेर्भोच्चा वस्थायामपिभावादात्मनःसविशेषत्वमाशंक्य तस्यावदुपाधिसत्त्वमेवेत्याह अस त्येतिननुकूटस्थस्यात्मनोमिथ्याविद्यावत्त्वेपितस्यकर्माधिकारनिवृत्तौकस्यकर्माणिवि धीयन्ते नहिनिरधिकाराणांतेषांविधिरित्याशंक्याह विदुषइति कर्माण्यविदुषो विहितानीतिविशेषमाक्षिपति ननितिकर्मविधानमविदुषोविदुषश्चविद्याविधा नमितिविभागेकाहानिरित्याशंक्याह विदितेति विद्यायाविदितत्वंलब्धत्वंकर्म विधिःअविदुषोविद्याविधिरितिविभागासम्भवेस्खलितमाह तच्चेतिधर्मज्ञानानन्त रमनुष्ठेयस्यभावात्ब्रह्मज्ञानोत्तरकालञ्चतदभावात्ब्रह्मज्ञानहीनस्यैवकर्मविधि रितिसमाधत्ते नानुष्ठेयस्येतिविशेषोपपत्तिमेवप्रपञ्चयति अग्निहोत्रादीतिननुदे हादिव्यतिरिक्तात्मज्ञानंविनापारलौकिकेषुकर्मसुप्रवृत्तेरनुपपत्तेरुत्पाद्यविधज्ञानव ताकर्मानुष्ठेयमितिचेत्तत्राह कर्त्ताहमितिआत्मनिकर्त्तृभोक्तृत्वेवंविज्ञानवत्त्वेपिब्र ह्मज्ञानविहीनत्वेनाविदुषोनुष्ठेयंकर्मेत्यर्थः देहादिव्यतिरिक्तात्मज्ञानवद्ब्रह्मज्ञान मपिज्ञानत्वाविशेषात् कर्मप्रवृत्तावुपकरिष्यतीत्याशंक्याह नत्विति अनुष्ठेयविरो धित्वादविक्रियात्मज्ञानस्येतिशेषः ननुब्रह्मात्मैकत्वज्ञानादुत्तरकालमपिकर्त्ताहमि त्यादिज्ञानोत्पत्तौकर्मविधिःसावकाशःस्यादितिनेत्याह नाहमिति कारणाभावा दितिशेषःकर्त्तृत्वादिज्ञानमन्यदित्युक्तं अनुष्ठाननानुष्ठानयोरुक्तविशेषादविदुषो नुष्ठानंविदुषोनेत्युपसंहरतिइत्येषइति नन्वात्मविदोनचेदनुष्ठेयंकिञ्चिदस्तिकथं तर्हिविद्वान्यजेतेत्यादिशास्त्रात्तंप्रतिकर्माणिविधीयन्तेतत्राह यःपुनरिति आत्म

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

निकर्त्तृत्वादिज्ञानापेक्षयाकर्मस्वधिकृतत्वज्ञानेतथाविधंपुरुषं प्रतिकर्माणिविधीयन्तेसर्वं प्राचीनवचनादविद्वानेवेतिनिश्चीयतेनखल्वकर्त्तृत्वादिज्ञानवतस्तद्विपरीतकर्त्तृत्वादिज्ञानद्वाराकर्मसुप्रवृत्तिरित्यर्थः कर्म्मासम्भवेब्रह्मविदोहेत्वन्तरमाह विशेषितस्येति वेदाविनाशिनमित्यादिनेतिशेषः यद्यपिविदुषोनास्तिकर्म्मतथापिविविदिषोःस्यादित्याशंक्याह तस्मादिति विद्ययाविरुद्धत्वादिप्यमाणमोक्षप्रतिपक्षत्वाच्चकर्मणामित्यर्थः यद्यपिमुमुक्षोरप्यमकर्माण्यपेक्षितानितथापिविद्यातत्फलाभ्यामविरुद्धान्येवतान्यभ्युपगतान्यन्यथाविविदिषासंन्यासविधिविरोधादित्यभिप्रेत्योक्तंभगवतोनुमतिमाह अतएवेति विदुषोविविदिषोश्चसंन्यासेऽधिकारोविदुषस्तुकर्मणीतिविभागस्येष्टत्वादित्यर्थः अधिकारिभेदेननिष्ठाद्वयंभगवतावेदव्यासेनापिदर्शितमित्याह तथाचेति अध्ययनविधिनाखाध्यायपाठेनेवर्णिकस्यप्रवृत्तत्रानन्तरतत्क्रियामार्गोज्ञानमार्गश्चेतिद्वौमार्गावधिकारिभेदेनावेदितावित्यर्थः आदिशब्दाद्यत्रवेदाःप्रतिष्ठिताइत्यादिगृह्यतेउक्तयोर्मार्गयोस्तुल्यतांपरिहर्त्तुमुदाहरणान्तरमाह तथेतिवृद्धिशुद्धिद्वारेतिकर्मतत्फलयोर्वैराग्योदयात्पूर्व्वंकर्ममार्गोविहितोविरक्तस्यपुनःसंन्यासपूर्व्वकोज्ञानमार्गोदर्शितःसचेतरस्मादतिशयशालीतिश्रुतमित्यर्थः उक्तविभागेपुनरपिवाक्यशेषानुकूल्यमादर्शयति एनमेवेति अहङ्कारविमूढात्मेत्यस्यव्याख्यानंअतत्त्वविदिति तत्त्ववित्त्वितिश्लोकमवतार्य्यतात्पर्य्यार्थं संगृह्णाति नाहमिति पूर्व्वेणक्रियापदेनेतिशब्दःसम्बध्यते विरक्तमधिकृत्यवाक्यान्तरंपठति तथाचेति आदिशब्दस्यैवश्लोकस्यशेषसंग्रहार्थः अविक्रियात्मज्ञानात्कर्मसंन्यासेदर्शितेमीमांसकामतमुत्थापयति तत्रेतिआत्मनोज्ञानक्रियाशक्त्याधारत्वेनाक्रियत्वाभावादक्रियात्मज्ञानंसंन्यासकारणीभूतंनसम्भवतीत्यर्थः यद्योक्तज्ञानाभावोविषयाभावाद्वामानाभावाद्वेतिविकल्प्याद्यंदूषयति नेत्यादिना नतावदविक्रियात्माभावोनजायतेम्रियतेवेत्यादिशास्त्रस्याप्तवाक्यतयाप्रमाणस्यान्तरेणकारणमानर्थक्यायोगादित्यर्थः द्वितीयंप्रत्याह यथाचेतिपारलौकिककर्मविधिसामर्थ्यसिद्धंविज्ञानमुदाहरति कर्त्तुंश्चेतिकर्मकाण्डादज्ञातेधर्मादौविज्ञानोत्पत्तिवत्ज्ञानकाण्डादज्ञातेब्रह्मात्मनिविज्ञानोत्पत्तिरविरुद्धाप्रमात्वाविशेषादित्यर्थः ज्ञानस्यमनःसंयोगजन्यत्वादात्मनश्चश्रुत्यामनोगोचरत्वनिरासान्नात्मज्ञानेसाधनमस्तीतिशङ्कते करणेति श्रुतिमाश्रित्यपरिहरतिनमनसेतितत्त्वमस्यादिवाक्योत्थमनो

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

वृत्यैव शास्त्राचार्य्योपदेशमनुसृत्य द्रष्टव्यं तत्त्वमिति श्रूयते स्वरूपेण स्वप्रकाशमपि ब्रह्मात्मवस्तुवाक्योत्थबुद्धिवृत्त्यभिव्यक्तं सविकल्पकव्यवहारावलम्बनं भवतीति मनोगोचरत्वोपचारादसिद्धं करणागोचरत्वमित्यर्थः कथं तर्हि ब्रह्मात्मनो मनोविषयत्वनिषेधश्रुतिरित्याशंक्यासंस्कृतमनोवृत्त्यविषयासेति मन्वानः सन्नाह शास्त्रेति सत्यपि श्रुत्यादौ तदनुग्राहकाभावान्नास्माकमविक्रियात्मकज्ञानमुत्पत्तुमर्हतीत्याशंक्याह तथेति तस्याविक्रियस्यात्मनोऽधिगत्यर्थम् विमतो विकारो नात्मधर्मो विकारत्वादुभयाभिमतविकारवदित्यनुमाने पूर्व्वोक्तश्रुतिस्मृतिरूपागमे च सत्येव तस्मिन्नोत्पद्यते ज्ञानमिति वचः साहसमात्रं सत्येवमानेमेयं न भातीतिवदित्यर्थः ननु यथोक्तं ज्ञानमुत्पन्नमपि हानायोपादानायवा न भवतीति कुतोऽस्य फलवत्त्वं तत्राह ज्ञानञ्चेति अवश्यमिति प्रकाशप्रवृत्तेस्तमोनिवृत्तिव्यतिरेकेणानुपपत्तिवदात्माज्ञाननिवृत्तिमन्तरेणात्मज्ञानोत्पत्तेरनुपपत्तेरित्यर्थः नन्वज्ञानस्य ज्ञानप्रागभावत्वात्तन्निवृत्तिरेव ज्ञानं न तु तन्निवर्त्तकमिति तत्राह तच्चेति कथं पुनर्भगवतापि ज्ञानाभावातिरिक्तमज्ञानं दर्शितमित्याशंक्याह अत्र चेति विमतं ज्ञानाभावो न भवत्युपादानत्वान्मृदादिवदिति भावः ननु हननक्रियायाश्च नहिंस्यादिति निषिद्धत्वात् तत्कर्त्तृत्वादेरज्ञानकृतत्वेपि विहितक्रियाकर्त्तृत्वादेर्न तथात्वमिति नेत्याह तच्चेति न तावदात्मनि कर्त्तृत्वादिनित्यत्वं अमुक्तिप्रसङ्गान्न चानित्यमपि निरुपादानं भावकार्य्यस्योपादाननियमान्न चानात्मा तदुपादानमात्मनि तत्प्रतिभानान्न चात्मैव तदुपादानं कूटस्थस्य तस्याविद्यां विना तदयोगादित्याह अविक्रियत्वादिति कर्त्तृत्वाभावेपि कारयितृत्वं स्यादित्याशंक्याह विक्रियावानिति आत्मनि कर्त्तृत्वादिप्रतिभानस्यानाद्यनिर्व्वाच्यमज्ञानमुपादानं तन्निवृत्तिश्च तत्त्वज्ञानादित्युक्तमिदानीं कर्त्तृत्वकारयितृत्वयोरविद्याकृतत्वे भगवतोनुमतिं दर्शयति तदेतदिति विदुषो यदि कर्माधिकाराभावो भगवतोभिमतः तर्हि कुत्र तस्य जीवतोधिकारः स्यादिति पृच्छति क्व पुनरिति ज्ञाननिष्ठायामित्युक्तं स्मारयति उक्तमिति तदङ्गभूते सर्व्वकर्मसंन्यासे च तस्याधिकारोस्तीत्याह तथेति वक्ष्यमाणे वाक्ये सर्व्वकर्मसंन्यासो न प्रतिभाति मानसानामेव कर्मणां विशेषणवशात् त्यागावगमादिति शङ्कते नन्विति विशेषणान्तरमाश्रित्य दूषयति न सर्व्वेति मनसेति विशेषणान्मानसेष्वेव कर्मसु सर्व्वशब्दः सङ्कुचितः स्यादिति शङ्कते

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

मानसानामिति सर्व्वात्मनामनोव्यापारत्यागेव्यापारान्तराणामनुपपत्तेःसर्व्वकर्म संन्यासःसिध्यतीतिपरिहरति नेत्यादिना मानसेष्वपिकर्मसुसंन्यासेसङ्कोचान्न वागादिव्यापारानुपपत्तिरितिशङ्कते शास्त्रीयाणामिति अन्यानीत्यशास्त्रीयवाक्या यकर्मकारणान्यशास्त्रीयाणिमानसानितानिचसर्व्वाणिकर्माणीत्यर्थः वाक्यशेष मादायदूषयति नैवेति नहिविवेकवुद्ध्यासर्व्वाणिकर्माणिअशास्त्रीयाणिसंन्यस्य तिष्ठतीतियुक्तं नैवकुर्व्वन्नित्यादिविशेषणस्यविवेकवुद्धेश्चसर्व्वत्यागहेतोस्तुल्यत्वादि त्यर्थः भगवदभिमतसर्व्वकर्मसंन्यासस्यावस्थाविशेषेसङ्कोचंदर्शयन्नाशङ्कते सरि ष्यतइति संन्यासोजीवदवस्थायामेवात्रविवक्षितइत्यत्रलिङ्गंदर्शयन्नुत्तरमाह न नवेति अनुपपत्तिमेवस्फोरयति नहीति अन्वयविशेषाव्याख्यानेनलिङ्गासिद्धिं चोद्यति अकुर्व्वतइति विवेकवुद्ध्यादिशेषाण्यपिकर्माणिदेहेयोचितंनिःक्षिप्या कुर्व्वन्नकारयंश्चविद्वानवतिष्ठते तथाचदेहेकर्माणिसंन्यस्याकुर्व्वतोऽकारयतश्चसुख मासनमितिसम्बन्धसम्भवात्विशेषणस्यसतिदेहेकर्मत्यागविषयत्वाभावाज्जीवतःस र्व्वकर्मत्यागोनास्तीत्यर्थः अथवाकुर्व्वतइत्यादिपूर्व्ववैवसम्बन्धनीयंलिङ्गासिद्धिचोद्यन्तु देहेसंन्यस्येत्यारभ्योन्नेयंआत्मनःसर्व्वथाविक्रियत्वनिर्द्धारणाद्देहसम्बन्धमन्तरेणकर्तृ त्वकारयितृत्वाप्राप्तेरप्राप्तप्रतिषेधप्रसङ्गपरिहारार्थमस्मदुक्तएवसम्बन्धः साधीया नितिसमाधत्ते नसर्व्वेति स्मृतिषुश्रुतिषुचेत्यर्थःकिञ्चसम्बन्धस्याकाङ्क्षासन्निधि योग्यताधीनत्वादाकांक्षावशादस्मदभिमतसम्बन्धसिद्धिरित्याह आसनेति भव दिष्टस्तसम्बन्धोनसिध्यत्याकाङ्क्षाभावादित्याह तदनपेक्षत्वाच्चेति संन्यासशब्दस्य विक्षेपार्थत्वात्तस्यचाधिकरणसापेक्षत्वादस्मदिष्टसम्बन्धसिद्धिरित्याशंक्याह संपूर्व स्यिति अन्ययोपसर्गवैयर्थ्यादित्यर्थः मनसाविवेकविज्ञानेनसर्व्वकर्मापरित्यज्यास्ते देहेविद्वानित्यस्यैवसम्बन्धस्यसाधुत्वंमत्वोपसंहरति तस्मादितिसर्व्वव्यापारोपरमा त्मनःसर्व्वकर्मसंन्यासस्याविक्रियात्मज्ञानाविरोधित्वात्प्रयोजकज्ञानवतोवैधेसंन्या

स्वामिकृतटीका।

अतएवहन्तृत्वाभावोऽपिपूर्व्वोक्तःसिद्धइत्याह वेदाविनाशिनमिति नित्यंवृद्धिशून्यंअ व्ययंमपक्षयशून्यंअजंअविनाशिनञ्चयोवेदसपुरुषःकंहन्तिकथंवाहन्तिएवंभूतस्य वधेसाधनाभावात्तथास्वयंप्रयोजकोभूत्वान्येनकंघातयतिकथंवाघातयतिनकञ्चि दपिकथञ्चिदपीत्यर्थःअनेनमय्यपिप्रयोजकत्वदोषदृष्टंमाकार्षीरित्युक्तंभवति २१

CC-0. In Public Domain. Digitized by eGangotri

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही २२

शाङ्करभाष्यं

प्रकृतन्तुवक्ष्यामःतत्रात्मनोऽविनाशित्वंप्रतिज्ञातंतत्किमिवेत्युच्यते वासांसी ति वासांसिवस्त्राणिजीर्णानिदुर्बलतां गतानि यथा लोकेविहायपरित्यज्यनवान्य निनवानिगृह्णात्युपादत्तेनरःपुरुषोऽपराण्यन्यानितथा तद्वदेवशरीराणिविहायजी र्णान्यन्यानिसंयातिस'गच्छति नवानिदेह्यात्मापुरुषवदविक्रिय एवेत्यर्थः२२

आनन्दगिरिकृतटीका।

सेऽधिकारः सम्यग्ज्ञानवतस्त्ववैधेस्वाभाविकेफलात्मनीतिविभागमभ्युपेत्योक्तेर्थे वाक्यशेषानुगुण्यंदर्शयति इतितत्रतत्रेति २१ आत्मनोऽविक्रियत्वेनकर्मासम्भवं प्रतिपाद्याविक्रियत्वहेतुसमर्थनार्थमेवोत्तरग्रन्थमवतारयति प्रकृतंत्विति किंत त्प्रकृतमितिशङ्कमानंप्रत्याह तत्रेति अविनाशित्वमित्युपलक्षणमविक्रियत्वमि त्यर्थः तदेवदृष्टान्तेनस्पष्टयितुमुत्तरश्लोकमुत्थापयति तदित्यादिना आत्मनः स्वतोविक्रियाभावेपिपुरातनदेहत्यागेनूतनदेहोपादानेचविक्रियावत्त्वधौव्यादवि क्रियत्वमसिद्धमितिचेत्तत्राह वासांसीति शरीराणिजीर्णानिवयोहानिंगतानित्व म्वलीपलितादिसङ्गतानीत्यर्थः वाससांपुरातनानांपरित्यागे नवानाञ्चोपादाने त्यागोपादानकर्तृभूतलौकिकपुरुषस्यापिअविकारित्वेनैकरूपत्ववदात्मनोदेहत्या गोपादानयोरविरुद्धमविक्रियत्वमिति वाक्यार्थमाह पुरुषवदिति २२

स्वामिकृतटीका।

नन्वात्मनोऽधिनाशेऽपितदीयशरीरनाशंपर्य्यालोच्यशोचामीतिचेत्तत्राह वासां सीतिकर्मनिबन्धनानांदेहानामवश्यम्भावित्वाज्जीर्णदेहनाशेनशोकावकाशइत्यर्थः

भाषा अनुवाद।

जोकहोकिआत्माअविनाशीहैपरतौभीउसकीस्थूलइसदेहकानाशदेखकर हमशोचकरतेहैं तोदेखोजैसेमनुष्यजीर्ण कहेपुरानेवस्त्रपरित्यागकहेउतारकर औरनयेकपडेधारणकरतेअर्थात्पहिरतेहैं तैसेहीआत्मापूर्वप्राचीनशरीरकहे देहछोडकरऔरनूतनकहेनईदेहग्रहणकरताहै इससेकर्मकेअनुसारदेहकाअ वश्यहोनहारजोजन्मऔरनाशतिससेशोचकरनातुमअैसोंकोउचितनहीहै २२

CC-0. In Public Domain. Digitized by eGangotri

नैनंछिन्दन्तिशस्त्राणिनैनंदहतिपावकः नचैनंक्लेदयन्त्यापोनशोषयतिमारुतः २३
अच्छेद्योऽयमदाह्योयमक्लेद्योऽशोष्यएवचनित्यःसर्वगतःस्थाणुरचलोऽयंसनातनः २४

शाङ्करभाष्यम् ।

कस्मादविक्रियएवेत्याह नैनंछिन्दन्तीति एनंप्रकृतंदेहिनंनछिन्दन्तिशस्त्राणिनिरवयवत्वान्नावयवविभागंकुर्वन्तिशस्त्राण्यस्त्रादीनितथानैनं दहतिपावकोऽग्निरपिनभस्मीकरोति तथानचैनंक्लेदयन्त्यापोऽपिहिसावयवस्यवस्तुनःआर्द्रीभावकरणेनअवयवविश्लेषापादनेसामर्थ्यं तन्ननिरवयवआत्मनिसम्भवतितथाक्लेदवत्द्रव्यंक्लेदशोषणेननाशयतिवायुरेनंवात्मानंननशोषयतिमारुतोपि २३

यतएवंतस्मात्अच्छेद्योयमिति यस्मादन्योन्यनाशहेतूनिभूतानिएनंआत्मानंनाशयितुंनोत्सहन्तेतस्मात्नित्योनित्यत्वात्सर्वगतःसर्वगतत्वात्स्थाणुरित्येतत्स्थिरत्वादचलोऽयमात्माऽतःसनातनश्चिरन्तनोनकारणात्कुतश्चिन्निष्पन्नोऽनिलवदित्यर्थः

आनन्दगिरिकृतटीका ।

पृथिव्यादिभूतचतुष्टयप्रयुक्तेविक्रियाभाक्त्वादात्मनोऽसिद्धमविक्रियत्वमितिशङ्कते कस्मादिति यतोनभूतान्यात्मानंगोचरयितुमर्हन्त्यतोयुक्तमाकाशवत्तस्याविक्रियत्वमित्याह आक्लेत्यादिना २३

स्वामिकृतटीका ।

कथंहन्तीत्यनेनोक्तंवधसाधनाभावंदर्शयन्नविनाशित्वमात्मनःस्फुटीकरोति नैनमिति आपोनक्लेदयन्तिस्नेहुकरणेनशिथिलंनकुर्वन्ति २३

भाषाअनुवाद ।

२१ श्लोकमेंकहाजोआत्माकेवधकासाधनाभावकहेनिरुपायअर्थात्किसीप्रकारसेआत्माकावधनहींहोसकताहैंयहदेखायकरिअबअविनाशीहैइसकोदृढकरतेहैंकिसकलअस्त्रशस्त्रइसआत्माकोछेदननहींकरिसकतेऔअग्निकोभीइसकेदग्धकरनेकीसमर्थनहीं जलइसकोआर्द्रकहेगीलानहींकरिसकताऔरवायुभीइसकोसुखायनहींसकतीहैक्योंकियहअवयवरहितहैं औइनसबकीसामर्थ्यअवयवसहितमेंहैअर्थात्भौतिकवस्तुकहेपञ्चभूतनिर्मितवस्तुमेंइनकीसामर्थ्यहै २३

इसकाकारणयहकिआत्माअस्त्रसस्त्रसेछिन्नभिन्नकिंवाआगसेदग्धऔरजलसेआर्द्रऔरवायुसेशुष्कनहींसकताहैइसीसेआत्मानित्यऔअविनाशीतथासर्वत्रविद्यमानहैंऔरस्थिरस्वभावकहेअचलअनादिहै २४

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

नतेषांश्लोकानांपौनरुक्त्यंचोदनीयं यतएकेनैवश्लोकेनात्मनोनित्यत्वमविक्रियत्वंचोक्तंनजायतेम्रियतेवाइत्यादिना तत्रयदेवाविक्रियंकिञ्चिदुच्यतेतदेतस्मात्श्लोकार्धान्नातिरिच्यतेकिञ्चिच्छब्दतःपुनरुक्तंकिञ्चिदर्थतइतिदुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्रसङ्गमापाद्यशब्दान्तरेणतदेववस्तुनिरूपयतिभगवान्वासुदेवः कथंनुनाम संसारिणंअसंसारित्वंबुद्धिगोचरतामापन्नंसद्व्यक्तंत्वंसंसारनिवृत्तयेस्यादिति किञ्च अव्यक्तोयमिति अव्यक्तःसर्वकरणाविषयत्वान्नव्यज्यतेइतिअव्यक्तोयमात्मा अतएवाचिन्त्योऽयंयद्वीन्द्रियगोचरंवस्तुतच्चिन्ताविषयत्वमापद्यते अयं त्वात्माऽनिन्द्रियगोचरत्वादचिन्त्योऽतएवाविकार्योयथाक्षीरंदध्यादिनाविकारिनतयाअयमात्मानिरवयवत्वाच्चाविक्रियो नहिनिरवयवंकिञ्चिद्विक्रियात्मकंदृष्टमविक्रियत्वाद्विकार्योयमात्मोच्यते २४

आनन्दगिरिकृतटीका ।

पृथिव्यादिभूतप्रयुक्तच्छेदनाद्यविक्रियाभावेयोग्यताभावं कारणमाह यत इति पूर्वार्द्धमुत्तरार्द्धेहेतुत्वेनयोजयति यस्मादिति नित्यत्वादीनामन्योन्यंहेतुहेतुमद्भावंसूचयतिनित्यत्वादिना नचनित्यत्वंपरमाणुष्वभिचारादसाधकंसर्वगतत्वस्येतिवाच्यं तेषामेवाप्रामाणिकत्वेनव्यभिचारानवतारान्नचसर्वगतत्वेपिविक्रियाशक्तिमत्त्वमात्मनोऽस्तीतियुक्तं विधुत्वेनाभिमतेनभसितदनुपलम्भान्नविक्रियाशक्तिमत्त्वे स्थैर्यमास्थातुंशक्यं तथाविधस्यह्रदादेरस्थिरत्वदर्शनादित्याशयेनाह स्थिरत्वादिति स्वतोनित्यत्वेपिकारणान्नाशसम्भवादुत्पत्तिरपिसम्भवितेतिकुतश्चिरन्तनत्वमित्याशंक्याह नकारणादिति आत्मनोऽविक्रियत्वस्यनजायतेम्रियतेवेत्यादिनासाधितत्वात्तस्यैवपुनरभिधानेपुनरुक्तिरित्याशंक्याहनतेषामिति अनाशङ्कनीयस्यचोद्यस्यप्रसङ्गंदर्शयति यतइति अतोवेदाविनाशिनमित्यादौनशंक्यते पौनरुक्त्यमितिशेषः कथंतत्रपौनरुक्त्याशङ्कासमुन्मिषतितत्राह तत्रेति वेदाविनाशिनमित्यादिश्लोकः सप्तम्यापरामृश्यतेश्लोकशब्देननजायतेम्रियतेवेत्यादिरुच्यते नम्विहश्लोकेजन्ममरणाद्यभावोभिलप्यतेवेदेत्यादौपुनरपक्षयाद्यभावोविवक्ष्यते तत्रकथमर्थातिरेकाभावमादायपौनरुक्त्यञ्चोद्यतेतत्राह किञ्चिदितिकथंतर्हिपौनरुक्त्यंनचोदनीयमितिमन्यसेतत्राह दुर्बोधत्वादितिपुनःपुनर्विधानभेदेनवस्तुनिरूपयतोभगवतोभिप्रायमाह कथंन्विति त्वंपदार्थपरिशोधनस्यप्रकृतत्वात्तत्रैवहे

अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि

शाङ्करभाष्यं

तस्मादेवंयथोक्तप्रकारेणैनमात्मानंविदित्वात्वंनानुशोचितुमर्हसिहन्ताहमेषां मयैतेहन्यन्तेइति २५

आनन्दगिरिकृतटीका।

त्वन्तरमाह किञ्चेति आत्मनोनित्यत्वादिलक्षणस्यतथैवप्रथाकिमितिनभवतित त्राह अव्यक्तइतिमातर्हिप्रत्यक्षत्वंभूदनुमेयत्वंतस्यकिंनस्यादित्याशंक्याह अतएवेति तदेवप्रपञ्चयति यद्वीति अतोन्द्रियत्वेपिसामान्यतोदृष्टविषयत्वंभविष्यतीत्याशं क्यकूटस्थेनात्मनाव्याप्तिलिङ्गाभावान्नैवमित्याह अविकार्यइति अविकार्यत्वेव्य तिरेकदृष्टान्तमाह यथेति किञ्चात्मानविक्रियतेनिरवयवद्रव्यत्वात्घटवदितिव्य तिरेकानुमानमाह निरवयत्वाच्चेति निरवयवत्वेपिविक्रियावत्त्वेकाच्चतिरित्या शंक्याह नहीति सावयवस्यैवविक्रियावत्त्वेनिरवयवत्वानुपपत्तिरित्यर्थः यद्विसा वयवंसक्रियंक्षीरादितद्दध्यादिनाविकारमापद्यते नचआत्मनःश्रुतिप्रमितनिरवय वत्वस्यसावयवत्वमतोऽविक्रियत्वान्नायं विकार्योभवितुमलमितिफलितमाह अवि क्रियत्वादिति २४ आत्मयाथात्म्योपदेशमशोच्यानन्वशोचस्त्वमित्युपक्रम्यब्रा ह्मणमुपसंहरति तस्मादिति अव्यक्तत्वाचिन्त्यत्वाविकार्यत्वनित्यत्वसर्वगतत्वादि रूपोयस्मादात्मानिर्द्धारितस्तस्मात्तथैव ज्ञातुमुचितस्तज्ज्ञानस्यफलवत्त्वादित्यर्थः प्रतिषेध्यमनुशोकमेवाभिनयति हन्ताहमिति २५

स्वामिकृतटीका।

तत्रहेतुमाह अच्छेद्योऽयमिति सार्द्धेन निरवयवत्वादच्छेद्योऽक्लेद्यश्चअमूर्त्तत्वाददा ह्यःद्रवत्वाभादशोष्यइति इतश्चछेदादियोग्योनभवतियतोनित्योऽविनाशीसर्वगतः स्थाणुःस्थिरस्वभावोरूपान्तरापत्तिशून्यः अचलःपूर्वरूपापरित्यागीसनातनोऽना

भाषा अनुवाद।

यहआत्माअव्यक्तअर्थात्चक्षुआदिकर्मइन्द्रियोंकाविषयनहींयहकहचुकेहैं औरअचिन्त्यअर्थात्मनकाभीअगम्यध्यानसेवाहरहैऔरअविकारीअर्थात्जन्मना शअथवाछोटावडानयापुरानाहोकिसीरूपमेवदलतानहीं जैसेहीतत्त्वज्ञानीलोग कहतेहैं इससेजानबूझकरतुमजन्मनाशशून्यकहेरहितआत्माकेस्वरूपकोअच्छी बूतरहजानबूझकरतुइसझूठेशोकमोहकोपरित्यागकरो २५

CC-0. In Public Domain. Digitized by eGangotri

अथचैनंनित्यजातंनित्यंवामन्यसेमृतं तथापित्वंमहाबाहोनैवंशोचितुमर्हसि २६

शाङ्करभाष्यं

आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते अथचैनमिति अथचेत्यभ्युपगमार्थः एनं प्रकृतमात्मानंनित्यजातं लोकप्रसिद्धाप्रत्यनेकशरीरोत्पत्तिंजातोजातइतिवामन्यसेतथाप्रतितत्तद्धि नाशं नित्यंवामन्यसेमृतंमृतोऽमृतइतितथापिभाविन्यपिआत्मनित्वंमहाबाहोनैवं शोचितुमर्हसिजन्मवतोनाशोनाशवतो जन्मचेत्येतावदवश्यम्भाविनाविति २६

आनन्दगिरिकृतटीका ।

आत्मनोनित्यत्वस्यप्रागेवसिद्धत्वादुत्तरश्लोकानुपपत्तिरित्याशंक्याह आत्मनइति अनित्यत्वमितिच्छेदःशक्यानांलोकायतानांवामतमिदमापरामृश्यते श्रोतुर्जुनस्यपूर्वोक्तमात्मयाथात्म्यं श्रुत्वापितस्मिन्निर्द्धारणासिद्धेर्द्वयोर्मतयोरन्यतरमताभ्युपगमःशङ्कितस्तदर्थानिपातद्वयप्रयोगदित्याह अथचेति प्रकृतस्यात्मनोनित्यत्वादिलक्षणस्यपुनःपुनर्जातत्वाभिमानाभावादसम्भावीत्याह लोकेति नित्यजातत्वाभिनिवेशेपौनःपुन्येनमृतत्वाभिनिवेशोव्याहतःस्यादित्याशंक्याह तथेतिपरकीयमतमनुभाषितमभ्युपेत्याहोबतमहत्पापंकर्त्तुं व्यवसितावयमित्यादेस्वदीयशोकस्यनिरवकाशत्वमित्याह तथापीति एवमर्जुनस्यदृश्यमानमनुशोकप्रकारंदर्शयित्वातस्यकर्त्तु

स्वामिकृतटीका ।

दिःअव्यक्तश्चक्षुराद्यविषयः अचिन्त्योमनसोऽप्यविषयः अविकार्यः कर्मेन्द्रियाणामप्यगोचरइत्यर्थः उच्यतइतिनित्यत्वादभियुक्तोक्तिंप्रमाणयति २४ उपसंहरतितस्मादेवमिति तदेवमात्मनोजन्मविनाशाभान्नशोकःकार्य्यइत्युक्तं २५

भाषा अनुवाद ।

औविचारकरिदेखोजवकिआत्माकेजन्मतथानाशकाअभावहैतौफेरिआत्माकेअर्थशोककरनाउचितनहींहैयहवातनिर्धारकरठहराईगई अबजोदेहकेजन्मऔनाशसेआत्माकाजन्मनाशहैऐसाअङ्गीकारकरिभीतौभीशोचकरनाअनुचितहैयहकहतेहैं किपुण्यऔपापतथातत्फलसुखदुखऔजन्मनाशइनकासर्वदाआत्माकेसाथसम्बन्धरहनेसेयद्यपिदेहकेजन्महोनेसे आत्माकाजन्मऔरदेहकेनाशसेआत्माकानाशइशरीतिसेजन्मनाशकोनित्यमानोतौभीजोजन्मनाशअवश्यंभावीअर्थात् निश्चयहोनेवालाहैटरनेकानहींफेरितौभीउसकेअर्थतुमकोशोचनायोग्यनहींहै

CC-0. In Public Domain. Digitized by eGangotri

जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच तस्मादपरिहार्येऽर्थेनत्वंशोचितुमर्हसि २७

शाङ्करभाष्यं

तथाचसतिजातस्येति जातस्यहिलध्रुवंजन्मनोध्रुवोऽव्यभिचारीमृत्युर्मरणं ध्रुवंजन्ममृतस्यचतस्मादपरिहार्य्येयंजन्ममरणलक्षणोर्थस्तस्मिन्नपरिहार्य्येऽर्थेन त्वंशोचितुमर्हसि २७

आनन्दगिरिकृतटीका ।

मयोभयत्वेहेतुमाह जन्मवतइति जन्मवतोनाशोनाशवतश्चजन्मेत्येताववश्यंभावि नौमिथोव्याप्ताविति योजना ।२६। तयोरवश्यकतावित्वेसत्यनुशोकस्याकर्त्तव्यत्वेहे त्वन्तरमाह तथाचेति ।२७।

कुतइत्यतआह जातस्यहीति हियस्माज्जातस्यस्वारब्धककर्मक्षयेमृत्युर्ध्रुवोनि श्चितः मृतस्यचतद्देहकृतेनकर्मणाजन्मापिध्रुवमेवतस्मादेवमपरिहार्येऽर्थेआत्मान मुद्दिश्यानुशोकस्यकर्त्तुमयोग्यत्वेपिभूतसंघातात्मकानि भूतान्युद्दिश्यतस्यकर्त्तव्यत्व माशंक्याह कार्येति समनन्तरश्लोकस्तत्रहेतुरित्याह यतइति चाक्षुषदर्शनमाद त्तिंव्यावर्त्तयतिअनुपलब्धिरिति नहियथोक्तिसंघातरूपाणिभूतानिपूर्वमुत्पत्ते रुपलभ्यन्तेतेनतानितथाव्यपदेशभाञ्जिभवन्तीत्यर्थः किंतन्मध्येयदेषांव्यक्तंभिष्यते

स्वामिकृतटीका ।

इदानींदेहेनसहात्मनोजन्मतद्विनाशेचविनाशमङ्गीकृत्यापिशोकोनकार्यइत्याह अथ चैनमितिअथयद्यपेनमात्मानंनित्यंसर्वदातत्तद्देहेजातेजातंमन्यसेतथातत्तद्देहे मृतेमृतञ्चमन्यसेपुण्यपापयोस्तत्फलभूतयोरजन्ममरणयोरात्मगामित्वात्तथापित्वं शोचितुंनार्हसि २६मत्प्राविनिजन्ममरणलक्षणेऽर्थेत्वंविद्वान्शोचितुंयोग्योनभवसि

भाषा अनुवाद ।

काहेसेशोचनायोग्यनहींहैइसकाहेतुकहतेहैं किजिसलियेजोवस्तुजन्मग्र हणकरतीहै उसकेआरब्धकर्मकेक्षयहोनेसेनिश्चयउसकीमृत्युअर्थात्नाशहोता है औरसेहीमरेकाभीपूर्वदेहकृतकर्मवशतेफेरअवश्यहीजन्महोताहैइसीसेएवंभूत अनिवार्य्यअवश्यभावी कहेहोनेवालेजन्मऔमरणकेविषयमेतुमकोशोचकरना योग्यहोतानहींक्योंकितुमविद्वानकहेपण्डितहो*पण्डितकाअर्थयहहै किसतअ सत्कीविवेकिनीकहेविचारकरनेवालीबुद्धिकोपण्डाकहतेहैं सोजिसकोहोयसो पण्डितहैआत्मासेभिन्नजोकुछसोअसत्सतएकआत्माहीहैयहतुमजानो २७

CC-0. In Public Domain. Digitized by eGangotri

अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत अव्यक्तनिधनान्येवतत्रकापरिदेवना २८

भाङ्कभ्यम् ।

कार्य्यकारणसंघातात्मकान्यपिभूतान्युद्दिश्यशोकोनयुक्तःकर्त्तुंयतअव्यक्तादीनीति अव्यक्तादीन्यव्यक्तमदर्शनमनुपलब्धिरादिर्येषांभूतानांपुत्रमित्रादिकार्य्यकारणसंघातात्मकानांतानिअव्यक्तादीनिभूतानिप्रागुत्पत्तेःउत्पन्नानिचप्राक्मरणात् व्यक्तमध्यान्यव्यक्तनिधान्येवपुनरव्यक्तमदर्शनंनिधनंमरणंयेषांतानिअव्यक्तनिधनानिमरणादूर्द्धमव्यक्तामेवप्रतिपद्यन्ते इत्यर्थः तथाचोक्तं अदर्शनादापतितःपुनश्चादर्शनंगतःनासौतवनतस्यत्वंहताकापरिदेवनेति तत्रकापरिदेवनाकोवाप्रलापः अदृष्टदृष्टप्रनष्टभ्रान्तिभूतेष्वित्यर्थः २८

आनन्दगिरिकृतटीका ।

तदाह उत्पन्नानीति उत्पत्तेरूर्द्धंमरणाच्चपूर्वंव्यावहारिकंसत्त्वंमध्यमेषांव्यक्तमितितथोच्यतेजन्मानुसारित्वविलयस्ययुक्तमितिमत्वातात्पर्य्यार्थमाह मरणादिति उक्तेऽर्थेपौराणिकसम्मतिमाह तथाचेतिततेत्यस्यार्थमाह अदृष्टेति पूर्व्वमदृष्टानिसन्तिपुनर्दृष्टानितान्येवपुनर्नष्टानितदेवंभ्रान्तिविषयतया घटिकायन्त्रवच्चक्रीभूतेषुभूतेषुशोकनिमित्तस्यप्रलापस्यनावकाशोस्तीत्यर्थः २८

स्वामिकृतटीका ।

किञ्चदेहादीनांस्वभावं पर्य्यालोच्यतदुपाधिकेआत्मनोजन्ममरणेशोकोनकार्यइत्याह अव्यक्तादीनीति अव्यक्तंप्रधानंतदेवादिउत्पत्तेःपूर्व्वरूपंयेषांतानिअव्य

भाषा अनुवाद ।

औरजोकहोकिदेहादिकास्वभावजोजन्ममरणआदिहैतदुपाधिक आत्माका जन्ममरणविचारिकरिशोचतेहैंतोभीशोचकरनानचाहियेइसपर कहतेहैं कि अव्यक्तादिअर्थात्अव्यक्तकहेप्राणियोंकीउत्पत्तिका मूलकारणजोप्रकृतिमाया सो प्राणियों कीउत्पत्तिकेपूर्व्वकारणरूपसबजीवों कोअपनेभीतरलीनकरके अव्यक्त कहेअप्रकटरहतीहैऔरव्यक्तमध्यअर्थात्जन्ममरणकेमध्यमे सकलप्राणीवर्त्तमान अवस्थामेविराजमानरहतेहैंऔरअव्यक्तनिधन अर्थात्अन्तमेसबकारणजोमाया तिसमेसबप्राणीलीनहोकेरहते इसमेहेअर्जुनऐसे रहनेवालेप्राणीयों कीमृत्युमे किसीतरहशोचकरनानचहिये जैसेजगेउयेमनुष्यकोस्वप्नमेदेखीभईवस्तुकेअर्थ शोककरनाअयोग्यहैतैसेयहभीजानो २८

CC-0. In Public Domain. Digitized by eGangotri

आश्चर्यवत् पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद नचैव कश्चित् २९

शाङ्करभाष्यम्।

दुर्विज्ञेयोयंप्रकृतआत्माकिंत्वामेवैकंउपालभेत्साधारणे भ्रान्तिनिमित्तेकथंदुर्विज्ञेयोयमात्मेत्यतआह आश्चर्यवदिति आश्चर्यवदाश्चर्यं अदृष्टपूर्वमद्भुतमकस्माद्दृश्यमानंतेनतुल्यमाश्चर्यवदाश्चर्यमिवैनमात्मानंपश्यति कश्चिदाश्चर्यवदेनंवदतितथैवचान्यःआश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वादृष्टोक्ताप्यात्मानंवेदनचैवकश्चिदथवायोयंआत्मानंपश्यतिसआश्चर्यतुल्योयोवदतियश्चशृणोतिसोऽनेकसहस्रेषुकश्चिदेवभवत्यतोदुर्ज्ञेयआत्मेत्यभिप्रायः २९

आनन्दगिरिकृतटीका

अर्जुनंप्रत्युपालम्भंदर्शयित्वा प्रकृतस्यात्मनोदुर्विज्ञेयत्वात्तं प्रत्युपालम्भोनसम्भवतीतिमन्वानःसन्नाह दुर्विज्ञेयइति तथाचात्मज्ञाननिमित्तविप्रलम्भस्यसाधारणत्वादसाधारणोपालम्भस्यनिरवकाशतेत्याह किंत्वामेवेति अहम्प्रत्ययवेद्यत्वादात्मनोदुर्विज्ञेयत्वमसिद्धमितिशङ्कते कथमिति विशिष्टस्यात्मनोऽहंप्रत्ययस्यदृष्टत्वेपिके

स्वामिकृतटीका।

क्षादीनिभूतानिशरीराणिकारणात्मनास्थितानामेवोत्पत्तेःतथाव्यक्तमभिव्यक्तमध्यंजन्ममरणान्तरालंस्थितिलक्षणंयेषांतानिव्यक्तमध्यानिअव्यक्तेनिधनंलयोयेषांतानीमान्येवम्भूतान्येवतत्रतेषुकापरिदेवनाकःशोकनिमित्तोविलापःप्रतिबुद्धस्य स्वप्नदृष्टवस्तुविवशोकोनयुज्यतइत्यर्थः २८

भाषा अनुवाद।

तौफेरिवडेविद्वानलोगजोशोककरतेचलेआतेहैंसोकेवलआत्माविषयकअज्ञानताहीसेहोताइसअभिप्रायसेआत्माकोदुर्ज्ञेयता कहेज्ञानकठिनतानिरूपणकरतेहैंकिकोईतोशास्त्रआलोचनाकरिकेइसआत्माकोजानिकेभीआश्चर्यअैसाजानते अर्थात्सर्वगतनित्यज्ञानऔआनन्दस्वरूपआत्माकेअलौकिकत्वसेअसंभवजोइन्द्रजालिककौतुकतिसकेसमानदेखिआश्चर्यसेचवडायकरविस्मययुक्तहोतेहैं और कोईआश्चर्यकेनांईकहतेकोईआश्चर्यकेतुल्यसुनतेअैरकोई आत्मज्ञानरूपविपरीतकहेउलटीभावनासेअभिभूतहोकेइसआत्माकातत्त्वसुनिकेभीजानिसकते नहीं अर्थात्वक्ततदेखिसुनिकेभीअच्छीतरहसेआत्माकाजाननाअतिकठिनहै २९

CC-0. In Public Domain. Digitized by eGangotri

देहीनित्यमवध्योऽयंदेहेसर्व्वस्यभारत तस्मात्सर्व्वाणिभूतानिनत्वंशोचितुमर्हसि३०

शाङ्करभाष्यं

अथेदानींप्रकरणार्थमुपसंहरत्ब्रूते देहीति यस्माद्देहोशरीरीनित्यंसर्व्वावस्यास्यवध्योनिरवयवत्वान्नित्यत्वाच्चतस्मावध्योयं देहेशरीरेसर्व्वस्यसर्व्वगतत्वात्स्थावरादिष्वस्थितोपिसर्व्वस्यप्राणिजातस्यदेहेवध्यमानेपि अयंदेहीनवध्योयस्मात्तस्माद्भीष्मादीनिसर्व्वाणिभूतान्युद्दिश्य नत्वंशोचितुमर्हसि ३०

आनन्दगिरिकृतटीका ।

वलस्यतदभावादस्तिदुर्व्विज्ञेयतेतिश्लोकमवतारयति आश्चर्यवदितिआद्येनपादेनात्मविषयदर्शनस्यदुर्लभत्वंदर्शयता द्रष्टुर्दौर्लभ्यमुच्यते द्वितीयेनच तद्विषयवदन्यस्यदुर्लभत्वोक्तेस्तदुपदेष्टुस्तथात्वं कथ्यतेतृतीयेनतदीयश्रवणस्यदुर्लभत्वद्वाराश्रोतुर्विरलताविवक्षिताश्रवणदर्शनोक्तीनां भावेपितद्विषयसाक्षात्कारस्यात्यन्तायासलभ्यत्वंचतुर्थेनाभिमतमितिविभागः आत्मगोचरदर्शनादिदुर्लभत्वद्वारादुर्ब्बोधत्वमात्मनःसाधयति आश्चर्यवदिति संप्रत्यात्मनिद्रष्टुर्वक्तुःश्रोतुःसाक्षात्कर्त्तुश्चदुर्लभत्वाभिधानेनतदीयंदुर्ब्बोधत्वंकथयति अथवेति व्याख्यानद्वयेपिफलितमाह अतइति२९ श्लोकान्तरमुत्थापयति अथेत्यात्मनोदुर्ज्ञानत्वप्रदर्शना

स्वामिकृतटीका ।

कुतस्तर्हिविद्वांसोऽपिलोके शोचन्तिआत्माज्ञानादेवेत्याशयेनात्मनोदुर्ज्ञेयतामाह आश्चर्यवदिति कश्चिदेनमात्मानं शास्त्राचार्य्योपदेशाभ्यांपश्यन्नाश्चर्यवत्पश्यति सर्व्वगतस्यनित्यज्ञानानन्दस्वभावस्यात्मनोऽलौकिकत्वादैन्द्रजालिकवदघटमानंपश्यन्निवविस्मयेनपश्यतिअसम्भावनाभिभूतत्वात्तथाश्चर्यवदेवान्योवदतिशृणोतिचान्यःकश्चित्पुनर्व्विपरीतभावनाभिभूतःश्रुत्वापि नवेदचशब्दादुक्त्वापिहृद्वापिनसम्यग्वेदेतिद्रष्टव्यं २९

भाषा अनुवाद ।

इसप्रकारआत्माकादुर्व्विज्ञेयस्वभावअर्थात्वडेकष्टसेभीउसका जाननाकठिनहैयहसंक्षेपसेउपदेशकरिकेअबशोकनकरनाइसविषयमेकहतेहैंकिजैसे सबप्राणियोंकीनश्वरकहेनाशहोनेवालीदेहमेवर्त्तमानयहदेहीकहेआत्मा देहनाशहोनेसेभीइसकानाशनहींहोताक्योंकिसोआत्मानित्यऔअवध्यहैइसोसेभूत जोप्राणीतिनकीदेहनाशकेअर्थतुमकोशोककरनाउचितहोतानहीं ३०

CC-0. In Public Domain. Digitized by eGangotri

स्वधर्ममपिचावेक्ष्यनविकम्पितुमर्हसि धर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यते३१

शाङ्करभाष्यं

इहपरमार्थतत्त्वापेक्षायांशोकोवामोहोवानसम्भवतीत्युक्तं नकेवलंपरमार्थतत्त्वापेक्षायामेवकिन्तुस्वधर्म्ममिति स्वधर्ममपिस्वोधर्मःक्षत्रियस्यधर्मःयुद्धंतमप्यवेक्ष्यत्वंनविकम्पितुंप्रचलितुंअर्हसि क्षत्रियस्यस्वाभाविकाद्धर्मादात्मस्वाभाव्यादित्यभिप्रायः तच्चयुद्धंपृथिवीजयद्वारेणधर्म्मार्थंप्रजारक्षणार्थञ्चेति धर्मादनपेतंपरंधर्म्यं तस्मात्धर्मात्युद्धात्श्रेयोऽन्यत्क्षत्रियस्य नविद्यतेहियस्मात् ३१

आनन्दगिरिकृतटीका।

नन्तरमितियावत् वस्तुतत्त्वापेक्षयाशोकमोहयोरकर्त्तव्यत्वंप्रकरणार्थः देहेवध्यमानेपि देहिनोवध्यत्वाभावेफलितमाह यस्मादिति हेतुभागंविभजते सर्व्वस्येति फलितप्रदर्शनपरंश्लोकार्द्धं व्याचष्टे तस्माद्भीष्मादीनीति ३०

श्लोकान्तरमवतारयन्वृत्तंकीर्त्तयति इहेति पूर्व्वश्लोकःसप्तम्यर्थःयत्पारमार्थिकंतत्त्वंतदपेक्षायामेवकेवलंशोकमोहयोरसम्भवोनभवतिकिन्तुस्वधर्ममपिचावेक्ष्येतिसम्बन्धःस्वकीयंक्षात्रधर्ममनुसन्धायतत्रस्खलनंपरिहर्त्तव्यमित्यर्थःयद्धिक्षत्रियस्वधर्मादनपेतंश्रेयःसाधनंतदेवमयानुवर्त्तितव्यमित्याशङ्क्याह धर्म्यादिति जातिप्रयुक्तंस्वाभाविकंस्वधर्ममेवविशिनष्टि क्षत्रियस्येति पुनर्नकारोपादानमन्वयार्थंप्रचलितुमयोग्यत्वेप्रतियोगिनंदर्शयति स्वाभाविकादिति स्वाभाविकत्वमशास्त्रीयत्वनिशङ्कांवारयितुंतात्पर्यमाह आत्मेति आत्मनःस्वस्यार्जुनस्यस्वाभाव्यंक्षत्रिय

स्वामिकृतटीका।

तदेवमवध्यत्वमात्मनःसंक्षेपेणोपदिश्यशोच्यत्वमुपसंहरति देहीतिस्पष्टार्थं३०

भाषा अनुवाद।

प्रथमअध्यायके२९ श्लोकमेअर्जुननेकहाहै किहमारीशरीरकांपतीऔररोमखडेहोते हाथसेधनुषबाणगिरेपडतेहैं सोयहभीअयोग्यअसंभवहै जिसहेतुस्वधर्मजोसंग्रामतिसमेप्रवृत्तहोके भीष्मपितामहआदिकेहननकरनेसे अविनाशीआत्माकाविनाशमानि तुमाराडरनाऔकांपना यहयुक्तिसेसिद्धहोतानहीं और ३१ श्लोकमेकहाहै कियेअपनेजनोंकोनाशकरि हमश्रेयकहेकल्यान नहीं देखतेउसपरकहतेहैं किधर्मयुक्तजोन्याययुद्ध तिसकीअपेक्षाअर्थात्उससेबढिकर क्षत्रियोंकोऔरकौनकल्याणकरनेवालाकर्महै अर्थात्कोईभीनहीं ३१

CC-0. In Public Domain. Digitized by eGangotri

यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं सुखिनःक्षत्रियाःपार्थलभन्तेयुद्धमीदृशं ३२

शाङ्करभाष्यं।

कुतश्चतद्युद्धंकर्त्तव्यं इत्युच्यते यदृच्छयेति यदृच्छयाचाप्रार्थितमागतमुपपन्नं स्वर्गद्वारमपावृतमुद्घाटितं येएतदीदृशंयुद्धं लभन्तेक्षत्रियाःहेपार्थकिन्नसुखिनस्ते ३२

आनन्दगिरिकृतटीका।

स्वभावप्रयुक्तंवर्णाश्रमोचितंकर्मतस्मादित्यर्थः धर्मार्थंप्रजापरिपालनार्थञ्चप्रयतमानस्ययुद्धादुपरिरंसाश्रद्धातव्येत्याशंक्याह तच्चेति ततोपिश्रेयस्करंकिञ्चिदनुष्ठातुंयुद्धादुपरतिरुचितेत्याशंक्याह तस्मादिति तस्माद्युद्धात्प्रचलनमनुचितमितिशेषः ३१

युद्धस्यगुरुद्यनेकप्राणिहिंसात्मकस्याहिंसाशास्त्रविरोधान्नास्तिकर्त्तव्यतेति शङ्कते कुतश्चेति अग्नीषोमीयहिंसावद्युद्धमपिक्षत्रियस्यविहितत्वादनुष्ठेयंसामा

स्वामिकृतटिका।

यच्चोक्तमर्जुनेनवेपथुश्चशरीरेमइत्यादि तदप्ययुक्तमित्याह स्वधर्ममपीति आत्मनोनाशाभावादेवैतेषांहननेपिविकम्पितुंनार्हसि किञ्चस्वधर्ममप्यवेक्ष्यविकम्पितुंनार्हसीतिसम्बन्धःयच्चोक्तंनचश्रेयोऽनुपश्यामिहत्वास्वजनमाहवइति तत्राह धर्म्यादिति धर्मादनपेतान्न्याय्याद्युद्धादन्यत् ३१

भाषा अनुवाद।

औरजोकहो किगुरुआदिअनेकप्राणियोंकीहिंसायुद्धमेहोयगी औरशास्त्रमे अहिंसापरमधर्मकहाहै इससेयुद्धकरनाअतिअनुचितहै इसपरकहतेकिजैसेवेदविहितजोजज्ञमेहिंसा सोहिंसानहींहैतैसेशास्त्रसंमतजोक्षत्रीकापरमधर्मयुद्ध तिसमेहिंसाऔपापकीकल्पनाव्यर्थकरतेहो औरपरमश्रेयरूपमहाफलआपसेआयतुमकोउपस्थितकहेप्राप्तभयाहै इससेअबतुमकिसकारणकम्पमानहोते यहकहतेहैं किहेअर्जुनवेमांगेवेयतनकियेआपसेप्राप्तपरमश्रेय कहेकल्याणकासाधनयुद्धजिससेपरमकल्याणसिद्धहोय ऐसा युद्धअतिभाग्यवानक्षत्रीलोगपावतेहैं क्योंकि इससेस्वर्गकाद्वारवेरोंकटोंकखुलारहताहै अथवाजोइसप्रकारकायुद्धपावेंसोई सुखीहैं इसश्लोकसेप्रथमअध्यायकाछत्तीसवांश्लोक कहागयाकिकिसतरहआत्मीयजनोंकोनाशकरिसुखीहोंयगे इसीबातकाभगवाननेउत्तरदियाहै ३२

CC-0. In Public Domain. Digitized by eGangotri

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ततः स्वधर्म्मं कीर्त्तिञ्च हित्वा पापमवाप्स्यसि ३३

शाङ्करभाष्यं

एवंकर्त्तव्यताप्राप्तमपि अथेति अथत्वमिमंधर्म्यंधर्मादनपेतंविहितंसंग्रामंयुद्धं नकरिष्यसिचेत् ततस्तदकरणात्स्वधर्म्यं कीर्त्तिञ्चमहादेवादिसमागमनिमित्तां हित्वा केवलं पापमवाप्स्यसि ३३

आनन्दगिरिकृतटीका।

न्यशास्त्रतोविशेषशास्त्रस्यबलीयस्त्वादित्याह उच्यतइति तथापियुद्धेप्रवृत्तानामै हिकामुष्मिकस्यापिसुखाभावादुपरतिरेवततोयुक्ताप्रतिभातीत्याशंक्याह यदृच्छये ति चिरेणचिरतरेणकालेनचयागाद्यनुष्ठायिनःस्वर्गादिभाजोभवन्तियुद्धमाना स्तुक्षत्रियावहिर्मुखताविहीनाः सहसैवस्वर्गादिसुखभोक्तारस्तेनतवकर्त्तव्यमेवयुद्ध मितिव्याख्यानेनस्फुटयति यदृच्छयेत्यादिना इहामुत्रचभाविसुखवतामेवक्षत्रि याणांस्वधर्मभूतयुद्धसिद्धेस्तादर्थ्येनोत्थानंशोकमोहौहित्वाकर्त्तव्यमित्यर्थः ३२

स्वधर्मस्ययुद्धस्यअद्ययाकरणेस्वर्गादिमहाफलप्राप्तिंप्रदर्श्य तदकरणेप्रत्यवाय प्राप्तिंप्रदर्शयन्नुत्तरश्लोकगतार्थशब्दार्थंकथयति एवमिति विहितत्वंफलवत्त्वमित्य नेनप्रकारेणेत्यर्थः अन्वयार्थं पुनश्चेदित्यनूद्यते महादेवादीत्यादिशब्देनमहेन्द्रादयो गृह्यन्ते ३३

स्वामिकृतटीका।

किञ्चमहतिश्रेयसिस्वयमेवोपस्थितेसतिकुतोविकम्पसेइत्याह यदृच्छयेति यदृच्छयाअप्रार्थितमेवोपपन्नंप्राप्तमीदृशंयुद्धंसुखिनःसुभाग्याएवलभन्तेयतोऽनिवा रणंस्वर्गद्वारमेवैतत्यद्वायएवम्बिधंयुद्धंलभ्यन्तेतएवसुखिनइत्यर्थः एतेनस्वजनंहि कथंहत्वासुखिनःस्याममाधवेतियदुक्तंतन्निरस्तं ३२ विपक्षेदोषमाहअथचेदिति३३

भाषा अनुवाद।

औरजोयहस्वधर्मरूपसंग्राम नकरोगे तोकेवलफलप्राप्तिनहोगीयहीनहीं है औरउलटाप्रत्यवाय कहेअधर्मभीहोगा सोईदोषकहतेहैं किजोतुमइसधर्मजन कउपस्थित कहेप्राप्तभयेयुद्धकरनेमे प्रवृत्तनहोउगे तोतुमअपनेधर्मऔकीर्त्तिके त्यागकरनेसे अवश्यपापकेभागीहोउगे इसमेसन्देहनहींहै ३३

CC-0. In Public Domain. Digitized by eGangotri

अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययां सम्भावितस्याचाकीर्त्तिर्मरणादतिरिच्यते ३४

शाङ्करभाष्यं

नकेवलंस्वधर्मकीर्त्तिपरित्यागः अकीर्त्तिमिति अकीर्त्तिञ्चापियुद्धेभूतानिकथयिष्यन्ति तेतवाव्ययांदीर्घकालाधर्मात्माशूरइत्येवमादिभिर्गुणैः सम्भावितस्याकीर्त्तिर्मरणादतिरिच्यते सम्भावितस्याकीर्त्तेर्ब्बरंमरणमित्यर्थः ३४

किञ्चभयादिति भयात्कर्णादिभ्योरणात्पुङ्गादुपरतंनिवृत्तंमंस्यन्तेचिन्तयिष्यन्तिनक्षपयेतित्वांमहारथादुर्य्योधनप्रभृतयः केमंस्यन्तेइत्याहयेषाञ्चत्वंदुर्य्योधनादीनांबहुमतोबहुभिर्गुणैर्युक्तइत्येवंबहुमतोभूत्वापुनस्त्वं यास्यसिलाघवंलघुभावं ३५

आनन्दगिरिकृतटीका।

युद्धाकरणेचत्वियस्यप्रत्यवायमामुष्मिकमापाद्य शिष्टगर्हालक्षणंदीर्घकालभाविनमैहिकमपिप्रत्यवायंप्रतिलभ्यति नकेवलमिति युद्धेस्वमरणसन्देहात्तत्परिहारार्थमकीर्त्तिरपिसोढव्या स्वात्मसंरक्षणस्यश्रेयस्करत्वादित्याशंक्याह धर्मात्मेति मान्यानामकीर्त्तिर्भवतिमरणादपिदुःसहेतितात्पर्य्यार्थमाह सम्भावितस्येति ३४

दृतश्चत्वयायुद्धंकर्त्तव्यमित्याह किञ्चेति प्राणिषुकृपयानाहंयुद्धंकरिष्यामीत्याशंक्याह भयादिति महारथानेवविशिनष्टि येषाञ्चेति दुर्य्योधनादिभिस्त्वंबहुमतोभूत्वापुनस्तानिरसनार्थंसंग्रामेप्रवृत्तिरवश्यम्भाविनीत्यर्थः ३५

स्वामिकृतटीका।

किञ्च अकीर्त्तिमिति अव्ययांशाश्वतींसम्भावितस्यबहुमतस्यअतिरिच्यतेऽधिकाभवति ३४

भाषाअनुवाद।

औरजोकहो किस्वधर्मऔकीर्त्तिजांय हमहिंसानकरैंगे तौयुद्धनकरनेसे केवलस्वधर्मऔकीर्त्तिहीकात्यागनहींहै औरभीहै सोकहतेहैंकियुद्धछोडनेसे लोगतुमारोअयशकहैंगेऔनिन्दाकरैंगे औरवहअयशचिरकाल कहेवऊतदिनोंतकसंसारमेंरहैगा औरतुम क्षत्रियोंकेबीचयुद्धकरनेमेप्रसिद्धवीरहौ देखोजो जिसवातमेख्यात कहेनामीहै औलोगउसकोप्रतिष्ठितबडाकरिजानतेहैं तोफेरिउसकाउसीवातमेअयश यहमरनेसेभीअधिकहै औरसबपापऔदोषोंका दादाहैइसकोअच्छीतरहविचारकरदेखो ३४

CC-0. In Public Domain. Digitized by eGangotri

भयाद्रणादुपरतंमंस्यन्तेत्वांमहारथाः येषाञ्चत्वंबहुमतोभूत्वायास्यसिलाघवं ३५
अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः
निन्दन्तस्तवसामर्थ्यं ततोदुःखतरंनुकिं ३६

शाङ्करभाष्यं

किञ्चअवाच्यवादानिति अवाच्यवादान्अवक्तव्यवादान्चबहूननेकप्रकारान् वदिष्यन्तितवाहिताःशत्रवःनिन्दन्तःकुत्सयन्तस्तवत्वदीयंसामर्थ्यंनिभृतकवचादियुद्धनिमित्तंतस्मात्ततोनिन्दाप्राप्तेर्दुःखात्दुःखतरंनुकिंततःकष्टतरदुःखंनास्तीत्यर्थः

आनन्दगिरिकृतटीका ।

इतश्चत्वंयुद्धादुपरमंमाकार्षीरित्याह किञ्चेति ननुभीष्मद्रोणादिवधप्रयुक्तंकष्टतरंदुःखमसहमानोयुद्धान्निवृत्तःस्वसामर्थ्यनिन्दादिशत्रुकृतंसोढुंशक्ष्यामीत्याशंक्याह ततइति ३६

तर्हियुद्धेगुर्वादिवधवशान्मध्यस्थानिन्दाततोनिवृत्तौशत्रुनिन्देत्युभयतःपाशरज्जुरित्याशंक्याह युद्धेपुनरिति जयेपराजयेचलाभधौव्याद्युद्धार्थमुत्थानमावश्य

स्वामिकृतटीका ।

किञ्चभयादिति येषांबहुगुणत्वेनत्वंपूर्वंसंमतोभूस्तएवभयात्संग्रामान्निवृत्तंत्वांमन्येरन्ततश्चपूर्वंबहुमतोभूत्वालाघवंलघुतांयास्यसि ३५ किञ्चावाच्यवादानिति अवाच्यान्वादान्वचनानर्हान् शब्दांस्तवाहिताश्चशत्रवो वदिष्यन्ति ३६

भाषा अनुवाद ।

भगवानकहतेहैं किअर्जुनतुमकोअवयुद्धकरनाहींउचितहै क्योंकितुमतो यहजानतेहौ किप्राणियोंकेऊपरकृपाकरिहम संग्रामछोडते परमहारथीवीर तुमकोभयसेयुद्धविमुखजानैंगे जोतुमकोपूर्वकहेपहिलेसकलगुणसंपन्नकहेयुक्त जानतेथेवेलोगअबतुमकोकरणआदिकयोद्धोंकेभयसेयुद्धविमुखमानैंगे देखोजि नदुर्योधनआदिकों कीतुमबहुमतकहेमान्यरहे उनकेनिकटअबतुमकैसेलघुकहेहलकेहोउगे तोइससेंसीकेडरसेयुद्धकरनाअवश्यहै ३५ इससेअबतुम युद्धसेनिवृत्तनहोउ जोकहोकिभीष्मतथाद्रोणआदिकावधबडाकष्टहै तोदेखोतुमारेशत्रुगणतुमारीसामर्थकीनिन्दाकरतेहुयेतुमारेप्रति अनेकअनेकअयोग्य दुर्वचनकहेंगे तोइससेऔरदुखकौनहैयहकष्टसेभीमहाकष्टहै ३६

CC-0. In Public Domain. Digitized by eGangotri

हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं। तस्मादुत्तिष्ठकौन्तेययु
द्धायकृतनिश्चयः ३७ सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ
ततोयुद्धायय्युज्यस्वनैवंपापमवाप्स्यसि ३८

शाङ्करभाष्यं

युद्धेपुनःक्रियमाणेकर्णादिभिःकिंहतोवेति हतोवाप्राप्स्यसिस्वर्गंहतःसन्
स्वर्गंप्राप्स्यसिजित्वाकर्णादीन्शूरान्भोक्ष्यसेमहीं उभयथापितवलाभएवेत्यभि
प्रायःयतएवं तस्मादुत्तिष्ठकौन्तेययुद्धायकृतनिश्चयः जेष्यामिशत्रून्मरिष्यामिवे
तिनिश्चयंकृत्वेत्यर्थः ३७

आनन्दगिरिकृतटीका।

कमित्याह तस्मादिति नहिपरिशुद्धकुलस्यक्षत्रियस्ययुद्धायोद्युक्तस्यतस्मादुपरमः
साधीयानित्याह कौन्तेयेति जयेपराजयेचेत्येतदुभयत्रेत्युच्यतेजयादिनियमाभा
वेपिलाभनियमेफलितमाह यतइति कृतनिश्चयत्वमेवविषदयतिजेष्यामीति ३७

स्वामिकृतटीका।

यच्चोक्तंनचैतद्विद्मइतितत्राह हतोवेति पक्षद्वयेपितवलाभएवेत्यर्थः ३७

भाषाअनुवाद

तोयुद्धकरिगुरूआदिकेवधसेनिन्दाऔरसंग्रामछोडनेसेशत्रुनिन्दाकरैंगे
इसदुविधाचिन्ताकेऊपरकहतेहैं औरदूसरेअध्यायकेछठयेंश्लोकमेंजोअर्जुनने
कहाकिइनकोहममारैंयायेईहमैजसकरिलेंय इसकाभी उत्तरश्रीकृष्णकरतेहैं
किजयकरैंगेयापराजयपावेंगेइसकीनिश्चयकरिकेउठो जोकहोकिइसदैवआधी
नजयपराजयकाक्यानिश्चयहै तोइसयुद्धमेंजोतुमारीमृत्युहोयगीतोस्वर्गवासपा
वोगे औरजोशत्रुवोंकोजीतोगेतोपृथिवीकाराज्यऔरभोगकरोगे तिससेहेकौ
न्तेयअर्जुनयुद्धकरनेकीनिश्चयकरिकेउठो तुमारेदोनोहाथलडुआहैं ३७

जोकदाचित् वधहेतुक पापहीकोनिश्चयकरिउसकेडरसेयुद्धमेंनिश्चयकरि
केनहींउठिसकते यहकहोतोसुहृदमित्रोंकेजीवनऔरमरणनिमित्तकसुखऔर
दुखकीसमताकहतेहैं किप्रथमसुखऔदुखतथालाभऔहानिजयपराजयइनको
समानकरि औरप्रीतिविरोधकोभीत्यागकरिके तवयुद्धमेंप्रवृत्तहोउ इसप्रकार
सेयुद्धकरनेमेंपापनप्राप्तहोयगा अर्थात्नलगेगा ३८

CC-0. In Public Domain. Digitized by eGangotri

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ३९

शाङ्करभाष्यं

तत्रयुद्धंस्वधर्मइत्येवंयुध्यमानस्यउपदेशमिमंशृणु सुखदुःखेइति सुखदुःखे समेतुल्येकृत्वारागद्वेषावप्यकृत्वेत्येतत् तथाचलाभालाभौजयाजयौचसमौकृत्वात तोयुद्धायायुज्यस्वघटस्वनैवंयुद्धं कुर्व्वन्पापफलमवाप्स्यसिइत्येषउपदेशःप्रासङ्गिकः

आनन्दगिरिकृतटीका।

पापभीरुतयायुद्धायनिश्चयंकृत्वानोत्थातुंशक्नोमीत्याशंक्याह तत्रेति युद्धस्य स्वधर्मतयाकर्त्तव्यत्वेसतीतियावत् सुहृज्जीवनमरणादिनिमित्तयोःसुखदुःखयोः समताकरणंकथमिति तत्राह रागद्वेषाविति लाभःतत्प्राप्तिः अलाभस्तद्विपर्ययः न्यायेनयुद्धेनापरिभूतेनपरस्यपरिभवोजयस्तद्विपर्ययस्तुजयः तयोःलाभालाभयोर्जयाजययोश्चसमताकरणं समानमेवरागद्वेषावकृत्वेत्येतद्दर्शयितुंतयेत्युक्तंयथोक्तोपदेशवशात्परमार्थदर्शनप्रकरणेयुद्धकर्त्तव्यतोक्तेः समुच्चयपरत्वंशास्त्रस्यप्राप्तमित्याशंक्याह एषइति क्षत्रियस्यतवधर्मभूतयुद्धकर्त्तव्यतानुवादप्रसङ्गागतत्वादस्योपदेशस्यनानेनमिषेणसमुच्चयः सिध्यतीत्यर्थः ३८

स्वामिकृतटीका।

यदप्युक्तंपापमेवाश्रयेदस्मानिति तत्राह सुखदुःखेसमेकृत्वातथातयोश्चकारणभूतौ लाभालाभावपितयोरपिकारणभूतौजयाजयावपिसमौकृत्वाएतेषांसमत्वेकारणंहर्षविषादरहित्वंयुज्यस्व सन्नद्धोभव सुखदुःखाद्यभिलाषंहित्वास्वधर्मबुद्ध्यायुध्यमानःपापंनप्राप्स्यसीत्यर्थः ३८

भाषा अनुवाद।

पूर्व्वकथितजोज्ञानयोगउसकोकहिकरिअबउसकासाधन जोकर्मयोगसो कहतेहैं किवस्तुआतत्त्वकोप्रकाशकरनेवालासांख्यनामकतत्त्वज्ञान तुमसेकहाग या अर्थात्तत्त्वज्ञानकेविषयमेंजोबुद्धिसोमैंनेतुमकोकहाहै इससेजोतुमारेतत्त्वज्ञानकाबोधनहोय तौफिरचित्तशुद्धिकेद्वारातत्त्वज्ञानउत्पन्नहोनेकेअर्थअबयहकर्मयोगअर्थात्कर्मयोगकेविषयकीबुद्धिहमकहतेहैं सोसावधानहोसुनो किहेअर्जुन जिससेईश्वरार्पितकर्मकेद्वाराचित्तकोशुद्धिहोकर ईश्वरकेप्रसादसेप्रत्यक्षज्ञानको प्राप्तकरिअर्थात्पायकरि इसबन्धसेअनायासअर्थात्सहजमेंछूटिजाउगे ३९

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

शोकमोहापनयनायलौकिकोन्यायः स्वधर्ममपिचावेक्ष्येत्याद्यैःश्लोकैरुक्तो ननुतात्पर्य्येणपरमार्थदर्शनंत्विहतच्चोक्तमुपसंह्रियतेएषातेभिहितेति शास्त्रविषयविभागप्रदर्शनायदृहहिदर्शितेपुनःशास्त्रविषयविभागेउपरिष्ठात्ज्ञानयोगेन सांख्यानांकर्मयोगेनयोगिनामितिनिष्ठाद्वयविषयंशास्त्रं सुखं प्रवर्त्तिष्यतिश्रोतार श्चविषयविभागेनसुखं ग्रहिष्यन्तीत्यतआह एषातेइति एषातेतुभ्यमभिहितोक्ता सांख्येपरमार्थवस्तुविवेकविषयेबुद्धिःज्ञानंसाक्षात्शोकमोहादिसंसारहेतुदोषनिवृत्तिकारणंयोगेतुतत्प्राप्त्युपायेनिःसङ्गतया द्वन्द्वप्रहरणपूर्व्वकमीश्वराराधनार्थेकर्मयोगेकर्मानुष्ठानेसमाधियोगेच इमामनन्तरमेवोच्यमानांबुद्धिं शृणु ताञ्चबुद्धिं स्तौतिप्ररोचनार्थं बुद्ध्याययायोगविषययायुक्तोहेपार्थकर्मबन्धंकर्मैवधर्माधर्माख्यो बन्धःकर्मबन्धःतंप्रहास्यसीश्वरप्रसादनिमित्तज्ञानप्राप्तेरित्यभिप्रायः ३९

आनन्दगिरिकृतटीका।

ननुस्वधर्ममपिचावेक्ष्येत्यादिश्लोकैर्न्यायावष्टम्भेणशोकमोहापनयस्यतात्पर्येणोक्तत्वात्तस्मिन्नुपसंहर्त्तव्येकिमितिपरमार्थदर्शनमुपसंह्रियते तत्राह शोकेति स्वधर्ममपीत्यादिभिरतीतश्लोकैःशोकमोहयोः स्वजनमरणगुर्व्वादिवधशङ्कानिमित्तयोःसम्यग्ज्ञानप्रतिबन्धकयोरपनयार्थंवर्णाश्रमवतंधर्ममनुतिष्ठतः स्वर्गादिसिध्यति नान्यथेत्यन्वयव्यतिरेकात्मकोलोकप्रसिद्धोन्यायोयद्यपिदर्शितस्तथापिनासौतात्पर्येणोक्तइत्यर्थः किंतर्हितात्पर्येणोक्तंतदाह परमार्थेति नत्वेवाहं जातुनासमित्यादिसप्तभ्यापराष्टभ्यते उक्तंनजायतेम्रियतेवाकदाचिन्नेत्यादिनोपपादितमित्यर्थः उपसंहारप्रयोजनमाह शास्त्रेति तस्यवस्तुद्वाराविषयोनिष्ठाद्वयंतस्यविभक्तंस्यतेनैवविभागेनप्रदर्शनार्थंपरमार्थदर्शनोपसंहारइत्यर्थः ननुकिमित्यत्रशास्त्रस्य

स्वामिकृतटीका।

उपदिष्टंज्ञानयोगमुपसंहरंस्तत्साधनंकर्मयोगंप्रस्तौति एषेति सम्यक्ख्यायतेप्रकाश्यतेवस्तु तत्त्वमनयेतिसंख्यासम्यग्ज्ञानंतस्यांप्रकाश्यमानमात्मतत्त्वंसांख्यं तस्मिन्करणीयाबुद्धिरेषातवाभिहिता एवमभिहितायामपि तवचेदात्मतत्त्वमपरोक्षंनभवति तर्ह्यन्तःकरणशुद्धिद्वारात्मतत्त्वापरोक्षार्थंकर्मयोगेत्विमांबुद्धिंशृणु ययाबुद्ध्यायुक्तःपरमेश्वरार्पितकर्मयोगेनशुद्धान्तःकरणः संस्तत्प्रसादलब्धापरोक्षज्ञानेनकर्मात्मकंबन्धंप्रकर्षेणहास्यसित्यक्ष्यसि ३९

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

विषयविभागः प्रदर्श्यतेऽत्तरत्रैवतद्विभागप्रवृत्तिप्रतिपत्त्योः सम्भवादिति तत्राह दूरहीति शास्त्रप्रवृत्तेः श्रोतृप्रतिपत्तेश्चसौकर्य्यार्थमादौविषयविभागसूचनमित्यर्थः उपसंहारस्यफलवत्त्वमेवमुक्त्वातमेवोपसंहारमवतारयति अतआहेति परमार्थात्मतत्त्वविषयांज्ञाननिष्ठामुक्त्वोपसंहृत्यवक्ष्यमाणांसंगृह्णाति योगेत्विति तामेवबुद्धिं विशिष्टफलवत्त्वेनाभिष्टौति बुद्धेऽति तत्रोपसंहारभागंविभजते एषेत्यादिना बुद्धिशब्दस्यान्तःकरणविषयत्वं व्यावर्त्तयति ज्ञानमिति तस्यसहकारिनिरपेक्षस्यविशिष्टफलवत्त्वमाचष्टे साक्षादिति शोकमोहौरागद्वेषौकर्त्तृत्वंभोक्तृत्वमित्यादिरनर्थःसंसारस्यहेतुर्दोषःस्याज्ज्ञानंतस्यनिवृत्तौनिरपेक्षंकारणंज्ञानमज्ञाननिवृत्तौज्ञानस्यान्वयव्यतिरेकसमधिगतसाधनत्वादित्यर्थः योगेत्विमामित्यादिव्याकुर्व्वन् योगशब्दस्यप्रकृतेचित्तवृत्तिनिरोधविषयत्वं व्यवच्छिनत्ति तत्रातीति प्रकृतमुक्तुपयुक्तंज्ञानंतत्प्रदेनपराम्रश्यते ज्ञानोदयोपायमेवप्रकटयतिनिःसङ्गतयेति फलाभिसन्धिवैधुर्यंनिःसङ्गत्वं बुद्धिस्तुतिप्रयोजनमाह प्ररोचनार्थमिति अभिष्टुताहिबुद्धिःश्रद्धातव्यासत्यनुष्ठातारमधिकरोति तेनस्तुतिरर्थवतीत्यर्थः कर्मानुष्ठानविषयबुद्ध्याकर्मबन्धस्यकृतोनिवृत्तिर्नहितत्त्वज्ञानमन्तरेणसमूलंकर्महातुंशक्यमित्याशंक्याह ईश्वरइति ३९

ननुकर्मानुष्ठानस्यानैकान्तिकफलत्वेनाकिञ्चित्करत्वादनेकानर्थकलुषितत्वेनदोषवत्त्वाच्चयोगबुद्धिरपिनश्रद्धेयेतितत्राह किञ्चेति अन्यच्चकिञ्चिदुच्यतेकर्मानुष्ठानस्यावश्यकत्वेतत्कारणमितियावत् कर्मणासह समाधेरनुष्ठातुमशक्यत्वादनेकान्तरायसम्भवात्तत्फलस्यचसाक्षात्कारस्य दीर्घकालाभ्याससाध्यस्यैकस्मिन्जन्मन्यसम्भवादर्थाद्योगीभ्रश्येतानर्थेचनिपतेदित्याशंक्याह नेहेति प्रतीकत्वेनोपात्तस्यनकारस्यपुनरन्वयानुगुणत्वेननास्तीत्यनुवादः यत्तुकर्मानुष्ठानस्यानैकान्तिकफलत्वेनाकिञ्चित्करत्वमुक्तंतत्दूषयति यथेति कृषिवाणिज्यादेरारम्भस्यानियतफलंसम्भावनामात्रोपनीतत्वान्नतथाकर्मणिवैदिकेप्रारम्भस्यफलमनियतंयुज्यतेशास्त्रविरोधादित्यर्थः यत्तूक्तमनेकानर्थकलुषितत्वेनदोषवदनुष्ठानमितितत्राह किञ्चेति इतोपिकर्मानुष्ठानमावश्यकमितिप्रतिज्ञायहेत्वन्तरमेवस्फुटयतिनापीति चिकित्सायांहिक्रियमाणायांव्याध्यतिरेकोवामरणं वाप्रत्यवायोपिसम्भाव्यतेकर्मपरिपाकस्य दुर्व्विवेकत्वान्नतथाकर्मानुष्ठाने दोषोस्तिविहितत्वादि

CC-0. In Public Domain. Digitized by eGangotri

नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात् ४०

शाङ्करभाष्यम् ।

किञ्चान्यत्नेहाभीति नेहमोक्षमार्गेकर्मयोगेअभिक्रमनाशोऽभिक्रमणम भिक्रमःप्रारम्भःतस्यनाशोनास्ति यथाकृष्यादेर्योगविषयेप्रारम्भस्यनानैकान्तिकफ लत्वमित्यर्थः किञ्चनापिचिकित्सावत्प्रत्यवायोविद्यतेकिन्तुभवतिस्वल्पमप्यस्ययो गधर्मस्यानुष्ठितंत्रायतेरक्षतिमहतःसंसारभयात् जन्ममरणादिलक्षणात् ४०

आनन्दगिरिकृतटीका

त्यर्थः संप्रतिकर्मानुष्ठानस्यफलंपृच्छति किंत्विति उत्तरार्द्धंव्याकुर्व्वन्विवक्षितं फलंकथयति स्वल्पमपीति सम्यग्ज्ञानोत्पादनद्वारेणरक्षणंविवक्षितंसर्व्वपापप्र सक्तोपिध्यायन्निमिषच्युतंभूयस्तपस्वीभवति पंक्तिपावन इतिस्मृतेरित्यर्थः ४०

स्वामिकृतटीका ।

ननुकृष्यादिवत्कर्मणांकदाचिद्विघ्नवाऊल्येनफलेव्यभिचारान्मन्वाद्यङ्गवैगु ण्येनचप्रत्यवायसम्भवात्कुतःकर्मबन्धप्रहाणंतत्राह नेहेति इहनिष्कामकर्म्मयो गेऽभिक्रमस्यप्रारम्भस्यनाशोनिष्फलत्वंनास्ति प्रत्यवायश्चनविद्यतेईश्वरोद्देश्येनैवंवि

भाषा अनुवाद ।

औरजोकहोकिजैसेखेतीऔवनिजवैपारआदिकर्म्मोमेकदाचित्कहेकभूं कमूंविघ्नोकीवाऊल्यकहेवऊतायतसे फलकेहानिकीभीसम्भावनाहै अर्थात्नि स्फलपरिश्रमभीहोताहै औरमत्रअनुष्ठान कहेजपयज्ञआदिकमेभीविघ्न अथवा अङ्गविकलहोनेसे प्रत्यवायकहेदोषऔकर्म्मनिस्फलहोताहै तैसेहीजोयहकर्मजो विघ्नोकेमारेपूरानहोउठैतौकैसेकर्मबन्धकीहानिकहेनाश होगीऔरउलटे दोष लगनेकाडरहै ईसवास्तेभगवान कहतेहै कियहनिष्कामकर्मयोगकाआरम्भकर नेसेजोपूराभीनहोउठैतौभीनिष्कामकर्मनिःफलहोतानहीं औरइसमेदोषपाप भीनहींलगताहैं जिसहेतु ईश्वरको उद्देश्यकरि अर्थात्ईश्वरके अर्थकियेकर्ममे विघ्नहोतेहीनहींऔरईश्वराराधनके अर्थइस धर्मकेथोडे आचरनसे भीवडे भ यानकसंसारसे रक्षाहोतीहै अर्थात्ईश्वरार्पित कर्मरक्षाकरताहै इससेयहका म्यकर्मकीतरहकुछअङ्गविकलहोनेसेभीनिस्फलनहींहोताहै तात्पर्य्ययहकिईश्व रार्थकर्मकरनेमेजोदोषनलगेऔरमहत्फलहै तोसाक्षात् ईश्वरकीआज्ञाकर नेमेक्याकहनाहै ४०

CC-0. In Public Domain. Digitized by eGangotri

भाङ्कभ्यम्।

येयंसांख्येबुद्धिरुक्तायोगेचवक्ष्यमाणलक्षणा साव्यवसायेति व्यवसायात्मिकानिश्चयस्वभावाएकैवबुद्धिरितरविपरीतबुद्धिशाखाभेदस्यवाधिकासम्यक्प्रमाणजनितत्वादिहश्रेयोमार्गे हेकुरुनन्दनयाःपुनरितरावुद्धयोयासांशाखाभेदप्रचार

आनन्दगिरिकृतटीका।

ननुबुद्धिद्वयातिरिक्तानिबुद्ध्यन्तराण्यपिकणादादिशास्त्रप्रसिद्धानिविद्यन्ते तथाचकथंबुद्धिद्वयमेवभगवतोपदिष्टमितितत्राह येयमिति सैवैकाप्रमाणभूताबुद्धिरित्याह व्यवसायात्मिकेति बुद्ध्यन्तराण्यविवेकमूलान्यप्रमाणानीत्याह वक्ष्यमाणेति शाखाहीति व्यवसायात्मिकायाबुद्धेःश्रेयोमार्गेप्रवृत्तायाविवक्षितंफलमाह इतरेति प्रकृतबुद्धिद्वयापेक्षयाइतराविपरीताश्चाप्रमाणजनिताःस्वकपोलकल्पिता यावुद्धयस्तासांशाखाभेदःसंसारहेतुस्तस्यवाधिकेतियावत् तत्रहेतुःसम्यगितिनिर्दोषवेदवाक्यसमुत्थत्वादुक्तमुपायोपेयभूतं बुद्धिद्वयंसाक्षात् पारम्पर्य्याभ्यांसंसारहेतुबाधकमित्यर्थः उत्तरार्द्धंव्याचष्टे याःपुनरिति प्रकृतबुद्धिद्वयापेक्षयार्थान्तरत्वमितरत्वं तासामनर्थहेतुत्वंदर्शयति यासामिति अप्रमाणिकबुद्धीनांप्रसक्तानुपसक्त्या जायमानानामतीवबुद्धिपरिणामविशेषःशाखाभेदास्तेषांप्रचारःप्रवृत्तिःतद्वशादित्येतत्अनन्तत्वंसम्यग्ज्ञानमन्तरेणनिवृत्तिविरहितत्वं अपरत्वंकार्यस्यैवसतोवस्तुभूतकारणविरहित्वं अनुपरतत्वं स्फोरयति नित्येति कथंतर्हितन्निवृत्तिप्राप्तिरुपुरुषार्थपरिसमाप्तिस्तत्राह प्रमाणेति अन्वयव्यतिरेकाख्येनानुमानेनागमेनचपदार्थपरिशोधनपरेणपरिनिष्पन्ना विवेकात्मिकायाबुद्धिस्तां निमित्तीकृत्यसमुत्पन्नसम्यग्बोधानुरोधात् प्रकृताविपरीतबुद्धयोव्यावर्त्तन्ते तासुसंख्याताद्व्यावृत्तासुसतीषुनिरालम्बनतयासंसारोपिस्थातुमशक्नुवन्नुपरतोभवतीत्यर्थः याःपुनरित्युपक्रान्तातत्त्वज्ञानापनोद्यासंसारास्पदीभूताविपरीतबुद्धिरनुक्रामति तावुद्धयइति बुद्धीनांवृत्तस्यैवकुतोवक्ष्यशाखित्वं तत्राह वक्ष्यभेदादित्येतदिति एकैकांबुद्धिंप्रतिशाखाभेदोऽवान्तरविशेषस्तेनबुद्धीनामसंख्यत्वंप्रख्यातमित्याह प्रतिशाखेति बुद्धीना

स्वामिकृतटीका।

ध्रुवैगुण्याद्यसम्भवात् किञ्चास्यधर्मस्यईश्वराराधनार्थकर्मयोगस्यस्वल्पमपिकृतंमहतोभयात्संसारलक्षणात्त्रायतेरक्षति नतुकाम्यकर्मवत् किञ्चिदङ्गवैगुण्यादिनानैष्फल्यमस्येत्यर्थः ४०

CC-0. In Public Domain. Digitized by eGangotri

व्यवसायात्मिकाबुद्धिरेकेहकुरुनन्दन बहुशाखाह्यनन्ताश्चबुद्धयोऽव्यवसायिनां ४१

शाङ्करभाष्यं

वशादनन्तोऽपरोनुपरतः संसारोपिनित्यप्रततोविस्तीर्णोभवति प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्चोपरम्याखनन्तभेदबुद्धिषुसंसारोष्युपरमतेतावुद्धयोबहुशाखावहवःशाखायासां तावहुशाखावहुभेदादित्येतत्प्रतिशाखाभेदेनह्यनन्ताश्चबुद्धयःकेषामव्यवसायिनांप्रमाणजनितविवेकबुद्धिरहितानां इत्यर्थः ४१

आनन्दगिरिकृतटीका।

मानन्त्यप्रसिद्धिप्रद्योतनार्थो हिशब्दः सम्यग्ज्ञानवतां यथोक्तबुद्धिभेदभाक्त्वमप्रसिद्धमित्याशंक्यप्रत्याह केषामित्यादिना ४१

स्वामिकृतटीका।

कुतइत्यपेक्षायामुभयोर्वैषम्यमाह व्यवसायात्मिकेति इहईश्वराराधनलक्षणे

भाषा अनुवाद।

लोकहोकि कणादआचार्य्योंकेमतमेंज्ञानकर्मउपासनारूपअनेकप्रकारकी बुद्धिकहीहैं औरआपयहांज्ञानयोगरूपऔकर्मरूपदोहीप्रकारबुद्धिकेकहा सो कैसेसंभवहोय इसअभिप्रायपरऊक्तइनदोनोकेभीविपरीतकहेऊलटाभिन्नप्रकार कहतेहैं किहेकुरूनन्दनअर्जुनयहईश्वरआराधनरूपकर्मयोगमेंव्यवसायात्मिकाअर्थात् भगवद्भक्तिकेद्वाराअवश्यहीऊद्धारहोगाऐसीनिश्चयात्मिकाकहेनिश्चयरूपबुद्धिकीनिष्ठाएकहीहै औरअव्यवसायीअर्थात् आराधनकेबहिर्मुखकामी कहेसकामकर्मकरनेवालोंकीअनन्तवासनासेअनेकप्रकारकीबुद्धिहोतीहैं और ऊसमेभी कर्मकाफलऔरअश्वमेधराजसूयआदियज्ञकाअङ्गदिग्विजयकीभांति गुणकलाआदिनानाप्रकारवहुतशाखाप्रशाखाविशिष्टबुद्धिऊत्पन्नहोतीहैं परन्तु भगवत्आराधनकेअर्थनित्यकर्म तथानैमित्तिककर्मकुछअङ्गविकलकहेअधूराभी होनेसेनष्टनहींजाताहै यथासाध्यकहेजितना या जैसाअपनेसेहोसकेऊतनाहीं औरवैसाहीकरो यहीऊसधर्मकीविधिहै ईश्वरार्पितकर्मविघ्नऔदोषकोशान्त करिदेता इससेऊसकेकरनेमेकदाचित्वैगुण्यनहींहोतीअर्थात्ऊसकोविगुण नहींकहसकतेहैं औरकाम्यकर्मतैसानहींहै इससेदोनोकेबीचबडाअन्तरहैसो तुमएकबुद्धिहोकेरहोकहाहैदुविधामेदोनोंगएमायामिलोनराम ४१

CC-0. In Public Domain. Digitized by eGangotri

यामिमांपुष्पितांवाचंप्रवदन्त्यविपश्चितः वेदवादरताःपार्थनान्यदस्तीतिवादिनः४२

शाङ्करभाष्यम्।

येषांव्यवसायात्मिकाबुद्धिर्नास्तितेषांयामिमामिति यामिमांवक्ष्यमाणांपुष्पितांपुष्पितइवदृश्यःशोभमानांश्रूयमाणरमणीयांवाचंवाक्यलक्षणांप्रवदन्तिकेऽविपश्चितः अल्पमेधसोऽविवेकिनइत्यर्थः वेदवादरताइतिवेदवादरताःवक्ष्यर्थवाद

स्वामिकृतटीका।

कर्मयोगेव्यवसायात्मिका परमेश्वरभक्तौवध्रुवंतरिष्यामीति निश्चयात्मिकाएकैव एकनिष्ठैवबुद्धिर्भवतिअव्यवसायिनान्तुईश्वराराधनबहिर्मुखाणां कामिनांकामानामानन्त्यादनन्तास्तवापि कर्मफलगुणफलत्वादिप्रकारभेदाद्बहुशाखाश्चबुद्धयो भवन्तिईश्वराराधनार्थंहिनित्यंनैमित्तिकञ्चकर्म किञ्चिदङ्गवैगुण्येपि ननश्यतियाशङ्कयात्तथाकुर्य्यादितिहितद्विधीयते नचवैगुण्यमपीश्वरोद्देश्येनैववैगुण्योपशमात्नतुतथाकाम्यंकर्मअतोमहद्दैषम्यमितिभावः ४१

भाषा अनुवाद।

जोकहोकिसांख्ययोगरूपबुद्धिएकहीप्रमाणभूतहै तोफेरिवही सबकेचित्तमेक्योंनहीस्थिरहोती अर्थात्जोसकाममनुष्यहैंवेभी येकष्टरूपसकलकामनात्यागकरिभगवद्भक्तिहीसेमुक्तहोंयगे ऐसीनिश्चयरूप बुद्धि काहेसेनहीं करतेहैं तिसपरकहतेहैं किविषलताद्रुन्दारूनकीतरहअतिसुन्दरयहजोउत्तम स्वर्गआदिहैं फलसुनावने वाली श्रुति कहेवेदवाक्यजिसकोकामी कहेसकाममनुष्यसबकहतेसोईस्वर्गआदिफलश्रुतिरूपवेदवाक्यसेविचारशून्य मनुष्योको अर्थात् उसपरविश्वासकरनेवलोंको भगवद्भक्तिसे निश्चय मुक्तहोंयगे ऐसी बुद्धिउत्पन्ननहीं होतीहै इसश्लोकके आगेवालेतीन श्लोकोंकेसाथ इसश्लोककी अन्वयहै जोकहोकिवेमनुष्यऐसेकाहेलिये कहतेहैं तोउनका सिद्धान्त कहतेहैं किजिसलियेवेसबलोगअतिमूढ़अज्ञानीहैं उनकेअज्ञानमे हेतुकहतेहैं किवेदकेबीचमेजोसबवाक्यहैंसोकेवलप्रसंसापरकहैं अर्थात्चतुर्मासयाजीयोंको अक्षयस्वर्गहोताऔयज्ञशेषमेसोमलतापीकरिअमरहोतेहैं इत्यादिजोपलासपुष्पकेसमान पुष्पितवेदवाक्यहैं निर्गन्धफूलकेतुल्यइन्हीवेदवाक्योंसेकाम्यकर्ममेवेलोगनिरतहैं इससेकहतेहैं कि यहवेदोक्तस्वर्गआदिफलको छोडकरऔरईश्वरतत्त्वप्राप्तकरने योग्यवस्तुकुछनहींहै इसीमतकोबेकहतेहैं ४२

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

फलसाधनप्रकाशकेषुवेदवाक्येषुरताःहेपार्थनान्यत्स्वर्गपश्वादिफलसाधनेभ्यः कर्म्मभ्योऽस्तीत्येवंवादिनोवदनशीलाः ४२

आनन्दगिरिकृतटीका ।

यदिसांख्ययोगरूपैकैवप्रमाणभूतावुद्धिस्तर्हिसैवचित्तेकिमितिस्थिरानभवति तत्राह येषामिति तेषामिमांपुष्पितांवाचंप्रवदन्ति तयापहृतचेतसांकामिनां कामवशान्निश्चयात्मिकावुद्धिर्नप्रायःस्थिराभवतीत्याह यामिति इमामित्यध्ययनविध्युपात्तत्वेनप्रसिद्धत्वंकर्मकाण्डरूपायावाचोविवक्ष्यतेवक्ष्यमाणत्वंक्रियाविशेषवहुलामित्यादौद्रष्टव्यं किंशुकोहिपुष्पशालीशोभमानोऽनुभूयते नपुनःरूपभोग्यफलभागीलक्ष्यतेतथेयमपिकर्मकाण्डात्मिकाश्रूयमाणदशायांरमणीया वागुपलभ्यते साध्यसाधनसम्बन्धप्रतिभानान्नत्वेषांनिरतिशयफलभागिनीभवति कर्म्मानुष्ठानफलस्यानित्यत्वादितिमत्वाह पुष्पितामिति वाक्यत्वेनलक्ष्यतेअर्थवत्वप्रतिभानाद्वस्तुतस्तुनवाक्यमर्थाभासत्वादित्याह वाक्यलक्षणामिति प्रवक्तॄणांवेदवाक्यतात्पर्यपरिज्ञानाभावंसूचयति अविपश्चितइति वेदवादोवेदवाक्यानितानिचवहूनामर्थवादानांफलानांसाधनानाञ्चविधिशेषाणां प्रकाशकानि तेषुरतिराशक्तिस्तन्निष्ठत्वंतद्वत्त्वमपितेषांविशेषणमित्याह वेदवादेति कर्मकाण्डनिष्ठत्वंफलंकथयति नान्यदिति ईश्वरोवामोक्षोवानास्तीत्येवंवदन्तो नास्तिकाःसम्यग्ज्ञानवन्तोनभवन्तीत्यर्थः४२

प्रकृतान्प्रवक्तॄनविवेकिनोव्यवसायात्मिकावुद्धिभाक्त्वासम्भवसिद्ध्यर्थं विधान्तरेणविशिनष्टि तेचेति तेषांसंसारपरिवर्त्तमानपरिदर्शनार्थंप्रस्तुतांवाचमेवविशिनष्टि जन्मेति ननुपुंसांकामस्वभावत्वमयुक्तं चेतनस्येच्छावतस्तदात्मत्वानुपपत्तेरि

स्वामिकृतटीका ।

ननुकामिनोऽपिकष्टान्कामान्विहायव्यवसायात्मिकामेववुद्धिंकिमितिनकुर्व्वन्तितत्राह यामिमामिति यामिमांपुष्पितांविषलतावदापाततोरमणीयांप्रकृष्टांपरमार्थफलपरामेववदन्तिवाचंस्वर्गादिफलश्रुतिं तेषांतयावाचापहृतचेतसांव्यवसायात्मिकावुद्धिर्नसमाधौविधीयतइतितृतीयेनान्वयः किमितितथावदन्तियतोऽविपश्चितोमूढ़ाः तत्रहेतुर्वेदवादरताइति वेदेयेवादाअर्थवादाःअक्षय्यंहिवैचातुर्मास्ययाजिनःसुकृतंभवति तथाअपामसोमममृताअभूमेत्याद्याःतेष्वेवरताःप्रीता अतएवातःपरमन्यदीश्वरतत्त्वंप्राप्यंनास्तीतिवदनशीलाः ४२

CC-0. In Public Domain. Digitized by eGangotri

कामात्मानःस्वर्गपराजन्मकर्मफलप्रदां क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति ४३

शाङ्करभाष्यं।

तेचकामात्मेति कामात्मानःकामस्वभावाःकामपराइत्यर्थः स्वर्गेतिस्वर्गपराः स्वर्गःपरःपुरुषार्थोयेषांतेस्वर्गपराःस्वर्गप्रधानाःजन्मकर्मफलप्रदां कर्मणःफलंकर्म फलंजन्मैवकर्मणःफलं तत्प्रददातीतिजन्मकर्मफलप्रदातांवाचं प्रवदन्तीत्यनुषज्य तेक्रियाविशेषबहुलांक्रियाणांविशेषाःक्रियाविशेषाः तेबहुलायस्यांवाचितांस्वर्ग पशुपुत्राद्यर्थाःययावाचावाहुल्येनप्रकाश्यन्तेभोग्यैर्य्यगतिंप्रति भोगश्चऐश्वर्य्यञ्चभो गैश्वर्य्येतयोर्गतिःप्राप्तिः भोगैश्वैर्य्यगतिः तांप्रतिसाधनभूतास्तेक्रियाविशेषाः तद्ब हुलां तांवाचं प्रवदन्तोमूढाःसंसारेपरिवर्त्तन्तइत्यभिप्रायः ४३

आनन्दगिरिकृतटीका।

तितत्राह कामपराइति तत्परत्वंतत्तत्फलार्थित्वेनतत्तदुपायेषुकर्मस्वेवप्रवृत्ततया कर्मसंन्यासपूर्व्वकात्ज्ञानाद्बहिर्मुखत्वं ननुकर्मनिष्ठानामपिपरमपुरुषार्थापेक्षया मोक्षोपायेज्ञानेभवत्याभिमुख्यमितिनेत्याह स्वर्गेति तत्परत्वंतस्मिन्नेवासक्ततया तदतिरिक्तपुरुषार्थराहित्यनिश्चयवत्त्वं उच्चावचमध्यमदेहप्रभेदग्रहणंजन्मवाचो यथोक्तंफलप्रदत्वमप्रामाणिकमित्याशंक्यानुष्ठानद्वारातदुपपत्तिरित्याह क्रियेति क्रियाणामनुष्ठानानांयागदानादीनांविशेषादेशकालाधिकारिप्रयुक्ताः सम्पाद्या नेकाहलक्षणास्ते खल्वस्यांवाचिप्राचुर्येणप्रतिभान्तीत्यर्थः कथंयथोक्तायांवाचि क्रियाविशेषाणांबाहुल्येनावस्थानमित्याशंक्य प्रकाश्यत्वेनैतद्विशदयति स्वर्गेति तथापितेषांमोक्षोपायत्वोपपत्तेस्तन्निष्ठानांमोक्षाभिमुख्यंभविष्यति नेत्याह भोगे ति यथोक्तांवाचमभिवदतांपर्यवसानंदर्शयति तद्बहुलामिति ४३

स्वामिकृतटीका।

अतएवकामात्मानइति कामात्मानः कामाकुलितचित्ताअतः स्वर्गएवपरः

भाषा अनुवाद।

अतएवकामात्मा कहेकर्मबुद्धीस्वर्गादिफलप्राप्तिरूपकामनाहीहै परमपुरु षार्थजिनकेमतमे ऐसैजोमूढहैं तेईजन्मकर्मतथास्वर्गआदिफलदेनेवालीजोवेद वाक्यसबहैं औरभोगऐश्वर्य्यप्राप्तहोनेकेअर्थसाधनभूतजोबेदोक्त कहेवेदविहित अनेकअनेकक्रियोंकीआधिक्यकहेबहुतायतहैं जिनसेमूढ़जनऐसेवचनबोलतेहैं अर्थात्जन्महीहैंकर्मकाफल तिसकेदेनेवालीवाक्योंकोकहतेहैं ४३

CC-0. In Public Domain. Digitized by eGangotri

भोगैश्वर्यप्रसक्तानांतयापहृतचेतसां व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते ४४

शाङ्करभाष्यं

तेषाञ्चभोगेति भोगैश्वर्यप्रसक्तानांभोगःकर्त्तव्यऐश्वर्यञ्चेति भौगैश्वर्ययोरेवप्रवणवतां तदात्मभूतानांतयाक्रियाविशेषवञ्चलयावाचाअपहृतचेतसामाच्छादितविवेकप्रज्ञानांव्यवसायात्मिकासांख्येयोगेवायाबुद्धिःसमाधौसमाधीयतेऽस्मिन्पुरुषोपभोगायसर्वमिति समाधिरन्तःकरणंबुद्धिःतस्मिन्समाधौनविधीयतेनस्थितिर्भवतीत्यर्थः ४४

आनन्दगिरिकृतटीका।

ननुकर्मकाण्डनिष्ठानांकर्मानुष्ठायिनामपिबुद्धिशुद्धिद्वारेणान्तःकरणेसाध्यसाधनभूतबुद्धित्रयसमुदायसम्भवादचतोमोक्षोभविष्यति नेत्याह तेषाञ्चेति तदात्मभूतानांतयोरेव भोगैश्वर्ययोरात्मकर्त्तव्यत्वेनारोपितयोरभिनिविष्टचेतसि तादात्म्याध्यासवतांवहिर्मुखाणामित्यर्थःतथापिशास्त्रानुसारिण्याविवेकप्रज्ञयाव्यवसायात्मिकाबुद्धिस्तेषामुदेष्यतीत्याशंक्याह तयेति ननुसमाधिःसंप्रज्ञातासंप्रज्ञातभेदेन द्विधोच्यते तत्रबुद्धित्रयविधिरप्रसक्तःसन्कथंनिषिध्यतेतत्राह समाधीयतइति ४४

स्वामिकृतटिका।

पुरुषार्थोयेषां ते जन्मचतत्रकर्माणिचतत्फलानिचप्रददातीति तथातांभोगैश्वर्ययोर्गतिंप्राप्तिंप्रति साधनभूता येक्रियाविशेषास्ते वज्रलायस्यांतां प्रवदन्तीत्यनुसङ्गः ४३ ततश्चभोगैश्वर्येति भोगैश्वर्ययोःप्रसक्तानामभिनिविष्टानोतयापुष्पितयावाचापहृतमाकृष्टंचेतोयेषांसमाधिश्चित्तैकाग्र्यं परमेश्वराभिमुखत्वमिति यावत् तस्मिन्निश्चयात्मिकाबुद्धिर्नविधीयते कर्मकर्त्तरिप्रयोगःसानोत्पद्यत इत्यर्थः ४४

भाषा अनुवाद।

भोगऔरऐश्वर्यमेंआसक्त तथाऊपरलिखीविषलताकेतुल्यसुन्दरवेदवाक्योंसेआकृष्टकहेहरिगयाहैचित्तजिनका उनकोसमाधिअर्थात् चित्तकीएकाग्रतारूपपरमेश्वरमेंजोएकनिष्ठा तिसमेंनिश्चयात्मिकाबुद्धिहोतीनहीं इससेकर्मरूपजोबुद्धि उसमेंकर्तृत्वरूपअहङ्कारअर्थात्हमकर्ताहैं इसवासनकेमारे उनविचारोंको ऐसीएकनिष्ठानिश्चयात्मिकाबुद्धि आपसेउत्पन्नकैसेहोय यहकहा ४४

CC-0. In Public Domain. Digitized by eGangotri

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन निर्द्वन्द्वोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवान्[४५]

शाङ्करभाष्यं

येएवंविवेकबुद्धिरहिताःतेषांकामात्मनांयत्फलंतदाह त्रैगुण्येति त्रैगुण्य विषयाःत्रैगुण्यंसंसारोविषयःप्रकाशयितव्योयेषांतेवेदास्त्रैगुण्यविषयास्त्वन्तुनिस्त्रै गुण्योभवार्जुननिष्कामोभवेत्यर्थःनिर्द्वन्द्वःसुखदुःखहेतूसप्रतिपक्षौपदार्थौद्वन्द्वशब्द वाच्यौततोनिर्गतोनिर्द्वन्द्वीभवत्वंनित्यसत्त्वस्थःसत्त्वगुणाश्रितोभव तथानिर्योगक्षे मोऽनुपात्तस्योपार्जनंयोगउपात्तस्यरक्षणंक्षेमः योगक्षेमप्रधानस्यश्रेयसिप्रवृत्तिर्दु ष्करादित्यतोनिर्योगक्षेमोभवात्मवानप्रमत्तश्चभव एषतवोपदेशःस्वधर्ममनुतिष्ठतः[४५]

आनन्दगिरिकृतटीका।

अविवेकिनामपिवेदाभ्यासवतां विवेकबुद्धिरुदेष्यतीत्याशंक्याह यएवमिति तर्हिवेदार्थतयाकामात्मता प्रशस्तेत्याशंक्याह निस्त्रैगुण्यइति भवेति पदंनिर्द्वन्द्वा दिविशेषणेष्वपिप्रत्येकंसम्बध्यते त्रयाणांसत्त्वादीनांगुणानांपुण्यपापव्यामिश्रकर्म तत्फलसम्बन्धलक्षणःसमाहारस्त्रैगुण्यमित्यङ्गीकृत्यव्याचष्टेसंसारइति वेदशब्देना त्रकर्मकाण्डमेवगृह्यतेतदभ्यासवतां तदर्थानुष्ठानद्वारासंसारध्रौव्यान्नविवेकावस रोऽस्तीत्यर्थः तर्हि संसारपरिवर्जनार्थंविवेकसिद्ध्येकिंकर्त्तव्यमित्याशंक्याह त्वं त्विति कथंनिस्त्रैगुण्योभवेति गुणत्रयस्यराहित्यंविधीयते नित्यसत्त्वस्थोभवेति वाक्यशेषविरोधादित्याशंक्याह निष्कामइति सप्रतिपक्षत्वंपरस्परविरोधित्वंप

भाषा अनुवाद।

स्वर्गआदिफलजोपरमफलनहींहैतौफेरिवेदोंनेकिसलियेस्वर्गआदिफलके साधननानाप्रकारकेकर्मोकाविधानकियाहै तोकहतेहैं किसकामअधिकारीजनो केअर्थ वेदकर्मफलकाप्रतिपादनअर्थात्कहतेहैं परन्तुतुमनिष्कामहोउनिष्काम होनेकीउपाययहहै किनिर्द्वन्द्वअर्थात्सुखदुःखशीतउष्णहानिलाभजन्ममरणआ दिसेरहितहोउअर्थात्येसबसहो औरजोकहोकिकैसेइनकोसहैंतोकहतेहैं किधै र्यअवलम्बनकरिकेसहोऔरअप्राप्तवस्तुकेप्राप्तिकीइच्छाजोयोगहै औप्राप्तभईव स्तुकीरक्षाकरनाक्षेमहै इनदूनोकोपरित्यागकरिसावधानहोउक्योंकिसुखदुख मेआसक्तऔअप्राप्तवस्तुकीइच्छाप्राप्तकारक्षणइसमेंव्याकुलचित्तअसावधानजोहैं वेनिष्कामकैसेहोसकेंगेत्रैगुण्यजोत्रिगुणात्मकसंसार सोहैविषयकहेकथनीय जिनकोऐसेतोवेदहैं परतुमनिस्त्रैगुण्यकहेसांसारिकभावसुखदुःखादिसेरहित

CC-0. In Public Domain. Digitized by eGangotri

यावानर्थउदपानेसर्वतःसंप्लुतोदके तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः ४६

आनन्दगिरिकृतटीका।

दार्ढ्याशीतोष्णादिलक्षणौ निष्कामत्वेद्वन्द्वान्निर्गतत्वंशीतोष्णादिसहिष्णुत्वंहेतुमु क्त्वातत्रापिहेत्वपेक्षायांसदासद्गुणाश्रितत्वंहेतुमाह नित्येति योगक्षेमव्याहृत्ते तसोरजस्तमोभ्यामसंस्पृष्टेसत्त्वमात्रेसमाश्रितत्वमाशंक्यमित्याशंक्याह तथेति योग क्षेमयोर्जीवनहेतुतयापुरुषार्थसाधनत्वान्नियोगक्षेमोभवेति कुतोविधिरित्याह योगेति योगक्षेमप्रधानत्वंसर्वस्यस्वारसिकमिति ततोनिर्गमनमशक्यमित्याह आ त्मवानिति अप्रमादोमनसोविषयपारवश्यशून्यत्वं अथयथोक्तोपदेशस्यमुमुक्षुविषय त्वादर्जुनस्यमुमुक्षुत्वमिह विवक्षितमिति नेत्याह एषइति ४५ ईश्वरार्पणधिया

स्वामिकृतटीका।

ननुस्वर्गादिकंपरमंफलंयदिनभवतितर्हिकिमिति वेदैस्तत्साधनतयाकर्माणि विधीयन्तेतत्राह त्रैगुण्यविषयाइति त्रिगुणात्मकाःसकामायेऽधिकारिणस्तद्विष याःकर्मफलसम्बन्धप्रतिपादकावेदाःत्वन्तुनिस्त्रैगुण्योनिष्कामोभव तत्रोपायमा हनिर्द्वन्द्वःसुखदुःखशीतोष्णादियुगलानिद्वन्द्वानितद्रहितोभव तानिसहस्वेत्यर्थः क थमित्यतआह नित्यसत्त्वस्थःसन्धैर्य्यमवलंब्येत्यर्थः तथानिर्योगक्षेमःअप्राप्तस्वीका रोयोगःप्राप्तपालनंक्षेमस्तद्रहितःआत्मवानप्रमत्तः नहिद्वन्द्वाकुलस्ययोगक्षेमव्याप्त तस्यचप्रमादिनस्त्रैगुण्यातिक्रमःसम्भवतीति ४५ ननुवेदोक्तनानाफलत्यागेननि

भाषा अनुवाद।

होउ ४५ जोकहोकिबेदोक्तकर्मऔतत्तत्कामनाकेफलसकलत्यागकरिनिष्काम ईश्वराराधनकेअर्थजोव्यवसायात्मिकाबुद्धिसोकुबुद्धिहैइसअङ्गाकोनिवारनकरते ऊयेकहतेहैं किजिससेजलपानकियाजायसोउदपानअर्थात्बावडीकुआंतालति नमेजोअल्पजलहोतोसबकामसाधनकेअर्थ अर्थात्स्नानपानआदिकरनेकेअर्थत हांतहांभ्रमणकरिकेसबकामसिद्धहोयंगेप्रन्तुसंप्लुतोदकहे एकमहाकुण्डजि समेअगाधजलभराहै उसएकहीसेसबनिर्व्वाहहोसकतेहैंतैसेहीबेदोक्तजोकर्मके फलसोसबभगवद्भक्तियुक्तब्रह्मपरायणपुरुषकोभक्तिहीसेमिलतेहैं देखोयेस्वर्गआ दिसम्पूर्णउच्चसुखब्रह्मानन्दकेभीतरहीअन्तरभूतहैं इसब्रह्मानन्दकेकणामात्र आनन्दकोप्राप्तहोकेसर्वप्राणीजीतेरहतेहैं यहश्रुतिमेकहाहै इससेनिश्चयात्मि काजोबुद्धिसोईसुबुद्धिहै ४६

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

सर्व्वेषुवेदोक्तेषुकर्मसुयान्युक्ताव्यनन्तानिफलानितानिनापेक्षन्तेचेत्किमर्थंतानी श्वरायेत्यनुष्ठीयन्तइत्युच्यतेशृणु यावानिति यथालोकेकूपतडागाद्यनेकस्मिन्उद पानेपरिच्छिन्नोदकेयावान्यावत्परिमाणः स्नानपानादिरर्थःफलंप्रयोजनंससर्व्वो र्थःसर्व्वतःसं प्लुतोदकेपियोऽर्थःतावानेवसंपद्यतेतत्रान्तर्भवतीत्यर्थः एवंतावांस्ताव त्परिमाणएवसंपद्यतेसर्व्वेषुवेदेषुवेदोक्तेषुकर्म्मसुयोर्थोयत्कर्मफलंसोर्थोब्राह्मणस्य सन्यासिनःपरमार्थतत्त्वंविजानतोयोर्थोयत्विज्ञानफलं सर्व्वतःसंप्लुतोदकस्थानीयं तस्मिंस्तावानेवसम्पद्यतेतत्रैवान्तर्भवतीत्यर्थः यथाऽक्षतायविजितायाधरेयाःसंयन्त्ये वमेनंसर्व्वंतदभिसमेतियत्किञ्चित्प्रजाः साधुकुर्व्वन्तियस्तद्वेदयत्सवेदेतिश्रुतेःस र्व्वंकर्माखिलमितिचवक्ष्यति तस्मात्प्राक्ज्ञाननिष्ठाधिकारप्राप्तेःकर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपिकर्मकर्त्तव्यं ४६

आनन्दगिरिकृतटीका ।

स्वधर्मानुष्ठानेपिफलकामनाभावाद्वैफल्यं योगमार्गस्येति मन्वानःशङ्कते सर्व्वेष्वि ति कर्ममार्गस्यफलवत्वंप्रतिजानीते उच्यतइति किंतत्फलमित्युक्तेतद्विषयंश्लो कमवतारयति शृण्विति यथोदपानेकूपादौपरिच्छिन्नोदकेस्नानाचमनाद्यर्थो यावानुत्पद्यते सतावानपरिच्छिन्नेसर्व्वतःसंप्लुतोदकेसमुद्रेन्तर्भवतिपरिच्छिन्नो दकानामपरिच्छिन्नोदकांशत्वात्तथासर्व्वेषुवेदोक्तेषुकर्मसुयावानर्थोविषयविशेषोप रक्तःसुखविशेषोजायते सतावानात्मविदःस्वरूपभूतसुखेन्तर्भवति परिच्छिन्ना नन्दानामपरिच्छिन्नानन्दान्तर्भावाभ्युपगमादेतस्यैवानन्दस्यान्यानि भूतानि मात्रा मुपजीवन्तीति श्रुतेः तथाचापरिच्छिन्नात्मानन्दप्राप्तिपर्यवसायिनोयोगस्यमार्गस्य नास्तिवैफल्यमित्याह यावानिति उक्तमर्थमक्षरयोजनयाप्रकटयति यथेति उद कंपीयतेस्मिन्नितिव्युत्पत्त्या कूपादिपरिच्छिन्नोदकविषयत्वमुदपानशब्दस्यदर्शय ति कूपेति कूपादिगतस्याभिधेयस्यसमुद्रेऽन्तर्भावासम्भावात् कथमिदमित्यमि त्याशंक्यार्थशब्दस्यप्रयोजनविषयत्वं व्युत्पादयति फलमितियत्फलत्वेनलीयते तत् फलमित्युच्यते तत् कथंतड़ागादिकृतं स्नानपानादितथेत्याशंक्य तस्याल्पीयसोना शोपपत्तेरित्याह प्रयोजनमिति तड़ागादिप्रयुक्तप्रयोजनस्यसमुद्रनिमित्तप्रयोजन मात्रत्वमयुक्तमन्यस्यान्यात्मत्वानुपपत्तेरित्याशंक्याह तत्रेति घटाकाशादेरिवमहा काशेपरिच्छिन्नोदककार्यस्यापरिच्छिन्नोदककार्यान्तर्भावःसम्भवति तत्प्राप्तावित

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

तवचकर्मणीति कर्मण्येवाधिकारोनज्ञाननिष्ठायांतेनतवतवचकर्मकुर्व्वतो माफलेऽधिकारोऽस्तुकर्मफलतृष्णामाभूत् कदाचनकस्याञ्चिदप्यवस्थायामित्यर्थः यदाकर्मफलेतृष्णाते स्यात् तदाकर्मफलप्राप्तेर्हेतुःस्याःएवंमाकर्मफलहेतुर्भूःयदा हिकर्मफलतृष्णाप्रयुक्तः कर्मणिप्रवर्त्ततेतदाकर्मफलस्यैवजन्मनोहेतुर्भवेत्यदिकर्मफलंनेष्यतेकिंकर्मणा दुःखरूपेणेति माते नवसङ्गोस्त्वकर्मण्यकरणेप्रीतिर्माभूत् ४७

आनन्दगिरिकृतटीका।

रापेक्षाभावादित्यर्थः पूर्व्वार्द्धंदृष्टान्तभूतमेवंव्याख्यायदार्ष्टान्तिकमुत्तरार्द्धंव्याकरोति एवमित्यादिना कर्मसुयोऽर्थइत्युक्तंव्यनक्ति यत्कर्मफलमिति सोऽर्थोविजानतोब्राह्मणस्ययोऽर्थस्तावानेवसंपद्यतइति सम्बन्धः तद्देवस्पष्टयति विज्ञानेति तस्मिन्नन्तर्भवतीतिशेषः कथंकर्मफलंज्ञानफलेऽन्तर्भवतीत्यत्रप्रमाणमाह सर्व्वमिति यत् किमपिप्रजाःसाधुकर्मकुर्व्वन्तितत् सर्व्वंसपुरुषोभिसमेति प्राप्नोतियःपुरुषस्तद्वेदविजानाति यद्वस्तुसहैक्योवेदतद्वेद्यमिति श्रुतेरर्थःकर्मफलस्यसगुणज्ञानफलेन्तर्भावःसम्भवतीत्याशंक्याह सर्व्वमिति तर्हिज्ञाननिष्ठैवकर्त्तव्या तावतैवकर्मफलस्यलब्धतयाकर्मानुष्ठानानपेक्षणादित्याशंक्याह तस्मादिति योगमार्गस्यनिष्फलत्वाभावस्तच्छब्दार्थः ४९ तर्हिपरम्परयापुरुषार्थसाधनंयोगमार्गंपरित्यज्यसाक्षादेवपुरुषार्थकारणमात्मज्ञानंतदर्थमुपदेष्टव्यंतद्धैहि स्पृहयतिमनोमदीयमित्याशङ्क्याह तवचेति तर्हितत्फलाभिलाषोपिस्यादितिनेत्याह माफलेष्विति पूर्व्वोक्तमेवार्थं प्रपञ्चयति माकर्मेति फलाभिसन्धिरसम्भवेकर्माकरणमेवस्यादृध्यामी

स्वामिकृतटीका।

ष्कामतयेश्वराराधनविषयाव्यवसायात्मिकाबुद्धिःकुबुद्धिरेवेत्याशंक्याह यावानिति उदकंपीयतेयस्मिंस्तदुदपानंवापीकूपतडागादि तस्मिन्स्वल्पोदकेएकत्रकृत्स्नार्थस्यासम्भवात्तत्रपरिभ्रमणेनविभागज्ञो यावान्स्नानपानादिरर्थःप्रयोजनंभवतितावान्सर्व्वोऽप्यर्थःसर्व्वतःसंप्लुतोदकेमहाह्रदेएकत्रैवयथाभवति एवंयावान्सर्व्वेषुवेदेषुतत्तत् कर्म्मफलरूपोऽर्थस्तावान्सर्व्वोऽपिविजानतोव्यवसायात्मिकाबुद्धियुक्तस्यब्राह्मणस्यब्रह्मनिष्ठस्यभवत्येव ब्रह्मानन्देक्षुद्रानन्दामन्तर्भावात्एतस्यैवानन्दस्यान्यानिभूतानिमात्रामुपजीवन्तीतिश्रुतेः तस्मादियमेवबुद्धिःसुबुद्धिरित्यर्थः ४९

CC-0. In Public Domain. Digitized by eGangotri

कर्मण्येवाधिकारस्ते माफलेषुकदाचन माकर्मफलहेतुर्भूर्मातेसङ्गोस्त्वकर्मणि४७

आनन्दगिरिकृतटीका।

त्याशङ्क्याह मातइति ज्ञानानधिकारिणोपिकर्म्मत्यागप्रसक्तिंनिवारयतिकर्म्म ण्येवेति कर्म्मण्यवेत्येवकारार्थमाह नज्ञानेति नहितत्राब्राह्मणस्यापरिपक्वक षायस्यमुख्योधिकारःसिद्ध्यतीत्यर्थः फलैस्तर्हिसम्बन्धोदुर्वारःस्यादित्याह तवेति कर्मणेवाधिकारेसतीति सप्तम्यर्थः फलेष्वधिकाराभावंस्फोरयति कर्मेति कर्मा नुष्ठानात्प्रागूर्द्धंतत्कालेचेत्येतत् कदाचनेति विवक्षितमित्याह कस्याञ्चिदिति फलाभिसन्धानेदोषमाह यदेति एवंकर्मफलतृष्णाद्वारेणेत्यर्थः कर्मफलहेतुत्वंवि वृणोतियदाहीति तर्हिविफलत्वेशात्मकंकर्मनकर्त्तव्यमिति शङ्कामनुभाव्यदूषय ति यदीत्यादिना अकर्मणितेसङ्गोमाभूदित्युक्तमेवस्पष्टयति अकरणइति ४७

स्वामिकृतटीका।

तर्हि सर्व्वाणिकर्मफलानिपरमेश्वराराधनादेवभविष्यन्तीत्यभिसन्धायप्रवर्त्ते तकिंकर्मणेत्याशंक्यतद्वारयन्नाह कर्मण्येवेति तेतवतत्त्वज्ञानार्थिनःकर्मण्यवाधि कारस्तत्फलेषुबन्धहेतुषुअधिकारःकामोमास्तु ननुकर्मणिकृतेतत्फलंस्यादेव

भाषा अनुवाद।

जोऐसाकहतेहोकिसमस्तकर्मकाफलपरमेश्वरकीआराधनाकरनेहींसे होगा तोहमभगवतकाआराधनहींसबछोड़करकरैं औरकर्मकरनेसेक्याप्रयोज नहै इसशङ्काकोनिवारनकरतेहुयेसिद्धान्तकहतेहैं तत्त्वज्ञानकेअर्थीजोतुमसोतु मकोकर्ममात्र करनेकाअधिकारहै औरबन्धनकाहेतुभूत कर्मकेफलकीअभिला षकरि येअनेकप्रकारकीकामनाकरनेमेंकभीतुमाराअधिकारनहींहै जोकहो किकर्मकरनेसेउसकाफलअवश्यहीहोगा जैसेकिआहारकरनेसेतृप्ति होतीहीहै कहतेहैंकिसोहोय परउसकापुन्यपापनहींलगता जैसेअज्ञानबालकजोनीचकाअ न्नखायतोउसकाधर्मनजायक्योंकिधर्म्मनाशकेअर्थनहीं खाया सोतुमफलकेअर्थक र्ममे प्रवृत्तनहोउ निष्कामकर्म्मकरोजोकर्म्मफलकीतृष्णासेकर्म्मकरोगे तोकर्म्मफल प्राप्तिकेहेतु होउगेजवफलकीइच्छासेकर्म्ममेप्रवृत्तहोताहै तवफलऔजन्मदोनो काहेतुहोजाताहै नीचऊंचयोनिमेजनमिफलभोगताहै औरजोकर्म्मफलकोनचा हे तोदुखरूपकर्म्मकरनेसेक्याप्रयोजनहै ऐसीमतिभीतुमकोमति होय अर्थात् न करनेमेभीरुचिनहोय तात्पर्ययहकिसकामकर्म्मनकरोनिस्कामतोअवश्यहीकरो४७

CC-0. In Public Domain. Digitized by eGangotri

योगस्थःकुरुकर्माणिसङ्गंत्यक्त्वाधनञ्जय सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्यते ४८

शाङ्करभाष्यम् ।

यदिकर्मफलप्रयुक्तेननकर्त्तव्यंकर्मकथंतर्हि कर्त्तव्यमित्युच्यते योगस्थेति योगस्थःसन्कुरुकर्माणिकेवलमीश्वरार्थंतवापीश्वरोमेतुष्यत्वितिसङ्गंत्यक्त्वाधनञ्जयफलतृष्णाशून्येनक्रियमाणेकर्मणिसत्त्वशुद्धिजाज्ज्ञानप्राप्तिलक्षणासिद्धिः तद्विपर्य्ययजा असिद्धिस्तयोः सिद्ध्यसिद्ध्योरपिसमस्तुल्योभूत्वाकुरुकर्माणि कोसौयोगोयत्रस्थःकुर्वित्युक्तमिदमेवतत् सिद्ध्यसिद्ध्योःसमत्वंयोगउच्यते ४८

आनन्दगिरिकृतटीका

आसक्तिकरणेनयुक्ता चेत्तर्हिक्लेशात्मकंकर्मकिमुद्दिश्यकर्त्तव्यमित्याशङ्क्याम नूद्यश्लोकान्तरमवतारयति यदीत्यादिनावक्ष्यमाणयोगमुद्दिश्यतन्निष्ठोभूत्वा कर्माणिक्लेशात्मकान्यपिविहितत्वादनुष्ठेयानीत्याह योगस्थःसन्निति कर्मानुष्ठानस्थो

स्वामिकृतटीका ।

भोजनेकृतेऽग्निवदित्याशंक्याह मेति माकर्मफलहेतुर्भूःकर्मफलंप्रवृत्तिहेतुर्यस्य सतथाभूतोमाभूःकाम्यमानस्यैवस्वर्गादेर्नियोज्यविशेषणत्वेन फलत्वादकामितं फलंनस्यादितिभावःअतएवफलंवन्ध्यंभविष्यतीति तस्मात्भयादकर्मणिकर्माकरणेऽपितवसङ्गोनिष्ठामास्तु ४७

भाषा अनुवाद ।

तोफेरिक्याकरनाचाहियेसोकहतेहैं किहेधनञ्जयअर्जुनयोगकहेईश्वरमेंजोएकनिष्ठाउसीमेंस्थितहोय कर्मकरो औरहमीइसकेकर्त्ताहैंऐसाअभिमानत्यागकरि केवलईश्वरार्पणबुद्धिसेकर्मकरो अर्थात्निष्कामकर्मकाफलरूपतत्त्वज्ञानकीप्राप्तिअप्राप्तिमेंसमतापूर्वककहे समचित्तहो केवलईश्वरार्पणजानिकर्मअनुष्ठानकरो जिसहेतुअैसीहीसमताकोमाधुलोगयोगकहतेहैं क्योंकिइसीमेंचित्तस्थिरहोताहै यहसुबोधिनीकाअर्थहै ईश्वरार्पणशब्दकाभावअर्थयहहैकिहमअपनेहृदयमेंटिकेअन्तर्यामीरूपपरमेश्वरकेआधीनहैं यहीअन्तर्यामीहमारीवासनाकेअनुसारशुभअशुभजिसकर्ममेंहमकोलगावतेउसीकोहमउनकीप्रेरणासेकरतेहैं अैसेविचारतेकियेजुयेसबकर्मोंकोभगवतअर्पणकहतेहैं सोईपञ्चदशीमेंकहाहै जानामिधर्मंनचमेप्रवृत्तिर्जानाम्यधर्मंनचमेनिवृत्तिः त्वयाहृषीकेशहृदिस्थितेनयथानियुक्तोस्मितथाकरोमि ४८

CC-0. In Public Domain. Digitized by eGangotri

दूरेणह्यवरंकर्मबुद्धियोगाद्धनञ्जय बुद्धौशरणमन्विच्छकृपणाःफलहेतवः ४९

शाङ्करभाष्यम्।

यत्पुनःसमत्वबुद्धियुक्तमीश्वराराधनार्थंकर्मोक्तं एतस्मात् कर्मणःदूरेणेति दूरेणातिविप्रकर्षेणअत्यन्तमेवह्यवरमधमं निकृष्टंकर्मफलार्थिनाक्रियमाणंबुद्धियोगात् समत्वबुद्धियुक्तात् कर्मणोजन्ममरणादिहेतुत्वात् हेधनञ्जय यतएवंततः योगविषयायांबुद्धौतत्परिपाकजायां वा सांख्यबुद्धौशरणमाश्रयमभयप्राप्तिकारणमन्विच्छप्रार्थयस्वपरमार्थज्ञानशरणोभवेत्यर्थः यतोवरंकर्मकुर्व्वाणाःकृपणाःदी

आनन्दगिरिकृतटीका।

हेश्यंदर्शयति केवलमिति फलान्तरापेक्षामन्तरेणेश्वरार्थंतत्प्रसादनार्थमनुष्ठानमित्यर्थःतर्हिईश्वरसन्तोषोभिलाषगोचरीभूतो भावष्यति नेत्याह तत्रापीति ईश्वरप्रसादनार्थेकर्मानुष्ठानेस्थितेपीत्यर्थः सङ्गंत्यक्त्वाकुर्व्वितिपूर्व्वेणसम्बन्धः आकाङ्क्षितं पूरयित्वासिद्धिशब्दार्थमाहफलेति तद्विपर्य्ययजासक्त्वाशुद्धिजन्याज्ञानाप्राप्तिलक्षणेति यावत् कर्मानुतिष्ठतो योगमुद्दिश्यशेषतयाप्रकृतमाकाङ्क्षापूर्व्वकंप्रकटयति कोसावित्यादिना ४८

स्वामिकृतटीका।

किंतर्हियोगस्यइति योगःपरमेश्वरैकपरतातत्रस्थितःकर्माणिकुरुतथा सङ्गंकर्तृत्वाभिनिवेशं त्यक्त्वाकेवलमीश्वराश्रयेणैवकुरुतत्फलस्यज्ञानस्यापिसिद्धिसिद्धयोःसमोभूत्वाकेवलमीश्वरार्पणेनैवकुरुयतएवम्भूतं समत्वमेवयोगउच्यतेसद्विश्चित्तसमाधानरूपत्वात् ४८

भाषाअनुवाद

जितनेकाम्यकर्महैं सबकोनिकृष्ट कहेनकारेकहतेहैं व्यवसायात्मिकाबुद्धिकेद्वाराकियेजोकर्मयोगउनकानामबुद्धियोगऔरबहज्ञानसाधनकाउपायहै निष्कामबुद्धियोगकीअपेक्षासबकाम्यकर्मअत्यन्तअपकृष्टजोकाम्यकर्मऐसातुच्छठहरातो हेधनञ्जयबुद्धिशब्दवाच्यकहेज्ञान तिसकोआश्रयकरिनिष्कामकर्मयोगरूपभक्तियोगकाअनुष्ठानकरोचिन्तनीयपालनकरनेवालेईश्वरही कोबुद्धिकाआश्रयकरोकर्मफलकेअभिलाषीजोनरसोकृपणऔदीनहैं श्रुतिमेकहाहैं किहेगार्गि इसअक्षरस्वरूपब्रह्मकोनजानि जोसंसारलोकान्तर्गामीहोतेहैं वेईकृपणअर्थात् निकृष्टहैं इससेबुद्धिकहेज्ञानउसमेआश्रयलेउ यह भगवानअर्जुनसेकहा ४९

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

नाःफलहेतवःफलतृष्णाप्रयुक्ताःसन्तः योवाएतदक्षरं गार्ग्यविदित्वास्माल्लोकात् प्रैतिसकृपणइतिश्रुतेः ४९ समत्वबुद्धियुक्तःसन्स्वधर्ममनुतिष्ठन्यत् फलंप्राप्नोतितच्छृणु बुद्धीति बुद्धियुक्तःसमत्वकर्मविषययाबुद्ध्यायुक्तोबुद्धियुक्तःसज हाति परित्यजतिइहास्मिन्लोकेउभेसुकृतदुष्कृतेपुण्यपापेसत्त्वशुद्धिज्ञानप्राप्ति द्वारेणयतःतस्मात्समत्वबुद्धियोगायुज्यस्वघटस्वयोगोहिकर्मसुकौशलंस्वधर्माख्येषु

आनन्दगिरिकृतटीका ।

किमितियोगस्थेनतत्त्वज्ञानमुद्दिश्यकर्मकर्त्तव्यंफलाभिलाषेपितदनुष्ठानस्यसु लभत्वादित्याशङ्क्ययथोक्तयोगयुक्तंकर्मस्तुवन्ननन्तरश्लोकमुत्थापयति यत्पुनरिति अवरंकर्मबुद्धिसम्बन्धविरुद्धमिति शेषः बुद्धियुक्तस्यबुद्धियोगाधीनंप्रकर्षंसूचयति बुद्धीतिबु द्धिसम्बन्धसम्बन्धाभ्याकर्मणिप्रकर्षनिकर्षयोर्भावेकरणीयंनियच्छति बुद्धा वितियत्तुफलेच्छयापिकर्मानुष्ठानंसुकरमिति तत्राह कृपणेति निकृष्टंकर्म्मैवावि शिनष्टि फलार्थिनेनि कस्मात्प्रतियोगिनःसकाशादिदंनिकृष्टमित्याशङ्क्यप्रतीक मुपादायव्याचष्टे बुद्धीत्यादिना फलाभिलाषेणक्रियमाणस्यकर्मणोनिकृष्टत्वेहेतु माह जन्मेति समत्वबुद्धियुक्तात् कर्मणःतद्धीनस्यकर्मणोजन्मादिहेतुत्वेननिकृ ष्टत्वेफलितमाह यतइति योगविषयाबुद्धिःसमत्वबुद्धिः बुद्धिशब्दस्यार्थान्तरमाह तत्परिपाकेति तच्छब्देनसमत्वबुद्धिसमन्वितंकर्मगृह्यतेतस्यपरिपाकस्तत्फल भूतावुद्धिशुद्धिः शरणशब्दस्यपर्य्यायंगृहीत्वाविवक्षितमर्थमाह अभयेतिसप्तमी मविवक्षित्वाद्वितीयंपक्षंगृहीत्वावाक्यार्थमाह परमार्थेति तथाविधज्ञानशरणत्वे हेतुमाह यतइति फलहेतुत्वंविवृणोति फलेति तेनपरमार्थज्ञानशरणतैवयुक्ते ति शेषः परमार्थज्ञानबहिर्मुखानांकृपणत्वेश्रुतिंप्रमाणयति योवाइति अस्य लादिविशेषणमेतदित्युच्यते ४९

स्वामिकृतटीका ।

काम्यन्तुकर्मातिनिकृष्टमित्याह दूरेणेति बुद्ध्याव्यवसायात्मिकयाकृतः कर्मयोगोबुद्धियोगबुद्धिसाधनभूतोवा तस्मात्सकाशादन्यत् साधनभूतंकाम्यंकर्म दूरेणावरमत्यन्तमपकृष्टं हि यस्मादेवंतस्माद्बुद्धौज्ञानेशरणमाश्रयंकर्मयोगमन्वि च्छअनुतिष्ठ यद्वाबुद्धौशरणंत्रातारमीश्वरमाश्रयेत्यर्थःफलहेतवस्तु सकामाःनराः कृपणादीनाःयोवाएतदक्षरमविदित्वागार्ग्यस्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः ४९

CC-0. In Public Domain. Digitized by eGangotri

बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृतेतस्मात् योगायुज्यस्वयोगःकर्मसुकौशलं५०

शाङ्करभाष्यं।

कर्मसुवर्त्तमानस्ययासिद्ध्यसिद्ध्योः समत्वबुद्धिरीश्वरार्पितचेतस्त्वया तत् कौशलं कुशलभावस्तद्धिकौशलंयद्बन्धनस्वभावान्यपिकर्म्माणिसमत्वबुद्ध्यास्वभावात् निवर्त्तन्तेतस्मात्समत्वबुद्धियुक्तोभवत्वं ५०

आनन्दगिरिकृतटीका।

पूर्व्वोक्तसमत्वबुद्धियुक्तस्यस्वधर्मानुष्ठाने प्रवृत्तस्यकिंस्यादित्याशंक्याह समत्वेति बुद्धियुक्तःस्वधर्माख्यंकर्मानुतिष्ठन्निति शेषः बुद्धियोगस्यफलवत्त्वे फलितमाह तस्मादिति पूर्व्वार्द्धंव्याचष्टेबुद्धीत्यादिना ननुसमत्वबुद्धिमात्रान्न पुण्यपापनिवृत्तिर्युक्ता परमार्थदर्शनवतस्तन्निवृत्तिप्रसिद्धेरिति तत्राह सत्त्वेति उत्तरार्द्धंव्याचष्टे तस्मादिति स्वधर्ममनुतिष्ठतो यथोक्तयोगार्थं किमर्थंमनोयोजनीयमित्याशंक्याह योगोहीति तर्हियथोक्तयोगसामर्थ्यादेवदर्शितफलसिद्धेरनास्था स्वधर्मानुष्ठाने प्राप्तेत्याशंक्याह स्वधर्माख्येष्विति ईश्वरार्पितचेतस्त्वयाकर्मसु वर्त्तमानस्यानुष्ठाननिष्ठस्य यायथोक्ता बुद्धिस्तत्तेषुकौशलमिति योजना कर्मणांबन्धस्वभावत्वात् तदनुष्ठाने बन्धावहः स्यादित्याशंक्यकौशलमेव विवृणोति तद्धीति समत्व

स्वामिकृतटीका।

बुद्धियोगयुक्तस्यश्रेष्ठत्वाह बुद्धियुक्तइति सुकृतं स्वर्गादिप्रापकंदुष्कृतं निरयादिप्रापकंते उभेइहैवजन्मनिपरमेश्वरप्रसादेनत्यजति तस्मात्तदर्थायकर्मयोगायुज्यस्वघटस्वयतःकर्मसुयत् कौशलंबन्धकानापि तेषामीश्वराराधनेनमोक्षपरत्वसम्पादकचातुर्य्यंसएवयोग ५०

भाषा अनुवाद।

पूर्व्वजोकहाकिसुखदुखआदिसेसमानबुद्धि होकरस्वधर्मकोकरैतोबुद्धियोगयुक्त होनेसेक्याहोता है सोईबुद्धियोगकीश्रेष्ठताकहतेहैं किसुकृत जोपुण्यस्वर्गआदिकादेनहारऔदुःकृतजोपापनरकवासप्राप्तिकरनेकासाधनइनदोनोकोबुद्धियोगयुक्त पुरुषइसीजन्मसेभगवत् कीकृपासेपरित्यागकरतेहैं तिससेअर्जुनतुमबुद्धियोगरूप निष्कामकर्मकरोजिससेयोगकर्मकेबीचमेकौशलकहे चातुर्य्यहै अर्थात्सकलकर्मबन्धनहोनेकेकारणहैं तौभीईश्वरकीआराधनासे मुक्तिप्राप्ति करनाचातुर्यहै इसीकोयोगकहते सोबुद्धियोगयुक्त होउ ५०

CC-0. In Public Domain. Digitized by eGangotri

कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः जन्मबन्धविनिर्मुक्ताःपदंगच्छन्त्यनामयं ५१

शाङ्करभाष्यं

यस्मात् कर्मजमिति कर्मजंफलंत्यक्त्वेति व्यवहितेनसम्बन्धःइष्टानिष्टदेहप्राप्तिःकर्मजंफलंकर्मभ्योजातं बुद्धियुक्ताः समत्वबुद्धियुक्ताः सन्तोहि यस्मात् फलंत्यक्त्वापरित्यज्यमनीषिणो ज्ञानिनोभूत्वाजन्मबन्धविनिर्मुक्ताः जन्मैवबन्धोजन्मबन्धस्तेनविनिर्मुक्ताःजीवन्त एवजन्मबन्धात् विनिर्मुक्ताःसन्तः पदंपरमंविष्णोर्भोगाख्यं गच्छन्त्यनामयंसर्वोपद्रवरहितमित्यर्थः अथवाबुद्धियोगाद्वनञ्जयेत्यारभ्यपरमार्थदर्शनलक्षणैवसर्वतः संप्लुतोदकस्थानीया कर्मयोगजासत्त्वशुद्धिर्दर्शिता साद्धात् सुकृतदुष्कृतप्रहाणादिहेतुत्वश्रवणात् ५१

आनन्दगिरिकृतटीका।

बुद्धेरेवंफलत्वेस्थिते फलितमुपसंहरति तस्मादिति ५०

समत्वबुद्धियुक्तस्यसुकृतदुष्कृततत्फलपरित्यागेपिकथंमोक्षःस्यादित्याशंक्याह यस्मादिति समत्वबुद्ध्यायस्मात् कर्मानुष्ठीयमाणं दुरितादित्याजयति तस्मात्परम्परयाऽसौमुक्तिहेतुरित्यर्थः मनीषिणोंहि ज्ञानातिशयवन्तोबुद्धियुक्ताःसन्तः स्वधर्माख्यंकर्मानुतिष्ठन्तस्ततोजातं फलंदेहप्रदंते हित्वाजन्मलक्षणाद्बन्धाद्विनिर्मुक्तावैष्णवंपदंसर्वसंसारसंस्पर्शशून्यं प्राप्नुवन्तीति श्लोकोक्तमर्थं श्लोकयोजनयादर्शयति कर्मजमित्यादिना इष्टोदेहोदेवादिलक्षणोऽनिष्टोदेहस्तिर्यग्गादिलक्षणस्तत्प्राप्तिरेवकर्मणोजातं फलंतद्ययोक्तं बुद्धियुक्ताज्ञानिनोभूत्वा तद्वलादेवपरि

स्वामिकृतटीका।

कर्मणांमोक्षसाधनत्वप्रकारमाह कर्मजमिति कर्मजंफलंत्यक्त्वा केवलमीश्वराराधनार्थं कर्मकुर्वाणामनीषिणोज्ञानिनोभूत्वा जन्मरूपेणबन्धेनविनिर्मुक्ताः सन्तोऽनामयंसर्वोपद्रवरहितं विष्णोःपदंमोक्षाख्यंगच्छन्ति ५१

भाषा अनुवाद।

सुखदुखआदिमेसमतायुक्तभीभयेऔरसुकृत दुःकृत कर्मकेफलकोपरित्यागकियेभीअर्थात् निःकामकर्मकियेसेभीफेरिमोक्षकैसेहोगीइसशङ्कापरकर्मकोमोक्षकोसाधनताहै यहकहतेकिकर्मकेफलकीअभिलाषाछोडिकरिकेवलईश्वराराधनार्थकर्मकरतेऊयेबुद्धिमानमनुष्यज्ञानीहोकेजन्मरूपबन्धनसे छूटिकरिसकलउपद्रवसेरहितजोविष्णुपदजिसकोमोक्षकहते तिसकोसहजमेपावतेहैं५१

CC-0. In Public Domain. Digitized by eGangotri

यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति तदागन्तासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ५२

शाङ्करभाष्यम् ।

योगानुष्ठानजनितसत्त्वशुद्धिजाबुद्धिःकदाप्राप्स्यतइत्युच्यते यदेति यदा यस्मिन्कालेतेतवमोहकलिलंमोहात्मकमविवेकरूपं कालुष्यंयेनात्मानात्मविवेक बोधंकलुषीकृत्य विषयंप्रत्यन्तःकरणंप्रवर्त्ततेतत्तेतवबुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति अतिशुद्धभावमापत्स्यतइत्यर्थःतदातस्मिन्कालेगन्तासिप्राप्स्यसिनिर्वे

आनन्दगिरिकृतटीका ।

त्यज्यबन्धविनिर्मुक्तिपूर्वकंजीवन्मुक्ताः सन्तोविदेहकैवल्यभाजोभवन्तीत्यर्थः बुद्धियोगादित्यादौबुद्धिशब्दस्यसमत्वबुद्धिरर्थोव्याख्यातःसम्प्रति परम्परां परिहृत्यमुख्यदुष्कृतप्रहाणहेतुत्वस्यसमत्वबुद्धावसिद्धेः बुद्धिशब्दस्ययोग्यमर्थान्तरंकथयतिअथवेति अनवच्छिन्नवस्तुगोचरत्वेनानवच्छिन्नत्वं तस्याःसूचयन्बुद्ध्यन्तराद्विशेषंदर्शयति सर्व्वत इति असाधारणंनिमित्तं तस्यानिर्द्दिशति कर्म्मेति यथोक्तबुद्धिशब्दार्थत्वे हेतुमाह साक्षादिति जन्मबन्धविनिर्मोकादिरादिशब्दार्थः ५१

स्वामिकृतटीका ।

कदाहं तत् पदंप्राप्स्यामीत्यपेक्षायामाह यदेति द्वाभ्यां मोहोदेहादिष्वात्मबुद्धिस्तदेवकलिलंगहनंविदुरित्यभिधानकोषस्मृतेः ततश्चायमर्थःएवंपरमेश्वराराधनेक्रियमाणेयदातत्प्रसादेनतवबुद्धिर्देहाभिमानलक्षणं मोहमयंगहनंदुर्गंविशेषेणातितरिष्यतितदाश्रोतव्यस्यश्रुतस्यचार्थस्यनिर्वेदंवैराग्यं गन्तासिप्राप्स्यसितयोरनुपादेयत्वेनजिज्ञासांनकरिष्यसीत्यर्थः ५२

भाषा अनुवाद ।

जोकहोकिकवहमउसविष्णुपदकोपावेंगेतोदोश्लोकसेकहतेहैं किमोहजोदेहादिकमेआत्मबुद्धिअर्थात् आत्मास्वरूपजोकुछहै सोदेहहै ऐसाजोदृढ़विश्वाससोई दुरवगाह अज्ञानगहनवनहै सोजबइसपूर्वकथितरूपपरमेश्वरकीआराधना करनेसेभगवतकीकृपासेतुमारीबुद्धिदेह अभिमानरूपमोहमयअगम्यकाननकहे वनकेअच्छीतरहसेपारहोगीअर्थात् देहाभिमानछूटैगातबविष्णुपदरूपमुक्ति प्राप्तहोगीऔरजोअर्थसुनाचाहतेहो औरसुनिचुकेहौतिससबमेवैराग्यउत्पन्न होगीअर्थात् वहसबतुमकहेकिसीकामकानहीयहजानिसकोगेफेरिऔरउस बातकोनपूछोगे ५२

CC-0. In Public Domain. Digitized by eGangotri

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला
समाधावचलाबुद्धिस्तदा योगमवाप्स्यसि ५३

शाङ्करभाष्यं

द्वंवैराग्यंश्रोतव्यस्यश्रुतस्यचतद्श्रोतव्यंश्रुतञ्चतेनिष्फलंप्रतिपद्यतइत्यभिप्रायः५२

मोहकलिलात्ययद्वारेणलब्धात्मविवेकजप्रज्ञः कदाकर्म्मयोगजंफलंपरमार्थं योगमवाप्स्यामीति चेत्तच्छृणुश्रुतिविप्रतिपन्नेति श्रुतिविप्रतिपन्नाअनेकसाध्य साधनसम्बन्धप्रकाशनश्रुतिभिः श्रवणैर्व्विप्रतिपन्ना नानाप्रतिपन्ना अध्यात्मशास्त्रा तिरिक्तास्वस्थेत्यर्थः श्रुतिविप्रतिपन्ना विक्षिप्ता सतीते तववुद्धिर्यदास्मिन्काले स्थास्यति स्थिरीभूता भविष्यति निश्चलाविक्षेपचलनवर्ज्जिता सतीसमाधौसमाधी यतेचित्तमस्मिन्नितिसमाधिरात्मातस्मिन्नात्मन्येतदचलातत्रापिविकल्पवर्ज्जिते त्येतद्बुद्धिरन्तःकरणंतदातस्मिन्कालेयोगमवाप्स्यसिविवेकप्रज्ञांसमाधिंप्राप्स्यसि

आनन्दगिरिकृतटीका ।

यस्मिन्कर्मणिक्रियमाणेपरमार्थलक्षणाबुद्धिरुद्देश्यतयायुज्यतेतस्मात् कर्मणः सकाशादितरत् कर्मतथाविधोद्देश्यभूतबुद्धिसम्बन्धविधुरमतिशयेननिष्कृष्यतेतत स्वपरमार्थबुद्धिमुद्देश्यत्वेनाश्रित्य कर्मानुष्ठातव्यंपरिच्छिन्नफलान्तरमुद्दिश्यतद नुष्ठानेकार्पण्यप्रसङ्गात् किञ्चपरमार्थबुद्धिमुद्देश्यामाश्रित्य कर्मानुतिष्ठतः कर णशुद्धिद्वारापरमार्थदर्शनसिद्धौजीवत्येवदेहेसुकृतादि हित्वा मोक्षमधिगच्छति

स्वामिकृतटीका ।

ततश्चश्रुतीति श्रुतिभिर्नानालौकिकवैदिकार्थश्रवणैर्विप्रतिपन्नाद्वृतः पूर्वंविक्षिप्तासतीतववुद्धिर्यदासमाधौस्थास्यतिसमधीयतेचित्तमस्मिन्निति समाधिः परमेश्वरस्तस्मिन्निश्चलाविषयान्तरैरनाकृष्टा अतएवाचला अभ्यासपाटवेनतत्रैव स्थिराचसती तदायोगं योगफलं तत्त्वज्ञानमवाप्स्यसि ५३

भाषा अनुवाद ।

इसीप्रकार लौकिककहे लोककीवार्त्ता औवैदिककहे वेदकीवातैं अनेकप्र कारकीश्रवणकरतेकरते पूर्वंसेविक्षिप्तकहे भ्रमितजोतुमारीवुद्धिसोजबसमाधि मेंस्थिर होगीअर्थात् अच्छीतरह लगायाजायचित जिसमेंसोसमाधिकहे परमे श्वरतिसईश्वरमेंऔरविषयोंकोछोड़िअभ्यासकरते करते निपुणहोयजबअचल रूपसेंस्थिरहोगीतब तुमयोगकाफलजोतत्त्वज्ञानसोपावोगे ५३

अर्जुनउवाच स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव स्थितधीः
किं प्रभाषेत किमासीत व्रजेत किं ॥ ५४ ॥

आनन्दगिरिकृतटीका।

तथाचपरमार्थदर्शनलक्षणयोगार्थंमनोमारयितव्ययोगशब्दितं परमार्थदर्शनमुद्दे श्यतयाकर्मस्वनुतिष्ठतो नैपुण्यमिष्यते यदिचपरमार्थदर्शनमुद्दिश्यतदयुताःसन्तः समारभेरन्कर्माणितदातदनुष्ठानजतिनवुद्धिशुद्धाज्ञानिनोभूत्वाकर्मजंफलंपरि त्यज्यनिर्मुक्तबन्धनामुक्तिभाजोभवन्तीत्येवमस्मिन् पक्षेश्लोकद्वयाच्चराणिव्याख्या तव्यानि यथोक्तबुद्धिप्राप्तकालंप्रश्नपूर्वकंप्रकटयति योगेति श्रुतं श्रोतव्यंदृष्टं द्रष्टव्यमित्यादौफलाभिलाषप्रतिबन्धनोक्तावुद्धिरुद्देष्यतीत्याशंक्याह यदेति विवे कपरिपाकावस्थाकालशब्देनोच्यते कालुष्यस्यदोषपर्य्यवसायित्वं दर्शयन्विशि नष्टियेनेति तदनर्थरूपंकालुष्यंतवेत्यन्वयार्थंपुनर्वचनं बुद्धिशुद्धिफलस्यप्राप्तया वैराग्यप्राप्तिंदर्शयति तदेति अध्यात्मशास्त्रातिरिक्तंशास्त्रंश्रोतव्यादिशब्देनगृ ह्यते उक्तंवैराग्यमेवस्फोरयति श्रोतव्यमिति यथोक्तविवेकसिद्धौसर्वस्मिन्न नात्मविषयेनैष्फल्यंप्रतिभातीत्यर्थः ५२

बुद्धिशुद्धिविवेकवैराग्यसिद्धावपिपूर्व्वोक्तबुद्धिप्राप्तिकालोदर्शितो नभवतीति शङ्कतेमोहेति प्रागुक्तविवेकादियुक्तबुद्धेरात्मनिस्थैर्य्यावस्थायां प्रकृतबुद्धिसिद्धिरि त्याह तत्रेति पृष्टंकालविशेषाख्यंवस्तुतच्छब्देनगृह्यतेबुद्धेश्रुतिविप्रतिपन्न त्वंबिभ्रदयतिअनेकेति नानाश्रुतिविप्रतिपन्नत्वमेवसंक्षिपतिविक्षिप्तेति उक्तं हेतुद्वयमनुरुध्यवैराग्यपरिपाकावस्थाकालशब्दार्थः नैश्चल्यंचित्तेपराहित्यंअचल त्वंविकल्पशून्यत्वंचित्तेपोविपर्य्ययोविकल्पः संशयइति विवेकः विवेकद्वाराजाता प्र ज्ञाप्रागुक्तबुद्धिःसमाधिस्तत्रैवनिष्ठा ५३

भाषा अनुवाद।

पूर्वश्लोकमेंकहाजोआत्मतत्त्वज्ञानीकालक्षणसोजाननेकीइच्छाकरिअर्जुन पूछतेहैं किहेकेशवअनायासलभ्यसमाधिमेंस्थितजोनिश्चलबुद्धिसम्पन्नपुरुष उसकाक्याकालक्षणहैअर्थात् कैसेउसकोजानैंतात्पर्ययहहैकिकैसेलक्षणहोनेसेकि सआचरणसेस्थिरप्रज्ञहोताहैं सोईपूछतेकिज्ञानीकैसेबोलतेबैठतेऔरकैसे चलतेफिरतेरहतेहैं ५४

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच प्रजहाति यदा कामान् सर्व्वान् पार्थ मनोगतान्
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ५५

शाङ्करभाष्यं

प्रश्नबीजंप्रतिलभ्यार्जुनउवाचलब्धसमाधिप्रज्ञस्यलक्षणबुभुत्सयास्थितप्रज्ञ
स्येति स्थितप्रज्ञस्यस्थिताप्रतिष्ठिताहमस्मिपरंब्रह्मेतिप्रज्ञायस्यसस्थितप्रज्ञस्तस्य
स्थितप्रज्ञस्यकाभाषाकिंभाषणंवचनं कथमसौपरैर्भाष्यते समाधिस्थस्यसमाधौ
स्थितस्यकेनवस्थितधीःस्थितप्रज्ञस्वयंवाकिंप्रभाषेतकिमासीत व्रजेतकिंकिमा
षणंव्रजनंवातस्यकिंकथमित्यर्थः ५४

आनन्दगिरिकृतटीका ।

संन्यासिनोज्ञाननिष्ठातत्प्राप्तिवचनंप्रश्नबीजंदृष्ट्वतोऽर्जुनस्याभिप्रायमाह
लब्धेति लब्धासमाधावात्मनिसमाधानेनवाप्रज्ञापरमार्थदर्शनलक्षणायेनतस्येति
यावत् ननुतस्यभाषातत्कार्य्यानुरोधिनीभविष्यतिकिमित्यसौविजिज्ञास्यतेतत्रा
ह कथमिति ज्ञाननिष्ठस्यलक्षणविवक्षयाप्रश्नमवतारयन्तन्निष्ठासाधनबुभुत्सया
विघ्नितसमाधिस्थस्येति तस्यैवार्थक्रियांदृष्ट्वतिस्थितधीरिति ५४

प्रश्नाक्षराणिव्याख्यायवाक्यार्थमाहस्थितप्रज्ञस्येति प्रतिवचनमवतारयितुं

स्वामिकृतटीका ।

पूर्व्वश्लोकोक्तस्यात्मतत्त्वज्ञस्यलक्षणंजिज्ञासुरर्जुनउवाचस्थितप्रज्ञस्यकाभाषेति
स्वाभाविकेसमाधौस्थितस्यअतएवस्थिता निश्चलाप्रज्ञाबुद्धिर्यस्यतस्यभाषाकाभाष्य
तेअनयेतिभाषालक्षणमितियावत् सकेनलक्षणेनस्थितप्रज्ञउच्यत इत्यर्थःतथा
स्थितधीःकिंकथंभाषणमासनंव्रजनञ्चकुर्य्यादित्यर्थः ५४

भाषाअनुवाद ।

श्रीभगवानबोलेकिहेअर्जुनसुनोजिनकोसाधकलोगज्ञानसाधनकेनिमित्त
यत्नपूर्व्वकसाधनाकरतेहैं वेईसिद्धकेस्वाभाविककहेस्वभावसिद्धलक्षणहैंइससे
अवसिद्धकेलक्षणकहनेकेअनन्तरज्ञानकेसाधनअध्यायकीसमाप्तिपर्य्यन्तकहतेहैं
तिनमेंसेप्रथमदोश्लोकसेपहिलीप्रश्नकाउत्तरकरतेहैं किहेअर्जुनमुनिजनमनो
गतसकलकामनाजबअच्छीतरहसेत्यागकरतेहैं किअपनेपरमआनन्दरूपआ
त्मामेंजोरमैसोआत्मारामअर्थात् आपअपनेआत्मसुखमेंसन्तुष्टहोतेहैं तिससे
जबक्षुद्रविषयअभिलाषछोड़तेहैं तबउसीलक्षणसेमुनिस्थितप्रज्ञकहेजातेहैं ५५

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

स्थितप्रज्ञस्यलक्षणमनेनश्लोकेनदृष्ट्वातियोह्यादितएवसंन्यस्यकर्माणिज्ञा नयोगनिष्ठायांप्रवृत्तोयश्चकर्मयोगेनतयोः स्थितप्रज्ञस्येतिप्रजहातीत्यारभ्याध्यायप रिसमाप्तिपर्य्यन्तंस्थितप्रज्ञलक्षणं साधनञ्चोपदिश्यतेसर्व्ववेदार्थसंग्रहभूतत्वाद्गीताशास्त्रस्य तार्थलक्षणानियानितान्येवसाधनान्युपदिश्यन्तेयत्नसाध्यत्वात् यानियत्नसाध्यानि साधनानिलक्षणानिभवन्तितानिश्रीभगवानुवाचप्रजहातीति प्रजहातिप्रकर्षेण जहातिपरित्यजतियदायस्मिन्काले सर्व्वान् समस्तान्कामान्इच्छाभेदान्हेपार्थ मनोगतान्मनसिप्रविष्टान्हृदिप्रविष्टान्सर्व्वकामपरित्यागेतुष्टिकारणाभावाच्छ रीरधारणनिमित्तशेषेचसत्युन्मत्तप्रमत्तस्येवप्रवृत्तिः प्राप्तेत्यतउच्यतेआत्मनिएव प्रत्यगात्मस्वरूपएवात्मनासेनैववाह्यलाभनिरपेक्षस्तुष्टः परमार्थदर्शनान्यतरसला भेनान्यस्मादलंप्रत्ययवान्स्थितप्रज्ञः स्थिताप्रतिष्ठितात्मानात्मविवेकजाप्रज्ञायस्य स्थितप्रज्ञोविद्वांस्तदोच्यतेत्यक्तपुत्रवित्तलोकैषणः संन्यासीआत्मारामःआत्मक्रीडः स्थितप्रज्ञइत्यर्थः ५५

आनन्दगिरिकृतटीका।

पातनिकांकरोति योहीति किंशब्देनकर्मसंन्यासकारणीभूतविरागतासम्पत्तिः सूच्यतेआदितोब्रह्मचर्य्यावस्थायामितियावत् ज्ञानमेवयोगोब्रह्मात्मभावप्रापक त्वात्तस्मिन्निष्ठापरिसमाप्तिस्तस्यामित्यर्थः कर्म्मैवयोगस्तेनकर्म्माण्यसंन्यस्यतन्निष्ठा यामेवप्रवृत्तइति शेषः ननुतत्कथमेकेनवाक्येनार्थद्वयमुपदिश्यतेद्वैधार्थेवाक्यभेदा न्नचलक्षणमेवसाधनंकृतार्थलक्षणस्यतत्स्वरूपत्वेनफलत्वे साधनत्वानुपपत्तेरिति तत्राह सर्व्ववेदेति यद्यपिप्रकृतार्थस्यज्ञानिनोज्ञानलक्षणंतद्रूपेणफलत्वन्नसाध नत्वमधिगच्छति तथापिजिज्ञासोस्तदेवप्रयत्नसाध्यतयासाधनंसम्पद्यतेलक्षणञ्चा ब्रह्मज्ञानसामर्थ्यलभ्यमनूद्यतेनविधीयतेविदुषोः विधिनिषेधागोचरत्वात्तेनजिज्ञा सोःसाधनानुष्ठानायलक्षणानुवादादेकस्मिन्नेवसाधनानुष्ठानेतात्पर्य्यमित्यर्थः उक्ते र्थेभगवद्वाक्यमुत्थापयतियानीति लक्षणानिचब्रह्मज्ञानसामर्थ्यलभ्यान्ययत्नसाध्यानी तिशेषः स्थितप्रज्ञस्यकाभाषेतिप्रथमप्रश्नस्योत्तरमाह प्रजहातीति कामत्याग स्यप्रकर्षोवासनाराहित्यंकामानामात्मनिष्ठत्वं कैश्चिदिष्यतेतदयुक्तंतेषांमनोनिष्ठ त्वश्रुतेरित्याशयवानाह मनोगतानिति आत्मन्येवात्मनेत्याद्युत्तरभागनिरस्यन्नो द्यमनुवदतिसर्व्वकामेति तर्हिप्रवर्त्तकाभावाद्विदुषःसर्व्वप्रवृत्तेरुपशान्तिरिति

CC-0. In Public Domain. Digitized by eGangotri

दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते ५६

शाङ्करभाष्यं

किञ्चदुःखेष्विति दुःखेष्वाध्यात्मिकादिषुप्राप्तेषुनोद्विग्नंनप्रक्षुभितंदुःख प्राप्तौमनोयस्यसोयमनुद्विग्नमनाः तथासुखेषुप्राप्तेषुविगतास्पृहातृष्णायस्यनाग्नि रिवेन्धनाद्याधानेसुखान्यनुवर्द्धतेसविगतस्पृहः वीतरागभयक्रोधःरागश्चभयञ्चक्रो धश्चवीताविगतारागभयक्रोधायस्मात्सवीतरागभयक्रोधःस्थितधीःस्थितप्रज्ञोमुनिः संन्यासीतदुच्यते ५६

आनन्दगिरिकृतटीका

नेत्याह शरीरेति उन्मादवानुन्मत्तोविवेकविरहितबुद्धिभ्रमभागीप्रकर्षेणमदम नुभवन्विद्यमानमपिविवेकंनिरसयन्भ्रान्तवद्व्यवहरन्प्रमत्तइतिविभागः उत्त रार्द्धमवतार्य्यव्याकरोतिउच्यतइति आत्मन्येवेत्येवकारस्यात्मनेत्यत्रापिसम्बन्धो तयतिस्वेनैवेति बाह्यलाभनिरपेक्षत्वेनतुष्टिमेवस्पष्टयतिपरमार्थेति स्थितप्रज्ञ पदंविभजतेस्थितेति प्रज्ञाप्रतिबन्धकसर्वकामविरामावस्थातदेतिनिर्दिश्यते उ क्तमेवप्रपञ्चयतित्यक्तेति आत्मानंजिज्ञासमानोवैराग्यद्वारासर्वैषणात्यागात्मकं संन्यासमासाद्यश्रवणाद्याद्दत्तप्रातज्ञानं प्राप्यतस्मिन्नेवासक्त्याविषयबैमुख्येनतत् फलभूतांपरितुष्टिंतत्रैवप्रतिलभमानःस्थितप्रज्ञव्यपदेशभागित्यर्थः ५५

स्वामिकृतटीका ।

अत्रचयानिसाधकस्यज्ञानसाधनानितान्येवस्वाभाविकानिसिद्धस्यलक्षणानि अतःसिद्धस्यलक्षयलक्षणानिकथयन्नेवान्तरङ्गानिज्ञानसाधनान्याहयावदध्यायस माप्तितत्रप्रथमप्रश्नस्योत्तरमाह प्रजहातीतिद्वाभ्यां मनसिस्थितान्कामान्यदा प्रकर्षेणजहाति त्यागेहेतुमाह आत्मनीति आत्मन्येवस्वस्मिन्येवपरमानन्दस्व रूपआत्मनास्वयमेवतुष्टइत्यात्मारामः सन्यदाक्षुद्रविषयाभिलाषांस्त्यजतितदाते नलक्षणेनमुनिःस्थितप्रज्ञउच्यते ५५

भाषा अनुवाद ।

लक्षणकहनेकेवहानेसेजिज्ञासूअर्जुनकोऔरजोकरनाचाहियेसोउपदेश करतेहैं किजिनकामनदुखघडनेसेउद्विग्नअर्थात्घवडायनऔरसकलसुखकी स्पृहाकहेइच्छानकरैंसुखदुखमेंसमानरहैं सोवीतरागअर्थात्विषयप्रीतिरहित एवंभयऔक्रोधशून्यस्थितप्रज्ञकहेस्थिरबुद्धिमुनिकहावतेहैं ५६

CC-0. In Public Domain. Digitized by eGangotri

यःसर्व्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभं नाभिनन्दतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता५७

आनन्दगिरिकृतटीका।

लक्षणभेदानुवादद्वारावविविदिषोरेवकर्त्तव्यान्तरमुपदिश्यतिकिञ्चेति ज्वर शिरोरोगादिकृतानि दुःखान्याध्यात्मिकानिआदिशब्देनाधिभौतिकानिव्याघ्रसर्पा दिप्रयुक्तान्याधिदैविकानिचातिवातवर्षादिनिमित्तानिदुःखानिगृह्यन्तेतेषूपलब्धे ष्वपिनोद्विग्नंमनोयस्यसतथेतिसम्बन्धः नोद्विग्नमित्येतद्व्याचष्टेनप्रक्षुभितमिति दुःखानासुक्तानांप्राप्तौपरिहाराच्चमस्यतदनुभवपरिभावितं दुःखमुद्वेगस्तेनसहि तंमनोयस्यनभवति सतथेत्याहदुःखप्राप्ताविति मनोयस्यनोद्विग्नमितिपूर्व्वेणस म्बन्धःसुखान्यपिदुःखवत् त्रिविधानीतिमत्वातथेत्युक्तंतेषुप्राप्तेषुसत्सुतेभ्योविगता स्पृहात्रष्णायस्यसविगतस्पृहइतियोजना अत्रस्यहिप्राप्तानिसुखान्यनुविवर्द्धते तृष्णाविदुषस्तुनैवमित्यत्रवैधर्म्यदृष्टान्तमाहनाग्निरिवेति यथाहिदाह्यस्येन्धना देरभ्याधानेवह्निर्व्विवर्द्धतेतथाऽत्रस्यसुखान्युपगतान्यनुविवर्द्धमानापितृष्णाविदुषोन तान्यनुविवर्द्धते नहिवह्निरदाह्यमुपगतमपिदग्धुंविदग्धमधिगच्छतितेनजिज्ञासु नासुखदुःखयोस्तृष्णोद्वेगौनकर्त्तव्यावित्यर्थः रागादयस्तुतेनकर्त्तव्यानभवन्तीत्या ह वीतेति अनुभूताभिनिवेशेविषयेषुरञ्जनात्मकस्तृष्णाभेदोरागःपरेणापकृत स्यमात्रनेत्रादिविकारकारणंभयंक्रोधस्तुपरवशीकृत्यात्मानं स्वपरापकारप्रवृत्ति हेतुर्बुद्धिवृत्तिविशेषः ननुतेइतिमुनिरात्मविदित्यङ्गीकृत्याहसंन्यासीति सुखदुः खादिविषयतृष्णाद्वेरागादेश्चाभावावस्थातदेत्युच्यते ५६

स्वामिकृतटीका।

किञ्चदुःखेष्विति दुःखेषुप्राप्तेष्वपिअनुद्विग्नमक्षुभितंमनोयस्यसःसुखेषु विगतास्पृहायस्यसः तत्रहेतुर्वीताअपगतारागभयक्रोधायस्मात्तत्ररागःप्रीतिः समुनिःस्थितधीरुच्यते ५६

भाषा अनुवाद।

अर्जुननेपूछाथाकितत्त्वज्ञानीकिसप्रकारसेवातकहतेहैं उसप्रश्नकाउत्तर कहतेहैं किसमस्तपुत्रमित्रधनधामआदिकमेंजिसकोस्नेहकहेप्रीतिनहींहै औ रशुभप्राप्तिहोनेसेसुखीऔअशुभलाभहोनेसेदुःखितभीनहोयहै अर्थात्स्तुतिऔ निन्दामेरागद्वेषकहेप्रीतिविरोधहीनहै केवलउदासकेसमानअर्थात्उदासीनभ सेहोवातकरतेहैं उन्हीकीप्रज्ञाप्रतिष्ठितहैं वेईस्थिरबुद्धिमुनिहैं ५७

CC-0. In Public Domain. Digitized by eGangotri

यदा संहरते चायं कूर्मोऽङ्गानीव सर्व्वशः इन्द्रियाणीन्द्रियार्थेभ्य स्तस्य प्रज्ञा प्रतिष्ठिता ५८

शाङ्करभाष्यम् ।

किञ्चयःसर्व्वत्रेति योमुनिःसर्व्वत्रदेहजीवितादिष्वप्यनभिस्नेहःस्नेहवर्जितः तत्तत्प्राप्यशुभाशुभंतत्तच्छुभमशुभंवालब्धानाभिनन्दतिनद्वेष्टिशुभंप्राप्यनतुष्यति नहृष्यत्यशुभञ्चप्राप्यनद्वेष्टिइत्यर्थःतस्यैवंहर्षविषादवर्जितस्यविवेकजाप्रज्ञाप्रतिष्ठि ताभवति ५७

आनन्दगिरिकृतटीका ।

लक्षभेदानुवादद्वाराविविदिषोरेवकर्त्तव्यान्तरमुपदिशतिकिञ्चेति विवे कवतोविदुषोविवेकजन्याप्रज्ञाकथंप्रतिष्ठांप्रतिपद्यतामित्याशंक्याहयःसर्व्वत्रेति न नुदेहजीवनादौस्पृहाशुभाशुभप्राप्तौ हर्षविषादौविदुषोविविदिषोश्चावर्जनीयौइति प्रज्ञास्थैर्य्यासिद्धिस्तत्रार्हयोमुनिरिति तत्तदितिशोभनवत्त्वेनाशोभनवत्त्वेनवाप्र सिद्धत्वंप्रतिनिर्दिश्यते तदेवविभजतेशुभमिति विषयेष्वभिष्वङ्गाभावःशुभादि प्राप्तौहर्षाद्यभावश्चप्रज्ञास्थैर्य्यकारणमित्याह तस्येति ५७

जिज्ञासोरेवकर्त्तव्यान्तरंसूचयति किञ्चेतिइन्द्रियाणाविषयेभ्योवैमुख्यस्य प्रज्ञास्थैर्य्यकारणत्वादादौजिज्ञासुनातदनुष्ठेयमित्याहयदेति मुमुक्षुणामोक्षहे तुंप्रज्ञांप्रार्थयमानेनसर्वेभ्योविषयेभ्यः सर्व्वाणीन्द्रियाणिविमुखानिकर्त्तव्यानीति

स्वामिकृतटीका ।

कथंभाषेतेत्यस्योत्तरमाहयदिति यःसर्व्वत्रपुत्रमित्रादिष्वपिअनभिस्नेहः स्नेहशून्यःअतएववाधितानुवृत्तप्रातत्तच्छुभमनुकूलं प्राप्यनाभिनन्दतिनप्रशंसतिअ शुभंप्रतिकूलंप्राप्यनद्वेष्टिननिन्दतिकिन्तुकेवलमुदासीनएवभाषतेतस्यप्रज्ञाप्रतिष्ठि तेत्यर्थः ५७

भाषा अनुवाद ।

जिज्ञासूकोऔरक्याकरनायोग्यहैं सोसूचनकरावतेहैं किञ्चऔरपूर्व्वकथि तयोगीजवइन्द्रियार्थजोनानाप्रकारविषयतिनसेसर्वइन्द्रियों कोअनायासकहेसह जमेलौटारैअर्थात्फेरलेयइसमेदृष्टान्तकहतेकिजैसेकूर्मकहे कछुआअपनेमुख करचरणअनायाससमेटिलेतातैसेहीयोगीविषयोंसेइन्द्रियों कोजववटोरलेसकै तवउसप्रज्ञानीकीबुद्धिस्थिरहै ५८

CC-0. In Public Domain. Digitized by eGangotri

विषया विनिवर्त्तन्ते निराहारस्य देहिनः रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते ५९

शाङ्करभाष्यं।

किञ्चयदासंहरतइति यदासंहरतेसम्यक्उपसंहरतेचायंज्ञाननिष्ठायां प्रवृत्तोयतिः कुर्मोज्ञानीवसर्वशः यथाकूर्मोभयात्स्वन्यङ्गान्युपसंहरतिसर्वतःएवं ज्ञाननिष्ठइन्द्रियाणीन्द्रियार्थेभ्यःसर्वविषयेभ्यउपसंहरतेतस्यप्रज्ञाप्रतिष्ठितेत्युक्तार्थं वाक्यं ५८

आनन्दगिरिकृतटीका।

श्लोकव्याख्यानेनकथयतियदेत्यादिना उपसंहारःस्ववशत्वापादनंतस्यचसम्यक्त्वमतिदृढ़त्वं अयमितिप्रकृतस्थितप्रज्ञग्रहणंव्यावर्त्तयतिज्ञाननिष्ठायामिति इन्द्रियोपसंहारस्यप्रलयरूपत्वंव्यावर्त्तयशङ्कोचात्मकत्वंदृष्टान्तेनदर्शयतिकूर्मइति दृष्टान्तंव्याकरोतियथेति दार्ष्टान्तिकेयोजयन्ज्ञाननिष्ठापदन्तत्रप्रवर्त्तयति एवमिति इन्द्रियाणांविषयेभ्योवैमुखकरणंप्रज्ञास्थैर्यहेतुरित्युक्तमुपसंहरतितस्येति ५८

स्वामिकृतटीका।

किञ्चयदेति यदाचायंयोगोइन्द्रियार्थेभ्यःशब्दादिभ्यःसकाशादिन्द्रियाणि संहरतेप्रत्याहरतिअनायासेन संहारेदृष्टान्तमाहकूर्मइति अङ्गानिकरचरणादीनिकूर्मोयथास्वभावेनैवाकर्षतितद्वत् ५८

भाषाअनुवाद

जोकहोकिइन्द्रियोंकोविषयमेंअप्रवृत्तिहोनायहस्थितप्रज्ञकालक्षणनहोसकेगाक्योंकिजडआतुरऔउपवासकरनेवालेमनुष्योंकोईइन्द्रीभीविषयमेंनहीं प्रवृत्तहोतीहै तोइनसेऔज्ञानीसेफेरिक्याविशेषकहेअन्तरहै इनकोभीस्थिरबुद्धिमुनिकहनाउचितहै तिसपरकहतेहैं किहांआहारनकरनेसेनिराहारपुरुषकोयद्यपिविषययोंकाइन्द्रियद्वाराज्ञाननहींहोतासत्यहै परतौभीउसकीविषयोंसेअभिलाषानहींजातीअर्थात्विषयकोवासनामनमेंवनीरहतीहै औरस्थितप्रज्ञपुरुषकेपरमात्मदर्शनहेतुसेविषयकीलालसानिवृत्तहोजातीअच्छीतरहसेअभिलाषसहितविषयवासनानाशहोतीहै औरजड़आतुरजैसेविषयोंकेअज्ञतैसेआत्माकोभीनहींजानतेतोवेस्थिरबुद्धिकैसेहोसकतेहैं औररसकहेरागजोप्रीतिसोस्थितप्रज्ञाकीआपसेआपनिवृत्तहोतीहैं ५९

शाङ्करभाष्यं

तत्रविषयाननाहरतआतुरस्यापिइन्द्रियाणिनिवर्त्तन्तेकूर्मीङ्गानीवसंह्रियते नतुतद्विषयोरागः सकथंसंह्रियतइत्युच्यतेविषयाइति यद्यपिविषयोपलक्षितानि विषयशब्दवाच्यतीन्द्रियाण्यथवाविषयाएवनिराहारस्य अनाह्रियमाणविषयस्य देहिनःकष्टेनतपसिस्थितस्यमूर्खस्यापिनिवर्त्तन्तेदेहिनोदेहवतः रसवर्ज्जंरसोरागो विषयेषुयःतंवर्जयित्वारसशब्दोरागेप्रसिद्धःस्वच्छन्दतः स्वरसेनप्रवृत्तौरसिको रसज्ञइत्यादिदर्शनात् सोपिरसोरञ्जनरूपसूक्ष्मऽस्ययतःपरंपरमार्थतत्वंब्रह्मदृष्ट्वोपलभ्याहमेवतदितिवर्त्तमानस्यनिवर्त्ततेनिर्वीजंविषयविज्ञानंसंपद्यतेइत्यर्थः नासतिसम्यग्दर्शनेरसस्यउच्छेदस्तस्मात्सम्यग्दर्शनात्मिकायाः स्थैर्यंकर्त्तव्यमित्यभिप्रायः ५९

आन्दगिरिकृतटीका।

इन्द्रियाणांविषयेभ्योवैमुख्यैपितद्विषयारागानुवृत्तौकथंप्रज्ञालाभःस्यादिति शङ्कतेतत्रेति व्यवहारभूमिःसप्तम्यर्थःविषमाननाहवतस्तदुपभोगविमुखस्येत्यर्थः रागश्चेन्नोपसंह्रियतेनतर्हिप्रज्ञालाभःसम्भवतिरागस्यतत्परिपान्थत्वादिति मत्वा हसकथमिति रागनिवृत्त्युपायमुपदिशन्नुत्तरमाह उच्यतइति विषयोपभोग पराङ्मुखस्यकुतोविषयपरावृत्तिस्तत्परावृत्तिश्चाप्रस्तुतेत्याशङ्क्याहयद्यपीति निराहारस्येत्यस्यव्याख्यानमनाह्रियमानविषयस्येति योहिविषयप्रवणोनभवतितस्यात्यान्तिकेतपसिक्लेशात्मकेस्यवस्थितस्यविद्याहीनस्यापीन्द्रियाणिविषयेभ्यः सकाशाद्यद्यपिसंह्रियन्तेतथापिरागोवशिष्यतेसचतत्त्वज्ञानादच्छिद्यतइत्यर्थः रसशब्दस्यमाधुर्य्यादिषड्विधरसविषयत्वंनिषेधतिरसशब्दइति वृद्धप्रयोगमन्तरेणकथं प्रसिद्धिरित्याशंक्याह स्वरसेनेति स्वेच्छयेतियावत्रसिकःस्वेच्छावश्यवर्त्तीरसज्ञोविवक्षितापेक्षितज्ञातेत्यर्थः कथंतर्हितस्यनिवृत्तिस्तत्राहसोपीति दृष्टिमेवोपलब्धिपर्य्यायांस्पष्टयतिअहमेवेति रागापगमेसिद्धमर्थमाह निर्व्वीजमिति ननु सम्यग्ज्ञानमन्तरेणरागोनापगच्छतिचेत्तदपगमादृतेरागवतः सम्यग्ज्ञानोदयायोगादितरेतराश्रयतेतिनेत्याहनासतीति इन्द्रियाणांविषयपारवश्येविवेकद्वारा परिहृतेस्थूलोरागोव्यावर्त्ततेततश्चसम्यग्ज्ञानोत्पत्त्यासूक्ष्मस्यापिरागस्यसर्व्वात्मनानिवृत्त्युपपत्तेनेतरेतराश्रयतेत्यर्थः प्रज्ञास्थैर्यस्यसफलत्वेस्थितेफलितमाह तस्मादिति ५९

CC-0. In Public Domain. Digitized by eGangotri

यततोह्यपिकौन्तेयपुरुषस्यविपश्चितः इन्द्रियाणिप्रमाथीनिहरन्तिप्रसभंमनः ६०

शाङ्करभाष्यम् ।

सम्यग्दर्शनलक्षणंप्रज्ञास्थैर्यंचिकीर्षताआदाविन्द्रियाणिस्ववशेस्थापयितव्यानियस्मात्तदनवस्थापनेदोषमाहयततइति यततःप्रयत्नंकुर्व्वतोपिह्यस्मात् अपिकौन्तेयपुरुषस्यविपश्चितोमेधाविनोपीतिव्यवहितेनसम्बन्धः इन्द्रियाणिप्रमाथीनिप्रमथनशीलानिविषयाभिमुखं हिपुरुषंविक्षोभयन्त्याकुलीकुर्व्वन्त्याकुलीकृत्यचहरन्तिप्रसभंप्रसह्यप्रकाशमेवपश्यतोविवेकविज्ञानयुक्तंमनोयतस्तस्मात् ६०

तानीति तानिसर्व्वाणिसंयम्यसंयमनंवशीकरणंकृत्वायुक्तंसमाहितसन्नासी

स्वामिकृतटीका ।

ननुनेन्द्रियाणांविषयेप्रवृत्तिःस्थितप्रज्ञस्यलक्षणंभवितुमर्हतिजडानामातुराणामुपवासपराणाञ्चविषयेष्वप्रवृत्तेरविशेषात्तत्राहविषयाइति इन्द्रियैर्व्विषयाणामाहरणंग्रहणमाहारः निराहारस्येन्द्रियैर्व्विषयग्रहणमकुर्व्वतोदेहिनोदेहाभिमानिनोऽज्ञस्यविषयाःप्रायशोविनिवर्त्तन्तेतदनुभवोनिवर्त्ततइत्यर्थः किन्तुरसोरागोऽभिलाषस्तद्वर्जंअभिलाषश्चननिवर्त्ततइत्यर्थः रसोऽपिरागोऽपिपरंपरमात्मानंदृष्ट्वास्थितप्रज्ञस्यस्वतोनिवर्त्ततेनश्यतीत्यर्थः यद्वानिराहारस्यउपवासपरस्यविषयाःप्रायशोनिवर्त्तन्तेक्षुधासन्तप्तस्यशब्दस्पर्शाद्यपेक्षाभावात् किन्तुरसवर्जंरसापेक्षातुननिवर्त्ततइत्यर्थःशेषंसमानं ५९

इन्द्रियसंयमंविनास्थितप्रज्ञतानसम्भवतिअतःसाधकावस्थायोतत्रमहानप्रयत्नःकर्त्तव्यइत्याहयततोऽपीतिद्वाभ्यां यततोमोक्षार्थंप्रयतमानस्यविपश्चितोविवेकिनोऽपिमनइन्द्रियाणिप्रसभंबलाद्धरन्तियतः प्रमाथीनिप्रमथनशीलानिक्षोभकाणीत्यर्थः ६०

भाषा अनुवाद ।

इन्द्रियोंकासंयमकियेविनाअर्थात्विषयोंसेरोकनेकेविनास्थितप्रज्ञकहे परमात्मामेंअचलबुद्धिहोतीनहीं इससेप्रथमसाधनकीअवस्थामेंइन्द्रीयोंकोस्वाधीनकरनेकेअर्थबडायत्नकरनाचहियेयहकहतेहैं किहेकौन्तेयकुन्तीनन्दनअर्जुनमोक्षकेहेतुप्रयत्नकरतेहुयेविवेकीविचारवानज्ञानीपुरुषकेभीमोनकयेप्रबलप्रमाथीकहेक्षोभकरनेवालीइन्द्रीहरणकरलेतीहैं ६०

CC-0. In Public Domain. Digitized by eGangotri

तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१

शाङ्करभाष्यं

मत्परोऽयंवासुदेवः सर्वप्रत्यगात्मापरोयस्यसमत्परःनान्योऽहंतस्मादित्यासीतेत्यर्थः एवमासीनस्ययतेर्वशेहियस्येन्द्रियाणिवर्त्तन्तेअभ्यासवशात्तस्यप्रज्ञाप्रतिष्ठिता ६१

आनन्दगिरिकृतटीका।

श्लोकान्तरमवतारयतिसम्यग्दर्शनेति मनसःस्ववश्यत्वादेवप्रज्ञस्थैर्यसम्भवेकिमर्थमिन्द्रियाणांस्ववश्यत्वापादनमित्याशंक्याह ननुविवेकवतोविषयदोषदर्शिनोविषयेभ्यः स्वयमेवेन्द्रियाणिव्यावर्त्तन्तेकिंतत्रप्रज्ञास्थैर्य्यचिकीर्षताकर्त्तव्यमितितत्राहयततोहीति विषयेभ्योदोषदर्शनमेवप्रयत्नःहिशब्दस्ययस्मादर्थस्यसमाप्तौसम्बन्धंवक्ष्यति अपिशब्दस्यप्रयत्नंकुर्वतोपीतिसम्बन्धंगृहीत्वासम्बन्धान्तरमाहपुरुषस्येति प्रमथनशीलत्वंप्रकटयतिविषयेतिविक्षोभस्याकुलीकरणस्यफलमाहआकुलीकृत्येति प्रकाशमेवेत्युक्तंविशदयतिपश्यतइति विपश्चितोविदुषोपिप्रकाशमेवप्रकाशशब्दितविवेकाख्यविज्ञानं युक्तमेवमनोहरन्तीन्द्रियाणीतिसम्बन्धः हिशब्दार्थमनुवदतस्मादिन्द्रियाणिस्ववशेस्थापयितव्यानीति पूर्वेणसम्बन्धमभिसन्धायाहयतस्तस्मादिति ६०

इन्द्रियाणांस्ववश्यत्वसम्पादनानन्तरंकर्त्तव्यमर्थमाह तानीति एवमासीनस्य किंस्यादितितदाह्यवशेहीति समाहितस्यविज्ञेयविकलस्यकथमासनमित्यपेक्षायामाहमत्परइति परापरभेदशङ्कामपाकृत्यासनमेवस्फोरयतिनान्योऽहमिति

स्वामिकृतटीका।

यस्मादेवंतस्मात्तानीति युक्तोयोगीतानीन्द्रियाणिसंयम्यमत्परःसंन्यासीत यस्यवशेवशवर्त्तिनीन्द्रियाणिएतेनचकथमासीतेतिप्रश्नस्यवशीकृतेन्द्रियः संन्यासीतेत्युत्तरंभवति ६१

भाषा अनुवाद।

इन्द्रियोंकोस्वाधीनकरनायहकहिकरिफेरिव्याकरनाउचितहै सोकहतेहैं कितोसवइन्द्रियोंकासंयमकरिकेयुक्तयोगीमेरेमेतत्परहोरहे अर्थात्आत्मामेनिष्ठाकरिवैठैयहकहिज्ञानीकैसेस्थितिकरतेइसप्रश्नकाउत्तरदियाअर्थात्जिसकेइन्द्रीगणवशहैंउसकीप्रज्ञाकहेबुद्धिप्रतिष्ठितहै ६१

CC-0. In Public Domain. Digitized by eGangotri

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते ६२

शाङ्करभाष्यम्।

अथेदानींपराभविष्यतसर्व्वानर्थमूलमिदमुच्यतेध्यायतइति ध्यायतश्चिन्तयतोविषयान्शब्दादिविषयविशेषान्आलोचयतःपुंसः पुरुषस्यसङ्गआसक्तिःप्रीतिःतेषुविषयेषूपजायतेउत्पद्यतेसङ्गात् प्रीतेःसंजायतेसमुत्पद्यतेकामःतृष्णातस्मात्कामात्कुतश्चित्प्रतिहतात्क्रोधोभिजायते ६२

आनन्दगिरिकृतटीका।

उत्तरार्द्धंव्याकरोतिएवमिति हिशब्दार्थंस्फुटयतिअभ्यासेति परस्मादात्मनोनाहमन्योस्मीतिप्रागुक्तानुसन्धानस्यादरेण नैरन्तर्य्यदीर्घकालानुष्ठानसामर्थ्यादित्यर्थःअथवाविषयेषुदोषदर्शनाभ्याससामर्थ्यादिन्द्रियाणिसंयतानीत्यर्थः ६१

समनन्तरंश्लोकद्वयतात्पर्यमाहअथेति पुरुषार्थोपायोपदेशानन्तर्यमथशब्दार्थ तन्निष्ठत्वराहित्यावस्थांदर्शयतिइदानीमिति पराभविष्यतोमहान्तमनर्थंगमिष्यतोविवेकविज्ञानविहीनस्येतियावत् सर्व्वानर्थमूलंविषयाभिध्यानंतस्यतथात्वमनुभवसिद्धमितिवक्तुमिदमित्युक्तं विषयेषुविशेषत्वमारोपितरमणीयत्वंप्रीतिरासक्तिरितिसाधारणासक्तिमात्रंगृह्यते तृष्णेत्युद्रिक्ताशक्तिरुक्ताप्रतिबन्धेनप्रणाशेनवाप्रतिहतिः ६२

स्वामिकृतटीका।

वाह्येन्द्रियसंयमाभावेदोषमुक्त्वामनःसंयमाभावेदोषमाहध्यायतीति द्वाभ्यांगुणवुद्ध्याविषयान्ध्यायतः पुंसस्तेषुसङ्गासक्तिर्भवतिआसक्त्याचतेष्वधिकःकामोभवतिकामाच्चकेनचित्प्रतिहतात्क्रोधोभवति ६२

भाषा अनुवाद।

वाह्यइन्द्रियकहेवाहरकोइन्द्रियोंकेनवशरहनेमेजोदोषसोदेखायअवअवशीभूतजोमनतिसकादोषदेखावतेहैंकिवुद्धिकेद्वारारूपादिकवियोंकोध्यानकरतेहुयेपुरुषकामनउनविषयोंमेआसक्तहोताअर्थात्विषयसङ्गहोताहै औरसङ्गसेअधिकअधिककामनाउत्पन्नहोतीहैं फेरिजोकामनाकिसीप्रकारसेनष्टहोंयतोक्रोधप्रगटहोताहै अर्थात्कामसेक्रोधहोयहै ६२

CC-0. In Public Domain. Digitized by eGangotri

क्रोधाद्भवतिसंमोहःसम्मोहात्स्मृतिविभ्रमःस्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति६३

शाङ्करभाष्यं

क्रोधाद्भवतिसंमोहःसंमोहोऽविवेकःकार्य्याकार्य्यविषयविभ्रमोभवतीतिसंबध्यतेक्रुद्धोहिसंमूढः सन्गुरुमप्याक्रोशतिसंमोहात्स्मृतिविभ्रमःशास्त्राचार्य्योपदेशाहितसंस्कारजनितायाःश्रुतेःस्याद्विभ्रमोभ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौअनुत्पत्तिस्ततःस्मृतिभ्रंशात्तुबुद्धेर्नाशः कार्य्याकार्यविषयविवेकायोग्यताअन्तःकरणस्यबुद्धेर्नाशउच्यतेबुद्धिनाशात्प्रणश्यतितावदेवहिपुरुषोयावदन्तःकरणंतदीयंकार्य्याकार्यविषयविवेकयोग्यंतद्योग्यत्वेनष्टएवपुरुषोभवत्यतः तस्यान्तःकरणस्यबुद्धेर्नाशात्प्रणश्यतिपुरुषार्थायोग्योभवतीत्यर्थः ६३

आनन्दगिरिकृतटीका।

क्रोधस्यसंमोहहेतुमनुभवेनदृढ़यतिक्रुद्धोहीति आक्रोशत्यविच्छिपतितदयोग्यत्वमपेरर्थः संमोहकार्यंकथयतिसंमोहादिति स्मृतेर्निमित्तनिवेदनद्वारास्वरूपंनिरूपयतिशास्त्रेति क्षणिकत्वादेवतस्याःस्वतोनाशसम्भवान्नसंमोहाधीनत्वंतस्येत्याशङ्क्याहस्मृतीति स्मृतिभ्रंशेपिकथंबुद्धिनाशःस्वरूपतःसिध्यतितत्राहकार्येति ननुपुरुषस्यनित्यसिद्धस्यबुद्धिनाशेपिप्रणाशोनप्रकल्प्यतेतत्राह तावदेवेति कार्य्याकार्यविवेचनयोग्यान्तःकारणाभावेसतोपि पुरुषस्यकरणाभावादप्रागतत्त्वविवेकविवक्षयानष्टत्वव्यपदेशः तदेतदाहपुरुषार्थेति ६३

स्वामिकृतटीका।

किञ्चक्रोधादिति क्रोधात्सम्मोहः कार्य्याकार्य्यविवेकाभावःततःशास्त्राचार्य्योपदिष्टार्थस्मृतेर्विभ्रंशोविचलनंभ्रंशः ततोबुद्धेश्चेतनायनाशःदृक्षादिष्विवाभिभवःनतःप्रणश्यतिमृततुल्योभवति ६३

भाषा अनुवाद।

औरक्रोधमोहकाहेतुहै इसकोदृढ़करतेहैं किक्रोधसेअर्थात्उसकेद्वारामोहहोताहै अर्थात्काजअकाजकाविचारनहींरहताफेरिसंमोहहोनेसेशास्त्रऔराचार्य्यतथागुरुकादियाजोउपदेशकहे शिक्षाअर्थसोविचलितअर्थात्भूलजायहै औरस्मृतिभ्रंसहोनेसेकहेउपदेशभूलजानेसेबुद्धिकोचेतनाचलीजातीहै अर्थात्बुद्धिनष्टहोतीहै बुद्धिनाशहोनेसेजड़केसमानहोयफेरिवहमनुष्यमुर्दकीतुल्यहोकरनष्टहोताहै ६३

CC-0. In Public Domain. Digitized by eGangotri

रागद्वेषविमुक्तैस्तु विषयानिन्द्रियैश्चरन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति ६४

शाङ्करभाष्यं

सर्व्वानर्थस्यमूलमुक्तंविषयाभिध्यानमथेदानींमोक्षकारणमिदमुच्यतेरागद्वेषेति रागद्वेषविमुक्तैःरागश्चद्वेषश्चरागद्वेषौतत्पुरःसराहीन्द्रियाणांप्रवृत्तिःस्वाभाविकीतत्रयोसमुच्चुर्भवतिसताभ्यांविमुक्तैः श्रोत्रादिभिरिन्द्रियैर्व्विषयानवर्ज्जनीयांश्चरन्नुपलभमानः आत्मवश्यैरात्मनोवश्यानिवशीभूतानितैरात्मवश्यैर्व्विधेयात्मेच्छातो विधेयआत्मान्तःकरणंयस्यसोयं प्रसादमधिगच्छतिप्रसादःप्रसन्नतास्वास्थ्यं ६४

आनन्दगिरिकृतटीका।

विषयाणांस्मरणमपिचेदनर्थकारणंसुतरांतर्हिभोगस्तेनजीवनार्थंभुञ्जानो विषयाननर्थंकथंनप्रतिपद्यतइत्याशंक्य वृत्तानुवादपूर्व्वकमुत्तरश्लोकतात्पर्य्यमाहसर्व्वानर्थस्येति अनर्थमूलकथनानन्तर्य्यमथशब्दार्थः परिहर्त्तव्येनिर्णीतेसतितत्परिहारोपायजिज्ञासांदर्शयतिइदानीमिति रागद्वेषपूर्व्विकाप्रवृत्तिरित्यत्रानुभवदर्शनार्थोहिशब्दःशास्त्रीयप्रवृत्तिव्यामेधार्थंस्वाभाविकीत्युक्तंतत्रेत्यधिकृतानधिकृत्यप्रयोगोवर्जनीयानशनपानादीन्देहस्थितिहेतूनितियावत् इन्द्रियाणांविषयेषुप्रवृत्तिश्चेन्नियमानुपपत्तेरवर्जनीयेष्वपिसास्यादित्याशंक्याह आत्मेति अन्तः

भाषा अनुवाद।

जोकहोकिचिरकालसेविषयमेंनिमग्नस्वभावकहेविषयमेआसक्तइन्द्रिगणकाविषयसेरोकनाजोअसाध्यअतिकठिनहै तोपूर्व्वउक्तदोषनिवारणकैसेहोसकैगाइससेस्थितप्रज्ञाहोनाभीअसम्भवअतिदुर्घटहै इसशङ्कापरकहतेहैं किराग कहेप्रीतिऔद्वेषजोविरोधतिनसेरहितहोकेअर्थात् इनकोछोड़केऔअभिमानत्यागकरिकेसबइन्द्रीयोंकेद्वाराविषयोंकाभोगकरनेसेभीशान्तिप्राप्तिहोतीहै तोरागद्वेषरहितकैसेहोयसोकहतेहैं किमनकेआधीनकहेवशीभूतसबइन्द्रियहैंऔरइन्द्रियवशकारीमनकोजोमनुष्यअपनेवशकरराखैहै उसकेफेरिऔंरागद्वेषादिकरहतेनहोंइसकहनेसेअर्जुनकोचौथीप्रश्नजोहै किस्थितप्रज्ञकैसेगमनकरैहै उसकाउत्तरदियाकिस्वाधीनइन्द्रियगणराखिविषयोंमेगमनकरैअर्थात् इन्द्रीजित्होविषयभोगकरैजिसहेतुआत्मवशइन्द्रियद्वाराविषयभोगकरताहुआआत्मासुखीरहताहैं ६४

CC-0. In Public Domain. Digitized by eGangotri

प्रसादेसर्व्वदुःखानांहानिरस्योपजायते प्रसन्नचेतसोह्याशुबुद्धिः पर्यवतिष्ठते ६५

शाङ्करभाष्यं

प्रसादेसतिकिंस्यादित्युच्यतेप्रसादइति प्रसादेसर्व्वदुःखानांअध्यात्मिकादीनांहानिर्व्विनाशोऽस्ययत्नेरुपजायतेकिञ्चप्रसन्नचेतसःस्वच्छान्तःकरणस्यहियस्मादाशुशीघ्रंबुद्धिःपर्यवतिष्ठतेआकाशमिवपरिसमन्तात् अवतिष्ठतेआत्मस्वरूपेणैवनिश्चलीभवतीत्यर्थः एवंप्रसन्नचेतसोऽवस्थितबुद्धेःकृतकृत्यतायतस्तस्माद्रागद्वेषविमुक्तैरिन्द्रियैःशास्त्राविरुद्धेष्ववर्जनीयेषुयुक्तंसमाचरेदितिवाक्यार्थः ६५

आनन्दगिरिकृतटीका।

करणाधीनत्वेपीन्द्रियाणां तदनियमात्तेषामपिनियमानुपपत्तिरित्याशंक्याहविधेयात्मेति ६४

तथापिनानाविधदुःखाभिभूतत्वान्नस्वास्थ्यमास्थातुंशक्यमित्याशयेनपृच्छतिप्रसादइति श्लोकार्द्धेनोत्तरमाहउच्यतइति सर्व्वदुःखहान्यावुद्धिस्वास्थ्येप्रिप्रकृतंप्रज्ञास्थैर्य्यंकथंसिद्धमित्याशंक्याहप्रसन्नेति बुद्धिप्रसादस्यैवफलान्तरमाहकिञ्चेति तस्मात्बुद्धिप्रसादार्थंप्रयतितव्यमितिशेषः श्लोकद्वयस्याक्षरोत्यमर्थमुक्त्वातात्पर्य्यार्थमुपसंहरतिएवमिति युक्तःसमाहितोविषयपारवश्यशून्यःसन्निति यावत् ६५

स्वामिकृतटीका।

नन्विन्द्रियाणांविषयप्रवणस्वभावानांनिरोद्धुमशक्यत्वादयंदोषोदुष्परिहरइतिस्थितप्रज्ञत्वंकथंस्यादित्याशंक्याहरागद्वेषइतिद्वाभ्यां रागद्वेषरहितैर्व्विगतदर्पैरिन्द्रियैर्व्विषयांश्चरन्नुपभुञ्जानोऽपिप्रसादंशान्तिंप्राप्नोति रागद्वेषराहित्यमेवाहआत्मेति आत्मनोमनसोवश्यैरिन्द्रियैर्व्विधेयोवशवर्त्तीआत्मामनोयस्येतिअनेनैवकथंब्रजेतेत्यस्यचतुर्थप्रश्नस्यस्वाधीनैरिन्द्रियैर्विषयान् गच्छतीत्युत्तरमुक्तंभवति ६४

प्रसादेसतिकिंस्यादित्यत्राहप्रसादइति प्रसादेसतिसर्व्वदुःखनाशस्तत्रप्रसन्नचेतसोबुद्धिःप्रतिष्ठिताभवतीत्यर्थः ६५

भाषा अनुवाद।

इसप्रकारशान्तिप्राप्तहोनेपरफिरिक्याहोताहै सोकहतेहैंकिशान्तिलाभहोनेसेसबदुखनाशहोजातेहैं फेरिइसशान्तचित्तपुरुषकेसुन्दरबुद्धिस्थिरहोतीहै ६५

CC-0. In Public Domain. Digitized by eGangotri

नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना नचाभावयतःशान्तिरशान्तस्यकुतःसुखं ६६

शाङ्करभाष्यं

सेयंप्रसन्नतास्तूयतेनास्तीति नास्तिनविद्यतेनभवतीत्यर्थःबुद्धिरात्मस्वरूप विषयाअयुक्तस्यासमाहितान्तःकरणस्यनचायुक्तस्येति नचास्यअयुक्तस्यभावनाआ त्मज्ञानाभिनिवेशःतथाचनास्यभावयतः आत्मज्ञानाभिनिवेशमकुर्वतःशान्तिरूप शमोनविद्यतेअशान्तस्यकुतः सुखंइन्द्रियाणांहिविषयसेवातृष्णातोनिवृत्तिर्यांतत् सुखंनविषयविषयातृष्णादुःखमेवहिसानतृष्णायां सत्यांसुखस्यगन्धमात्रमपितउत्प द्यतइत्यर्थः ६६

आनन्दगिरिकृतटीका

किंपुनःसत्त्वशुद्ध्यैवयथोक्तबुद्धिःसिध्यतिनेत्याहसेयमिति असमाहितस्यापि बुद्धिमात्रमुत्पद्यमानंप्रतिभातीत्याशंक्यविशिनष्टिआत्मस्वरूपेति नहिविक्षिप्तचि त्तस्यात्मस्वरूपविषयाबुद्धिरुदेतुमर्हतीत्यत्रहेतुमाहनचेति आत्मज्ञानेशब्दादा पाततोजातेस्मृतिसन्तानानुकरणं साक्षात्कारार्थमभिनिवेशोभावनेति चोच्यते नचासौविक्षिप्तबुद्धेःसिध्यतीतिहेत्वर्थंविवक्षित्वाहआत्मज्ञानेति भावनाद्वारासा क्षात्कारोभावेपिकाक्षतिरित्याशंक्याहतथेति असमाहितस्यभावनाभावादिति यावत् आत्मन्यापाततोज्ञातेश्रवणाद्यावृत्तिरूपांस्मृतिमनातन्वानोस्यापरोक्षबु द्ध्यभावेनानर्थनिवृत्तिःसिद्धतीत्याहउपशमइति अनिवृत्तानर्थस्यपरमानन्दसाग रादिभ्रष्टस्यसंसारवारिधौनिमग्नस्यसुखाविर्भावोनसम्भवतीत्याह अशान्तस्येति तस्यापिविषयसेविनोवैषयिकंसुखंसम्भवतीत्याशंक्याहइन्द्रियाणांहीति तृष्णाच यस्यशास्त्रप्रसिद्धमानुभविकञ्चसुखत्वमितिवक्तुंहिशब्दः विषयसेवातृष्णयापि

भाषा अनुवाद।

इन्द्रियोंकानिग्रहकहेकावूरखनाजोस्थितप्रज्ञपुरुषकासाधनसोविपरीत कहेउलटीरीतिसेकहतेहैं किअवशीकृतइन्द्रियमनुष्यकेशास्त्रऔआचार्यकेउ पदेशसेआत्मज्ञानहोनेकेयोग्यबुद्धिउत्पन्ननहींहोतीहै तोस्थितप्रज्ञहोनादूरवा तहै इहांभावनाकाअर्थध्यानहैसोध्यानकेद्वारावुद्धिआत्मामेप्रतिष्ठितकहेस्थित होतीहैपरन्तुजोइन्द्रियगणवशनकरिसकैउसकोयहध्यानकहांहै इसीसेवहआ त्माकेध्यानकाअनधिकारीहैतौफिरिउसकोशान्तिनहींहोतीअर्थातआत्मामेंचित्त युक्तनहीं होताऔरअशान्तपुरुषकोसुखकहेपरमआनन्दकहांसेहोसकेगा ६६

CC-0. In Public Domain. Digitized by eGangotri

इन्द्रियाणांहिचरतांयन्मनोऽनुविधीयते तदस्यहरतिप्रज्ञांवायुर्नावमिवाम्भसि ६७

शाङ्करभाष्यं

अयुक्तस्यकस्माद्बुद्धिर्नास्तीत्युच्यतेइन्द्रियाणामिति इन्द्रियाणांहियस्मात्च रतांस्वविषयेषुप्रवर्त्तमानानां यन्मनोनुविधीयतेअनुप्रवर्त्ततेतदिन्द्रियविषयविक ल्पनेनप्रवृत्तंमनोऽस्ययतेर्हरतिप्रज्ञामात्मानात्मविवेकजांनाशयतिकथंवायुर्नावमि वाम्भस्युदकेजिगमिषतां मार्गादुद्धृत्योन्मार्गेयथावायुर्नावंप्रवर्त्तयत्येवमात्मविषयांप्र ज्ञांहृत्वामनोविषयांकल्पनांकरोति ६७

आनन्दगिरिकृतटीका।

विषयोपभोगद्वारासुखमुपलब्धमित्याशंक्याहदुःखमेवेति तत्रापिहिशब्दोनुभवा वद्योतितदेवस्पष्टयतिनेत्यादिना ६६

आकाङ्क्षाद्वाराश्लोकात्तरमुत्थापयतिअयुक्तस्येति विक्षिप्तचेतसोभावना भावेसाक्षात्कारलक्षणाबुद्धिर्नभवतीतिहेत्वन्तरेणसाधयतिइन्द्रियाणामिति यत्प दोपात्तंमनस्तत्पदेनापिगृह्यतेइन्द्रियाणांश्रोतादीनांविषयाः शब्दादयस्तेषांविक ल्पनंमिथोविभज्यग्रहणंतेनेतियावत् दृष्टान्तंव्याकरोतिउदकइति यस्मात्तस्मा दयुक्तस्यनोत्पद्यतेबुद्धिरितियोजना ६७

स्वामिकृतटीका।

इन्द्रियनिग्रहस्यस्थितप्रज्ञतासाधनत्वंव्यतिरेकमुखेनोपपादयतिनास्तीति अयुक्तस्यावशीकृतेन्द्रियस्यनास्तिबुद्धिः शास्त्राचार्य्योपदेशाभ्यामात्मविषयाबुद्धिःप्र ज्ञैवनोत्पद्यतेकुतस्तस्याःप्रतिष्ठावार्त्ताइत्यत्राहनचेति नचायुक्तस्यभावनाध्यानं भावनयाहिबुद्धेरात्मनिप्रतिष्ठाभवतिसाचायुक्तस्ययतोनास्ति नचासावयतआत्म ध्यानमकुर्व्वतःशान्तिरात्मनिचित्तोपरमःअशान्तस्यकुतःसुखंमोक्षानन्दःइत्यर्थः ६६

भाषा अनुवाद।

इन्द्रीवशकियेविनातत्त्वज्ञाननहींहोताइसकाकारणकहतेहैं किअवशीकृतइ न्द्रियविषाधीनभोगीपुरुषकीइन्द्रियोंकेवीचजवएकइन्द्रीकेसाथमनधावताहैअर्था त्उसकेआधीनहोविषयपरचलातोफिरवहमनपुरुषकीबुद्धिहरिकैउसकोविषय मेवेक्षिप्तकरताहैतवसवइन्द्रीइकट्ठेहोप्रज्ञाकोहरनकरतीहैं तोऔरक्याकहैंफे रिवायुजैसेजलमेनावकोइधरउधरनचावतीहै तैसेयहमनइन्द्रियोंकेसाथविक्षि प्तहोजहांतहांमारामाराभ्रमताफिरताइसपुरुषकोखरावकरताहै ६७

CC-0. In Public Domain. Digitized by eGangotri

तस्माद्यस्यमहाबाहोनिगृहीतानिसर्व्वशःइन्द्रियाणीन्द्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ६८

शाङ्करभाष्यं।

यतोहीत्युपन्यस्तस्यार्थस्यानेकधोपपत्तिमुक्त्वातञ्चार्थमुपपाद्योपसंहरति तस्मादिति इन्द्रियाणांप्रवृत्तौदोषउपपादितोयस्मात्तस्मात्यतेः यस्ययतेःहेमहाबाहो निगृहीतानिसर्व्वशः सर्व्वप्रकारैर्मानसादिभेदैरिन्द्रियाणीन्द्रियार्थेभ्यःशब्दादिभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ६८

आनन्दगिरिकृतटीका।

यततोहीत्यादिश्लोकाभ्यामुक्तस्यैवार्थस्यप्रकृतश्लोकाभ्यामपिकथ्यमानत्वादस्ति पुनरुक्तिरित्याशङ्क्यपरिहरति यततोहीत्यादिना ध्यायतोविषयानित्यादीनामुपपत्तिवचनमुन्नेयं तच्छब्दापेक्षितार्थोक्तिद्वारास्लोकमवतारयति इन्द्रियाणामिति असमाहितेनमनसायस्मादनुविधीयमानानीन्द्रियाणिप्रसह्यप्रज्ञामपहरन्ति तस्मादितियोजना ६८

स्वामिकृतटीका।

नास्तिबुद्धिरयुक्तस्येत्यत्रहेतुमाह इन्द्रियाणामिति इन्द्रियाणामवशीकृतानां स्वैरंविषयेषुचरतांमध्येयदेवैकमिन्द्रियं मनोऽनुविधीयतेअवशीकृतंसदिन्द्रियेण सहगच्छतितदेवैकमिन्द्रियमस्यमनसः पुरुषस्यवाप्रज्ञांहरतिविषयविच्छिन्नांकरोतिकिमुव्यक्तव्यंबहूनिप्रज्ञांहरन्तीति यथाप्रमत्तस्यकर्णधारस्यनावंवायुःसमुद्रेसर्व्वतःपरिभ्रामयतितद्वदिति ६७ इन्द्रियसंयमस्यस्थितप्रज्ञत्वेसाधनत्वंलक्षणत्वञ्चोक्तमुपसंहरति तस्मादिति साधनत्वोपसंहारेतस्यप्रज्ञाप्रतिष्ठिताभवतीत्यर्थः लक्षणत्वोपसंहारेतस्यप्रज्ञाप्रतिष्ठिताज्ञातव्येत्यर्थः महाबाहइतिसम्बोधयन्वैरिनिग्रहेसमर्थस्यतवात्रापिसामर्थ्यंभवेदितिसूचयति ६८

भाषाअनुवाद

इन्द्रियोंकासंयमकरना स्थिरप्रज्ञपुरुषकासाधनऔयहीउसकालक्षणहै यहजोपूर्व्वकहिचुकेसोईअबफेरिकहतेहैं किहेमहाबाहोअर्जुन जोइनसबइन्द्रियोंकोविषयोंसेसबान्तराखिसकैउसकीप्रज्ञाप्रतिष्ठितहोतीहै महाबाहुसम्बोधनसेयहजानायाकितुमबैरियोंकेनिग्रहकरनेमेंसमर्थहौ इससेअवश्यइन्द्रियोंकोवशकरिसकोगे येइन्द्रीपुरुषकोपरमशत्रुहैं शत्रुकोजयकरनेविनाबड़ीहानिहैयहइसकाभावार्थहै इससेतुमइन्द्रियगणअपनेवशकरो ६८

CC-0. In Public Domain. Digitized by eGangotri

यानिशासर्व्वभूतानांतस्यांजागर्त्तिसंयमीयस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः॥६९

शाङ्करभाष्यं

योयंलौकिकोवैदिकश्चव्यवहारःसमुत्पन्नविवेकज्ञानस्यस्थितप्रज्ञस्याविद्याकार्य्यत्वादविद्यानिवृत्तौ निवर्त्ततेऽविद्यायाश्चविद्याविरोधान्निवृत्तिरित्येतमर्थंस्फुटीकुर्व्वन्नाह यानिशेति यानिशारात्रिःसर्व्वपदार्थानामविवेककरीतमःस्वभावत्वात् निशासर्व्वेषांभूतानांसर्व्वभूतानांकिंतत्परमार्थतत्त्वं स्थितप्रज्ञस्यविषयोयथानक्तञ्चराणामहरेवसदन्येषांनिशाभवति तद्वन्नक्तञ्चरस्यानोयानांअज्ञानिनांसर्व्वभूतातां निशेवनिशापरमार्थतत्त्वागोचरत्वादतद्वीनांतस्यांपरमार्थतत्त्वलक्षणायां अज्ञानिद्रायांप्रबुद्धोजागर्त्तिसंयमीसंयमवान्जितेन्द्रियोयोगीत्यर्थःयस्यांग्राह्यग्राहकभे

भाषाअनुवाद ।

जोसन्देहकरोकिनिद्रागतकहेसोयेमनुष्यकेसमानदेखनासुननाबोलना चलना यापरसकरनाआदिइन्द्रियोंकेव्यापारसेरहितकहेइन्द्रीजिततोकोईभी पुरुषइससंसारमेनहींदेखपड़ताहै तोस्थितप्रज्ञकालक्षणजोकहासोअसम्भव अर्थातकोईभीस्थिरबुद्धिनहींहैं इसपरश्रीभगवानकहतेहैं किअज्ञानरूपअन्धकारसेआवृत्तकहेघेरेसकलमनुष्योंकोआत्मनिष्ठाकहे आत्मज्ञानतत्त्वज्ञानरूप विषयमेदर्शनआदिकोईव्यापारनरहनेसेजन्तुवोंको जोनिशाकहेरात्रिअर्थातदर्शनादिव्यापारशून्यअवस्यातद्रूपआत्मनिष्ठाकहेतत्त्वज्ञानअवस्यारात्रिहै जिसमे विषयीविचारोंकोकुछनहींसूझतासोयेजैसेपुरुषकेसमानशिथिलपड़ेहैं कोईइन्द्रीभीकुछकाममेनहींहैंयहीआत्मनिष्ठारूपनिशासबजीवोंकीजानोइससेसंयमीकहेइन्द्रीजितजागतेहैं अर्थात्तत्त्वज्ञानकाअनुभवकरतेऔस्वस्वरूपकोदेखते आनन्दपावतेहैं औरजोविषयनिष्ठाकहेविषयोंकाज्ञानजिसमेसबप्राणीजागते अर्थातविषयीजनविषयोंमेबोधयुक्तहोदर्शनादिव्यापारकरते स्वप्नकीऐसीसंपतमे मगनहैं सोईमुनिजोतत्त्वज्ञानीहैं उनकोरात्रितुल्यहैं अर्थातइसविषयमोहरूपरातिमेउनकोकुछनहींसूझतासोयेनरकेसमानअचेतहैं अर्थातब्रह्ममेदृष्टिहै औविषयदेखतेनहींसोईकहाकिजोनिशासबभूतकहेप्राणियोंकीहै उसमेमुनिजनजागते औजोअज्ञानियोंकीरातिउसमेप्राणीसबजागतेहैं जैसेउलूआपक्षीऔचमगादुरछुछुन्दरआदिजीवऔरजीवोंकीरातिऔउनकादिनहै अपनासबव्यापारकरतेखुसीसेरातभरघूमतेतैसेहीजानो ६९

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

दलक्षणायामविद्यानिद्रायांप्रसुप्तान्येवभूतानिजाग्रतीत्युच्यतेयस्यां निशायांप्रसुप्ता इवस्वप्नदृशःसानिशाअविद्यारूपत्वात्परमार्थतत्त्वंपश्यतोमुनेरतःकर्माण्यविद्यावस्थायामेवचोद्यन्तेनविद्यावस्थायांविद्यायांहिसत्यामुदितेसवितरिशार्व्वरमिवतमः प्रणाशमुपगच्छत्यविद्याप्राग्विद्योत्पत्तेरविद्याप्रमाणवुद्ध्यागृह्यमाणाक्रियाकारकफलभेदरूपासतीसर्व्वकर्महेतुत्वंप्रतिपद्यते नाप्रमाणवुद्ध्यागृह्यमाणायाःकर्महेतुत्वोपपत्तिःप्रमाणभूतेनवेदेनममचोदितंकर्त्तव्यंकर्मेतिहिकर्मणिकर्त्तृप्रवर्त्ततेनाविद्यामात्रमिदंसर्व्वंनिशेवेतियस्यतुपुनर्निशेवाविद्यामात्रमिदंसर्व्वं भेदजातमितिज्ञानं तस्यात्मज्ञस्यसर्व्वकर्मसंन्यासएवाधिकारोनप्रवृत्तौतथाचदर्शयिष्यति तद्बुद्धयस्तदात्मानइत्यादिनाज्ञाननिष्ठायामेवतस्याधिकारः तत्रापिप्रवर्त्तकप्रमाणाभावेप्रवृत्तेरनुपपत्तिरितिचेत्नस्वात्मविषयत्वादात्मविज्ञानस्यनह्यात्मनःस्वात्मनिप्रवर्त्तकप्रमाणापेक्षता आत्मत्वादेवतदन्तत्वाच्चसर्व्वप्रमाणानांप्रमाणत्वस्यनह्यात्मस्वरूपाधिगमेसतिपुनःप्रमाणप्रमेयव्यवहारःसम्भवति प्रमातृत्वंह्यात्मनोनिवर्त्तयत्यन्तंप्रमाणं निवर्त्तयदेवचाप्रमाणीभवति स्वप्नकालप्रमाणमिवप्रवोधेलोकेचवस्त्वधिगमेप्रवृत्तिहेतुत्वादर्शनात्प्रमाणस्यतस्मात्नात्मविदःकर्मण्यधिकारइतिसिद्धं ६९

आनन्दगिरिकृतटीका।

आत्मविदःस्थितप्रज्ञस्यसर्व्वकर्मपरित्यागेऽधिकारस्तद्विपरीतस्याज्ञस्यकर्मणीत्येतस्मिन्नर्थेसमनन्तरश्लोकमवतारयति योयमिति अविद्यानिवृत्तौसर्व्वकर्मनिवृत्तिश्चेत्तन्निवृत्तिरेवकथमित्याशंक्याह अविद्यायाश्चेति स्फुटीकुर्व्वन्वाह्याभ्यन्तरकरणानांपराक्प्रत्यक्प्रवृत्तिवत्तथाविधेदर्शनेचमिथोविरुध्यतेपराग्दर्शनस्यानाद्यात्मावरणाविद्याकार्य्यत्वादात्मदर्शनस्यचतन्निवर्त्तकत्वात्तत आत्मदर्शनार्थमिन्द्रियाण्यर्थेभ्योनिगृह्णीयादित्याहेतियोजना सर्व्वप्राणिनांनिशापदार्थोविवेककरीत्यत्रहेतुमाह तमःस्वभावत्वादिति सर्व्वप्राणिसाधारणींप्रसिद्धांनिशांदर्शयित्वातामेवप्रकृतानुगुणत्वेनप्रश्नपूर्व्वकंविवृणोति किंतदित्यादिना स्थितप्रज्ञविषयस्यपरमार्थतत्त्वस्यप्रकाशैकस्वभावस्यकथमज्ञानंप्रतिनिशात्वमित्याशंक्याह यथेति तत्रहेतुमाह अगोचरत्वादिति अतद्बुद्धीनांपरमार्थतत्त्वातिरिक्तेद्वैतप्रपञ्चेप्रवृत्तबुद्धीनामप्रतिपन्नत्वात्परमार्थतत्त्वंनिशेवाविदुषामित्यर्थः तस्यामित्यादिव्याचष्टेतस्यामिति निशावदुक्तायामवस्थायामितियावत्योगीतिज्ञानीकथ्यते द्वितीयार्द्धं

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

विभजतेयस्यामिति प्रसुप्तानांजागरणंविरुद्धमित्याशंक्याह प्रसुप्ताइवेति परमार्थतत्त्वमनुभवतोनिष्टत्ताविद्यस्यसंन्यासिनोद्वैतावस्थानिष्ठेत्यत्रहेतुमाह अविद्यारूपत्वादिति परमार्थावस्थानिष्ठेत्यविदुषांविदुषान्तुद्वैतावस्थातथेतिस्थितेफलितमाह अतदृति अविद्यावस्थायामेवक्रियाकारकफलभेदप्रतिभानादित्यर्थ विद्योदयेपितत्प्रतिभानाविशेषात्पूर्वमिवकर्माणिविधीयेरन्नित्याशंक्याह विद्यायामिति अविद्यानिष्टत्तौवाधितानुष्टत्तप्राविभागमानेपिनास्तिकर्मविधिर्विभागा भिनिवेशाभावादित्यर्थः अविद्यावस्थायामेवकर्माणीत्युक्तंव्यक्तीकरोतिप्रागिति विद्योदयात्पूर्वंबाधकाभावादवाधिताविद्याक्रियादिभेदमापाद्यप्रमाणरूपयाबुद्ध्याग्राह्यतांप्राप्यकर्महेतुर्भवतिक्रियादिभेदाभिमानस्यतद्धेतुत्वादित्यर्थः नविद्यावस्थायामित्युक्तंप्रपञ्चयति नाप्रमाणेति उत्पन्नायाञ्चविद्यायांअविद्यायाः निष्टत्तत्वात्क्रियादिभेदभानमप्रमाणमिति बुद्धिरुत्पद्यतेतयागृह्यमाणायथोक्तविभागभागिन्यप्यविद्यानकर्महेतुत्वंप्रतिपद्यतेबाधितत्वेनाभासतयातद्धेतुत्वायोगादित्यर्थः विद्याविद्याविभागेनोक्तमेवविशेषंविष्टणोति प्रमाणभूतेनेति यथोक्तेनवेदेनकामनाजीवनादिमतोममकर्मविहितंतेनमयातत्कर्त्तव्यमितिमन्वानः सन्कर्मण्यज्ञोधिक्रियतेतंप्रतिसाधनविशेषवादिनोवेदस्यप्रवर्त्तकत्वादित्यर्थःसर्वमेवेदमविद्यामात्रंद्वैतंनिष्ठेवेतिमन्वानस्तुनप्रवर्त्ततेकर्मणीतिव्यावर्त्तयन्नाह नाविद्येति विदुषोनकर्मण्यधिकारश्चेत्तस्याधिकारस्तर्हिकुर्वेत्याशंक्याह यस्येति तस्यआत्मज्ञस्यफलभूतसंन्यासाधिकारेवाक्यशेषंप्रमाणयति तथाचेति प्रवर्त्तकंप्रमाणंविधिस्तदभावेकर्मस्विवविदुषोज्ञाननिष्ठायामपिप्रवृत्तेरनुपपत्तेराश्रयणीयोज्ञानवतोपिविधिरितिशङ्कते तत्रापीति किमात्मज्ञानंविधिमपेक्षतेकिम्बात्मा नाद्यः तस्यस्वरूपविषयस्ययथाप्रमाणप्रमेयमुत्पत्तेर्विध्यनपेक्षत्वादित्याह नस्वात्मेति नद्वितीयइत्याह नहीति प्रवर्त्तकप्रमाणशब्दितस्यविधेःसाध्यविषयत्वादात्मनश्चासाध्यत्वादितिहेतुमाह आत्मत्वादेवेति आत्मतज्ज्ञानयोर्विध्यनपेक्षत्वेपिज्ञानिनोमानमेयव्यवहारंप्रतिनियमार्थंविध्यपेक्षास्यादित्याशंक्याह तदन्तत्वाच्चेति सर्वेषांप्रमाणानांप्रमाण्यस्यात्मज्ञानोदयावसानत्वात्तस्मिन्नुत्पन्नेव्यवहारस्यनिरवकाशत्वान्नतत्प्रतिनियमायज्ञानिनोविधिरित्यर्थः उक्तमेवव्यक्तीकरोति नहीति धर्माधिगमवदात्माधिगमेपिकिमितियथोक्तोव्यवहारोनभवतीत्याशंक्याह प्रमाणत्वंहीति तन्निष्टत्तौकथमद्वैतज्ञानस्यप्रमाण्यमित्याशंक्याह निवर्त्तयदेवेति निवर्त्त

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

यदद्वैतज्ञानंस्वयंनिवृत्तेर्नप्रमाणमित्यत्रदृष्टान्तमाह स्वप्नेति आत्मज्ञानस्यविध्यनपेक्षत्वेहेत्वन्तरमाहलोकेचेति व्यवहारभूमौहिप्रमाणस्यवस्तुनिश्चयफलपर्य्यन्तत्वेसति प्रवर्त्तकविधिसापेक्षत्वानुपलब्धादद्वैतज्ञानमपिप्रमाणत्वान्नविधिमपेक्षतेरज्वादिज्ञानवदित्यर्थः आत्मज्ञानवतस्तन्निष्ठाविधिमन्तरेणज्ञानमाहात्म्येनैवसिद्धत्वात्तस्यकर्मसंन्यासेधिकारोनकर्मणीत्युपसंहरतितस्मादिति ६९

नन्वसंन्यासिनापिविद्यावताविद्याफलस्यमोक्षस्यलब्धुंशक्यत्वात्किमितिविदुषःसंन्यासोनियम्यतेतत्राहविदुषइति आपातज्ञानवतोविवेकवैराग्यादिविशिष्टस्येषणाभ्यःसर्वाभ्योव्युत्थितस्यश्रवणादिद्वारासमुत्पन्नसाक्षात्कारवतोमुख्यस्यसंन्यासिनोमोक्षोनान्यस्यविषयतृष्णापरिभूतस्येत्येतद्दृष्टान्तेनप्रतिपादयितुमिच्छन् रागद्वेषविमुक्तैस्तुइतिश्लोकोक्तमेवार्थंपुनराहेतियोजना अद्भिःसमुद्रस्यसमन्तात् पूर्य्यमाणत्वेऽपिह्रासवतीतदीयास्थितिरापतेदित्याशंक्याहअचलेति नहिसमुद्रस्योदकात्मकंप्रतिनियतंरूपंकदाचिद्विवर्त्ततेह्रसतेवातेनतदीयास्थितिरेकरूपैवेत्यर्थः तत्तन्नादेयाश्चेदापःसमुद्रान्तर्गच्छन्तितर्हितस्यविक्रियावत्त्वादप्रतिष्ठास्यादित्याशंक्याहस्वात्मस्थमिति इच्छाविशेषाःविषयाणामसन्निधौविदुषिनिर्व्विकारेप्रविशन्तोपिसन्निधानेतस्मिन् प्रविशन्तोविकारमापादयेयुरित्याशंक्याहविषये ति प्रवेशंविषदयतिसर्व्वतइति योऽकामइत्यादिश्रुतेर्व्विषयविमुखस्यनिष्कामस्यमोक्षोनकामकामुकस्येत्याहसशान्तिमिति ७०

स्वामिकृतटीका।

ननुनकश्चिदपिप्रसुप्तइवदर्शनादिव्यापारशून्यःसर्व्वात्मनानिगृहीतेन्द्रियोलोकेदृश्यतेअतोऽसम्भावितमिदंलक्षणमित्याशंक्याहयानिशेति सर्व्वेषांभूतानांयानिशानिशेवनिशाआत्मनिष्ठाअज्ञानध्वान्ताद्दृतमतीनांतस्यांदर्शनादिव्यापाराभावात्तस्यामात्मनिष्ठायांसंयमीनिगृहीतेन्द्रियोजागर्त्तिप्रबुध्यते यस्यान्तुविषयनिष्ठायांभूतानिजाग्रति प्रबुध्यन्तेसाआत्मतत्त्वंपश्यतोमुनेर्निशातस्यांदर्शनादिव्यापारस्तस्यनास्तीत्यर्थः एतदुक्तंभवतियथादिवान्धानामुलूकादीनांरात्रावेवदर्शनंनतुदिवसेएवंब्रह्मज्ञस्योन्मीलिताक्षस्यापिब्रह्मण्येवदृष्टिर्नतुविषयेषुअतोनासम्भावितमिदंलक्षणमिति ६९

CC-0. In Public Domain. Digitized by eGangotri

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् तद्वत् कामा
यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ७०

शाङ्करभाष्यं

विदुषस्त्यक्तैषणस्यस्थितप्रज्ञस्ययतेरेवमोक्षप्राप्तिर्नत्वसंन्यासिनःकामकामि
नइत्येतमर्थंदृष्टान्तेनप्रतिपादयिष्यन्नाह आपूर्य्येति आपूर्यमाणमद्भिरचलप्रति
ष्ठंअचलतयाप्रतिष्ठाअवस्थितिर्यस्य तमचलप्रतिष्ठंसमुद्रमापःसर्व्वतोगताः प्रवि
शन्तिस्वात्मस्थमविक्रियमेवसन्तंयद्वत्तद्वत् कामाविषयसन्निधावपिसर्व्वतइच्छाव
शेषायंमुनिंसमुद्रमिवापोऽविकुर्व्वन्तः प्रविशन्तिसर्व्वेआत्मन्येवप्रलीयन्तेनस्वात्मव
शंकुर्व्वन्तिसशान्तिंमोक्षंप्राप्नोतिनेतरःकामकामीकाम्यन्तइति कामाःविषयास्ता
न्कामयितुंशीलंयस्यसकामकामीनैवप्राप्नोतीत्यर्थः ७०

आनन्दगिरिकृतटीका।

यदिगृहस्थेनापिमनसासमस्ताभिमानंहित्वाकूटस्थंब्रह्मात्मानंपरिभावयता
ब्रह्मनिर्व्वाणमाप्यतेप्राप्तंतर्हिमौढ्यादिविडम्बनमेवेत्याशंक्याहयस्मादिति शब्दा
दिविषयप्रवणस्यतत्तदिच्छाभेदभागिनोनमुक्तिरितिव्यतिरेकस्य सिद्धत्वात्पूर्व्वो
क्तमन्वयंनिगमयितुमनन्तरंवाक्यमित्यर्थः अशेषविषयत्यागेजीवनमपिकथमित्या

स्वामिकृतटीका।

ननुविषयेषुदृष्टप्रभावेकथमसौतान्मुक्तइत्यपेक्षायामाह आपूर्य्यमाणमिति
नानानदनदीभिरापूर्यमाणमप्यचलप्रतिष्ठमनतिक्रान्तमर्य्यादमेव समुद्रंपुनरप्य
न्याआपोयथाप्रविशन्तिनथाकामाविषयाः यंमुनिमन्तर्दृष्टिंभोगैरविक्रियमाणमे
वप्रारब्धकर्मभिराक्षिप्ताःसन्तःप्रविशन्तिसशान्तिंकैवल्यंप्राप्नोतिनतुकामकामीभो
गकामनाशीलः ७०

भाषा अनुवाद।

जोकहोकिविषयमेंदृष्टिविनाफेरिवेज्ञानीविषयभोगकैसेकरतेहैं इसआ
शयमेंकहतेहैं किजैसेनदनदीनारोंकेजलप्रवाहजोरसेअचलसमुद्रमेंजायप्रवे
शकरतेपरसमुद्रकोइच्छानहींतैसेहीविषयसबअदृष्टकहेपूर्वकर्मकेअनुसारभोग
इच्छाहीनमुनिकेअन्तःकरणमेंअदृष्टकेजोरसेकर्मकेद्वाराविषयप्रवेशकरतेपरन्तु
तिनकेद्वाराहीअर्थातविषयभोगकरतेभीवेकैवल्यमुक्तिपावतेहैं औरकामकेका
मीभोगकामनाशीलकहेविषयस्वभावनहींहोतेहैं ७०

CC-0. In Public Domain. Digitized by eGangotri

विहाय कामान् यः सर्व्वान् पुमांश्चरति निस्पृहः निर्ममो निरहङ्कारः स शान्ति मधिगच्छति ७१

शाङ्करभाष्यं।

यस्मादेवंतस्मात्विहायेति विहायपरित्यज्यकामान्यःसंन्यासीसर्व्वानशेषतःकार्त्स्न्येनचरतिजीवन्मात्रचेष्टाशेषः पर्यटतीत्यर्थःनिस्पृहःशरीरजीवन्मात्रेपिनिर्गतास्पृहायस्यसनिस्पृहःसन्निर्म्ममइतिममत्ववर्जितःशरीरजीवन्मात्राच्चिह्नपरिग्रहेपिममेदमित्यभिनिवेशवर्जितः निरहङ्कारोविद्यावत्त्वादिनिमित्तात्मसम्भावनारहितइत्यर्थःसएवम्भूतः स्थितप्रज्ञोब्रह्मविच्छान्तिंसर्वसंसारदुःखोपरमलक्षणांनिर्व्वाणाख्यामधिगच्छतिप्राप्नोतिब्रह्मभूतोभवतीत्यर्थः ७१

आनन्दगिरिकृतटीका।

शंक्याह जीवनेति सम्भवद्रागद्वेषादिकेदेहेनिवासव्याहत्तयर्थंचरतीत्येतद्व्याचष्टे पर्य्यटतीति विहायकामानित्यनेनपुनरुक्तिंपरिहरतिशरीरेति निस्पृहत्वमुक्त्वा निर्ममत्वात्पुनर्वदन्कथंपुनरुक्तिमार्थिकींनपश्यसीत्याशंक्याह शरीरजीवनेति स त्यहङ्कारेममकारस्यावश्यकत्वान्निरहङ्कारत्वंव्याकरोति विद्यावत्त्वादीति सशान्तिमाप्नोतिइत्युक्तमुपसंहरतिसएवम्भूतइति संन्यासिनोमोक्षमपेक्ष्यमाणस्यसर्वकामपरित्यागादीनिश्लोकोक्तानिविशेषणानियत्नसाध्यानितत्सम्पत्तिफलस्तु कैवल्यमित्यर्थः ७१

स्वामिकृतटीका।

यस्मादेवंतस्मात्विहायेति प्राप्तान्कामान्विहायत्यक्त्वाउपेक्ष्यअप्राप्तेषुच निस्पृहःयतोनिरहङ्कारःअतएवतद्भोगसाधनेषुनिर्ममःसन्नन्तर्दृष्टिर्भूत्वा यश्चरति प्रारब्धवशेनभोगान्भुङ्क्तेयत्नकृत्वापिगच्छतिवासशान्तिंप्राप्नोति ७१

भाषा अनुवाद।

जबऐसीव्यवस्थाहै तोजोप्राप्तविषयकोत्यागकरतेयाअनादरसेग्रहणकरतेऔरअप्राप्तमेइच्छारहितकहेकिसीकोअभिलाषनहींरखतेइससेउनकेअहङ्कारनहींहैं इसीसेभोगअभोगसाधनमेममतातथास्नेहशून्यहोकरआत्मामेदृष्टिराखिअदृष्टवशतेविषयभोगकरतेहैं औरकहींभोजंयपरशान्तिकोप्राप्तहोतेहैं अर्थात्जोसबकामनाछोडिवेपरवाहअहंममताहीनपुरुषभोगकरैंयाकहींजंाय परशान्तितोपावतेहीहैं ७१

CC-0. In Public Domain. Digitized by eGangotri

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति। स्थित्वास्याम न्तकालेऽपि ब्रह्मनिर्व्वाण मृच्छति ७२

इति श्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांभीष्मपर्व्वणिश्रीभग वद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे श्रीकृष्णार्ज्जुनसंवादेसांख्ययोगोनाम द्वितीयोऽध्यायः॥ २॥

शाङ्करभाष्यं

सैषाज्ञाननिष्ठास्तूयते एषाब्राह्मीति एषायथोक्ताब्राह्मीब्रह्मणिभवेयंस्थितिः सर्व्वकर्मसंन्यस्यब्रह्मरूपेणैवावस्थानमित्येतत् हेपार्थनैनांस्थितिंप्राप्यलब्धाविमुह्य तिनमोहंप्राप्नोतिस्थित्वास्यांस्थितौब्राह्म्यांयथोक्तायामन्तकालेपिअन्तेवयस्यपिब्रह्म निर्व्वाणंब्रह्मनिर्वृतिंमोक्षमृच्छतिकिमुवक्तव्यं ब्रह्मचर्य्यादेवसन्यस्ययावज्जीवंयोब्र ह्मण्येवावतिष्ठतेसब्रह्मनिर्व्वाणमृच्छतीति ७२

इति श्रीभगवद्गीताभाष्येद्वितीयोध्यायः॥ २॥

आनन्दगिरिकृतटीका।

तत्रतत्रसंक्षेपविस्तराभ्यांप्रदर्शितांज्ञाननिष्ठांअधिकारिप्रवृत्त्यर्थत्वेनस्तोतुमु त्तरश्लोकमवतारयतिसैषेति गृहस्थःसंन्यासीत्युभावपिचेन्मुक्तिभागिनौकिंतर्हि कष्टेनसर्वथैवसंन्यासेनेत्याशंक्य संन्यासिव्यतिरिक्तानामन्तरायसम्भवादपेक्षितःसं न्यासोमुमुक्षोरित्याहएषेति स्थितिमेवव्याचष्टेसर्वमिति नविमुह्यतीतिपुनर्नञो नुकर्षणमन्वयार्थंसंन्यासिनोविमोहाभावेपिगृहस्थोधनहान्यादिनिमित्तंप्रायेणवि मुह्यतिविक्षिप्तःसन्परमार्थविवेकरहितोभवतीत्यर्थः यथोक्ताब्राह्मीस्थितिःसर्व कर्मसंन्यासपूर्विकाब्रह्मनिष्ठातस्यां स्थित्वातामिमामायुषश्चतुर्थेपिभागेकृत्वेत्यर्थः अपिशब्दसूचितंकैमुतिकन्यायमाह किमुवक्तव्यमिति तदेवंतत्त्वंपदार्थौतदैक्यं वाक्यार्थस्तज्ज्ञानादेकाकिनोमुक्तिश्चतदुपायश्चेत्येतेषामेकैकत्रश्लोकेप्राधान्येन प्रद र्शितमितिनिष्ठाद्वयमुपायोपेयभूतमध्यायेनसिद्धं ७२

इति आनन्दगिरिकृतटीकायां द्वितीयोध्यायः॥२॥

स्वामिकृतटीका।

उक्तांज्ञाननिष्ठांस्तुवन्नुपसंहरतिएषेति ब्राह्मीस्थितिर्ब्रह्मज्ञानेनिष्ठाएषा एवम्बिधाएनांपरमेश्वराराधनेनविशुद्धान्तःकरणः पुमान्प्राप्यनमुह्यतिपुनःसंसा रमोहंनप्राप्नोति यतोऽन्तकालेमृत्युसमयेऽपिअस्यांक्षणमात्रंस्थित्वाब्रह्मनिर्व्वाणं

CC-0. In Public Domain. Digitized by eGangotri

स्वामिकृतटीका।

ब्रह्मणिलयश्चेतिप्राप्नोतिकिंपुनर्वक्तव्यंबाल्यमारभ्यस्थित्वाप्राप्नोतीति। श्लोकप
ङ्क्तिनिमग्नंयःसांख्ययोगोपदेशतःउज्जहारार्जुनंभक्तंसकृष्णःशरणंमम ७२
इति श्रीधरस्वामिकृतटीकायांद्वितीयोध्यायः॥ २॥

भाषा अनुवाद।

पूर्वकहोऊईज्ञाननिष्ठाकीप्रसंसाकरिकेकहतेहैं किहेअर्जुनउक्तब्रह्मज्ञान कीनिष्ठाऐसोहै इससेभगवतकेआराधनसेशुद्धचित्तपुरुषयहब्रह्मनिष्ठापायकरि औरसंसारसागरमेमूढ़नहोहोता देखोमरतीवारभीएकक्षणभरजोब्रह्मनिष्ठा मेमनस्थिरकरतेवेब्रह्ममेलीनहोतेहैं तोबालपनसेयावद्धतदिनोंसेइसब्रह्मनि ष्ठाकीअभ्याससेइसमेमनस्थिरकरिअन्तमेमुक्तिमिलैगी इसमेफिरिकुछसन्देहवा कीहै सोहेपार्थयहब्राह्मीस्थितिहै इसकोप्राप्तहोफेरिमोहनहींपातेअन्तकाल मेभीइसमेक्षणभरमनथिरकरिकेमनुष्यनिश्चयब्रह्मनिर्वाणपदपावतेहैं ७२
इति श्रीभगवद्गीतायाःपण्डितजगन्नाथसुक्लविरचितायांमनभावनीटीकार्यां श्रीकृष्णार्जुनसंवादेसांख्ययोगोनामद्वितीयोऽध्यायः २ सम्वतः १९२९

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता

तृतीयाध्यायः

अर्जुनउवाच ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्द्दन तत् किं कर्मणि घोरे मां नियोजयसि केशव १

शाङ्करभाष्यं

शास्त्रस्यप्रवृत्तिनिवृत्तिविषयभूतेद्वेबुद्धीभगवतानिर्द्दिष्टेसांख्यबुद्धिर्योगबुद्धिश्च तत्रप्रजहातियदाकामानित्यारभ्याध्यायपरिसमाप्तेःसांख्यबुद्ध्याश्रितानांसंन्यासक

भाषा अनुवाद।

गीताशास्त्रमेप्रथमप्रवृत्तिऔनिवृत्तिकीहेतुरूपसांख्यतथायोगयेदोप्रकार कीबुद्धिदेखावतेभयेश्रीजगदीश्वरनेअशोच्यानन्वशोचस्त्वं इत्यादिश्लोकसेपहिले मुक्तिसाधनकेविषयमे देहऔआत्माकाभेदकहा तिसकेअनन्तरएषातेऽभिहिता सांख्येइत्यादिश्लोककेद्वारानिष्कामकर्मकरनेकोकहा परन्तुतिससेकौनपक्षमुख्य कहेश्रेष्ठऔकौनगौणकहेसाधारणहै यहकुछभावकहेभगवतकोअभिप्रायजानी नहींगई औरतिसकेवीचमेज्ञानोपुरुषकोकर्मरहितहोना तथाइन्द्रीवशकरना औनिरहङ्काररहनाकहिकर एषाब्राह्मीस्थितिःपार्थइसश्लोकसेप्रसंसापूर्वकभग वतकीकहावतसेतत्त्वज्ञानऔनिष्कामकर्मयोगरूपभक्तियोग इनदोनोकेमध्यज्ञान हीकीश्रेष्ठताभगवानकोअभिमतहै यहजानिकरअर्जुनकहतेहैं किहेकेशवजोनि ष्कामकर्मयोगरूपभक्तियोगकीअपेक्षाशीघ्रमुक्तिकादेनहारतत्त्वज्ञानहीश्रेष्ठआप कोअभिमतहै तोफेरिकिसवास्ते तस्माद्युध्यस्वतस्मादुत्तिष्ठयेबातेंकहिकहिकर हेजनार्द्दनघोरहिंसारूपकर्ममेहमैप्रवृत्तकरतेहौ जनार्द्दनसंबोधनदेनेसेयहआ याकिजनकहेभक्तजनजोमैतिसकोअर्दनकहेपीड़ादेनेवालेकाहेहोतेहौ यहअर्जु नकातात्पर्यहै सोईपूछतेहैं किज्यायसीचेत्कर्मणस्तेमताबुद्धिरिति १

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

र्त्तव्यतामुक्त्वा तेषांतन्निष्ठतयैवचकृतार्थतोक्तैषाब्राह्मीस्थितिरित्यर्जुनायचकर्मण्ये वाधिकारस्तेमातेसङ्गोस्त्वकर्मणीतिकर्मैवकर्त्तव्यमुक्तवान् योगबुद्धिमाश्रित्य नतत एवश्रेयःप्राप्तिमुक्तवान्तदेतदालक्ष्यपर्य्याकुलीभूतबुद्धिरर्जुनउवाच कथंभक्तायश्रे योऽर्थिनेयत्साक्षात्श्रेयःप्राप्तिसाधनंसांख्यबुद्धिनिष्ठांश्रावयित्वा मांकर्मणिघट्टा नेकानर्थयुक्तेपारम्पर्येणाप्यनैकान्तिकश्रेयःप्राप्तिफलेनियुञ्जादितियुक्तःपर्याकुली भावोऽर्जुनस्यतदनुरूपश्चप्रश्नोज्यायसीचेदित्यादि प्रश्नापाकरणवाक्यञ्चभगवतो युक्तंयथोक्तंविभागविषयेशास्त्रेकेचित्त्वर्जुनस्यप्रश्नार्थमन्यथाकल्पयित्वा तत्प्रकूलं भगवतःप्रतिवचनंवर्णयन्ति यथाचात्मनासम्बन्धग्रन्थेगीतार्थोनिरूपितःतत्प्रतिकूल ञ्चेहपुनःप्रश्नप्रतिवचनयोरर्थंनिरूपयन्तिकथंतत्रसम्बन्धग्रन्थेतावत्सर्व्वेषामाश्रमि णांज्ञानकर्मणोःसमुच्चयोगीताशास्त्रेनिरूपितोर्थइत्युक्तःपुनर्व्विशेषितञ्चयावज्जीवं श्रुतिचोदितानिकर्माणिपरित्यज्यकेवलादेवज्ञानान्मोक्षःप्राप्यतेइत्येतदेकान्तेनैव प्रतिषिद्धमितीह त्वाश्रमविकल्पंदर्शयतायावज्जीवंश्रुतिचोदितानामेवकर्मणांपरि त्यागउक्तःतत्कथमीदृशंविरुद्धमर्थमर्जुनायब्रूयाद्भगवान् श्रोतावाकथंविरुद्धमर्थम वधारयेत्तत्रैतत्स्यात् गृहस्थानामेवश्रौतकर्मपरित्यागेनकेवलादेवज्ञानान्मोक्षः प्रतिषिध्यते नत्वाश्रमान्तराणामित्येतदपिपुर्व्वोत्तरविरुद्धमेवकथंसर्व्वाश्रमिणां ज्ञानकर्मणोःसमुच्चयोगीताशास्त्रेनिश्चितोर्थइतिप्रतिज्ञायेहकथंतद्विरुद्धंकेवलादेव ज्ञानान्मोक्षंब्रूयात् आश्रमान्तराणांअयमतंश्रौतकर्मापेक्षयैतद्वचनंकेवलादेव ज्ञानात्श्रौतकर्मरहितात्गृहस्थानांमोक्षः प्रतिषिध्यतइतितत्रगृहस्थानांविद्यमा नमपिस्मार्त्तंकर्माविद्यमानवदुपेक्ष्यज्ञानादेवकेवलादित्युच्यतेइत्येतदपिविरुद्धंकथं गृहस्थस्यैवस्मार्त्तकर्मणासमुच्चितात्ज्ञानान्मोक्षःप्रतिषिध्यते नत्वाश्रमान्तराणा मितिकथंविवेकिभिःशक्यमधारयितुंकिञ्चयदिमोक्षसाधनत्वेनस्मार्त्तानिकर्माण्यु द्दिश्यैतसांसमुच्चीयन्तेतथागृहस्थस्यापिइष्यतांस्मार्त्तैरेवसमुच्चयोनश्रौतैःअथश्रौतैः स्मार्तैश्चगृहस्थस्यैवसमुच्चयोमोक्षायोद्दिश्यैतसांतु स्मार्त्तकर्ममात्रसमुच्चितात्ज्ञाना न्मोक्षइतितत्रैवंसतिगृहस्थस्यायासबाहुल्यात्श्रौतंस्मार्त्तञ्चबहुदुःखरूपंकर्मभि रत्यारोपितंस्यात्अथगृहस्थस्यैवायासबाहुल्यात्तत्कारणान्मोक्षः स्यान्नाश्रमान्त राणां श्रौतनित्यकर्मरहितत्वादितितदप्यसत्सर्व्वोपनिषत्स्मृतिइतिहासपुराणयोग शास्त्रेषुचज्ञानाङ्गत्वेनसमुच्चोःसर्व्वकर्मसंन्यासविधानादाश्रमविकल्पसमुच्चयविधा

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम् ।

नाश्रुतिस्मृत्योःसिद्धस्तर्हिसर्व्वाश्रमिणांज्ञानकर्मणोःसमुच्चयोनमुमुक्षोःसर्व्वकर्म संन्यासविधानात्पुत्रैषणायावित्तैषणायाश्चलोकैषणायाश्च व्युत्थायाथभिक्षाचर्यंच रन्तितस्मात्संन्यासमेषांतपसामतिरिक्तमाऊःन्यासएवात्यरोचयदितिनकर्मणा नप्रजयाधनेनत्यागेनैकेऽमृतत्वमानशुरितिचब्रह्मचर्यादेवप्रव्रजेदित्याद्याः श्रुतयः त्यजधर्ममधर्मञ्चउभेसत्यानृतेत्यजयेनत्यजसितंत्यजसंसारमेवनिःसारंदृष्ट्वासारदि दृक्षया प्रव्रजन्त्यकृतोद्वाहाःपरंवैराग्यमाश्रिता इतिदृढस्मृतिः परमात्मनियोर क्तोऽपरमात्मनिसर्व्वैषणाविनिर्मुक्तः सभैक्ष्यंभोक्तुमर्हतिकर्मणावध्यतेजन्तुर्विद्यया चविमुच्यते तस्मात्कर्मनकुर्वन्तियतयःपारदर्शिनइतिशुकानुशासनं दृष्टापिच सर्व्वकर्माणिमनसासंन्यस्येत्यादिमोक्षस्यचाकार्यत्वान्मुमुक्षोः कर्मानर्थक्यंनित्यानि प्रत्यवायपरिहारार्थानीतिचेत् नासंन्यासिविषयत्वात्प्रत्यवायप्राप्तेर्नह्यग्निकार्य्या द्यकरणात्संन्यासिनःप्रत्यवायःकल्पयितुंशक्योयथाब्रह्मचारिणां असंन्यासिनाम पिनतावन्नित्यानांकर्मणामभावादेवभावरूपस्यप्रत्यवायस्योत्पत्तिः कल्पयितुंशक्या कथमसतःसज्जायेतेत्यसतःसज्जन्मासंभवश्रुतेः यदिविहिताकरणाद्यसम्भवाख्यम पिप्रत्यवायंब्रूयाद्वेदस्तदानर्थकरोवेदोऽप्रमाणमित्युक्तं स्यात्विहितस्यकरणयोःदुः खमात्रफलत्वात् तथाचकारकंशास्त्रंनज्ञापकमित्यनुपपन्नार्थंकल्पितंस्यान्नचैतदि ष्टंतस्मान्नसंन्यासिनांकर्माण्यतोज्ञानकर्मणोःसमुच्चयानुपपत्तिःज्यायसीचेत् कर्म णस्तेमतावुद्धिरित्यर्जुनस्य प्रश्नानुपपत्तेश्चयदिहिभगवताद्वितीयेऽध्यायेज्ञानंकर्मचस मुच्चयेनत्वयाएकेनानुष्ठेयमित्युक्तंस्यात्ततोऽर्जुनस्यप्रश्नोऽनुपपन्नोज्यायसीचेत्कर्म णस्तेमतावुद्धिरित्यर्जुनायचेत्बुद्धिकर्मणीत्वयानुष्ठेयेइत्युक्तेयाचकर्मणोज्यायसीबुद्धिः साप्युक्तैवेतितत्किंकर्मणिघोरे मांनियोजयसिकेशवेतिउपालम्भोवाप्रश्नोवानकथ ञ्चनोपपद्यतेनचार्जुनस्यैवज्यायसीबुद्धिर्नानुष्ठेयेतिभगवतोक्तं पुर्व्वमितिकल्पयितुं युक्तंयेनज्यायसीचेदितिविवेकतःप्रश्नः स्यात्यदिपुनरेकस्यपुरुषस्यज्ञानकर्मणो र्व्विरोधात्युगपदनुष्ठानंनसम्भवतीतिभिन्नपुरुषानुष्ठेयत्वंभगवतापुर्व्वमुक्तंस्यात् त तोऽयंप्रश्नउपपन्नोज्यायसीचेदित्यादिरविवेकतः प्रश्नकल्पनायामपिभिन्नपुरुषानु ष्ठेयत्वेनभगवतःप्रतिवचनंनोपपद्यतेनचाज्ञाननिमित्तंभगवत्प्रतिवचनं कल्पनीयंअ स्माच्चभिन्नपुरुषानुष्ठेयत्वेनज्ञानकर्मनिष्ठयोर्भगवतःप्रतिवचनदर्शनात् ज्ञानकर्म णोःसमुच्चयानुपपत्तिः तस्मात्केवलादेवज्ञानान्मोक्षइत्येषोर्थोनिश्चितोगीतासु

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

सर्व्वोपनिषत्सुच ज्ञानकर्मणोरेकंवदनिश्चित्येतिचैकविषयैवप्रार्थनानुपपन्नोभयोः समुच्चयसम्भवेकुरुकर्मैवतस्मात्त्वमिति चज्ञाननिष्ठासम्भवमर्जुनस्यावधारणेनदर्शयिष्यति ज्यायसीचेदिति ज्यायसीश्रेयसीचेद्यदिकर्मणःसकाशात्तेतवमताअभिप्रेताबुद्धिर्ज्ञानंहेजनार्द्दनयदिबुद्धिकर्मणीसमुच्चिते इष्टेतदैकंश्रेयःसाधनमितिकर्मणोज्यायसीबुद्धिरितिकर्मणोतिरिक्तंकरणं बुद्धेरनुपपन्नंअर्जुनेनोक्तंस्यान्नहितदेवतस्मात्फलतोतिरिक्तंस्यात्तथाचकर्मणःश्रेयस्करीभगवतोक्ताबुद्धिरश्रेयस्करञ्चकर्मकुर्व्वितिमांप्रतिपादयतितत्किन्नुकारणमितिभगवतउपालम्भमिवकुर्व्वन् तत् किंकस्मात् कर्मणिघोरेक्रूरेहिंसालक्षणेमांनियोजयसिकेशवेतिचयदाह तच्चनोपपद्यते १

आनन्दगिरिकृतटीका।

पूर्व्वोत्तराध्याययोःसम्बन्धंपूर्व्वस्मिन्नध्यायेदृत्तमर्थंसंक्षिप्यानुवदति शास्त्रस्येति गीताशास्त्रप्रारम्भापेक्षितंहेतुफलभूतंबुद्धिद्वयंभगवतोपदिष्टमित्यर्थः प्रष्टुरर्जुनस्याभिप्रायंनिर्द्दिष्टंदृत्तमर्थान्तरंकथयति तत्रेति अध्याययोर्बुद्धिद्वयनिर्धारणंवासम्यगर्थःपारमार्थिकेतत्त्वेतज्ज्ञानं तन्निष्ठानामशेषकामत्यागिनांकाममूलानांकर्मणामपिप्रतिपत्तिकर्मवत्तत्त्यागंकर्त्तव्यत्वेनभगवानुक्तवानित्यर्थः तथापिमोक्षसाधनेविकल्पसमुच्चययोरन्यतरस्यविवक्षितत्वबुद्ध्यासमनन्तरप्रश्नप्रवृत्तिरित्याशंक्याह उक्तेति अर्जुनस्यमनसिव्याकुलत्वंप्रश्नबीजंदर्शयितुमुक्तमर्थान्तरमनुभाषतेअर्जुनायचेति सांख्यबुद्धिमाश्रित्यकर्मत्यागमुक्त्वापुनस्तस्यैवकर्त्तव्यत्वंकथंमिथोविरुद्धंब्रवीतीत्याशंक्याह योगेति यथासांख्यबुद्धिमाश्रितानांसन्यासद्वारातन्निष्ठानांकृतार्थतोक्ता तथायोगबुद्धिमाश्रित्यकर्मकुर्व्वतोपिकृतार्थत्वमुक्तमित्याशंक्याह नतत एवेति दूरेणह्यवरंकर्मबुद्धियोगादितिदर्शनादितिशेषः बुद्धिव्याकुलत्वंप्रश्नबीजं प्रतिलभ्यप्रश्नंकरोतीत्याह तदेतदिति साक्षादेवश्रेयःसाधनंज्ञानमन्येभ्योदर्शितं तदित्युच्यतेतद्विपरीतंकर्मस्वस्यानुष्ठेयत्वेनोक्तमेतदितिनिर्दिश्यते भगवदुक्तोर्थःसंदिह्यमानस्यनिर्णयाकाङ्क्षयाप्रश्नप्रवृत्तेरस्ति पुर्व्वोत्तराध्याययोरुत्थोत्थापकलक्षणासङ्गतिरित्यर्थः अर्जुनस्यप्रश्ननिमित्तंपर्य्याकुलत्वंप्रश्नपूर्व्वकंप्रपञ्चयति कथमित्यादिना यद्विसाक्षादेवश्रेयःसाधनंसांख्यशब्दितंपरमार्थतत्त्वविषयबुद्धौनिष्ठारूपंतदन्यस्मैश्रेयोर्थिनेभक्तायश्रावयित्वामांपुनरभक्तमश्रेयोर्थिनमिवकर्मणिघु

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

व्योक्तविपरीतेकथंभगवान्नियोक्तुमर्हति इत्यर्जुनस्यपर्याकुलीभावोयुक्तइतिसम्बन्धः ज्ञाननिष्ठातोवैपरीत्यंस्फोरयितुंकर्मविमिनष्टि द्वेष्टीति युद्धेहिचलकर्मणिद्वेष्टोऽनेकोऽनर्थोगुरुस्यात्हिंसादिस्तेन सम्बन्धेनबुद्धिशुद्धिद्वारापिवर्त्तमानेजन्मन्येवफलमित्यनियतेममभक्त्यथेयोऽर्थिनोनियोगोभगवतायुक्तोनभवतीतिशेषः यथोक्तं निमित्तंप्रश्नस्ययुक्तंतदनुगुणत्वात्तस्येतिद्योतकमाह तदनुरूपश्चेति ज्ञाननिष्ठानां कृतार्थताकर्मनिष्ठानान्तुनतथेत्युक्ते विभागभागिशास्त्रमित्यत्रलोकेस्मिन्नित्यादिवाक्यापिद्योतकत्वंदर्शयति प्रश्नेति साक्षाद्वेश्रेयःसाधनमन्येभ्योभगवतोक्तं नतुमत्त्वमितिमत्वाव्याकुलीभूतः सन्पृच्छतीतिस्वाभिप्रायेणसम्बन्धमुक्त्वाटीकारा भिप्रायंदूषयति केचित्त्विति ज्ञानकर्मणोःसमुच्चयमवधारयितुंप्रश्नाङ्गीकारेसमुच्चयावधारणेनैवप्रतिवचनमुचितंनतथाभगवताप्रतिवचनमुक्तं तथाचप्रश्नस्यसमुच्चयविषयत्वावगमात्प्रत्युक्तेश्चासमुच्चयविषयत्वात्तयोर्मिथोविरोधोटीकारमतेत्यादित्यर्थः किञ्चकेवलंप्रश्नप्रतिवचनयोरेवपरमतेपरस्परविरोधोनभवत्यपितुपरेषांस्वग्रन्थेपिपूर्वापरविरोधोऽस्तीत्याह यथाचेतिआत्मनाटीकारैरितियावत् स्वग्रन्थयोगीताशास्त्रारम्भोपोद्घातःइहेतितृतीयाध्यायारम्भंपराभृशति तद्वैविदखन्नाकाङ्क्षामाह कथमिति पूर्वापरविरोधंस्फोरयितुंसम्बन्धग्रन्थोक्तमर्थमनुवदति तत्रेति परकीयाटीकाःसन्न्यासमुल्लिख्यतेसम्बन्धग्रन्थे तावदयमर्थउक्तइतिसम्बन्धः तमेवार्थंविवृणोति सर्वेषामिति सर्वकर्मसंन्यासपूर्वकज्ञानादेवकेवलात् कैवल्यमित्यस्मिन्नर्थेशास्त्रस्यपर्य्यवसानान्नसमुच्चयोविवक्षितस्तत्रेत्याशंक्याह पुनरिति उक्तोगीतार्थोटीकारैरेवकर्मत्यागायोगेनविशेषितत्वान्नाविवक्षितोभवितुमुत्सहते तथाचश्रौतानिकर्माणित्यक्त्वाज्ञानादेवकेवलान्मुक्तिर्भवतीत्येतन्मतं नियमेनैवयावज्जीवश्रुतिभिर्विप्रतिषिद्धत्वान्नाभ्युपगन्तुमुचितमित्यर्थः तथापिकथंमिथोविरोधधीरित्याशंक्याह इहत्विति प्रथमतोहिसम्बन्धग्रन्थेसमुच्चयोगीतार्थःप्रतिपाद्यत्वेनटीकृताप्रतिज्ञातः श्रौतकर्मपरित्यागश्चश्रुतिविरोधादेवनसम्भवतीत्युक्तं तृतीयाध्यायारम्भेपुनःसंन्यासिनांज्ञाननिष्ठाकर्मिणांकर्मनिष्ठेत्याश्रमविभागमभिदधतापूर्वंप्रतिषिद्धकर्मत्यागाभ्युपगमान्मिथोविरोधोदर्शितःस्यादित्यर्थः ननुयथाभगवताप्रतिपादितं तथैवटीकृताव्याख्यातमितिनतस्याप राधोस्तीत्याशंक्याह तत्कथमिति नहिदृहभगवान्विरुद्धमर्थमभिधत्तेसर्वज्ञस्य

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

परमाप्तस्यविरुद्धार्थवादित्वायोगात्किन्तुतदभिप्रायापरिज्ञानादेवव्याख्यातुर्विरुद्धार्थवादितेत्यर्थः भगवतोविरुद्धार्थवादित्वाभावेपिश्रोतुर्विरुद्धार्थप्रतिपत्तिंप्रतीत्यव्याचक्षाणोवृत्तिकारोनापराध्यतीत्याशंक्याह श्रुतावेति अर्जुनोहिश्रोता सोपिबुद्धिपूर्व्वकारीभगवदुक्तमेवावधारयन्नविरुद्धमर्थमवधारयितुमर्हति तथाच परस्यैवविरुद्धार्थवादितेत्यर्थः विरोधंपरिहरन्नाशङ्कते तत्रेति सम्बन्धग्रन्थे हिवृत्तिकारस्यैतदभिप्रेतंगृहस्थानामेवसतां परिपक्वज्ञानमन्तरेणयावज्जीवश्रुतिचोदिताग्निहोत्रादित्यागेन केवलादेवात्मज्ञानान्मोक्षमवेक्ष्यमाणानां यावज्जीवादिशास्त्रैरसौनिषिध्यतेनतुस्वरूपेणैवकर्मत्यागीज्ञानान्मोक्षोवानिषेद्धुमिष्यते ततोयेपुनरध्यायेकर्मत्यागिनांगृहस्थेभ्योव्यतिरिक्तानामेव केवलादात्मज्ञानान्मोक्षोविवक्षते अतोभिन्नविषयत्वान्निषेधाभ्यनुज्ञानयोर्नविरोधाशङ्केत्यर्थः विधान्तरेणविरोधंदर्शयन्नुत्तरमाह एतदपीति विरोधमेवाकाङ्क्षाद्वारासाधयति कथमित्यादिना श्रौतंकर्मगृहस्थानामवश्यमनुष्ठेयमित्यनेनाभिप्रायेणतेषां केवलादात्मज्ञानान्मोक्षोनिषिध्यतेनतुगृहस्थानांज्ञानमात्रायत्तंमोक्षंप्रतिषिद्ध्यन्येषांकेवलज्ञानाधीनोमोक्षोविवक्ष्यते आश्रमान्तराणामपिस्मार्त्तेनकर्मणासमुच्चयाभ्युपगमादितिचोदयति अथेति एतत्पदपरामृष्टंवचनमेवाभिनयति केवलादिति ननुगृहस्थानांश्रौतकर्मराहित्येऽपिसतिस्मार्त्तेकर्मणिकुतोज्ञानस्यकेवलत्वंलभ्यते येननिषेधोक्तिरर्थवती तत्राह तत्रेति प्रकृतवचनमेवसम्यगर्थःप्रधानंहिश्रौतंकर्मतद्राहित्येसतिस्मार्त्तस्यकर्मणःसतोऽप्यसद्भावमभिप्रेत्य ज्ञानस्यकेवलत्वमुक्तमितियुक्तानिषेधोक्तिरित्यर्थः गृहस्थानामेवश्रौतकर्मसमुच्चयोनान्येषांअन्येषान्तुस्मार्त्तेनेतिपक्षपातेहेत्वभावंमन्वानःसन्परिहरति एतदपीति तमेवहेत्वभावंप्रश्नद्वाराविष्टणोति कथमित्यादिना गृहस्थानांश्रौतस्मार्त्तकर्मसमुच्चितंज्ञानंमुक्तिहेतुरित्यभ्युपगमात् केवलस्मार्त्तकर्मसमुच्चिताच्चतोनमुक्तिरितिनिषेधोयुज्यते ऊर्द्ध्वरेतसान्तुस्मार्त्तकर्ममात्रसमुच्चितात् ज्ञानान्मुक्तिरितिविभागेनास्तिहेतुरित्यर्थः पक्षपातेकारणंनास्तिइत्युक्त्वापक्षपातपरित्यागेकारणमस्तीत्याह किञ्चेति गृहस्थानामपिब्रह्मज्ञानंस्मार्त्तैरेवकर्मभिःसमुच्चितंमोक्षसाधनंब्रह्मज्ञानत्वादूर्द्ध्वरेतःसुव्यवस्थितब्रह्मज्ञानवदितिपक्षपातत्यागेहेतुंस्फुटयति यदीत्यादिना यदिगृहस्थानांब्रह्मज्ञानंस्मार्त्तैरेवकर्मभिःसमुच्चितंतदीयं ज्ञानंमोक्षस्यहेतुरिति

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

विवक्षितंतदातान्प्रतियावज्जीवश्रुतिर्विरुध्येत यदिस्मार्त्तैरपिकर्मभिःसमुच्चितं तदीयंज्ञानंमोक्षसाधनंविवक्षितंतदासिद्धसाध्यतेति प्रागुक्तमभिप्रेत्यचोदयति अथेति आश्रमान्तराणांतर्हिकेवलादेवज्ञानान्मुक्तिरिति प्रागुक्तविरोधतादवस्थ्यमित्याशंक्याह उर्द्धरेतसांत्विति यथोक्तविभागेगार्हस्थ्यंक्लेशात्मकंकर्मवाऊल्यात्अनुपादेयमापद्येतेति दूषयति तत्रेति साधनभूयस्त्वमिति न्यायमाश्रित्य शङ्कते अथेति क्लेशवाऊल्योपेतंयौतंस्मार्त्तञ्चवऊकर्मतस्यानुष्ठानात्गृहस्थस्य मोक्षःस्यादेवेत्यर्थः एवकारनिरस्यंदर्शयति नाश्रमान्तराणामिति तेषांनास्ति मुक्तिरित्यत्रयावज्जीवादिश्रुतिविहितावश्यानुष्ठेयकर्मराहित्यंहेतुंसूचयति श्रौतेति शास्त्रविरोधेन्यायस्यनिरवकाशत्वमभिप्रेत्यदूषयति तदपीति ऋकाश्रम्य स्मृत्यागार्हस्थ्यस्यैवप्राधान्यादनधिकृतान्धादिविषयंकर्मसंन्यासविधानमित्याशंक्याह ज्ञानाङ्गत्वेनेति नखल्वनधिकृतानामन्धादीनांसंन्यासःश्रवणाद्यावृत्तिद्वारा ज्ञानाङ्गंभवितुमलंतेषांश्रवणाद्यभ्याससामर्थ्यादतः श्रुत्यादीनांविरोधेनास्तिगार्हस्थ्यस्यप्राधान्यमित्यर्थः तस्यप्राधान्याभावेहेत्वन्तरमाह आश्रमेति ब्रह्मचर्य्यंसमाप्यगृहीभवेत्गृहाद्वनीभूत्वाप्रव्रजेत् यदिवेतरथाब्रह्मचर्य्यादेवप्रव्रजेत्गृहाद्वावनाइतिश्रुतौतस्याश्रमविकल्पमेकेब्रुवतेइति यमिच्छेतमावसेदित्यादिस्मृतौचाश्रमाणांसमुच्चयेनविकल्पेनचाश्रमान्तरमिच्छन्तंप्रतिविधानान्नगार्हस्थ्यस्यप्रधानत्वमित्यर्थः यदिसर्वेषामाश्रमाणांश्रुतिस्मृतिमूलत्वंतर्हितत्तदाश्रमविहितकर्मणाज्ञानेनसमुच्चयःसिध्यतीतिशङ्कते सिद्धस्तर्हीति यद्यपिज्ञानोत्पत्तावामकर्मणांसाधनत्वं तथापिज्ञानमुत्पन्नंनैवफलेसहकारित्वेनतान्यपेक्षते अन्यथासंन्यासविध्यनुपपत्तेरितिदूषयति नमुमुक्षोरिति संन्यासविधानमेवानुक्रामति व्युत्थायेत्यादिना एषणाभ्योवैमुख्येनोत्थानंतत्परित्यागःआश्रमसम्यक्त्वानन्तरंतत्रविहितकर्मकलापानुष्ठानमपिकर्त्तव्यमित्याह अथेति प्रागुक्तानांसत्यादीनामल्पफलत्वान्नग्रासस्यचज्ञानद्वारामोक्षफलत्वादित्याह तस्मादिति अतिरिक्तमतिशयत्वंमहाफलमिति यावत् प्रकृतकर्मभ्यःसकाशान्नग्रासएवातिशयवानासीदित्युक्तेऽर्थवाक्यान्तरंपठति न्यासएवेति लोकत्रयहेतुंसाधनत्रयंपरित्यज्यसंसाराद्विरक्ताःसंन्यासपूर्वकादात्मज्ञानादेवप्राप्नवन्तोमोक्षमित्याह नकर्मणेति सतिवैराग्येनास्तिकर्मापेक्षासत्यांसामग्र्यांकार्य्यापेक्षानुपपत्तेरित्याह ब्रह्मचर्य्यादेवेति इत्याद्याः सर्व्व

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

कर्मसंन्यासविधायिन्यः श्रुतयोभवन्तीतिशेषः आत्मानमेवलोकमिच्छन्तः प्रव्रजन्तीत्यादिवाक्यसंग्रहार्थमादिपदं तत्रैवस्मृतिमुदाहरति त्यजेति धर्माधर्मयोः सत्यानृतयोश्चसंसारारम्भकत्वान्मुमुक्षूणात्तत्त्यागेप्रयतितव्यमित्यर्थः त्यक्त्वाभिमानस्यापितत्त्वतःस्वरूपसम्बन्धाभावात्त्यज्यत्वमविशिष्टमित्याह येनेति 'अनुभवानुसारेणप्रमाट्टताप्रमुखस्यसंसारस्यदुःखफलत्वमालक्ष्य मोक्षहेतुसम्यक्ज्ञानसिद्धयेब्रह्मचर्य्यादेवपारिव्राज्यमनुष्ठेयमित्युत्पत्तिविधिमुपन्यस्यति संसारमिति तत्त्वज्ञानमुद्दिश्यब्रह्मचर्य्यादेवकर्मसंन्यासेसामग्रीमभिदधानोविनियोगविधंसूचयति परमिति ज्ञानकर्मणोरसमुच्चयार्थंफलविभागंकथयति कर्मणेति उक्तंफलविभागमनूद्यज्ञाननिष्ठानांकर्मसंन्यासस्यकर्त्तव्यत्वमाह तस्मादिति वाक्यशेषेऽपिसर्व्वकर्मसंन्यासोविवक्षितोऽस्तीत्याह इहापीति ज्ञानार्थिनोमुमुक्षोःसंन्यासविध्यनुपपत्तिबाधितंसमुच्चयविधिवचनमित्युक्तमिदानीं मोक्षस्वभावालोचनयापिसमुच्चयवचनमनुचितमित्याह मोक्षस्यचेति अकुर्व्वन्विहितंकर्मनिन्दितञ्चसमाचरन् प्रसज्जन्नेन्द्रियार्थेषुनरःपतनमृच्छतीतिस्मृतेःमुमुक्षूणामपिप्रत्यवायनिवृत्तयेकर्त्तव्यंनित्यकर्मेतिशङ्कते नित्यानीति योयस्मिन्कर्मण्यधिकृतस्तस्यतदकरणात्प्रत्यवायोभवतिनतुकर्मानधिकारिणः संन्यासिनस्तदकरणात्प्रत्यवायःसम्भवतीतिदूषयति नासंन्यासीति तदेवस्पष्टयति नहीति समिद्धोमाध्ययनाद्यकरणात् प्रत्यवायःसंन्यासिनोनास्तीत्यर्थः तत्रव्यतिरेकोदाहरणमाह यथेति अकरणात्प्रत्यवायोत्पत्तिमभ्युपेत्योक्तं सम्प्रतिप्रतिषिद्धकरणादेवप्रत्यवायोनत्वकरणादभावात् भावोत्पत्तिर्लोकवेदविरुद्धत्वादित्याह नतावदिति ननुनित्यकर्मविधायीवेदस्तदकरणात्प्रत्यवायोभवतीतिब्रवीतितत्कथमकरणात्प्रत्यवायोनभवतीतिश्रुतिमाश्रित्योच्यतेश्रुत्यन्तरविरोधादितितत्राह यदीति विहितस्याकरणेसत्यनर्थप्राप्तेर्नित्यकर्मविधायीवेदोनर्थकत्वेनाप्रमाणमित्याशंक्याह विहितस्येति नहिविहितस्यकरणेपिदृष्टलोकप्राप्तिलक्षणंफलंभवतेष्यतेधूमादिनानयनपीड़ादिदुःखंतु प्रत्यक्षमेवाकरणेचप्रत्यवायोत्पत्तिरुभयथापिपुरुषस्यानर्थकरोवेदोऽप्रमाणमेवस्यादित्यर्थः नन्वभावस्यापिभावोत्पादनसामर्थ्यंवेदः सम्पादयिष्यतितथाचविहिताकरणप्रत्यवायपरिहारोविहितकरणेफलिष्यतीतिनेत्याह तथाचेति लोकप्रसिद्धपदार्थशक्त्याश्रयणेनशास्त्रप्रवृत्तेरङ्गीकारात्पूर्व्वशक्त्याधानायोगात् ज्ञापकमेवशास्त्रमित्यर्थः कारकत्वे

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

चतस्याप्रमाण्यमप्रत्याहंस्यादित्याह कारकमिति भवतुशास्त्रस्याप्रामाण्यमित्या शंक्यापौरुषेयतयाऽशेषदोषानागन्धितत्वान्नैवमित्याह नचेति अनिर्व्वाच्यानुप लम्भस्यसम्बेदनमभावज्ञानेकारणसमीहितसाधनज्ञानंतुचरणन्यासादिप्रवृत्तिका रणमित्यङ्गीकृत्वोपसंहरति तस्मादिति अकरणात्प्रत्यवायोत्पत्तिप्रसङ्गवस्तच्छ ब्दार्थः संन्यासिनांज्ञाननिष्ठानांकर्मसंन्यासित्वादेवकर्मासम्भवेफलितमाह अत इति समुच्चयानुपपत्तौहेत्वन्तरमाह ज्यायसीति प्रश्नानुपपत्तिमेवप्रपञ्चयति यदिहीति समुच्चयोपदेशेप्रश्नैकदेशानुपपत्तेश्चनतदुपदेशोपपत्तिरित्याह अर्जुना येति कर्मण्येवाधिकारस्तेमाफलेषुकदाचनेति अर्जुनंप्रत्युपदेशात्तंप्रतिज्यायसी बुद्धिर्नोक्तेतियुक्तं तत्किमित्यादुपालम्भवचनमित्याशंक्याह नचेति येनकल्पनेन ज्यायसीचेदित्यारभ्यतत्किंकर्मणीत्युपालम्भात्माप्रश्नः स्यात्तथानयुक्तंकल्पयितुंए षातेऽभिहितासांख्येबुद्धिरितिवचनविरोधादितियोजनाकस्मिन्पक्षेतर्हिप्रश्नस्योप पत्तिरित्याशंक्याह यदीति भगवदुक्तेऽर्थेप्रष्टुर्विवेकाभावात्प्रश्नःस्यादित्याशंक्यपूर्वो क्तमेवाधिकंविवक्षयास्मारयति अविवेकतइति भगवतोऽपिप्रतिवचनमज्ञाननिमि त्तंप्रश्नानुरूपत्वादित्याशंक्याधिकंदर्शयति नचेति भगवतःसर्व्वज्ञत्वप्रसिद्धिविरो धादज्ञानाधीनप्रतिवचनायोगादित्यर्थः इतश्चसमुच्चयःशास्त्रार्थोनभवतीत्याह अ स्माच्चेति कस्तर्हिशास्त्रार्थोविवक्षितस्तत्राह केवलादिति ज्ञानकर्मणोःसमुच्चयानु पपत्तौकारणान्तरमाह ज्ञानेति वाक्यशेषवशादपिसमुच्चयस्याशास्त्रार्थतेत्याह कु रुकर्मवेति प्राथमिकेनसम्बन्धग्रन्थेनसमस्तशास्त्रार्थसंग्राहकेणतद्विवरणात्मनोऽस्य सन्दर्भस्यनास्तिपौनरुक्त्यमितिमत्वाप्रतिपदंव्याख्यातुंप्रश्नैकदेशंसमुत्थापयति ज्या यसीचेदिति वेदाश्चेत्प्रमाणमितिवच्चेदित्यस्यनिश्चयार्थत्वंव्यावर्त्तयति यदिति बुद्धि शब्दस्यान्तःकरणविषयत्वंव्यवच्छिनत्ति ज्ञानमिति पूर्व्वार्द्धेऽक्षरयोजनोक्त्वास मुच्चयाभावेतात्पर्य्यमाह यदीति इष्टेभगवतेतिशेषः एकंज्ञानंकर्मासमुचितंमितिया वत् ज्ञानकर्मणोरभीष्टेसमुच्चयेसमुच्चितस्यश्रेयःसाधनस्यैकत्वात्कर्मणः सकाशात् ज्ञानस्यपृथक्करणमयुक्तमित्यर्थः एकमपिसाधनंफलतोऽतिरिक्तंकिंनस्यादित्याशंक्या ह नहीति नचकेवलात्कर्मणोज्ञानस्यकेवलस्यफलतोऽतिरिक्तत्वंविवक्षित्वापृथक्क रणंसमुच्चयपक्षेप्रत्येकंश्रेयःसाधनत्वानभ्युपगमादितिभावः पूर्व्वार्द्धस्थेवोत्तरार्द्धस्या पिसमुच्चयपक्षेतुल्यानुपपत्तिरित्याह तथेति दूरेणह्यवरंकर्मेत्यत्रकर्मणःसकाशा त्तुबुद्धिःश्रेयस्करीभगवतोक्ताकर्मचबुद्धेःसकाशादश्रेयस्करमुक्तं तथापितदेवकर्मक

CC-0. In Public Domain. Digitized by eGangotri

व्यामिश्रेणेववाक्येनबुद्धिंमोहयसीवमे तदेकंवदनिश्चित्ययेनश्रेयोऽहमाप्नुयां २

आनन्दगिरिकृतटीका।

र्मण्येवाधिकारस्तेमाफलेष्वितिस्निग्धंशिष्यंभक्तञ्चमांप्रतिकुर्व्वितिभगवान् प्रतिपादयति तत्रकारणानुपलम्भादयुक्तमतिक्रूरेकर्मणिभगवतोमन्नियोजनमितियदर्जुनोब्रवीति तच्चसमुच्चयपक्षेऽनुपपन्नंस्यादित्यर्थः १

यत्तुटीकारैरुक्तंस्मार्त्तेनचकर्मणासमुच्चयोगृहस्थानांश्रेयःसाधनमितरेषांस्मार्त्तेनैवेतिभगवतोक्तमर्जुनेनचनिर्द्धारितमितितदेतदनुवदति अथेति।

भाषा अनुवाद।

हेअनघनिःपापअर्जुन यहवातकहिचुकाहूंतहांजोमोक्षकेहेतुरूपज्ञानतथाकर्मयेदोनोनिष्ठामैंपृथकपृथककहेअलग२कहेहोता याअभीजोतुमसेकहाइसीमेंपृथककरिकहाहोता तोअलक्तादोनोकेवीचजोउचितहो सोनिश्चयकरकहो यहतुमाराकहनाठीकथा परन्तुमैनेतोऐसाकहानहींकेवलदोनोहींपक्षसेएकज्ञाननिष्ठाहीकोकहा क्योंकिगौणऔमुख्यफलदायककर्मयोगऔज्ञानयोगसेभिन्नभिन्नऐसीएकज्ञाननिष्ठाईकोकहा सोभीअधिकारीकेभेदसेजैसाअधिकारीहोवैसाआचणकरै औरदोनोकाअधिकारीएककैसेहोगाजोतुमकहतेहो किदोनोमेंसेएककहो सोशुद्धअन्तःकरणहोनेसेअधिकारीदोप्रकारकेहैं इससेदोमतकहेगयेहैं सोईदोप्रकारब्रह्मनिष्ठामोक्षप्राप्तिकीउपायपूर्व्वअध्यायमेंहमनेस्पष्टकहाहै अबउक्तदोनोमतकानिर्णयकरतेहैं किसांख्यकहेशुद्धअन्तःकरणज्ञानमार्गमेआरूढ़पुरुषकोज्ञानपरिपाकरूपकारणसेज्ञानयोगकेद्वाराआत्माकोनिश्चयकरनेवालीध्यानआदिनिष्ठा औरधर्म्याद्धियुद्धाच्छ्रेयोऽन्यत्क्षत्रियस्यनविद्यतेइत्यादिहेतोकोंसे भगवानकर्मकोप्रधानकहाहै इसीशंकापरअर्जुनकहतेहैं किकहींतोकर्मकोप्रशंसाऔरकहींज्ञानकोवड़ाईकरतेहुयेआपकी येसन्देहकेउत्पन्नकरनेवालीबातोंसेहमारीबुद्धिज्ञानऔकर्मइनदोनोपक्षमेंभीठहरतीनहींअर्थात् येमिलीजुलीबातोंसेमेरीबुद्धिकोमोहसाकरतेआपक्याकहतेहो यद्यपिपरमकरुणामयजोआप तिनकेमोहकहांहै तौभीभ्रान्तिसेहमकोमोहकीऐसीबातैंसमझपड़तीहैं सोज्ञानऔकर्मदोनोकेवीचमे जोकल्याणकारीहोयवहीएकपक्षनिश्चयकरकेहमकोकहो याजोहमाराकल्याण इसयुद्धकर्महीसेनिश्चितकियेहौ तो इसीकोनिर्धारकरिठीकठीककहो २

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम् ।

अथस्मार्त्तेनैवकर्मणाममुच्चयःसर्वेषांभगवतोक्तःअर्जुनेनचावधारितश्चेत् तत् किंकर्मणिघोरेमांनियोजयसीत्यादिकथंयुक्तं वचनंकिञ्चव्यामिश्रेणेतिव्यामिश्रेणेव यद्यपिविविक्तामिधायीभगवान् तथापिममसन्दवुद्वेर्व्यामिश्रमिवभगवद्वाक्यंप्रतिभाति तेनममबुद्धिंमोहयसीवेतिममसन्दवुद्वेर्व्यामोहापनयायहिप्रवृत्तस्खन्तु कथंमोहयस्यतोब्रवीमिबुद्धिंमोहयसीवेतिममेतित्वंतु भिन्नकर्तृकयोर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासम्भवंयदिमन्यसेतदैवंसतितत्तयोरेकं बुद्धिंकर्मवाद्दमेवार्जुनस्ययोग्यंबुद्धिभक्त्यवस्थानुरूपमितिनिश्चित्यवदब्रूहियेनज्ञानेनकर्मणावान्यतरेणश्रेयोहमाप्नुयां इतियदुक्तंतदपिनोपपद्यतेयदिहिकर्मनिष्ठायांगुनभूतमपिज्ञानंभगवतोक्तंस्यात्तत् कथंतयोरेकंवदेतिएकविषयैवार्जुनस्यशुश्रूषास्यान्नहिभगवतोक्तमन्यतरदेव ज्ञान कर्मणोर्व्वक्ष्यामिनैवद्वयमितियेनोभयप्राप्त्यसम्भवमात्मनोमन्यमानएकमेवप्रार्थयेत्

आनन्दगिरिकृतटीका ।

तवापितत्किमित्याद्युपालम्भवचनमनुपपन्नं कर्ममात्रसमुच्चयवादिनोभगवतोनि योजनाभावादिति दूषयति तत्किमिति इतश्चप्रश्नसमुच्चयानुसारीनभवती त्याह किञ्चेति भगवतोविविक्तार्थवादित्वादयुक्तं व्यामिश्रेणेत्यादिवचनमित्याशं क्याह यद्यपीति यदिभगवद्वचनंसंकीर्णमिवतेभाति तर्हितेनत्वदीयबुद्धिव्यामोह नमेवतस्यविवक्षितमिति किमिति मोहयसीवेत्युच्यते तत्राह ममेति ज्ञानकर्मणो मिथोविरोधात्युगपदेकपुरुषाननुष्ठेयतयाभिन्नकर्तृकेकथ्येते तथाचतयोरन्यतर स्मिन्नेवत्वंनियुक्तोनतुतेबुद्धिव्यामोहनमभिमतमितिभगवतोमतमनुवदति त्वमि

स्वामिकृतटीका ।

एवंतावदशोच्यानन्वशोचस्त्वमित्यादिनाप्रथमंमोक्षसाधनत्वेनदेहात्मविवे कबुद्धिरुक्तातदनन्तरमेषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृणुइत्यादिनाकर्मचो क्तंनचतयोर्गुणप्रधानभावःस्पष्टंदर्शितः तत्रबुद्धियुक्तस्यस्थितप्रज्ञस्य निष्क्रियत्वनि यतेन्द्रियत्वनिरहङ्कारत्वाद्यभिधानादेषाव्राह्मीस्थितिःपार्थेति सप्रशंसमुपसंहा राच्चबुद्धिकर्मणोर्मध्येबुद्धेःश्रेष्ठत्वंभगवतोऽभिप्रेतंमन्वानोऽर्जुनउवाच ज्यायसीचेदि ति कर्मणःसकाशान्मोक्षेऽन्तरङ्गत्वेनबुद्धिर्ज्यायसीअधिकतराश्रेष्ठाचेत्तवसम्मता तर्हिकिमर्थंतत्स्याद्युद्धस्वेतितस्मादुत्तिष्ठेतिचवारंवरंवदन् घोरेहिंसात्मकेकर्म णिमांप्रवर्त्तयसि १

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच लोकेऽस्मिन्द्विविधानिष्ठा पुराप्रोक्तामयानघ
ज्ञानयोगेनसांख्यानां कर्म्मयोगेनयोगिनां ३

आनन्दगिरिकृतटीका।

ति तदेकमित्यादिश्लोकार्द्धेनोत्तरमाह तत्रेति उक्तंभागतमतंसम्यग्व्यापरा मृश्यते एकमित्युक्तप्रकारोक्तिः एकमित्युक्तमेवस्पष्टयति बुद्धिमिति निश्चयप्र कारंप्रकटयति इदमिति योग्यत्वंस्पष्टयति बुद्धीति अस्यहिज्ञानेन्द्रियस्यसतोऽ न्तःकरणस्यदेहशक्तेःसमरसमारम्भावस्थायाश्चेदमेवज्ञानंकर्मवानुगुणमिति नि र्द्धार्य्यब्रूहि इत्यर्थः निश्चित्यान्यतरोक्तौ तेनश्रोतुःश्रेयोवाप्तिफलमाह येनेति तदेकमित्यादिवाक्यस्याक्षरोत्थमर्थमुक्त्वासमुच्चयस्यशास्त्रार्थत्वाभावेतात्पर्य्यमाह

स्वामिकृतटीका।

ननुधर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यतइत्यादिनाकर्मणोऽपिश्रेष्ठत्वमुक्तमेवे त्याशंक्याह व्यामिश्रेणेति क्वचित्कर्मप्रशंसाक्वचित्ज्ञानप्रशंसेत्येवंव्यामिश्रंसन्देहो त्पादकमिवयद्वाक्यंतेनमेमतिमुभयत्रदोलायितांकुर्व्वन्मोहयसीवपरमकारुणिक स्यतवमोहकत्वंनास्त्येव तथापिभ्रान्त्यामैवंभाति इतीवशब्देनोक्तं अतउभयोर्मध्ये यन्निश्चितं तदेकंनिश्चित्यवदेति यद्वाअहंइदमेवश्रेयःसाधनमिति निश्चित्यैनानुष्ठि तेनश्रेयोमोक्षमहमाप्नुयांप्राप्स्यामि तदेवैकंनिश्चित्यवदेत्यर्थः २

भाषा अनुवाद।

अर्जुनकीप्रश्नकेअनुरूपउत्तरकरतेहुयेश्रीभगवानकहतेहैं किइसलोकमे शास्त्रकेअर्थअनुसारचलनेवालेब्राह्मणक्षत्रीवैश्य इनतीनिवर्णोकेअर्थदोप्रकारकी निष्ठापूर्व्वहीअर्थात् सृष्टिकेप्रथमही उनकाश्रेयसाधनकहे मुक्तिकादेनहारवेदा र्थसंप्रदायप्रगटकरतेहुयेमैनेइसरूपब्रह्मपरताकहीहै यथातानिसर्वाणिसंयम्य युक्तआसीतमत्परः इसश्लोकसेऔरजोज्ञानमार्गमेनहींप्राप्तहैं उनलोगोंकोचित्त शुद्धिकेद्वाराज्ञानमार्गपरआरूढ़होनेकेअर्थ उसकीउपायरूप कर्म्मयोगके अधि कारियोंकोकर्म्मयोगसेनिष्ठाअर्थात् ब्रह्मपरता कहीगईहै यथाधर्म्याद्धियुद्धाच्छ्रे योऽन्यत्क्षत्रियस्यनविद्यते इत्यादिश्लोकोंमेंकहाहै अतएवचित्तशुद्धिअशुद्धिदोअ वस्थाभेदसेदोप्रकारब्रह्मपरता कथित भईहैं परतौभीतुमसेप्रकाशकरि कहेखुल सासेकहिदिया किएषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृणु इसश्लोकसेफिरि भीसन्देहकरतेहौ तोवडाआश्चर्य्यहै यहअनघसंबोधनसेजनायाभगवानने ३

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

प्रश्नानुरूपमेव प्रतिवचनंश्रीभगवानुवाच लोकेऽलोकेऽस्मि ्स्मिन्निति शास्त्रार्थानुष्ठानाधिकृतानांत्रैवर्णिकानांद्विविधाद्विप्रकारानिष्ठास्थितिरनुष्ठेयतात्पर्यं पुरापूर्व्वं सर्गादौप्रजाःसृष्ट्वा तासामभ्युदयनिःश्रेयसप्राप्तिसाधनंवेदार्थसंप्रदायेंआविष्कुर्व्वताप्रोक्तामयासर्व्वज्ञेनईश्वरेण हेअनघअपापतत्रकासाद्विधानिष्ठेत्याह ज्ञानेति तत्रज्ञानयोगेनज्ञानमेवयोगस्तेनसांख्यानामात्मानात्मविषयविवेकज्ञानवतांब्रह्मचर्य्याश्रमादेवकृतसंन्यासानांवेदान्तविज्ञानसुनिश्चितार्थानांपरमहंसपरिव्राजकानांब्रह्मण्येवावस्थितानांनिष्ठाप्रोक्ता कर्म्मयोगेनकर्म्मैवयोगःकर्मयोगस्तेनकर्मयोगेनयोगिनांकर्मिणांनिष्ठाप्रोक्तेत्यर्थः यदिचैकेनपुरुषेणैकस्मैपुरुषार्थायज्ञानंकर्म्मचसमुच्चित्यानुष्ठेयंभगवतेष्टमुक्तंवक्ष्यमाणंवागीतासुवेदेषुचोक्तंकथमिहार्ज्जुनायोपसन्नाय प्रियायविशिष्टभिन्नपुरुषकर्त्तृकेएवज्ञानकर्मनिष्ठेब्रूयात् यदिपुनरर्ज्जुनोज्ञानंकर्मचद्वयंश्रुत्वास्वयमेवानुष्ठास्यतिअन्येषांतुभिन्नपुरुषानुष्ठेयतांवक्ष्यामीति मतंभगवतः कल्प्येत् तदारागद्वेषवानप्रमाणभूत भगवान्कल्पितःस्यात्तच्चायुक्तंतस्मात्कयापियुक्त्यानसमुच्चयोज्ञानकर्मणोः ३

आन्दगिरिकृतटीका ।

यदिहीति गुणभूतमपिइत्यादिनाप्रधानभूतमपिचेति विवक्षितंनतूभयप्राप्त्यसम्भवमात्मनोमन्यमानस्यार्जुनस्यान्यतरविषयशुश्रूषाभविष्यति नेत्याह नहीति यथोक्तभगवद्वचनाभावेद्वयप्राप्त्यसम्भवबुद्ध्या नान्यतरप्रार्थनासम्भवतीत्याह येनेति न हितथाविधंभगवद्वनंभवतेष्टंभगवतःसमुच्चयवादित्वाङ्गीकारादतस्तदभावादुक्तबुद्ध्या नयुक्तान्यतरप्रार्थनेत्यर्थः २

समुच्चयविरोधितयाप्रश्नंव्याख्यायतद्विरोधित्वेनैवप्रतिवचनमुत्थापयति प्रश्नेति येयंव्यवहारभूमिरुपलभ्यते तत्रत्रैवर्णिकाः ज्ञानंकर्म्मवाशास्त्रीयमनुष्ठातुमधिक्रियन्ते तेषांद्विधास्थितिर्म्मयाप्रोक्तेतिपूर्व्वार्द्धंयोजयति लोकेऽस्मिन्निति स्थितिमेवव्याकरोति अनुष्ठेयेति पूर्व्वंप्रवचनप्रसङ्गं प्रदर्शयन् प्रवक्तारंविशिनष्टि सर्गादाविति प्रवचनस्यायथार्थत्वशङ्काम्वारयति सर्व्वज्ञेनेति अर्ज्जुनस्यभगवदुपदेशश्रवणेयोग्यत्वंसूचयति अनघेति निर्द्धारणार्थेतत्रेति सप्तमीज्ञानंपरमार्थवस्तुविषयंतदेवयोगशब्दितं युज्यते अनेनब्रह्मणेति व्युत्पत्तेस्तेननिष्ठेत्यनुवर्त्तते उक्तज्ञानोपायमुपदिदिक्षुःसांख्यशब्दार्थमाह आत्मेति तेषामेवकर्म्मनिष्ठत्वंव्यावर्त्तयति ब्रह्मचर्य्येति

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

तेषांजपादिपारवश्येनश्रवणादिपराङ्मुखत्वंपराकरोति वेदान्तेति उक्तविशेषणवतांमुख्यसंन्यासित्वेनफलावश्यत्वंदर्शयति परमहंसेति कर्म्मवर्णाश्रमविहितंधर्म्माख्यंतदेवयुज्यते तेनाभ्युदयेनेति योगस्तेननिष्ठाकर्म्मिणांप्रोक्तेत्यनुषङ्गंदर्शयन्नाह कर्म्मैवेत्यादिना एवंप्रतिवचनवाक्यस्थान्येवाक्षराणिव्याख्याय तस्यैवतात्पर्य्यार्थंकथयति यदिचेति दृष्टस्यापिदुर्बोधत्वमाशंक्याह उक्तमिति ज्ञानस्यापिमूलविकलतयाविभ्रमत्वमाशंक्याह वेदेष्विति तस्याग्रिम्यत्ववुद्ध्यान्यथाकथनमित्याशंक्याह उपसन्नायेति तथापितस्मिन्नौदासीन्यादन्ययोक्तिरित्याशंक्याह प्रियायेति ब्रवीतिचभिन्नपुरुषकर्त्तृकंनिष्ठाद्वयंतेनसमुच्चयोभगवदभीष्टः शास्त्रार्थोनभवतीतिशेषः नन्वर्जुनस्यप्रेक्षापूर्व्वकारित्वाज्ज्ञानकर्म्मश्रवणानन्तरमुभयनिर्देशानुपपत्त्यासमुच्चयानुष्ठानंसम्मतस्यतेतद्व्यतिरिक्तानान्तु ज्ञानकर्म्मणोर्भिन्नपुरुषानुष्ठेयत्वंश्रुत्वाप्रत्येकंतदनुष्ठानंभविष्यतीति भगवतोमतं कल्पते तस्यार्जुनेऽनुरागातिरेकादितरेषुचतदभावादिति तत्राह यदिपुनरिति अप्रमाणभूतत्वमनाप्तत्वं नचभगवतोरागादिमत्त्वेनानाप्तत्वंयुक्तं समंसर्व्वेषुभूतेषु तिष्ठन्तमित्यादिविरोधादित्याह तत्रेति निष्ठाद्वयस्यभिन्नपुरुषानुष्ठेयत्वनिर्देशफलमुपसंहरति तस्मादिति ३

स्वामिकृतटीका।

अत्रोत्तरंश्रीभगवानुवाच लोकेऽस्मिन्निति अयमर्थः यदिमयापरस्परनिरपेक्षंमोक्षसाधनत्वेनकर्म्मज्ञानयोगरूपंनिष्ठाद्वयमुक्तंस्यात्तर्हिद्वयोर्मध्येयद्वरंस्यात्तदेकंवदेति तदीयःप्रश्नःसङ्गच्छते नतुमयातथोक्तं किन्तुद्वाभ्यामेकैवब्रह्मनिष्ठोक्ता गुणप्रधानभूतयोस्तयोःस्वातन्त्र्यानुपपत्तेः एकस्याएवतुप्रकारभेदमालम्बिकारिभेदेनोक्तमिति अस्मिन्शुद्धाशुद्धान्तःकरणतया द्विविधेलोकेऽधिकारिजनेद्वैविध्येप्रकारौयस्याःसाद्विविधानिष्ठामोक्षपरता पुरापूर्व्वाध्यायेमयासर्व्वज्ञेनप्रोक्तास्तमेवोक्ताप्रकारद्वयमेवनिर्द्दिशति सांख्यानांशुद्धान्तःकरणानांज्ञानभूमिकामारूढानांज्ञानपरिपाकार्थंज्ञानयोगेनध्यानादिनानिष्ठाब्रह्मपरतोक्ता तानिसर्व्वाणिसंयम्ययुक्त आसीत मत्परइत्यादिनासांख्यभूमिकामारूढानान्तुअन्तःकरणशुद्धिद्वारातदारोहार्थन्तदुपायभूतंकर्मयोगाधिकारिणांयोगिनां कर्मयोगेननिष्ठोक्ता धर्म्याद्धियुद्धाक्षत्रियस्यनविद्यतइत्यादिना अतएवतत्रचित्तशुद्ध्याशुद्धिरूपावस्थाभेदेनद्विविधापिनिष्ठोक्ता एषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृणुतीति ३

CC-0. In Public Domain. Digitized by eGangotri

नकर्मणामनारम्भान्नैष्कर्म्यंपुरुषोऽश्नुते नचसन्न्यसनादेवसिद्धिंसमधिगच्छति ४

शाङ्करभाष्यं ।

यदर्जुनेनोक्तं कर्मणोज्यायस्त्वंबुद्धेःतच्चस्थितमनिराकरणात्तस्याश्चज्ञाननिष्ठायाः संन्यासिनामेवानुष्ठेयत्वंभिन्नपुरुषानुष्ठेयत्ववचनाच्चभगवत एवमेवानुमतमिति गम्यते माञ्चवन्धकारणेकर्मण्येवनियोजयसीति विषण्णमनसंअर्जुनंकर्मणामनारम्भेइत्येवंमन्वानमालक्ष्याह भगवान् नकर्मणामनारम्भादिति अथवाज्ञानकर्मनिष्ठयोः परस्परविरोधादेकेनपुरुषेणयुगपदनुष्ठातुमशक्यत्वेसतीतरेतरानपेक्षयोरेवपुरुषार्थहेतुत्वेप्राप्तेकर्मनिष्ठायाः ज्ञाननिष्ठाप्राप्तिहेतुत्वेनपुरुषार्थहेतुत्वंनस्वातन्त्र्येण ज्ञाननिष्ठातुकर्मनिष्ठोपायलब्धात्मिकासतीस्वातन्त्र्येणपुरुषार्थहेतुरन्यानपेक्षेत्येतमर्थंदर्शयिष्यन्नाह भगवान् नकर्मणेति नकर्मणामनारम्भात्प्रारम्भात्कर्मणांक्रियाणांयज्ञादीनामिहजन्मनिजन्मान्तरेवानुष्ठितानामुपात्तदुरितक्षयहेतुत्वेनसत्त्वशुद्धिकारणानांतत्कारणत्वेनचज्ञानोत्पत्तिद्वारेणज्ञाननिष्ठाहेतूनां ज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्यकर्मणः यथादर्शतलप्रख्येपश्यत्यात्मानमात्मनीत्यादिस्मरणादनारम्भादननुष्ठानात् नैष्कर्म्यंनिःकर्मभावंकर्मशून्यतांज्ञानयोगनिष्ठांनिष्क्रियात्मस्वरूपेणैवावस्थानमितियावत् पुरुषोनाश्नुतेनप्राप्नोतीत्यर्थःकर्मणामनारम्भान्नैष्कर्म्यंनाश्नुतइतिवचनात्तद्विपर्य्ययात् तेषामारम्भात् नैष्कर्म्यमश्नुत इतिगम्यते कस्मात् पुनःकारणात् कर्मणामनारम्भान्नैष्कर्म्यंनाश्नुतइत्युच्यते कर्मार म्भस्यैवनैष्कर्म्योपायत्वात् नह्युपायमन्तरेणोपेयोत्तरस्तिकर्नयोगोपायत्वञ्च

भाषाअनुवाद ।

इससेयहआया किसम्पूर्णचित्तशुद्धिकेद्वारा जबतकज्ञानउत्पन्ननहोय तबतकवर्णकहेजाति औआश्रमकहेब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासइनमेंविहितजोजोकर्मसोसबकरनाउचितहै नहींतोचित्तशुद्धिकेविनाज्ञानकैसेहोसकेगा यहीभगवानकहतेहैं किकर्मकियेविनापुरुषनैष्कर्म्यजोतत्त्वज्ञानसोपावतानहीं जोकहोकि संन्यासीफेरिसर्वकर्मपरित्यागकरितत्त्वज्ञानकैसेपावतेहैं औरवेदकीश्रुतिकहतीहैं किसंन्यासधारनकरनेहीसेमुक्तिमिलतीहै फेरिकर्मकरनेसेक्याप्रयोजनहै इसशङ्कापरकहतेहैं किसेानहीं क्योंकिनिःकामकर्मकरिचित्तशुद्धिकियेविनाज्ञानकाअभावहै औरज्ञानकेविनामुक्तिप्राप्तिनहींहोती यहनिश्चयहै शुकसंन्यासहीलेनेसेपुरुषसिद्धिनहींपायजाताहै यहजानो ४

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

नैष्कर्म्यलक्षणस्यज्ञानयोगस्य श्रुताविहचप्रतिपादनात् श्रुतौतावत् प्रकृतस्यात्म लोकस्यवेद्यस्यवेदनोपायत्वेनतमेतं वेदानुवचनेनब्राह्मणाविविदिषन्ति यज्ञेनेत्या दिनाकर्मयोगस्यज्ञानयोगोपायत्वं प्रतिपादितमिहापिसंन्यासस्तुमहाबाहो दुःख माप्तुमयोगतःयोगिनःकर्मकुर्वन्तिसङ्गंत्यक्त्वात्मशुद्धयेयच्चोदानंतपश्चैवपावनानिमनी षिणामित्यादिप्रतिपादयिष्यति ननुचाभयंसर्वभूतेभ्योदत्वानैष्कर्म्यमाचरेदित्या दौकर्तव्यकर्मसंन्यासादपिनैष्कर्म्यप्राप्तिं दर्शयति लोकेचकर्मणामनारम्भान्नैष्कर्म्य मिति प्रसिद्धतरमतश्चनैष्कर्म्यार्थिनः किंकर्मारम्भेनेति प्राप्तमतआह नचसंन्यस नादेवेति नापिसंन्यसनादेवकेवलात्कर्मपरित्यागमात्रादेवज्ञानरहितात् सिद्धिं नैष्कर्म्यलक्षणां ज्ञानयोगेननिष्ठांसमधिगच्छति नप्राप्नोति ४

आनन्दगिरिकृतटीका।

किमितिभगवता बुद्धेर्ज्यायस्त्वंज्यायसीचेदित्यत्रोक्तमुपेक्षितमिति तत्राह यदर्जुने नेति किञ्चज्ञाननिष्ठायांसंन्यासिनामेवाधिकारोभगवतोऽभिप्रेतोऽन्यथातदीय विभागवचनविरोधादिति विभागवचनसामर्थ्यसिद्धमर्थमाह तस्माच्चेति तर्हि विभागवचनानुरोधादर्जुनस्यापि संन्यासपूर्विकायां ज्ञाननिष्ठायामेवाधिकारोभ विष्यतिनेत्याह माज्ञेति बुद्धेर्ज्यायस्त्वमुपेत्यापीतिचकरार्थःअर्जुनमालक्ष्यभगवाना हेतिसम्बन्धः अन्तरेणापिकर्माणिश्रवणादिभिर्ज्ञानावाप्तिर्नभविष्यतीतिपरबुद्धि मनुरुध्यविशिनष्टि कर्मेति विभागवचनवशादसमुच्चयश्चेदुभयोरपिज्ञानकर्मणोः स्वातन्त्र्येणपुरुषार्थहेतुत्वमन्यथाकर्मवत्ज्ञानमपिन स्वातन्त्र्येणपुरुषार्थंसाधयेदि त्याशंक्यसम्बन्धान्तरमाह अथवेति तर्हिज्ञाननिष्ठापिकर्मनिष्ठावत् निष्ठात्वाविशे षान्नस्वातन्त्र्येणपुरुषार्थहेतुरितिसमुच्चयसिद्धिरित्याशंक्याह ज्ञाननिष्ठात्विति न हिरज्जुतत्त्वज्ञानमुत्पन्नंफलसिद्धौसहकारिसापेक्ष्यमालक्ष्यते तथेदमपिचोत्पन्नं मोक्षायनान्यदपेक्ष्यतेतदाह अन्येति यस्यचैतत्कर्मेतिश्रुताविवकर्मशब्दस्यक्रिय माणवस्तुविषयत्वमाशंक्यव्याचष्टे क्रियाणामिति ताश्चनित्यनैमित्तिकत्वेनविभज ते यज्ञादीनामिति अस्मिन्नेवजन्मन्यनुष्ठितानांकर्मणांवुद्धिशुद्धिद्वाराज्ञानकारण त्वेब्रह्मचारिणांकुतोज्ञानोत्पत्तिर्जन्मान्तरकृतानांकर्मणांवातथात्वेगृहस्थादीनामै हिकानिकर्माणिनज्ञानहेतवःस्युरित्याशंक्यानियमंदर्शयति इहेति नेमानिसत्त्वशु द्धिकारणान्युपात्तदुरितप्रतिबन्धादित्याशंक्याह उपात्तेति तर्हितावतैवकृतार्था

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

नांकुतोज्ञाननिष्ठाहेतुत्वंतत्राहतत्कारणत्वेनेतिकर्मणांचित्तशुद्धिद्वाराज्ञानहेतुत्वे मानमाहज्ञानमिति अनारम्भशब्दस्योपक्रमविपरीतविषयत्वंव्यावर्त्तयतिअननुष्ठानादिति निष्कर्मणःसंन्यासिनःकर्मज्ञानंनैष्कर्म्यमितिव्याचष्टेनैष्कर्म्यमितिकर्माभावावस्थां व्यवच्छिनत्तिज्ञानयोगेनेति तस्याःसाधनपक्षपातित्वंव्यावर्त्तयति निष्क्रियेतिकर्मानुष्ठानोपायलब्धाज्ञाननिष्ठास्वतन्त्वापुमर्थहेतुरितिप्रकृतार्थसमर्थव्यतिरेकवचनस्यान्वयेपर्य्यवसानंमत्वाव्याचष्टे कर्म्मणामिति उक्तेऽर्थेहेतुंदृच्छति कस्मादिति जिज्ञासितंहेतुमाह उच्यतइति उपायत्वेऽपितद्भावेकुतोनैष्कर्म्यासिद्धिरित्याशंक्याह नहीति ज्ञानंयोगंप्रतिकर्मयोगस्यउपायत्वेश्रुतिस्मृतीप्रमाणयति कर्मयोगेति श्रौतमुपायोपेयत्वप्रतिपादनंप्रकटयति श्रुताविति यत्तुगीताशास्त्रेकर्मयोगस्यज्ञानयोगंप्रत्युपायत्वोपपादनंतदिदानीमुदाहरति इहापिचेति नकर्मणामित्यादिनापूर्वार्द्धंव्याख्यायोत्तरार्द्धंव्याख्यातुमाशङ्क्यति नन्विति आदिशब्देनशान्तोदान्तउपरतस्तितिक्षुः संन्यासयोगाद्यतयः शुद्धसत्त्वादित्यादि गृह्यते तत्रैवलोकप्रसिद्धिमनुकूलयति लोकेचेति प्रसिद्धतरं यतोयतोनिवर्त्ततेततस्ततोविमुच्यतेनिवर्त्तनाद्धिसर्व्वतोनवेत्तिदुःखमरावपीत्यादिदर्शनादिति शेषः लौकिकवैदिकप्रसिद्धिभ्यांसिद्धमर्थमाह अतश्चेति तत्रोत्तरत्वेनोत्तरार्द्धमवतार्य्यव्याकरोति अतआहेत्यादिना एवकारार्थमाह केवलादिति तदेवस्पष्टयति कर्मेति उक्तमेवनञ्समनुकृष्यक्रियापदेनसङ्गतिंदर्शयति नप्राप्नोतीति ४

उक्तेऽर्थेबुभुत्सितं हेतुं वक्तुमुत्तरश्लोकमुत्थापयति कस्मादिति कस्मान्न कर्मसंन्यासादेवसिद्धिमधिगच्छतीतिपूर्व्वेणसम्बन्धः कदाचित्क्षणमात्रमपिनकश्चिदकर्मकृत्तिष्ठतीत्यत्र हेतुत्वेनोत्तरार्द्धंव्याचष्टे कस्मादिति सर्व्वशब्दात्ज्ञानवा

स्वामिकृतटीका ।

अतःसम्यक्चित्तशुद्ध्यर्थंज्ञानोत्पत्तिपर्यन्तंवर्णाश्रमोचितानिकर्माणिकर्त्तव्यानित्यन्यथाचित्तशुद्ध्यभावेनज्ञानानुत्पत्तेरित्याह नकर्मणामिति कर्मणांश्रनारम्भात् अननुष्ठानान्नैष्कर्म्यंज्ञानंनाश्नुतेनप्राप्नोति ननुचैतमेवप्रव्राजिनोलोकमिच्छन्तःप्रव्रजन्तीतिश्रुत्यासंन्यासस्यमोक्षाङ्गत्वश्रुतेःसंन्यासादेवमोक्षोभविष्यतिकिंकर्मभिरित्याशंक्योक्तं नचेति नचचित्तशुद्धिंविनाकृतात्संन्यसनादेवज्ञानशून्यात् सिद्धिंमोक्षंसमधिगच्छति प्राप्नोति ४

CC-0. In Public Domain. Digitized by eGangotri

नहिकश्चित् क्षणमपिजातुतिष्ठत्यकर्मकृत् कार्य्यतेह्यवशःकर्मसर्व्वःप्रकृतिजैर्गुणैः ५

शाङ्करभाष्यं

कस्मात् पुनःकारणात्कर्मसंन्यासमात्रादेवकेवलात् ज्ञानरहितात्सिद्धिं नैष्कर्म्यलक्षणांपुरुषोनाधिगच्छतीतिहेत्वाकाङ्क्षायामाह नहीति नहियस्मात् क्षणमपिकिञ्चित् कालंजातुकदाचिदपिकश्चित्तिष्ठत्यकर्मकृत्सन्कस्मात्कार्य्यतेहियस्मादवशएवकर्मसर्व्वप्राणीप्रकृतिजैःप्रकृतितोजातैः सत्त्वरजस्तमोभिर्गुणैः अज्ञइति वाक्यशेषोयतोवक्ष्यतिगुणैर्योनविचाल्यतइति सांख्यानांपृथक्करणाद

आनन्दगिरिकृतटीका।

नपिगुणैरवशः सन्कर्मकार्य्यतेततश्चज्ञानवतःसंन्यासवचनमनवकाशंस्यादित्याशंक्याह अज्ञइतीति तमेववाक्यशेषंवाक्यशेषावष्टम्भेनव्याचष्टे यतइति आत्मज्ञानवतोगुणैरविचाल्यतयागुणातीतत्ववचनादज्ञस्यैवसत्त्वादिगुणैरिच्छाभेदेनकार्य्यकरणसंघातं प्रवर्त्तयितुमशक्यत्वाज्जितकार्य्यकरणसंघातस्यक्रियासुप्रवर्त्तमानत्वमित्यर्थः ज्ञानयोगेनेत्यादिनाऽऽक्षेपन्यायाच्चवाक्यशेषोपपत्तिरित्याह सांख्यानामिति ज्ञानिनोगुणप्रयुक्तचलनाभावेऽपिस्वाभाविकचलनवलात्कर्मयोगोभविष्यतीत्याशंक्याह ज्ञानिनांत्विति प्रत्यगात्मनिस्वारसिकचलनासम्भवेप्रागुक्तंन्यायंस्मारयति तथाचेति ५

स्वामिकृतटीका।

कर्मणाच्चसन्न्यासस्तेनासक्तिमात्रंनतुस्वरूपेणाशक्यत्वादित्याह नहिकश्चिदिति कश्चिदपिजातुकस्याञ्चिदप्यवस्थायांक्षणमात्रमपि ज्ञानीअज्ञानीवाअकर्मकृत्कर्माण्यकुर्व्वाणोनतिष्ठति अत्रहेतुः प्रकृतिजैःस्वभावप्रभवैरागद्वेषादिभिर्गुणैःसर्व्वोऽपिजनःकर्मकार्य्यतेकर्मणिप्रवर्त्ततेअवशोऽस्वतन्त्रःसन् ५

भाषा अनुवाद।

कर्मसंन्यासइसकायहअर्थहैंकिसर्व्वकर्ममेआसक्तिरहितहोनामात्र नकिएकाएकसबकर्मोकात्यागकरनाऔरशरीररहते कर्मकात्यागभीअसाध्यहै सोईकहतेहैं कदाचितकहेकिसीअवस्थामेभीक्याज्ञानीऔरक्याअज्ञानीक्षणमात्रभीमानसिकवाचिककायिककर्मकियेविनारहनहींसकताहै कारणयहकिप्रकृतिजोस्वभावतिसकेप्रभावसेरागद्वेषकहेप्रीतिविरोधआदिगुणोंमेसबमनुष्यपरतन्त्रकहेपरवशपराधीनहोकर्मकरतेहीहैं ५

CC-0. In Public Domain. Digitized by eGangotri

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ६

शाङ्करभाष्यं

ज्ञानामेवहिकर्मयोगो नज्ञानिनांज्ञानिनान्तुगुणैरचाल्यमानानांखतश्चलनाभावात्कर्मयोगोनोपपद्यते तथाचव्याख्यातंवेदाविनाशिनमित्यत्र ५

यस्त्वनात्मज्ञचोदितं कर्मनारभतइति तदसदेवेत्याह कर्मेन्द्रियाणीति कर्मेन्द्रियाणिहस्तादीनिसंयम्यसंहृत्ययआस्तेतिष्ठति मनसास्मरन्निन्द्रियार्थान्विषयान् विमूढात्माविमूढान्तःकरणोमिथ्याचारोमृषाचारः पापाचारः स उच्यते ६

आनन्दगिरिकृतटीका।

आत्मज्ञवदनात्मज्ञस्यापि तर्हिकर्माकुर्वतोनप्रत्यवायः शरीरेन्द्रियसंघातं नियन्तुमसमर्थस्यमूर्खस्यापिसंन्याससम्भवादित्याशंक्याह यस्त्विति तस्यचोदिताकरणंतच्छब्देनपराम्रश्यते तदसदिति मिथ्याचारत्वादितिभावः मिथ्याचरतामेववर्णयति कर्मेन्द्रियाणीति ६

अनात्मज्ञस्यचोदितमकुर्वतोजाग्रतोविषयान्तरदर्शनधौव्यात्मिथ्याचारस्तेनप्रत्यवायित्वमुक्त्वा विहितमनुतिष्ठतस्तस्यैवफलाभिलाषविकलस्यसदाचारत्वेनवैशिष्ट्यमाचष्टे यस्त्विन्द्रियाणीति विहितमनुतिष्ठतोमौर्ख्यात्कर्मत्यजतोवैशिष्ट्यमज्ञत्वयोजनयास्पष्टयति यस्तुपुनरिति ७

स्वामिकृतटीका।

अतोऽज्ञकर्मत्यागिनंनिन्दति कर्मेन्द्रियाणीति वाक्पाण्यादीनिकर्मेन्द्रियाणिसंयम्यनिगृह्ययोमनसाभगवद्ध्यानच्छलेनइन्द्रियार्थान् विषयान्स्मरन्नास्तेऽविशुद्धतयामनसाआत्मनिस्थैर्याभावात्समिथ्याचारः कपटाचारोदांभिकउच्यतइत्यर्थः ६

भाषा अनुवाद।

इसीसेअज्ञानकर्मत्यागीकोनिन्दाकरतेहैं किजोआत्मस्वरूपकोस्थिरनकरिकेवाकपाणिपादआदिकर्मइन्द्रियोंकोवशीभूतअर्थात् काबूकरिभगवत्केध्यानकेबहानेसेमनकोअशुद्धताकेकारणसेइन्द्रीगणकाअर्थरूपविषयोंकास्मरणमनसेकरताहै सोई मूढ़ मिथ्याचार अर्थात् नास्तिक कपटआचारकहावताहै ६

CC-0. In Public Domain. Digitized by eGangotri

यस्त्विन्द्रियाणिमनसानियम्यारभतेऽर्जुन कर्मेन्द्रियैःकर्मयोगमशक्तःसविशिष्यते ७
नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः शरीरयात्रापिचते नप्रसिध्येदकर्मणः ८

शाङ्करभाष्यम्।

यस्त्विति यस्तुपुनःकर्मण्यधिकृतोऽज्ञोबुद्धीन्द्रियाणिमनसानियम्यारभतेऽर्जुनकर्मेन्द्रियैर्वाक्पाण्यादिभिःकिमारभतेइत्याह कर्मयोगमशक्तःसन् फलाभिसन्धिवर्जितःसविशिष्यते इतरस्मान्मिथ्याचारात् ७

यतएवमतोनियतंनित्यंशास्त्रोपदिष्टंयोयस्मिन्कर्मण्यधिकृतःफलायचाश्रुतंतन्नियतं कर्मतत्कुरुत्वं हेअर्जुन यतःकर्मज्यायोधिकतरंफलतोहियस्मादकर्मणोऽकरणादनारम्भात् कथंशरीरयात्राशरीरस्थितिरपिच तेतवनप्रसिध्येत् प्रसिद्धिंनगच्छेदकर्मणोऽकरणात् अतोदृष्टःकर्माकर्मणोरर्थविशेषोलोके ८

स्वामिकृतटीका।

एतद्विपरीतः कर्मकर्त्तातुश्रेष्ठइत्याह यस्त्विन्द्रियाणीति यस्तुज्ञानेन्द्रियाणिमनसानियम्य ईश्वरपराणिकृत्वा कर्मेन्द्रियैः कर्मरूपंयोगमुपायमारभतेऽनुतिष्ठतिअशक्तःफलाभिलाषरहितः स विशिष्यते विशिष्टोभवति चित्तशुद्ध्याज्ञानवान्भवतीत्यर्थः ७

नियतमिति यस्मादेवंतस्मान्नियतंनित्यंकर्मसन्ध्योपासनादिकुरु हियस्मादकर्मणःसर्वकर्मणोऽकरणात्सकाशात् कर्मकरणंन्यायोऽधिकतरं अन्यथाह्यकर्मणःसर्वकर्मशून्यस्यतव शरीरनिर्वाहोऽपिनभवेत् ८

भाषा अनुवाद।

अबइसकेविपरीतकहेउलटाकहतेअर्थात् कर्मकारीपुरुषकोश्रेष्ठकहते हैं किजोफलकीअभिलाषरहित मनुष्यचक्षुश्रोत्रघ्राणआदिज्ञानइन्द्रियोंकोमनकेद्वारावशीभूतकरिकेअर्थात्ईश्वरमेतत्परहोसकलकर्ममेंअपनेकोअन्तर्यामीभगवानकेअधीनजानिकर्मइन्द्रियोंसेकर्मरूपयोगआरम्भकरतेहैं वेई फलाभिलाषरहितचित्तशुद्धिकेद्वाराज्ञानवानहोतेहैं औरकर्मदोषरहितहोमुक्तिलाभकरते हैं ७ जिसहेतुअैसोव्यवस्थाहै इससेतुमकर्मकरोसोईकहतेहैं किनियतकहेनित्यकर्मसंध्याउपासनआदिकर्मअनुष्ठानकरो जिसलियेकर्मनकरनेसेकर्मकरनाहीभलाहै नहींतोसबकर्मछोड़नेसेएकबारगीकर्मशून्यअचेतनकीभांतिरहनेसे। हेअर्जुनतुमारीशरीरयात्राभीकैसेनिबहैंगी अर्थात्नचलैगीतोइससेझखमारतुमकोकर्मकर्नाहींपडेगाताहै ८

CC-0. In Public Domain. Digitized by eGangotri

यज्ञार्थात्कर्मणोऽन्यत्रलोकोऽयंकर्मबन्धनःतदर्थंकर्मकौन्तेयमुक्तसङ्गःसमाचार ९

शाङ्करभाष्यं

यज्ञमन्यसेबन्धार्थत्वात् कर्मनकर्त्तव्यमितितदप्यसत्कथं यज्ञार्थादिति यज्ञो वैविष्णुरितिश्रुतेर्यज्ञईश्वरस्तदर्थंयत्क्रियते तद्यज्ञार्थंकर्मतस्मात्कर्मणोऽन्यत्रान्येनकर्मणालोकोयमधिक्रतः कर्मक्रत्कर्म्मबन्धनःकर्मबन्धनंयस्यसोयंकर्मबन्धनोलोकोनतुयज्ञार्थादतस्तदर्थंयज्ञार्थंकर्म्मकौन्तेयमुक्तसङ्गः कर्म्मफलसङ्गवर्ज्जितःसन्समाचरनिर्व्वर्त्तय ९

आनन्दगिरिक्रतटीका।

कर्मानुष्ठायिनोवैशिष्ट्यमुपदिष्टमनूद्यतदनुष्ठानमधिक्रतेनकर्त्तव्यमिति निगमयति यतइति उक्तमेवहेतुंभगवदनुमतिकथनेनस्फुटयति कर्मेति इतश्चत्वयाकर्त्तव्यंकर्मेत्याह शरीरेति तन्नियतंतस्याधिक्रतस्येति सम्बन्धः स्वर्गादिफलेदर्शपौर्णमासादावधिक्रतस्यतस्यतदपिनित्यंस्यादित्याशङ्क्यविशिनष्टि फलायेतिनित्यंकर्मेतिनियमेनकर्त्तव्यमित्यत्रहेतुमाह यतइति हिशब्दोयात्तमुक्तमेवहेतुमनुवदति यस्मादिति करणस्याकरणाज्जायस्वं प्रश्नपूर्व्वकंप्रकटयति कथमित्यादिना सत्येवकर्मणिदेहादिचेष्टाद्वाराशरीरंस्यातुंपारयति तदभावेजीवनमेवदुर्लभंभवेदितिफलितमाह अतइति ८

स्वामिक्रतटीका।

सांख्यास्तुसर्व्वमपिकर्म्मबन्धकत्वान्नकार्य्यमित्याशङ्क्यान्निराकुर्व्वन्नाह यज्ञार्थादिति यज्ञोवैविष्णुरितिश्रुतेः तदाराधनार्थात्कर्म्मणोऽन्यत्र तदेकंविनालोकोऽयंकर्मबन्धनःकर्म्मभिर्व्बध्यते नत्वीश्वराराधनार्थेनकर्म्मणा अतस्तदर्थंविष्णुप्रीत्यर्थंमुक्तसङ्गोनिष्कामःसन्कर्म्मसम्यगाचर ९

भाषा अनुवाद।

सांख्यमतवालेकहतेहैं कियबन्धनकेकारणभूतकर्म्महैं इससेसम्पूर्णकर्म्मनकरनाहीं भलाहै उसीकोनिर्णयकरिकेकहतेहैं कियज्ञशब्दकाअर्थविष्णुहैयहश्रुतिमेकहाहै सोयज्ञजोविष्णुभगवान तिनकेआराधनार्थजोकर्म्मतिसकोछाड़िकरि औरसबकर्म्मअलवत्तालोगोंकोसंसारबन्धनकरतेहैं परन्तुईश्वरआराधनरूपकर्म्मतैसेनहीहैं इससेविष्णुप्रीत्यर्थनिःकामभानसहो सबकर्म्मअच्छीतरहसेकरोक्याडरहै कौन्तेयसम्बोधनदेकरमातृस्वभावडरनेकाहेतुकहा ९

CC-0. In Public Domain. Digitized by eGangotri

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् १०

शाङ्करभाष्यं

इतश्चाधिकृतेनकर्मकर्त्तव्यं सहेति सहयज्ञायज्ञसहिताः प्रजास्त्रयोवर्णास्ताःसृष्ट्वोत्पाद्य पुरापूर्वंसर्गादावुवाचोक्तवान्प्रजापतिः प्रजानांस्रष्टा अनेनयज्ञेन प्रसविष्यध्वं प्रसवोवृद्धिरुत्पत्तिस्तांकुरुध्वमेषवोयज्ञः युष्माकमस्तुभवतु इष्टकामधुक्इष्टानभिप्रेतान्कामान्फलविशेषान्दोग्धीतीष्टकामधुक् १०

आनन्दगिरिकृतटीका।

कर्मणावध्यतेजन्तुरिति स्मृतेर्बन्धार्थंकर्मतत्नश्येयोऽर्थिनाकर्त्तव्यमित्याशङ्क्य मनूद्यदूषयति यज्ञेत्यादिना कर्माधिकृतस्यतदकरणमयुक्तमिति प्रतिज्ञातंप्रश्नपूर्वकंविवृणोति कथमित्यादिना फलाभिसन्धिमन्तरेणयज्ञार्थंकर्मकुर्वाणस्यबन्धाभावात् तादर्थ्येनकर्मकर्त्तव्यमित्याह तदर्थमिति यज्ञार्थंकर्मेत्ययुक्तं नहि कर्मार्थमेवकर्मेत्याशङ्क्यव्याचष्टे यज्ञोवैविष्णुरिति कथंतर्हिकर्मणावध्यते जन्तुरितिस्मृतिस्तत्राह तस्मादिति ईश्वरार्पणबुद्ध्याकृतस्यकर्मणोबन्धार्थत्वाभावेफलितमाह अतइति ९

नित्यस्यकर्मणोनैमित्तिकसहितस्याधिकृतेनकर्त्तव्यत्वेहेत्वन्तरपरत्वेनानन्तरश्लोकंअवतारयति इतश्चेति कथंपुनरनेनयज्ञेनवृद्धिरस्माभिःशक्याकर्त्तुमित्याशंक्याह एषइति १०

भाषा अनुवाद।

ब्रह्माकीवाक्यसेभीकर्मकीकर्त्तव्यताहीश्रेष्ठआवतीहै सोईचारिश्लोकसेकहतेहैं कियज्ञकेसाथसहयज्ञअर्थात्यज्ञकेअधिकारीब्राह्मणआदिसबप्रजोंकोसृष्ठिकेआदिमेउत्पन्नकरनेकेवादि ब्रह्मानेयहीबातकहीकिइसीयज्ञकेद्वारातुमारीवृद्धिहोय इहांप्रसवशब्दकाअर्थवृद्धिहै अर्थात्उत्तर२वृद्धिहोतीजाय कारणयहकियज्ञतुमारीइष्टकामनाकोदाताहैं इसजगहयज्ञशब्दनित्यकर्मकाउपलक्षणहै अर्थात्यज्ञकहनेसेनित्यकर्मभीसबआवतेहैं औरइहांकाम्यकर्मकीप्रशंसाकरनाअसङ्गतभीहै तौभीस्वाभाविककोईकर्मनकरनेसे काम्यकर्मकरनाहीउत्तमहै इसीसेकहा किउसकाम्यकर्मकेकरनेमेकोईदोषनहींहै १०

CC-0. In Public Domain. Digitized by eGangotri

देवान्भावयतानेनतेदेवाभावयन्तुवः परस्परंभावयन्तः श्रेयःपरमवाप्स्यथ ११

शाङ्करभाष्यं

कथंदेवानिति देवानिन्द्रादीन्भावयत वर्द्धयतानेनयज्ञेन तेदेवाभावयन्तुआप्याययन्तु हृष्ट्यादिनावोयुष्मानेवंपरस्परमन्योन्यंभावयन्तः श्रेयः परमपिमोक्षलक्षणंज्ञानप्राप्तिं क्रमेणावाप्स्यथ स्वर्गंवापरंश्रेयोवावाप्स्यथ ११

आनन्दगिरिकृतटीका।

कथंपुनरभीष्टफलविशेषहेतुत्वंयज्ञेऽस्यविज्ञायते नहि देवताप्रसादादृतेस्वर्गादिरभ्युदयोलभ्यते नापिसम्यग्दर्शनमन्तरेण निःश्रेयससेद्धुं पारयतीति शङ्कते कथमिति ततःश्लोकेनोत्तरमाह देवानिति मुमुक्षुत्वबुभुक्षुत्वविभागेन श्रेयसि विकल्पः ११

स्वामिकृतटीका।

प्रजापतिवचनादपिकर्मकर्त्तैवश्रेष्ठइत्याह सहयज्ञाइति चतुर्भिः यज्ञेनसह वर्त्तन्तइतिसहयज्ञा यज्ञाधिकृताब्राह्मणाद्याःप्रजाः पुरासर्गादौसृष्ट्वेदमुवाचब्रह्मा अनेनयज्ञेनप्रसविष्यध्वं प्रसवोवृद्धिरुत्तरोत्तरामतिवृद्धिंलभध्वमित्यर्थः तत्रहेतुःएषयज्ञःवोयुष्माकमिष्टकामधुक् इष्टान्कामान्दोऽधीतितथाअभीष्टभोगप्रदोऽस्त्वित्यर्थः अत्रचयज्ञग्रहणमावश्यककर्मोपलक्षणार्थं काम्यकर्मप्रशंसातुप्रकरणेऽसङ्कताऽपिसामान्यतोऽकर्मणः कर्म्मश्रेष्ठमित्येतदर्थमित्यदोषः १०

कथमिष्टकामदोग्धायज्ञोभवेदित्यत्राह देवानिति अनेनयज्ञेनयूयंदेवान्भावयत हविर्भागैः संवर्द्धयत तेचदेवावोयुष्मान्संवर्द्धयन्तुवृष्ट्यादिनाऽन्नोत्पत्तिद्वारेण एवमन्योन्यंसंवर्द्धयन्तो देवाश्चयूयञ्चपरस्परंश्रेयोऽभीष्टमर्थंप्राप्स्यथ ११

एतदेवस्पष्टीकुर्वन्कर्माकरणेदोषमाह इष्टानिति यज्ञैर्भाविताद्देवावृष्ट्यादिद्वारेणवोयुष्मभ्यंभोगान्दास्यन्ते हिअतोदेवैर्दत्तानन्नादीनेभ्योदेवेभ्यःपञ्चयज्ञादिभिरदत्त्वा योभुङ्क्ते मनु चौर एव ज्ञेयः १२

भाषा अनुवाद।

यज्ञइष्टकामनाकीदाताकैसेहोगी सोकहतेहैं किइसीयज्ञकेद्वारा तुमसबदेवतावोंकोघृतआज्ञति देकरबढ़ावो औरवेदेवतासबभीतुमारीइष्टिकरैंअर्थात् जलवरसायअन्नउपजायतुमकोसन्तुष्टकरैं इसीतरह तुमारादोनोका परस्पर कहेएकसेएककाअभीष्टअर्थसिद्धहोय ११

CC-0. In Public Domain. Digitized by eGangotri

इष्टान् भोगान्हि वोदेवा दास्यन्ते यज्ञभाविताः
तैर्दत्ता नप्रदायैभ्यो योभुङ्क्ते स्तेन एव सः १२

शाङ्करभाष्यम्।

किञ्चइष्टान्भोगानिति इष्टानभिप्रेतान्भोगान्हिवोयुष्मभ्यंदेवादास्यन्ते वितरिष्यन्तिस्त्रीपशुपुत्रादीन्यज्ञभावितायज्ञैर्वर्द्धितास्तोषिताइत्यर्थःतैर्हिवैर्दत्तान् भोगानप्रदायादत्वाअनृण्यमकृत्वेत्यर्थःएभ्योदेवेभ्योयोभुंक्तेस्वदेहेन्द्रियाण्येवतर्पयत्ति स्तेन एव तस्कर एव स देवादिस्वापहारी १२

आनन्दगिरिकृतटीका।

इतश्चाधिकृतेनकर्मकर्त्तव्यमित्याह किञ्चेति कथमस्माभिर्भाविताःसन्तोदेवा भावयिष्यन्तिअस्मानिति तदाह इष्टानिति यज्ञानुष्ठानेनपूर्वोक्तरीत्यास्वर्गापवर्गयोर्भावेपिकथंस्त्रीपशुपुत्रादिसिद्धिरित्याशंक्यपूर्वार्द्धंव्याकरोति इष्टानभिप्रेतानिति पश्वादिभिश्चयज्ञानुष्ठानद्वारा भोगोनिवर्त्तनीयोऽन्यथाप्रत्यवायप्रसङ्गादित्युत्तरार्द्धं व्याचष्टे तैरिति आनृण्यमकृत्वेत्ययमर्थः देवानामृषीणांपितॄणाञ्चयज्ञेनब्रह्मचर्य्येणप्रजयाच सन्तोषमनापाद्य स्वकीयंकार्य्यकारणसंघातमेव पोष्टुंभुञ्जानस्तस्करोभवतीति १२

देवादिभ्यःसम्विभागमकृत्वा भुञ्जानानांप्रत्यवायित्वमुक्त्वा तदन्येषांसर्वदोषराहित्यंदर्शयति येपुनरिति यज्ञशिष्टाशिनोयेपुनस्तेताद्दशाःसन्तःसर्वकिल्बिषैर्मुच्यन्तइतियोजना तैर्दत्तानित्यादिनोक्तंनिगमयति भुञ्जतइति देवयज्ञादीनि

स्वामिकृतटीका।

इतश्चयजन्तएवश्रेष्ठानेतरइत्याह यज्ञशिष्टाशिनइति वैश्वदेवादियज्ञावशिष्टंयेऽश्नन्ति तेपञ्चसूनादिकृतैःसर्वैःकिल्बिषैर्मुच्यन्ते पञ्चसूनाश्चस्मृतावुक्ताःकण्डनीपेषणीचुल्लीउदकुम्भीचमार्जनी पञ्चसूनागृहस्थस्यताभिःस्वर्गंनगच्छति येत्वात्मनोभोजनार्थमेवपचन्ति नतुवैश्वदेवाद्यर्थंतेपापादुराचाराअघमेवभुञ्जते १३

भाषाअनुवाद।

इसकोअच्छीतरहविचारकरिकहतेहैं किकर्मनकरनेसेदोषहोताहै देखो यज्ञसेसन्तुष्टदेवताजलवृष्टिकरिकेतुमसबकेअर्थअन्नआदिनानाप्रकारकेभोगदेयगे तोजोपञ्चयज्ञकेद्वारादेवदत्तअन्नादिवस्तु उनकोनदेकरआपहीभोगकरिलेयसोचोरऔकृतघ्नहैं अग्निअतिथिगऊकोदेनाऔबलिवैश्वदेवकरनापञ्चयज्ञहैं १२

CC-0. In Public Domain. Digitized by eGangotri

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः
भुञ्जते तेत्वघं पापा ये पचन्त्यात्मकारणात् १३

शाङ्करभाष्यं

येपुनर्देवयज्ञादीन्निर्वर्त्य तच्छिष्टमशनममृताख्यमशितुं शीलंयेषांतेयज्ञशिष्टाशिनःसन्तोमुच्यन्तेसर्वकिल्बिषैःसर्वैःपापैश्चुल्ल्यादिपञ्चसूनाकृतैःप्रमादकृतहिंसादिजनितैश्चान्यैर्येत्वात्मभरयोभुञ्जते तेत्वघंपापंस्वयमपिपापाः येपचन्तिपाकं निर्वर्त्तयन्ति आत्मकारणादात्महेतोः १३

आनन्दगिरिकृतटीका

त्यादिशब्देनपितृयज्ञोमनुष्ययज्ञोभूतयज्ञोब्रह्मयज्ञश्चेति चत्वारोयज्ञाःगृह्यन्तेचुल्लीशब्देनपिठरधारणाद्यर्थक्रियांकुर्वतोविन्यासविशेषवन्तस्त्रयोग्रावाणोविवक्षन्ते आदिशब्देनकण्डनीपेषणीमार्जन्युदकुम्भश्चेत्येते हिंसाहेतवोगृहीतास्तान्येतानिपञ्चप्राणिनांसूनास्थानानिहिंसाकारणानितत्प्रयुक्तैः सर्वैरपिबुद्धिपूर्वकैर्दुरितैर्मुच्यन्तइति सम्बन्धःप्रमादोविचारव्यतिरेकेणाबुद्धिपूर्वकमुपनतंपादपातादिकार्य्यंतेनप्राणिनांहिंसासम्भाव्यते आदिशब्देनाशुचिसंस्पर्शादिगृहीतंतदुत्थैश्चपापैर्महायज्ञकारिणोमुच्यन्ते उक्तंहिकण्डनंपेषणंचुल्लीउदकुम्भश्चमार्जनं पञ्चसूनागृहस्थस्यपञ्चयज्ञात्प्रणश्यतीति पञ्चसूनागृहस्थस्यचुल्लीपेषण्यवस्करःकण्डनीचैवकुम्भश्चवध्यतेयास्तुवाहयन्निति च अस्यायमर्थःयायथोक्ताःपञ्चसंख्यकागृहस्थस्यसूनास्तायोवाहयन्नापादयन्वर्त्ततेतेनप्राणिनोबुद्धिपूर्वकञ्चवध्यन्तेतत्प्रयुक्तंसर्वमपिपापंमहायज्ञानुष्ठानात्प्रणश्यतीतिमहायज्ञानुष्ठानस्तुत्यर्थं तदनुष्ठानविमुखान्निन्दति येत्विति आत्मम्भरित्वमेवस्फोरयति येपचन्तीति स्वदेहेन्द्रियपो

भाषा अनुवाद ।

इसहेतुसेयज्ञकरनेवालेमनुष्यश्रेष्ठहैं औरजोदेवअतिथिअग्निगोग्रासवलिवैस्वदेवयेपञ्चयज्ञनहींकरतेकेवलअपनेवास्तेपाककरकेखातेहैं वेईलोभीपापाचारीहैं सोईकहतेहैं किजोदेवादिकोंकोदेकरआपभोजनकरतेउनकोपञ्चसूनाकापापनहींलगताहै सूनाकहेहत्याकेस्थानगृहस्थोंकेघरमेरोजरोजहत्याहोनेकीपांचजगहहैं घरबुहारतेचूल्हेमेआगवारतेजलकेपात्रसेउखलमेकूटतेचक्कीपीसतेअनेकजीवहिंसाहोतीहै सोपापपञ्चयज्ञनकरनेवालेकोलगतेहैं औरवेस्वर्गवासनहींपावते इससेपञ्चयज्ञअवश्यकरनाचाहियेगृहस्तको १३

CC-0. In Public Domain. Digitized by eGangotri

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः १४

शाङ्करभाष्यं।

इतश्चाधिकृतेनकर्म्म कर्त्तव्यंजगच्चक्रप्रवृत्तिहेतुर्हि कर्म्मकथमित्युच्यते अन्नाद्भवन्तीति अन्नाद्भुक्ताल्लोहितरेतःपरिणतात् प्रत्यक्षंभवन्तिजायन्तेभूतानिपर्जन्याद्वृष्टेरन्नस्यसम्भवःअन्नसम्भवःयज्ञाद्भवतिपर्जन्यः अग्नौप्राहिताऽऽहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति यज्ञोऽपूर्वं सचयज्ञःकर्म्मसमुद्भवः ऋत्विग्यजमानयोश्चव्यापारः कर्म्म ततः समुद्भवोयस्ययज्ञस्यापूर्वस्य सयज्ञःकर्म्मसमुद्भवः १४

आन्दगिरिकृतटीका।

षणार्थमेवपाकंकुर्वतादेवयज्ञादिपराङ् खानांपापभूयस्त्वंदर्शयति मुभुञ्जतइति पाठक्रमस्त्वर्थक्रमादपबाधनीयः १३

देवयज्ञादिकंकर्म्माधिकृतेनकर्त्तव्यमित्यत्रहेत्वन्तरमितःशब्दोपात्तमेवदर्शयति जगदिति ननुभुक्तमन्नंरेतोलोहितपरिणतिक्रमेणप्रजारूपेणजायतेतत्रान्नंदृष्टिसम्भवं प्रत्यक्षदृष्टं तत् कथंकर्म्मणोजगच्चक्रप्रवर्त्तकत्वमितिशङ्कते कथमितिपार

स्वामिकृतटीका।

जगच्चक्रप्रवृत्तिहेतुत्वादपिकर्म्मकर्त्तव्यमित्याह अन्नादितित्रिभिः अन्नाच्छुक्रशोणितरूपेणपरिणताभूतान्युत्पद्यन्तेअन्नस्यचसम्भवः पर्जन्याद्वृष्टेःसचपर्जन्योयज्ञाद्भवतिसचयज्ञःकर्म्मसमुद्भवःकर्म्मणायजमानादिव्यापारेणसम्यक्संपद्यतइत्यर्थः अग्नौप्राहिताऽऽहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिश्रुतेः १४

भाषा अनुवाद।

संसारचक्रमेंप्रवृत्तहोनेकाहेतुजोकर्म्मसोकर्त्तव्यहै यहतीनश्लोकसेकहतेहैं कि अन्नहींउदरमेंजायकररसरूपहोशुक्रकहेवीज औशोणितकहेरूधिरहोता जिससेभूत कहेप्राणीउत्पन्नहोते हैं औरसोअन्नमेघवरसनेसेहोताहै और मेघयज्ञधूमसेहोते औरवहयज्ञफेरियज्ञकरनेवालोंकेव्यापारमेंपूरीहोती है यहीबात श्रुतिकहतीहै कि अग्निमेंदीऊईआऊति सूर्यलोकमेंरहतीइसीसे सूर्यसेवृष्टिहोती औरवृष्टिसेअन्नहोता फेरिउसअन्नसेसबप्रजाजन्मलेतीहै १४

CC-0. In Public Domain. Digitized by eGangotri

कर्म्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं
तस्मात् सर्व्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १५

शाङ्करभाष्यं

तत्र एवम्बिधं कर्म कुतोजातमित्याह कर्मेति तत्रकर्मब्रह्मोद्भवंब्रह्मवेदः सउद्भवोयस्यतत् कर्मब्रह्मोद्भवंविद्धिविजानीहिब्रह्मपुनर्व्वेदाख्यमक्षरसमुद्भवंअक्षरंब्रह्मपरमात्मासमुद्भवोयस्यतदक्षरसमुद्भवंब्रह्मबेदइत्यर्थः यस्मात् साक्षात्परमात्माख्यादक्षरात्तत्पुरुषनिश्वासवत् समुद्भवंब्रह्मतस्मात् सर्व्वार्थप्रकाशकत्वात् सर्व्वगतमपिसत् नित्यंसदायज्ञविधिप्रधानत्वाद्यज्ञेप्रतिष्ठितं १५

आनन्दगिरिकृतटीका ।

म्पर्य्येणकर्म्मणस्तद्धेतुत्वंसाधयति उच्यतइति उक्तेऽर्थेस्मृत्यन्तरंसंवादयति अग्नावितिं तत्रहिदेवताभिध्यानपूर्व्वकंतद्धेतेनप्रहिताऽऽहुतिरपूर्व्वतांगता रश्मिद्वारेणादित्यमारुह्यतयात्मनापृथिवींप्राप्यव्रीहियवाद्यन्नभावमापद्यसंस्कृतोभूत्वाशुक्रशोणितरूपेणपरिणता प्रजाभावंप्राप्नोतीत्यर्थः यज्ञःकर्म्मसमुद्भवइत्ययुक्तंस्वस्यैवस्वोद्भवेकारणत्वायोगादित्याशंक्याह ऋत्विगितिद्रव्यदेवतयोःसंग्राहकश्चकारः१४

यदपूर्व्वहेतुत्वेनकर्मोक्तंतत् किंचैत्यवन्दनादिकिम्बाग्निहोत्रादिइतिसन्दिहानंप्रत्याह कर्मेति किमितिकर्मणोब्रह्मोद्भवत्वमुच्यते सर्व्वस्यतदुद्भवत्वाविशेषादित्याशंक्याह ब्रह्मवेदइति ब्रह्मतर्हिवेदाख्यमनादिनिधनमितितत्राह ब्रह्मपुनरिति अक्षरात्मनोवेदस्यपुनरक्षरेभ्यःसकाशादेवसमुद्भवोनसम्भवतीत्याशंक्याह अक्षरमितिब्रह्मेत्यक्षरमेवोक्तंतत्कथंतस्मादेवोद्भवतीत्याशङ्क्यब्रह्मशब्दार्थमुक्तमेवस्मर

भाषा अनुवाद

ऐसेअपूर्वहेतुवोंसे कर्मकीश्रेष्ठताऔकर्त्तव्यता किसलियेकहा औकर्म क्यावस्तुहैं सोईविवरनकरतेहैं कियज्ञकारीपुरुषोंकाव्यापाररूपजोकर्म सोब्रह्मकहे वेदसेउत्पन्नभयाऔब्रह्मजो वेदसोअक्षरजो परब्रह्मतिससेप्रगटभयाहै यहजानो औरश्रुतिने भीकहाहैंकिपरब्रह्मकीनिःश्वाससेऋक्यजुरऔरसामवेदप्रगटेहैं इससेसर्वव्यापीपरब्रह्मसर्वदायज्ञमेप्रतीतहैं अर्थात्यज्ञरूपउपायसेब्रह्मप्राप्तिहोतीहै जैसेउद्योगकरनेसेलक्ष्मीकालाभहोताहै अथवाजगतमेमूलकर्महै इससेमन्त्रऔरअर्थकेद्वारा सबमनुष्योंमेंप्राप्तअनादिकालसेस्थितजोवेदब्रह्म सोतात्पर्यकेद्वाराप्रतिष्ठितहै इससेयज्ञादिकर्म अवश्य कर्त्तव्यहै १५

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

एवमिति एवमीश्वरेणदेवयज्ञपूर्व्वकंजगच्चक्रंप्रवर्त्तितंनानुवर्त्तयतीहलोकेयःकर्मण्यधिक्रतःसन्नघायुरघंपापमायुर्जीवनंयस्यसोऽघायुःपापजीवनइतियावत् इन्द्रियारामइन्द्रियैरारमणमाक्रीड़ाविषयेषुयस्यसइन्द्रियारामोमोघंवृथाहेपार्थसजीवति तस्मादज्ञेनाधिक्रतेनकर्त्तव्यमेवकर्मेतिप्रकरणार्थःप्रागात्मज्ञाननिष्ठायोग्यताप्राप्तेस्तादर्थ्येनकर्मयोगानुष्ठानमधिक्रतेनानात्मज्ञेनकर्त्तव्यमित्येतत् नकर्मणामनारम्भादित्यतआरभ्यशरीरयात्रापिचतेनप्रसिध्येदकर्मणइत्येवमन्तेनप्रतिपाद्ययज्ञार्थात्कर्मणोऽन्यत्रेत्यादिनामोघंपार्थसजीवतीत्येवमन्तेनापिग्रन्थेनप्रासङ्गिकमधिक्रतस्यानात्मविदःकर्म्मानुष्ठानेवज्रकारणमुक्तंतदकरणेचदोषसंकीर्त्तनंकृतं १६

आनन्दगिरिकृतटीका।

ति ब्रह्मवेदइति ननुब्रह्मशब्दितस्यवेदस्यापिपौरुषेयत्वात् प्रामाण्यसन्देहात्कथं तदुक्तमग्निहोत्रादिकं कर्मनिर्द्धारयितुंशक्यते तत्राह यस्मादिति कथंतर्हितस्य यज्ञे प्रतिष्ठितत्वं सर्व्वगतत्वेविशेषायोगादित्याशङ्क्याह सर्व्वगतमपीति १५

अधिक्रतेनाध्ययनादिद्वाराजगच्चक्रमनुवर्त्तनीयमन्यथेश्वराज्ञातिलङ्घिनस्तस्यप्रत्यवायःस्यादित्याह एवमिति नकर्मणामनारम्भादित्यादिनोक्तमुपसंहरति तस्मादिति जगच्चक्रस्यप्रागुक्तप्रकारेणानुवर्त्तनेवृथाजीवनमघसाधनंयस्मात्तस्माज्जीवतानियतंकर्मकर्त्तव्यमित्यर्थः यद्यधिक्रतेनकर्त्तव्यमेवकर्मतर्हिकिमित्यज्ञेनेतिविशिष्यतेज्ञाननिष्ठेनापितत्कर्त्तव्यमेवाधिक्रतत्वाविशेषादित्याशङ्क्यपूर्व्वोक्तमनुवदति प्रागिति नहिज्ञानकर्मणोर्विरोधात्ज्ञाननिष्ठेनकर्मकर्त्तुंशक्यतेतथाचाना

स्वामिकृतटीका।

तथाकर्मेति तच्चयजमानादिव्यापाररूपकर्मब्रह्मोद्भवंविद्धि ब्रह्मवेदस्तस्मात् प्रवृत्तं जानीहि तच्चवेदाख्यंब्रह्मअक्षरात् परब्रह्मणःसमुद्भूतं जानीहि अस्यमहतोभूतस्यनिश्वसितमेतद्ऋग्वेदोयजुर्वेदःसामवेदइतिश्रुतेः यतएवमक्षरादेवयज्ञप्रवृत्तेरत्यन्तमभिप्रेतोयज्ञस्तस्मात् सर्व्वगतमप्यक्षरंब्रह्मनित्यंसर्व्वदा यज्ञेप्रतिष्ठितंयज्ञेनोपायभूतेनप्राप्यतइति यज्ञेप्रतिष्ठितमुच्यतइतिउद्यमस्यासदालक्ष्मीरितिवत् यद्वायस्माज्जगच्चक्रस्य मूलंकर्मतस्मात्सर्व्वगतमन्त्रार्थवादैःसर्व्वेषुभूतार्थाख्यानादिषु गतंस्थितमपि वेदाख्यंब्रह्मसर्व्वदा यज्ञेतात्पर्येण प्रतिष्ठितंअतो यज्ञादिकर्मकर्त्तव्यमित्यर्थः १५

CC-0. In Public Domain. Digitized by eGangotri

एवंप्रवर्त्तितंचक्रंनानुवर्त्तयतीहयः अघायुरिन्द्रियारामोमोघंपार्थसजीवति १६

शाङ्करभाष्यं

एवंस्थितेकिमेवंप्रवर्त्तितंचक्रंसर्व्वेणानुवर्त्तनीयमाहोस्वित् पूर्व्वोक्तकर्मयोगानुष्ठानोपायप्राप्यामात्मविद्योज्ञानयोगेनैवनिष्ठामात्मविद्वः सांख्यैरनुष्ठेयामप्राप्तेनैवेत्येवमर्थमर्जुनस्यप्रश्नमाशंक्य स्वयमेववाशास्त्रार्थस्यविवेकप्रतिपत्तयर्थमेवचैतन्मात्मानंविदित्वानिवृत्तमिथ्याज्ञानाः सन्तोब्राह्मणामिथ्याज्ञानवद्भिरवश्यंकर्त्तव्येभ्यःपुत्रेषणादिभ्योव्युत्थायाथभिक्षाचर्य्यंशरीरस्थितिमात्रप्रयुक्तंचरन्तिनतेषामात्मज्ञाननिष्ठाव्यतिरेकेणान्यकार्यमस्तिइत्येवंश्रुत्यर्थमिहगीताशास्त्रेप्रतिपादयिषितमाविष्कुर्व्वन्नाहभगवान् यस्त्विति यस्तुसांख्यआत्मज्ञाननिष्ठआत्मरतिःआत्मनिएवर

आनन्दगिरिकृतटीका।

त्मज्ञेनैवचित्तशुद्ध्यादिपरम्परयाज्ञानार्थंमर्मानुष्ठेयमितिप्रतिपादितमित्यर्थः तर्हियज्ञार्थादित्यादिकिमर्थंनहितत्रज्ञाननिष्ठाप्रतिपाद्यते कर्म्मनिष्ठातुपूर्व्वमेवोक्तत्वान्नात्रवक्तव्येत्याशङ्क्यवृत्तमर्थान्तरमनुवदति प्रतिपाद्येतिप्रासङ्गिकमज्ञस्यकर्म्मकर्त्तव्यतोक्तिप्रसङ्गागतमितियावत् बज्ञकारणमीश्वरप्रसादोदेवताप्रीतिश्चेत्यादिदोषसंकीर्त्तनंतैर्ज्ञानप्रदायेत्यादि १६

स्वामिकृतटीका।

यस्मादेवंपरमेश्वरेणैवभूतानांपुरुषार्थसिद्धयेकर्म्मादिचक्रंप्रवर्त्तितंतस्मात्तदकुर्वतोवृथैवजीवितमित्याह एवमिति परमेश्वरोव्यभूताद्देहाख्यब्रह्मणःपुरुषाणांकर्म्मणिप्रवृत्तिस्ततःकर्म्मनिष्पत्तिस्ततःपर्ज्जन्यस्ततोऽन्नंततोभूतानिभूतानांपुनस्तथैवकर्म्मप्रवृत्तिरित्येवंप्रवर्त्तितंचक्रंयोनानुवर्तयतिनानुतिष्ठतिअघंपापरूपमायुर्यस्यसःयतइन्द्रियैर्विषयेष्वेवारमतिनत्वीश्वराराधनार्थेकर्म्मणिअतोमोघंव्यर्थंसजीवति १६

भाषा अनुवाद।

जिसहेतुईश्वरकोप्रेरणासेमनुष्यसकलपुरुषार्थसिद्धहोनेकेअर्थइससंसारचक्रमेआयउक्तकर्म्मरूपचक्रमेप्रवृत्तहैं इससेकर्म्मनकरनेसेमनुष्यकाजन्महींव्यर्थहैयहकहतेहैं किईश्वरकीआज्ञारूपवेदसेपुरुषयज्ञकर्ममेप्रवृत्तहोतेहैं तिससेमेघऔरमेघसेअन्नअन्नसेप्राणीऔरप्राणीयोंसेफेरिकर्म्मकीप्रवृत्तिहोतीयहचक्रहै अतएवजोईश्वराराधनकर्म्मनहींकरते केवलइन्द्रियोंसेविषयभोगमात्रकरते उनकावृथाजीवनहैं १६

CC-0. In Public Domain. Digitized by eGangotri

यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः आत्मन्येवचसन्तुष्टस्तस्यकार्यंनविद्यते१७

शाङ्करभाष्यं

तिर्नविषयेषुयस्यसआत्मरतिरेवस्याद्भवेत् आत्मतृप्तश्चआत्मनैवतृप्तोनान्नरसादिनासमानवोमनुष्यःसंन्यासीआत्मन्येवचसन्तुष्टः सन्तोषोहिवाह्यार्थलाभेनसर्वस्यभवतितमनपेक्ष्यात्मन्येवचसन्तुष्टःसर्वतोविगततृष्णइत्येतत् यईदृशआत्मवित्तस्यकार्यंकरणीयंननिद्यतेनास्तीत्यर्थः १७

आनन्दगिरिकृतटीका।

वृत्तमर्थमेवंविभज्यानूद्यानन्तरश्लोकमाशङ्क्योत्तरत्वेनावतारयति एवमिति अर्जुनस्यप्रश्नमित्येवमर्थमाशंक्याह भगवानितिसम्बन्धः नन्वेषाशङ्कानावकाशमासादयत्यनात्मज्ञेनकर्त्तव्यंकर्म्मेतिवहुशोविशेषितत्वादित्याशंक्याह स्वयमेवेति किमर्थंश्रुत्यर्थंस्वयमेवभगवानत्रप्रतिपादयतिइत्याशंक्याह शास्त्रार्थस्येति गीताशास्त्रस्यससंन्यासज्ञानमेवमुक्तिसाधनमर्थोनार्थान्तरमिति विवेकार्थमिहश्रुत्यर्थंसंक्षिपतिकीर्त्तयतीत्यर्थः तमेवश्रुत्यर्थंसंक्षिपति एतमिति सिद्धञ्चेदात्मवेदनमनर्थकंतर्हिव्युत्थानादीत्याशंक्यापातिकविज्ञानफलमाह निवृत्तेति ब्राह्मणग्रहणंतेषामेवव्युत्थानेमुख्यमधिकारित्वमितिज्ञापनार्थं क्लेशात्मकत्वादेषणानांताभ्योव्युत्थानंसर्व्वेषांस्वाभाविकत्वादविधित्सितमित्याशंक्याह मिथ्येति भिक्षाचर्यंचरन्तीतिवचनंव्युत्थानविरुद्धमित्याशंक्याह शरीरेतितर्हितद्वदेवतेषामग्निहोत्राद्यपिकर्त्तव्यमापद्येतेत्याशंक्यव्युत्थायिनामाश्रमधर्म्मवदग्निहोत्रादेरनुष्ठापकभावान्मैवमित्याहनतेषा

स्वामिकृतटीका

तदेवंनकर्मणामनारम्भादित्यादिनाअज्ञस्यान्तःकरणशुद्ध्यर्थंकर्मयोगमुक्त्वाज्ञानिनःकर्मानुपयोगमाह यस्त्विति द्वाभ्यां आत्मन्येवरतिःप्रीतिर्यस्यसःततश्चात्मन्येवतृप्तःस्वानन्दानुभवेननिर्वृतःअतएवात्मन्येवशंतुष्टोभोगापेक्षारहितोयस्तस्यकर्त्तव्यंकर्मनास्तीति १७

भाषाअनुवाद

कर्मणामनारम्भादित्यादिश्लोकसे अज्ञानीपुरुषकेअन्तःकरणशुद्धिकेहेतुकर्मयोगकहिकरअवज्ञानीकोकर्मनकरना दोश्लोकसेकहतेहैं किजिसकीआत्मामेरतिकहेप्रीतिऔआत्मआनन्दमेमगनतथाआत्मासेसन्तुष्टहैं औरभोगादिसेरहितहैंऐसेजोतत्त्वज्ञानीउनकोकोईकर्मकरनानहींहै औरसवकोतोकरनाहींहै१७

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

किञ्चनैवेति नैवतस्यपरमात्मरतेःकृतेनकर्मणार्थःप्रयोजनमस्ति अस्तुतर्ह्यकृतेनअकरणेनप्रत्यवायाख्योनर्थोनाकृतेनेहलोकेकश्चनकश्चिदपिप्रत्यवायप्राप्तिरूपःआत्महानिलक्षणोवानैवास्ति नचास्यसर्वभूतेषुब्रह्मादिस्थावरान्तेषुकश्चिदर्थव्यपाश्रयःप्रयोजननिमित्तक्रियासाध्योव्यपाश्रयः व्यपाश्रयणंआलम्बनंकञ्चिद्भूतविशेषमाश्रित्यनसाध्यःकश्चिदर्थोऽस्तियेनतदर्थाक्रियानुष्ठेयास्यान्नत्वंएतस्मिन्सर्वतःसंप्लुतोदकस्थानीयेसम्यग्दर्शनेवर्त्तसे १८

आनन्दगिरिकृतटीका।

मिति यथोक्तंश्रुत्यर्थमस्मिन्गीताशास्त्रेपौर्वापर्येणपर्य्यालोच्यमानेप्रतिपादयितुमिष्टंप्रकटीकुर्वन्कर्त्तव्यमेवकर्म्मजीवतेतिनियमेज्ञानयोगेनसांख्यानामिति चोद्यपरिहारमुपदर्शयति इत्येवमिति आत्मनिष्ठस्यविषयसङ्गराहित्यंदृष्टंतदनात्मज्ञेनजिज्ञासुनाकर्त्तव्यमितिमत्वाह यस्तुसांख्य इति किञ्चआत्मज्ञस्यज्ञानेनात्मनैवपरितृप्तत्वान्नान्नपानादिनासाध्याट्टप्तिरिष्टा तेनविद्यार्थिनासंन्यासिनापिनान्नरसादावासक्तिर्युक्ताकर्त्तुमित्याह आत्मतृप्तइति किञ्चआत्मविदःसर्वतोवैतृष्ण्यंदृष्टं तदनात्मविदाविद्यार्थिनाकर्त्तव्यमित्याह आत्मन्येवेति रतितृप्तिसन्तोषाणांमोदप्रमोदानन्दवदवान्तरभेदःअथवारतिर्विषयासक्तिःतृप्तिर्विषयविशेषसम्पर्कजंसुखं सन्तोषोऽभीष्टविषयमात्रलाभाधीनंसुखसामान्यमितिभेदःनन्वात्मरतेरात्मतृप्तस्यात्मन्येवसन्तुष्टस्यापिकिञ्चित्कर्त्तव्यंमुक्तयेभविष्यतीतिनेत्याह यईदृशइति १७

इतश्चात्मविदोनकिञ्चित् कर्त्तव्यमित्याह किञ्चेति अभ्युदयनिःश्रेयसयोरन्यतरत्प्रयोजनंकृतेनसुकृतेनात्मविदोभविष्यतीत्याशंक्याह नैवेति प्रत्यवायनिवृत्तयेस्वरूपप्रच्युतिप्रत्याख्यानायवाकर्मस्यादित्याशंक्याह नेत्यादिना ब्रह्मादिषुस्थावरान्तेषुभूतेषुकञ्चिद्भूतविशेषमाश्रित्यकश्चिदर्थोविदुषःसाध्योभविष्यति तदर्थंतेनकर्त्तव्यंकर्मेत्याशंक्याह नचेति तत्राद्यंपदमादत्ते नैवेति तंव्याचष्टे तस्येतिआत्मविदःस्वर्गाद्यभ्युदयानर्थित्वं निःश्रेयसस्यचप्राप्तत्वान्नकृतंकर्मार्थवदित्यर्थः आत्मविदाचेत्कर्मनक्रियतेतर्हितेनाकृतेनतस्यानर्थोभविष्यतीति तत्प्रत्याख्यानार्थंतस्यकर्त्तव्यंकर्मेतिशङ्कते तर्हीति द्वितीयपादेनोत्तरमाह नेत्यादिना अतोनत्रिवृत्तयर्थंकृतमर्थवदितिशेषः द्वितीयंभागंविभजते नचास्येति व्यपाश्रयणमालम्बनंनेतिसम्बन्धः पदार्थमुक्त्वावाक्यार्थमाह भूकिञ्चिदिति तविशेषस्याश्रित

CC-0. In Public Domain. Digitized by eGangotri

नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन नचास्यसर्व्वभूतेषुकश्चिदर्थव्यपाश्रयः १८

आनन्दगिरिकृतटीका।

स्यापिक्रियाद्वाराप्रयोजनप्रसवहेतुत्वमिति तर्हिमयापियथोक्तंतत्वमाश्रित्यत्वा ज्यमेवकर्मेत्यर्जुनस्यमतमाशंक्याह नत्वमिति १८

सम्यग्ज्ञाननिष्ठत्वाभावेकर्मानुष्ठानमावश्यकमित्याह यतइति तस्मात्ज्ञान निष्ठाराहित्यादितियावत् मोक्षमेवापेक्षमाणस्यकर्मणिफलान्तरवतिनियो गःस्यादित्याशंक्याह असक्तोहीति १९

स्वामिकृतटीका।

तत्रहेतुमाह नैवेति कृतेनकर्मणातस्यार्थःपुण्यंनैवास्तिनचाकृतेनकश्चनकोऽप्रि त्यवायीऽस्तिनिरहङ्कारत्वेनविधिनिषेधातीतत्वात् तथापितद्व्रेषांनप्रियंयदेत न्मनुष्याविदुरिति श्रुतेर्मोक्षेदेवकृतविघ्नसम्भवात्तत्परिहारार्थंकर्मभिर्देवाः सेव्या इत्याशंक्योक्तसर्व्वभूतेषुब्रह्मादिस्थावरान्तेषुकश्चिदप्यर्थव्यपाश्रयःआश्रयएवव्यपाश्र यःअर्थोमोक्षेआश्रयणीयोऽन्यनास्तीत्यर्थः विघ्नभावस्यश्रुत्यैवोक्तत्वात् तथाचश्रुतिः तस्यहनदेवाश्चनाभूत्याईशतेआत्माह्येषांसम्भवतीतिह नेत्यव्ययमप्यर्थेदेवाअपित स्यात्मतत्त्वज्ञस्यअभूत्यैवब्रह्मभावप्रतिबन्धायनेशतेनशक्नुवन्तीतिश्रुतेरर्थः देवकृता स्तुविघ्नाःसम्यग्ज्ञानोत्पत्तेःप्रागेवयदेतद्ब्रह्मनुष्याविदुस्तदेवैषांदेवानांनप्रियमिति श्रुत्याब्रह्मज्ञानस्यैवाप्रियत्वोक्त्यातत्रैवविघ्नकर्तृत्वस्यसूचितत्वात् १८

भाषा अनुवाद।

जोतत्त्वज्ञानीकहेआत्मज्ञानीपुरुषहैं उसकोकोईभीकर्मकरनानहीं सो ईकहतेहैं किनज्ञानीकोकर्मकरनेसेपुन्यहै औरकर्मनकरनेसेप्रत्यवायकहे पापभीनहींहै क्योंकिज्ञानीतोनिरहङ्कारहै इससेउसकोकिसीकर्मकाविधि औनिषेधनहींहै वहसबसेअलगहै जोकहोकिश्रुतिकहतीहै किदेवतोंकोइ च्छानहींहै किमनुष्यब्रह्मकोजानैऔब्रह्मज्ञानीहोमोक्षपावै तोनिश्चयहै किमो क्षहोनेमेंदेवताविघ्नकरैंगे इसवास्तेविघ्नवारणकेअर्थदेवतोंकीसेवारूपकर्मजरूर हीकरनापडैगाइसपरकहतेहैं किब्रह्मसेलेकरऔस्थावरपर्य्यन्तकिसीकीस हायज्ञानीकोदरकारनहींहै क्योंकिज्ञानमार्गमेंविघ्नकाअभावहै यहश्रुतिसे कहिचुकेहैं इससेआत्मदर्शीकोप्राणीमात्रकाआश्रयकहे अवलम्बकाकुछकाम नहींहै १८

CC-0. In Public Domain. Digitized by eGangotri

तस्मादसक्तःसततंकार्य्यंकर्म्मसमाचर असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः १९

शाङ्करभाष्यं।

यतएवंतस्मादिति तस्मादसक्तःसंसर्गवर्जितःसततंसर्व्वदाकार्य्यंकर्त्तव्यंनित्यं कर्मसमाचरनिर्व्वर्त्तय असक्तोहियस्मात् समाचरन्नीश्वरार्थंकर्मकुर्व्वन्परमाप्नोतिपुरुषःमोक्षमाप्नोतिपुरुषःसत्त्वशुद्धिद्वारेणेत्यर्थः १९

यस्माच्चकर्म्मणैवेति कर्म्मणैवहितस्मात्पूर्व्वेजनियाःविद्वांसःसंसिद्धिंमोक्षंगन्तुमास्थिताःप्रवृत्ताजनकादयोजनकाश्चप्रतिप्रस्तुतयोयदितेप्राप्तसम्यग्दर्शनास्ततोलोकसंग्रहार्थप्रारब्धकर्मत्वात्कर्मणासहैवासंन्यस्यैवकर्मसंसिद्धिमास्थिताइत्यर्थः अथाप्राप्तसम्यग्दर्शनाजनकादयस्तदाकर्मणासत्त्वशुद्धिसाधनभूतेन क्रमेणसंसिद्धिमास्थिताइतिव्याख्येयःश्लोकोऽयंमन्यते पूर्व्वैरपिजनकादिभिरप्यजानद्भिरेवकर्त्तव्यंकृतंकर्मतावतानावश्यमन्येनकर्त्तव्यंसम्यग्दर्शनवताकृतार्थेनेति तथापिप्रारब्धकर्मायत्तस्त्वंलोकसंग्रहमेवापिलोकस्योन्मार्गप्रवृत्तिनिवारणंलोकसंग्रहस्यमेवापिप्रयोजनंसम्पश्यन्कर्त्तुमर्हसि २०

स्वामिकृतटीका।

यस्मादेवंभूतस्यज्ञानिनएवकर्मानुपयोगोनान्यस्य तस्मात्त्वंकर्मकुर्व्वित्याह तस्मादिति असक्तःफलसङ्गरहितः सन्कार्य्यमवश्यकर्त्तव्यतयाविहितंनित्यनैमित्तिकंकर्मसम्यगाचरहियस्मादसक्तःकर्माचरन्पुरुषःपरंमोक्षंचित्तशुद्धिद्वाराप्राप्नोति१९

अवसदाचारंप्रमाणयति कर्म्मणैवेति कर्म्मणैवशुद्धसत्त्वाःसन्तःसंसिद्धिंसम्यग्ज्ञानंप्राप्ताइत्यर्थःयद्यपित्वंसम्यग्ज्ञानिनमेवात्मानंमन्यसेतथापिकर्माचरणंभद्र

भाषाअनुवाद।

इससेहेअर्जुनज्ञानीपुरुषहीकोकर्मकर्त्तव्यनहींहै औरमनुष्यकोतोकर्मकरनाहीउचितहै सोतुमकर्मकरोयहीकहतेहैं कितस्मात्कहेतिससेअशक्तहोकर्त्तव्यकर्मनिरन्तरसमाचरकहेकरो अशक्तहोपुरुषकर्मकरतेहुयेपरजोमुक्तिउसकोंप्राप्तहोतेहैं अर्थात्फलकामनारहितहोकरअवश्यकर्मजोनित्यनैमित्तिकहैं सोसबकरोजिसहेतुआशक्तिरहितकर्मकारीमनुष्यपरमजोमुक्तिउसकोचित्तशुद्धिकेद्वारापावताहै नित्यकर्मसन्ध्यावन्दनादिकहैं औरनैमित्तिकजोनिमित्तपायकरकियेजाय जैसेपुत्रजन्ममेजातकर्मादिकहैं इससेयह जनायाकितुमको युद्धभीनैमित्तिककर्मकरनाआवश्यकहै १९

CC-0. In Public Domain. Digitized by eGangotri

कर्मणैवहिसंसिद्धिमास्थिताजनकादयः लोकसंग्रहमेवापिसंपश्यन्कर्त्तुमर्हसि२०

आनन्दगिरिकृतटीका ।

यद्यपिजितेन्द्रियोऽपिविवेकोश्रवणादिभिरजस्रंब्रह्मणिनिष्ठातुंशक्नोतितथापित्वात्तयेश्वरयाविहितंकर्मनत्याज्यमित्याह यस्माच्चेति तस्मात्त्वमपिकर्मकर्त्तुमर्हसीतिसम्बन्धः इतोपित्वयाविहितंकर्मकर्त्तव्यमित्याह लोकेति पूर्वार्द्धंविभजते कर्मणैवेति कथंजनकादीनांकर्मणासंसिद्धिप्राप्तिरुच्यतेकर्मत्यजांहिसम्यग्दर्शनवतांप्रसिद्धासंसिद्धिरिति तत्किंजनकादयोपिप्राप्तसम्यग्दर्शनाःस्युःउताप्राप्तसम्यग्दर्शनाभवेयुरिति विकल्यप्रथमंप्रत्याह यदीति लोकसंग्रहार्थकर्मणासहैवसंसिद्धिमास्थिताइतिसम्बन्धः कर्मणासहैवेत्येतत्व्याकरोति असंन्यस्यैवकर्मेतितत्रहेतुमाह प्रारब्धेति जनकादीनांसत्यपिज्ञानित्वेप्रारब्धकर्मवशात्कर्मापरित्यज्यैवलोकसंग्रहार्थप्रवर्त्तमानानांज्ञानमाहात्म्यादुपपन्नासंसिद्धिरित्यर्थः द्वितीयमनूद्यपूर्व्वार्द्धेनोत्तरमाह अथेत्यादिना द्वितीयार्द्धव्यावर्त्त्यांशङ्कामुत्थापयति अथेति अज्ञेनाकृतार्थेनकृतंकर्मेत्येतावताज्ञानवताकृतकृत्येननतत् कर्त्तव्यमित्युक्तमङ्गीकरोतितथापीति तर्हिमयापिज्ञानवताकृतार्थेनकर्मनकर्त्तव्यमित्याशंक्यार्जुनस्यकर्त्तव्यमेवकर्मेत्युत्तरार्द्धव्याख्यानेनकथयति प्रारब्धेति २०

स्वामिकृतटीका ।

मेवेत्याह लोकसंग्रहमित्यादि लोकस्यसंग्रहःस्वधर्म्मेप्रवर्त्तनंमयाकर्म्मणिकृतेजनःसर्वोऽपिकरिष्यति अन्यथाज्ञानिदृष्टान्तेनाज्ञोनिजधर्म्मंनित्यंकर्म्मत्यजन्पतेदित्येवंलोकरक्षणमपितावत्प्रयोजनंपश्यन्कर्म्मकर्त्तुमेवार्हसिनत्यक्तुमित्यर्थः २०

भाषा अनुवाद ।

अबइसविषयमेंज्ञानीयोंकेआचणकोप्रमाणदेतेहैं किदेखोपरमज्ञानीजनकराजाकर्मकेआचणकरनेसेशुद्धसत्त्वहोकरअच्छीतरह ज्ञानकोप्राप्तभयेथेऔरजोतुमसम्पूर्णज्ञानीअपनेकोजानोतौभीकर्मकरनाही श्रेयकहेकल्याणहै यहकहतेहैं किसबमनुष्योंकोकर्ममेप्रवृत्तिकेअर्थअर्थात् हमारेकर्मकरनेसेसबलोगकर्मकरैंगेनहींतोज्ञानीकाव्यवहारदेखिअज्ञानीलोगभीव्यवहारछोड़िबैठैंगे इसहेतुलोककीरक्षाकेअर्थकर्मकरनाप्रयोजनहै यहविचारिकर्मकरनायोग्यहै सोतुमभूलकेभीकर्मनत्यागकरना २०

CC-0. In Public Domain. Digitized by eGangotri

यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते २१

शाङ्करभाष्यं।

लोकसंग्रहःकिमर्थउच्यते यद्यदिति यद्यत्कर्मआचरतिश्रेष्ठःप्रधानस्तत्तदेवकर्माचरति इतरोजनस्तदनुगतःकिञ्चश्रेष्ठोयत्प्रमाणंकुरुतेलौकिकंवैदिकंवालोकस्तदनुवर्त्तते तदेवप्रमाणीकरोतीत्यर्थः २१

आनन्दगिरिकृतटीका।

ज्ञानवताकृतार्थेनलोकसंग्रहार्थमपिनप्रवर्त्तितव्यमित्याशङ्क्यामुत्याध्यपरिहरति लोकेत्यादिना श्रुताध्ययनसम्पन्नत्वेनाभिमतोयद्यद्विहितंप्रतिषिद्धंवाकर्मानुतिष्ठतितत्तदेव प्राकृतोजनोऽनुवर्त्तते तेनविद्वतापिलोकमर्य्यादास्थापनार्थंविहितं कर्त्तव्यमित्यर्थः श्रेष्ठानुसारित्वमितरेषामाचारेदर्शयित्वाप्रतिपत्तावपिदर्शयति किञ्चेति २१

कृतार्थस्यापिलोकसंग्रहार्थंविहितंकर्मकर्त्तव्यमित्युक्तंतत्रैवभागवतमतमुदाहरणत्वेनोपन्यस्यतियदित्यादिना अप्राप्तस्यप्राप्तयेतवापिकर्त्तृत्वसम्भवात्नकिञ्चिदपिविद्यतेकर्त्तव्यमिति कथमुक्तमित्याशंक्याह नानवाप्तमिति प्रतीकमुपादाय व्याख्यानद्वाराविद्वतोऽपिकर्म्मप्रवृत्तिंसम्भावयति नेत्यादिना अन्वयार्थंपुनर्नञोनुवादः भगवतोमेनास्तिकर्त्तव्यमित्येतदाकाङ्क्षाद्वारास्फोरयति कस्मादित्यादिना प्रयोजनाभावेत्वयापिनानुष्ठेयंकर्म्मेत्याशङ्क्यलोकसंग्रहार्थंममापिकर्मानुष्ठानमितिमत्वाह तथापीति २२

स्वामिकृतटीका।

कर्म्मकरणेलोकसंग्रहोयथास्यात्तदाह यद्यदिति इतरःप्राकृतोऽपिजनस्तत्तदेवाचरतिसश्रेष्ठोजनःकर्म्मशास्त्रंतन्निवृत्तिशास्त्रंवायत्प्रमाणंमन्यते तदेवलोकोऽपनुसरति २१

भाषा अनुवाद।

औरतुमारेकर्म्मकरनेसे सबलोगोंकीकर्ममेरुचिहोयगीयहकहतेहैं किश्रेष्ठकहेबडेलोगनिवृत्तियाप्रवृत्तिकर्मजोप्रमाणमानतेहौंकरतेहैं सोईसाधारणमनुष्यभीआचरणकरतेहैं अर्थात् उनकेअनुसारहीसबव्यवहारके अनुगामीहोतेहैं २१

CC-0. In Public Domain. Digitized by eGangotri

नमेपार्थास्तिकर्त्तव्यंत्रिषुलोकेषुकिञ्चन नानवाप्तमवाप्तव्यंवर्त्तएवचकर्म्मणि २२
यदिह्यहंनवर्त्तेयंजातुकर्म्मण्यतन्द्रितः ममवर्त्मानुवर्त्तन्तेमनुष्याःपार्थसर्व्वशः २३

शाङ्करभाष्यं

यद्यत्रलोकसंग्रहकर्त्तव्यतयांविप्रतिपत्तिस्तर्हिमांकिंनपश्यसिनेति नमेमम पार्थनास्तिनविद्यतेकर्त्तव्यंत्रिष्वपिलोकेषुकिञ्चनकिञ्चिदपिकस्मान्नअनवाप्तमप्राप्तमवाप्तव्यं प्रापणीयंतथापिवर्त्तएवचकर्म्मण्यहं २२

यदिहिपुनरहंनवर्त्तेयंजातुकदाचित् कर्म्मण्यतन्द्रितोऽनलसःसन्ममश्रेष्ठस्य सतोवर्त्ममार्गमनुवर्त्तन्तेमनुष्याःहेपार्थसर्व्वशःसर्व्वप्रकारैः २३

आनन्दगिरिकृतटीका।

लोकसंग्रहोपिनतेकर्त्तव्योविफलत्वादित्याशंक्याह यदिहीति २३

श्रेष्ठस्यतवमार्गानुवर्त्तित्वं मनुष्याणामुचितमेवेत्याशंक्यदूषयति तथाचेत्यादिना ईश्वरस्यकर्मण्यप्रवृत्तौतदनुवर्त्तिनामपिकर्म्मानुपपत्तिरिति हेतुमाह लोकस्थितीति इतश्चेश्वरेणकर्मकर्तव्यमित्याह किञ्चेति यदिकर्मनकुर्यामिति शेषः सङ्करकरणस्यकार्यंकथयति तेनेति प्रजोपहतिरपिप्राप्यते चेत् किंतयातवस्यादितितत्राह प्रजानामिति त्वामनाचरन्तमनुवर्त्ततां सर्व्वेषांकोदोषःस्यादित्यपे

स्वामिकृतटीका।

अत्रचाहमेवदृष्टान्तइत्याह नमेइतित्रिभिः हेपार्थमेकर्त्तव्यंनास्तियतस्त्रिष्वपि लोकेष्वनवाप्तमप्राप्तंअवाप्तव्यंप्राप्यंनास्तितथापिकर्मणिवर्त्तएवकर्मकरोम्येवेत्यर्थः२२

अकरणेलोकस्यनाशंदर्शयति यदिह्यहमिति जातुकदाचिदतन्द्रितोऽनलसः सन्यदिकर्मणिनवर्तेयंकर्मनानुतिष्ठेयंतर्हिममैववर्त्ममार्गंमनुष्याअनुवर्त्तन्तेऽनुवर्त्तेरन्नित्यर्थः २३

भाषा अनुवाद।

इसविषयमेभगवानअपनेकोदृष्टान्तकहतेहैं किहेपार्थअर्जुनदेखोत्रैलोक्य मेभीहमकोकर्त्तव्यकर्मकुछनहींहै तौभीहमकर्मकर्त्तेहींरहतेहैं औरहमको त्रिभुवनमेअलभ्यतथाकिसीवस्तुमेअभिलाषनहींहै यहोजानो २२

तौफिरिजोहमकर्मनकरैंतोकर्मनकरनेमेजोलोगोंकीहानिहोयगीसोदेखा वतेहैं किजोसावधानहोकर्ममेहमकभीनवर्त्तमानहोंय तोसबलोगहमारीहीरा हचलेंअर्थात्हमारीनाईकरैं २३

CC-0. In Public Domain. Digitized by eGangotri

उत्सीदेयुरिमेलोकानकुर्यांकर्म्मचेदहं सङ्करस्यचकर्त्तास्यामुपहन्यामिमाःप्रजाः२४

श्राङ्करभाष्यम् ।

तथाचकोदोषइत्याह उत्सीदेयुर्विनश्येयुरिमे सर्व्वेलोकाः लोकस्थितिनिमित्तस्यकर्मणोऽभावात् नकुर्य्यांकर्मचेदहं किञ्चसङ्करस्यचकर्त्तास्यां तेनकारणेनोपहन्यामिमाः प्रजाःप्रजानामनुग्रहायप्रवृत्तस्तदुपहर्तां उपहननंकुर्य्यामित्यर्थः ममेश्वरस्याननुरूपमापद्येत यदिपुनरहमिवत्वं कृतार्थबुद्धिरात्मविदन्योवा तस्माद्यात्मनः कर्त्तव्याभावेऽपिपरानुग्रहएव कर्त्तव्यइति २४

आनन्दगिरिकृतटीका ।

ननुयामीश्वरस्यकृतार्थतया कर्म्मानुष्ठानाभावेतदनुवर्त्तिनामपितदभावादेवस्थितिहेत्वभावात् पृथिव्यादिभूतानांविनाशप्रसङ्गाद्वर्णाश्रमधर्म्मव्यवस्थानुपपत्तेश्चाधिकृतानांप्राणभृतां पापोपहतत्वप्रसङ्गात् परानुग्रहार्थप्रवृत्तिरीश्वरस्येत्युक्तंसम्प्रतिलोकसंग्रहायकर्मकुर्व्वाणस्यकर्त्तृत्वाभिमानेनज्ञानाभिभवेप्राप्तेप्रत्याह यदिपुनरिति कृतार्थबुद्धित्वेहेतुमाह आत्मविदिति यथावदात्मानमवगच्छन्कर्त्तृत्वाद्यभिमानाभावात् कृतार्थोभवत्येवेत्यर्थः अर्ज्जुनादन्यत्रापिज्ञानवति कृतार्थबुद्धित्वकर्तव्यत्वाद्यभिमानहीने तुल्यमित्याह अन्योवेति तस्यतर्हिकर्मानुष्ठानमफलत्वादनवकाशमित्याशंक्याह तस्मादपीति कर्तव्यइत्यात्मविदापिपरानुग्रहायकर्तव्यमेवकर्मेत्याहेति शेषः २४

दृष्टान्तदर्ष्टान्तिकरूपं श्लोकंव्याकरोति सक्ताइत्यादिना असक्तः सन्कर्तृत्वाभिमानं फलाभिसन्धिंवाऽकुर्व्वन्निति यावत् २५

स्वामिकृतटीका ।

ततः किमतआह उत्सीदेयुरिति उत्सीदेयुःधर्म्मलोपेननश्येयुःततश्चयोवर्णसङ्करोभवेत्तस्याप्यहमेव कर्त्ता स्यांभवेयं एवमहमेव प्रजाउपहन्यांमलिनीकुर्य्यामिति २४

भाषा अनुवाद ।

तौ उसमेजोहोगासोकहतेहैं किजोहमकर्म्मन करैं तोधर्मलोपहो जाय औरधर्मलोपसेप्रजानष्टहोयगींऔवेमर्जादहो राहछोड़जोजिसकेमनमानै सोई करैतो संसारमेदुराचारसेवर्णशङ्करजन्मैगेफेरिइसअनुचितकेकर्त्ताभीहमीठहरेअपनीप्रजाआपहीनष्टकिया यही होगा २४

CC-0. In Public Domain. Digitized by eGangotri

सक्ताः कर्म्मण्यविद्वांसो यथा कुर्वन्ति भारत
कुर्य्याद्विद्वांस्तथा सक्तश्चिकीर्षुर्लोकसंग्रहं २५
नबुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनां
योजयेत् सर्वकर्म्माणिविद्वान्युक्तः समाचरन् २६

शाङ्करभाष्यं

सक्ताइति सक्ताः कर्मण्यकर्मणःफलंममभविष्यतीति केचिदविद्वांसोयथा कुर्व्वन्तिभारत कुर्य्याद्विद्वानात्मवित्तथाऽसक्तःसन्तद्वत् किमर्थंकरोति तच्छृणु चिकीर्षुर्यथा कर्तुमिच्छुः लोकसंग्रहं २५

आनन्दगिरिकृतटीका।

इत्तमनूद्योत्तरश्लोकमवतारयति एवमिति कर्तव्यंकर्मेति शेषः पूर्वार्द्धमेवं व्याख्यायउत्तरार्द्धं प्रश्नपूर्वकं अवतार्य्यव्याचष्टे किन्तु कुर्य्यादिति सर्वकर्माणिकार येत्तेषु प्रीतिं कुर्वन्निति शेषः कथंकारयेदित्याकाङ्क्षायामाह तदेवेति २६

स्वामिकृतटीका।

तस्मादात्मविदापिलोकसंग्रहार्थंतत्कृपया कर्मकार्य्यमेवेत्युपसंहरति सक्ता इति कर्मणिसक्ताः अभिनिबिष्टाःसन्तो यथाऽज्ञाःकर्म्माणि कुर्वन्ति असक्तःसन् विद्वानपितथैव कुर्य्याल्लोकसंग्रहं कर्तुमिच्छुः २५

भाषा अनुवाद।

इसवास्तेआत्मज्ञानी कोभी लोगोंपरकृपाकरि शिक्षादेनेकेअर्थकर्मकरना चाहिये इसीको कहते हैं किहेभारत अर्जुन कर्ममेआसक्त होकरजैसेअज्ञानी लोगकर्मकरते हैं तैसेलोगोंके उपदेशकी इच्छा करि विद्वानकहे ज्ञानीभीकर्म करैतो धर्मकोमार्ग वनीरहैं गी २५

तोफेरिसवकोतत्त्वज्ञानहीकाउपदेशकरनाचहियेऐसाकहोसोनहींयह कहतेहैं किअज्ञजोकर्ममेआसक्तहैं तिनकोआत्मउपदेशदेकरबुद्धिकाभेदउत्पन्न कभीनकरैअर्थात् कर्मसेउनकोनछुड़ावै वलुउनसेऔरभीकर्मकरावै तोफेरउन सेकिसतरहकर्मकरावैसोकहतेहैं किआपसावधानहोकर्मकाआचरनकरतउ नसेकरवावै नहींतोउनकीबुद्धिचलविचलकरावनेसेफेरिकर्ममेउनकी श्रद्धाचली जायगीऔरजोज्ञानकीभीउत्पत्तिनभईतोउनकीदोनोराहनष्टगईविचारेअज्ञानी उधरकेभीनभयेऔरइधरसेभीचलेगयेयहीहोगा २६

CC-0. In Public Domain. Digitized by eGangotri

प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः
अहङ्कारविमूढ़ात्मा कर्त्ताहमिति मन्यते २७

शाङ्करभाष्यं

एवंलोकसंग्रहंचिकीर्षोर्ममात्मविदःकर्त्तव्यमस्त्वन्यस्यवालोकसंग्रहमुक्त्वाततस्त स्यात्मविदिदमुपदिश्यते नेति बुद्धेर्भेदोबुद्धिभेदःमयाइदंकर्त्तव्यंभोक्तव्यञ्चास्यक र्मणःफलमितिनिश्चयरूपायांबुद्धेर्भेदनंचालनंबुद्धिभेदस्तन्नजनयेन्नोत्पादयेदज्ञाना मविवेकिनांकर्मसङ्गिनांकर्मण्यासक्तानांआसङ्गवतां किन्तुकुर्य्याञ्जोजयेत् कारयेत् सर्वकर्माणि विद्वान्स्वयंतदेवाविदुषांकर्मयुक्तोऽभियुक्तःसमाचरन् २६

अविद्वान्अज्ञःकथंकर्मसुसज्जतइत्याह प्रकृतेरिति प्रकृतेःप्रकृतिःप्रधानंस त्त्वरजस्तमसांगुणानांसाम्यावस्थातस्याःप्रकृतेर्गुणैर्व्विकारैः कार्य्यकरणरूपैक्रियमा णानिकर्म्माणिलौकिकानिशास्त्रीयाणिचसर्व्वशःसर्व्वप्रकारैरहङ्कारविमूढ़ात्माका

आनन्दगिरिकृतटीका ।

अज्ञानांकर्मसङ्गिनामित्युक्तं तेनोत्तरश्लोकस्यसङ्गतिमाह अविद्वानिति क र्तृत्वमात्मनोवास्तवमित्यभ्युपगमाद्विद्वान्कथंकुर्वन्नेवतस्याभावंपश्यतीत्याशंक्याहप्रकृ तेरिति कर्मस्वविदुषःशक्तिप्रकारंप्रकटयन्व्याकरोति प्रकृतेरित्यादिना प्रधानश ब्देनमायाशक्तिरुच्यते अविद्ययेत्युभयतः संवध्यते २७

स्वामिकृतटीका ।

ननुकृपयातत्त्वज्ञानमेवोपदेष्टुंयुक्तंनेत्याह नवुद्धिभेदमिति अज्ञातएवकर्म सङ्गिनांकर्मासक्तानामकर्त्रात्मोपदेशेन वुद्धेर्भेदमन्यथात्वंनजनयेत् कर्मणःसकाशा द्बुद्धिविचालनंनकुर्य्यात् अपितु योजयेत्सेवयेत् अज्ञानकर्माणिकारयेदित्यर्थःक थंयुक्तोऽव्रहितोभूत्वा स्वयमाचरन्सन्वुद्धिविचालनेकृतेसतिकर्मसुश्रद्धानिवृत्ते ज्ञानस्यचानुत्पत्येस्तेषामुभयभ्रंशःस्यादिति भावः २६

भाषा अनुवाद ।

जोकहोकिइसप्रकारजोज्ञानीकर्मकरैतोअज्ञानीऔज्ञानीकेवीचक्याविशे षरहा इसीअभिप्रायपरदोश्लोकसेदोनोकाअन्तरदेखावतेहैं किदेखोमूढ़लोग प्रकृतिजोमायासोईन्द्रियोंकेद्वाराजोसवकर्मकरतीहै उनकर्मोंकोहमकरतेहैं ऐसामानिलेतेहैं मानिलेनेकाकारणयहहै किअहङ्कारसेईन्द्रियोंमेआत्मा काअध्यासअर्थात्इन्द्रियोंकोआत्माजानिकरउनकीवुद्धिमूढ़होगईहै २७

CC-0. In Public Domain. Digitized by eGangotri

तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः गुणागुणेषुवर्तन्तइतिमत्वानसज्जते २८

शाङ्करभाष्यं ।

र्य्युकरणसंघातात्मप्रत्ययोऽहङ्कारस्तेनविविधंनानाविधंमूढः आत्मान्तःकरणं यस्य सोऽयंकार्य्यकरणधर्माकार्य्यकरणाभिमान्यविद्ययाकर्म्माण्यात्मनिमन्यमानस्तत्तत् कर्मणामहंकर्त्तेति मन्यते २७

यःपुनर्मन्यतेविद्वान्तत्त्ववित्तिति तत्त्ववित्तुमहाबाहोकस्यतत्त्ववित्गुणकर्म विभागयोर्गुणविभागस्यकर्मविभागस्यचतत्त्ववित्यर्थः गुणाःकरणात्मकाःगुणे षुविषयात्मकेषुवर्त्तन्तेनात्मेतिमत्वानसज्जतेसङ्गिनंकरोति २८

आनन्दगिरिकृतटीका ।

अन्नस्यकर्मसुशक्तिमुक्ताविदुषस्तदभावमभिदधाति यःपुनरिति तत्त्वंयाथा त्म्यंवेत्त्येतिव्युत्पत्त्यातत्त्ववित्तिति तुशब्देनान्नाद्विशिष्टोनिर्द्दिष्टः प्रश्नपूर्वकंद्वितीय पादमवतार्य्यव्याचष्टे कस्येत्यादिना गुणानामेवगुणेषुवर्तमानत्वमयुक्तंनिर्गुणत्वा त्तेषामित्याशंक्यविभजते गुणाइति कार्य्यकरणानामेवविषयेषुप्रवृत्तिरात्मनस्तु कूटस्थत्वान्नैवमितिज्ञात्वातत्त्ववित्कर्मसुदृढ़तरंकर्त्तव्याभिमानं नकरोतीत्यर्थः २८

स्वामिकृतटीका

ननुविदुषापिचेत्कर्मकर्तव्यंतर्हिविद्वद्विदुषोःकोविशेषइत्याशंक्योभयोर्विशे षंदर्शयति प्रकृतेरितिद्वाभ्यां प्रकृतेर्गुणैःप्रकृतिकार्य्यैरिन्द्रियैःसर्व्वप्रकारेणक्रि यमाणानिकर्म्माणितान्यहमेवकर्त्ताकरोमीतिमन्यते तत्रहेतुःअहमितिअहङ्का रेणेन्द्रियादिष्वात्माध्यासेनबिमूढ़बुद्धिःसन् २७

भाषा अनुवाद ।

औरज्ञानीऐसानहीं मानतेहैं सोईकहतेहैं कितत्त्वज्ञानीतोहमइन्द्रि यरूपनहींहैं ऐसेविचारकरिइन्द्रियोंसेआत्माकोजुदाजानतेहैं औरहमारे कोईभीकर्मनहींहैं ऐसेविचारकरकर्मोंसेअपनेकोपृथकमानतेहैं अर्थात्इस प्रकारइन्द्रीऔकर्मसेपृथकबुद्धिहोकरजोतत्ववस्तुसोजानतेहैं हेअर्जुनवेऔरफ़े रिकर्ममेंआसक्तनहीं होतेअर्थात्हमकर्मकरतेहैं यहविचारनहींकरते इसका हेतुयहकिमायाकेद्वारासबइन्द्रीविषयोंमेंप्रवृत्तहैं हमसबसेअलगहैं यहउनका भलीभांतिजानाहै २८

CC-0. In Public Domain. Digitized by eGangotri

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु
तानकृत्स्नविदोमन्दान्कृत्स्नविन्नविचालयेत् २९

शाङ्करभाष्यं

येपुनःप्रकृतेरिति प्रकृतेर्गुणैःसम्यक्मूढाःसंमोहिताः सन्तःसज्जन्तेगुणानां कर्म्मसुगुणकर्म्मसुवयंकर्म्मकुर्म्मःफलायेति तान्कर्म्मसङ्गिनोऽकृत्स्नविदःकर्म्मफलमात्रदर्शिनोमन्दान्मन्दप्रज्ञान्कृत्स्नविदात्मवित् स्वयंनविचालयेत् बुद्धिभेदकरणमेवचालनंतन्नकुर्य्यादित्यर्थः २९

आन्दगिरिकृतटीका ।

विद्वानविद्वानित्युभावपिप्रकृत्यविद्वान्नाविदुषोबुद्धिभेदंकुर्य्यादित्युपसंहरति, येपुनरिति प्रकृतेरुक्तायागुणैर्देहादिभिर्व्विकारैःसंमूढास्तानेवात्मत्वेनमन्यमानायेतेगुणानांतेषामेवदेहादीनांकर्मसुव्यापारेषुसज्जन्ते सक्तिंदृढतरामात्मीयबुद्धिंकुर्व्वन्तीत्याह प्रकृतेरित्यादिना तेषामनात्मविदांस्वयमात्मविद्बुद्धिभेदंनापादयेदित्याह तानित्यादिना २९

स्वामिकृतटीका ।

विद्वांस्तुतथानमन्यतइत्याह तत्त्ववित्तिति नाहंगुणात्मकइतिगुणेभ्यःआत्मनोविभागःनमेकर्माणीतिकर्मभ्योऽप्यात्मनोविभागःतयोर्गुणकर्मविभागयोर्यस्तत्त्ववेत्ति सतु नसज्जतेकर्तृत्वाभिनिवेशंनकरोति तत्रहेतुःगुणाइति गुणाइन्द्रियाणिगुणेषुविषयेषुवर्त्तन्तेनाहमितिमत्वा २८

नबुद्धिभेदमित्युपसंहति प्रकृतेरिति यैःप्रकृतेर्गुणैःसत्त्वादिभिःसंमूढाःसन्तोगुणेषुइन्द्रियेषुतत्कर्म्मसुचसज्जन्ते तानकृत्स्नविदोमन्दमतान्कृत्स्नवित्सर्व्वज्ञोनविचालयेत् २९

भाषा अनुवाद ।

सोकहतेहैं किप्रकृतिजो मायातिसकेगुणजोसत्त्वरजतम तिन से सम्यक मूढ कहे मोह कोप्राप्तजोजन है तेईगुणोकेकर्म्मे अर्थात् सात्त्विकराजस तामसत्रिगुणकर्म्ममेआसक्तहोय कर्म्मकासङ्गकरते हैं तिनअसंपूर्णज्ञानीमन्दमति मनुष्योंको उसकर्म्मके आनन्दसेमगनमनजनोंको कर्मकरनेसे उनकोकृत्स्नवित कहे सम्पूर्णज्ञानी सोनचलावेअर्थात् उनको कर्मरहित नकरै २९

CC-0. In Public Domain. Digitized by eGangotri

मयिसर्व्वाणिकर्म्माणि संन्यस्याध्यात्मचेतसा
निराशीर्निर्ममोभूत्वा युध्यस्वविगतज्वरः ३०

शाङ्करभाष्यं

कथंपुनःकर्मण्यधिक्रतेनाज्ञेनमुमुक्षुणाकर्मकर्त्तव्यमित्युच्यते मयीति मयिवासुदेवे परमेश्वरेसर्व्वज्ञेसर्व्वात्मनिसर्व्वाणिकर्म्माणिसंन्यस्यनिक्षिप्याध्यात्मचेतसाविवेकबुद्ध्याहं कर्तेश्वराय भृत्यवत् करोमीत्यनयाबुद्ध्या किञ्चनिराशीःत्यक्ताशीःनिर्ममो ममभावश्च निर्गतो यस्यतवरूत्वं निर्ममोभूत्वायुध्यस्व विगतज्वरोविगतसन्तापोविगतशोकःसन्नित्यर्थः ३०

आनन्दगिरिकृतटीका।

यद्यपिकर्मण्यज्ञोऽधिक्रियते तथापिमोक्ष्यमाणेनतेनकर्मत्यक्तव्यंमोक्षस्यकर्म्मासाध्यत्वान्नतुतेनकर्मकर्त्तुंशक्यंकर्मणः सापेक्षितविरोधित्वादितिशङ्कते कथमितिश्लोकेनोत्तरमाह उच्यतइति यथोक्तेपरस्मिन्नात्मनिसर्व्वकर्मणांसमर्पणेकारणमाह अध्यात्मेति विवेकबुद्धिमेवव्याकरोति अहमिति दर्शितरीत्याकर्मसुप्रवृत्तस्यकर्त्तव्यान्तरमाह किञ्चेति त्यक्ताशीःफलप्रार्थनाहीनःसन्नित्यर्थःनिर्ममोभूत्वापुत्रभ्रात्रादिषुतिशेषः ननुयुद्धेनियोगोनोपपद्यतेपुत्रभ्रात्रादिहिंसात्मनस्तस्यसन्तापहेतोःनियोगविषयत्वायोगादितितत्राह विगतेति ३०

स्वामिकृतटीका

तदेवंतत्त्वविदापिकर्म्मकर्त्तव्यंत्वन्तु नाद्यापितत्त्वविदतः कर्त्तैबकुर्य्यित्याह मयीति सर्व्वाणिकर्म्माणिमयिसंन्यस्यसमर्प्याध्यात्मचेतसाऽन्तर्यामोऽहंकर्मकरोमीतिबुद्ध्यानिराशीर्निष्कामोऽतएव मत्फलसाधनं मदर्थमिदंकर्मेत्येवं ममताशून्यश्चभूत्वाविगतज्वरत्यक्तशोकश्चभूत्वायुध्यस्व ३०

भाषा अनुवाद

सोदेखोनत्वज्ञानीकोभीकर्मकरनाउचितहै औरकहतेआयेहैं और तुमतोअभीऐसेकुछतत्त्वज्ञानीभयेभीनहींहो इससेअछीतरहकर्मकरोकर्मकरनेमेतोतुमाराअधिकारहीहै यहभगवानकहतेहैं किआत्मामेचित्तदेसबकर्महमारेमेअर्पणकरकेअर्थात् हमअन्तर्यामीभगवानकेआधीनहोय कर्मकरतेहैं औरयहहमाराकामहै हमकरतेहैं इसबिचारऔफलकीआशाछोड़करतथाशोकदूरकरितुमबेखटकयुद्धकरोयहकहा ३०

CC-0. In Public Domain. Digitized by eGangotri

येमेमतमिदंनित्यमनुतिष्ठन्तिमानवाः श्रद्धावन्तोऽनसूयन्तोमुच्यन्तेतेपिकर्मभिः ३१
येत्वेतदभ्यसूयन्तोनानुतिष्ठन्तिमेमतं सर्व्वज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः ३२

शाङ्करभाष्यम् ।

यदेतन्ममतंकर्मकर्तव्यमिति सप्रमाणमुक्तंतत्तथायेमदिति येमदीयमिदंमत मनुतिष्ठन्तिअनुववर्त्तन्तेमानवामनुष्याःश्रद्धावन्तःश्रद्दधानाः अनसूयबन्तोऽसूयाम यिपरमगुरौवासुदेवेऽकुर्व्वन्तोमुच्यन्तेतेऽप्येवम्भूताःकर्मभिर्धर्माधर्माख्यैः ३१
येत्विति येतुतद्विपरीताएतत् ममतंअभ्यसूयन्तोनिन्दन्तोनानुतिष्ठन्तिनानुवर्त्त न्तेमेमतंसर्व्वेषुज्ञानेषु विविधंमूढास्तेसर्व्वज्ञानविढांस्तान्विनष्टान्नाशंगतानचेत सोऽविवेकिनः ३२

आनन्दगिरिकृतटीका ।

प्रकृतंभगवतोमतमुक्तप्रकारमनुस्त्यैवानुतिष्ठतांक्रममुक्तिफलंकथयति यद्येत दिति शास्त्राचार्य्योपदिष्टेऽदृष्टार्थेविश्वासवत्त्वंश्रद्दधानत्वंगुणेषुदोषाविष्करण मसूयाऽप्रियथोक्तायामुक्तेरमुख्यत्वद्योतनार्थः ३१

स्वामिकृतटीका ।

एवंकर्मानुष्ठानेगुणमाह येमेइति मद्वाक्येश्रद्धावन्तोऽनसूयन्तोदुःखात्मके कर्मणिप्रवर्त्तयतीति दोषदृष्टिमकुर्व्वन्तश्चयेमदीयमिदंमतमनुतिष्ठन्तितेऽपिश्वनैः कर्मकुर्व्वाणाःसम्यग्ज्ञानिवत्कर्मभिर्मुच्यते ३१
विपक्षेदोषमाह येत्वेतदिति येतुनानुतिष्ठन्तितानचेतसोविवेकशून्यान्अत एवसर्व्वस्मिन्कर्मणिब्रह्मविषयेचयज्ज्ञानंतत्रविमूढान्नष्टान्विद्धि ३२

भाषाअनुवाद ।

इसप्रकारकर्मकरनेमेउपकारकहतेहैं किजोइसहमारेमतमेंश्रद्धायुक्तहो औरअसूयारहितअर्थानिन्दानकरिके किदुखदाईकर्ममेहमकोप्रवृत्तकरतेअर्था त्तलगावतेहैं ऐसीदोषदृष्टिनकरकेजोकोईयहमेरामतअङ्गीकारकरकेकरैसो कर्मकेद्वाराक्रमक्रमसेज्ञानीकीतरहकर्मसेमुक्तहोयपरहोय ३१
अबइसकेविरीतआचरणमेंजोदोषसोकहतेहैं किजोलोगइसतरहकर्मन करैंतेविचाररहितहैं औरकर्मतथाब्रह्मज्ञानमेंभ्रष्टविवेकजानोसोईकहतेहैं किजोइसमेरेमतकीनिन्दाकरतेऊयेइसमतमेंनहींप्रवृत्तहोतेहैं उनकोसकल ज्ञानकेमूढ़ात्मानष्टबुद्धिजानो ३२

CC-0. In Public Domain. Digitized by eGangotri

सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि प्रकृतिंयान्तिभूतानिनिग्रहःकिंकरिष्यति३३

शाङ्करभाष्यं

कस्मात्पुनःकारणात्त्वदीयंमतंनानुतिष्ठन्तःपरधर्मांननुतिष्ठन्तिस्वधर्मञ्च नानुवर्त्तन्तेतत्प्रतिकूलाः कथंनविध्यतितच्छासनातिक्रमदोषात्तत्राह सदृशमिति सदृशमनुरूपंचेष्टतेचेष्टांकरोतिकस्याःस्वस्याःस्वकीयायाःप्रकृतेःप्रकृतिर्नामपूर्वकृतधर्माधर्मादिसंस्कारोवर्त्तमानजन्मादावभिव्यक्तः साप्रकृतिस्तस्याःसदृशमेवसर्व्वो जन्तुर्ज्ञानवानपिचेष्टतेकिंपुनर्मूर्खस्तस्मात् प्रकृतिंयान्तिअनुगच्छन्तिभूतानिनिग्रहःनिषेधरूपःकिंकरिष्यतिममचान्यस्यवा ३३

आनन्दगिरिकृतटीका।

भगवन्मताननुवर्त्तिनांप्रत्यवायित्वं प्रत्याययति येत्वितिताद्विपरीतत्वंभगवन्मतानुवर्त्तिभ्योवैपरीत्यंतदेवदर्शयति एतदित्यादिना अभ्यूह्यन्तस्तत्रासन्तमपिदोषमुद्भावयन्तइत्यर्थः सर्व्वज्ञानानि सगुणनिर्गुणविषयाणि प्रमाणप्रमेयप्रयोजनविभागतोविविधत्वं ३२

भगवन्मतानुवर्त्तनमन्तरेणपरधर्मानुष्ठानेस्वधर्मानुष्ठानेचकारणंपृच्छति कस्मादिति भगवत्प्रतिकूलत्वमेवतत्रकारणमित्याशंक्याह तत्प्रतिकूलाइति राजानुशासनातिक्रमेदोषदर्शनात्भगवदनुशासनातिक्रमेऽपिदोषसम्भवात्तत्प्रतिकूलत्वंभयकारणमित्यर्थः उत्तरत्वेनश्लोकमवतारयति सदृशमिति सर्व्वस्यप्राणिवर्गस्यप्रकृतिवशवर्त्तित्वेकैमुतिकन्यायंसूचयति ज्ञानवानपीति सर्व्वाण्यपिभूतान्यनिच्छन्त्यपिप्रकृतिसदृशीं'चेष्टांगच्छन्तीतिनिगमयति प्रकृतिमिति भूतानांप्रकृतेरधीनत्वेपिप्रकृतिर्भगवतानिग्राह्येत्याशंक्याह निग्रहइति कापुनरियंप्रकृतिर्यदनुसारिणीभूतानांचेष्टेतिपृच्छति प्रकृतिर्नामेति भगवदभिप्रेतांप्रकृतिंप्रकटयति पूर्व्वेति

भाषा अनुवाद।

जोकहोकितौफेरिमहाफलकेअर्थइन्द्रियोंकोनिग्रहकरकेऔरकामनाकोत्यागिसभीलोगक्योंनहींइसतरहस्वधर्मकाअनुष्ठानकरतेहैं तोइसपरकहतेहैं किपूर्वकर्मकेसंस्कारकेअधीनजोस्वभाव तिसकेअनुसारगुणदोषकेज्ञानवानभीचेष्टाकरतेहैं तोफेरअज्ञविचारेजोस्वभावअनुरूपचेष्टाकरतेइसमेंऔरक्याकहनाहै जबकिस्वभाववलवानहै तबकिऔरइन्द्रियनिग्रहकोईकरसकैहै तोस्वभावकेअनुरूपचलनांहींपडताहै देखोजोस्वभावप्रबलहै तोइन्द्रिनिग्रहसेक्याफलहोगा ३३

CC-0. In Public Domain. Digitized by eGangotri

इन्द्रियस्येन्द्रियस्यार्थेरागद्वेषौव्यवस्थितौ तयोर्नवशमागच्छेत्तौह्यस्यपरिपन्थिनौ ३४

आनन्दगिरिकृतटीका।

आदिशब्देनज्ञानेच्छादिसंगृह्यते यथोक्तःसंस्कारःस्वसत्त्वयाप्रवर्त्तकश्चेत्प्रलयेऽपिप्रवृत्तिःस्यादित्याशंक्यविशिनष्टि वर्त्तमानेति सर्व्वोजन्तुरित्युक्तंविवेकिप्रवृत्तेरतथात्वादिभिश्चाविशेषादिति न्यायमनुस्मरन्नाह ज्ञानवानिति ज्ञानवतामज्ञानवताञ्चप्रकृत्यधीनत्वाविशेषेफलितमाह तस्मादिति प्रकृतिंयान्तिप्रकृतिसदृशींचेष्टांगच्छन्त्यनिच्छन्त्यपिसर्व्वाणिभूतानिइत्यर्थः प्रकृतेर्भगवतातत्तुल्येनवाकेनचित्तनिग्रहमाशङ्क्यावतारितचतुर्थपादस्यार्थोपेक्षितंपूरयति ममचेति ३३

स्वामिकृतटीका।

ननुतर्हि महाफलत्वादिन्द्रियाणिनिगृह्य निष्कामाःसन्तः सर्व्वेपिस्वधर्म्ममेव किंनानुतिष्ठन्ति तत्राह सदृशमिति प्रकृतिः प्राचीनकर्मसंस्काराधीनस्वभावः स्वस्यःस्वकीयायाः प्रकृतेः स्वभावस्यसदृशमनुरूपमेवगुणदोषज्ञानवानपिचेष्टते किंपुनर्वक्तव्यमज्ञश्चेष्टत इति यस्माद्भूतानिसर्व्वेऽपिप्राणिनःप्रकृतिं यान्ति अनुवर्त्तन्ते एवञ्चसतीन्द्रियनिग्रहः किंकरिष्यति प्रकृतेर्व्वलीयस्त्वादित्यर्थः ३३

भाषा अनुवाद।

जोबलवानस्वभावहीकेअनुसार कर्ममेसबकीप्रवृत्तिहै तौ यह कर्मकरनाऔ यह नकरना जोशास्त्रविधिऔनिषेधकरता सोव्यर्थहै इसशङ्कापरकहतेहैं किइन्द्रियस्यइन्द्रियस्यदुइवारकहनेसे हरएकइन्द्रियको अपनीअपनी विषयके अनुकूलवस्तुमेप्रीतिऔप्रतिकूलविषयमेवैरक्तिकहेविरक्तारूपरागद्वेषादि अवश्य होगा सोइसीसेरागद्वेषकेअनुरूपकर्ममेप्रवृत्तिहोना यह यद्यपिसबकोस्वभाव सिद्धहै परतौभीरागद्वेषकेवशीभूत होनानचाहिये यहीशास्त्रोंमेनियमकरराखा हैक्योंकिमुमुक्षुपुरुषकेवेइविघ्नकारीऔविपक्षहैं तात्पर्ययह किविषयोकेस्मरणके द्वारा रागद्वेषप्रगटकरवाय वहस्वभावअसावधानपुरुषोंकोअपनेबलसेअतिजोर धाराप्रवाहकीनाईअनर्थमेप्रवृत्तकरावताहै परन्तुशास्त्रतो उसअनर्थप्रवृत्तिके पहिलेही विषयोंमेरागद्वेषकाप्रतिबन्धकरूपकहे रोकनेवाला जोभगवताराधनतिसमेप्रवृत्तिकरवातेहैं इससेदेखोकिप्रवाहमेपरनेके पूर्वही नौकाप्राप्तपुरुषकेसमानउसअनर्थसेशास्त्रद्वारामनुष्यबचिजातेहैं इससेस्वाभाविकप्राप्तकर्मत्यागकरकेधर्ममेप्रवृत्तहोना अवश्यकर्त्तव्यहै तात्पर्ययह किअर्जुनतुमस्वभावप्राप्तकरुणाकोछोड़ियुद्धकरो ३४

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

यदिसर्व्वोजन्तुरात्मनःप्रकृतिसदृशमेवचेष्टते नचप्रकृतिशून्यःकश्चिदस्तितः पुरुषकारस्यविषयानुपपत्तेःशास्त्रानर्थक्यप्राप्ताविदमुच्यते इन्द्रियस्येति इन्द्रियस्येन्द्रियस्यार्थेसर्व्वेन्द्रियाणामर्थेशब्दादिविषयेइष्टेशब्दादौरागोऽनिष्टेद्वेषइत्येवंप्रतीन्द्रियार्थेरागद्वेषाववश्यम्भाविनौ तत्रायंपुरुषकारस्यशास्त्रार्थस्यविषयउच्यते शास्त्रार्थेप्रवृत्तः पर्व्वमेवरागद्वेषयोर्व्वशंनागच्छेत् याह्यपुरुषस्यप्रकृतिः सारागद्वेषपुरःसरैवस्वकार्य्येपुरुषंप्रवर्त्तयति यदातदास्वधर्म्मपरित्यागः परधर्म्मानुष्ठानञ्च भवति यदापुनःरागद्वेषौतत्प्रतिपक्षेणनियमयति तदाशास्त्रदृष्टिरेवपुरुषोभवति नप्रकृतिवशस्तस्मात्तयोरागद्वेषयोर्व्वशं नागच्छेद्यतस्तौह्यस्यपुरुषस्यपरिपन्थिनौ श्रेयोमार्गस्यविघ्नकर्त्तारौतस्कराविवेत्यर्थः ३४

आनन्दगिरिकृतटीका

सर्व्वस्यभूतवर्गस्यप्रकृतिवशवर्त्तित्वे लौकिकवैदिकपुरुषकारविषयाभावाद्विधिनिषेधानर्थक्यमिति शङ्कते यदीति ननुयस्यनप्रकृतिरस्तितस्यपुरुषकारसम्भवाद्यर्थवत्त्वंतद्विषयेविधिनिषेधयोर्भविष्यति नेत्याह नचेति शङ्कितदोषंश्लोकेनपरिहरति इदमित्यादिना वीप्सायाः सर्व्वकरणागोचरत्वंदर्शयति सर्व्वेति प्रत्यर्थं रागद्वेषयोरव्यवस्थायां प्राप्तौप्रत्यादिशति इष्टइति प्रतिविषयंविभागेनतयोरन्यतरस्यावश्यकत्वेऽपिपुरुषकारविषयाभावप्रयुक्त्या प्रागुक्तंदूषणंकथंसमाधेयमित्याशंक्याह तत्रेति तयोरित्याद्यवतारितं भागंविभजते शास्त्रार्थस्येति प्रकृतिवश

स्वामिकृतटीका।

नन्वेवंप्रकृत्यधीनैवचेत् पुरुषस्यप्रवृत्तिस्तर्हि विधिनिषेधशास्त्रस्यवैयर्थ्यंप्राप्तमित्याशंक्याह इन्द्रियस्येन्द्रियस्येति वीप्सया सर्व्वेषामिन्द्रियाणां प्रत्येकमित्युक्तंअर्थे स्वस्वविषये अनुकूले रागःप्रतिकूलेद्वेष इत्येवंरागद्वेषौव्यवस्थितौ अवश्यम्भाविनौ ततश्चतदनुरूपाप्रवृत्तिरितिभूतानांप्रकृतिःतथापितयोर्व्वशवर्त्तीनभवेदितिशास्त्रेणनियम्यते हियस्मादस्यमुमुक्षोस्तौपरिपन्थिनौप्रतिपक्षौअयंभावःविषयस्मरणादिनारागद्वेषानुत्पाद्यानवहितं पुरुषमनर्थेऽतिगम्भीरेस्रोतसीवप्रकृतेर्व्वलात्प्रवर्त्तयति शास्त्रंतुततःप्रागेवविषयेषुरागद्वेषप्रतिबन्धकेपरमेश्वरभजनादौतंप्रवर्तयति ततश्चगम्भीरस्रोतःपातात्पूर्व्वमेवनावमाश्रितइवनानर्थंप्राप्नोति तदेवंस्वाभविकींपश्वादिसदृशींप्रवृत्तिंत्यक्त्वाधर्म्मेप्रवर्तितव्यमित्युक्तं ३४

CC-0. In Public Domain. Digitized by eGangotri

श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात्स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः३५

शाङ्करभाष्यं ।

तत्रारागद्वेषप्रयुक्तोमन्यतेशास्त्रार्थमप्यन्यथापरधर्मोपिधर्म्मत्वादनुष्ठेयएवेतित दसत्श्रेयानितिश्रेयान्प्रशस्यतरःस्वधर्म्मस्वकीयधर्मोविगुणोपिविगतगुणोपिअनुष्ठीयमानः परधर्मात्स्वनुष्ठितात्साङ्गुष्येनसम्पादितादपिस्वधर्म्मेस्थितस्यनिधनंमरणमपिश्रेयःपरधर्म्मेस्थितस्यजीवितात् कस्मात् परधर्मोभयावहः नरकादिलक्षणंभयमावहतियतः ३५

आनन्दगिरिकृतटीका ।

त्वाद्यन्तोनैवनियोज्यत्वमित्याशंक्याह याहीति रागद्वेषद्वाराप्रकृतिवशवर्त्तित्वे स्वधर्मत्यागादिदुर्व्वारमित्युक्तमिदानींविवेकविज्ञानेन रागादिनिवारणे शास्त्रीय दृष्ट्याप्रकृतिपारवश्यंपरिहर्तुं शक्यमित्याह यदेति मिथ्याज्ञाननिबन्धनौहि राग द्वेषौतत्प्रतिपक्षत्वंविवेकविज्ञानस्यमिथ्याज्ञानविरोधित्वादवश्यंयं रागद्वेषयोर्मूलनि दृत्यानिदृत्तौ प्रतिबन्धध्वंसेकार्यसिद्धिमभिसन्धायोक्तं तदेति एवकारस्यान्ययोग व्यवच्छेदकत्वंदर्शयति नेति पूर्व्वोक्तंनियोगमुपसंहरति तस्मादिति तत्रहेतुमाह यतइति हिशब्दोपात्तोहेतुर्यतइति प्रकटितः सचपूर्वेणतच्छब्देनसम्बन्धनीयः पुरुषपरिपन्थित्वमेवतयोःसोदाहरणंस्फोरयति श्रेयोमार्गस्येति ३४

रागद्वेषयोःश्रेयोमार्गप्रतिपक्षत्वंप्रकटयितुंपरमतोपन्यासद्वारासमनन्तरश्लोकमवतारयति तत्रेत्यादिना व्यवहारभूमिः सम्यग्यर्थः शास्त्रार्थस्यान्यथाप्रतिपत्तिमेवप्रत्याययति परधर्मोपीति स्वधर्मादित्यपेरर्थः अनुमानंदूषयन्नुत्तरत्वेन

भाषाअनुवाद

स्वाभाविकप्रवृत्तित्यागकरिधर्ममेप्रवृत्तहोनाअवश्यकर्त्तव्यहै किन्तुनिजधर्म दुःखदायकयुद्धरूपकेकरनेमेअसमर्थऔरपरधर्मशुभकरनेवालाअहिंसारूप येदो नोभीधर्मपक्षमेसमानहैं तोइनदोनोकेमध्यमे परधर्महींमेप्रवृत्तहोनेकीइच्छा करतेऊयेअर्जुनकेप्रतिभगवानकहतेहैं किसाङ्गोपाङ्गसम्पूर्णकियेऊयेपरधर्म कीअपेक्षा अङ्गहीनहोनेसेभीस्वधर्मश्रेयकहेसुन्दरहै अर्थात्स्वधर्मयुद्धआदिमे प्रवृत्तपुरुषका मरणभीश्रेयकहेश्रेष्ठलाभहै क्योंकिउससेस्वर्गादिप्राप्तहोताहै परन्तुपरधर्मभयदायकअर्थात्निषिद्धहै इससेनरकप्राप्तिकाकारणहोताहै सो ईकहाकिस्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः ३५

CC-0. In Public Domain. Digitized by eGangotri

अर्जुनउवाच अथ केनप्रयुक्तोऽयं पापञ्चरतिपूरुषः
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ३६

शाङ्करभाष्यं।

यद्यप्यनर्थमूलंध्यायतोविषयान्पुंसोरागद्वेषौह्यस्यपरिपन्थिनाविति चोक्तं विच्छिन्नमनवधारितंचयदुक्तंतत्संच्छिन्नंनिश्चितञ्चेदमेवेति ज्ञातुमिच्छन्नर्जुनउवाच ज्ञातेहितस्मिन्तदुच्छेदाययत्नंकुर्यामिति अथेति अथकेनहेतुभूतेनप्रयुक्तःसन्रा ज्ञेवश्त्योऽयंपापंकर्मचरत्याचरतिपुरुषःस्वयमनिच्छन्नपि हेवार्ष्णेयवृष्णिकुलप्र सूतबलादिवनियोजितोराज्ञेवेत्युक्तोदृष्टान्तः ३६

आनन्दगिरिकृतटीका।

श्लोकमुत्थापयति तदसदिति च्छलधर्माद्युद्धादुरनुष्ठानात् परिव्राट्धर्म्मस्यभिक्षा शनादिलक्षणस्यस्वानुष्ठेयतयामयापिकर्त्तव्यत्वंप्राप्तमित्याशंक्यव्याचष्टे श्रेयानितिउ क्तोऽर्थप्रश्नपूर्व्वकंहेतुमाह कस्मादित्यादिना स्वधर्म्ममवधूयपरधर्म्ममनुतिष्ठतः स्वध र्मातिक्रमकृतदोषस्यदुष्परिहरत्वान्नतत्त्यागः साधीयानित्यर्थः ३५

स्वामिकृतटीका

तर्हिस्वधर्म्मस्ययुद्धादेर्दुःखरूपस्ययथावत्कर्त्तुमशक्यत्वात्परधर्म्मस्यचाहिंसादेः सुकरत्वाद्धर्मत्वाविशेषाच्चतत्प्रवर्त्तितुमिच्छन्तंप्रत्याह श्रेयानिति किञ्चिदङ्गही नोऽपिस्वधर्मःश्रेयान्प्रशस्यतरःस्वनुष्ठितात्सकलाङ्गसंपूर्त्तीकृतादपिपरधर्मात्स काशात् तत्रहेतुः स्वधर्मेयुद्धादौप्रवर्त्तमानस्यनिधनंमरणमपिश्रेष्ठंस्वर्गादिप्रापक त्वात् परधर्मस्तुपरस्यभयावहनिषिद्धत्वेननरकप्रापकत्वात् ३५

भाषाअनुवाद।

तयोर्नवशमागच्छेत्इससश्लोकसेकहाकिरागद्वेषकेवशनहोनाफेरिविरोधहेतुकयु द्धकोस्वधर्मकहिआज्ञादेतेहैं इसपरअर्जुनकहतेहैं किवृष्णिवंशमेअवतीर्णहेवा र्ष्णेयहेकृष्ण अनर्थरूपपापकरनेमेइच्छानरहतेभी किसीकीप्रेरणासेयहपुरुषपाप आचरणकरताहै कामक्रोधकोविचारबलसेरोंकनेभीमनुष्यकीपापकर्मकरनेमे फेरिप्रवृत्तिदेखपड़तीहै इससेयहजानिपड़ैहै किकोईउसकामूलभूतकारण होगाजोबलकरकेकरवाताहै इससंभावनापरसन्देहकरतेहुयेअर्जुननेप्रश्नकि याहै किकेनप्रयुक्तोयंपापाचरतिपूरुषः ३६

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच कामएषक्रोधएषरजोगुणसमुद्भवः
महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ३७

आनन्दगिरिकृतटीका।

प्रागेवानर्थमूलस्योक्तत्वात्पुनस्तज्जिज्ञासयाप्रश्नानुपपत्तिरित्याशंक्याह यद्यपीति विच्छिन्नंविविधेषुप्रदेशेषुच्छिन्नंदर्शितमितियावत् अनवधारितमनेकत्वोक्तत्वादनेकधावाविवेककामादिभिर्व्विकल्पितत्वादित्यर्थः नन्वनर्थमूलंपरिहर्त्तव्यंतत्किमिति ज्ञातुमिष्यतेतत्राह ज्ञातेहीति कुर्यामितितज्ज्ञानमर्थवदितिशेषः वाक्यारम्भार्थत्वमथशब्दस्यगृहीत्वाप्रश्नवाक्यंव्याकरोति अथेत्यादिना अनिच्छतोऽपिबलादेवदुश्चरितेप्रेरितत्वेदृष्टान्तमाचष्टे राज्ञेवेति विनियोज्यत्वस्येच्छासापेक्षत्वात्तदभावेतदसिद्धिमाशंक्यप्रागुक्तंःस्मारयति राज्ञेवेत्युक्तइति ३६

स्वामिकृतटीका।

तयोर्नवशमागच्छेदित्युक्तंतदेतदशक्यंमन्वानोऽर्जुनउवाच अथेति दृष्णोर्वंशेऽवतीर्णावार्ष्णेयः हेवार्ष्णेयअनर्थरूपंपापंकर्तुमनिच्छन्नपिकेनप्रयुक्तःप्रेरितोऽयंपुरुषःपापंचरतिकामक्रोधौविवेकबलेननिरुन्धतोऽपिपुरुषस्यपुनः पापेप्रवृत्तिदर्शनात्अन्योऽपितयोर्मूलभूतः कश्चित्प्रवर्तकोभवेदितिसम्भावनयाप्रश्नः ३६

भाषा अनुवाद

अर्जुनने जोपूछाकि इच्छाविनाभी किसीकी प्रेरणा से पुरुषपापाचारमेप्रवृत्त होताहै इसीकाउत्तरभगवानकरतेहैं किसबको अपनेवशकरनेवालाऔ प्राणियोंका परमशत्रु सकलअनर्थप्राप्तिकारोयह कामजोकामनासोइकिसीकारणसे प्रतिहत भयाअर्थात् कामनाजोसिद्धनभईतो वही कामवदलकररजोगुणसेहै जन्मजिसकाऐसाक्रोधरूपहोयपुरुषकोअहंकारकेवशकरायरजोगुणकी सेवामेडालदेताहैं वहक्रोधफेरिमहाशनहैं अर्थात् महत भोजनहैजिसकासो ऐसामहापाप्माकहे पापरूपपरमशत्रुहै यह तुमजानोतात्पर्ययहहै किकामही जीवोंकोप्रेरणादेता है परन्तुसतोगुणकी वृद्धिहोनेसेरजोगुणकोक्षयहोतीहै फेरिरजोगुणका कार्य्यकामकामकहे कामनाकाजन्मनहीं होता है सो इसमोक्षमार्गकेवैरीकामरूपशत्रुकोपूर्व्वकथित उपायसेनाशकरनाहीं उचित है देखोकामनाकेअनुरूपभोगमिलनेसे भीउनकाभोगचिरकालकरते भीसन्तोषनहींहोताहै इसीसेकहा किमहदशनकहे बड़ा खानेवालाकामसो भोगकरनेसे भीपूर्णनहीं होता है ३७

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

शृणुत्वंतंवैरिणंसर्वानर्थकरंयं त्वंपृच्छसि भगवानुवाचऐश्वर्यस्यसमग्रस्य धर्मस्ययशसःश्रियः वैराग्यस्याथमोक्षस्य षण्णांभगइतीङ्गना ऐश्वर्यादि षड्कं यस्मिन् वासुदेवेनित्यसप्रतिबन्धत्वेनसामस्त्येनच वर्त्तते उत्पत्तिंप्रलयञ्चैवभूतानामागतिं गतिं वेत्तिविद्यामविद्याञ्चस वाच्योभगवानिति उत्पत्त्यादिविषयञ्चविद्याऽविद्यानंयस्यस वासुदेवोवाच्योभगवानिति कामइति कामएषसर्व्वलोकवशंकुर्व्वन्शत्रु र्यन्निमित्तासर्व्वानर्थप्राप्तिःप्राणिनांसएषकामःप्रतिहतःकेनचित् क्रोधत्वेनपरिण मतेऽतः क्रोधोऽप्येषएवरजोगुणसमुद्भवोरजश्चतद्गुणश्चरजोगुणः समुद्भवोयस्यसः कामोरजोगुणसमुद्भवोरजोगुणस्यवासमुद्भवःकामोह्युद्भूतोरजः प्रवर्तयन्पुरुषं प्रवर्तयति तृष्णयाह्यहङ्कारितः इति गुणदुःखिनांरजःकार्य्यमेवादौप्रदर्शितान्प्र लापःश्रूयते महाशनोमहद्दशनमस्येति महाशनोऽतएवमहापाप्माकामेनप्रेरितो जन्तुःपापंकरोति अतोविद्धेनंकाममिह संसारेवैरिणं ३७

आनन्दगिरिकृतटीका।

सम्प्रतिपत्तिवचनंप्रस्तौति शृण्वित तस्यवैपरीत्यंस्फोरयति सर्व्वेति अप्र स्तुतकिमितिप्रस्तूयते तत्राह यंत्वमिति भगवच्छब्दार्थंनिर्द्धारयितुंपौराणिकंवच नमुदाहरति ऐश्वर्यस्येति समग्रस्येत्येतत्प्रत्येकंविशेषणैः सम्बध्यतेअथशब्दस्तथाश ब्दपर्य्यायः समुच्चयार्थःमोक्षशब्देनतदुपायोज्ञानंविवक्ष्यते उदाहृतवचसस्तात्प र्यमाह ऐश्वर्य्यादीति सवाच्योभगवानितिसम्बन्धः तत्रैवपौराणिकंवाच्यान्त रंपठति उत्पत्तिमिति भूतानामिति प्रत्येकमुत्पत्त्यादिभिःसम्बध्यतेकारणैर्याचो त्पत्तिप्रलयशब्दौक्रियामात्रस्य पुरुषान्तरगोचरत्वसम्भवादगतिर्गतिश्चेत्यागामि

स्वामिकृतटीका

अथोत्तरंश्रीभगवानुवाचकामएषक्रोधएषइत्यादि यस्त्वयाप्रष्टोहेतुरेषका मएवननुक्रोधोऽपिपूर्ब्बंत्वयोक्तइन्द्रियस्येन्द्रियस्यार्थइत्यत्रसत्यंनासौततः पृथक्किन्तु क्रोधोऽप्येषकामएवहिकेनचित्प्रतिहतःक्रोधात्मनापरिणमते पूर्ब्बंपृथक्त्वेनोक्तोऽ पिक्रोधःकामजएवेत्यभिप्रायेणैकीकृत्योच्यते रजोगुणात्समुद्भवतीति तथाचनेन सत्त्वद्वारजसिच्चयंनीतेसतिकामोनजायतइतिसूचितंएनंकाममिह मोक्षमार्गेवै रिणंविद्धिश्रयञ्चवक्ष्यमाणक्रमेणहन्तव्यएवयतोनासौदानेनसन्धातुंशक्यइत्याह म हाशनोमहद्दशनंयस्यदुष्पूरइत्यर्थःनचसान्नासन्धातुंशक्योयतोमहापाप्माऽत्यु ग्रः ३७

CC-0. In Public Domain. Digitized by eGangotri

धूमेनाव्रियते वह्निर्यथा दर्शोमलेनच यथोल्वेनावृतो गर्भस्तथातेनेदमावृतं ३८

शाङ्करभाष्यम्।

कथंवैरीति दृष्टान्तैःप्रत्याययति धूमेनेति धुमेनसहजेनाव्रियते वह्निःप्रकाशात्मकोऽप्रशात्मकेनयथावादर्शोमलेनच यथोल्वेनगर्भवेष्टनेनजरायुना आवृत आच्छादितो गर्भस्तथातेनेदमावृतं ३८

आनन्दगिरिकृतटीका।

न्यौसम्पदापदौसूचयते वाक्यान्तरस्थापितात्पर्यमाह उत्पत्त्यादीति वेत्तीत्युक्तः साक्षात्कारोविज्ञानमित्युच्यतेसमग्रैश्वर्यादिसम्पत्तिसमुच्चयार्थश्चकारः उक्तलक्षणोभगवान्किमुक्तवानिति तदाह कामइति कामस्यसर्व्वलोकशत्रुत्वंविषदयति यन्नामत्तेति तथापिकथंतस्यैवक्रोधत्वंतदाह सएषइति कामक्रोधयोरेवहेयत्वद्योतनार्थंकारणंकथयति रजोगुणइति कारणद्वाराकामादेरेवहेयत्वमुक्त्वा कार्यद्वारापितस्यहेयत्वंसूचयति रजोगुणस्येति कामस्यपुरुषप्रवर्तकत्वमेवनरजोगुणजनकत्वमित्याशंक्याह कामोहीति तत्रैवानुभवानुसारिणींलोकप्रसिद्धिंप्रमाणयति तृष्णयाहीति तस्ययोग्यायोग्यविभागमन्तरेणवज्ञविषयत्वंदर्शयति महाशनइति वज्ञविषयत्वप्रयुक्तंकर्मनिर्दिशति अतइति सर्व्वविषयत्वेपिकुतोऽस्य पापत्वमित्याशंक्याह कामेनेति कामस्यैकविशेषणबत्त्वेफलितमाह अतइति ३७

उत्तरश्लोकमवतारयति कथमिति अनेकदृष्टान्तोपादनंप्रतिपत्तिसौकर्य्यार्थं सहजस्यधूमस्यप्रकाशात्मकवह्निप्रति आवरकत्वसिद्ध्यर्थं विशिनष्टि अप्रकाशात्मकेनेति ३८

स्वामिकृतटीका।

कामस्यवैरित्वंदर्शयतिधूमेनेति धूमेनसहजेनयथावह्निराव्रियतआच्छाद्यते यथाचादर्शोमलेनआगन्तुकेनयथाचोल्वेनगर्भवेष्टनचर्मणागर्भःसर्व्वतोनिरुद्धआवृतस्तथाप्रकारत्रयेणापितेनकामेनावृतमिदं ३८

भाषा अनुवाद।

अवविशेषरूपसेकामकीशत्रुता देखावते ज्ञयेकहते हैं किजैसेधूमसे आगओ मलसेदर्पणउल्वाजोझिल्लीचमड़ा तिससे गर्भआवृत कहे लपेटे है तैसेही कामजोकामनातिससेयह ज्ञानभी आवृत कहे घेराहै ३८

CC-0. In Public Domain. Digitized by eGangotri

आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा कामरूपेणकौन्तेयदुष्पूरेणानलेनच ३९

शाङ्करभाष्यं

किंपुनस्तदिदंशब्दवाच्यंयत्कामेनावृतमित्युच्यते आवृतमिति आवृतमेतेन ज्ञानंज्ञानिनोनित्यवैरिणा ज्ञानीहिजानात्यनेनअहमनर्थेप्रयुक्तःपूर्वमेवातःदुःखीच भवतिनित्यमेवअतोऽसौज्ञानिनोनित्यवैरीनतुमूर्खस्यसहिकामंतृष्णाकालेमित्रमि वपश्यंस्तत्कार्येदुःखेप्राप्ते जानातितृष्णयाहंदुःखित्वमापादितइति नपूर्वमेवातोज्ञा निनोएवनित्यवैरीकिंरूपेणकामइच्छैवरूपमस्येति कामरूपस्तेनदुष्पूरेणदुःखेन पूरणमस्येतिदुष्पूरेणदुःखेनपूरणमस्येति दुःपूरोऽतस्तेनानलेननास्यालंपर्याप्तिर्वि द्यतइत्यनलस्तेन ३९

आनन्दगिरिकृतटीका ।

सामान्यतोनिर्दिष्टंविशेषतोनिर्देष्टुं आकाङ्क्षापूर्वकमनन्तरश्लोकमवतारयति किंपुनरिति कामस्यज्ञानंप्रत्यावरणसिद्ध्यर्थंज्ञानिनोनित्यवैरिणेत्यादिविशेषणंप्र तीकमादायव्याचष्टे आवृतमित्यादिना ज्ञानिनांप्रतिवैरित्वंकामस्यकथमित्याह ज्ञानीहीति अनर्थप्राप्तिमन्तरेणकामस्यप्रसङ्गावस्थापूर्वमेवेत्युच्यते अतःशब्देन कामप्रसक्तिरेवपरामृश्यतेनित्यमेवेत्युत्पन्नावस्थाकार्यावस्थाचकामस्यकथ्यते ननु सर्वस्यापिकामात्मतानप्रश्नस्तेतिकामोनित्यवैरीभवति ततःकुतोज्ञानिविशेषणमि त्याशंक्याह नत्विति अज्ञस्यनासौनित्यवैरीत्येतदुपपादयति सहीति कार्यप्राप्ति प्रागवस्थापूर्वमित्युक्ताअज्ञंप्रतिवैरित्वेसत्यपि कामस्यनित्यवैरित्वाभावेफलितमा

भाषा अनुवाद ।

फेरिभीकामकावैरित्वप्रकाशकरतेहैं किविवेकज्ञानउसीकामसेआवृतहोता है यद्यपिअज्ञानीमनुष्यको यहकाममोगसमयमेसुखकाहेतुहै परतौभीशेष मेवैरभावप्रगटकरताहै इसीसेज्ञानीलोगोंको भोगकालमेभीअनर्थहीजानिप ड़ताहै क्योंकियहकामदुखकाकारणहै हेकौन्तेयअर्जुनदेखोयहकामअनेकदिन विषयभोगकरतेभीसन्तोषनहींपावतावरन्दिनदिनऔरऔरइच्छावढ़तीहीजा तीहै जैसेआगइन्धनपायअधिक२ वढ़तीपरसन्तुष्टनहींहोतीहै औरजोकदाचि तविषयभोगनमिलायाअसामर्थ्यनिर्बलतासेभोग हीनकरसकै तोशोकसन्तापहो ता इससेआखिरमेतोदुखछोड़सुखका लेसभीनहींहै तोप्रथमही क्योंनछोडै ३९

CC-0. In Public Domain. Digitized by eGangotri

इन्द्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनं ४०

शाङ्करभाष्यं

किमधिष्ठानःपुनःकामोज्ञानस्यावरणत्वेनवैरिसर्व्वस्येत्यपेक्षायामाह ज्ञातेहि शत्रोरधिष्ठानेसुखेननिवर्हणंकर्त्तुंशक्यइति इन्द्रियाणीति इन्द्रियाणिमनोबुद्धि श्चास्यकामस्याधिष्ठानमुच्यते एतैरिन्द्रियादिभिराश्रयैर्व्विमोहयति विविधंमोहय त्येषकामोज्ञानमावृत्याच्छाद्यदेहिनंशरीरिणं ४०

आनन्दगिरिकृतटीका।

ह अतइति स्वरूपतोनित्यवैरित्वाविशेषेपिज्ञानाज्ञानाभ्यामबान्तरभेदसिद्धिरि त्यर्थः आकाङ्क्षाद्वाराप्रकृतंवैरिणमेवस्फोरयति किंरूपेरेत्यादिना ३९

कामस्यनिराश्रयस्यकार्य्यकरत्वाभावंमत्वाप्रश्नपूर्व्वकमाश्रयंदर्शयति किमधि ष्ठानइति कामस्यनित्यवैरित्वेनपरिजिहीर्षितस्यकिमित्यधिष्ठानंज्ञाप्यतेतत्राह ज्ञा तेहीति इन्द्रियादीनांकामाधिष्ठानत्वंप्रकटयति एतैरिति नन्वेताभिरितिवक्त व्येकथमेतैरित्युच्यतेतत्राह इन्द्रियादिभिरिति ४०

स्वामिकृतटीका

इदंशब्दनिर्दिष्टंदर्शयन्वैरित्वंस्फुटयतिआवृतमिति इदंविवेकज्ञानंएतेना वृतंअज्ञस्यखलुभोगसमयेकामःसुखहेतुरेवपरिणामेतुवैरित्वंप्रतिपद्यते ज्ञानिनः पुनस्तत्कालमप्यनर्थानुसन्धानादुःखहेतुरेवेतिनित्यवैरिणेत्युक्तं किञ्चविषयैःपू र्यमाणोऽपियोदुष्पूरःअपूर्यमाणस्तुशोकसन्तापहेतुत्वादनलतुल्यः अनेनसर्व्वान्प्र तिवैरित्वमुक्तं ३९

इदानींतस्याधिष्ठानंकथयन्जयोपायमाह इन्द्रियाणीति द्वाभ्यां विषयदर्श नश्रवणादिभिःसंकल्पेनाध्यवसायेनचकामस्याविर्भावादिन्द्रियाणिचमनश्चबुद्धिश्चा

भाषा अनुवाद।

अबकामकेरहनेकीजगह औरइसकेजयकरनेकीउपाय दोश्लोकसेकहतेहैं किविषयोंकाइन्द्रियोंकेद्वाराभोगहोताहै औरमनसेसङ्कल्परूपविषयवासनामा नसिककर्म्मतथाबुद्धिसेनिश्चयहोनाअर्थात् यहकामअवश्यकरैंगेइनसववातोंसेजा नागया किमनबुद्धिऔइन्द्रीयेकामनाकेआधारस्थानहैं अर्थात्उत्पत्तिऔररहने कीजगहहैं सोईकामविवेकज्ञानकोआच्छादनकहेघेरिकै देहीजोआत्माउ सकोमोहयुक्तकरदेताहै फेरवह भूलसेकामवशहोखरावहोताफिरताहै ४०

CC-0. In Public Domain. Digitized by eGangotri

तस्मात्त्वमिन्द्रियाण्यादौनियम्यभरतर्षभ पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाशनं४१

शाङ्करभाष्यं।

यत एवंतस्मादिति तस्मात्त्वमिन्द्रियाण्यादौपूर्वंनियम्यवशीकृत्यभरतर्षभपाप्मानं पापाचारंकामंप्रजहि परित्यज हि यस्मात् एनंप्रकृतं वैरिणंज्ञानविज्ञाननाशनं ज्ञानंशास्त्रंतत्राचार्य्यतश्चआत्मादीनामवबोधः विज्ञानंविशेषतस्तदनुभवस्तयोर्ज्ञान विज्ञानयोःश्रेयःप्राप्तिहेत्वोर्नाशनंनाशस्तन्नाशनंप्रजहि आत्मनःपरित्यजेत्यर्थः ४१

आनन्दगिरिकृतटीका।

तेषांकामाश्रयत्वेसिद्धेसाश्रयस्यतस्यपरिहर्त्तव्यत्वमाह यतइति तस्मादिन्द्रियादीनामाश्रयत्वादिति यावत् पूर्वंकामनिरोधात् प्रागवस्थायामित्यर्थःतेषुनियमितेषु मनोबुद्धोर्नियमःसिध्यति तत्प्रवृत्तेरितरप्रवृत्तिव्यतिरेकेणाफलत्वादिति भावः पापमूलतयाकामस्यतच्छब्दवाच्यत्वमुन्नेयं कामस्यपरित्यज्यत्वंबैरित्वं हेतुरूपमेवहेतुंसाधयति ज्ञानेति ज्ञानविज्ञानशब्दयोरर्थभेदमावेदयति ज्ञानमित्यादिना ४१

पूर्वोक्तमनूद्यकामत्यागस्य दुष्करत्वं मन्वानोऽयमेवश्लोकमेवस्पष्टीकर्त्तुं प्रश्नपूर्वकं श्लोकान्तरमवतारयति इन्द्रियाणीत्यादिना पञ्चेति ज्ञानेन्द्रियवत् कर्मेन्द्रियाण्यपिवागादीनि गृह्यन्ते किमपेक्षयातेषांपरत्वं तत्राह देहमिति तथा

स्वामिकृतटीका।

यत्तचित्तप्रणिधानेनेन्द्रियाणिनियन्तुंशक्यन्तेतदात्मस्वरूपंदेहादिभ्योविविच्यदर्शयति इन्द्रियाणीतिइन्द्रियाणिदेहादिभ्योग्राह्येभ्यःपराणिश्रेष्ठान्याहुःसूक्ष्मत्वात्प्रकाशकत्वाच्चअतएवतद्व्यतिरिक्तत्वमित्यर्थादुक्तंभवति इन्द्रियेभ्यश्चसंकल्पात्मकंमनःपरंतत्प्रवर्त्तकत्वात्मनसस्तुनिश्चयात्मिकाबुद्धिःपरा निश्चयपूर्वकत्वात् संकल्पस्यतुबुद्धेः स्याधिष्ठानमुच्यते एतैरिन्द्रियादिभिर्दर्शनादिव्यापारवद्भिराश्रयभूतैर्विवेकज्ञानमाच्छाद्यदेहिनंविमोहयति ४०

भाषा अनुवाद।

तिसकारणसे मोह होनेकेप्रथमहीं येसबइन्द्रीओं मनतथाबुद्धिको नियम्य कहे काबूकर या लोककरपापरूपकामको हेभरतर्षभ अर्जुन अच्छीतरह नाशकरोअथवात्यागकरो क्योंकियहकाम आत्मज्ञानऔर शास्त्रोक्तजो विज्ञान तिनदोनाकानाशकहै इसकोआत्माकापरमवैरीजानोयह भगवाननेकहा ४१

CC-0. In Public Domain. Digitized by eGangotri

इन्द्रियाणिपराण्याहुरिन्द्रियेभ्यःपरंमनः
मनसस्तुपराबुद्धिर्बुद्धेर्यःपरतस्तुसः ४२

शाङ्करभाष्यं

इन्द्रियाणिआदौनियम्यकामंशत्रुंजहि इत्युक्तं तत्र किमाश्रयःकामंजह्यादि त्युच्यते इन्द्रियाणीति इन्द्रियाणिश्रोत्रादीनिपञ्च देहंस्थूलंवाह्यं परिच्छिन्नंचापे क्ष्यसौक्ष्म्यान्तरस्थत्वव्यापित्वाद्यपेक्ष्य पराणिप्रकृष्टान्याढ्यःपण्डितास्तथेन्द्रियेभ्यः परंमनः सङ्कल्पात्मकंतथामनसस्तु पराबुद्धिर्निश्चयात्मिका तथाजःसर्व्वदृश्येभ्योबुद्ध न्तेभ्योऽभ्यन्तरोयंदेहिनं इन्द्रियादिभिराश्रयैर्युक्तः कामोज्ञानावरणद्वारेणमोहय तीत्युक्तं बुद्धेःपरतस्तुसः सबुद्धेर्द्रष्टा परमात्मा ४२

आनन्दगिरिकृतटीका।

पिकेनप्रकारेणपरत्वं तदाह सौक्ष्म्येति आदिशब्देनकारणत्वादिगृह्यते इन्द्रि यापेक्षयासूक्ष्मत्वादिना मनसःस्वरूपोक्तिपूर्व्वकं परत्वंकथयति तथेति मनसिद र्शितंन्यायंबुद्धावतिदिशति तथामनसस्त्विति योबुद्धेरित्यादि व्याचष्टे तथेत्यादिना आत्मनोयथोक्तविशेषणस्याप्रकृतत्वमाशंक्याह यं देहिनमिति ४२

स्वामिकृतटीका।

यस्मादेवंतस्मादिति तस्मादादौविमोहात् पूर्व्वमेवेन्द्रियाणिमनोबुद्धिञ्चनियम्य पाप्मानंपापरूपमेनंकामं हि स्फुटंप्रजहि घातय यद्वाप्रजहि परित्यज ज्ञानमात्म विषयं विज्ञानंशास्त्रीयंतयोर्नाशनं यद्वा ज्ञानं शास्त्राचार्य्योपदेशजं विज्ञानं नि दिध्यासजं तमेवधीरोविज्ञाय प्रज्ञां कुर्व्वीतेतिश्रुतेः ४१

भाषा अनुवाद।

अबजिसमे मनुष्यचित्तकोसावधानकरिआत्मामेलगाय इन्द्रियोंको वशकर नेसकै सोई आत्माकास्वरूपदेहादिसे भिन्नदेखावते हैं किदेहआदिवाह्यकहे वाहरकेस्थूलपदार्थोंसेइन्द्री यें श्रेष्ठ औपरहैं अर्थात् श्रेष्ठहैं औरइन्द्रियों सेभी सङ्कल्पात्मक मन इन्द्रियोंकोविषयोंमेप्रवृत्ति करावनेवाला परहै अर्थात् सूक्ष्मओ श्रेष्ठहै अथवाइन्द्रियोंसे भिन्नजानोऔरमनकीअपेक्षा निश्चयशक्तिरूप बुद्धिश्रेष्ठहै या भिन्नहै क्योंकिमनके संकल्पको यहबुद्धि रोंकसकतीहै और जोबुद्धिसेभीपरे अर्थात् श्रेष्ठ किम्बा पृथक् औरसाक्षीरूपहो सबके अन्तरमेटि काहैं सोईआत्माहै देखोतिसको यह दुष्टकाम नित्तमोहयुक्तकरता है ४२

CC-0. In Public Domain. Digitized by eGangotri

एवंबुद्धेःपरंबुध्वासंस्तभ्यात्मानमात्मना जहिशत्रुंमहाबाहोकामरूपंदुरासदं ४३

इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांभीष्मपर्व्वणिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादे कर्म्मयोगोनामसप्तदशोऽध्यायः ३

शाङ्करभाष्यं।

ततःकिंएवमिति एवंबुद्धेःपरमात्मानंबुध्वाज्ञात्वासंस्तभ्यसम्यक्स्तम्भनंकृत्वास्वेनैवात्मनासंस्कृतेनमनसासम्यक्समाधायेत्यर्थःजह्येनंशत्रुंमहाबाहोकामरूपंदुरासदंदुःखेनासदःआसादनंप्राप्तिर्यस्यतंदुरासदंदुर्ब्विज्ञेयानेकविशेषमिति ४३

आनन्दगिरिकृतटीका।

इन्द्रियादिसमाधानपूर्व्वकमात्मज्ञानात्कामजयोभवतीत्युपसंहरति एवमित्यादिना संस्कृतंमनोमनःसमाधानेहेतुरितिसूचयति संस्तभ्येति प्रकृतंशत्रुमेवविशिनष्टि कामरूपमिति तस्यदुरासदत्वेहेतुमाह दुर्ब्विज्ञेयेति अनेकोविशेषस्तादृशोमहाशनत्वादिस्तदनेनोपायभूताकर्म्मनिष्ठाप्राधान्येनोक्ताउपेयात्तुज्ञाननिष्ठागुणत्वेनेतिविवेक्तव्यं ४३ इतिआनन्दगिरिकृतटीकायांसप्तदशोऽध्यायः ३

स्वामिकृतटीका।

परतस्तत्साक्षित्वेनावस्थितःसर्व्वान्तरःसआत्मातंविमोहयतिदेहिनमितिदेहिशब्दोक्तआत्मासइतिपराभृष्यते ४२

उपसंहरति एवमिति बुद्धेरेवविषयेन्द्रियादिजन्याःकामादिविक्रियाःआत्मातुनिर्व्विकारस्तत्साक्षीत्वेबुद्धेः परमात्मानंबुद्ध्वाआत्मनाएवभूतयानिश्चयात्मिकयाबुद्ध्याआत्मानंमनःसंस्तभ्यनिश्चलंकृत्वाकामरूपिणंशत्रुंजहिमारयदुरासदंदुःखेनासादनीयंदुर्ब्विज्ञेयमित्यर्थः स्वधर्म्मेणयमाराध्यभक्त्यामुक्तिमितावुधाः तंकृष्णंपरमानन्दंतोषयेत्सर्व्वकर्म्मभिः ४३ इतिश्रीधरस्वामिकृतटीकायांसप्तदशोऽध्यायः३

भाषाअनुवाद।

अबकहतेहैं किविषयऔइन्द्रियोंसे कामआदिविकारयुक्तबुद्धिहीहोतीहै औरआत्मानिर्विकारबुद्धिकासाक्षीरूपऔरउससेपृथकहै इससेआत्माकोश्रेष्ठजानिऔरऐसीनिश्चयरूपबुद्धिसेमनकोनिश्चलकरकेहेमहाबाहो दुखकादरवाजा निवारणकरनेकेयोग्य सदूकामरूपीदुष्टदुर्ज्ञेयशत्रुकोजीतो ४३

इति पण्डितजगन्नाथशुक्लविरचितायांमनभावनीटीकायांसप्तदशोऽध्याय

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता

चतुर्थोऽध्यायः

श्रीभगवानुवाच इमं विवस्वते योगं प्रोक्तवानहमव्ययं
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् १

शाङ्करभाष्यं ।

श्रीभगवानुवाच योऽयंयोगोऽध्यायद्वयेनोक्तोज्ञाननिष्ठालक्षणःससंन्यासःस कर्म्मयोगोपायःयस्मिन्वेदार्थःपरिसमाप्तःप्रवृत्तिलक्षणोनिवृत्तिलक्षणश्चगीतासुच सर्व्वास्वयमेवयोगोविवक्षितोभगवताअतःपरिसमाप्तंवेदार्थंमन्वानस्तंवंशकथनेनस्तौ तिभगवान् इमंअध्यायद्वयेनोक्तंयोगंविवस्वतेआदित्याय सर्गादौप्रोक्तवान्अहंजग त्परिपालयिषूणांक्षत्रियाणांबलाधानायतेनयोगबलेनयुक्तास्तेसमयाभवन्ति ब्रह्म परिरक्षितुंब्रह्मक्षत्रेपरिपालिते जगत्परिपालयतुमलं अव्ययमव्ययफलत्वान्नह्य स्यसम्यक्दर्शननिष्ठालक्षणस्य मोक्षाख्यंफलंव्येति सचविवस्वान्मनवेप्राह मनुरि क्ष्वाकवेस्वपुत्रायादिराजायाब्रवीत् १

आनन्दगिरिकृतटीका ।

पूर्व्वाभ्यामध्यायाभ्यांनिष्ठाद्वयात्मनोयोगस्यगीतत्वात् वेदार्थस्यचसमाप्तत्वात्व क्तव्याशेषाभावात् उक्तयोगस्यकृतिमत्त्वशङ्कानिवृत्तयेवंशकथनपूर्व्विकांस्तुतिं भग वानुक्तवानित्याह श्रीभगवानिति तदेतद्भगवद्वचनंवृत्तानुवादद्वारेणप्रस्तौति ये

भाषा अनुवाद ।

श्रीकृष्णभगवानआपहीअपनाआविर्भावकहे प्रगटहोना औरतिरोभावकहे परमधामकाजाना तिसकेप्रकाशकरनेकेनिमित्त सामवेदकेअन्तर्गतजोब्रह्मप्रति पादक तत्त्वमसिमहावाक्य है तिसकेतत्पदऔत्वम्पदकेविचारकेअर्थ कर्म्मयोगकी प्रसंशाकरतेगीताशास्त्रकोअभिप्राय जोप्रवृत्तिनिवृत्तिलक्षणज्ञानयोगऔकर्मयोग सोदोअध्यासेकहिचुके यहमानतेऊये अववंशकथनसे उसकर्मयोगकीस्तुतिकरते हैं कियहीकर्मयोगमैनेपूर्व्वकालमेसूर्य्यसेकहाथा औसूर्य्यनेअपनेपुत्रआइदेवम नुसेकहा औमनुनेफेरिअपनेपुत्रइक्ष्वाकुराजासेकहाथा ऐसेनरम्परावहकर्मयोग चलाआताथा १

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

यमिति उक्तमेवयोगंविभज्यानुवदति ज्ञानेति संन्यासेनेतिकर्त्तव्यतयासहित स्यज्ञानात्मनोयोगस्य कर्म्माख्योयोगोहेतुरतश्चोपायोपेयभूतं निष्ठाद्वयंप्रतिष्ठापित मित्यर्थः उक्तेयोगद्वयेप्रमाणमुपन्यस्यति यस्मिन्निति अथवाज्ञानयोगस्यकर्म योगोपायत्वमेवस्फुटयति यस्मिन्निति प्रवृत्तप्रालक्ष्यतेज्ञायतेकर्मयोगोनिवृत्तप्रा चशक्यतेज्ञानयोगइतिविभागः यद्यपिपूर्व्वस्मिन्नध्यायद्वयेयथोक्तनिष्ठाद्वयव्या ख्यातंतथापिवक्ष्यमाणाध्यायेषुवक्तव्यान्तरमस्तीत्याशंक्याह गीतासुचेति कथंत र्हिसमनन्तराध्यायस्यप्रवृत्तिरतआह अतइति वंशकथनंसम्प्रदायोपन्यासःसम्प्र दायोपदेशश्चअकृत्रिमत्वशङ्कानिवृत्तप्रायोगस्तुतौपर्य्यवसयति गुरुशिष्यपरम्परोप न्यासमेवानुक्रामति इममिति इममित्यस्यसन्निहितंविषयंदर्शयति अध्यायेति योगं ज्ञाननिष्ठालक्षणं कर्म्मयोगोपायलभ्यमित्यर्थः स्वयमकृतार्थानांप्रयोजनव्यग्र णांपरार्थप्रवृत्त्यप्रसम्भवाद्भगवत स्तथाविधप्रवृत्तिदर्शनात् कृतार्थता कल्पनीयेत्याह विवस्वत इति अव्ययवेदमूलत्वादव्ययत्वं योगस्यगमयितव्यंकिमिति भगवता कृता र्थेनापियोगप्रवचनंकृतमितितदाह जगदिति कथंयथोक्तेनयोगेनक्षत्रियाणांवला धानंतदाह तेनेति युक्ताः क्षत्रियाइति शेषः ब्रह्मशब्देनब्रह्मणत्वजातिरुच्यते यद्यपियोगप्रवचनेनहृतं रक्षितं तेनचब्राह्मणत्वं तयापि कथंरक्षणीयंजगदशेषं रक्षितमित्याशंक्याह ब्रह्मेति ताभ्यांहि कर्म्मफलभूतं जगदनुष्ठानद्वारारक्षितुं शक्यमित्यर्थः योगस्याव्ययत्वे हेत्वन्तरमाह अव्ययफलत्वादिति ननुकर्म्मफलव दुक्तयोगफलस्यापि साध्यत्वेन क्षमिष्णुत्व मनुमीयते नेत्याह नहीति अपुनरा वृत्तिश्रुतिप्रतिहतमनुमानंन प्रमाणीभवतीतिभावः भगवता विवस्वते प्रोक्तोयो गस्तत्रैव पर्यवस्यतीत्याशंक्याह सचेति स्वपुत्रायेत्युभयत्र सम्बध्यते आदिराजाये तीक्ष्वाकोःसूर्यवंशप्रवर्त्तकत्वेनवैशिष्ट्यमुच्यते १

स्वामिकृतटीका।

आविर्भावतिरोभावावाविष्कर्त्तुं स्वयंहरिः तत्त्वम्पदविवेकार्थं कर्म्मयोगंप्रशंसति एवं तावद्ध्यायद्वयेन कर्म्मयोगोपायकज्ञानयोगो मोक्षसाधनत्वेनोक्तस्तमेवब्रह्मा र्पणादिगुणविधानेनतत्त्वंपदार्थविवेकादिनाच प्रपञ्चयिष्यन्प्रथमंतावत् परम्परा प्राप्तत्वेनस्तुवन्श्रीभगवानुवाच इममिति त्रिभिः अव्ययफलत्वादव्ययंइमंयोगंपुरा हंविवस्वते आदित्यायकथितवान् सचस्वपुत्राय मनवेप्राह्ददेवायप्राह सचमनुः स्वपुत्रायेक्ष्वाकवेऽब्रवीत् १

CC-0. In Public Domain. Digitized by eGangotri

एवंपरम्पराप्राप्तमिमं राजर्षयो विदुः
सकालेनेह महता योगोनष्टःपरन्तप २
सएवायंमयातेऽद्ययो गःप्रोक्तःपुरातनः
भक्तोऽसिमेसखाचेति रहस्यंह्येतदुत्तमं ३

शाङ्करभाष्यं

एवमिति एवंचत्रियपरम्पराप्राप्तमिमंराजर्षयोराजानश्चते ऋषयश्चराज र्षयोविदुरिमंयोगंसयोगःकालेनेह महता दीर्घेणनष्टोविच्छिन्नसम्प्रदायःसम्भूतो हेपरन्तप आत्मनोविपक्षभूताः परेउच्यन्तेतान् शोषयतेजोगभस्तिभिर्भानुरिव तापयतीति परन्तपःशत्रुतापनइत्यर्थः २

दुर्बलान् अजितेन्द्रियान्प्राप्यनष्टंयोगमिममुपलभ्यलोकश्चापुरुषसम्बन्धिनं सएवायमिति सएवायंमयातेतुभ्यमद्येदानींयोगःप्रोक्तःपुरातनःभक्तोसिमेसखा चासोतिरहस्यं हि यस्मादेतदुत्तमंयोगंज्ञानमित्यर्थः ३

आनन्दगिरिकृतटीका

यथोक्तेयोगेपरम्परागते विशिष्टजनसम्मतिमुदाहरति एवमिति तस्यकथं सम्मतिं वक्तव्यत्वंतदाह सकालेनेति पूर्वार्द्धंव्याकरोति एवमित्यादिना ऐश्वर्य सम्पत्तिमत्त्वंराजत्वंतेषामेव सूक्ष्मार्थनिरीक्षणक्षमत्वमृषित्वमिहेति भगवतोऽर्जु नेनशत्रुसंव्यवहारकालोऽद्येतेपरन्तपेतिसम्बोधनंविभजते आत्मनइति २

स्वामिकृतटीका।

एवमिति एवंराजानश्चते ऋषयश्चेति अन्येऽपिराजर्षयोनिमिप्रमुखाःस्वपि तादिभिरिक्ष्वाकुप्रमुखैःप्रोक्तमिमं योगंविदुर्जानन्तिस्म अद्यतनानामज्ञाने कार णमाह हे परन्तपशत्रुतापन स योगःकालवशादिह लोकेनष्टोविच्छिन्नः २

भाषाअनुवाद

इसीप्रकारइसकर्म्मयोगको परम्पराप्राप्तकहेएकसेदूसरादूसरेसे तीसरे ऐसेराजऋषिलोगजानतेचलेआतेथे परअबहेपरन्तपशत्रुतापनअर्जुन वह कर्मयोग बहुतकालपायकरनष्ट होगयाहै २

सोईकर्म्मयोगजोपरम्परासम्प्रदायसेसंसारमेनरहा अबफेरिहमनेतुमसेक हा क्योंकितुममेरेभक्तहौ औरमित्रभीहौ नहीं तो मैनेफेरऔरकिसीसेइसकोन हीं कहा औरनकोई मेराभक्तछोड़इसकेकहनेयोग्यहै ३

CC-0. In Public Domain. Digitized by eGangotri

अर्जुनउवाच अपरं भवतो जन्म परं जन्म विवस्वतः
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ४

आनन्दगिरिकृतटीका।

किमिति वर्त्तमानेकालेप्रकृतोयोगःसम्प्रदायरहितोभूदित्याशंक्याधिकार्यभावादित्याह दुर्ब्बलानिति तदेवदौर्ब्बल्यंप्रकृतोपयोगित्वेनव्याकरोति अजितेन्द्रियानिति यद्यपिकामक्रोधादिप्रधानान् पुरुषान् प्रतिलब्धकामक्रोधादिभिरभिभूयमनोयोगोनष्टोविच्छिन्नसम्प्रदायःसञ्जातस्तथापियोगादृते पुरुषार्थोलोकस्यलभ्यते चेत्किमनेनयोगोपदेशेनेत्याशंक्ययथोक्तयोगाभावेपरमपुरुषार्थाप्राप्तेर्नैवमित्याह लोकञ्चेति पूर्व्वोयोगोविच्छिन्नसम्प्रदायोऽधुनात्वन्ययोगोमदर्थमुच्यतेभगवतेत्याशंक्याह सएवेतिकस्मादन्यस्मैकस्मैचित्पुरातनोयोगोनोक्तोभगवतेत्याशंक्याह भक्तोसीतिउक्तमधिकारिणंप्रतियोगस्यवक्तव्यत्वे हेतुमाह रहस्यंहीति अनादिवेदमूलत्वात् योगस्यपुरातनत्वं भक्तिःशरणबुद्ध्याप्रीतिस्तया युक्तोनिजरूपमवेक्ष्यभक्तो विवक्षितः समानवयःस्निग्धःसहायःसखेत्युच्यते एतदिति कथंयोगोविशेष्यते तत्राह ज्ञानमिति ३

स्वामिकृतटीका।

सएवायमिति सएवायंयोगोयोगविच्छिन्ने सम्प्रदायेसति पुनश्चमयातेतुभ्यमुक्तं यतस्त्वं ममभक्तोऽसिसखाचअन्यस्मैमयानोच्यते हि यस्मादेतदुत्तमं रहस्यं ३

भाषा अनुवाद।

जबभगवाननेऐसेकहा किप्रथमहमनेसूर्य्यसे यहीकर्म्मयोग कहाथा तबतो अर्जुनसन्देहयुक्तहोय पूछाकिहेमहाराज अपरकहे इससमयमेतो आपकाजन्ममयाहै और परकहे पूर्व्वकालमेंविवस्वान जोसूर्य्यतिनकाजन्ममयाथा इससे नवीनजोआप सोप्राचीनसूर्य्यकेप्रति कर्म्मयोगजोकहा यह हम किसतरहसेजानैं कितुमनेसूर्य्यसे प्रथमकहाथा यह हमै असंभवऐसाजानि पड़ैहै दूसरा अर्थयहकिअपरकहे औरभीपूर्व्वकालमेआपकाजन्ममयाथा कि सूर्यही का परकहे इससमयमे कोईजन्ममयाहै नहींतो यह आपकाकहनाजो असम्भवहै सोहमकैसेसत्यकरजानै कि तुमनेसूर्य्यसे यहयोगकहा है ४

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच बहूनि मे व्यतीतानि जन्मानि तव चार्जुन
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ५

शाङ्करभाष्यं

भगवता विप्रतिषिद्धमुक्तमितिमाभूत् कस्यचित् बुद्धिरिति परिहारार्थंचोद्य मिवकुर्व्वन् अर्जुनउवाच अपरमिति अपरमर्व्वाक्वसुदेवगृहे भवतोजन्म परं पूर्व्वंसर्गादौजन्मोत्पत्तिर्व्विवस्वत आदित्यस्य तत्कथमेतद्विजानीयामविरुद्धार्थतया यस्त्वमेवादौप्रोक्तवानिमंयोगंस एवत्वमिदानींमह्यं प्रोक्तवानसीति ४

या वासुदेवेअनीश्वरासर्व्वज्ञाशङ्का मूर्खाणांतांपरिहरन्श्रीभगवानुवाच यद र्थोह्यर्जुनस्यप्रश्नः बहूनीति बहूनिमेममव्यतीतानिअतिक्रान्तानिजन्मानितवचहे अर्जुन तान्यहंवेदजानेसर्व्वाणिनत्वंवेत्थनजानीषे परन्तप धर्माधर्म्मादिप्रतिबद्धज्ञान शक्तित्वादहंपुनर्नित्यशुद्धबुद्धमुक्तसत्यस्वभावत्वादनावरणज्ञानशक्तिरिति वेदाहंहे परन्तर ५

आनन्दगिरिकृतटीका।

भगवति लोकस्यानीश्वरत्वशङ्कांनिवर्त्तयितुं चोद्यमुद्भावयति भगवतेति परि हारर्थंभगवतो मनुष्यत्वदर्शितस्यानीश्वरत्वमुपेत्य तद्वचनेशङ्कितविप्रतिषेधस्येति शेषः भगवतोनिजरूपमुपेत्यवेदंनेदंचोद्यं किन्तु लीलाविग्रहंगृहीत्वेति वक्तुंचो द्यमेवेत्युक्तं एतच्छब्दार्थमेवस्फुटयति यस्त्वमिति ४

स्वामिकृतटीका।

भगवतोविवस्वन्तंप्रतियोगोपदेशासम्भवंपश्यन्नर्जुनउवाच अपरमिति अप रंअर्व्वाचीनंतवजन्मपरंप्राक्कालीनंविवस्वतोजन्म तस्मात्तवाधुनातनत्वाच्चिरन्तना यविशस्ते त्वमादौयोगंप्रोक्तवानित्येतत् कथमहंजानीयां ज्ञातुंशक्नुयां ४

रूपान्तरेणोपदिष्टवानित्यभिप्रायेणोत्तरंश्रीभगवानुवाच बहूनीति तान्य हंवेद वेद्मि शक्तित्वात् त्वन्तुनवेत्थवेत्सि अविद्याहतत्वात् ५

भाषा अनुवाद।

तबतोश्रीभगवानबोले किहेअर्जुन हांमैनेऔरजन्ममेउपदेशकियाथा सन्देह नकरो हमारेऔरतुमारेभी बहुतजन्महोयबीतेहैं परउनसबको हमजानते हैं और तुमनहींजानतेहौ क्योंकि हमारीज्ञानशक्तिजातीनहीं बनीरहतीहै औरतुमअविद्या कहेअज्ञान तिससेआहतकहेघेरेहौ इसकारणनहींजानते ५

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

कथं तर्हि तवनित्येश्वरस्यधर्माधर्माभावेपिजन्मेत्युच्यते अजोपीपि अजोपिजन्मरहितोऽपिसंस्तथाव्ययात्माअक्षीणज्ञानशक्तिस्वभावोऽपिसन् तथाभूतानांब्रह्मादिस्तम्बपर्य्यन्तानांईश्वरईशनशीलोपिसन्प्रकृतिंमायांममवैष्णवींत्रिगुणात्मिकांयस्यावशेसर्व्वंजगत्वर्त्ततेययामोहितःसन्स्वमात्मानंवासुदेवंनजानति तांप्रकृतिंस्वामधिष्ठायवशीकृत्यसम्भवामिदेहवानिवभवामिजातइवात्ममायययानपरमार्थतोलोकवत्

आनन्दगिरिकृतटीका

भगवत्यज्ञानांमनुष्यत्वशङ्कांवारयितुंप्रतिवचनमवतारयति यावासुदेवइति अन्यथाप्रश्नेकथमाशङ्कान्तरंपरिहर्त्तुंभगवद्वचनमित्याशंक्य प्रतिवचनयोरेकार्थत्वमाह यदर्थोहीति यस्यशङ्कितस्यविरोधस्यपरिहारार्थःतस्यप्रश्नस्यमेवपरिहारंवक्तुभगवद्वचनमित्यर्थः अतीतानेकजन्मवत्त्वंममैवनासाधारणंकिन्तुसर्व्वप्राणिसाधारणमित्याह तवचेति तानिप्रमाणाभावान्नप्रतिभान्तीत्याशंक्याह तानीति ईश्वरस्यानावृतज्ञानत्वादित्यर्थः किमितितर्हितानिममनप्रतीयन्तेतवावृतज्ञानत्वादित्याह नत्वमिति परान्परिकल्पयतत्परिभवार्थंप्रवृत्तत्वात्तवज्ञानावरणंविज्ञेयमित्याह परन्तपेति अर्जुनस्यभगवतासहातीतानेकजन्मवत्त्वे तुल्येपिज्ञानवैषम्येहेतुमाह धर्म्मेति आदिशब्देनरागलोभादयोगृह्यन्तेईश्वरस्यातीतानागतवर्त्तमानसर्व्वार्थविषयज्ञानत्वेहेतुमाह अहमिति ५

ईश्वरस्यकारणाभावात् जन्मैवायुक्तमतीतानेकजन्मवत्त्वन्तुदूरोत्सारितमितिशङ्कते कथमिति वस्तुतोजन्माभावेपिमायावशाज्जन्मसम्भवतीत्युत्तरमाह उच्यतइति पारमार्थिकजन्मायोगेकारणंपूर्व्वार्द्धेनानूद्यप्रातिभासिकजन्मसम्भवेकारणमाहप्रकृतिमिति प्रकृतिशब्दस्यस्वरूपविषयत्वंप्रत्यादेष्टुमात्ममाययेत्युक्तंवस्तुतोजन्माभावेकारणानुवादभागंविवृणोति अजोपीत्यादिना प्रातिभासिकजन्मसम्भवेकारणकथनंपरमुत्तरार्द्धंविभजते प्रकृतिमित्यादिना प्रकृतिशब्दस्यस्वरूपशब्दपर्य्यायत्वंवारयति मायामिति तस्याःस्वातन्त्र्यंनिराकृत्यभगवदधीनत्वमाह ममेति तस्याश्चअधिकरणद्वारेणावच्छिन्नत्वंसूचयति वैष्णवीमिति मायाशब्दस्यापिप्रज्ञानामसुपाठाद्विज्ञानशक्तिविषयत्वमाशंक्याह त्रिगुणात्मिकामिति तस्याःकार्य्यलिङ्गकमनुमानंसूचयति यस्यादृतिजगतोमायावशवर्त्तित्वमेवस्फुटयति ययेतियथालो

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ६

आनन्दगिरिकृतटीका

केकश्चिज्जातोदेहवानालक्ष्यतेएवमहमपिमायामाश्रित्यतयास्ववश्यासम्भवामिते नमायामयमीश्वरस्यजन्मेत्याह तांप्रकृतिमित्यादिना सम्भवामिइत्युक्तमेवविभजते देहवानिति अस्मदादेरिवतवापिपरमार्थिकत्वाभिमानोजन्मादिविषयेस्यादि त्याशंक्य प्रागुक्तस्वरूपपरिज्ञानवत्वादीश्वरस्यैवमित्याह नपरमार्थतइति आप्तज्ञानवतोलोकस्यजन्मादिविषयेपरमार्थत्वाभिमानःसम्भवतीत्याह लोकवदिति ६

स्वामिकृतटीका

ननुअनादेस्तवकुतोजन्मअविनाशिनश्चकथंपुनःपुनर्जन्मयेनबहूनिमेव्यतीतानी त्युच्यते ईश्वरस्यतवपुण्यपापविहीनस्यकथंवाजीववज्जन्मेत्यतआह अजोऽपीतिसत्य मेवंतथापिअजोऽपिजन्मशून्योऽपिसन्नहंतथाऽव्ययात्मापिअनश्वरस्वभावोऽपिसन्त थाईश्वरोऽपिकर्म्मपारतन्त्र्यरहितोपिसन् स्वमायायासम्भवामिसम्यक्प्रच्युतज्ञानव लवीर्य्यादिशक्त्यैवभवामि ननुतथापिषोड़षकलात्मकलिङ्गदेहशून्यस्यचतवकुतोज न्मइत्यतउक्तं स्वांशुद्धसत्त्वात्मिकांप्रकृतिमधिष्ठायस्वीकृत्य विशुद्धोर्जितसत्त्वमूर्त्या स्वेच्छयावतरामीत्यर्थः ६

भाषाअनुवाद।

जोकहोकिअनादिजोतुम तुमाराजन्मकैसे औरअविनाशीहौ तुम तुमारा पुनर्जन्महींवाकैसेसम्भवहोय जोकहतेहोकि बहुततजन्महमारेव्यतीतभयेहैं औ रभीतुम ईश्वरतुमारेपुन्यऔपाप दोनोभीनहींहैं तोफेरिजीवकेसमानतुमाराज न्मकैसेसंभवहो यतिसपरकहतेहैं कि हांयहबाततोठीकहै परहमजन्मरहित औरअविनाशीस्वभावहोकेभी तथाईश्वरअर्थात्कर्म्मकेवशनहींभीहैं परतौभीअ पनीमायाकेद्वारा स्वइच्छासेप्रगटहोतेहैं और जोकहोकितौभीपञ्चज्ञानइन्द्री औपञ्चकर्म्मइन्द्रीतथापञ्चप्राणऔरएकअन्तःकरण येसोरहकलारूपलिङ्गशरी रकेविनाकिसतरहतुमाराजन्महोना सम्भवहेयइसपरकहतेहैं किहमअपनीशु द्धसत्त्वात्मकप्रकृतिकोस्वीकारकरिअतिजाज्वल्यमानसत्वमूर्त्तिसेस्वेछाधीनआपसे आपअवतारलेतेहैं ६

CC-0. In Public Domain. Digitized by eGangotri

यदायदाहि धर्मस्यग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्यतदात्मानं सृजाम्यहं ७
परित्राणायसाधूनांविनाशायचदुष्कृतां धर्मसंस्थापनार्थायसम्भवामियुगेयुगे ८

शाङ्करभाष्यम्

तच्चजन्मकदाकिमर्थंचेत्युच्यते यदेति यदायदाहिधर्मस्यग्लनिर्हानिर्व्वेदाश्रमादिलक्षणस्यप्राणिनामभ्युदयनिःश्रेयससाधनस्य अभावोभवतिभारतअभ्युत्थानंसमुद्भवोऽधर्मस्यतदातदात्मानंसृजाम्यहं मायया ७

आनन्दगिरिकृतटीका।

यदीश्वरस्यमायानिबन्धनंजन्मेत्युक्तंतस्यप्रश्नपूर्वकंकालंकथयति तच्चेत्यादिना चातुर्व्वर्ण्येचातुराश्रम्येचयथावदनुष्ठीयमानेनास्तिधर्म्महानिरिति मन्वानोविष्णुर्न दृष्टिं वर्णयति वर्णाश्रमैस्तदाचारैश्चलक्ष्यतेज्ञायतेधर्म्मःतस्येतियावत् धर्म्महानौ समस्तपुरुषार्थभङ्गोभवतीत्यभिप्रेत्याह प्राणिनामिति नचयथोक्तसर्व्वधर्म्मस्यहानिं सोढुंशक्तोभवानित्याह भारतेति नकेवलं प्राणिनांधर्म्महानिरेवभगवतोमायाविग्रहस्यपरिग्रहेहेतुरपितुतेषामधर्म्मप्रवृत्तिरपीत्याह अभ्युत्थानमिति यदायदेतिपूर्व्वेणसम्बन्धः ७

स्वामिकृतटीका।

कदासम्भवसीत्यपेक्षायामाह यदायदेति ग्लानिर्हानिःअभ्युत्थानमाधिक्यं ७

भाषा अनुवाद

तोअपनीइच्छासेकबआपजन्मग्रहणकरतेहो इसअपेक्षापरकहतेहैं किहे भारतभरतवंशीअर्जुन जबजबधर्म्मकीग्लानिअर्थात्हानिहोतीहै औरअधर्म्मकाअभ्युत्थानकहे वृद्धिहोती तबतबहमशरीरधारनकरतेहैं ७

जोकहोकिऐसेसमयमेआपक्योंशरीरधारणकरअवतरतेहो तोकहतेहैं किसाधुकहेस्वधर्मकेकरनेवालेलोगउनकीरक्षाऔरदुःकृतकहेअधर्म्मीपापीजनोंकेनाशकेहेतुमैजन्मलेताहूं इससेयहआया किधर्म्मकास्थापनऔसाधुकारक्षण दुष्टोंकावधकरिमैधर्म्मकीवृद्धिकरनेकोसोईसोईसमयमेशरीरग्रहणकरताहूं वहीकहाकिसंभवामियुगेयुगे जोकोईशङ्काकरैकिदुष्टनाशकरनेसेभगवानकोनिर्दयताआवतीहैतोऐसाकभीकहनानहीं देखोमातापितागुरुयेजोपुत्रशिष्यकोशिक्षाकेहेतुताड़नकरतेहैं तोक्यानिर्दईहैं ऐसेहीईश्वरभीगुणदोषनियमकेअर्थदण्डदेतेहैं परशत्रुतासेनहीं ८

CC-0. In Public Domain. Digitized by eGangotri

जन्मकर्म्मचमेदिव्यमेवंयोवेत्तितत्त्वतः त्यक्त्वादेहं पुनर्जन्मनैतिमामेतिसोऽर्जुन ९

शाङ्करभाष्यं

किमर्थंपरित्राणायेति परित्राणायपरिरक्षणायसाधूनांसन्मार्गस्थानां विनाशायचदुष्कृतांपापकारिणांकिञ्चधर्म्मस्यसंस्थापनार्थायसम्यक् स्थापनंतदर्थं सम्भवामियुगेयुगेप्रतियुगं ८

जन्मेति तत् जन्ममायारूपंकर्म्मचसाधूनां परित्राणादिमेममदिव्यम प्राकृतमैश्वरमेवंयथोक्तं योवेत्तितत्त्वतः तत्त्वेनयथावत्तत्त्यक्त्वादेहमिमंपुनर्जन्मपुनरुत्पत्तिंनैति नप्राप्नोति मामेत्यागच्छति समुच्यते अर्जुन ९

आनन्दगिरिकृतटीका।

यथोक्तेकालेकृतकृत्यस्यभगवतोमायाकृतेजन्मनिप्रश्नपूर्व्वकंप्रयोजनमाह किमर्थमित्यादिना यथासाधूनांरक्षणमसाधूनांनिग्रहश्च भगवदवतारफलं तथाफलान्तरमपितस्यास्तीत्याह किञ्चेति धर्म्महिस्थापितेजगदेवस्थापितंभवत्यन्यथाभिन्नमर्यादंजगदसङ्गतमापद्येतेत्यर्थः ८

स्वामिकृतटीका।

किमर्थमित्यपेक्षायामाह परित्राणायेति साधूनांस्वधर्मवर्त्तिनांरक्षणायदुष्टंकर्म्मकुर्व्वन्तीतिदुष्कृतस्तेषांवधायचएवंधर्मसंस्थापनार्थायसाधुरक्षणेन दुष्टवधेनच धर्मंस्थिरीकर्त्तुंयुगेयुगेतत्तदवसरेसम्भवामीत्यर्थः नचैवंदुष्टनिग्रहं कुर्व्वतोऽपिनैर्घृण्यंशङ्कनीयमथाज्ञः लालनेताड़नेमातुर्नाकारुण्यंयथार्भकेतद्देवमहेशस्यनियन्तुर्गुणदोषयोरिति ८

एवम्विधानामीश्वरजन्मकर्म्मणांज्ञानेफलमाह जन्मेति स्वेच्छयाकृतंममजन्मकर्म्मचधर्म्मपालनरूपंदिव्यमलौकिकंतत्वतःपरानुग्रहार्थमेवेतियोवेत्ति सदेहाभिमानंत्यक्त्वापुनर्जन्मसंसारंनैति नप्राप्नोति किन्तुमामेवप्राप्नोति ९

भाषा अनुवाद।

अब अपने जन्मकर्म्म जाननेका फल कहते हैं कि हमारे स्वेच्छासे दिव्य कहे अलौकिक आश्चर्य्यरूप जो जो जन्म औ कर्म केवल लोकके अनुग्रहार्थ हैं तिनके तत्त्वपूर्वक जाननेसे लोग देहअभिमानको छोड़िकर फेरि संसारमे जन्मग्रहण नहीं करते हैं वलु हमारेही को प्राप्त होते अर्थात् आवागमनसे रहित होते हैं ९

CC-0. In Public Domain. Digitized by eGangotri

वीतरागभयक्रोधामन्मयामामुपाश्रिताः बहवोज्ञानतपसापूतामद्भावमागताः १०

आनन्दगिरिकृतटीका।

मायामयमीश्वरस्यजन्मनवास्तवं तस्यैवचजगत्परिपालनंकर्म्मनान्यस्येति जानतःश्रेयोवाप्तिं दर्शयन्विपक्षेप्रत्यवायंसूचयति तज्जन्मेत्यादिना यथोक्तंमाया मयंकल्पितमिति यावत्वेदनस्ययथावत्त्वं वेद्यस्यजन्मादेरुक्तरूपानतिवर्त्तित्वं यदि पुनर्भगवतोवास्तवंजन्मसाधुजनपरिपालनादिचान्यस्यैवकर्म्मत्वियस्येतिविवक्ष्यते तदातत्वापरिज्ञानप्रयुक्तोजन्मादिःसंसारोदुर्व्वारःस्यादिति भावः ९

सम्प्रतिप्रस्तुतमोक्षमार्गस्यनूतनत्वेनाव्यवस्थितत्वमाशङ्क्यपरिहरति नैषइति मन्मयत्वस्यमद्भावगमनेनापौनरुक्त्यंदर्शयति ब्रह्मविदइति आत्मनोभिन्नत्वेनवा ब्रह्मणोवेदनंव्यावर्त्तयति ईश्वरेति अभेददर्शनेनसमुच्चित्यकर्म्मानुष्ठानंप्रत्याचष्टे मामेवेति तदुपाश्रयत्वमेवविषदयति केवलेति मामुपाश्रिताइतिकेवलज्ञान निष्ठत्वमुक्त्वाज्ञानतपसापूताइतिकिमर्थंपुनरुच्यतेतत्राह इतरेति १०

स्वामिकृतटीका।

कथंजन्मकर्म्मज्ञानेत्वत्प्राप्तिःस्यादित्यतआह वीतरागेति अहंशुद्धसत्ववता रैर्धर्मपालनंकरोमीतिमदीयंपरमकारुणिकत्वंज्ञात्वावीताविगतारागभयक्रोधा येभ्यस्तचित्तविक्षेपाभावामय्यामदेकचित्ताभूत्वामामेवोपाश्रिताः सन्तोमत्प्रसाद लब्धंयदात्मज्ञानञ्चतपश्चतत्परिपाकहेतुःस्वधर्म्मः इन्द्रैकवद्भावः तेनज्ञानतपसा पूताःशुद्धानिरस्ताज्ञानतत्कार्य्यमलामद्भावंमत्सायुज्यंप्राप्तावहवःनत्वधुनैवप्रवृत्तो ऽयंमद्भक्तिमार्गइत्यर्थः तदेवंतान्यहंवेदसर्व्वाणीत्यादिनाविद्याविद्योपाधिभ्यांतत्वंप दार्थावीश्वरजीवौप्रदर्श्य ईश्वरस्यचाविद्याभावेननित्यशुद्धत्वाज्जीवस्यचेश्वरप्रसाद लब्धज्ञानेनाज्ञाननिवृत्तेःशुद्धस्यस्वतश्चिदंशेनतदैक्यमुक्तमितिद्रष्टव्यं १०

भाषा अनुवाद।

जोकहोकिईश्वरकेजन्मकर्म्मजाननेहीसेकैसेईश्वरप्राप्तिहोतीहै इसपरकह तेहैं किशुद्धसतोगुणसेअवतारलेयहमारेजोपरमदयालुताकेकर्म तिनकेजान नेसेसतोगुणकेद्वारा सत्वशुद्धिहोतीहैफेरिवेलोगसंसारसेविगतस्नेह औ गतक्रो धनिर्भयहोय मेरेआश्रितमद्रूपअर्थात्मत्स्वभाव वज्रतेरेज्ञानसम्पन्नपवित्रहोय मद्भावकोप्राप्तभयेहैं अर्थात्मेरेस्वरूपमेलीनहोगयेहैं १०

CC-0. In Public Domain. Digitized by eGangotri

येयथामांप्रपद्यन्तेतांस्तथैवभजाम्यहं ममवर्त्मानुवर्त्तन्तेमनुष्याःपार्थसर्व्वशः ११

शाङ्करभाष्यम् ।

नैषमोक्षमार्गइदानींप्रवृत्तःकिंतर्हिपूर्व्वमपि वीतरागेति बीतरागभयक्रोधा रागश्चभयञ्चक्रोधश्चरागभयक्रोधाः वीताबिगतायेभ्यस्तेबीतरागभयक्रोधामन्मयाब्रह्मविदईश्वराभेददर्शिनो मामेवचपरमेश्वरमुपाश्रिताःकेवलज्ञाननिष्ठाइत्यर्थःबहवोऽनेकेज्ञानतपसाज्ञानमेवचपरमात्मविषयंतत्तपस्तेनज्ञानतपसापूताः परांशुद्धिंगताःसन्तोमद्भावमीश्वरभावंमोक्षमागताःसमनुप्राप्ताःइतरतपोनिरपेक्षाज्ञाननिष्ठाइत्यस्यलिङ्गंज्ञानतपसेतिविशेषणं १०

तवतर्हि रागद्वेषौस्तः येनकेभ्यश्चिदेवात्मभावं प्रयच्छसिनसर्व्वेभ्यइत्युच्यते येयथेति येयथायेनप्रकारेणयेनप्रयोजनेनयत्फलार्थितया मां प्रपद्यन्तेतांस्तथैव तत्फलदानेनभजाम्यहमनुगृह्णाम्यहं इत्यतः तेषांमोक्षंप्रत्यक्षंप्रत्यनर्थित्वान्नह्येकस्यमुमुक्षुत्वंफलार्थित्वञ्च युगपत् सम्भवति अतो ये यत्फलार्थिनःतान्तत्फलप्रदानेन,येयथोक्तकारिणस्तत्फलार्थिनोमुमुक्षवश्चतान्ज्ञानप्रदानेन येज्ञानिनःसन्यासिनोमुमुक्षवश्चतान्मोक्षप्रदानेन तथाआर्त्तानार्त्तिहरणेत्येवंयथायेन प्रकारेण मां प्रपद्यन्ते येतांस्तथैवभजामीत्यर्थः नपुनः रागद्वेषनिमित्तंमोहनिमित्तं वा किञ्चिद्भजामि सर्व्वथापिसर्व्वावस्थस्यममेश्वरस्य वर्त्ममार्गमनुवर्त्तन्तेये मनुष्याःयत्फलार्थितयायस्मिन्कर्म्मण्यधिकृताः येप्रयतन्ते ते मनुष्याअत्रउच्यन्ते हे पार्थ सर्व्वशःसर्वप्रकारैः ११

भाषा अनुवाद ।

तोतुमारेभी क्याविपरीतभावकहे स्वपरबुद्धिहै जिसहेतु शरणागत को कृपाकरिआत्मस्वभावदेते और दूसरेकोनहीं देते हौ इसकासिद्धान्तकहतेहैं किहेपार्थअर्जुन जोमनुष्यजवजिसप्रकारअर्थात्सकाम या निःकामरूपहमको भजते सेवते हैं उनकोवैसेही फलप्रदानकरि मैभीअनुग्रहकरताहूं और कामनाकरके जोलोगइन्द्रआदिदेवतोंका भजनपूजनकरतेहैं उनकाअनादर या त्याग हमनहीं करते कारणयह किजिसकिसीकीपूजायाभजनकरै वह मेरीहीपूजाहोतीहै क्योंकि सर्व्वरूपमयमैहींहूं सोहेपार्थ मेरीही राहमे सबमनुष्यवर्त्तमानहैं परजैसीजिसकीभावना तैसातिसकोफलमिलताहै इससेसकामलोगोंको कर्म्मानुसारफललाभदेखाया और निःकामतो मेरारूपहीहै ११

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

ईश्वरःसर्व्वेभ्योभूतेभ्योमोक्षं प्रयच्छतिचेत् प्रागुक्तविशेषणवैयर्थ्यंयदितुकेभ्यश्चिदेव मोक्षं प्रयच्छेत्तर्हि तस्य रागादिमत्त्वादनीश्वरत्वापत्तिरितिशङ्कते तवतदीति येमुमुक्षवस्तेभ्योमोक्षमीश्वरोज्ञानसम्पादनद्वारा प्रयच्छति फलान्तरार्थिभ्यस्तुतत्तदुपायानुष्ठापनेनतत्तदेवददातीति नास्यरागद्वेषाविति परिहरति उच्यतइति मुमुक्षूणामीश्वरानुसारित्वेपिफलान्तरार्थिनांकुतस्तदनुसारित्वमित्याशंक्यफलमत उपपत्तेरितिन्यायेन तत्फलस्येश्वरायत्वात्तदनुवर्त्तित्वमावश्यकमित्याह ममेति भगवद्वचनभागिनांसर्व्वेषामेवकैवल्यमेकरूपंकिमितिनानुगृह्यतेतत्राह तेषामिति अभ्युदयनिःश्रेयसार्थित्वंप्रार्थनावैचित्र्यादेकस्यैवकिंनस्यादित्याशंक्यपर्य्यायेणतदनुपपत्तिंसाधयति नहीति मुमुक्षूणांफलार्थिनाञ्चविभागेस्थितेसत्यनुग्रहविभागंफलितमाह अतइति फलप्रदानेनानुगृह्णामीति सम्बन्धः नित्यनैमित्तिककर्म्मानुष्ठायिनामेव फलार्थित्वाभावेसति मुमुक्षुत्वेकथंतेष्वनुग्रहः स्यादितितत्राह येयथोक्तेति ज्ञानप्रदानेनभजामीत्युत्तरत्रसम्बध्यः सन्तिकेचित्तत्रोक्तसर्व्वकर्म्माणोज्ञानिनोमोक्षमेवापेक्ष्यमाणास्तेष्वनुग्रहप्रकारं प्रकटयति येज्ञानिनइतिकेचिदार्त्ताःसन्तो ज्ञानादिसाधनान्तररहिता भगवन्तमेवार्त्तिमत्प्रहर्त्तुमनुवर्त्तन्ते तेषुभगवतोऽनुग्रहविशेषंदर्शयति तथेति पूर्व्वार्द्धव्याख्यानमुपसंहरति इत्येवमिति भगवतोऽनुग्रहे निमित्तान्तरंनिवारयति नपुनरिति फलार्थित्वेमुमुक्षुत्वे च जन्तोर्नांभगवदनुसरणमावश्यकमित्युत्तरार्द्धं विभजते सर्व्वथापीति सर्व्वावस्थत्वं तेनतेनात्मनापरस्यैवेश्वरस्यावस्थानंमार्गोज्ञानकर्म्मलक्षणः मनुष्यग्रहणादितरेषामीश्वरमार्गानुवर्त्तित्वमप्युदासःस्यादित्याशंक्याह यत्फलेति सर्व्वप्रकारैर्ममैवमार्गमनुवर्त्तन्ते इतिपूर्व्वेणसम्बन्धः ११

स्वामिकृतटीका

ननुतर्हि किंत्वय्यपिवैषम्यमस्ति यस्मादेवंत्वदेकशरणानामेवात्मभावंददासिनान्येषांसकामानामित्यतआह येइति यथायेनप्रकारेणसकामतयानिःकामतयावायेमांभजन्तितानहंतथैवतदपेक्षितफलदानेनभजामिअनुगृह्णामिनतुसकामानांविहायेन्द्रादीनेवयेभजन्तेतानहमुपेक्षइति मन्तव्यं यतःसर्व्वशःसर्व्वप्रकारैरिन्द्रादिसेवकाअपिममैववर्त्मभजनमार्गमनुवर्त्तन्तइन्द्रादिरूपेणापि ममैवसेव्यत्वात् ११

CC-0. In Public Domain. Digitized by eGangotri

काङ्क्षन्तः कर्मणांसिद्धिंयजन्तइहदेवताः क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिकर्मजा१२

शाङ्करभाष्यं ।

यदितवेश्वरस्यरागादिदोषाभावःतदासर्व्वप्राणिषुअनुजिघृक्षायांतुल्यायांसर्व्वफलप्रदानसमर्थेचत्वयिसतिवासुदेवःसर्व्वमिति ज्ञानेनैवमुमुक्षवः सन्तःकस्मात्तामेवसर्व्वेनप्रतिपद्यन्तेइतिश्रुणुतत्रकारणंकाङ्क्षन्तइति अभिलषन्तःकर्मणांसिद्धिंफलनिष्पत्तिंप्रार्थयन्तोयजन्तेइहास्मिन्लोकेदेवताइन्द्राग्न्याद्याःअथयोन्यांदेवतामुपास्तेऽन्योसावन्योहमस्मीति नसवेद यथापशुरेवंसदेवानामितिश्रुतेः तेषांहिभिन्नदेवतायाजिनांफलाकाङ्क्षणांक्षिप्रंशीघ्रंहियस्मान्मानुषेलोकेमनुष्यलोकेहिशास्त्राधिकारःक्षिप्रंहिमानुषेलोकेइति विशेषणादन्येष्वधिकर्मफलसिद्धिंदर्शयतिभगवान्मानुषेलोकेवर्णाश्रमादिकर्म्माणीतिविशेषः तेषाञ्चवर्णाश्रमाद्यधिकारिणांकर्मणाफलसिद्धिःक्षिप्रंभवतिकर्मजाकर्मणोजाता १२

आनन्दगिरिकृतटीका ।

अनुग्राह्याणांज्ञानकर्म्मानुरोधेनभगवतातेष्वनुग्रहविधानात्तस्यरागद्वेषौयदिनभवतस्तर्हि तस्यरागाद्यभावादेवसर्व्वेषुप्राणिष्वनुग्रहेच्छातुल्याप्राप्ता नचतस्यांसत्यामेवफलस्याल्पीयसःसम्पादनेसामर्थ्यं नतुभगवतोमहतोमोक्षाख्यस्यफलस्यप्रदानेऽशक्तिरिति युक्तमप्रतिहतज्ञानेच्छाक्रियाशक्तिमतस्तवसर्व्वफलप्रदानसामर्थ्यात्तथाचयथोक्तानुजिघृक्षायांसत्यांत्वयिचयथोक्तसामर्थ्यवतिसतिसर्व्वेफलंगुफलादभ्युदयात्विमुखामोक्षमेवापेक्षमाणाज्ञानेनत्वामेवकिमिति नप्रतिपद्येरन्निति चोदयति यदीति मोक्षापेक्षाभावात्तदुपायभूतज्ञानादपिवैमुख्याद्भगवत्प्राप्तभावेहेतुमभिदधानःसमाधत्ते श्रृणुविति कर्मफलसिद्धिमिच्छताकिमितिमानुषेलोकेदेवतापूजनमिष्यतेतत्राह क्षिप्रंहीति कर्मफलसम्पत्त्यर्थिनांयष्टृयष्टव्यविभागदर्शिनांतद्दर्शनेकारणमात्मज्ञानमित्यत्रबृहदारण्यकश्रुतिमुदाहरति अथेति

भाषा अनुवाद ।

जोऐसाकहोकितौफेरिमोक्षहीकेवास्तेसबलोगभगवतकाआराधनक्योंनहींकरतेहैं इसपरकहतेहैं किमनुष्यलोकमे वर्त्तनेवालोग कर्मफलकीअभिलाषाकरि इन्द्रआदिदेवतोंकीसेवाकरते औरसाक्षात्हमारीसेवानहींकरतेहैं क्योंकिकर्मसेफलशीघ्रप्राप्तहोता औरमेरीसाक्षात्सेवासे ज्ञानकाफलरूपजोमुक्ति सोदुःप्रापहै बड़ेकठिनसेचिरकालमेमिलतीहै १२

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

मानुषएवलोकेवर्णाश्रमादिकर्म्माधिकारोनान्येषुलोकेष्वितिनियमःकिंनिमित्तइति अथवावर्णाश्रमादिप्रविभागोपेतामनुष्य ाममवर्त्मानुवर्त्तन्ते सर्व्वशइत्युक्तं कस्मात् पुनःकारणात् नियमेनतबैववर्त्मानुवर्त्तन्ते नान्यस्येत्युच्यते चातुर्व्वर्ण्यमि

आनन्दगिरिकृतटीका।

अविद्याप्रकरणोपक्रमार्थमथेत्युक्तं उपायभेददर्शनमित्यनूद्यकारणमात्मज्ञानं नतबेतिदर्शयति नेति यथास्मदादीनांहलवहनादिनापशुरुपकरोत्येवमज्ञोदेवादीनांयागादिभिरुपकरोतीत्याह यद्येति किमितितेफलाकाङ्क्षिणोभिन्नदेवताया जिनोज्ञानमार्गंनापेक्षन्तेतत्रोत्तरार्द्धमुत्तरत्वेनयोजयति तेषामित्यादिना यस्मादयथोक्तानामधिकारिणांकर्म्मप्रयुक्तंफलंलोकविशेषेझटितिसिध्यतितस्मात्तेषांमोक्षमार्गादस्तिवैमुख्यमित्यर्थः ।मानुषलोकविशेषणंकिमर्थमित्याशंक्याह मनुष्यलोकेहीति लोकान्तरेषुतर्हिकर्मफलसिद्धिर्नास्तीत्याशंक्य क्षिप्रविशेषणस्यतात्पर्य्यमाह क्षिप्रमिति क्वचित्कर्म्मफलसिद्धिरविलम्बेनभवत्यन्यत्रतुविलम्बेनेतिविभागे कोहेतुरित्याशंक्य सामग्रीभावाभावाभ्यामित्याह मानुषइति मनुष्यलोकेकर्म्मफलसिद्धेःशैघ्र्यात्तदभिमुखानांज्ञानमार्गबैमुख्यंप्रायिकमित्युपसंहरति तेषामिति १२

स्वामिकृतटीका।

तर्हिमोक्षार्थमेबकिमिति सर्व्वेत्वांनभजन्तीत्यतआह कांक्षन्तइति कर्म्मणांसिद्धिंकर्म्मफलंकांक्षन्तः प्रायेणेहमनुष्यलोकेइन्द्रादिदेवता एवयजन्ते नतुसाक्षान्मामेव हियस्मात्कर्म्मजासिद्धिःकर्म्मजंफलंशीघ्रंभवति नतुज्ञानफलंकैवल्यंदुष्प्राप्यत्वात्ज्ञानस्य १२

ननुकेचित्सकामतयाप्रवर्त्तन्तेकेचिन्निष्कामतयेति कर्म्मबैचित्र्यंतत्कर्तृणाञ्चब्राह्मणादीनामुत्तममध्यमादिवैचित्र्यंकुर्व्वतस्तवकथंवैषम्यंनास्तीत्याशंक्याह चातुर्व्वर्ण्यमिति चत्वारोवर्णाएवेति चातुर्व्वर्ण्यं स्वार्थेष्यञ्प्रत्ययःअयमर्थःसत्त्वप्रधानाब्राह्मणास्तेषांशमदमादीनिकर्म्माणिसत्वरजःप्रधानाक्षत्रियास्तेषांशौर्य्ययुद्धादीनिकर्म्माणि रजस्तमःप्रधानावैश्यास्तेषाञ्चकृषिवाणिज्यादीनिकर्म्माणि तमःप्रधानाःशूद्रास्तेषाञ्चवैवर्णिकशुश्रूषादीनिकर्म्माणीत्येवंगुणानांकर्म्मणाञ्चविभागैश्चातुर्व्वर्ण्यं मयैवसृष्टमितिसत्यं तथाप्येवंतस्यकर्त्तारमपिफलतोऽकर्त्तारमेवमांविद्धि तत्रहेतुरव्ययंआसक्तिराहित्येनश्रमरहितं १३

CC-0. In Public Domain. Digitized by eGangotri

चातुर्व्वर्ण्यं मयासृष्टं गुणकर्म्मविभागशः तस्यकर्त्तारमपिमांविद्ध्यकर्त्तारमव्ययं १३

शाङ्करभाष्यं

ति चातुर्व्वर्ण्यंचत्वारएववर्णाश्चातुर्वर्ण्यं मयेश्वरेणसृष्टमुत्पादितं ब्राह्मणोऽस्य मुखमासीदित्यादिश्रुतेः गुणकर्म्मविभागशः गुणविभागशः कर्म्मविभागश्चगुणाः सत्त्वरजस्तमांसि तत्रसात्त्विकस्यसत्वप्रधानस्यब्राह्मणस्यशमोदमस्तप इत्यादीनि कर्म्माणिसत्त्वोपसर्ज्जनरजःप्रधानस्यक्षत्रियस्यशौर्य्यतेजःप्रभृतीनिकर्म्माणि तमउपसर्जनरजःप्रधानस्यवैश्यस्यकृष्यादीनिकर्माणि रजउपसर्ज्जनतमःप्रधानस्यशूद्रस्य शुश्रूषैवकर्मेत्येवंगुणकर्मविभागशःचातुर्व्वर्ण्यंमयासृष्टमित्यर्थःतच्चेदंचातुर्व्वर्ण्यंनान्येषुलोकेषुअतोमानुषेलोकेइति विशेषणंहन्ततर्हिचातुर्व्वर्ण्यस्यसर्गादेःकर्म्मणःकर्त्तृत्वात्तत्फलेषुयुज्यसेअतोनत्वंनित्यमुक्तोनित्येश्वरइत्युच्यतेयद्यपिमायासंव्यवहारेण तस्यकर्मणःकर्त्तारमपिसन्तंतथापिमांपरमार्थतो विद्ध्यकर्त्तारमतएवाव्ययमसंसारिणञ्चमांविद्धि १३

आनन्दगिरिकृतटीका।

मनुष्यलोकेचातुर्वर्ण्यं चातुराश्रम्यमित्यनेनद्वारेणकर्माधिकारनियमेकारणं ष्टच्छति मानुषएवेति आदिशब्देनाश्रमाविशेषाविवक्ष्यन्ते प्रकारान्तरेणष्टत्तानु

भाषा अनुवाद।

औरजोकहोकिचारोवर्णकेकर्त्ताभीतुमहींहो औरअनेकप्रकारकर्मभीवेदकेद्वारातुह्मीनेकहाहै फेरिउह्मीकर्मोकेकरनेवालेब्राह्मणआदिवर्णोकोउत्तमऔअधमकर्मभीतुमनेकहा तोइससबकेकरनेऔकहनेवालेएकतुमठहरे फेरि किसीकीप्रवृत्तिसकामकर्ममेऔरकिसीकीनिष्कामभेजोहोतीहै तोकहोवैषम्य दोषकहेविषमस्वभावतुमाराक्योंनहीहै इनबातोंसेअलवतेतुमकोपक्षपातदोष भीहोसकताहै इसकेउपरकहतेहैंकिहां चातुर्व्वर्ण्यकहेसतोगुणप्रधानजोब्राह्मण उनकेकर्मशमदमउपरतितितिक्षासमाधानश्रद्धाहैं औरसत्त्वरजप्रधान जोक्षत्री उनकेकर्मभूमिरक्षाप्रजापालनयुद्धआदिकहैं औररजोगुणतमोगुणप्रधानजोवैश्य तिनकेकर्मव्यापारखेतीआदिकहै और तमोगुणप्रधानशूद्रकाकर्म इनतीनोवर्णकीसेवाहै सोयहबातठीकहैपरजौभी हमइनकेकर्त्ताहैं तौभीअकर्त्ताहीजानो क्योंकिहमअव्यय हमारीआसक्ति इनकर्मोमेंनहीहै १३

CC-0. In Public Domain. Digitized by eGangotri

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा इति मां योऽभि
जानाति कर्मभिर्न्न स बध्यते १४

शाङ्करभाष्यं

येषान्तुकर्मणांकर्त्तारंमांमन्यसेपरमार्थतस्तेषामकर्त्तैवाहंयतः नेति नमां तानिकर्माणिलिम्पन्ति देहाद्यारम्भकत्वेनाहङ्कारामावान्नचतेषांकर्म्मणांफलेषु

आनन्दगिरिकृतटीका।

वादपूर्वकंचोद्यमुत्थापयति अथवेत्यादिना प्रश्नद्वयंपरिहरति उच्यतइति तर्हित वकर्त्तृत्वभोक्तृत्वसम्भवादस्मदादितुल्यत्वेनानीश्वरत्वमित्याशंक्याह तस्येति ईश्वर स्यविश्वसृष्टिंविदधानस्यसृष्टिवैषम्यनिर्वाहकंकथयति गुणेति गुणविभागेनकर्मवि भागस्तेन चातुर्व्वर्ण्यस्यसृष्टिमेवोपदिष्टांस्पष्टयति तत्तेत्यादिना प्रश्नद्वयंप्रतिविधानं प्रकृतमुपसंहरति तच्चेदमिति मनुष्यलोकेपरंवर्णाश्रमादिपूर्व्वकेकर्म्मण्यधिकारस्य वैववर्णादेरीश्वरेणसृष्टत्वान्नलोकान्तरेषुतत्रवर्णाद्यभावादीश्वरमेवचातुर्व्वर्ण्याश्र मादिविभागभागिनोऽधिकारिणोनुवर्त्तन्ते तेनैववर्णादेस्तद्व्यापारस्यचसृष्टत्वात्त दनुवर्त्तनस्ययुक्तत्वादित्यर्थः तस्येत्यादिद्वितीयभागापोद्यंचोद्यमनुद्रवति इन्तेति यदिचातुर्व्वर्ण्यादिकर्तृत्वादीश्वरस्यप्रागुक्तोनियमोऽभिमतस्तर्हितद्विषयसृष्ट्यादेस्त न्निष्ठव्यापारस्यचधर्म्मादेर्निवर्त्तकत्वात्तत्फलस्यकर्त्तृत्वभोक्तृत्वयोस्वयिप्रसङ्गात्नि त्यमुक्तत्वादितेनस्यादित्यर्थः मायायाकर्त्तृत्वंपरमार्थतश्चाकर्त्तृत्वमित्यभ्युपगमा न्नित्यमुक्तत्वादिसिध्यतीत्युत्तरमाह उच्यतइति मायाप्रवृत्तेनसंव्यवहारेणचातुर्व्व र्ण्यादेस्तत्कर्म्मणश्चयद्यपिकर्त्ताहं तथापितथाविधंमांपरमार्थतोऽकर्त्तारंविद्धीति योजनाअकर्तृत्वादेवाभोक्तृत्वसिद्धिरित्याह अतएवेति १३

भाषा अनुवाद।

वहीकर्मकीआसक्तिदेखलातेउन्येकहतेहैं किदेखोविश्वसर्जनआदिकर्महम कोनहींलगते औरनकर्म्मफलकीइच्छाहमैहै क्योंकिहमनिरहङ्कारकर्मकरते औरपूर्णकामहैं इससेकोईविषयकेदर्शनादिसेहमारीभोगमेइच्छानहींहोतीतो येकर्महमैकैसेआसक्तकरसकैं औरक्याकहैं देखोजोमनुष्यहमकोकर्ममेनिर्लिप्त जानतेहैं वेभीकर्मबन्धनमेनहीपड़ते कारणयहकिजोहमारेनिर्लेपताकेहेतुअन हंकारऔनिस्पृहहैं सोउनकेजानकारपुरुषकेभीशिथिलहोते कहेनाममात्रकोर हजातेऔरकुछकामदेखनेयोग्यनहींरहतेहैं नउनकाकुछकरसकतेहैं १४

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

मेस्पृहातृष्णा तेषान्तुसंसारिणमहंकर्त्तेत्यभिमानःकर्मसुस्पृहातत्फलेषुचतान् कर्माणिलिम्पन्तीतियुक्तं तदभावान्ममांकर्माणिलिम्पन्तीत्येवं योऽन्योपिमामात्मत्वे नाभिजानातिनाहंकर्त्तानमेकर्मफलेस्पृहेति सकर्मभिर्नबध्यते तस्यापिनदेहाद्या रम्भकाणिकर्माणिभवन्तीत्यर्थः १४

आनन्दगिरिकृतटीका ।

ईश्वरस्यकर्तृत्वभोक्तृत्वयोर्वस्तुतोऽभावेकर्मतत्फलसम्बन्धवैधुर्य्यंफलतीत्याह येषांत्विति कर्मतत्फलसंस्पर्शशून्यमीश्वरंमांपश्यतोदर्शनानुरूपंफलंदर्शयति न मामिति तानिकर्माणीतियेषांकर्मणामहंकर्त्तातवाभिमतस्तानीतियावत् देहे न्द्रियाद्यारम्भकत्वेन तेषांकर्मणामीश्वरेसंस्पर्शाभावे तस्यतत्कारणावस्थायामह ङ्काराभावंहेतुंकरोति अहङ्काराभादिति कर्मफलतृष्णाभावाच्चेश्वरंकर्माणिन लिम्पन्तीत्याह नचेति उक्तमेवप्रपञ्चयति येषांत्विति तदभावात् कर्मस्वहं कर्त्तेत्यभिमानस्य तत्फलेषुस्पृहायाश्चाभावादित्यर्थः ईश्वरस्यकर्मनिर्लेपेऽपिज्ञेव ज्ञस्यकिमायातमित्याशंक्योत्तरार्द्धंव्याचष्टे इत्येवमिति अभिज्ञानप्रकारमभिनयति नाहमिति ज्ञानफलंकथयति सकर्मभिरिति कर्मासम्बन्धंविदुषिविषदयति तस्यापीति १४

तवकर्म्मतत्फलसम्बन्धाभवे तथाज्ञानवतश्चतदसम्बन्धेममापिकिंकर्म्मणेत्याशं क्य कर्म्मणिकर्तृत्वाभिमानंतत्फलेस्पृहाञ्चाकृत्वामुमुक्षुवत्त्वयाकर्म्मकर्तव्यमेवेत्या हनाहमित्यादिना एवमिति नाहंकर्तेत्येवमादिपरामृश्यते तेनपूर्वैर्मुमुक्षुभिरनु ष्ठितत्वेनहेतुनेत्यर्थः कर्म्मैवेत्येवकारार्थमाह नेत्यादिना त्वंशब्दस्यक्रियापदे नसम्बन्धः तस्मादित्युक्तमेवस्फुटयति पूर्वैरिति पूर्वैरिति यदुक्तंकिंममकर्म्मणेतित त्वमज्ञोवातत्त्वविद्वा यद्यज्ञस्तदाचित्तशुद्ध्यर्थंकुरुकर्म्मेत्याह यदीति द्वितीयंप्रत्याह तत्त्वविदितिकुरुकर्म्मेति सम्बन्धःपूर्वैर्मूढैराचरितमित्येतावता किमिति विवेक

स्वामिकृतटीका

तदेवदर्शयन्नाह नमामिति कर्माणिविश्वसृष्ट्यादीन्यपिमांनलिम्पन्तिआसक्तं नकुर्व्वन्ति निरहङ्कारत्वादाप्तकामत्वेनममकर्मफलेस्पृहाभावाच्चमांनलिम्पन्तीति किंवक्तव्यं यतःकर्मलेपराहित्येनमांयोऽभिजानाति सोऽपिकर्मभिर्नबध्यतेममनिर्लेप त्वकारणंनिरहङ्कारत्वनिस्पृहत्वादिकंजानतस्तस्याप्यहङ्कारादिशैथिल्यात् १४

CC-0. In Public Domain. Digitized by eGangotri

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं १५

शाङ्करभाष्यं

नाहं कर्त्तीनमे कर्म्मफलेस्पृहेति एवमिति एवं ज्ञात्वा कृतं कर्म्म पूर्वैरप्यति क्रान्तैर्मुमुक्षुभिः कुरु तेन कर्म्मैव त्वं न तूष्णीमासनं नापि संन्यासः कर्त्तव्यस्तस्मात्त्वं पूर्वैरप्यनुष्ठितत्वाद्यद्यनात्मज्ञस्त्वं तदात्मशुद्ध्यर्थं तत्त्वविद्भिर्लोकसंग्रहार्थं पूर्वैर्जनकादिभिः पूर्वतरं कृतं नाधुनातनं कृतं निर्वर्त्तितं।१५।

तत्कर्म चेत् कर्तव्यं त्वद्वचनादेव करोम्यहं किं विशेषितेन पूर्वैः पूर्वतरं कृतमित्युच्यते यस्मान्ममहद्वैषम्यं कर्म्माकर्मणि कथं किं कर्मेति किं कर्म किञ्चाकर्मेति कवयोमेधाविनोऽपि अत्रास्मिन् कर्मादिविषये मोहिताः मोहं गताः अतस्तेतुभ्यमहं कर्माकर्म च प्रवक्ष्यामि यत् ज्ञात्वा विदित्वा कर्मादि मोक्ष्यसेऽशुभात् संसारात् नचैवं त्वया मन्तव्यं कर्मनाम देहादिचेष्टा लोकप्रसिद्धमकर्मनाम तदक्रिया तूष्णीमासनं किं तत्र वोढव्यमिति १६

आनन्दगिरिकृतटीका

वता मया तत् कर्त्तव्यमित्याशंक्याह जनकादिभिरिति तेतदैवं संपाद्य कर्म कृतवन्तो नतदिदानीमप्रामाणिकत्वादनुष्ठेयमित्याशंक्याह पूर्वतरमिति १५

स्वामिकृतटीका।

येयथामामित्यादिचतुर्भिः श्लोकैः प्रासङ्गिकमीश्वरस्यवैषम्यं परिहृत्यपूर्वोक्तमेव कर्मयोगं प्रपञ्चयितुमनुस्मारयति एवमिति अहङ्कारादिराहित्येनकृतं कर्म बन्धकं नभवतीत्येवं ज्ञात्वा पूर्वैर्जनकादिभिरपिमुमुक्षुभिस्तत्वशुद्ध्यर्थं पूर्वतरं युगान्तरेष्वपिकृतं तस्मात्त्वमपिप्रथमं कर्मैवकुरु १५

भाषाअनुवाद

अबऐसेचारिश्लोकसेप्रसङ्गप्राप्तईश्वरकेवैषम्यदोषकोदूरकरतेहुये पूर्वकथितकर्मयोगकोविस्तारकरिकहते हैं किअहङ्काररहितकियाहुआकर्म ज्ञानकाबाधकनहीं होताहै यहजानिकरिकेपूर्वकालकेमुमुक्षुजनकआदिकोंनेकियाथादूससेतुमभीअभीदूसप्रथमअवस्थामेकर्मकरो जबज्ञानअवस्थाप्राप्तहोगीआपहीछूटजायगे अभीछोड़नेसेसतोगुणकीशुद्धिहोनादुर्घटहै देखो औरऔरयुगमेभीलोगोंनेप्रथमकर्मकोकियाहै यहकर्मयुगयुगान्तरसे कियाचलाआताहै। १५

CC-0. In Public Domain. Digitized by eGangotri

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् १६

आनन्दगिरिकृतटीका ।

कर्मविशेषणमाक्षिपति तत्रेति मनुष्यलोकःसम्भ्यर्थः कर्मणिमहत्वैषम्यस्यविद्यमानत्वात्तस्यपूर्वैरनुष्ठितत्वेन पूर्वतरत्वेनचविशेषितत्वे तस्मिन्प्रवृत्तिरस्तव सुकरेतियुक्तं विशेषणमिति परिहरति उच्यतइति कर्मणि देहादिचेष्टारूपे लोकप्रसिद्धेनास्तिवैषम्यमितिशङ्कते कथमिति विज्ञानवतामपि कर्मादिविषये व्यामोहोपपत्तेः सुतरामेव तवतद्विषयेव्यामोहसम्भवात्तदपोहार्थमाप्तवाक्यापेक्षणादस्तिकर्मणि वैषम्यमित्युत्तरमाह किंकर्मेति तत्तेकर्मेत्यत्राकारानुबन्धेनापिप्रश्नेक्तव्यं कर्मादिप्रवचनस्यप्रयोजनमाह यज्ज्ञात्वेति तत्कर्माकर्मचेति सम्बन्धः अतोमेधाविनोऽपि यथोक्तेविषयेव्यामोहस्यसत्तादित्यर्थः कर्मणोऽकर्मणश्चप्रसिद्धत्वात्तद्विषये नकिञ्चिद्वोद्व्यमिति चोद्यमनूद्यनिरस्यति नचेति १६

तत्रहेत्वाकाङ्क्षापूर्वकमनन्तरंश्लोकमवतारयति कस्मादिति त्रिष्वपिकर्माकर्मविकर्मसुवोद्व्यमस्तीति यस्मादध्याहारस्तस्मान्मदीयंप्रवचनमर्थवदितियोजना वोद्व्यसद्भावेहेतुमाह यस्मादिति त्रितयंप्रकृत्यान्यतमस्य ग्रहनत्ववचनमयुक्तमित्याशंक्यान्यतमग्रहनस्योपलक्षणार्थत्वमुपेत्यविवक्षितमर्थमाह कर्मादीनामिति १७

स्वामिकृतटीका ।

तच्चतत्त्वविद्भिःसहविचार्य्यकर्तव्यं नलोकपरम्परामात्रेणेत्याह किंकर्मेति किं कर्मकीदृशंकर्मकरणं किमकर्मकीदृशंकर्माकरणं इत्यस्मिन्नर्थे विवेकिनोऽपिमोहिताः अतोयज्ज्ञात्वायदनुष्ठायाशुभात्संसारान्मोक्ष्यसेमुक्तोभविष्यसि तत्कर्माकर्मचतुर्थमहं प्रवक्ष्यामि तच्छृणु १६

भाषा अनुवाद ।

औरदेखो तत्त्वज्ञानीकेसाथविचारकरकेकर्मकरनाचाहिये केवलभेड़ियाधसंतकीनाईं लोकपरम्पराप्राप्तदेखकर करनाअनुचितजानो यहकहतेहैं कि देखोकौनकर्मकर्त्तव्य और कोनअकर्त्तव्यहै इसकर्मअकर्मकेविचार मेंकविकहे वड़ेवड़ेपण्डितभी मोहितहोजातेपतानहींलगताहै इससेजिसकर्मकेकरनेसे इसअशुभसंसारसेमुक्तहोउगे सो औ अकर्म जोअकरणीयकर्म येदोनो हमतुमसेकहतेहैं सोसावधानहोसुनो जिसकोजानिकेअशुभसंसारसेछूटकर मुक्तहो जावगे १६

CC-0. In Public Domain. Digitized by eGangotri

कर्मणोह्यपिबोद्धव्यंबोद्धव्यञ्चविकर्मणः अकर्मणश्चबोद्धव्यंगहनाकर्मणोगतिः १७

शाङ्करभाष्यं।

कस्मात उच्यते कर्मणइति कर्मणःशास्त्रविहितस्यहियस्मात्अप्यस्तिबोद्धव्यं बोद्धव्यञ्चास्त्येव विकर्मणः प्रतिषिद्धस्य तथाअकर्मणश्चतूष्णीम्भावस्यबोद्धव्यमस्तीति त्रिष्वपध्याहारः कर्त्तव्योयस्मातगहनाविषमादुर्ज्ञेयाकर्मणइत्युपलक्षणार्थं कर्मादीनांकर्माकर्मविमर्मणांगतिर्याथात्म्यंतत्त्वमित्यर्थः १७

किंपुनस्तत्वं कर्म्मादेर्यद्बोद्धव्यंवक्ष्यामीतिप्रतिज्ञामुच्यते कर्मणीति कर्मणि कर्मक्रियतइति व्यापारमात्रं तस्मिन्कर्मणिअकर्मकर्माभावंयःपश्येदकर्मणिचकर्माभावेकर्त्तृतन्त्वत्वात् प्रवृत्तिनिवृत्तयोर्ह्यस्वप्राप्यैवहिसर्व्वएवक्रियाकारकादिव्यवहारोऽविद्याभूमावेवकर्मयःपश्येत्यःपश्यतिसबुद्धिमान्मनुष्येषुसयुक्तोजोगीचकृत्स्नकर्मकृत्समस्तकर्मकृच्चसइति स्तूयते कर्माकर्मणोरितरेतरदर्शीननुकिमिदंविरुद्धमुच्यतेकर्मण्यकर्मयःपश्येदित्यकर्मणि चकर्मेतिनहिकर्माकर्मस्यादकर्मवाकर्मतत्रविरुद्धंकथंपश्येत् द्रष्टानन्वकर्मेवपरमार्थतःसत्कर्मवदवभासतेमूढदृष्टेर्लोकस्यतथाकर्मै

स्वामिकृतटीका।

ननुलोकप्रसिद्धमेवकर्मदेहादिव्यापारात्मकं अकर्मचतदव्यापारात्मकं अतः कथमुच्यते कवयोऽप्यत्रमोहंप्राप्नुवंतीति तत्राह कर्मणइतिकर्मणोविहितव्यापारस्यापितत्त्वंबोद्धव्यमस्ति नतुलोकप्रसिद्धमात्रमेव अकर्मणोऽविहितव्यापारस्यापितत्त्वंबोद्धव्यमस्ति विकर्मणोनिषिद्धव्यापारस्यापि तत्त्वंबोद्धव्यमस्ति यतःकर्मणोगतिर्गहनाकर्मइत्युपलक्षणार्थं कर्माकर्मविकर्मणांतत्त्वंदुर्विज्ञेयमित्यर्थः १७

भाषा अनुवाद।

जोकहोकि मनवचनदेहके व्यापारहीतोकर्महैं और देहादिव्यापारकाअभावहीअकर्महै यहीतोलोकमेंप्रसिद्धहै फेरिजोआपनेकहाकिपण्डितलोगभीकर्मअकर्मकेविषयमेंमोहकोप्राप्तहोते सोकैसे इसबातपरकहतेहैं किकर्मतोशास्त्रविहितव्यापारकातत्त्वजानिकरके कर्त्तव्यहै केवललोकव्यवहारदेखिअवश्यकर्त्तव्यकर्मनहींहै औरअकर्मतोसंन्यासआश्रमअङ्गीकारकरि शास्त्रकीरीतसेकर्मकात्यागकरनाहै परतत्त्वज्ञानवानहोकरउचितहैऔर विकर्मजोनिषिद्धकर्म उसकाक्यातत्त्वजाननाआवश्यकहै क्योंकिसबकर्मोकीगतिका ज्ञानहोनाकठिनहैसोईकहाकिकर्मकीगतिगहनकहे बड़ीकठिनसहजसेजानवेजोगनहींहै १७

CC-0. In Public Domain. Digitized by eGangotri

कर्मण्यकर्मयःपश्येदकर्मणिचकर्मयः सबुद्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत् १८

शाङ्करभाष्यम्।

वाकर्मवत् तत्रयथाभूतदर्शनार्थमाह भगवान् कर्मण्यकर्मयःपश्येदित्यादि अतो नविरुद्धं बुद्धिमत्त्वादुपपत्तेश्चवोद्ध्यमिति च यथाभूतं दर्शनमुच्यते नचविपरी

भाषा अनुवाद।

जोकहाकिकर्मकोगति गहनकहेजानवेजोगनहीं है औरकहाकिकर्मअकर्मनिषिद्धकर्मकातत्त्वजानिकरकर्मकोकरै सोईकर्मगतिकीकठिनाईदेखावतेभये वहतत्त्वकहतेहैं जिसकेयथार्थज्ञानमेपण्डितभीमोहितहोते औजिसकेज्ञानसे संसारसेछूटिजातेहैं उसकोमैंकहताहूं तुमसुनोयहप्रतिज्ञाजोकरीथीसोअवकहतेहैं किभगवतआराधनरूपकर्म जबकि किसीतरहज्ञानहोनेमेबाधानहींकरता तोवहक्याकर्महै, उसकोअकर्महीं अर्थात् कर्मसंन्यासही जोदेखतेहैं सोईकहाकिकर्मण्यकर्मयःपश्येत् औरशास्त्रविहितकर्मनकरनेसेदोषहोता फेरिवहीनकरनाज्ञानकाप्रतिबन्धककहेबाधाकाहेतुहोताहै इससेशास्त्रोक्तकर्मकोनकरनाहीं जोअकर्मउसीकोकर्तव्यकर्मजोदेखतेहै वेईलोगकर्मकारीपुरुषोंकेमध्यमेबुद्धिमानहैं भगवानउनकीप्रसंशाकरतेहैं किऐसेहीकर्मअनुष्ठानकरतेजोज्ञानयोगकोप्राप्तहोते सोईयोगीपुरुषहैं औरउनकोभगवतआराधनरूपकर्मके अन्तर्भूतकहे अङ्गभूतसमस्तकर्मकरना आयगयाहै वहीकहाकि सयुक्तःकृत्स्नकर्मकृत् इसमेयहअर्थाकि ज्ञानमार्गमेजानेकीइच्छाजिसकोहै उसकोकर्मयोगअवस्थामेकर्मकरनाउचितहै सोई ३ अध्यायके ४ श्लोकमेकहाकि नकर्मणामनारम्भान्नैष्कर्म्यंपुरुषोश्नुते औरसम्पूर्णज्ञानहोनेसेफेरिकर्मकाकुछआवश्यकनहींहै सोई ३अध्यायके१७श्लोकमेकहाकि यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवइति येदोनोंवातेंइसश्लोकसेअछीतरहकहीगईं औरजो कर्मेन्द्रियाणिसंयम्य यह ३अध्यायके८ श्लोकसेकहाइन्द्रियोंसेआत्माभिन्नहै तथाकोईकर्मनहींकर्ताऐसेजनि दृढ़समाधिमेसमजोरहतेहैं औरअनायासकहेवेमांगेप्राप्तभयेअन्नकोभोजनकरलेते वेसकलकर्मकरतेभीयोगीहैं औरउनकोविकर्मजोनिषिद्धकर्म मृगमांसभोजनादिदोषभी नहींलगताक्योंकिउहैंउसवस्तुकाआग्रहनहीहैं परन्तुअज्ञानीकोआग्रहऔरुचिहै इससेमृगमांसखानेसेदोषहै इससेनिषिद्धकर्मकातत्त्वकहा यहीतत्त्वज्ञानिसवकर्ममेप्रवृत्तहोना मैंनेकहाहै सोतुमठीकठीकजानो। १८।

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

तज्ज्ञानादशुभान्मोक्षणंस्यात् यत्ज्ञात्वा मोक्ष्यसेऽशुभादितिचोक्तं तस्मात् क र्माकर्मणी विपर्य्ययेणगृहीतेप्राणिभिस्तद्विपर्य्ययग्रहणनिवृत्त्यर्थं भगवतोवचनं कर्मण्यकर्मयइत्यादि नचात्र कर्माधिकरणमकर्मास्तिकुण्डेवदराणीवनाप्यकर्मा धिकरणंकर्मास्ति कर्माभावत्वादकर्मणोऽतोविपरीतेगृहीतेएव कर्माकर्मणी लौकिकैः यथा मृगतृष्णिकायामुदकंशुक्तिकायांवारजतं ननुकर्म्मकर्म्मैवसर्व्व षांनक्वचित् व्यभिचरति तत्रनौस्थस्यनाविगच्छन्त्यां तटस्थेष्वगतिकेषुनगेषु प्रति कूलगतिदर्शनात् दूरेषु चक्षुषोऽसन्निकृष्टेषुगच्छत्सु गत्यभावदर्शनादेवमिहाप्य कर्म्मणिअहंकरोमीति कर्मदर्शनं कर्मणिचाकर्मदर्शनं विपरीतदर्शनंयेनतन्नि राकरणार्थमुच्यते कर्म्मण्यकर्मयःपश्येदित्यादि तदेतदुक्तप्रतिवचनमप्यसकृद त्यन्तविपरीतदर्शनाभावितया मोमुह्यमानोलोकः श्रुतमप्यसकृत्तत्त्वंविस्मृत्य मिथ्याप्रसङ्गमवतार्य्यावतार्य्यचोदयतीति पुनःपुनरुत्तरमाह भगवान् दुर्विज्ञे यत्वञ्चालक्ष्य वस्तुनाव्यक्तोयमचिन्त्योयं नजायते म्रियते इत्यादिनात्मनिकर्म्मा भावः श्रुतिस्मृतिन्यायप्रसिद्ध उक्तो वक्ष्यमाणश्च तस्मिन्नात्मनिकर्म्माभावेअकर्म्मणि कर्मविपरीतदर्शनमत्यन्तनिरूढं यतः किंकर्मकिमकर्मेति कवयोऽप्यत्रमोहिता देहाद्याश्रयंकर्मात्मन्यध्यारोप्याहं कर्त्ता ममैतत्कर्म मयास्यकर्मणःफलंभोक्त व्यमितिचतथाहंतूष्णींभवामि येनाहंनिरायासोऽकर्मासुखीस्यामीति कार्य्यकर णाश्रयव्यापारोपरमंकर्मैव तत्कृतञ्चसुखित्वमात्मन्यध्यारोप्यनकरोमिकिञ्चतू ष्णींसुखमासमित्यभिमन्यते लोकस्तन्नेदंलोकस्यविपरीतदर्शनापनयायाह भगवा न्कर्मण्यर्मयःपश्येदित्यादि अत्रचकर्मकर्मैवसत्कार्य्यकरणाश्रयंकर्मरहितेऽवि क्रियेआत्मनिसर्व्वैरध्यस्तं यतःपण्डितोप्यहं करोमीतिमन्यते अतआत्मसमवेतत यासर्व्वलोकप्रसिद्धेकर्मणिनदीकूलस्थेष्विवतट्स्थेषुगतिःप्रातिलोम्येनातोऽकर्मकर्मा भावंयथाभावमिवतट्स्थेषुयःपश्येत् अकर्मणिचकार्य्यकरणव्यापारोपरमेकर्मवत् आत्मन्यध्यारोपिते तूष्णीमकुर्व्वन्सुखमासे इत्यहङ्काराभिसन्धिहेतुत्वात्तस्मिन् अकर्मणिचकर्म्मयःपश्येत् यएवंकर्माकर्म्मविभागज्ञः स बुद्धिमान् पण्डितो मनुष्येषु स युक्तो योगी कृत्स्नकर्मकृच्च सोऽशुभान्मोक्षितः कृतकृत्यो भवतीत्यर्थः

अयंश्लोकोन्यथाव्याख्यातः कैश्चित्कथंनित्यानांकिल कर्म्मणामीश्वरार्थेऽनुष्ठीय मानानां तत्फलभावादकर्म्माणितान्युच्यन्तेगौण्या वृत्त्या तेषाञ्चाकरणमकर्मत

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

श्चप्रत्यवायफलत्वात् कर्मोच्यते गौण्येवृत्त्यातन्नित्येकर्मणिअकर्मयःपश्येत् फलाभावाद्यथाधेनुरपिगौरगौरुच्यते क्षीराख्यंफलंनप्रयच्छतीतितद्वत्तथानित्याकरणेकर्मणित्वकर्मयःपश्येत् नरकादिप्रत्यवायफलंप्रयच्छतीति नैतत्युक्तंव्याख्यानमेवं ज्ञानादशुभान्मोक्षानुपपत्तेर्यत्ज्ञात्वा मोक्ष्यसेऽशुभादिति भगवतोक्तंवचनं वाध्येत कथंनित्यानामनुष्ठानादशुभात्स्यान्नाममोक्षणं नतुतेषांफलाभावज्ञानान्न हि नित्यानांफलाभावज्ञानमशुभमुक्तिफलत्वेन चोदितं नित्यकर्मज्ञानंवा न चभगवतैवेहोक्तं एतेनाकर्मणिकर्मदर्शनंप्रत्युक्तंनह्यकर्मणिकर्मेतिदर्शनंकर्त्तव्यतयेहचोद्यते नित्यस्यतुकर्त्तव्यतामात्रं नचाकरणान्नित्यस्यप्रत्यवायोभवतीति विज्ञानात्किञ्चित्फलंस्यान्नापिनित्याकरणंज्ञेयत्वेन चोदितं नापिकर्माकर्मेति मिथ्यादर्शनादशुभान्मोक्षणं नचवुद्धिमत्त्वंयुक्तताऽतत्त्वकर्मज्ञादित्यादिचफलमुपपद्यते स्तुतिर्व्वामिथ्याज्ञानमेवहिसाज्ञादशुभरूपं कुतोऽन्यस्मादशुभान्मोक्षणं नहितमस्तमसोनिवर्त्तकंभवति ननुकर्मणिचाकर्मदर्शनं अकर्मणिवाकर्मदर्शनंनतत् मिथ्याज्ञानं किंतर्हिगौणंफलभावाभावनिमित्तंनकर्माकर्मविज्ञानादपिगौणात्फलस्याश्रवणान्नापिश्रुतह्यन्यश्रुतपरिकल्पनयाकश्चिद्विशेषोलभ्यते स्वशब्देनापिशक्यंवक्तुंनित्यकर्मणांफलंनास्त्यकरणाच्चतेषांनरकपातःस्यादिति तत्रव्याजेनपरव्यामोहरूपेणकर्मण्यकर्मयःपश्येदित्यादिनाकिंतत्रैवंव्याचक्षणेनभगवतोक्तंवाक्यंलोकव्यामोहार्थमितिव्यक्तंकल्पितंस्यान्नचैतच्छास्त्ररूपेणवाक्येनरक्षणीयंवस्तु नापिशब्दान्तरेणपुनःपुनरुच्यमानंवस्तुत्वंसुबोध्यंस्यादित्येवंवक्तुंयुक्तंकर्मण्येवाधिकारस्तइत्यत्रहि स्फुटतरउक्तोऽर्थोन पुनर्व्वक्तव्योभवति सर्वत्रचप्रशस्तंसुबोद्धव्यञ्चकर्त्तव्यमेवननिष्प्रयोजनंबोद्धव्यमित्युच्यतेनचमिथ्याज्ञानंबोद्धव्यंभवति तत्प्रत्युपस्थापितञ्चावस्थाभासंनापिनित्यानामकरणाद्भावात् प्रत्यवायोत्पत्तिर्नासतोविद्यतेभाव इतिवचनात् कथमसतःसज्जायेतेति चदर्शितं असतः सज्जन्मप्रतिषेधात्असतःसदुत्पित्तंब्रुवता असदेव सद्भवेत् सद्वाप्यसद्भवेदित्युक्तंस्यात्तद्वाप्ययुक्तं सर्व्वप्रमाणविरोधान्नचनिस्फलंविदध्यात्कर्मशास्त्रं दुःखरूपत्वत्दुःखस्यचवुद्धिपूर्व्वकतयाकार्य्यत्वानुपपत्तेःतदकरणेचनरकपाताभ्युपगमेऽनर्थायैवोभयथापिकरणेऽकरणेचशास्त्रंनिस्फलंकल्पितंस्यात् स्वाभ्युपगमविरोधश्चनित्यंनिष्फलंकर्मेत्यभ्युपगम्यतेमोक्षफलायेति ब्रुवतःतस्माद्यथाश्रुतएवार्थः कर्मण्यकर्मइत्यादेस्तथाचव्याख्यातोऽस्माभिः श्लोकः १८

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

उत्तरश्लोकमाकाङ्क्षापूर्वकमुपादत्ते किंपुनरिति प्रथमपादस्थाच्चशब्दस्यार्थं कथयति कर्मणीत्यादिना द्वितीयपादस्थापिशब्दप्रकाशितमर्थंनिर्दिशति अकर्मणिचेति कर्माभावेयःमर्मपश्यतीति सम्बन्धः प्रवृत्तेरेवकर्मत्वान्निवृत्तेस्तदभावत्वात्तत्रकथंकर्मदर्शनमित्याशंक्यद्वयोरपिकारकाधीनत्वेनाविशेषमभिप्रेत्याह कर्तृतन्त्रत्वादिति प्रवृत्ताविवनिवृत्तावपिकर्मदर्शनमविरुद्धमिति शेषः ननुनिवृत्तेर्ब्रह्मस्वधीनत्वात् कारकनिबन्धनाभावान्नतत्रकर्मदर्शनंयुज्यते तत्राह वस्त्विति क्रियाकारकफलव्यवहारस्यसर्व्वस्याविद्यावस्थायामेवप्रवृत्तत्वाद्वस्तुसंस्पर्शशून्यत्वात् प्रवृत्तिवन्निवृत्तावपियःकर्मपश्यति समनुष्येषुबुद्धिमानिति सम्बन्धःकर्मण्यकर्म अकर्मणिचकर्मपश्यतोबुद्धिमत्वंयुक्तंसमस्तकर्मकृतञ्चकथमित्याशंक्याहइतिस्तूयतइति श्लोकस्थशब्दोत्येर्थेदर्शिते तात्पर्य्यार्थापरिज्ञानान्मिथो विरोधं शङ्कते नन्विति कथमिदंविरुद्धमित्याशंक्याह कर्मणीति विषयसप्तमीवाख्यादधिकरणसप्तमीवेति विकल्पाद्योऽन्याकारंज्ञानमन्यावलम्बनमिति स्पष्टोविरोधःस्यादित्याह नहीति अन्यस्यान्यात्मतायोगात् कर्माकर्मणोरभेदासम्भवादकर्माकारंकर्मावलम्बनंज्ञानमयुक्तमित्यर्थः द्वितीयंदूषयति तत्रेति कर्मण्यधिकरणेततो विरुद्धमकर्मथकमाधेयंद्रष्टाद्रष्टुमीष्टेनहि कर्माकर्मणोर्मिथोविरुद्धयोराधाराधेयभावःसम्भवतीत्यर्थः विषयसप्तमीमुपेत्य सिद्धान्तीपरिहरति नन्वकर्मैवेतिलोकस्यमूढदृष्टेर्व्विवेकवर्ज्जि तस्यपरमार्थतो ब्रह्माकर्माक्रियमेवसत् भ्रान्त्या कर्मसहितं क्रियावदिवप्रतिभातीत्यक्षरार्थःपरस्पराध्याससमुपेत्योक्तं तथेति यथाखल्वकर्मब्रह्मकर्मवदुपलभ्यते तथाकर्मसक्रियमेवद्वैतमक्रिये ब्रह्मण्यधिष्ठानेसंसृष्टं तद्वज्ञातीत्यक्षरयोजना कर्माकर्मण्योरितरेतराध्यासेसिद्धे सम्यग्दर्शनसिद्ध्यर्थंभगवोवचनमुचितमित्याह तत्रेति यथायदिदंरजतमिति प्रतिपन्नंतदिदानींसुक्तिसकलं पश्येति भ्रमसिद्धरजतरूपविषयानुवादेन तदधिष्ठानं सुक्तिमात्रमुपदिश्यते तथाभ्रमसिद्धकर्म्माद्यात्मकविषयानुवादेन तदधिष्ठानं कर्मादिरहितं कूटस्थंब्रह्मभगवता व्यपदिश्यते तथाचभगवद्वचनमविरुद्धमित्याह अतइति इतश्चाध्यारोपितकर्माद्यनुवादपूर्व्वकंतदधिष्ठानस्य कर्मादिरहितस्य निर्व्विशेषस्यब्रह्मणोभगवता बोध्यमानत्वान्नतत्रविरोधाशङ्कावकाशो भवतीत्याह बुद्धिमत्त्वादिति कूटस्थात् ब्रह्मणोन्यस्य सर्व्वस्य मायामात्रत्वात् अन्यज्ञानाद्बुद्धिमत्त्वयुक्तत्वसर्व्वकर्म्मकृत्वाना

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

मनुपपत्तेरत्रच बुद्धिमानित्यादिना बुद्धिमत्वादिनिर्देशात्ब्रह्मज्ञानादेवतदुपपत्तेः सर्वविक्रियारहितं ब्रह्मज्ञानमेव विवक्षितमित्यर्थः बोधशब्दस्य सम्यग्ज्ञाने प्रसिद्धत्वात् कर्माकर्मविकर्मणां स्वरूपं बोद्धव्यमस्तीतिवदता सम्यग्ज्ञानोपदेशस्य विवक्षितत्वादपि कूटस्थंब्रह्मात्राभिप्रेतमित्याह बोद्धव्यमिति फलवचनपर्य्यालोचनायामपि कूटस्थंब्रह्मात्राभिप्रेतं प्रतिभातीत्याह नचेति सम्यग्ज्ञानाधीनफलश्रवनश्रुतमित्याशंक्याह यत्ज्ञात्वेति अध्यारोपापवादार्थं भगवद्वचनमविरुद्धमित्युपपादितमुपसंहरति तस्मादिति तद्विपर्य्ययेत्यत्र तच्छब्देन प्राणिनोगृह्यन्ते विषयसप्तमीपरिग्रहेण परिहारमभिधायाधिकरणसप्तमीपक्षेदर्शितं दूषणमङ्गीकारेणपरिहरति नचेति व्यवहारभूमिरत्रेत्युच्यते योग्यत्वे सत्यनुपलब्धेरित्यर्थः अकर्माधिरणंकर्मनसम्भवतीत्यत्रहेत्वन्तराह कर्माभावत्वादिति नहितुच्छस्याधिकरणत्वं क्वचिद्दृष्टमिष्टम्बेत्यर्थः निरूप्यमाणे कर्माकर्मणोरधिकरणाधिकर्त्तव्यभावासम्भवेफलितमाह अतइति शास्त्रपरिचयविरहिणामध्यारोपमुदाहरति यथेति कर्माकर्मणोरारोपितत्वमुक्तमन्यमानःशङ्कते नन्विति कर्म कर्मैवेत्यत्राकर्म चाकर्मैवेतिद्रष्टव्यं बिमतं सत्यमव्यभिचारित्वात्ब्रह्मवदित्यर्थः तत्रकर्म तत्वतो नाव्यभिचारि कर्मत्वान्नौस्थस्य तटस्थद्रुगमनवदित्यव्यभिचारित्वं कर्मण्यसिद्धमिति परिहरति तत्रेति अकर्मचतत्त्वतो नाव्यभिचारि कर्माभावत्वात् दरप्रदेशे चैत्रमैत्रादिषुगच्छत्स्वेवचक्षुषा सन्निधानविधुरेषु दृश्यमानगत्यभावादित्याह दूरइति दूरत्वादेव विशेषतःसन्निकर्षविरहितेषु तेषु स्वरूपेण चक्षुसन्निकृष्टेषु चक्षुषागत्यभावदर्शनादिति योजना गतिरहितेषु तरुषु गतिदर्शनवत्प्रकृते ब्रह्मण्यविक्रिये कर्मदर्शनं सक्रियेच द्वैतप्रपञ्चेचितिमत्सुचैत्रादिषु गत्यभावदर्शनवत् कर्माभावस्य विपरीतदर्शनंयेनहेतुना सम्भवति तेनतस्यविपरीतदर्शनस्य निरासनार्थंभगवद्वचनमिति दार्ष्टान्तिकंनिगमयति एवमित्यादिना ननुकर्म तदभावयोरारोपितत्वादविक्रियस्य ब्रह्मणोज्ञानमात्राभिप्रेतंचेदव्ययोयमचिन्त्योयं नजायते म्रियते वेत्यादिनापौनरुक्त्यं प्राप्तं तत्रैवब्रह्मात्मनोनिर्विकारत्वस्योक्तत्वादिति तत्राह तदेतदिति तदेतदात्मनिशङ्कितं सक्रियत्वमसद्ब्रह्मप्रतिवचनमपिनिर्विकारात्मवस्त्वपेक्षयात्यन्तविपरीतदर्शनंमिथ्याज्ञानंतेनभाविवंतत्संस्कारप्रचयवत्त्वंततोतिशयेनमोहमापद्यमानोशोकःश्रुतपितत्वंविस्मृत्यपुनर्यत्किञ्चित्प्रसङ्गमापाद्यसक्रियत्वमेवात्मनश्चोदयतीतिपुनःपुनरुक्त

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

त्वभूतमुत्तरंभगवानभिधत्तेवस्तुनश्चद्रर्व्विज्ञेयत्वात्पुनःपुनःप्रतिपादनंतत्तद्भ्रमनिरा
करणार्थमुपयुज्यते तथाचनास्ति पुनरुक्तिरित्यर्थः असक्तदुक्तप्रतिवचनमेवानु
वदति अव्यक्तोयमिति कर्म्माभावउक्तइति सम्बन्धः उक्तस्य नजायते म्रियते
वाविपश्चिदित्यादिश्रुतौ प्रकृतस्मृतावसङ्गत्वादिन्यायेनच प्रसिद्धत्वमस्तीत्याह श्रु
तीति नकेवलमुक्तः कर्म्माभावः किन्तु सर्व्वकर्माणिमनसा संन्यस्येत्यादौ वक्ष्य
माणश्चेत्याह वक्ष्यमाणश्चेति ननुकर्मणांदेहादिनिर्व्वर्त्तकत्वेन वैविध्यात् कूट
स्थस्वभावस्यात्मनोऽसङ्गत्वात्तद्व्यापाररूपस्य कर्मणोऽप्रसिद्धत्वात् नतस्मिन्नक
र्मणि विपरीतस्य कर्मणोदर्शनं सिध्यतीत्याशंक्याह तस्मिन्निति कर्म्मैवविपरीतं
तस्यदर्शनमिति यावत् अहंकर्त्तेत्यात्मसमानाधिकरणस्य व्यापारस्यानुभवात् क
र्मभ्रमस्तावदात्मन्यत्यन्तरूढोस्तीत्यर्थः आत्मनि कर्मविभ्रमोस्तीत्यत्रहेतुमाह य
तइति आत्मनो निःक्रियत्वेकुतस्तस्मिन् यथोक्तोविभ्रमः सम्भवेदित्याशंक्याह दे
हेति इदानीमात्मन्यकर्मभ्रममुदाहरति तथेत्यादिना यथासुतौ स्वाभाविक
मरूप्यत्वंरूप्यत्वमारोपितं तदभावोप्यारोपयत्पातीतथात्मनोपिस्वाभाविकमवि
क्रियत्वं पुनरध्यस्यंतदभावत्वात् कर्माभावोप्यध्यस्तएवेतिमन्वानःसन्नुपसंहरति त
त्रेदमिति आत्मनिकर्मादिविभ्रमेलौकिकेसिद्धेसति एवंकर्मणीत्यादिवचनं त
त्परिहारार्थंभगवानुक्तवानित्यर्थः सम्प्रत्युक्तेऽर्थे श्लोकाक्षरसमन्वयं दर्शयितुं
कर्मणीत्यादि व्याचिख्यासुः भूमिकांकरोति अत्रचेति व्यवहारभूमौ कार्य्यकार
णाधिकरणं कर्म स्वेनैवरूपेण व्यवस्थितं सदात्मन्यविक्रियेकार्य्यकरणारोपणद्वा
रेण सर्व्वैरारोपितमित्यत्रहेतुमाह यतइति अविवेकिनान्तुकर्त्तृत्वाभिमानः
सुतरामिति वक्तुमपिशब्दः आत्मनि कर्मरहिते कर्मारोपेदृष्टान्तमाह नदीति
एवमात्मनि कर्मारोपमुपपाद्य प्रथमपादं व्याचष्टे अतइति आरोपवशादात्मनि
ष्ठत्वेन कर्मणि सर्व्वलोकप्रसिद्धे कर्मभावं यःपश्येत्सबुद्धिमानितिसम्बन्धः अ
कर्मदर्शनस्य यथाभूतत्वं सम्यक्त्वं तत्रदृष्टान्तमाह गत्यभावमिवेति द्वितीयपा
दंव्याकरोति अकर्मणिचेति अध्यारोपभभिनयति तूष्णीमिति अकर्मणि कर्म
दर्शनेयुक्तिमाह अहङ्कारेति पूर्व्वार्द्धेनोक्तमनूद्योत्तरार्द्धं विभजते यएवमिति
आत्मनि कार्य्यकरणसंघातसमारोपद्वारेणतद्व्यापारमात्रेकर्मणिशुक्तिकायामिव
रजतमारोपितेविषयेतदभावमकर्म्मवस्तुतोयोरजताभाववदनुभवति अकर्म्मणिच

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

संघातव्याप्रारोपरमेतद्वारा स्वात्मन्यहंतूष्णीमासेसुखमित्यारोपितेगोचरेकर्म्मा हङ्कारहेतुकंयस्तत्त्वतोमन्यतेसरूप्यदभावविभागहीनशुक्तिमात्रवदात्ममात्रंकर्म्मत दभावविभागशून्यंकूटस्थंपरमार्थतोवगच्छन् बुद्धिमानित्यादिस्तुतियोग्यतांगच्छती त्येवंस्वाभिप्रायेणश्लोकंव्याख्याय अत्रवृत्तिकारव्याख्यानमुत्थापयति अयमिति अ न्यथाव्याख्यानमेवप्रश्नद्वाराप्रकटयति कथमित्यादिना ईश्वरार्थेनानुष्ठानेफलाभाव वचनंव्याहतमितिमत्वाह किलेति नित्यानामकर्म्मत्वमप्रसिद्धमित्याशंक्यफलरा हित्यगुणयोगात्तेष्वकर्म्मत्वव्यवहारःसिध्यतीत्याह गौण्येति नित्यानामकरणंमुख्य वृत्त्यैवाकर्म्मशब्दवाच्यमित्याह तेषाञ्चेति तत्रकर्म्मशब्दस्यप्रत्यवायाख्यफलहेतुत्व गुणयोगात् गौण्येववृत्त्याप्रवृत्तिरित्याह तच्चेति प्रातनिकामेवंकृत्वाश्लोकाक्ष राणिव्याचष्टे तत्रेत्यादिना अकर्मणिचेत्यादिव्याकरोति तथेति सबुद्धिमानि त्यादिपूर्ववत् परकीयंव्याख्यानंव्युदस्यति नैतदिति नित्यंकर्माकर्मनित्याक रणंकर्नेतिज्ञानात् दुरितनिवृत्त्यनुपपत्तेर्भगवद्वचनं वृत्तिकारमतेवाधितं स्यादि त्यर्थः धर्मेणपापमपनुदतीतिश्रुतेर्नित्यानुष्ठानात् दुरितनिवर्हणप्रसिद्धेस्त दनुष्ठानस्यफलान्तराभावात्तदकर्मेति ज्ञात्वानुष्ठानेक्रियमाणेकथमशुभस्यचयोनेति शङ्कते कथमिति क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिःपरमामतेतिस्मरणात् कर्मणात्य न्तिकाशुभक्षयाभावेपशङ्कीकृत्य परिहरति नित्यानामिति नित्यानुष्ठानादशुभक्ष येपिनास्मिन्प्रकरणेतद्विवक्षितं यत्ज्ञात्वामोक्ष्यसेऽशुभादितिज्ञानादशुभक्षयस्य प्रतिज्ञातत्वान्नचतज्ज्ञानफलाभावविषयमेषितव्यमित्याह नत्विति अशुभस्य फलाभावाज्ज्ञानकार्य्यत्वाभावात् नफलाभावज्ञानात्क्षयःसिध्यतीत्यर्थः किञ्चाती न्द्रियोर्थःशास्त्रान्निश्चीयते नचनित्यकर्मणांफलाभावज्ञानादशुभनिवृत्तिरित्यत्र शा स्त्रमस्तीत्याह नहीति नित्याकरणंकर्मेतिज्ञानमपिनाशुभनिवृत्तिफलत्वेनचोदि तमस्तीत्याह नित्यकर्मेति भगवद्वचनमेवात्रप्रमाणमित्याशंक्याह नचेति साधारण मेवयत्ज्ञात्वेत्यादिभगवतोवचनंनतुनित्यानांफलाभावंज्ञात्वेतिविशेषविषयमित्यर्थः अशुभमोक्षणासम्भवप्रदर्शनेनकर्मण्यकर्मदर्शननिराकरणन्यायेनाकर्मणिकर्मदर्श नंनिराकरोति एतेनेति नामादिषुफलायत्रज्ञदृष्टिवदकर्मण्यपिफलार्थंकर्मदृष्टिवि धानाच्चाशुभमोक्षणानुपपत्तिरित्याशंक्याह नहीति अत्रहि श्लोकेनित्यस्यकर्त्तव्य तामात्रंपरमतेविवक्षितमतश्चाकर्मणिकर्मदर्शनंविधीयते तत्फलायेतिकल्पनाप

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

रस्यसिद्धान्तविरुद्धेत्याह नित्यस्यत्विति परमतेपिनित्यस्य कर्त्तव्यमात्रमत्रश्लोकेन विवक्षितंकिन्तुनित्यानुष्ठानेप्रवृत्तिसिद्ध्यर्थंनित्याकरणात्प्रत्यवयोभवतीतिज्ञानमपि कर्त्तव्यत्वेनात्रविवक्षितमेवेत्याशंक्याह नचेति नतावत्प्रवृत्तिरस्यविज्ञानस्यफलंनि योगादेवतदुपपत्तेर्नापिफलान्तरमनुपलम्भादतोऽफलत्वादकरणात् प्रत्यवायोभ वतीति ज्ञानं नात्रकर्त्तव्यत्वेन विवक्षितमित्यर्थः किञ्चाकरणेकर्मदृष्टिविधावकर णस्यालम्बनत्वेनप्रधानत्वात् ज्ञेयत्वं वक्तव्यं तच्च तुच्छत्वादनुपपन्नमित्याह नापीति अकरणस्यासतो नामादिवदाश्रयत्वेन दर्शनासम्भवेपि सामानाधिकरण्येनेदं रज तमितिवद्दर्शनंभविष्यतीत्याशंक्याह नापिकर्मेति आदिशब्देनसर्वोत्कर्षादिगृह्यते फलवत्त्वंस्तुतिर्वासम्यग्ज्ञानस्ययुक्तंनमिथ्याज्ञानस्यानुपपत्तेरित्यर्थः स्वप्नेमिथ्याज्ञा नमपिफलवदुपलब्धमित्यशंक्यमिथ्याज्ञानस्याशुभाविरोधित्वान्नतस्मात्तन्निवृत्तिरि त्याह मिथ्याज्ञानमेवेति अशुभादेवाशुभानिवृत्तौदृष्टान्तेनाह नहीनि अविवेपूर्व कमिदंरजतमितिसदसतोः सामानाधिकरण्याज्मिथ्याज्ञानंयुक्तं कर्माकर्मणोस्तवि वेकेनभासतोसामानाधिकरण्याधीनंज्ञानंसिंहदेवदत्तयोरिवगौणंनमिथ्याज्ञानं इतिशङ्कते नन्विति कर्म्माकर्म्मेतिदर्शनेफलाभावोगुणःअकर्म्मकर्म्मेतिदर्शनेतुफला भावोगुणस्तन्निमित्तमिदंज्ञानंगौणमित्याह फलेति यथोक्तज्ञानस्यगौणत्वेपिप्रामा णिकफलाभावापन्नतद्गौणतोचितेतिदूषयति नेत्यादिना कर्म्माकर्मेत्यादिगौणविज्ञा नोपन्यासव्याजेननित्यकर्म्मकर्त्तव्यतया विवक्षितत्वाद्गौणज्ञानस्याफलत्वमदूषणमि त्याशंक्याह नापीति ज्ञानादशुभमोक्षणस्याश्रुतस्यहानिरश्रुतस्यनित्यानुष्ठानस्य कल्पनेत्यनेनव्यापारगौरवेणनकश्चिद्विशेषःसिध्यतीत्यर्थः उक्तमेवप्रपञ्चयति स्वश ब्देनेति नरकपातःस्यादतोविधेरेवानुष्ठेयानितानीतिशेषः यथोक्तवाचकशब्दप्र योगादेवापेक्षितार्थसिद्धिसम्भवेभगवतोव्याजवचनकल्पनमनुचितमित्याह तत्रेति प्रकृतेश्लोकेवृत्तिकृतांव्याख्यानेन परमाप्तस्यैवभगवतोविप्रलम्भकत्वमापादितमि तितदीयंव्याख्यानमुपेक्षितव्यमितिफलितमाह तत्रैवमिति नित्यकर्म्मानुष्ठानसिद्ध र्थंव्याजरूपमितिभगवद्वचनमुचितमित्याशंक्यस्वशब्देनापीत्यादिप्रागुक्तपरिपाट्या पितदनुष्ठानबोधनसम्भवान्नैवमित्याह नचैतदिति वस्तुशब्देननित्यकर्मानुष्ठानमु च्यते यथात्मप्रतिपादनंसुबोधत्वसिद्ध्यर्थंपौनःपुन्येनक्रियते तथानित्यानामपिकर्म णामनुष्ठानंकर्म्मण्यकर्मेत्यादिशब्दान्तरेनोच्यमानंसुबोधस्यादितिभगवतःशब्दान्त

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

रंयुक्तमित्याशंक्यतस्यनित्यानुष्ठानवाचकत्वाभान्नैवमित्याह नापीति किञ्चपूर्व्वमे वनित्यानुष्ठानस्यसृष्टमुपदिष्टत्वान्नतस्यसुबोधनार्थंशब्दान्तरमपेक्षितमित्याह कर्म ण्येवेति कर्माकर्मादिविज्ञानव्याजेननित्यकर्मानुष्ठानकर्त्तव्यतायांतात्पर्यमित्येतन्नि राकृत्यकर्माकर्मादिदर्शनंगौणमितिपक्षेदूषणान्तरमाह सर्व्वत्रचेति लोकेवेदेचय थाप्रशस्तंदेवतादितत्त्वं यज्ञकर्त्तव्यमनुष्ठानार्हमग्निहोत्रादितदेववोढ्व्यमित्युच्यते ननिष्फलंकाकदन्तादिकर्मण्यकर्मदर्शनं अकर्मणिचकर्मदर्शनंगौणत्वादेवाप्रशस्तम कर्त्तव्यञ्चनातस्तद्वोढ्व्यमिति वचनमर्हतीत्यर्थः किञ्चकर्मादेर्मायामात्रत्वाद्गौणम पितद्विषयंज्ञानंमिथ्याज्ञानमिति नतस्यवोढ्व्यत्वसिद्धिरित्याह नचेति मिथ्याज्ञा नस्यवोढ्व्यत्वाभावेपितद्विषयस्यवोढ्व्यतासिध्येदित्याशंक्यवस्तुभासत्वान्नैवमित्याह तत्प्रत्युपस्थापितञ्चेति यत्पुनरकरणस्यप्रत्यवायहेतुत्वंअकरणेगौण्यावृत्त्याकर्म शब्दप्रयोगेनिमित्तमिति तद्दूषयति नापीति अकरणात्प्रत्यवायोभवतीत्यत्रश्रुतिस्मृ तिविरोधमभिधाययुक्तिविरोधमभिदधाति असतइति असतःसद्रूपेणभवनमभव नञ्चनिःस्वरूपत्वादनुपपन्नं निरस्तसमस्ततत्त्वस्यकिञ्चित्त्वाभ्युपगमेसर्व्वप्रमाणा नामप्रामाण्यप्रसङ्गादित्याह तञ्चेति यत्तुनित्यानांफलराहित्यंतत्राकर्मशब्दप्रयोगे निमित्तमिति तन्निरस्यति नचेति नकेवलं विध्युद्देशे स्वफलाभावान्नित्यानां विध्य नुपपत्तिरपितुधात्वर्थस्यक्लेशात्मकत्वात्तत्र श्रुतफलभावेनैवविधिरवकाशमासाद येदित्याह दुःखेति दुःखरूपस्यापिधात्वर्थस्यसाध्यत्वेनकार्य्यत्वात्तद्विषयोविधिःस्या दितिचेन्नेत्याह दुःखस्यचेति स्वर्गादिफलाभावेपि नित्यानामकरणनिमित्तनिरय निवारार्थंदुःखरूपाणामपि स्यादनुष्ठेयत्वमित्याशंक्याह तदकरणेचेति फलान्त राभावेपिमोक्षसाधनत्वात्मुमुक्षुणानित्यानिकर्माणिअनुष्ठेयानि इत्याशंक्याह स्वाभ्युपगमेति वृत्तिकारव्याख्यानासम्भवेफलितमुपसंहरति तस्मादिति कोसौय थाश्रुतोर्थःश्लोकस्येत्याशंक्याह तथाचेति १८

स्वामिकृतटीका ।

तदेवकर्मादीनांदुर्व्विज्ञेयत्वंदर्शयन्नाह कर्मणीति परमेश्वराराधनल क्षणेकर्मणिकर्मविषयेअकर्मकर्मेदंनभवतीतियःपश्येत्तस्यज्ञानहेतुत्वेन बन्धकत्वा भावात् अकर्मणिचविहिताकरणेकर्मयःपश्येत्प्रत्यवायोत्पादकत्वेनबन्धहेतुत्वात्

CC-0. In Public Domain. Digitized by eGangotri

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः १९

स्वामिकृतटीका

मनुष्येषुकर्मकुर्वाणेषुसबुद्धिमान्व्यवसायात्मकबुद्धिमत्ताच्छ्रेष्ठःतंप्रस्तौति सयुक्तोयोगी तेनकर्म्मणाज्ञानयोगावाप्तेःसएवकृत्स्नकर्म्मकर्त्ताचसर्वतःसंप्लुतोदकस्थानीयेचतस्मिन्कर्मणिसर्व्वकर्मफलानामन्तर्भावात् तदेवमारुरुक्षोःकर्मयोगाधिकारावस्थायां नकर्मणामनारम्भादित्यादिनोक्तःएवकर्मयोगःसृष्टीकृतस्तत्प्रपञ्चरूपत्वाच्चास्यप्रकरणस्यनपौनरुक्त्यदोषः अनेनैवयोगारूढावस्थायांयस्त्वात्मरतिरेवस्यादित्यादिना यः कर्म्मानुपयोग उक्तस्तस्याप्यर्थात् प्रपञ्चकृतोवेदितव्यः तदारुरुक्षोरपिकर्म्मबन्धकंनभवति तदारूढस्यकुतो बन्धकं स्यादित्यत्रापिस्रोकोयुज्यते यद्वाकर्मणि देहेन्द्रियादिव्यापारे वर्त्तमानेऽप्यात्मनो देहादिव्यतिरेकानुभवेनअकर्मस्वाभाविकंनैष्कर्म्म्यमेव यः पश्येत् तथाअकर्मणिचज्ञानरहिते दुःखबुद्ध्याकर्मणांत्यागे कर्म यः पश्येत्तस्यप्रयत्नसाध्यत्वेन मिथ्याचारत्वात् तदुक्तं कर्मेन्द्रियाणि संयम्येादिना य एवंभूतः सतु सर्व्वेषुमनुष्येषु बुद्धिमान् पण्डितः तत्र हेतुर्यतः कृत्स्नानिसर्व्वाणियदृच्छया प्राप्तानिआहारादीनिकर्म्माणिकुर्व्वन्नपि सयुक्तएवअकर्तात्मज्ञानेनसमाधिस्थएवेत्यर्थः अनेनैवज्ञानिनःस्वभावादापन्नं कलञ्जभक्षणादिकं न दोषाय अज्ञस्यतुरागतः कृतं दोषायेति विकर्मणोऽपितत्तं निरूपितं द्रष्टव्यं १८

भाषाअनुवाद

अवकर्मण्यकर्मयःपश्येत् इससोकसेश्रुतिकातात्पर्जअर्थजोकहा सोईपांच श्लोकसेस्पष्टकरकेकहते हैं किजिसकेसबसमारम्भकहे कर्मकामसंकल्पवर्जित अर्थात् कामनारहितहैं उसीकोबुधकहे बुद्धिमानलोग पण्डितकहतेहैं जिससे कर्मअनुष्ठानकेद्वारा शुद्धचितहोनेसे प्रगटभयेज्ञानअग्निसे सकलकर्मदग्धहोजातेहैं फेरिकर्मबन्धउसकोनहींहोताहै औरज्ञानआरूढ़अवस्थामे कामकाअर्थ कर्मफल औरउसकेअर्थ यहकर्महमकोकरनाउचितहै परन्तु ज्ञानआरूढ़पुरुष इनदोनोसेभीरहितहै सोईकहा किजिसकेसबसमारम्भकामनारहित हों सो पण्डित है १९

CC-0. In Public Domain. Digitized by eGangotri

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः
कर्मण्यभिप्रवृत्तोपि नैव किञ्चित् करोति सः २०

शाङ्करभाष्यं।

तदेतत् कर्मण्यकर्मादिदर्शनंस्तूयते यस्येति यस्ययथोक्तदर्शिनःसर्व्वेयावन्तः समारम्भाःसर्व्वाणिकर्म्माणिसमारभ्यन्तेइति समारम्भाःकामसङ्कल्पवर्जिताःकामैस्तत्कारणैश्चसङ्कल्पैर्व्वर्जिताः मुधैवचेष्टामात्रानुष्ठीयन्ते प्रवृत्तेनचेल्लोकसंग्रहार्थंनिवृत्तेनचेत्जीवनमात्रार्थंतज्ज्ञानाग्निदग्धकर्म्माणंकर्म्मादावकर्म्मादिदर्शनं ज्ञानंतदेवाग्निस्तेनज्ञानाग्निनादग्धनिशुभाशुभलक्षणानि कर्म्माणियस्यतमाहुःपरमार्थतः पण्डितं बुधाःब्रह्मविदः १९

आनन्दगिरिकृतटीका

कर्मण्यकर्मदर्शनंपूर्व्वोक्तंस्तोतुमुत्तरश्लोकं प्रस्तौति तदेतदिति यथोक्तदर्शित्वंपूर्वोक्तदर्शनसम्पन्नत्वं समारम्भशब्दस्यकर्मविषयत्वं नरूढ्याकिन्तुव्युत्पत्त्येत्याह समारभ्यन्तइतीति कामसङ्कल्पवर्जितत्वे कथंकर्मणामनुष्ठानमित्याशंक्याह मुधैवेति उद्देशफलाभावेतेषामनुष्ठानंयादृच्छिकंस्यादित्याशंक्यप्रवृत्तेननिवृत्तेनवा तेषामनुष्ठानंयादृच्छिकंस्यादिति विकल्पक्रमेणनिरस्यति प्रवृत्तेनेत्यादिना ज्ञानाग्नीत्यादिविभजतें कर्मादाविति यथोक्तज्ञानंयोग्यमेवदहति नायोग्यमिति विवक्षितत्वात्तस्मिन्नग्निपदं यथोक्तविज्ञानविरहिणामपि वैशेषिकादीनांपण्डितत्वाप्रसिद्धिमाशंक्य तेषांपण्डिताभासत्वं विवक्षित्वाविशिनष्टि परमार्थत इति १९

स्वामिकृतटीका।

कर्मण्यकर्मयः पश्येदित्यनेनश्रुत्यर्थापत्तिभ्यांयदुक्तमर्थद्वयं तदेवस्पष्टयति यस्येतिपञ्चभिः सम्यगारभ्यन्तइति समारम्भाःकर्म्माणिकाम्यतइति कामःफलं

भाषा अनुवाद।

औरसर्व्वकर्मतथाकर्मकेफलमेआसक्तिछोडकर नित्यआनन्दरूपआत्मामे सन्तुष्टमनुष्य अप्राप्तवस्तुकीचेष्टा औप्राप्तकापालन इनदोनोसेदूरहैं इसीसेवे कोईकर्ममेप्रवृत्तहोयं परउनकावहकर्मकर्मनहींहैं अर्थात् उसके सबकर्मअकर्मताकोप्राप्तहैं सोईकहतेहैं किकर्मकेफलऔसंग जोआसक्ति तिसेछोडि नित्यसुखआत्मसेतृप्त वेपरवाह जोकर्ममेप्रवृत्तभीहैं परवह कुछभीनहीं करताहै यहजानो २०

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

यस्त्वकर्मादिदर्शीसोऽकर्मादिदर्शनादेवनिःकर्मासंन्यासीजीवनमात्रार्थचेष्टःसन् कर्मणिनप्रवर्त्तते यद्यपिप्राग्विवेकतः प्रवृत्तःयस्तुप्रारब्धकर्मासन्उत्तरकालमुत्प न्नात्मसम्यग्दर्शनःस्यात् सकर्मणिप्रयोजनमपश्यन्ससाधनंकर्मपरित्यजत्येवसकृत श्चिन्निमित्तात् कर्म्मपरित्यागासम्भवेसति कर्मणितत्फलेचसङ्गरहिततयास्वप्रयो जनाभावाल्लोकसंग्रहार्थंपूर्ववत् कर्मणिप्रवृत्तोपिनैवकिञ्चित्करोति ज्ञानाग्निद ग्धकर्मत्वात् तदीयंकर्माकर्मैवसम्पद्यतइत्येतदर्थंदर्शयिष्यन्नाह त्यक्त्वेति त्यक्त्वाकर्म स्वभिमानं फलासङ्गञ्चयथोक्तेज्ञानेनित्यतृप्तोनिराकांक्षोविषयेष्वित्यर्थोनिराश्रय आश्रयरहितआश्रयोनामयदाश्रित्यपुरुषार्थंससाधयिष्यति दृष्टादृष्टफलसाधना श्रयरहितइत्यर्थःतेनैवसूतेनस्वप्रयोजनाभावात्ससाधनंकर्मपरित्यक्तव्यमेवेति प्रा प्तेततोनिर्गमासम्भवात् लोकसंग्रहचिकीर्षयाभिष्टविगर्हणापरिजिहीर्षयावापूर्व वत् कर्मण्यभिप्रवृत्तोऽपिनिःक्रियात्मदर्शनसम्पन्नत्वान्नैवकिञ्चित् करोतिसः २०

आनन्दगिरिकृतटीका।

विवेकात् पुर्व्वंकर्मणिप्रवृत्ताबपिसतिविवेके तत्र नप्रवृत्तिरित्याशंक्याङ्गी करोति यस्त्विति विवेकात् पूर्व्वमभिनिवेशेनप्रवृत्तस्यविवेकानन्तरमभिनिवेशा भावात् प्रवृत्तप्रसम्भवेपिजीवनमात्रसुहिश्यप्रवृत्याभासःसम्भवतीत्यर्थःसत्यपिवि वेकेतत्तत्साक्षात्कारानुदयात् कर्मणिप्रवृत्तस्यकथंतत्त्यागःस्यादित्याशंक्याह यस्तुप्रा रब्धेति त्यक्त्वेत्यादिसमनन्तरश्लोकमवतारयितुंभूमिकांकृत्वातदवतारणप्रकारंद र्शयति सकृतश्चिदिति लोकसंग्रहादिनिमित्तंविवक्षितंकर्मपरित्यागासम्भवेसतित स्मिन्प्रवृत्तोपिनैवकरोतिकिञ्चिदितिसम्बन्धः कर्म्मणिप्रवृतोनकरोतिकर्म्मेतिकथ मुच्यतेतत्राह स्वप्रयोजनाभावादितिकथंतर्हिकर्मणिप्रवर्त्ततेतत्राह लोकेतिप्रवृत्ते रर्थक्रियाकारित्वाभावंपश्यादिभिश्चाविशेषादितिन्यायेनव्यावर्तयति पूर्ववदितिक थंतर्हिविवेकिनामविवेकिनाञ्चविशेषःस्यादित्याशंक्यकर्मादौसङ्गासङ्गाभ्यामित्याह कर्मणीति उक्तेर्थेसमनन्तरश्लोकमवतारयति ज्ञानाग्नीतिएतमर्थंदर्शयिष्यन्निमं

स्वामिकृतटीका।

तत्सङ्कल्पेनवर्जिता यस्यभवन्ति तं पण्डितमाहुः अत्र हेतुर्यतस्तैःसमारम्भैःशुद्धे चित्ते सति जातेनज्ञानाग्निना दग्धानि अकर्मता नीतानिकर्माणियस्यतं आरू ढ़ावस्थायां तुकामःफलहेतुविषयःतदर्थमिदं कर्त्तव्यमिति कर्त्तव्यविषयःसङ्कल्प स्ताभ्यांवर्जितां शेषंस्पष्टं १९

CC-0. In Public Domain. Digitized by eGangotri

निराशीर्यतचित्तात्माव्यक्तसर्वपरिग्रहः शारीरंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषं २१

शाङ्करभाष्यम्

यःपुनःपूर्वोक्तविपरीतः प्रागेवकर्मारम्भाद्ब्रह्मणिसर्वान्तरे प्रत्यगात्मनिनिष्क्रियेसञ्जातात्मदर्शनःसदृष्टादृष्टेर्विषयाशीर्विवर्जिततया इष्टादृष्टार्थेकर्मणिप्रयोजनमपश्यन् ससाधनंकर्मसंन्यस्यशरीरयात्रामात्रचेष्टोयतिर्ज्ञाननिष्ठोमुच्यत इत्येतमर्थंदर्शयितुमाह निरिति निराशीर्निर्गताः आशिषो यस्मात्सनिराशीःयतचित्तात्माचित्तमन्तःकरणमात्मावाङ्मनः कार्य्यकरणसंघातस्यावुभावपि यतौसंयतौ

आनन्दगिरिकृतटीका ।

श्लोकमाहेतियोजनायथोक्तंज्ञानंकूटस्थात्मदर्शनंतेनस्वरूपभूतंसुखंसाक्षादनुभूयकर्मणितत्फलेचसङ्गमपास्यविषयेषुनिरपेक्षश्चेष्टतेविद्वानित्याह त्यक्त्वेत्यादिदृष्टसाधनमपेक्षस्यकुतोनिरपेक्षत्वमित्याशंक्यविशिनष्टि निराश्रयइतियदाश्रित्येतियच्छब्देनफलसाधनमुच्यतेआश्रयरहितंइत्यस्यार्थंस्पष्टयति दृष्टेतितेनज्ञानवतापुरुषेणैवंभूतेनत्यक्त्वाकर्मफलासङ्गमित्यादिनाविशेषितेनेत्यर्थःततःसमाधानात्कर्मणःसकाशादितियावत् निर्गमासम्भवेहेतुमाह लोकेत्यादिनापूर्ववत्ज्ञानोदयात्प्रागवस्थायामिवेत्यर्थमभिप्रेत्योपिलोकदृष्ट्येतिशेषःनैवकरोतिकिञ्चिदितिस्वदृष्टेतिद्रष्टव्यं २०

स्वामिकृतटीका ।

किञ्चत्यक्त्वेति कर्मणितत्फलेचासङ्गंत्यक्त्वानिजानन्देनतृप्तःअतएवयोगक्षेमार्थमाश्रयणीयरहितः एवंभूतोयःस्वाभाविकेविहिते वा कर्मणि अभितः प्रवृत्तोऽपि किञ्चिदपिनैवकरोति तस्यकर्मअकर्मतामापद्यत इत्यर्थः २०

भाषा अनुवाद ।

विक्षेपकारीकर्म्महींकोतो शास्त्रबन्धनकाहेतु कहतेहैं और आपने कर्म्मकीप्रसंशाकरिजनकादिकोदृष्टान्तदेखाय प्रथमअवस्थामेअधिकारऔरज्ञानप्राप्तभयेभीनिरहङ्कारकर्मकरनेसे अदोषकहा इससेसर्व्थाकर्मकरनाप्राप्तहोता है इससन्देहपरकहतेहैं किजोसर्वकामनापरित्यागकरि निष्कामहोतथामनइन्द्रीशरीर अपनेवशीभूतराखि सकलविषयसेनिवृत्तहैं और शरीरनिर्व्वाहमात्रकेअर्थकर्त्तृत्वअभिमानरहितहो कर्मोकोकरतेहुयेभी वेमनुष्यकर्मबन्धकोनहीं प्राप्तहोतेहैं अर्थात् कर्मजनितकिल्बिषजोपाप सोनहींलगताहै सोईकहाकि निराशीर्यतचितात्माव्यक्तसर्वपरिग्रहः २१

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

येन सयतचित्तात्मात्यक्तसर्व्वपरिग्रहःत्यक्तःसर्व्वःपरिग्रहोयेनसत्यक्तसर्व्वपरिग्रहः शारीरंशरीरस्थितिमात्रप्रयोजनंकेवलंकर्मतत्राप्यभिमानवर्ज्जितंकर्मकुर्व्वन्नाप्नोति नप्राप्नोति किल्बिषमनिष्टरूपंपापंधर्मञ्चधर्मोऽपिमुमुक्षोरनिष्टरूपत्वात् किल्बिषमेववन्धापादकत्वात् किञ्चशारीरंकेवलंकर्मेत्यत्र किंशरीरनिर्व्वर्त्यंशारीरंकर्माभिप्रेतमाहोस्विच्छरीरस्थितिमात्रप्रयोजनंशारीरंकर्मेति किञ्चातोयदिशरीरनिर्व्वर्त्तंत्र शारीरंकर्मयदिवाशरीरस्थितिमात्रप्रयोजनंशारीरमित्युच्यते यदाशरीरनिर्व्वर्त्तंकर्मशारीरमभिप्रेतंस्यात्तदादृष्टादृष्टप्रयोजनंकर्मप्रतिषिद्धमपिशरीरेणकुर्व्वन्नाप्नोति किल्बिषमिति ब्रुवतो विरुद्धाभिधानंप्रसज्येत शास्त्रीयञ्चकर्मादृष्टादृष्टप्रयोजनशरीरेणकुर्व्वन्नाप्नोतिकिल्बिषमित्यपिब्रुवतोऽप्राप्तप्रतिषेधप्रसङ्गः शारीरंकर्मकुर्व्वन्निति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसनिर्व्वर्त्तंकर्मविधिप्रतिषेधविषयं धर्माधर्मशब्दवाच्यं कुर्वन्नाप्नोति किल्बिषमित्युक्तंस्यात् तत्रापिवाङ्मनोव्यांविहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनंविरुद्धमापद्येत प्रतिषिद्धसेवापक्षेऽपिभूतार्थानुवादभावमनर्थकंस्यात् यदातु शरीरस्थितिमात्रप्रयोजनंशारीरंकर्माभिप्रेतंभवेत्तदादृष्टादृष्टप्रयोजनंकर्म विधिप्रतिषेधशास्त्रगम्यंशरीरवाङ्मनोवर्त्यंअन्यदकुर्व्वंस्तैरेवशरीरादिभिःशरीरस्थितिमात्रप्रयोजनंकेवलशब्दप्रयोगादहं करोमीत्यभिमानवर्जितः शरीरादिचेष्टामात्रं लोकदृष्ट्याकुर्व्वन्नाप्नोति किल्बिषमेवम्भूतस्यापापशब्दवाच्यंकिल्बिषप्राप्त्यसम्भवात् किल्बिषंसंसारंनाप्नोति ज्ञानाग्निदग्धसर्व्वकर्म्मत्वादप्रतिबन्धेनमुच्यत एवेति पूर्व्वोक्तसम्यग्दर्शनफलानुवादएवैषःएवं शारीरंकेवलंकर्म्मेत्यस्यार्थस्यपरिग्रहे निरवद्यं भवति २१

आनन्दगिरिकृतटीका।

सत्यपिविक्षेपकेकर्मणिकूटस्थात्मानुसन्धानस्यसिद्धेकैवल्यहेतुत्वे विक्षेपाभावेसुतरांतस्यतद्धेतुत्वसिद्धिरित्यभिप्रेत्याह यःपुनरिति पूर्व्वोक्तविपरीतत्वंलोकसंग्रहादिनिरपेक्षत्वंतदेव वैपरीत्यंस्फोरयति प्रागेवेति ससाधनसर्वकर्मसंन्यासेशरीरस्थितिरपिकथमित्याशंक्याह शरीरेति तर्हि तथाविधचेष्टानिविष्टचेतस्तयासम्यग्ज्ञानवह्निर्मुखस्यकुतोमुक्तिरित्याशंक्ययथोदिष्टायामनादरान्मैवमित्याह ज्ञाननिष्ठइति इतिदर्शयतुमिमं श्लोकंप्राहेतिपूर्व्ववत् आशिषःप्रार्थनाभेदास्तृष्णाविशेषाः आशिषांविदुषोनिर्गतत्वे हेतुमाह यतेति चित्तवदात्मनःसंयमनंकथमित्याशंक्याह आत्मा

आनन्दगिरिकृतटीका।

वाङ्मनइतिद्वयोःसंयमनेसत्यर्थसिद्धमर्थमाह त्यक्तेति सर्वपरिग्रहपरित्यागेदेहस्थिति रपिदुःस्यात्यादित्याशंक्याह शरीरमिति मात्रशब्देनपौनरुक्त्यादनर्थकंकेवलंपद मित्याशंक्याह तत्रापीति शरीरं केवलमित्यादौशरीरपदार्थंस्फुटीकर्त्तुमुभयथा सम्भावनयाविकल्पयति शारीरमिति शरीरनिर्वर्त्त्यंशारीरमित्यस्मिन्पक्षेकिंदूष णंशरीरस्थितिमात्रं शारीरमित्यस्मिन्वापक्षेकिंफलमिति पूर्ववादीपृच्छति कि ञ्चातइति शरीरनिर्वर्त्तंशारीरमित्यस्मिन्पक्षेसिद्धान्तीदूषणमाह उच्यतइति शरीरेणयन्निर्वर्त्तंतत्किंप्रतिषिद्धंविहितम्वा प्रथमेविरोधःस्यादित्याह यदेति प्रतिषिद्धाचरणेपिनानिष्टप्राप्तिरित्युक्तेप्रतिषेधशास्त्रविरोधःस्यादित्यर्थः द्वितीयेवि हितकरणेसत्यनिष्टप्राप्त्यभावादप्राप्तप्रतिषेधःस्यादित्याह शास्त्रीयञ्चेति दृष्टप्रयो जनंशारीर्य्यादिकंकर्म्मादृष्टप्रयोजनंस्वर्गसाधनंज्योतिष्टोमादिकंकर्मेति विभागः शरीरनिर्वर्त्तंप्रकर्मशारीरमभिमतमितिपक्षेदूषणान्तरमाह शारीरमिति वाचा मनसाचाकर्मणोऽनुष्ठानेसंन्यासिनोभवत्येवकिल्बिषप्राप्तिरित्याशंक्याह तत्रापीति वाङ्मनोभ्यांविहितानुष्ठाने वा प्रतिषिद्धकरणेवाकिल्बिषप्राप्तिःसंन्यासिनःस्यादिति विकल्पाद्यजपध्यानविधिविरोधःस्यादित्युक्ता द्वितीयंदूषयति प्रतिषिद्धेति शरी रनिर्वर्त्तंप्रकर्मशारीरमिति पक्षमेवंप्रतिक्षिप्यद्वितीयपक्षेलाभंदर्शयति यदाल्विति अन्यदेहस्थितिप्रयोजनात्कर्मणःसकाशादिति शेषः तत्रापि विदुषः स्वदृष्ट्यान प्रवृत्तिरिति सूचयति लोकेति विद्वानुक्तयारीत्यावर्त्तमानोनाप्नोतिकिल्बिषमि त्यत्र विवक्षितमर्थमाह एवम्भूतेति विधिनिषेधगम्यंकर्मदेहस्थितिहेतुव्यतिरिक्त मकुर्वत इत्यर्थः शारीरंकेवलंकर्मकुर्व्वन्नाप्नोति किल्बिषमित्यस्योक्तेन प्रकारेण परिग्रहे शारीरं केवलमिति विशेषणद्वयंनिर्दोषं सिध्यतीति फलितमाह एव मिति २१

स्वामिकृतटीका।

किञ्चनिराशीरिति निर्गताआशिषः कामनायस्मात् यतंनियतंचित्त मात्माशरीरंचयस्यत्यक्ताःसर्वे परिग्रहायेनसःशारीरंशरीरमात्रनिर्व्वर्त्त्यंकर्तृत्वा भिनिवेशरहितं कर्म्म कुर्व्वन्नपि किल्बिषं बंध्यं नप्राप्नोति योगारूढ़पक्षेश रीरनिर्व्वाहमात्रोपयोगिस्वाभाविकं भिक्षाटनादि कुर्व्वन्नपि किल्विषं विहि ताकरणनिमित्तदोषं नप्राप्नोति २१

CC-0. In Public Domain. Digitized by eGangotri

यदृच्छालाभसन्तुष्टोद्वन्द्वातीतोविमत्सरः समःसिद्धावसिद्धौचकृत्वापिननिबध्यते २२

शाङ्करभाष्यं

त्यक्तसर्वपरिग्रहस्य यतेरन्नादेःशरीरस्थितिहेतोःपरिग्रहस्याभावात् याच नादिनाशरीरस्थितौ कर्त्तव्यतायां प्राप्तायामयाचितमसंक्लृप्तमुपपन्नंयदृच्छये त्यादिना बचनेनानुज्ञातं यतेःशरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारमाविष्कुर्व न्नाह यदृच्छेति यदृच्छालाभसन्तुष्टोऽप्रार्थितोऽयत्नतो लाभो यदृच्छालाभस्तेन सन्तुष्टः संजातालंप्रत्ययःइंडातीतो द्वन्द्वदृह शीतोष्णादिभिःहन्यमानोऽविषण्णचि त्तोद्वन्द्वातीत उच्यते बिमत्सरो बिगतमत्सरोनिर्व्वैरबुद्धिः समस्तुल्योयदृच्छया लाभस्यापिसिद्धावसिद्धौच य एबम्भूतो यतिरन्नादेःशरीरस्थितिहेतोः लाभाला भयोः समोपिहर्षबिषादबर्ज्जितः कर्मादौ अकर्मादिदर्शी यथाभूतात्मदर्शन निष्ठः शरीरस्थितिमात्रप्रयोजने भिक्षाटनादिकर्मणि शरीरादिनिर्व्वर्त्त्यनैबकि ञ्चित् करोम्यहं गुणागुणेषु वर्त्तन्ते इत्येवं सदासम्परिचक्षाण आत्मकर्त्तृत्वा भावंपश्यन्नैव किञ्चिद्भिक्षाटनादिकं कर्मकरोति लोकव्यवहारसामान्यदर्शने न तुलौकिकैरारोपितकर्त्तृत्वे भिक्षाटनादौ कर्मणिकर्त्ताभवति भिक्षाटनादिचेष्टा स्वपिअकर्त्तृत्वाद्यनुसन्धानमेव विदुषः स्वानुभवेनतुशास्त्रप्रमाणादिजनितेनाक र्त्तैव स एवंपराध्यारोपितकर्त्तृत्वं शरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिकंकर्म कृत्वापि ननिबध्यते बन्धहेतोःकर्मणःसहेतुकस्य ज्ञानाग्निनादग्धत्वादित्यनुवाद एवैषः २२

आनन्दगिरिकृतटीका।

पूर्वश्लोकेनसङ्गतिंदर्शयन्नुत्तरश्लोकमुत्थापयति त्यक्तेति अन्नादेरित्यादिशब्देन पादुकाच्छादनादिगृह्यते याचनादिनेत्यादिपदेनसेवाक्लृप्त्यादुपादीयतेभिक्षाटना र्थमुद्योगात् प्राक्काले केनापियोग्येननिवेदितं भैक्ष्यमयाचितंअभिशब्दं पतितञ्च

भाषा अनुवाद।

औरयदृच्छालाभसंन्तुष्टकहे मांगेविना आपसेआप प्राप्तजोयथालाभ तिससे जोसन्तुष्टहैं अर्थात्उत्तमअधमअधिकअल्पलाभसेहर्षविषादरहितहैं औरशी तउष्णहानिलाभसुखदुःखवैरप्रीतिआदि द्वन्द्वभावरहितहैंतथासिद्धिअसिद्धिमे समभावहैं वेपुरुषकर्म्मकरतेभी संसारगतिकोनहींप्राप्तहोते अर्थात्कर्मबन्ध नमेनहींपडतेहैं सोईकहा कियदृच्छालाभसन्तुष्टो द्वन्द्वातीतोविमत्सरइति २२

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम् ।

त्यक्त्वाकर्म्मफलासङ्गंइत्यनेनश्लोकेन यःप्रारब्धकर्म्मासन्यदानिःक्रियब्रह्मात्मदर्शनसम्पन्नःस्यात् तदास्यात्मनःकर्त्तृकर्म्मप्रयोजनाभावदर्शिनःकर्म्मपरित्यागेप्राप्ते कुतश्चिन्निमित्तात्तदसम्भवेसति पूर्व्ववत्तस्मिन्कर्म्मण्यभिप्रवृत्तोपिनैवकिञ्चित् करोतिसइतिचकर्म्माभावःप्रदर्शितःयस्येवंकर्म्माभावो दर्शितस्तस्यैव गतसङ्गस्येति गतसङ्गस्य सर्वतोतिवृत्तासक्तेर्मुक्तस्यनिवृत्तधर्म्मादिवन्धनस्य ज्ञानावस्थितचेतसो ज्ञानेएवअवस्थितं चेतोयस्यसोऽयंज्ञानावस्थितचेतस्तस्य यज्ञाययज्ञनिर्व्वृत्यर्थमाचरतो निर्व्वर्त्तयतःकर्मसमग्रंसहाग्रेणकर्मफलेनवर्त्तते इतिसमग्रंकर्मतत्समग्रं प्रविलीयते विनश्यतीत्यर्थः २३

आनन्दगिरिकृतटीका ।

वर्जयित्वा सङ्कल्पमन्तरेणपञ्चभ्यःसप्तभ्योवागृहेभ्यःसमानीतं भैक्ष्यमसंक्लृप्तंसिद्धमन्नंभक्तजनैः स्वसमीपमुपानीतमुपपन्नंयदृच्छयास्वकीयप्रयत्नव्यतिरेकेणेतियावत्आदिशब्देन माधुकर्यमसंक्लृप्तं प्राक्प्रणीतमयाचितं तात्कालिकोपपन्नञ्चभैक्षं पञ्चविधंस्मृतमित्यादिगृह्यते आविष्कुर्वन्निदंवाक्यमाहेति योजनीयं परोत्कर्षामर्षपूर्विकास्वस्योत्कर्षावाञ्छाविगतायस्मादिति व्युत्पत्तिमाश्रित्यविवक्षितमर्थमाह निर्वैरेति संक्षेपतोदर्शितमर्थं विषदयति यएवम्भूतइति तथापिप्रकृतस्ययतेर्भिक्षाटनादौकर्त्तृत्वंप्रतिभाति तदभावेभिक्षाटनाद्यभावेनजीवनाभिभावप्रसङ्गादित्याशंक्याह लोकेति लौकिकैरविवेकिभिःसहव्यवहारस्यस्नानाचमनभोजनादिलक्षणस्यविदुष्यपिसामान्येनदर्शनात्तदनुसारेणलौकिकैरध्यारोपितकर्त्तृत्वभोक्तृत्वाद्विद्वानपिलोकदृष्ट्याभिक्षाटनादौकर्त्तृत्वमनुभवतीत्यर्थः कथन्तर्हि तस्याकर्त्तृत्वंतत्राह स्वानुभवेनेति यदृच्छेत्यादिपादत्रयंव्याख्यायकृत्वापीत्यादिचतुर्थपादंव्याचष्टे सएवमिति भिक्षाटनादिनाप्रातिभासिकेनकर्मणाविदुषोवद्धत्वाभावेपि कर्म्मान्तरेणनिवद्धत्वंभविष्यतीत्याशंक्याह वन्धेति ज्ञानाग्निदग्धत्वादित्येवंशारीरं

स्वामिकृतटीका ।

किञ्चयदृच्छालाभेति अप्रार्थितोपस्थितोलाभोयदृच्छालाभस्तेनसन्तुष्टः द्वन्द्वानिशीतोष्णादीन्यतीतोऽतिक्रान्तस्तत्सहनशीलइत्यर्थ विमत्सरोनिर्व्वैरः यदृच्छालाभस्यापिसिद्धावसिद्धौच समोहर्षविषादरहितःयएवंभूतःसपूर्व्वोत्तरभूमिकयोर्यथायथविहितं स्वाभाविकंवा कर्मकृत्वा वन्धंनप्राप्नोति २२

CC-0. In Public Domain. Digitized by eGangotri

गतसङ्गस्यमुक्तस्यज्ञानावस्थितचेतसः यज्ञायाचरतःकर्मसमग्रं प्रविलीयते २३

शाङ्करभाष्यं ।

कस्मात् पुनःकारणात् क्रियमाणं कर्मस्वकार्य्यारम्भमकुर्व्वन्समग्रंप्रविलीय तद्दृत्युच्यतेयतः ब्रह्मेति ब्रह्मार्पणंयेनकरणेनप्रकारेणब्रह्मविद्विरग्नावर्पयति तद्ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावंपश्यति यथाशुक्तिकायांरजताभावं पश्यति तद्वदुच्यते ब्रह्मैवार्पणमिति यथायद्रजतं तच्छुक्तिकैवेतिब्रह्मार्पणमि त्यसमस्ते पदेयदर्पणबुद्ध्यागृह्यते लोकेतदस्यब्रह्मविदोब्रह्मैवेत्यर्थःब्रह्महविस्तथा

आनन्दगिरिकृतटीका

केवलमित्यादावुक्तस्यायमनुवाद इतियोजना यथोक्तस्यकर्मणोयुक्त्यासहाविरोधा ध्युपगमसूचनार्थोपिशब्दः २२

गतसङ्गस्येत्यादिश्लोकस्यव्यवहितेनसम्बन्धंवक्तुं वृत्तंकीर्त्तयति त्यक्तेति अनेनश्लोके ननैवकिञ्चित् करोति सइत्यत्रकर्माभावःप्रदर्शितइति सम्बन्धः कस्यकर्माभावप्र दर्शनमित्याशङ्क्यायामाह प्रारब्धेतियःप्रारब्धकर्मासन्न्योवतिष्ठते तस्यकर्माभावः प्रदर्शितश्चेद्विरोधःस्यादित्याशंक्यावस्थाविशेषेतत्प्रदर्शनान्नैवमित्याह यदेति ननु ज्ञानवतःक्रियाकारकफलभावदर्शिनःकर्मपरित्यागध्रौव्यात् कर्माभाववचनमप्राप्त प्रतिषेधःस्यादित्याशंक्याह आत्मनइति लोकसंग्रहादिनिमित्तंप्रागेवोक्तमविद्या वस्थायामिवपूर्ववदित्युक्तं एवंवृत्तमनूद्योत्तरश्लोकमवतारयति यस्येति यथोक्तस्या पिविद्यावतोमुक्तस्यभगवत्प्रीत्यर्थंकर्मानुष्ठानोपलम्भात्ततोबन्धारम्भःसम्भाव्येतेत्याशं क्याह यज्ञायेति धर्माधर्मादीत्यादिशब्देनरागद्वेषादिसंग्रहः तस्यबन्धनत्वंकरणव्यु त्पत्तिप्राप्तिपत्तव्यं यज्ञनिर्व्वर्त्त्यंयज्ञशब्दितस्यभगवतोविष्णोर्नारायणस्यप्रीतिसम्प त्तिप्रयोजनमिति यावत् ज्ञानमेवबाञ्छतोज्ञानस्यप्रतिबन्धकंकर्मपरिशङ्कितंपरिहरति कर्मेति समग्रेणेत्यङ्गीकृत्यव्याचष्टे सहेत्यादिना २३

भाषा अनुवाद ।

औरभीकहतेहैं किगतसंगस्यकहे जिसकादेहगेहआदिविषयसेसंगआसक्ति चलीगई औ कामक्रोधसेमुक्तकहेछूटगयाहै और चित्तज्ञानरूपपरब्रह्ममेस्थित हैऐसेगुणोंसेयुक्तमनुष्यके यज्ञरूपार्थ किम्वा लोकशिक्षार्थ याशरीरयत्रार्थ अथवा भगवदाराधनार्थ कियेजायेसम्पूर्णकर्मवासनासमेत विलीनहोजाते हैं २३

CC-0. In Public Domain. Digitized by eGangotri

ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ब्रह्मैवतेनगन्तव्यंब्रह्मकर्मसमाधिना२४

शाङ्करभाष्यम्।

यद्धविर्व्वुद्ध्यागृह्यमाणंतद्ब्रह्मैवास्यतथाब्रह्माग्नाविति समस्तं पदमग्निरपिब्रह्मैव यत्रहूयते ब्रह्मणाकर्त्रा ब्रह्मैवकर्त्तेत्यर्थःयत्तेनहुतं हवनक्रियापितत् ब्रह्मैव यत्तेनगन्तव्यंफलं तदपिब्रह्मैवब्रह्मकर्मसमाधिनाब्रह्मैवकर्मब्रह्मकर्मतस्मिन्समाधिर्यस्यसब्रह्मकर्मसमाधिस्तेनब्रह्मकर्मसमाधिनाब्रह्मैवगन्तव्यंलोकसंग्रहचिकीर्षुणापिक्रियमाणंकर्मपरमार्थतोऽकर्म ब्रह्मबुद्ध्युपमृदितत्वात्तदेवंसति निवृत्तकर्मणोऽपिसर्व्वकर्म्मसंन्यासिनःसम्यग्दर्शनस्तुत्यर्थंयज्ञत्वसम्पादनंज्ञानस्य सुतरामुपपद्यते यदर्पणाद्यधियज्ञेप्रसिद्धंतदस्याध्यात्मब्रह्मैवपरमार्थदर्शिनइति अन्यथा

स्वामिकृतटीका

किञ्चगतेति गतसङ्गस्यनिःकामस्यरागादिभिर्मुक्तस्यज्ञानेऽवस्थितं चेतोयस्य यज्ञायपरमेश्वराराधनार्थंकर्मचरतः सतः समग्रंसवासनंकर्मप्रविलीयते अकर्मभावमापद्यते आरूढ़योगपक्षेयज्ञाययज्ञरक्षणार्थंलोकसंग्रहार्थंकर्मकुर्व्वतइत्यर्थः २३

भाषा अनुवाद।

जोयहशङ्काकरोकि धर्मशास्त्रतोवेदकाअर्थहीहै औतिसमेलिखतेहैं किनाभुक्तंक्षीयतेकर्म अर्थात विनाभोगकियेकर्म्मक्षीणनहीहोता कर्म्मकाफलभोगनाहींपड़ताहै तोइसपरकरतेहैं किसम्पूर्णक्रियाऔकारकतथाफलरूपजोकुछद्वैत है सोसवब्रह्ममात्र कहेब्रह्मछोड़औरकुछनहीं है अैसेज्ञानवानब्रह्मज्ञानी ब्रह्मरूपपुरुषके यावतकर्म्मविलीनहोजातेहैं इसमेकुछसन्देहनहीं सोईउपनिषदमेकहाहै किब्रह्मविदोब्रह्मैवसर्व्वक्रियाकारकफलजातं भवति सोईकहते हैं किब्रह्मकेअर्थऔरब्रह्महींहवि तथाब्रह्मरूपअग्निमेब्रह्महींनेदियाहै इसप्रकारजोजानताहै अर्थात् होमअग्निश्रुवाहविकर्त्ताक्रियाघृतआदिसवसाग्रीऔर जिसकोदियाजाययहसवजोहै सोब्रह्मव्यतिरेककहेविनाऔरनहीं है ब्रह्मकर्म्ममेहैसमाधि कहेचित्तवृत्ति जिसकी सोअवश्यब्रह्मकोप्राप्तहोताहै जैसेइनकर्मोंकीकर्म्ममेगिनती नहीं तैसेहीभगवतआराधनकर्म्मकोभी कर्ममेगणनानहीं है अैसेकर्मजोहैं सोअकर्महीं हैं फेरिइनकाफलभोगनाकहांहै औरजोफलहै तोब्रह्मयाभगवतप्राप्तिरूपहीहै औरदूसरानहीं २४

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

सर्वस्य ब्रह्मत्वेऽर्पणादीनामेवविशेषतोब्रह्मत्वाभिधानमनर्थकंस्यात् तस्माद्ब्रह्मैवेदं सर्वमित्यभिजानतःविदुषः सर्वकर्माभावःकारकबुद्ध्यभावाच्च नहि कारकबुद्धिरहितं यज्ञाख्यंकर्म्मदृष्टंसर्वमेवाग्निहोत्रादिकंकर्म्मशब्दसमर्पितदेवताविशेषसम्प्रदानादिकारकबुद्धिमत्कर्त्राभिमानफलाभिसन्धिमच्चदृष्टं नोपलब्धिक्रियाकारककर्म्मफलभेदबुद्धिमत्कर्त्तृत्वाभिमानफलाभिसन्धिरहितञ्चेदन्तुब्रह्मबुद्ध्युपलब्धिदार्पणादिकारकक्रियाफलभेदबुद्धिमत्कर्म्मातोऽकर्म्मैवतत् तथाचदर्शितंकर्म्मण्यभिप्रवृत्तोऽपि नैवकिञ्चित्करोति सः गुणागुणेषुवर्त्तन्तेनैवकिञ्चित्करोमीति युक्तोमन्येत तत्त्ववित्यादिभिस्तथाचदर्शयन्तत्तत्क्रियाकारकफलभेदबुद्ध्युपमर्द्दंकरोति दृष्ट्वा चकामाग्निहोत्रादौ कामोपमर्द्दनकाम्यादग्निहोत्रादिहानिस्तथामतिपूर्व्वकत्वादीनांएवम्विधेनकारकात्मनांकर्म्मणांकार्य्यविशेषस्यारब्धत्वंदृष्टं तथेहापिब्रह्मबुद्ध्युपलब्धिदार्पणादिकारकक्रियाफलभेदबुद्धेर्बाह्यचेष्टामात्रेणकर्म्मापिविदुषोऽकर्म सम्पद्यतेऽतउक्तं समग्रंप्रविलीयतइति अत्रकेचिदाऊर्यब्रह्मतदर्पणादीनिब्रह्मैवकिलार्पणादिना पञ्चविधेनकारकात्मनाव्यवस्थितंसत्तदेवकर्मकरोति तत्रनार्पणादिबुद्धिर्निवर्त्ततेकिन्त्वर्पणादिषुब्रह्मबुद्धिराधीयते यथाप्रतिमादौविष्णवादिबुद्धिर्यथाचनामादौ ब्रह्मबुद्धिरेवंसत्यमेवमपिस्याद्यतिर्ज्ञानयज्ञस्तुत्यर्थंप्रकरणंनस्यात् अत्रतुसम्यग्दर्शनंज्ञानयज्ञशब्दितमनेकान्यज्ञशब्दितान्क्रियाविशेषानुपन्यस्यश्रेयान द्रव्यमयाद्यज्ञात्ज्ञानज्ञइति ज्ञानंस्तौति अत्रच समर्थमिदंवचनं ब्रह्मार्पणमित्यादिज्ञानस्ययज्ञत्वसम्पादनेअन्यथासर्वस्य ब्रह्मत्वेऽर्पणादीनामेवविशेषतोब्रह्मत्वाभिधानमनर्थकंस्यात् येत्वर्पणादिषुप्रतिमायांविष्णुदृष्टिवत्ब्रह्मदृष्टिःक्षिप्यतेनामादिष्विव चेतिब्रुवतेनते षांब्रह्मविद्योक्तेह विवक्षितास्यादर्पणादिविषयत्वात् ज्ञानस्य नचदृष्टिसम्पादनज्ञानेनमोक्षफलं प्राप्यतेब्रह्मैवतेनगन्तव्यमिति चोच्यते विरुद्धञ्चसम्यग्दर्शनमन्तरेणमोक्षफलंप्राप्यतइति प्रकृतविरोधञ्चसम्यग्दर्शनञ्च प्रकृतं कर्म्मण्यकर्म्मयःपश्येदित्यत्रान्तेचसम्यग्दर्शनंतस्यैवोपसंहारात् श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञःपरन्तप ज्ञानंलब्ध्वापरांशान्तिमित्यादिनासम्यग्दर्शनस्तुतिमेव कुर्वन्नुपक्षीणोऽध्यायः तत्राकस्मादर्पणादौब्रह्मदृष्टिरप्रतिमायामिवविष्णुदृष्टिरुच्यत इत्यनुपपन्नं तस्माद्यथाव्याख्यातार्थ एवायंश्लोकः २४

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

नाभुक्तंक्षीयते कर्मेति स्मृतिमाश्रित्यशङ्कते कस्मादिति समस्तस्यक्रियाकारकफलात्मकस्यद्वैतस्यब्रह्ममात्रत्वेनबाधितत्वात् ब्रह्मविदोब्रह्ममात्रस्यकर्मप्रविलीयते सर्वमिति युक्तमित्याह उच्यत इति ब्रह्मविदोब्रह्मैवसर्वक्रियाकारकफलजातंद्वैतमित्यत्रहेतुत्वेनान्तरश्लोकमवतारयति यतइति अर्पणशब्दस्यकरणविषयत्वंदर्शयन्नर्पणं ब्रह्मेति पदद्वयपक्षेसामानाधिकरण्यंसाधयति येनेति यद्रजतं साशुक्तिरितिवत् बाधायामिदंसामानाधिकरण्यमित्याह तस्येति तत्रदृष्टान्तमाह यथेति उक्तेऽर्थे पदद्वयमवतारयति तद्दर्शयत इति उक्तमेवार्थंस्पष्टयति यथा यदिति समाससंख्यांव्यावर्त्तयति ब्रह्मेति पदद्वयपक्षेविवक्षितमर्थंकथयति यदर्पणेति ब्रह्महविरिति पदद्वयमवतार्य्यव्याचष्टे ब्रह्मेत्यादिना यदर्पणबुद्ध्यागृह्यतेतद्ब्रह्मविदोब्रह्मैवेति यथोक्तंतथेहापीत्याह तथेति अस्येति षष्ठीब्रह्मविदमधिकरोति पूर्ववदसमासमाशंक्यव्यावर्त्तयन् पदान्तरमवतार्य्यव्याकरोति तथेतिप्राग्युक्तासमासवदिति व्यतिरेकः तत्रविवक्षितमर्थमाह अग्निरपीति ब्रह्मणेतिपदस्याभिमतमर्थमाह ब्रह्मणेति कर्त्राहूयत इति सम्बन्धः कर्त्ताब्रह्मणःसकाशाद्व्यतिरिक्तोनास्तीत्येतदभिमतमित्याह ब्रह्मैवेति हुतमित्यस्यविवक्षितमर्थमाह यत्तेनेति ब्रह्मैवतेनेत्यादिभागंविभजते ब्रह्मैवेत्यादिना ब्रह्मकर्म्मेत्याद्यवतार्य्यव्याकरोति ब्रह्मेति कर्म्मत्वं ब्रह्मणोज्ञेयत्वात्प्राप्यत्वाच्चप्रतिपत्तव्यंएवंब्रह्मार्पणमन्त्रस्यअक्षरार्थमुक्त्वातात्पर्य्यार्थमाह एवमिति निष्टत्तकर्म्माणं सन्यासिनंप्रतिकथमस्यप्रवृत्तिरित्याशंक्याह निष्टत्तेति यथावाह्ययज्ञानुष्ठानासमर्थस्याज्ञस्यसङ्कल्पात्मकयज्ञदृष्टस्तथाज्ञानस्ययज्ञत्वसम्पादनं स्तुत्यर्थंसुतरामुपपद्यते तेनस्तुतिलाभात्कल्पनायाःस्वाधीनत्वादित्यर्थःज्ञानस्ययज्ञत्वसम्पादनमित्यभिनयति यदर्पणादीति केनप्रमाणेनात्रयज्ञत्वसम्पादनमवगतमित्याशंक्यअर्पणादीनांविशेषतोब्रह्मत्वाभिधानानुपपत्तेरित्याह अन्यथेति ज्ञानस्ययज्ञत्वेसम्पादिते फलितमाह तस्मादिति आत्मैवेदंसर्वमित्यात्मव्यतिरेकेणसर्व्वस्यावस्तुत्वंप्रतिपद्यमानस्यकर्म्माभावे हेत्वन्तरमाह कारकेति कारकबुद्धेस्त्वय्यभिमानस्याभावेपिकिमितिकर्म्मनस्यादित्याशंक्याह नहीति उक्तमेवान्वयव्यतिरेकाभ्यांद्रढयति सर्वमेवेति इन्द्रायेत्यादिनाशब्देनसमर्पितोदेवताविशेषःसम्प्रदानंकारकमादिशब्दाद्ध्रुवादिकरणकारकंतद्विषयबुद्धिमत्कर्त्तास्मीत्यभिमानपूर्वकेमोक्षफलमस्येति फलाभिसन्धिमच्चकर्म्मदृष्टमिति योजना

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

अन्वयमुक्त्वाव्यतिरेकमाह नेत्यादिना उपमृदिता क्रियादिभेदविषया बुद्धिर्यस्य तत्कर्म्म तथाकर्त्तृत्वाभिमानपूर्व्वको मोक्षेफलमस्येतियोभिसन्धिस्तेनरहितञ्चेन कर्मदृष्टमित्यन्वयः तथापिब्रह्मविदोभासमानकर्म्माभावेकिमायातमित्याशंक्याह इ दमिति यदिदंब्रह्मविदोदृश्यमानंकर्म्मतद्दृष्टमस्मिब्रह्मेतिबुद्ध्यानिराकृतकारका दिभेदविषयबुद्धिमदतश्चकर्म्मैवनभवतितत्त्व ज्ञानेसति व्यापकंकारकादिव्याव र्त्तमानंव्याप्यंकर्म्मापिव्यावर्त्तयति तत्त्वविदःशरीरादिचेष्टाकर्म्माभावःकर्मव्यापक रहितत्वात् सुषुप्तिचेष्टावदित्यर्थः ज्ञानवतोदृश्यमानंकर्म्माकर्मैवेत्यत्रभगवदनुम तिमाह तथाचेति ब्रह्मविदोदृष्टंकर्मनास्तीत्युक्तेपितत्कारणानुपमर्द्दात् पुनर्भविष्य तीत्याशंक्याह तथाचदर्शयन्निति अविद्वानिव विद्वानपिकर्मणिप्रवर्त्तमानोदृश्यतेत थापितस्यकर्माकर्मैवेत्यत्र दृष्टान्तमाह दृष्ट्वाचेति विद्वत्कर्मापिकर्मत्वाविशेषादित रकर्मवत् फलारम्भकमित्यपिशङ्कानयुक्तेत्याह तथेति इदंकर्मैवकर्त्तव्यमस्यचफ लंभोक्तव्यमिति मतिस्तत्पूर्व्वकान्यतत्पूर्वकाणिचकर्म्मानितेषामवान्तरभेदसंग्रहार्थ मादिपदंदार्ष्टान्तिकमाह तथेति सप्तम्याविद्वत्कारणंपरामृष्टंषष्ठ्यौसमानाधिकर णेउक्तेऽर्थेपूर्व्ववाक्यमनुकूलयति अतइति ब्रह्मार्पणमन्त्रस्यस्वव्याख्यानमुक्त्वास्वयुध्य व्याख्यानमनुवदति अत्रेति प्रसिद्धोद्देशेनाप्रसिद्धविधानस्यन्याय्यत्वादप्रसिद्धोद्देशेन प्रसिद्धविधानंकथमित्याशंक्याह ब्रह्मैवेति किलेत्यस्मिन्व्याख्यानेसिद्धान्तिनोऽसं प्रतिपत्तिंसूचयति कर्त्तृकर्मकरणसम्प्रदानाधिकरणरूपेणपञ्चविधेनब्रह्मैवव्य वस्थितंकर्मकरोतीत्यङ्गीकारात्तदप्रसिद्धाभावात्तदनुवादेनार्पणादिष्वविरुद्धस्तदृष्टि विधिरित्यर्थः दृष्टिविधिपक्षेसिद्धान्ताद्विशेषंदर्शयति तत्रेति अर्पणादिषुकर्त्त व्यांब्रह्मबुद्धिंदृष्टान्ताभ्यांस्पष्टयति यथेत्यादिना दृष्टिविधानेविधेयदृष्टेमानसक्रिया त्वेनसम्यग्ज्ञानत्वाभावात् प्रकरणभङ्गःस्यादित्यभिप्रेत्यपरिहरति सत्यमेवमिति विधित्सितदृष्टिस्तुतिपरमेवप्रकरणं नज्ञानस्तुतिपरमित्याशंक्यप्रकरणपर्य्यालोचन याज्ञानस्तुतिरेवात्रप्रतिभातीति प्रतिपादयति अत्रत्विति किञ्चब्रह्मार्पणमन्त्रस्या पिसम्यग्ज्ञानस्तुतौ सामर्थ्यंप्रतिभातीत्याह अत्रचेति नन्वर्पणादिषुब्रह्मदृष्टिंकुर्व तामपिब्रह्मविद्यैवात्रविवक्षितेति पक्षभेदासिद्धिरितिचेत्तत्राह येत्विति यथात्र ब्रह्मध्यानादिकमुपास्यंतथार्पणादिषुब्रह्मदृष्टिकरणेसत्यर्पणादिकमेवप्रधान्येन ज्ञेयमिति ब्रह्मविद्यायथोक्तेनवाक्येनविवक्षिता नस्यादित्यर्थःकिञ्चब्रह्मवतेनगन्तव्य

CC-0. In Public Domain. Digitized by eGangotri

दैवमेवापरेयज्ञंयोगिनःपर्य्युपासते ब्रह्माग्नावपरेयज्ञंयज्ञेनैवोपजुह्वति २५

आनन्दगिरिकृतटीका।

मिति ब्रह्मप्राप्तिफलाभिधानादपिदृष्टिविधानमश्लिष्टमित्याह नचेति नचार्पणाद्या लम्बनादृष्टिर्ब्रह्मप्रापयत्यप्रतीकालंबनान्नयतीति न्यायविरोधादितिभावः दृष्टि विधानेपिनियोगवलादेवस्वर्गवददृष्टोमोक्षोभविष्यतीत्याशंक्याह विरुद्धञ्चेति ज्ञा नादेवकैवल्यमुक्तामार्गान्तरापवादिन्यास्रुत्याविरुद्धंमोक्षस्यअविद्यानिवृत्तिलक्षण स्यदृष्टस्य नैयोगिकत्ववचनमित्यर्थः दृष्टियोगान्मोक्षोभवति इत्येतत्करणाविरु द्धञ्चेत्याह प्रकृतेति तदेवप्रपञ्चयति सम्यग्दर्शनञ्चेति अन्तेच सम्यग्दर्शनंप्रकृ तमिति सम्बन्धः तत्रहेतुः तस्येवेति सम्यग्ज्ञानेनोपक्रम्यतेनैवोपसंहारेपिम ध्येकिञ्चिदन्यदुक्तमिति प्रकरणस्यातद्विषयत्वमित्याशंक्याह ये यानिति प्रकरणे सम्यग्ज्ञानविषयेसत्यनुपपन्नोदर्शनविधिरितिफलितमाह तत्रेति ब्रह्मार्पणमन्त्रे परकीयव्याख्यानासम्भवेस्वकीयव्याख्यानंव्यवस्थितमित्युपसंहरति तस्मादिति २४

स्वामिकृतटीका।

तदेवंपरमेश्वराराधनलक्षणंकर्मज्ञानहेतुत्वेनबन्धकत्वाभावादकर्मैव आरू ढावस्थायान्तु अकर्तृत्वज्ञानबाधितत्वात् स्वाभाविकमपिकर्मअकर्मैवेति कर्मण्य कर्मयःपश्येदित्यनेनोक्तः कर्मप्रविलयःप्रपञ्चितः इदानींकर्मणितदङ्गेषुचब्रह्मैवा नुस्यूतं पश्यतः कर्मप्रविलयमाह ब्रह्मार्पणमिति अर्प्यतेऽनेनेत्यर्पणंजुह्वादितद पिब्रह्मैव अर्प्यमाणहविरपिघृतादिकंब्रह्मैव ब्रह्मवाग्निस्तस्मिन्ब्रह्मणाकर्त्राहुतं होमोऽग्निश्चकर्त्तृचक्रियाचब्रह्मैवेत्यर्थः एवंब्रह्मण्येवकर्मात्मकेसमाधिश्चित्तैकाग्र्य यस्य तेनब्रह्मैवगन्तव्यंप्राप्यंनतु फलान्तरमित्यर्थः २४

भाषाअनुवाद।

पर्व्वोक्तप्रकारयज्ञरूपसेसर्व्वत्रसम्पादित कहे प्रसिद्धकरकेकहाजोब्रह्मदर्शन रूपज्ञान सोसकलयज्ञोंकाहेतुकहेउसीकेवास्तेसबयज्ञोंकीजातीहैं अतएवश्रेष्ठ है इसीसेअबइसज्ञानकीप्रसंशाकरके अधिकारीकेभेदसेज्ञानकेउत्पत्तिकीउपा यरूपसबयज्ञोंको ८ श्लोकमेंकहतेहैं किवऊतेरेकर्मयोगीलोग ब्रह्मबुद्धिरहित हो इन्द्रवरुणआदिदेवतोंकोयज्ञकरिकेबड़ीश्रद्धासेपूजते हैं और कितनेज्ञान योगीब्रह्मरूपअग्निमेंब्रह्मयज्ञरूपउपायसे यज्ञआदिसकलकर्मरूपब्रह्ममेंब्रह्मा र्पणविधिसे अर्पणकहैंसबकर्मलीनकरतेहैं सोईब्रह्मयज्ञ है यहजानो २५

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

तत्रेदानीं सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थमन्येऽपि यज्ञा उपक्षिप्यन्ते दैवमेवेत्यादिना दैवमेव देवाद्यज्यन्ते येनयज्ञेनासौ दैवो यज्ञस्तमेवापरे यज्ञंयोगिनः कर्म्मिणः पर्य्युपासते कुर्व्वन्तीत्यर्थः ब्रह्माग्नौ सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्म यत् साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्व्वान्तरइत्यादिवचनोक्तमशनायादिसर्व्वसंसारधर्म्मवर्जितं नेति नेतीति निरस्ताशेषविशेषं ब्रह्मशब्देनोच्यते ब्रह्मचतदग्निश्च स होमादिकरणत्वविवक्षया ब्रह्माग्नि स्तस्मिन् ब्रह्माग्नावपरेऽन्येब्रह्मविदोयज्ञंयज्ञशब्दवाच्य आत्मात्मनामसुयज्ञशब्दस्यपाठात् तमात्मानंयज्ञंपरमार्थतःपरमेवब्रह्म सन्तंबुद्ध्याद्युपाधिसंयुक्तमध्यस्तसर्व्वोपाधिधर्म्मकलाङ्कृतिरूपंयज्ञेनैवात्मनैवोक्तलक्षणेनोपजुह्वति प्रतिक्षिपन्ति सोपाधिकस्यात्मनोनिरुपाधिकेनपरब्रह्मस्वरूपेणैवयद्दर्शनंसतस्मिन्होमस्तंकुर्व्वन्ति ब्रह्मात्मैकत्व दर्शननिष्ठाःसंन्यासिनइत्यर्थः २५

आनन्दगिरिकृतटीका।

ज्ञानस्ययज्ञत्वं संपाद्यपूर्व्वश्लोकेस्थिते सत्यधुनातस्यैवज्ञानस्यस्तुत्यर्थंयज्ञान्तरनिर्देशार्थमुत्तरग्रन्थप्रवृत्तिरित्याह तत्रेति सर्व्वस्यश्रेयःसाधनस्यमुख्यगौणवृत्तिभ्यां यज्ञत्वं दर्शयन्नादौयज्ञद्वयमादर्शयति दैवमेवेति प्रतीकमादायदैवयज्ञंव्याचष्टे देवाइति सम्यग्ज्ञानाख्यं यज्ञंविभजते ब्रह्माग्नाविति तत्रब्रह्मशब्दार्थंश्रुत्यवष्टम्भेनस्पष्टयति सत्यमिति यदजमनन्तविपरीतमपरिच्छिन्नंब्रह्मतस्यपरमानन्दत्वेनपरमपुरुषार्थत्वमाह विज्ञानमिति तस्यज्ञानाधिकरणत्वेनज्ञानत्वमौपचारिकमित्याशंक्याह तत्साक्षादिति जीवब्रह्मविभागेकथमपरिच्छिन्नत्वमित्याशंक्यविशिनष्टि यआत्मेति परस्यैवात्मत्वंसर्व्वस्माद्धेहादेरव्यावृत्तान्तादान्तरत्वेनसाधयति सर्व्वान्तरइति विधिमुखंसर्व्वमेवोपनिषद्वाक्यंब्रह्मविषयमादिशब्दार्थः निषेधमुखं

स्वामिकृतटीका।

तदेवंयज्ञत्वेनप्रस्तावितं सर्व्वंब्रह्मदर्शनलक्षणंज्ञानंसर्व्वयज्ञोपायप्राप्यत्वात् सर्व्वयज्ञेभ्यः श्रेष्ठमित्येवंस्तोतुमधिकारिभेदेनज्ञानोपायभूतान्यज्ञानाह दैवमित्यादिभिरष्टभिःदेवाइन्द्रवरुणादयइज्यन्तेयस्मिन्एवकारेणेन्द्रादिषुब्रह्मबुद्धिराहित्यंदर्शितं तदेवंयज्ञमपरेकर्म्मयोगिनः पर्य्युपासते अङ्गयानुतिष्ठन्ति अपरेतुज्ञानयोगिनोब्रह्मरूपेऽग्नौयज्ञेनैवोपायेनब्रह्मार्पणमित्याद्युक्तप्रकारेण यज्ञमुपजुह्वति यज्ञादिसर्व्वकर्माणिप्रविलापयन्तीर्थः सोऽयंज्ञानयज्ञः २५

CC-0. In Public Domain. Digitized by eGangotri

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति २६

शाङ्करभाष्यं

सोऽयंसम्यग्दर्शनलक्षणोयज्ञोदैवयज्ञादिषुयज्ञेषुप्रक्षिप्यते ब्रह्मार्पणमित्यादि श्लोकैः श्रेयान्द्रव्यमयात्यज्ञात् ज्ञानयज्ञःपरन्तप इत्यादिनास्तुत्यर्थं श्रोत्रादीनि ति श्रोत्रादीन्द्रियाण्यन्येयोगिनः संयमाग्निषुप्रतीन्द्रियंसंयमोभिद्यतइति वक्तु वचनं संयमाएवाग्नयस्तेषुजुह्वतीन्द्रियसंयममेवकुर्व्वन्तीत्यर्थः शब्दादीन्विषयानन्ये इन्द्रियाग्निषुजुह्वति इन्द्रियाण्येवाग्नयस्तेष्विन्द्रियाग्निषुजुह्वति श्रोत्रादिभिरविरु द्धविषयग्रहणंहोममन्यन्ते २६

आनन्दगिरिकृतटीका

ब्रह्मविषयमुपनिषद्वाक्यमशेषमेवार्थतो निवभ्राति अशनायेति ब्रह्मण्यग्निशब्दप्र योगेनिमित्तमाह सहोमेति बुद्ध्यारूढतयासर्व्वस्यवाहेतुत्वादिति द्रष्टव्यं यज्ञशब्द स्यात्मनित्वंपदार्थेप्रयोगेहेतुमाह आत्मनामस्विति आधाराधेयभावेनवास्तवभे दंब्रह्मात्मनोव्यावर्त्तयति परमार्थतइति कथंतर्हि होमो नहि तस्यैवतद्धोमःस म्भवतीत्याशंक्याह बुद्ध्यादीति उपाधिसंयोगफलंकथयति अध्यस्तेति उपाध्य ध्यासद्वारातद्धर्माध्यासेप्राप्तमर्थंनिर्दिशति आहुतीति इत्यंब्रह्मलक्षणांतृतीयामेव व्याकरोति उक्तेति अशनायादिसर्व्वसंसारधर्म्मवर्ज्जितेननिर्व्विशेषेणस्वरूपेणेति यावत् आत्मनोब्रह्मणिहोममेवप्रकटयति सोपाधिकस्येति परइत्यस्यार्थंस्फोर यति ब्रह्मेति २५

स्वामिकृतटीका।

श्रोत्रादीनीति अन्येनैष्ठिकाब्रह्मचारिणस्तत्तदिन्द्रियसंयमरूपेष्वग्निषुश्रो त्रादीनिजुह्वति प्रविलापयन्ति इन्द्रियाणिनिरुध्य संयमप्रधानास्तिष्ठन्तीत्यर्थः इन्द्रियाण्येवाग्नयस्तेषु शब्दादीनन्येगृहस्थाजुह्वति विषयभोगसमयेऽप्यनासक्ताःस न्तोऽग्नित्वेनभावितेषुइन्द्रियेषु हविष्ट्वेनभावितान्शब्दादीन् प्रक्षिपन्तीत्यर्थः २६

भाषा अनुवाद।

ऐसेहीकितनेब्रह्मचारीलोग इन्द्रियोंकासंयमजोविषयोंसेरोकना सोईअग्नि रूपहैतिसमेंश्रोत्रघ्राणजिह्वात्वकचक्षु इनज्ञानइन्द्रियोंकोहोमकरतेअर्थात् इन्द्रि योंकोअन्तर्मुखकरकेसंयममेंहरतेहैं और कितनेगृहस्थजवइन्द्रियरूपअग्निमेंह बिरूपविषयकहेरूपरसगन्धस्पर्शशब्दसोहोमकरतेहैं तोविषयभोगसमेंभीअ नासक्तहोके अग्निरूपइन्द्रियोंमे रूपआदिविषयरूपघृतहोमकरतेहैं कहेदम्भ करते निरहङ्कारहोकर फलइच्छारहितहोते हैं २६

CC-0. In Public Domain. Digitized by eGangotri

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे आत्मसंयमयोगाग्नौ
जुह्वति ज्ञानदीपिते २७

शाङ्करभाष्यं।

किञ्चसर्वाणीति सर्वाणीन्द्रियकर्माणिइन्द्रियाणांकर्माणीन्द्रियकर्माणितथा प्राणकर्माणिप्राणोवायुराध्यात्मिकस्तत्कर्माण्याकुञ्चनप्रसारणादीनितानि चापरे आत्मसंयमयोगाग्नौआत्मनिसंयम आत्मसंयमः सएवयोगाग्निस्तस्मिन्नात्मसंयमयोगाग्नौजुह्वति प्रक्षिपन्ति ज्ञानाग्निदीपितेस्वेहेनेवप्रदीपिते विवेकविज्ञानेनोज्वलभावमापादिते जुह्वति प्रविलापयन्ति इत्यर्थः २७

आनन्दगिरिकृतटीका।

उक्तयज्ञानयज्ञस्यदैवयज्ञादिषुयज्ञेषुब्रह्मार्पणमित्यादिश्लोकैरुपक्षिप्यमाणत्वंदर्शयति सोयमिति उपक्षेपप्रयोजनमाह श्रेयानिति सम्प्रति यज्ञद्वयमुपन्यस्यति श्रोत्रादीनीति वाह्यानांकरणानांमनसिसंयमस्यैकत्वात् कथंसंयमाग्निष्वितिवज्ञवचनमित्याशंक्याह प्रतीन्द्रियमिति संयमानांप्रत्याहाराधिकरणत्वेन व्यवस्थितानांमनोरूपाणांहोमाधारत्वादग्नित्वंव्यपदिशति संयमाइति विषयेभ्योऽन्तर्वाह्याणीन्द्रियाणिप्रत्याहरन्तीतिसंयमयज्ञंसंक्षिप्यदर्शयति इन्द्रियेति श्रोत्रादीन्द्रियाग्निषुशब्दादिविषयहोमस्यतत्तदिन्द्रियैस्तत्तद्विषयोपभोगलक्षणस्यसर्वसाधारणत्वमाशंक्यप्रतिषिद्धान्वर्जयित्वारागद्वेषरहितोभूत्वाप्राप्तान्विषयान्भुञ्जते तैस्तैरिन्द्रियैरिति विवक्षितंहोमंविशदयति श्रोत्रादिभिरिति २६

यज्ञान्तरंकथयति किञ्चेति इन्द्रियाणांकर्माणिश्रवणवदनादीनिआत्मनिसंयमोधारणाध्यानसमाधिलक्षणः सर्वमपिव्यापारंनिरुध्य आत्मनिचित्तसमाधानंकुर्वन्तीत्याह विवेकेति २७

भाषाअनुवाद

औरबहुतेरेध्यानीपुरुष श्रोत्रादिज्ञानइन्द्रियोंके श्रवणआदिकर्मतथावाक्आदिकर्मइन्द्रियोंकेकार्य्य वचनआदि औरप्राणअपानउदानव्यानसमाननागकूर्मकृकलदेवदत्तधनञ्जय येशरीरकीदशवायुवोंकेकर्मजोवहिर्गमनादि हैं सोसव आत्मसंयमयोगअग्निमेहोमकरतेहैं अर्थात्ध्यानकेद्वाराचित्तकीएकाग्रतारूपज्ञानसेदीपितयोगअग्निमे होमतेलीनकरतेहैं अर्थात् ध्येयकहेध्यानकेविषयकोध्यानकेद्वाराप्रज्वलितज्ञानदीपकीप्रकाशसे वहीध्येयकहे ध्यानयोग्यब्रह्मकोअक्षीतरहजानकर औरउसीमेमनको संयमकहेयुक्तकरिके सकलकर्मकोदूरकरदेते हैं २७

CC-0. In Public Domain. Digitized by eGangotri

द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथापरे स्वाध्यायज्ञानयज्ञाश्च यतयःसंशितव्रताः२८

शाङ्करभाष्यम्।

द्रव्येति द्रव्ययज्ञास्तीर्थेषुद्रव्यविनियोगंयज्ञवुद्ध्यकुर्व्वन्तियेते द्रव्ययज्ञास्तपो यज्ञास्तपोयज्ञोयेषांतपस्विनांते तपोयज्ञायोगयज्ञाःप्राणायामप्रत्याहारादिलक्ष णोयोगोयज्ञोयेषांते योगयज्ञास्तथापरेस्वाध्यायज्ञानयज्ञाश्चस्वाध्यायोयथाविधि कृगाद्याभासोयज्ञोयेषांते स्वाध्याययज्ञाःज्ञानयज्ञाशास्त्रार्थपरिज्ञानंयज्ञोयेषां ते ज्ञानयज्ञाःस्वाध्याययज्ञाज्ञानयज्ञाश्चयतयोयतनशीलाःसंशितव्रताः सम्यक्शि तानितनूकृतानितीक्ष्णीकृतातिव्रतानियेषांतेसंशितव्रताः २८

स्वामिकृतटीका।

किञ्चसर्व्वाणीति अपरेध्याननिष्ठावुद्धीन्द्रियाणांश्रोत्रादीनांकर्माणिश्रवणद र्शनादीनि कर्मेन्द्रियाणांवाक्पाण्यादीनांकर्माणिवचनोपादानादीनि प्राणानाञ्च दशानांकर्माणिप्राणस्यबहिर्गमनं अपानस्याधोगमनंव्यानस्यव्यायनाकुञ्चनप्रसार णादीनि समानस्यासितपीतादीनांसमुन्नयनं उदानस्योर्द्धनयनंउद्गारेनागआख्या तः कूर्मउन्मीलनेस्मृतःकरःक्षुत्करोज्ञेयोदेवदत्तोविजृम्भने नजहातिमृतञ्चापि सर्व्वव्यापीधनञ्जयः इत्येवंरूपाणिजुह्वति आत्मनिसंयमोध्यानैकाग्र्यसएवयोगःस एवाग्निस्तस्मिन् ज्ञानेनध्येयविषयेनदीपितेप्रज्वलिते ध्येयंसम्यग्ज्ञात्वा तस्मिन्म नःसंयम्य तानिसर्व्वाणिकर्माणि उपरमयन्तीत्यर्थः २७ किञ्चद्रव्ययज्ञाइत्यादि द्रव्यदानमेवयज्ञोयेषांतेद्रव्ययज्ञाःकृच्छ्रचान्द्रायणादितपएवयज्ञोयेषांतेतपोयज्ञाः योगश्चित्तवृत्तिनिरोधलक्षणसमाधिःसएवयज्ञोयेषांते योगयज्ञाःस्वाध्यायेनवेदै नश्रवणमननादिनायत्तदर्थज्ञानंतदेवयज्ञोयेषांते यद्वावेदपाठयज्ञास्तदर्थज्ञानय ज्ञाश्चेति द्विविधायतयःप्रयत्नशीलाःसम्यक् शितंनिशितंतीक्ष्णीकृतंव्रतंयेषांते २८

भाषा अनुवाद।

औरलोकमेकितनेपुरुष द्रव्यदानहींको परमयज्ञजानिद्रव्यदानरूपयज्ञ करते औरवज्रतेरेमनुष्यकृच्छ्रचान्द्रायणतथाद्वादशवार्षिकव्रतआदिकमे चित्त लगाय तपरूपयज्ञकरतेहैं फेरिकितनेजन योगशास्त्रोक्तनेतीधौतीप्राणायामआदि योगकरके चित्तवृत्तिकेबोधरूपयोगयज्ञमेतत्परहैं औरवज्रतेरे वेदशास्त्रकेअ ध्ययनमननकोस्वकर्मजानितदर्थज्ञानहींको सर्व्वस्वमानि स्वाध्यायज्ञानरूपयज्ञक रतेहैं परन्तु जोइन्द्रीजितव्रतमेतत्परहैं तेई येसबयज्ञकरसकते हैं२८

CC-0. In Public Domain. Digitized by eGangotri

अपाने जुहति प्राणं प्राणेऽपानं तथापरे। प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥ अपरे नियता हाराः प्राणान् प्राणेषु जुह्वति २९

शाङ्करभाष्यं

किञ्च अपानइति अपानेअपानवृत्तौ जुह्वतिप्रक्षिपन्तिप्राणंप्राणवृत्तिं पूरकाख्यंप्राणायामंकुर्व्वन्तीत्यर्थः प्राणेऽपानंतथापरेजुह्वति रेचकाख्यञ्चप्राणायामं कुर्व्वन्तीत्येतत् प्राणापानगतीरुद्ध्वा मुखनासिकाभ्यांवायोर्निर्गमनंप्राणस्यगतिस्त द्विपर्य्ययेनाधोगमनमपानस्यते प्राणापानगती एतेरुद्ध्वानिरुध्यप्राणायामपराय णाःप्राणायामतत्पराःकुम्भकाख्यंप्राणायामंकुर्व्वन्तीत्यर्थः किञ्चअपरइति अपरे नियताहारा नियतः परिमितः आहारोयेषांते नियताहाराःसन्तःप्राणान्वायु भेदान्प्राणभेदेष्वेवजुह्वति यस्ययस्यवायोर्जयःक्रियते इतरान् वायुभेदांस्तस्मि न्जुह्वति ते तत्रप्रविष्टाइवभवन्ति २९

आनन्दगिरिकृतटीका।

यज्ञषट्कमवतारयति द्रव्येतीति तत्रद्रव्ययज्ञान्पुरुषानुपादायविभजते तीर्थेष्विति तपस्विनांयज्ञवुद्ध्यातपोनुतिष्ठतां नियमवतांइत्यर्थः प्रत्याहारादीत्या दिशब्दे नयमनियमासनध्यानधारणासमाधयोगृह्यन्ते यथाविधिप्राङ्मुखत्वपवित्र पाणित्वाद्यज्ञविधिमनतिक्रम्येतियावत् व्रतानांतिक्ष्णीकरणमतिदृढ़त्वं २८

भाषा अनुवाद।

औरकितनेहठयोगाभ्यासीमनुष्य अपानवायुमेप्राणवायुकोपूरकप्राणायामके द्वाराखैंचिकरहोमकरतेहैं अर्थात्पूरकसमैमेप्राणअपानएककरदेतेहैं और कोईकुंभकप्राणायामसेप्राणअपानबायुकोउर्द्धअधोगमनरोंककररेचककालमेअ पानबायुकोप्राणवायुमे अैंचिलेकरहोमकरतेहे लीनकरदेतेहैं अैसेही पूरक कुंभकरेचककेद्वारा प्राणायाममेतत्पररहतेहैं औरकोईकोईलोगआहारघटा यइन्द्रीशिथिलकरकेसोईसोईइन्द्रियवृत्तिकालयरूपहोमकरतेहैं अथवापूरक रेचकदोनोश्वासावन्दकरहंसऔसोहं इसकोअनुलोमकहे उलटपुलटरूप अजपामन्त्रकेद्वारातत्त्वमसिमहावाक्यसेकथित जोतत्पद औत्वंपद तिनकेअर्थके अनुसाब्रह्म जीवकीएकताअर्थात्सोब्रह्महमहैं औरहमसोब्रह्महै अैसीभाव नाकरतेहैं औरकोईप्राणायामहींकोयज्ञकहते अर्थात् उदरकेदोभाग अन्नसे पूर्णकरिऔएकभागपानीसेपूर्णकरिऔरवायुकेसंचारार्थ चतुर्थभागखा लीराखि बिधिकेअनुसारपरिमितअहारीजन कुंभककेद्वाराप्राणअपानकीगति रोधकरिप्राणदमनशीलहो सवइन्द्रियोंकोप्राणबायुमेहोमकरतेहैं अर्थात्कुं भकसेसबप्राणएकहोजातेऔरइन्द्रियगणलयकोप्राप्तहोताहै २९

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

प्राणायामाख्यं यज्ञमुदाहरति किञ्चेति प्राणायामपरायणाः सन्तोरेचकं पूरकञ्चकृत्वाकुम्भकंकुर्व्वन्तीत्याह प्राणेति प्राणापानयोर्गतीश्वासप्रश्वासौनिरुध्यकिंकुर्व्वन्तीत्यपेक्षायामाह किञ्चेति प्राणापानगतिनिरोधरूपं कुम्भकंकृत्वा पुनःपुनर्व्वायुजयंकुर्व्वन्तीत्यर्थः आहारस्यपरिमितत्वंहितत्वमेध्यत्वोपलक्षणार्थं प्राणानांप्राणेषु होममेवविभजते यस्येति जितेषुवायुभेदेष्वजितानांतेषां होमप्रकारंप्रकटयति तेतत्रेति २९

प्रकृतान्यज्ञानुपसंहरति सर्व्वेपीति यथोक्तयज्ञनिर्व्वर्त्तनानन्तरंक्षीणेकल्मषेकिं स्यादित्याशंक्याह एवमिति यथोक्तयज्ञानांमध्येकेनचिदपियज्ञेनविशेषितस्य पुरुषस्यप्रत्यवायंदर्शयति नायमिति पादान्तरेणकथंयथोक्तयज्ञानुष्ठायिनामवशिष्टेनकालेनविहितान्नभुजांब्रह्मप्राप्तिरित्याशंक्यमुमुक्षुत्वेसति चित्तशुद्धिद्वारेत्याह मुमुक्षवश्चेदिति तत्किमिदानींसाक्षादेवमोक्षोविवक्षितः तथाचगतिश्रुतिविरोधःस्यादित्याशंक्यगतिनिर्द्देशसामर्थ्यात् क्रममुक्तिरत्राभिप्रेतेत्याह कालातीति२९

स्वामिकृतटीका ।

किञ्च अपानेइति अपानेऽधोवृत्तौप्राणमूर्द्धवृत्तिंपूरकेनजुह्वति पूरककालेप्राणमपानेनैकीकुर्वन्ति तथाकुम्भकेनप्राणापानयोरूर्द्धाधोगती रुद्ध्वारेचककालेऽपानंप्राणेजुह्वति एवंपूरककुम्भकरेचकैःप्राणायामपरायणाअपरेइत्यर्थः किञ्चअपरेइति अपरेत्वाहारसंकोचमभ्यस्यन्तः स्वयमेवजीर्य्यमाणेष्विन्द्रियेषुतत्तदिन्द्रियवृत्तिलयंहोमंभावयन्तीत्यर्थः यद्वाअपानेजुह्वति प्राणंप्राणेपानंतथापरइत्यनेन पूरकरेचकयोरावर्त्यमानयोर्हंसःसोहमित्यनुलोमतःप्रतिलोमतश्चाभिव्यज्यमानेनाजपामन्त्रेणतत्वंपदार्थैक्यंव्यतीहारेणभावयन्तीत्यर्थः तदुक्तं योगशास्त्रेसकारेणबहिर्य्याति हकारेण विशेत् पुनः प्राणस्तवसएवाहमहंसइति चिन्तयेदिति प्राणापानगतीरुद्ध्वेत्यनेनश्लोकेन प्राणायामयज्ञाअपरेकथ्यन्ते तत्रायमर्थः द्वौभागौपूरयेदन्नैर्जलैरेकंप्रपूरयेत् मारुतस्यप्रचारार्थंचतुर्थमवशेषयेत् इत्येवमादिवचनोक्तनियताहारोयेषां तेकुम्भकेनप्राणापानगती रुद्ध्वाप्राणसंयमनपरायणाःसन्तःप्राणानिन्द्रियाणि प्राणेषुजुह्वतिकुम्भकेनहिसर्व्वेप्राणाएकीभवन्तितत्रैवलीयमानेष्विन्द्रियेषुहोमंभावयन्तीत्यर्थः तदुक्तंयोगशास्त्रे यथायथासदाभ्यासान्मनसःस्थिरताभवेत् वायुवाक्कायदृष्टीनांस्थिरताचतथातथेति२९

CC-0. In Public Domain. Digitized by eGangotri

सर्व्वेऽप्येतेयज्ञविदोयज्ञक्षयितकल्मषाः यज्ञशिष्टामृतभुजोयान्तिब्रह्मसनातनं ३०
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ३१

शाङ्करभाष्यम्

सर्व्वइति सर्वेऽप्येतेयज्ञविदोयज्ञक्षयितकल्मषाःयज्ञैर्यथोक्तैःक्षयितोनाशितोकल्मषोयेषांतेयज्ञक्षयितकल्मषाःएवंयथोक्तान्यज्ञान् निर्व्वर्त्तयन्तोयज्ञशिष्टामृतमुजोयज्ञानांशिष्टंयज्ञविष्टंयज्ञशिष्टञ्चतदमृतञ्चयज्ञशिष्टामृतं तत् भुञ्जतइतियज्ञशिष्टामृतभुजोयथोक्तान् यज्ञान्कृत्वातच्छिष्टेनकालेनयथाविधिचोदितमन्नममृताख्यंभुञ्जतइति यज्ञशिष्टामृतभुजोयान्तिगच्छन्तिब्रह्मसनातनंचिरन्तनंमुमुक्षवश्चेत् कालातिप्रमाणेक्षयेति शब्दसामर्थ्यात् गम्यते ३०

नायमिति नायंलोकःसर्व्वप्राणिसाधारणोऽप्यस्तियथोक्तानांयज्ञानामेकोपियज्ञोयस्यनास्तिसोऽयज्ञस्तस्यकुतोऽन्योविशिष्टसाधनसाध्यःकुरुसत्तम ३१

स्वामिकृतटीका ।

तदेवमुक्तानांद्वादशानांयज्ञविदांफलमाह सर्वेप्येतेइति यज्ञान्विन्दन्तिलभन्तइति यज्ञविदोयज्ञज्ञाइतिवायज्ञैःक्षयितं नाशितंकल्मषं यैःयज्ञान्कृतावशिष्टकालेऽनिषिद्धमन्नममृतरूपंभुञ्जतइतितथाते सनातनंनित्यंब्रह्मज्ञानद्वारेणप्राप्नुवन्ति ३०

तदकरणेदोषमाह नायमिति अयमल्पसुखोमिमनुष्यलोको अयज्ञस्ययज्ञानुष्ठानरहितस्यनास्ति कुतोऽन्योवऊसुखःपरलोकःअतो यज्ञाःसर्वथाकर्त्तव्या इत्यर्थः ३१

भाषा अनुवाद ।

एही पूर्व्वोक्तबारहप्रकारके यज्ञकारीयोंको प्राप्यफलकहतेहैं किऐसीयज्ञरूपक्रियाजिनकीजानीहै औरइनयज्ञोंसेजिनकेपापक्षयहोगयेहैं औरयज्ञसमाप्तकरचुकेशास्त्रविहित अमृत रूपअन्नभोजनकरतेहैं फेरतत्त्वज्ञानकेद्वारानित्यसत्यब्रह्मकोप्राप्तहोतेहैं सोईकहाकिसवयेयज्ञवित् यज्ञसेनष्टकल्मषकहेनिःपापहो यज्ञशिष्टअमृतभोगीसनातनब्रह्मकोजाते कहे प्राप्तहोतेहैं ३०

अबयज्ञनकरनेमेदोषकहतेहैं किदेखोयज्ञनकरनेवालोंकोयह अल्पसुखजोमनुष्यलोक सोई नहीं मिलताहै तो परलोक सुखफेरिकहां प्राप्तहोनाहै इससेयज्ञकोनिश्चयकरनाचाहिये कुरुसत्तम यहकैमुतिकन्यायसेदेखायाहै ३१

CC-0. In Public Domain. Digitized by eGangotri

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे
कर्म्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ३२

शाङ्करभाष्यं।

एवमिति एवंयथोक्तावहुविधावहुप्रकारायज्ञावितताविस्तीर्णाब्रह्मणोवेदस्य मुखेद्वारेवेदद्वारेणावगम्यमानाःब्रह्मणोमुखेवितता उच्यन्ते तद्यथावाचिहिप्राणंजुह्वमद्त्यादयःकर्म्मजान्कायिकवाचिकमानसकर्म्मोद्भवान्विद्धितान् सर्वाननात्मजान्निर्व्यापारोह्यात्माअतएवंज्ञात्वामोक्ष्यसेऽशुभात् नमह्यापाराद्मे निर्व्यापारोहमुदासीनइत्येवंज्ञात्वात्मात् सम्यग्दर्शनात् मोक्ष्यसे संसारबन्धनादित्यर्थः ३२

आनन्दगिरिकृतटीका

तृतीयंपादंव्याचष्टे नायमिति विवक्षितं कैमुतिकन्यायमाह कुतइति साधारणलोकाभावेपुनरसाधारणलोकप्राप्तिर्दूरनिरस्तेत्यर्थः यथोक्तेऽर्थेबुद्धिसमाधानं कुरुकुलप्रधानस्यअर्जुनस्यअनायास्यसलभ्यमितिवक्तुं कुरुसत्तमेत्युक्तं ३१

उक्तानांयज्ञानांवेदमूलत्वेनोत्पत्तिप्रतिबन्धनत्वं निरस्यति एवमिति आत्मव्यापारसाध्यत्वमुक्तकर्म्मणामाशंक्यदूषयति कर्म्मजानिति आत्मनोनिर्व्यापारत्वज्ञाने फलमाह एवमिति कथंयथोक्तानांयज्ञानांवेदस्यमुखेविस्तीर्णत्वमित्याशंक्याह वेदद्वारेणेति आत्मनोऽवगम्यमानत्वमेवोदाहरति तद्यथेति एतद्ध स्मवैतत्पूर्व्वेविद्वांसआहुरित्युपक्रमाध्ययनाद्याश्चिष्यहेत्वाकाङ्क्षायामुक्तंवाचिहीति ज्ञानशक्तिम

स्वामिकृतटीका

ज्ञानयज्ञंस्तोतुमुक्तान्यज्ञानुपसंहरति एवंबहुविधाइति ब्रह्मणोवेदस्यमुखेवितता वेदेनसाक्षाद्विहिता इत्यर्थः तथापितान्सर्व्वानवाङ्मनःकायकर्म्मजनितानात्मस्वरूपसंस्पर्शरहितान्विद्धिजानीहि आत्मनःकर्म्मणोऽगोचरत्वात् एवंज्ञात्वाज्ञाननिष्ठःसन् संसाराद्विमुक्तोभविष्यसि ३२

भाषा अनुवाद।

ज्ञानयज्ञकीप्रशंसाकरनेकेअर्थअवसर यज्ञोंकीचर्चाकरिन्यूनअधिकतारतम्य देखावतेऊये कहतेहैं किनानाप्रकारकोयज्ञोंवेदरूपमुखसेप्रत्यक्षविहित हैं परतौभी मनवचनशरीरकेकर्म्मसेउत्पन्नजोयज्ञहैं सकलआत्मस्वरूपस्पर्शसेरहितजानो अर्थात् उनसेआत्मज्ञाननहींहोता क्योंकिआत्माकर्मोंकाअगोचरकहे कर्म्मप्राप्यनहीं है इससेतुमज्ञाननिष्ठहोय संसारसेमुक्त होउगे यहजानो ३२

CC-0. In Public Domain. Digitized by eGangotri

श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप सर्वंकर्म्माखिलं पार्थ ज्ञाने परिसमाप्यते ३३

शाङ्करभाष्यं

ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्ययज्ञत्वं सम्पादितं यज्ञाश्चअनेकविधा उपदिष्टास्तैःसिद्धपुरुषार्थप्रयोजनैर्ज्ञानंस्तूयते कथंश्रयानिति श्रेयान्द्रव्यमया त्द्रव्यसाधनसाध्यात् यज्ञात् ज्ञानयज्ञःहेपरन्तपद्रव्यमयोहि यज्ञःफलस्यारम्भको नज्ञानयज्ञःफलस्यारम्भकोऽतः श्रेयान्प्रशस्यतरःकथं यतःसर्वंकर्म्मसमस्तमखिलंअप्रतिबद्धंपार्थज्ञानेमोक्षसाधनेसर्व्वतःसंप्लुतोदकस्थानीयेपरिसमाप्यतेऽन्तर्भवतीत्यर्थःयथाह्यतायविजितायाधारेयाः संयन्त्येवमेनंसर्व्वंतदभिसमेति यत्किञ्चित्प्रजाःसाधुकुर्व्वन्ति यस्तद्वेद यत्सवेदेति श्रुतेः ३३

आनन्दगिरिकृतटीका

द्विषयेक्रियाशक्तिमदुपसंहारोत्रविवक्षितः प्राणेवावाचंयोह्येवप्रभवःसएवाप्ययइति वाक्यमादिशब्दार्थःज्ञानशक्तिमतां क्रियाशक्तिमतांम्बान्योन्योत्पत्तिप्रलयत्वात्तदभावेनाध्ययनादिसिद्धिरित्यर्थः कर्म्मणामात्मव्यापारजन्यत्वाभावेहेतुमाह निर्व्यापारोहीति तस्य च निर्व्यापारत्वं फलवत्त्वाज्ज्ञातव्यमित्याह अतइति एवं ज्ञानमेवज्ञापयन्उक्तंव्यनक्ति नेत्यादिना ३२

कर्म्मयोगेनेकधाभिहिते सर्व्वस्यश्रेयःसाधनस्यकर्म्मात्मकत्वप्रतिपत्त्याकेवलंज्ञानमनादियमाणमर्ज्जुनमालक्ष्यवृत्तानुवादपूर्व्वकमुत्तरश्लोकस्य तात्पार्य्यमाह ब्रह्मेत्यादिना सिद्धेति सिद्धंपुरुषार्थभूतंपुरुषापेक्षितलक्षणं प्रयोजनंयेषां यज्ञानांतैरन्तरोपदिष्टैरिति यावत् प्रश्नपूर्व्वकंस्तुतिप्रकारंप्रकटयति कथमित्यादिना ज्ञानयज्ञ

भाषा अनुवाद।

अबज्ञानयज्ञकीश्रेष्ठता कहते हैं किजिसलियेआत्मव्यापाररहितजोद्रव्यमय देवताके अर्थयज्ञहैंतिससे ज्ञानयज्ञही श्रेष्ठजानोऔरयद्यपिज्ञानयज्ञमानसिक व्यापारकेअधीनहै तथापिआत्माकास्वरूपजोज्ञान सोकेवलमनकापरिणामअर्थात्ब्रह्मरूप होनामात्रहै औज्ञान कुछमानसव्यापारसे प्रगटनहीहै और ज्ञानकीश्रेष्ठतामेहेतु यह कि फलकेसहित सर्वकर्म्मतत्त्वज्ञानकेअन्तर्भूतहैं क्यों किलोगोंकेकियेजेयेसत्कर्म्म ज्ञानकेअनुगामीकहे साथहोतेहैं यह वेदमेकहाहै सोईइसश्लोकसेकहा कि श्रेष्ठहै द्रव्ययज्ञसेज्ञानयज्ञ हेपरन्तप औरसब कर्म्म हे पार्थअर्ज्जुनज्ञानमे परिसमाप्तकहे लीनहोतेहैं इसीसेज्ञानयज्ञश्रेष्ठहै ३३

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

स्यद्रव्ययज्ञात् प्रशस्यतरत्वेहेतुमाह श्रेयानिति द्रव्यसाधनसाध्यादित्युपलक्षणं स्वाध्यायादेरपि ततोपिज्ञानयज्ञस्यश्रेयस्त्वाविशेषात् द्रव्यमयादियज्ञेभ्योज्ञान यज्ञस्यप्रशस्यतरत्वंप्रपञ्चयति द्रव्यमयोहीति फलस्याभ्युदयस्येत्यर्थःनफलारम्भको नकस्यचित् फलस्योत्पादकःकिन्तु नित्यसिद्धस्यमोक्षस्यअभिव्यञ्जकइत्यर्थः तस्यप्र शस्यतरत्वेहेत्वन्तरमाह यतइति समस्तंकर्म्मेत्यग्निहोत्रादिकमुच्यते अखिलम विद्यमानं खिलंशेषोस्येत्यनल्पंमहत्तरमितियावत् सर्व्वमखिलमिति पदद्वयोपा दानमसङ्कोचार्थं सर्व्वंकर्म्मज्ञानेन्तर्भवतीत्यत्र छान्दोग्यश्रुतिंप्रमाणयति यथेति चतुरायकेहि द्यूतेकश्चिदायःचतुरङ्गः सन् कृतशब्देनोच्यते तस्मै [illegible] यतादर्थ्येनाधरेयास्तस्मादधस्ताद्भाविनस्त्रिद्व्येकाङ्कास्त्रेताद्वापरकलिनामानः संय न्त्यायाःसंगच्छन्ति चतुरङ्केखल्वायेत्रिद्व्येकाङ्कानामन्तर्भावोभवति महासंख्याया मवान्तरसंख्यान्तर्भावावश्यम्भावादेवमेनंविद्यावन्तं पुरुषंसर्वंतदाभिमुख्येन समेति सङ्गच्छति किंतत्सर्वंयद्विदुषिपुरुषेन्तर्भवति तदाह यत्किञ्चिदिति प्रजाःसर्व्वायत् किमपिसाधुकर्म्मकुर्वन्ति तत्सर्वमित्यर्थः एनमभिसमेतीत्युक्तं तमेवविद्यावन्तंपुरुषं विशिनष्टि यस्तदिति किंतदित्युक्तंतदेवविशदयति यत्सइति सरैक्वोयत्तत्त्व वेदत त्त्वंयोन्योपिजानाति तमेनंसर्वंसाधुकर्म्माभिसमेतीति योजना ७७

यद्येवंप्रशस्यतरमिदंज्ञानंतर्हिकेनोपायेनतत्प्राप्तिरिति पृच्छति तदेतदिति ज्ञानप्राप्तौप्रत्यासन्नमुपायमुपदिशति उच्यतइति तद्विज्ञानंगुरुभ्योविद्धि गुरवश्चप्र णिपातादिभिरुपायैरावर्ज्जितचेतसोवदिष्यन्तीत्याह तद्विद्धीति उपदेष्टृत्वमुपदेश कर्त्तृत्वं परोक्षज्ञानमात्रेणनभवतीत्याह उपदेक्ष्यन्तीति तदिति प्रेक्षितं ज्ञानसा धनंगृह्यते येनविधिनेति विशेषदर्शनात् यद्वा येनाचार्य्यावर्ज्जनप्रकारेणतदुपदे शवशादपेक्षितं ज्ञानंलभ्यते तथातज्ज्ञानमाचार्य्येभ्योलभस्वेत्यर्थःतदेवस्फुटयति आचार्य्यानिति एवमादिनेत्यादिशब्देनशमादयोगृह्यन्तेएवमादिनाविद्धीति पूर्वेण

स्वामिकृतटीका।

ज्ञानयज्ञस्तुश्रेष्ठइत्याह श्रेयानिति द्रव्यमयादनात्मव्यापारजन्याद्दैवादियज्ञा त्ज्ञानयज्ञःश्रेष्ठः यद्यपिज्ञानस्यापिमनोव्यापाराधीनत्वमस्त्येव तथाप्यात्मस्वरू पस्यज्ञानस्यमनःपरिणामेअभिव्यक्तिमात्रंतज्जन्यत्वमिति द्रव्यमयाद्विशेषःश्रेष्ठ त्वेहेतुः सर्व्वंकर्माखिलंफलसहितं ज्ञानेपरिसमाप्यते अन्तर्भवतीत्यर्थःसर्व्वंतद भिसमेति यत्किञ्चित्प्रजाःसाधुकुर्व्वन्तीतिश्रुतेः ३३

CC-0. In Public Domain. Digitized by eGangotri

तद्विद्धिप्रणिपातेनपरिप्रश्नेनसेवया उपदेक्ष्यन्तितेज्ञानंज्ञानिनस्तत्त्वदर्शिनः ३४

शाङ्करभाष्यम्

तदेतद्विशिष्टं ज्ञानं तर्हि केन प्राप्यत इत्युच्यते तद्विद्धीति तद्विद्धि विजानीहि येन विधाना प्राप्यत इत्याचार्य्यानभिगम्य प्रणिपातेन प्रकर्षेण नीचैः प्रपतनं प्रणिपातो दीर्घनमस्कारः तेन कथं बन्धः कथं मोक्षः का विद्या का चाविद्येति परिप्रश्नेनसेवया गुरुशुश्रूषयैवमादिना प्रश्रयेणावर्जिता आचार्य्या उपदेक्ष्यन्ति कथयिष्यन्ति ते ह्यानं यथोक्तविशेषणं ज्ञानिनोज्ञानवन्तोपि केचिद्यावत्तद्दर्शनशीलाश्च नभवन्ति अपरेतु भवन्त्यतोविशिनष्टितत्त्वदर्शिन इति ये सम्यग्दर्शिनस्तैरुपदिष्टं ज्ञानं कार्य्यक्षमं भवति नेतरदिति भगवतोमतं ३४

आनन्दगिरिकृतटीका।

सम्बन्धः उत्तरार्द्धंव्याचष्टे प्रश्रयेणेति प्रश्रयोभक्तिश्रद्धापूर्व्वकोनिरतिशयोऽवनतिविशेषःयथोक्तविशेषणंपूर्वोक्तेनप्रकारेणप्रशस्यतमंमित्यर्थः विशेषणस्यपौनरुक्तिपरिहारार्थमर्थभेदंकथयति ज्ञानवन्तोपीति ज्ञानिनइत्युक्त्वापुनस्तत्त्वदर्शिनइति ब्रुवतोभगवतोभिप्रायमाह येसम्यगिति वक्तृवचनञ्चैतदाचार्य्यविषयंवक्तृभ्यःश्रोतव्यंवक्तृभ्याचेति सामान्यन्यायाभ्यनुज्ञानार्थंनत्वात्मज्ञानमधिकृत्य आचार्यवक्तृत्वं विवक्षितं तस्य तत्त्वसाक्षात्कारवदाचार्यमात्रोपदेशादेवोदयसम्भवात् ३४

स्वामिकृतटीका।

एवंभूतात्मज्ञाने साधनमाह तदिति तज्ज्ञानंविद्धिजानीहि प्राप्नुहीत्यर्थः ज्ञानिनांप्रणिपातेननमस्कारेण ततः परिप्रश्नेनकृतोऽयंममसंसारःकथंवानिवर्त्ततेइति परिप्रश्नेनसेवयागुरुशुश्रूषयाचज्ञानिनःशास्त्रज्ञास्तत्त्वदर्शिनोऽपरोक्षानुभवसम्पन्नाश्चतेतुभ्यंज्ञानमुपदेशेनसम्पादयिष्यन्ति ३४

भाषा अनुवाद।

जोकहोकि भलाजिसज्ञानकीऐसीप्रशंसाकरतेहो सोकिसप्रकारसेप्राप्तहोय तो ज्ञानकेसाधनकहे उपायकहतेहैं किज्ञानीपुरुषोंकेनिकटजायनम्रतासेप्रणामकरप्रश्नकरै कि किसकारणसेहमकोयहसंसारभया औरकैसेनिवृत्तहोगा औरगुरूकीसेवाशुश्रषाकरनेसेतुमको सोतत्त्वज्ञानमिलैगा औरज्ञानीजोज्ञानतथातत्त्वदर्शीजोहैं वेतुमकोउपदेश दैकर तत्त्वज्ञानसंपन्नकरदेयंगे सोईकहतेकिदण्डवत तथाप्रश्न औ सेवाकरनेसे तत्त्वदर्शीज्ञानीलोग तुमकोज्ञानउपदेश करैंगे औरजैसेबन्धऔ मोक्ष तथाज्ञानऔ अज्ञान क्याहै सोकहैंगे ३४

CC-0. In Public Domain. Digitized by eGangotri

यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपाण्डव येनभूतान्यशेषेणद्रक्ष्यस्यात्मन्यथोमयि ३५

शाङ्करभाष्यं

तथाचसतीदमपिसमर्थंवचनं यदिति यत्ज्ञात्वायत्ज्ञानंतैरुपदिष्टमधिगम्य प्राप्यपुनर्भूयोमोहमेवंयथेदानींमोहंगतोऽसि पुनरेवंनयास्यसिहेपाण्डव किञ्च येनज्ञानेनभूतान्यशेषेणब्रह्मादीनिस्तम्बपर्य्यन्तानिद्रक्ष्यसि साक्षादात्मनिप्रत्यगात्मनिमत्संस्थानीमानिभूतानीति अथोअपिमयिवासुदेवेपरमेश्वरेचेमानीति क्षेत्रज्ञेश्वरैकत्वंसर्व्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः ३५

आनन्दगिरिकृतटीका।

विशिष्टैराचार्य्यैरुपदिष्टेज्ञानेकार्य्यत्वमेप्राप्तेसतिसमनन्तरवचनमप्रियेऽग्र विषयमर्थवद्भवतीत्याह तथाचेति अतस्तस्मिन्विशिष्टेज्ञानेत्वदीयमोहापोहहेतौ निष्ठावताभवताभवितव्यमिति शेषः तत्रनिष्ठाप्रतिष्ठायैतदेवज्ञानंपुनर्व्विशिनष्टि येनेति यज्ज्ञात्वेत्ययुक्तंज्ञानायोगादित्याशंक्यप्राप्तार्थत्वमधिपूर्व्वंस्वगमेरङ्गीकृत्य व्याकरोति अधिगम्येति इतश्चाचार्योपदेशलभ्येज्ञानेफलवति प्रतिष्ठावताभवितव्यमित्याह किञ्चेति जीवेचेश्वरेचोभयत्रभूतानांप्रतिष्ठितत्वप्रतिनिर्देशेभेदवादानुमतिःस्यादित्याशंक्याह क्षेत्रज्ञेति मूलप्रमाणाभावेकथंतदेकत्वदर्शनंस्यादित्याशंक्याह सर्व्वेति ३५

स्वामिकृतटीका।

ज्ञानफलमाह यज्ज्ञात्वेति सार्द्धैस्त्रिभिः यज्ज्ञानंज्ञात्वाप्राप्य पुनर्व्वन्धुवधादिनिमित्तंमोहंनप्राप्स्यसि तत्रहेतुर्येनज्ञानेनभूतानिपितृपुत्रादीनि स्वाविद्याविजृम्भितानिआत्मन्येवाभेदेनद्रक्ष्यसि अथोअनन्तरंआत्मानंमयिपरमात्मन्यभेदेनद्रक्ष्यसीत्यर्थः ३५

भाषाअनुवाद।

अबसाढ़े ३ श्लोकसेतत्त्वज्ञानकाफलकहतेहैं कितत्त्वज्ञानहोनेसेफेरिऔर बन्धुवधनिमित्तऐसेमोहको नप्राप्तहोउगे कारणयह किज्ञानसंपतिहोनेसेअपनेअज्ञानवशतेप्रगट जोपितापुत्रभाईबन्धु तिनकोअपनेआत्मासेभिन्ननदेखोगे औरसाक्षात्परमात्मारूपहमसे औरअपनेआत्मासे अभेददेखोगे सोईकहतेकिजिसज्ञानकोजानिके हेपाण्डव फेरिऐसेमोहकोनपावोगे औरजिसमेसम्पूर्णप्राणीयोंको अपने और मेरेमे देखोगे सोतत्त्वज्ञान महात्मोंसे मिलैगा ३५

CC-0. In Public Domain. Digitized by eGangotri

अपिचेदसिपापिभ्यः सर्वेभ्यः पापकृत्तमः सर्वंज्ञानप्लवेनैववृजिनंसन्तरिष्यसि ३६

शाङ्करभाष्यं।

किञ्चैतस्यज्ञानस्यमाहात्म्यं अपीति अपिचेदसिपापिभ्यःपापकृद्भ्यःसर्वेभ्यः सकाशादतिशयेनपापकृत् पापकृत्तमःयद्यसिभवसिसर्वंज्ञानप्लवेनैवज्ञानमेवप्लवं ज्ञानप्लवंकृत्वावृजिनंवृजिनार्णवंपापंसन्तरिष्यसिधर्म्मोपीहमुमुक्षोःपापमुच्यते ३६

ज्ञानंकथंनाशयति पापमिति सदृष्टान्तमुच्यते यथेति यथाएधांसिकाष्ठा निसमिद्धःसम्यक्इद्धोदीप्तोऽग्निर्भस्मसात्भस्मीभावंकुरुतेअर्जुनएवंज्ञानमेवअग्नि र्ज्ञानाग्निःसर्वकर्माणिभस्मसात् कुरुते तथानिर्बीजंकरोतीत्यर्थःनहिसाक्षादेव ज्ञानाग्निःतानिकर्माणीन्धनवद्भस्मीकर्त्तुंशक्नोति तस्मात् सम्यक्दर्शनंसर्वकर्म्मणां निर्बीजत्वेकारणमित्यभिप्रायःसामर्थ्यात् येनकर्म्मणाशरीरमारब्धंतत् प्रदत्तफ लत्वादुपभोगेनैवक्षीयतेऽतोयान्यप्रदत्तफलानिज्ञानोत्पत्तेः प्राक्कृतानिज्ञानसह भावीनिचातीतानेकजन्मकृततानिच तान्येवसर्वाणिभस्मसात् कुरुते ३७

आनन्दगिरितटीका

ज्ञानस्यप्रकरान्तरेणप्रशंसांप्रस्तौति किञ्चेति पापकारिभ्यःसर्वेभ्यःसका शादतिशयेनपापकारित्वमेकस्मिन्नसम्भावितमपिज्ञानमाहात्म्यप्रसिद्ध्यर्थमङ्गीक त्यब्रवीति अपिचेदिति ब्रह्मात्मैक्यज्ञानस्यसर्वपापनिवर्त्तकत्वेनमाहात्म्यमिदानींप्र कटयति सर्वमिति अधर्म्मेनिवृत्तेपिधर्म्मरूपप्रतिबन्धान्नज्ञानवतोपिमोक्षःसम्भव तीत्याशंक्याह धर्म्मोपीति इहेत्यध्यात्मशास्त्रंगृह्यते ३६

स्वामिकृतटीका।

किञ्च अपिचेदिति सर्वेभ्योऽपिपापकारिभ्योयद्यप्यतिशयेनपापकारीत्वम सि तथापिसर्वंपापसमुद्रंज्ञानप्लवेनैवज्ञानपोतेनैवसम्यगनायासेनतरिष्यसि ३६

भाषा अनुवाद।

और जोसबपापीमनुष्योंसेभी तुमअधिकपापीहोउ तौभीपापरूपसमुद्रकोज्ञा नरूपनौकाकेद्वाराअनायासउतरिजावगे तात्पर्य्ययहकिजोतुमनेकहाथाकिपाप मेबाध्येदस्मान् अर्थात् कुटुम्बकेमारनेसेहमेबड़ाहीपापहोगा औरबन्धवधरूप दुःखसागरकेपारकैसेजायंगे सोयहअज्ञानसेतुमारीभूलसहजउपाय आत्मज्ञानसे छूटजायगीऐसेकहिकरश्रीभगवाननेज्ञानकामहात्मकहा ३६

CC-0. In Public Domain. Digitized by eGangotri

यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ३७

आनन्दगिरिकृतटीका।

ज्ञानेसत्यपि धर्माधर्म्मयोरुपलम्भात्कुतस्तयोस्ततोनिवृत्तिरित्याशंक्य ज्ञानस्य धर्माधर्म्मनिवर्त्तकत्वं दृष्टान्तेनदर्शयितुमनन्तरश्लोकमवतारयति ज्ञानमिति यो ग्यायोग्यविभागेननिवर्तकत्वानिबर्त्तकत्वविभागमुदाहरति यथेति दृष्टान्तानुरूपं दार्ष्टान्तिकमाचष्टे ज्ञानाग्निरिति योग्यविभागेपि दाहकत्वमग्नेरप्रतिबन्धापेक्षये ति विवक्षित्वाविशिनष्टि सम्यगिति दार्ष्टान्तिकंव्याचष्टे ज्ञानमेवेति ननुज्ञानंसा क्षादेवकर्म्मदाहकंकिमिति वोच्यते निर्बीजंकरोति कर्मेति किमिति व्याख्यानमि त्याशंक्याह नहीति ज्ञानस्यस्वप्रमेयावरणाज्ञानापाकरणेसामर्थ्यस्यलोकेदृष्टत्वाद् विक्रियब्रह्मात्मज्ञानमपितदज्ञानंनिवर्तयन्तज्जन्यकर्त्तृत्वभ्रमंकर्म्मबीजभूतं निवर्त यति तन्निवृत्तौचकर्म्माणिनस्थातुं पारयन्ति नतुसाक्षात्कर्म्मणानिवर्त्तकंज्ञानंअज्ञा नस्यैवनिवर्त्तकमिति व्याप्तेस्तदनिवृत्तौतु पुनरपिकर्म्मोद्भवसम्भवादित्यर्थः ज्ञान स्यसाक्षात्कर्म्मनिवर्तकत्वाभावेफलितमाह तस्मादिति सम्यग्ज्ञानंमूलभूताज्ञा ननिवर्तनेनकर्मनिबर्त्तकमिष्टञ्चेदारब्धफलस्यापिकर्म्मणोनिवृत्तिप्रसङ्गात् ज्ञानो दयसमकालमेव शरीरपातः स्यादित्याशंक्याह सामर्थ्यादिति ज्ञानोदयसमस मयमेवदेहापोहे तत्त्वदर्शिभिरुपदिष्टंज्ञानंफलवदितिभगवदभिप्रायस्यबाधितत्व प्रसङ्गादाचार्य्यलाभान्यथानुपपत्त्याप्रवृत्तफलकर्म्मसम्पादकमज्ञानलेशंननाशयति ज्ञानमित्यर्थः कथंतर्हि प्रारब्धफलंकर्मनश्यतीत्याशंक्याह येनेति तर्हि कथंज्ञा नाग्निः सर्व्वकर्म्माणिभस्मसात् करोतीत्युक्तंतत्राह अतइति ज्ञानादारब्धफलानां कर्म्मणांनिवृत्त्यनुपपत्तेरनारब्धफलानियानिकर्माणि पूर्व्वंज्ञानोदयादस्मिन्नेवज न्मनिकृतानिज्ञानेनचसहवर्त्तमानानि प्राचीनेषुचानेकेषुजन्मस्वर्जितानि तानिस र्व्वाणिज्ञानंकारणनिबर्त्तनेन निवर्त्तयतीत्यर्थः ३७

भाषा अनुवाद।

जोपूर्व्वश्लोकमेकहा किज्ञाननौकासेपापसमुद्रकोउतरिजाउगे सोठीकहै परपापतोवनारहा इससन्देहपरदृष्टान्तदेकर कहतेहैं किहेअर्जुनजैसेप्रज्व लितअग्निकाष्ठसमूहको भस्मकरदेतोहै तैसेही ज्ञानअग्निभीप्रारब्धकर्मकोछो ड औरसम्पूर्णसंचित आगामीकर्मोकोनाशकरतीहै इसमेकुछसन्देहनकरो ३७

CC-0. In Public Domain. Digitized by eGangotri

नहिज्ञानेनसदृशंपवित्रमिहविद्यते तत्स्वयंयोगसंसिद्धिःकालेनात्मनिविन्दति ३८

शाङ्करभाष्यम्।

यतएवमतः नहीति नहिज्ञानेनसदृशंतुल्यंपवित्रंपावनंशुद्धिकरमिहविद्यते हियस्मात् तत्ज्ञानंस्वयमेवयोगसंसिद्धोयोगेनकर्म्मयोगेनसमाधियोगेनचसंसिद्धः संस्कृतोयोग्यतामापन्नोमुमुक्षुःकालेनमहताआत्मनिविन्दतिलभतइत्यर्थः ३८

आनन्दगिरिकृतटीका।

नन्वन्येनैवपरमपरिशुद्धिकरेणकेनचिदश्वमेधादिनापरमपुरुषार्थसिद्धेरन्यमात्मज्ञानेनेत्याशंक्याह यतइति पूर्व्वोक्तेनप्रकारेणज्ञानमाहात्म्यंयतःसिद्धमतस्तेनज्ञानेनतुल्यंपरिशुद्धिकरंपरमपुरुषार्थोपयिकमिहव्यावहारभूमौनास्तीत्यर्थः तत्पुनरात्माविषयंज्ञानंसर्व्वेषांकिमिति झटिति नोत्पद्यते तत्राह तत् ज्ञानंस्वयमिति महताकालेनयथोक्तेनसाधनेनयोग्यतामापन्नःतदधिकृतः स्वयंतदात्मनिज्ञानंविन्दतीतियोजना सर्व्वेषांझटिति ज्ञाननुदयोयोग्यतावैधूर्य्यादिति भावः ३८

स्वामिकृतटीका।

समुद्रवत् स्थितस्यैवपापस्यअतिलङ्घनमात्रंनतु पापस्यनाशइतिभ्रान्तिं दृष्टान्तेनवारयन्नाह यथैधांसीति एधांसिकाष्ठानिप्रदीप्तोऽग्निर्यथाभस्मीभावंनयति तथात्मज्ञानस्वरूपोऽग्निःप्रारब्धकर्मफलव्यतिरिक्तानिसर्व्वाणिकर्म्माणिभस्मीकरोतीत्यर्थः ३७

तत्रहेतुमाह नहीति पवित्रं शुद्धिकरंदृष्टफलयोगादिषुमध्येज्ञानतुल्यंनास्त्येवतर्हिसर्व्वेऽपिकिमिति आत्मज्ञानमेवनाभ्यस्यन्तीत्यतआह तत्स्वयमिति सार्द्धेन तदात्मविषयेज्ञानंकालेनमहताकर्म्मयोगेनसंसिद्धोयोग्यतांप्राप्तःसन् स्वयमेवानायासेनलभते नतुकर्म्मयोगं विनेत्यर्थः ३८

भाषा अनुवाद।

तिसकाकारणयहहै किसंसारमेतपदानव्रतयज्ञआदिकेभीच ज्ञानकेसमानकोईभीचित्तशुद्धनहींकरतेहैं तोफेरिसबमनुष्यक्योंनहींज्ञानहींकाअभ्यासकरतेइसपरडेढ़श्लोकसेकहतेहैं किबहुतकालकर्मयोगकरनेसेशुद्धचित्तहोयसहजमेंलोगआत्माकातत्त्वज्ञानलाभकरतेहैं परन्तुनिष्कामकर्मयोगरूपजोभक्तिहै सकेविनातत्त्वज्ञान नहीं होताहै सोईकहाकिनहि ज्ञानेनसदृशंपवित्रमिहइति ३८

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः
ज्ञानं लब्ध्वापरंशान्तिमचिरेणाधिगच्छति ३९

शाङ्करभाष्यं

येनैकान्तेनज्ञानप्राप्तिर्भवति सउपायउपदिश्यते श्रद्धावानिति श्रद्धावान्श्रद्धालुर्लभते ज्ञानंश्रद्धालुत्वेऽपिभवति कश्चिन्मन्दप्रस्थानोऽतआह तत्परोगुरूपासनादावभियुक्तोज्ञानलब्ध्युपायेश्रद्धावांस्तत्परोऽप्यजितेन्द्रियःस्यादित्यत आह संयतेन्द्रियःसंयतानिविषयेभ्योनिवर्त्तितानियस्येन्द्रियाणिससंयतेन्द्रियोयोगी य एवम्भूतः श्रद्धावांस्तत्परःसंयतेन्द्रियश्चसोऽवश्यंज्ञानंलभतेप्रणिपातादिस्तुवाह्यानैकान्तिकोपिभवतिमायावित्वादिसम्भवात् नतुतथातच्छ्रद्धावत्त्वादावित्येकान्ततोज्ञानलब्ध्युपयःकिंपुनर्ज्ञानलाभात् स्यादित्युच्यते ज्ञानं लब्ध्वापरांमोक्षाख्यांशान्तिमुपरतिमचिरेणक्षिप्रमेवाधिगच्छतिसम्यग्दर्शनात् क्षिप्रमेव मोक्षो भवतीति सर्व्वशास्त्रन्यायप्रसिद्धः सुनिश्चितोऽर्थः ३९

आनन्दगिरिकृतटीका।

कर्मभोगेनसमाधियोगेनचसम्पन्नस्यज्ञानोत्पत्तावन्तरङ्गसाधनमुपदिशति येनेति ज्ञानलाभेप्रयोजनमाह ज्ञानमिति नकेवलंश्रद्धालुत्वमेवसहायंज्ञानलाभेहेतुरपितु तात्पर्यमपीत्याह श्रद्धालुत्वेपीति मन्दप्रस्थानत्वंतात्पर्यविधुरत्वंनचतस्योपदिष्टमपिज्ञानमुत्पत्तुमीष्टे तेनतात्पर्यमपि तत्रकारणंभवतीत्याह अतआहेति अभियुक्तोनिष्ठावान् उपासनादावित्यादिशब्देनश्रवणादिगृह्यते नकेवलंश्रद्धातत्पर्यञ्चेत्युभयमेवज्ञानकारणंकिन्तु संयतेन्द्रियत्वामपितदभावेश्रद्धादेरकिञ्चित्करत्वादित्याशयेनाह श्रद्धावानिति उक्तसाधनानांज्ञानेनसहैकान्तिकत्वमाह य एवम्भूत इति तद्विद्धिप्रणिपातेनेत्यादौप्रागेवप्रणिपातादेर्ज्ञानहेतोरुक्तत्वात् किमि

भाषाअनुवाद

औरभीकहते हैं किश्रद्धावान्कहेआचार्यतथागुरूकेउपदेशमेविश्वासकरि आस्तीकबुद्धिहोतत्परकहेएकउसीउपदेशमेदत्तचित्तहोऔरइन्द्रियोंकोवशराखिकर वहतत्त्वज्ञान लाभकरैंहैं इसीसेज्ञानलाभकेपहिलेश्रद्धापूर्व्वक चित्तशुद्धिके अर्थनिष्कामभक्तियोगकरनाउचितहै औरज्ञानहोनेपरज्ञानीकोफेरिअन्यकोई कर्मकरनानहीं है सोईकहतें हैं कितत्त्वज्ञानीज्ञानलाभकेअनन्तरअचिरात् कहे अल्पकालमेझटपट मोक्षकोपावते हैं इस्मेसन्देह नहीं ३९

CC-0. In Public Domain. Digitized by eGangotri

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ४०

आनन्दगिरिकृतटीका।

तोदानींहेत्वन्तरमुच्यते तत्राह प्रणिपातादिस्त्विति तद्विवहिरङ्गमिदंपुनरन्तरङ्गंनचतत्र ज्ञानेनप्रतिनियमोमनस्यन्यथाकृत्वावहिरन्यथाप्रदर्शनात्मनोमायाविित्वस्यसम्भवादिप्रलम्भकत्वादेरपि सम्भावनोपनीतत्वादित्यर्थः मायावित्वादेःअश्रद्धात्वात्तात्पर्य्यादावपिसम्भवादनैकान्तिकत्वमविशिष्टमित्याशंक्याह नत्विति नहि मायया विप्रलम्भेनवा अश्रद्दातात्पर्यसंयमानियोगतो निष्ठातुमर्हतीत्यर्थः उत्तरार्द्धंप्रश्नपूर्व्वकमवतार्य्याकरोति किंपुनरित्यादिना सम्यग्ज्ञानादभ्यासादिसाधनानपेक्षान्मोक्षोभवतीत्यत्रप्रमाणमाह सम्यग्दर्शनादिति श्रास्त्रशब्देनतमेवविदित्वा ज्ञानादेवतुकैवल्यमित्यादिविवक्षितं न्यायस्तुज्ञानादज्ञाननिवृत्तेरज्ञादौप्रसिद्धत्वात्आत्मज्ञानादपिनिरपेक्षादज्ञानतत्कार्यप्रक्षयलक्षणोमोक्षः स्यादित्येवंलक्षणं ३९

भाषा अनुवाद।

तत्त्वज्ञानकेअधिकारीकोकहिकरि अबअनधिकारीजोअज्ञानीतिसकालक्षणकहतेहैं कि एकतो शास्त्रअरुगुरूतथाआचार्य्यकाउपदेशकभीसुनानहीं और जो दैवात् सुनाभी तोसभझानहीं औरजोकुछकिमीतरहससझाभी तो उसमे अश्रद्धाअर्थात् विश्वासनभईऔरजोकहनेसुननेसेविश्वासभीआई तो यह अर्थकहे प्रयोजन हमारासिद्धहोयकिनहोय इससंशयमेपडगये ऐसेलक्षणोंसेभरेपूरे जो अलक्षणीअज्ञानीलोगहैं उनकामतलबकभीनहींहोता अर्थात् अपनेमनोरथसेभ्रष्टहोते हैं उनीकोनष्टप्राणीकहते हैं परन्तु ऊपरकहे जोअज्ञानीऔ अश्रद्धाहीनतथासंशयग्रस्त इनतीनकेमध्यमेसंशययुक्तचित्तमनुष्यअक्षीतरह अपने मनोरथसेभ्रष्टहोताहै क्योंकि उसकोहरकामऔहरबातमेसन्देह लगीरहतो है क्याधनउपार्जनक्याबिवाहक्यादानधर्म्मक्याअपनासुख खानापहिरनालेनादेनाआदिसबकामोमेसंशयकेमारे क्षणभरभीसुखनहीं फेरिऔरोंकोदेखिहमकुछनहींकरते यहचिन्ताजुदीशिरपरचढीरहतीहै तौफेरि संशयकेकारणधर्म्मनहोनेसे स्वर्गादिभीनहीमिलता और संसार मे तो धननाशकीसंदेहकरसंसारिकसुखसेहाथधोहीबैठेहैं तो उनकेलोकपरलोकदोनोसुखचलेगये केवलचिन्ताकेचितामेंबैठेधीरेधीरेजरिजरायकेमाटीमेमिलगयेमूर्खतासेइथाजन्मचलागया सोईकहाकि अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यतिइति इससेतुमसंशयछोड़ो

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

अत्र संशयोहि नकर्त्तव्यःपापिष्ठोहि संशयः कथमित्युच्यते अज्ञश्चेति अज्ञश्चानात्मज्ञोऽश्रद्दधानश्चसंशयात्माचविनश्यति अज्ञाश्रद्दधानौयद्यपिविनश्यतःतथापिनतथायथासंशयात्मा सतु पापिष्ठःसर्वेषां कथंनायंसाधारणोपिलोकोऽस्तितथानपरलोको न सुखंतत्रापि संशयोपपत्तेःसंशयात्मनःसंशयचित्तस्य तस्मात् संशयोनकर्त्तव्यः ४०

आनन्दगिरिकृतटीका

उत्तरश्लोकस्यपातनिकांकरोति अत्रेति यथोक्तसाधनवानुपदेशमपेक्ष्याचिरेणब्रह्मसाक्षात् करोति साक्षात्कृतब्रह्मत्वेऽचिरेणैवमोक्षंप्राप्नोतीत्येषोऽर्थः सम्प्रत्यपरास्यते संशयस्याकर्त्तव्यत्वे हेतुमाह पापिष्ठोहीति उक्तंहेतुं प्रश्नपूर्वकमुत्तरश्लोकेनसाधयति कथमित्यादिना अज्ञादश्रद्दधानाच्चसंशयचित्तस्यविशेषमादर्शयतिनायमिति द्वितीयभागविभजनार्थंभूमिकांकरोति अज्ञेति अज्ञादीनां मध्येसंशयात्मनो यत्पापिष्ठत्वं तत् प्रश्नद्वाराप्रकटयति कथमिति श्लोकद्वयस्थतत्प्रयुक्तसुखस्यचाभावेहेतुमाह तत्रापीति संशयचित्तस्यसर्वत्र संशयप्रवृत्तेर्दुर्निवारत्वादित्यर्थः संशयस्यानर्थमूलत्वेस्थिते फलितमाह तस्मादिति ४०

यद्यपिसंशयःसर्वानर्थहेतुत्वात्कर्त्तव्योनभवति तथापिनिवर्त्तकाभावे तत्करणमस्वाधीनमिति शङ्कते कस्मादिति श्रुतियुक्तिप्रयुक्तमैक्यज्ञानं तन्निवर्त्तकमित्युत्तरमाह ज्ञानेनेति संशयरहितस्यापिकर्माण्यनर्थहेतूनि भवन्तीत्याशंक्याह

स्वामिकृतटीका।

किञ्च अश्रद्दधानेति अश्रद्दधान् गुरूपदिष्टेऽर्थेआस्तिक्यबुद्धिमान् तत्परस्तदेकनिष्ठःसंयतेन्द्रियश्च तज्ज्ञानं लभते नान्यः अतःश्रद्धादिसम्पत्तेराज्ञानलाभात् प्राक्कर्मयोगएव शुद्ध्यर्थमनुष्ठेयः ज्ञानलाभानन्तरन्तुनतस्यकिञ्चित्कर्त्तव्यमित्याह ज्ञानंलब्ध्वातु मोक्षमचिरेण प्राप्नोति ३९

ज्ञानाधिकारिणमुक्त्वातद्विपरीतमनधिकारिणमाह अज्ञश्चेति अज्ञागुरूपदिष्टार्थानभिज्ञाकथञ्चिज्ज्ञानेजातेऽपितत्राश्रद्दधानश्चजातायामपिश्रद्धायां ममेदंसिध्येन्नवेति संशयाक्रान्तचित्तश्चविनश्यति स्वार्थात्भ्रश्यति एतेषुत्रिष्वपिसंशयात्मा सर्वथानश्यति यतस्तस्यायंलोकोनास्ति धनार्जनविवाहाद्यसिद्धेःनचपरलोकोधर्मस्यानिष्पत्तेः नचसुखं संशयेनैवभोगस्याप्यसम्भवात् ४०

CC-0. In Public Domain. Digitized by eGangotri

योगसंन्यस्तकर्माणंज्ञानसंछिन्नसंशयं आत्मवन्तंनकर्माणिनिबध्नन्तिधनञ्जय ४१

शाङ्करभाष्यं

कस्मात् योगेति योगसंन्यस्तकर्म्माणं परमार्थदर्शनलक्षणेनयोगेन संन्यस्ता निकर्म्माणि येनपरमार्थदर्शिनाधर्म्माधर्म्माख्यानितं योगसंन्यस्तकर्माणं कथंयोग संन्यस्तकर्म्मेत्याह ज्ञानेनात्मेश्वरैकत्वदर्शनलक्षणेन संछिन्नसंशयोयस्यसज्ञानसं छिन्नसंशयःयएवंयोगसंन्यस्तकर्मा तमात्मवन्तमप्रमत्तं गुणचेष्टारूपेण दृष्टानि न कर्माणिनिबध्नन्ति अनिष्टादिरूपंफलं नारभन्ते हेधनञ्जय ४१

आनन्दगिरिकृतटीका।

योगेति विषयपरवश्यपुंसोयोगायोत् कुतोयोगसंन्यस्तकर्मत्वमित्याशंक्याह आत्मवन्तमिति परमार्थदर्शनतः संशयोच्छित्तौतदुच्छेदकज्ञानमाहात्म्यादेवक र्मणाञ्चनिवृत्तावप्रमत्तस्य प्रातिभासिकानिकर्माणिबन्धहेतवोनभवन्तीत्याह नक र्माणीति कर्मयोगादेवकर्मसंन्यासस्यानुपपत्तिमाशंक्यआद्यंपादंविभजते परमा र्थेति तत्रवैधर्म्यासपक्षेपरोक्षंफलसंन्यासपक्षेत्वपरोक्षमिति विवेकः यथो क्तज्ञानेनसंन्यस्तकर्मत्वमेवसतिसंशये नसिध्यति संशयवतस्तदयोगादिति शङ्कते कथमिति द्वितीयंपादंव्याकुर्वन्परिहरति आहेत्यादिना पाठक्रमादर्थक्रमस्य बलीयस्त्वादादौद्वितीयंपादंव्याख्याय पश्चादाद्यंपादं व्याचष्टेत्याह एवमिति सर्वमिदंप्रमादवतो विषयपरवशस्य नसिध्यतीत्यभिसन्धाय आत्मवन्तंव्याकरोति अप्रमत्तमितिनकर्माणीत्यादिफलोक्तिंव्याचष्टेगुणचेष्टेति अनिष्टादीत्यादिशब्देन दृष्टमिश्रञ्च गृह्यते ४१

भाषा अनुवाद।

दूसरेऔतीसरेअध्यायमे कहा जो कर्मनिष्ठाऔ ज्ञाननिष्ठा सोईदोश्लोकसे कहते हैं किजिसनेभगवतआराधनरूपसबकर्म अन्तर्यामीभगवानकोअर्पितकि याहै औसामनुष्य अपनेकर्मफलसेकभीबद्धनहीं होता औरहमकोईकर्मनहींकर तेऐसेबोधसेजिसकेदेहगेहमे आत्मबुद्धिरूपसंशय नष्टहोगईहै औसैपुरुष केलोकशिक्षार्थभिक्षापर्यटन आदिस्वभावसिद्धकर्म कभीभीज्ञानकेप्रतिबन्धकन हीं होतेहैं सोईकहाकि योगजोभगवदाराधनकर्म तिससेदियाहै कर्मोंको संन्यासजिसने औरज्ञानसेअच्छीतरहदूरकियाहै सन्देह जिसने औसेआत्मस्व रूपपुरुषको हेधनञ्जय कर्मबन्धन नहीं करसकतेहैं विचार कर देखो ४१

CC-0. In Public Domain. Digitized by eGangotri

तस्मादज्ञानसंभूतंहृत्स्थं ज्ञानासिनात्मनःछित्त्वैनंसंशयंयोगमातिष्ठोत्तिष्ठभारत ४२ इति श्रीमद्भगवद्गीतायां श्रीकृष्णार्जुन सम्वादे ज्ञानकर्म न्यासयोगोनाम चतुर्थोऽध्यायः ४

शाङ्करभाष्यं।

यस्मात् कर्मयोगानुष्ठानात् अशुद्धिक्षयहेतुकज्ञानसंछिन्नसंशयो न निबध्यते कर्मभिर्ज्ञानाग्निदग्धकर्मत्वादेव यस्माच्च ज्ञानकर्मानुष्ठानविषयेसंशयवान् विनश्यति तस्मादिति तस्मात् पापिष्ठमज्ञानसम्भूतं अज्ञानादविवेकाज्जातं हृत्स्थंहृदि बुद्धौस्थितंज्ञानासिनाशोकमोहादिदोषहरं सम्यक्दर्शनंज्ञानंतदेवासिःखड्गस्तेन ज्ञानासिनात्मनः स्वस्यआत्मविषयत्वात् संशयस्यनहि परस्यसंशयोऽपरेण छेत्तव्यताप्राप्नोयेनस्वस्येति विशेष्यतेऽतआत्मविषयोऽपि स्वस्यैवभवति ज्ञानासिनाछित्त्वैनंसंशयंखड्गिनाशहेतुभूतं योगंसम्यक् दर्शनोपायंकर्मानुष्ठानमातिष्ठकुर्वित्यर्थः उत्तिष्ठचेदानीं युद्धाय भारतेति ४२ इतिश्रीशाङ्करभाष्ये चतुर्थोऽध्यायः ४

स्वामिकृतटीका।

अध्यायद्वयोक्तांपूर्वापरभूमिकाभेदेनकर्मज्ञानमयींद्विविधांब्रह्मनिष्ठामुपसंहरति योगेति द्वाभ्यां योगेनपरमेश्वराराधनरूपेणतस्मिन्संन्यस्तानिसमर्पितानि कर्माणियेनतं पुरुषंकर्माणिस्वफलैर्ननिबध्नन्ति ततश्च ज्ञानेनाकर्त्रात्मबोधेनसंछिन्नःसंशयोदेहाद्यभिमानलक्षणो यस्यतमात्मवन्तमप्रमादिनंकर्माणिलोकसंग्रहार्थानिस्वाभाविकानिवा न निबध्नन्ति ४१

भाषा अनुवाद।

जबकिभगवदर्पणरूपनैष्कामकर्मयोगऔरज्ञानयोगसाहै तौहेभारत अर्जुन आत्मविषयकअपनेअज्ञानसेउत्पन्न औअन्तःकरणमेटिकेजोशोकमोहआदिसबसंशय उनकोदेह आत्माकाविवेककहे विचाररूपज्ञानखड्गसेकाटिकर उठो औकर्मयोगकाअनुष्ठानकरो औरउपस्थितजोयुद्धसोकरोश्रीकृष्णभारत इससम्बोधनसेयह जनायाकि युद्धक्षत्रीकास्वधर्महै औरतुमश्रेष्ठभरतवंशमे उत्पन्नहौ श्रीधरस्वामीकहतेहैं किपुरुषोंकोअवस्थाभेदसेकर्ममयऔज्ञानमय येदोप्रकारकीनिष्ठाजिसनेकहा ऐसेसंशयनिवारणभगवानश्रीकृष्णकोमैप्रणाम करता हूं ४२ इति श्रीजगन्नाथ शुक्ल विरचितायां मनभावनीटीकायां चतुर्थोध्यायः ४

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

तस्मादित्यादिसमनन्तरश्लोकगतं तत्प्रदापेक्षितमर्थमाह यस्मादिति सतां कर्म्मणामस्मदादिषु फलारम्भकत्वप्रसम्भात् विदुष्यपितेषांतद्भावमनपाधर्मित्याशंक्याह ज्ञानाग्नीति ननुसन्दिहानस्य तत्प्रतिबन्धान्न कर्मयोगानुष्ठानं नापितद्धेतुकज्ञानं तत्रापिसंशयावतारादित्याशंक्याह यस्माच्चेति श्लोकाक्षराणि व्याचष्टे तस्मादित्यादिना पापिष्ठमिति संशयस्यसर्व्वानर्थमूलत्वेनत्याज्यत्वंसूच्यते विवेकाग्रहप्रसूतत्वादपि तस्यहेयत्वमविवेकस्यानर्थकरत्वप्रसिद्धेरित्याह अविवेकादिति नच तस्यचैतन्यवदात्मनिष्ठत्वादत्याज्यत्वं शङ्कितव्यमित्याह हृदीति शोकमोहाभ्यामभिभूतस्यपुंसोमनसिप्रादुर्भावतः संशयस्य प्रबलप्रतिबन्धकाभावेनैव प्रध्वंसः सिध्येदित्याशंक्याह ज्ञानासिनेति स्वाश्रयस्य संशयस्य स्वाश्रयेनैवज्ञानेन समुच्छेदसम्भवात् किमिति स्वस्येति विशेषणमित्याशंक्याह आत्मविषयत्वादिति स्थाण्वादिविषयः संशयःतद्विषयेणज्ञानेनदेवदत्तनिष्ठेनतन्निष्ठोव्यावर्त्तयते प्रकृतेत्वात्मविषयस्तदाश्रयश्चसंशयःतथाविधेनज्ञानेनअपनीयते तेनविशेषणमर्थवदित्यर्थः तदेवप्रपञ्चयति नहीति आत्माश्रयत्वस्य प्रकृतेसंशयेसिद्धत्वेनाविवक्षितत्वात् तद्विषयस्यतद्विषयेनैवतस्यतेननिष्टत्तिर्विवक्षितेत्युपसंहरति अतइति संशयसमुच्छित्तेरनन्तरं कर्त्तव्यमुपदिशति छित्त्वैनमिति अग्निहोत्रादिकं कर्मभगवदाज्ञयाक्रमेणकरिष्यामि युद्धात्पुनरुपरिरंसेवेत्याशंक्याह उत्तिष्ठेति भरतान्वयेमहति क्षत्रियवंशेप्रसूतस्य समुपस्थितसमरविमुखत्वमनुचितमिति मन्वानःसन्नाह भारतेति तदनेनयोगस्यक्षत्रियत्वंभगवतोऽनीश्वरत्वञ्चनिराकृत्य कर्म्मदावकर्म्मादिदर्शनादात्मनः सम्यग्ज्ञानात् प्रणिपातादेर्बहिरङ्गाच्चश्रद्धादेरन्तरङ्गाद्दृष्टादृष्टानर्थनिवृत्तिप्रवृत्तिभावमभिदधता सर्वस्मादुत्कृष्टेतस्मिन्नसंशयानस्याधिकारादशेषदोषवन्तं संशयंहित्वोत्तमश्लोकज्ञाननिष्ठापरस्यकर्मनिष्ठेति स्थापितं ४२

इति आनन्दगिरिकृतटीकायां चतुर्थोऽध्यायः ४

स्वामिकृतटीका

तस्मादज्ञानेति यस्मादेवंतस्मादात्मनोऽज्ञानेनसम्भूतं हृदिस्थितमेनंसंशयं शोकादिनिमित्तंदेहात्मविवेकज्ञानखड्गेनछित्त्वाकर्मयोगमातिष्ठआश्रय तत्रच प्रथमंप्रस्तुतययुद्धायोत्तिष्ठ हेभारतेति क्षत्रियत्वेनयुद्धस्यधर्म्यत्वंदर्शितं पुनश्च स्वाभेदेनकर्मज्ञानमयीद्विधा निष्ठोक्तायेनतं वन्देशौरिंसंशयसंछिदं ४२

इति श्रीधरस्वामिकृतटीकायां चतुर्थोऽध्यायः ४

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता।

पञ्चमाध्यायः

अर्जुनउवाच सन्यासं कर्म्मणां कृष्ण पुनर्योगञ्च शंससि यच्छ्रेय एतयो रेकं तन्मेब्रूहि सुनिश्चितं १

शाङ्करभाष्यं

कर्म्मण्यकर्म्म यः पश्येदित्यारभ्य सयुक्तः कृत्स्नकर्म्मकृत् ज्ञानाग्निदग्धकर्माणं शारीरंकेवलंकर्म पुर्वमनुष्ठच्छालाभसन्तुष्टोब्रह्मार्पणं ब्रह्महविः कर्मजान्विद्धि तान्सर्व्वान्सर्व्वंकर्माखिलंपार्थज्ञानाग्निः सर्व्वकार्माणियोगसंन्यस्तकर्माणमित्यन्तै र्व्वचनैः सर्व्वकर्मसंन्यासमवोचद्भगवान् छित्त्वैनंसंशयंयोगमातिष्ठेत्यनेन वचनेन पुनर्योगञ्च कर्मानुष्ठानलक्षणमनुतिष्ठेत्युक्तवान् तयोरुभयोश्च कर्मानुष्ठानकर्म-

भाषा अनुवाद

कर्मयोग औ सन्न्यास योगमेअर्ज्जून की संशय निवारन करिके अवजिते न्द्रियों की मोक्षपरता श्रीभगवान श्रीमद्भगवद्गीताकेपञ्चये अध्याय मेकहैंगे

अज्ञान से उत्पन्न भई जो संशय तिस को ज्ञान खड्ग से छेदन करिके निष्काम कर्मयोग करो यह जो भगवान नें पुनर्व्वार कर्म करने को कहा तो पूर्व्वापर कहे आगू पीछू जो कर्मत्याग औ कर्म करने को भगवतकी आज्ञा तिस को विचारते हुये अर्ज्जुन कहते हैं कि हे कृष्ण ३ अध्याय के १७ श्लोक मे जो आपने कहा कि यस्त्वात्मरतिदेव स्यात् और ४ अध्याय के ३३ श्लोकादि मे कहा कि सर्व्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते यह तत्वज्ञानी को सर्व्व कर्म का त्यागरूप सन्न्यास ही कहा और ४ अध्याय के ४२ श्लोक मे तस्माद् ज्ञानसम्भूतं इत्यादि ज्ञानरूप असि से संशय छेदन करिके उठो और युद्ध करो यह कहि के फेरि कर्मयोग की आज्ञा देते हैं परन्तु ये दोनो परस्पर विरुद्ध हैं अर्थात् कर्म का करना और छोडना यह एक पुरुष को एक ही काल मे असम्भव है सो हे कृष्ण सन्न्यास अथवा कर्मयोग इन दोनो मे जो करने से हम कृतार्थ होंय सो एक प्रकार निश्चय करिके कहो और कभी सन्न्यास कभूं कर्मयोग कहि कहि कर हमै सन्देह मे बार बार न डालो १

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्य

संन्यासयोः स्थितिगतिवत् परस्परविरोधादेकेन सह कर्त्तुमशक्यत्वात् कालभेदेन चानुष्ठानविधानाभावादर्थादेतयोरन्यतरकर्त्तव्यतायां प्राप्तौ सत्यां यत् प्रशस्यतरमेतयोः कर्मानुष्ठानकर्मसंन्यासयोः तत् कर्त्तव्यं नेतरदित्येवं मन्यमानः प्रशस्यतरबुभुत्सयार्জ্জুনউवाच संन्यासंकर्मणांकृष्णेत्यादिना ननुचात्मविदोज्ञानयोगेन निष्ठांप्रतिपादयिष्यन्पूर्वोदाहृतैर्वचनैर्भगवान् सर्वकर्मसंन्यासमवोचन्नत्वनात्मज्ञास्यातश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपुरुषविषयत्वादन्यतरस्यप्रशस्यतरत्वबुभुत्सयाप्रश्नोनुपपन्नः सत्यमेवंत्वदभिप्रायेणप्रश्नोनोपपद्यते प्रष्टुःस्वाभिप्रायेण पुनः प्रश्नोयुज्यतएवेतिवदामः कथंपूर्वोदाहृतैर्वचनैर्भगवता कर्मसन्न्यासस्य कर्त्तव्यतया विवक्षितत्वात् प्रधान्यमन्तरेणचकर्त्तारं तस्यकर्त्तव्यत्वासम्भवादनात्मविदपिकर्त्तापक्षेप्राप्तोऽनूद्यत इति नपुनरात्मविन्कर्त्तृकत्वमेवसन्न्यासस्यविवक्षितमित्येवंमन्वानस्यार्জ্জুনस्य कर्मानुष्ठानकर्मसन्न्यासयोरविद्वत्पुरुषकर्त्तृकत्वमप्यस्तीति पूर्वोक्तेनप्रकारेणतयोःपरस्परविरोधादन्यतरस्यकर्त्तव्यत्वेप्राप्तेप्रशस्यतरञ्चकर्त्तव्यंनेतरदिति प्रशस्यतरविविदिषयाप्रश्नोनानुपपन्नःप्रतिवचनवाक्यार्थनिरूपणेनापिप्रष्टुरभिप्रायएवमेवेति गम्यते कथंसन्न्यासकर्मयोगौनिःश्रेयसकरौतयोस्तुकर्मसन्न्यासात् कर्मयोगोविशिष्यते इति प्रतिवचनमेतन्निरूप्यंकिमनेनात्मवित्कर्त्तृकयोःसन्न्यासकर्मयोगयोर्निःश्रेयसकरत्वं प्रयोजनमुक्तातयोरेवकुतश्चिद्विशेषात् कर्मसन्न्यासात् कर्मयोगस्यविशिष्टत्वमुच्यते आहोस्विदनात्मवित्कर्त्तृकयोःसंन्यासकर्मयोगयोःतदुभयमुच्यतइति किञ्चातोयथात्मवित्कर्त्तृकयोःकर्मसन्न्यासकर्मयोगयोर्निःश्रेयसकरत्वंतयोस्तुकर्मसन्न्यासात् कर्मयोगस्यविशिष्टत्वमुच्यते यद्विवानात्मवित्कर्त्तृकयोःसन्न्यासकर्मयोगयोस्तदुभयमुच्यतइति अत्रोच्यते आत्मवित्कर्त्तृकयोःसन्न्यासकर्मयोगयोरसम्भवात्तयोर्निःश्रेयसकरत्ववचनंतदीयाच्चसन्न्यासात् कर्मयोगस्यविशिष्टत्वाभिधानमित्येतदुभयमनुपपन्नं यद्यनात्मविदःकर्मसन्न्यासःतत्प्रतिकूलञ्चकर्मानुष्ठानलक्षणःकर्मयोगःसम्भवेतां तदातयोर्निःश्रेयसकरत्वोक्तिःकर्मयोगस्यचकर्मसंन्यासाद्विशिष्टत्वाभिधानमित्येतदुभयमुपपद्येत आत्मविदस्तुनन्यासकर्मयोगयोरसम्भवात्तयोर्निश्रेयसकरत्वाभिधानं कर्मसन्न्यासाच्चकर्मयोगोविशिष्यतइतिचानुपपन्नमत्राह किमात्मविदःसन्यासकर्मयोगयोरप्यसम्भवआहोस्विदन्यतरस्यासम्भवःयदाचान्यतरस्यासम्भवस्तदाकिंकर्मसंन्यासस्योतकर्मयोगस्येत्यसम्भवेकारणञ्चवक्तव्यमिति अत्रोच्यतेआत्मविदोनिवृत्तमिथ्याज्ञानत्वाद्विपर्ययः

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ज्ञानमूलस्यकर्म्मयोगस्यासम्भवःस्याद्यमादिसर्वविक्रियारहितत्वेननिःक्रियमात्मान मात्मत्वेनयोवेत्तितस्यात्मविदःसम्यग्दर्शनेनास्तमिथ्याज्ञानस्यनिःक्रियात्मस्वरूपाव स्थानलक्षणंसर्वकर्म्मसन्यासमुक्त्वा तद्विपरीतस्यमिथ्याज्ञानमूलककर्त्तृत्वाभिमान पुरःसरस्यसक्रियात्मस्वरूपावस्थानरूपस्यकर्म्मयोगस्येहशास्त्रेतत्रतत्रात्मस्वरूपनिरू पणप्रदेशेषुसम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधादभावःप्रतिपाद्यते यस्मात्तस्मादा त्मविदोनिष्टत्तमिथ्याज्ञानस्यविपर्ययज्ञानमूलःकर्मयोगोनसम्भवतीति युक्तमुक्तं स्यात् केषुकेषुपुनरात्मस्वरूपनिरूपणप्रदेशेष्वात्मविदःकर्माभावःप्रतिपाद्यतइ त्यत्रोच्यते अविनाशितुतदितिप्रकृत्य यएनंवेत्तिहन्तारंवेदाविनाशिनंनित्यमि त्यादौतत्रतत्रात्मविदःकर्माभावउच्यते ननुचकर्मयोगोप्यात्मस्वरूपनिरूपणप्रदेशे तत्रतत्रप्रतिपाद्यतएवतद्यतस्मादुत्तिष्ठस्वभारतस्वधर्मंमपिचावेक्ष्य कर्मण्येवाधिका रस्तेइत्यादावतश्चकथमात्मविदःकर्मयोगस्यासम्भवः स्यादिति अत्रोच्यतेसम्यग् ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् ज्ञानयोगेनसांख्यानामित्यनेनसांख्यानामात्म तत्त्वविदासनात्मवित्कर्त्तृककर्म्मयोगनिष्ठातोनिःक्रियात्मस्वरूपा वस्थानलक्षणाया ज्ञानयोगनिष्ठायाःपृथक्करणात् कृतकृत्यत्वेनात्मविदःप्रयोजनान्तराभावात् तस्य कार्यंनविद्यतइति कर्त्तव्यान्तराभाववचनाच्चनकर्म्मणामनारम्भात् सन्यासस्तुम हाबाहोदुःखमाप्तुमयोगतःइत्यादिवचनाच्चात्मज्ञानाङ्गत्वेनकर्मयोगस्यविधानात् योगारूढस्यतस्यैवसमःकारणमुच्यतइत्यनेनचोत्पन्नसम्यग्दर्शनस्यकर्मयोगाभाव वचनात् शारीरंकेवलंकर्मकुर्व्वन्नाप्नोति किल्बिषमितिच शरीरस्थितिकारणा तिरिक्तस्यकर्मणोवारणात् नैवकिञ्चित् करोमीतियुक्तोमन्येततत्त्ववित्इत्यनेन चशरीरस्थितिमात्रप्रयुक्तेष्वपि दर्शन श्रवणादिकर्म्मस्वात्मयाथात्म्यविदःकरोमीति प्रत्ययस्य समाहितचेतस्तयासदाकर्त्तव्यत्वोपदेशादात्मतत्त्वविदःसम्यग्दर्शनेनवि रुद्धोमिथ्याज्ञानहेतुकःकर्मयोगःस्वप्नेपिनसम्भावयितुंशक्यते यस्मात्तस्मादनात्मवि त्कर्त्तृकयोरेवसंन्यासकर्मयोगयोर्निःश्रेयसकरत्ववचनं तदीयाच्चकर्मसंन्यासात् पूर्व्वोक्तात्मवित्कर्त्तृकसर्व्वकर्मसंन्यासविलक्षणात् सत्येकर्त्तृत्वविज्ञानेकर्मैकदेश विषयत्वात् यमनियमादिसहितत्वेनचदुरनुष्ठेयत्वात् सुकरत्वेनचकर्मयोगस्य विशिष्टत्वाभिधानमित्येवंप्रतिवचनबाक्यार्थनिरूपणेनापि पूर्व्वोक्तःप्रष्टुरभिप्रायो निश्चीयतेइति स्थितंज्यायसीचेत्कर्मणस्तइत्यत्र ज्ञानकर्मणोःसहासम्भवेयच्छ्रे यएतयोस्तन्मेब्रूहिइत्येवंपृष्टोऽर्जुनेनभगवान्ज्ञानयोगेनसांख्यानां निष्ठापुनःकर्मयो

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम्।

गेनयोगिनांनिष्ठाप्रोक्तेतिनिर्णयञ्चकार नचसंन्यसनादेवकेवलात्सिद्धिंसमधिग च्छतीतिवचनात् ज्ञानसहितस्यतस्यसिद्धिसाधनत्वमिष्टं कर्मयोगस्यचविधानात् ज्ञानरहितस्यसन्यासःश्रेयान् किम्वाकर्मयोगःश्रेयानित्येतयोर्विशेषबुभुत्सयाअ र्जुनउवाच संन्यासंपरित्यागंकर्मणांशास्त्रीयाणामनुष्ठानविशेषाणांशंससि प्रशंस सिकथयसीत्येतत् पुनर्योगञ्चतेषामेवानुष्ठानमवश्यंकर्त्तव्यं शंसतोमेकतरत् श्रेय इतिसंशयः किंकर्म्मानुष्ठानंश्रेयः किम्वातद्ज्ञानमितिप्रशस्यतरञ्चानुष्ठेयमतश्च यच्छ्रेयःप्रशस्यतरमेतयोःकर्मसन्यासकर्मानुष्ठानयोर्यदनुष्ठानात् श्रेयोवाप्नुर्मम स्यादितिमन्यसे तदेकमन्यतरत् सच्चैकपुरुषानुष्ठेयत्वासभवान्मेब्रूहि सुनिश्चि तमभिप्रेतं तवेति १

आनन्दगिरिकृतटीका।

पूर्वोत्तराध्याययोः सम्बन्धमभिदधानोदृत्तानुवादपूर्वकमर्जुनप्रश्नस्याभिप्रायं प्रदर्शयितुं प्रक्रमते मर्मणीत्यादिना इत्यारभ्यकर्मण्यकर्मदर्शनमुक्त्वातत्प्रशंसा प्रसारितेत्याह सयुक्तइति ज्ञानवन्तंसर्वाणिकर्माणिलोकसंग्रहार्थंकुर्वन्तंज्ञान लक्षणेनाग्निना दग्धसर्वकर्माणं कर्म्मप्रयुक्तफलसम्बन्धविधुरंविवेकवन्तोवदन्तीति ज्ञानवतो ज्ञानफलभूतंसंन्यासंविवक्षन्विविदिषोःसाधनरूपमपिसंन्यासंभगवान् विवक्षितवानित्याह ज्ञानाग्नीति निराशीरित्यारभ्यशरीरस्थितिमात्रकारणं कर्मशरीरस्थितावपिसङ्गरहितः सन्समाचरन्धर्माधर्म्मफलभागीनभवतीत्यपि पूर्वोत्तराभ्यामध्यायाभ्यां द्विविधंसंन्यासंसूचितवानित्याह शारीरमिति यद्दृच्छे त्यादावपिसंन्यासःसूचितः तद्धर्म्मफलायोपदेशादित्याह यद्दृच्छेति ज्ञानस्ययज्ञ त्वसम्पादनपूर्वकंप्रशंसावचनादपिकर्म्मसंन्यासोदर्शितो ज्ञाननिष्ठस्येत्याह ब्रह्मा र्पणमितिज्ञानयज्ञस्तुत्यर्थंविहितान्नानाविधान् यज्ञाननूद्य तेषांदेहादिव्यापारज न्यत्ववचनेनात्मनोनिर्व्यापारत्वविज्ञानफलाभिलाषादपियथोक्तमात्मानंविविदिषोः सर्वकर्मसंन्यासेऽधिकारोध्वनित इत्याह कर्म्मजानिति समस्तस्यैवाबशेषवर्जितस्य कर्मणोज्ञानेपर्य्यवसानाभिधानाच्चजिज्ञासोःसर्वकर्म्मसन्यासःसूचित इत्याह सर्व मिति तद्विद्धीत्यादिनाज्ञानप्राप्त्युपायंप्रणिपातादिप्रदर्श्य प्राप्ते नज्ञानेनातिशय माहात्म्यवतासर्वकर्म्मणांनिवृत्तिरेवेतिवदताच ज्ञानार्थिनःसन्यासेऽधिकारोदर्शि तोभवतेत्याह ज्ञानाग्निरिति ज्ञानेनसमुच्छिन्नसंशयं तस्मादेवज्ञानात्कर्म्मा

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरितटीका

णि संन्यस्य व्यवस्थितमप्रमत्तंवशीकृतकार्य्यकरणसंघातवन्तंप्रातिभासिकानिकर्माणि ननिवध्नन्ति इत्यपिद्विविधःसंन्यासोभगवतोक्तइत्याह येगेति कर्माणीत्यारभ्ययोगसंन्यस्तकर्माणमित्यन्तैरुदाहृतैर्वचनैरुक्तंसंन्यासमुपसंहरतिइत्यन्तैरिति तर्हि कर्मसंन्यासस्यैव जिज्ञासुनाज्ञानवताचादरणीयत्वात् कर्मानुष्ठानमनादेयमापन्नमित्याशंक्योक्तमर्थान्तरमनुवदति छित्त्वैनमिति कर्मतत्त्यागयोरुक्तयोरेकेनैवपुरुषेणानुष्ठेयत्वसम्भवान्नविरोधोऽस्तीत्याशंक्ययुगपदक्रमेणवानुष्ठानमितिविकल्पाद्यंदूषयति उभयोश्चेति द्वितीयंप्रत्याह कालभेदेनेति उक्तयोर्द्वयोरेकेनपुरुषेणानुष्ठेयत्वासम्भवेकथंकर्त्तव्यत्वसिद्धिरित्याशंक्याह अर्थादिति द्वयोरुक्तयोरेकेन युगपत्क्रमाभ्यां अनुष्ठानानुपपत्तेरित्यर्थः अन्यतरस्यकर्त्तव्यत्वेकतरस्येति कुतोनिर्णयोद्वयोःसन्निधानाविशेषादित्याशंक्याह यत् प्रशस्यतरमिति भगवता कर्मणांसंन्यासोयोगश्चोक्तो नच तयोःसमुच्चित्यानुष्ठानंतेनान्यतरस्यश्रेष्ठस्यानुष्ठेयत्वेतद्बुभुत्सया प्रश्नोपपत्तिरित्युपसंहरति इत्येवमिति नायंप्रष्टुरभिप्रायःकर्मसंन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेयत्वस्योक्तत्वादेकस्मिन्पुरुषेप्राप्त्यभावादितिशङ्कते नन्विति चोद्यमङ्गीकृत्यपरिहरति सत्यमेवमिति कीदृशस्तर्हि प्रष्टुरभिप्रायोयेनप्रश्नप्रवृत्तिरिति पृच्छति कथमिति एकस्मिन्पुरुषेकर्मतत्त्यागयोरस्तिप्राप्तिरिति प्रष्टुरभिप्रायंप्रतिनिर्देष्टुं प्रारभते पूर्वोदाहृतैरिति यथास्वर्गकामोयजेतेतिस्वर्गकामोद्देशेनयागोविधीयते नतुतस्यैवाधिकारोनान्यस्येत्यपिप्रतिपाद्यते वाक्यभेदप्रसङ्गात्तथानात्मवित्कर्त्तासंन्यासपक्षेप्राप्तोऽनूद्यते नचात्मवित्कर्त्तृकत्वमेवसंन्यासस्यनियम्यते वैराग्यमात्रेणाप्यस्यापिसंन्यासविधिदर्शनात् तस्मात्कर्मतत्त्यागयोरविद्वत्कर्त्तृकत्वमस्तीतिमन्वानस्यार्जुनस्यप्रश्नःसम्भवतीति भावः भवतुसंन्यासस्यकर्त्तव्यत्वविवक्षातथापिकथंप्रशस्यतरबुभुत्सयाप्रश्नप्रवृत्तिरित्याशंक्याह प्राधान्यमिति तथापिकथमेकस्मिन्पुरुषेतयोरप्राप्तावुक्ताभिप्रायेणप्रश्नवचनंप्रकल्पतेतत्राह अनात्मविदिति आत्मविदोविद्यासामर्थ्यात्कर्मत्यागध्रौव्यवदितरस्यापिसतिवैराग्येतत्त्यागस्यावश्यकत्वात् तत्कर्त्तासौ प्राप्तोवानूद्यते तथाच कर्मतत्त्यागयोरेकस्मिन्विदुषिप्राप्तेर्व्यक्तत्वादुक्ताभिप्रायेणप्रश्नप्रवृत्तिरविरुद्धेत्यर्थः संन्यासस्यात्मवित्कर्त्तृकत्वमेवात्रविवक्षितंकिंनस्यादित्याशंक्यकर्मान्तरपर्युदासः संन्यासविधिश्चेत्यर्थभेदेवाक्यभेदप्रसङ्गान्नैवमित्याह नपुनरिति इतिशब्दोवाक्यभेदप्रसङ्गहेतुद्योतनार्थः

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

ततः किमित्याशंक्यफलितमाह एवमिति कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्कर्तृकत्वमप्यस्तीत्येवंमन्वानस्यार्जुनस्यप्रश्नस्यतरविविदिषयाप्रश्नोनानुपपन्नइति सम्बन्धः तयोःसमुच्चित्यानुष्ठानसम्भवेकथं प्रश्नस्यतरविविदिषेत्याशंक्याह पूर्वोक्तेनेति उभयोश्चेत्यादावुक्तप्रकारेणकर्मतत्त्यागयोर्मिथोविरोधान्नसमुच्चित्यानुष्ठानंसावकाशमित्यर्थः भवतुतर्हि यस्यकस्यचिदन्यतरस्यानुष्ठेयत्वमिति कुतोयथोक्ताभिप्रायेणप्रश्नप्रवृत्तिरित्याशंक्याह अन्यतरस्येति उभयप्राप्तौसमुच्चयानुपपत्ताऽवन्यतरपरिग्रहे विशेषस्यान्वेष्यत्वादुक्ताभिप्रायेणप्रश्नोपपत्तिरित्यर्थः इतश्चाविद्वत्कर्तृकयोः संन्यासकर्मयोगयोः कर्तुःश्रेयानिति प्रष्टुरभिप्रायोभातीत्याह प्रतिवचनेति किंतत्प्रतिवचनं कथम्बातन्निरूपणमिति पृच्छति कथमिति तत्प्रतिवचनंदर्शयति संन्यासेति तन्निरूपणंकथयति एतदिति तदुभयंनिःश्रेयसकरत्वं कर्मयोगस्यश्रेष्ठत्वञ्चेत्यर्थः गुणदोषविभागविवेकार्थंपृच्छति किञ्चेति अतोऽस्मिन्नाद्यपक्षेकिंदूषणं अस्मिन्द्वितीयेपक्षे किंफलमितिप्रश्नार्थः तत्रसिद्धान्तीप्रथमपक्षे दोषमादर्शयति अत्रेत्यादिना तदेवानुपपन्नत्वंव्यतिरेकद्वाराविष्टणोति यदीत्यादिना निःश्रेयसकरत्वोक्तिरित्यत्रपारम्पर्येणेतिद्रष्टव्यं विशिष्टत्वाभिधानमिति प्रतियोगिनोऽसहायत्वादस्यच शुद्धिद्वाराज्ञानार्थत्वादित्यर्थः आत्मज्ञस्य कर्मसंन्यासकर्मयोगयोरसम्भवेदर्शिते चोदयति अत्राहेति चोदयिता निर्द्धारणार्थंविस्मृशति किमित्यादिना अन्यतरासम्भवेपिसन्देहात्प्रश्नोवतरतीत्याह यदाचेति यस्यकस्यचिदन्यतरस्यासम्भवोभविष्यतीत्याशंक्यकारणमन्तरेणासम्भवोभवन्नतिप्रसङ्गःस्यादिति मन्वानःसन्नाह असम्भवइति आत्मविदःसकारणं कर्मयोगासम्भवंसिद्धान्तीदर्शयति अत्रेति संग्रहवाक्यं विवृण्वन्नात्मविच्चंविष्टणोति जन्मादीति तस्य यदुक्तंनिवृत्तमिथ्याज्ञानत्वंतदिदानीं व्यनक्ति सम्यगिति विपर्ययज्ञानमूलस्येत्यादिनोक्तंप्रपञ्चयति निःक्रियेति यथोक्तसंन्यासमुक्तातोविपरीतस्यकर्मयोगस्याभावःप्रतिपाद्यत इतिसम्बन्धः वैपरीत्यंस्फोरयन्कर्मयोगमेव विशिनष्टि मिथ्याज्ञानेति मिथ्याचतदज्ञानञ्चेत्यनाद्यनिर्वाच्यमज्ञानंतन्मूलोहं कर्त्तेत्यात्मनिकर्तृत्वाभिमानस्तज्जन्यस्तस्येति यावत् यथोक्तंसंन्यासमुक्ता यथोक्तकर्मयोगस्यासम्भवप्रतिपादनेहेतुमाह सम्यग्ज्ञानेति कुतस्तदभावप्रतिपादनंतदाह इहेति उक्तहेतुंकृत्वात्मज्ञस्यकर्मयोगासम्भवेफलितमाह यस्मादिति इह

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

शास्त्रे तत्रतत्रेत्यादावुक्तमेवव्यक्तीकर्त्तुमिच्छति केषुकेष्विति तानेवप्रदेशान्दर्शयति अत्रेति आत्मस्वरूपनिरूपणप्रदेशेषुसंन्यासप्रतिपादनादात्मविदः संन्यासोविवक्षितश्चेत्तर्हि कर्मयोगोपितस्यकस्मान्नभवति प्रकरणाविशेषादिति शङ्कते ननुचेति आत्मविद्याप्रकरणेकर्म्मयोगप्रतिपादनमुदाहरति तद्यथेति प्रकरणादात्मविदोपि कर्म्मयोगस्यसम्भवेफलितमाह अतश्चेति आत्मज्ञानोपायत्वेनापि प्रकरणपाठसिद्धौ ज्ञानादूर्द्ध्वं न्यायविरुद्धं कर्म्म कल्पयितुमशक्यमितिपरिहरति अत्रोच्यतइति सम्यग्ज्ञान मिथ्याज्ञानयोस्तत्कार्ययोश्च भ्रमनिवृत्तिभ्रमसङ्गावयोर्मिथोविरोधात् कर्त्तृत्वादिभ्रममूलंकर्म सम्यग्ज्ञानादूर्द्ध्वं नसम्भवतीत्यर्थः आत्मज्ञस्यकर्मयोगासम्भवेहेत्वन्तरमाह ज्ञानयोगेनेति इतश्चात्मविदोज्ञानादूर्द्ध्वंकर्मयोगो नयुक्तिमानित्याह कृतकृत्यत्वेनेति ज्ञानवतोनास्तिकर्मेत्यत्रकारणान्तरमाह तस्येति तर्हिज्ञानवताकर्मयोगस्यहेयत्ववज्जिज्ञासुनापितस्यत्याज्यत्वं ज्ञानप्राप्तप्रातस्यापि पुरुषार्थसिद्धेरित्याशंक्यजिज्ञासोरस्तिकर्मयोगापेक्षा इत्याह न कर्मणामिति स्वरूपोपकार्यङ्गमन्तरेणाङ्गिस्वरूपानिष्पत्तेर्ज्ञानार्थिनाकर्मयोगस्यशुद्ध्यादिद्वाराज्ञानहेतोरादेयत्वमित्यर्थः तर्हिज्ञानवतामपिज्ञानफलोपकारित्वेन कर्म्मयोगोऽनुष्ठेयतामित्याशंक्याह योगारूढस्येति उत्पन्नसम्यग्ज्ञानस्यकर्म्माभावेशरीरस्थितिहेतोरपिकर्मणोऽसम्भवान्नतस्यशरीरस्थितिस्तदस्थितौचकुतोजीवन्मुक्तिस्तदभावेचकस्योपदेष्टृत्वंउपदेशाभावेच कुतोज्ञानोदयः स्यादित्याशंक्याह शरीरमिति विदुषोपि शरीरस्थितिरास्थिताचेत्तन्मात्रप्रयुक्तेषुदर्शनश्रवनादिषु कर्त्तृत्वाभिमानोपिस्यादित्याशंक्याह नैवेति तत्त्ववित्पदेनेनच समाहितचेतस्त्वयाकरोमीतिप्रत्ययस्यसदैवकर्त्तव्यत्वोपदेशादितिसम्बन्धः यत्तुविदुषःशरीरस्थितिनिमित्तकर्माभ्यनुज्ञानेतस्मिन्कर्त्तृत्वाभिमानोपिस्यादिति तत्राह शरीरेति आत्मयाथात्म्यविदःतेष्वपिनाहंकरोमीति प्रत्ययस्यमैवकिञ्चित्करोमीत्यादावकर्त्तृत्वोपदेशान्नकर्त्तृत्वाभिमानसम्भावनेत्यर्थः यथोक्तोपदेशानुसन्धानाभावेविदुषोपिकरोमीति स्वाभाविकप्रत्ययद्वारा कर्म्मयोगःस्यादित्याशंक्याह आत्मतत्त्वेति यद्यपिविद्वान्यथोक्तमुपदेशंकदाचिन्नानुसन्धत्ते तथापितत्त्वविद्याविरोधान्मिथ्याज्ञानं तन्निमित्तं कर्मवा तस्यसम्भावयितुमशक्यमित्यर्थः आत्मवित्कर्त्तृकयोःसंन्यासकर्मयोगयोरयोगात्तयोर्निःश्रेयसकरत्वमन्यतरस्यविशिष्टत्वमित्येतदयुक्तमिति

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

सिद्धत्वात् द्वितीयंपक्षमङ्गीकरोति यस्मादित्यादिना तदीयाच्चकर्म्मसंन्यासात्क र्म्मयोगस्यविशिष्टत्वाभिधानमिति सम्बन्धः ननुकर्म्मयोगेनशुद्धबुद्धेः संन्यासोजा यमानस्तस्मादुत्कृष्यते कथंतस्मात् कर्मयोगस्योत्कृष्टत्ववाचोयुक्तिर्युक्तेति तत्राह पूर्व्वोक्तेति वैलक्षण्यमेवस्पष्टयति सत्येवेति स्वाश्रमविहितश्रवणादौकर्त्तृत्वबु द्धानेसत्येवपूर्व्वाश्रमोपात्तकर्म्मैकदेशविषयसंन्यासात् कर्मयोगस्यश्रेयस्त्ववचनंनैता दृशंब्राह्मणस्यास्ति वित्तमित्यादिस्मृतिविरुद्धमित्याशंक्याह यमनियमादिति आ नृशंस्यंक्षमासत्यमहिंसादमआर्জ্জवंप्रीतिःप्रसादोमाधुर्यमक्रोधश्च यमादश दा नमिज्यातपोध्यानंस्वाध्यायोपस्थनिग्रहौ व्रतोपवासोमौनञ्चस्नानञ्चनियमादश इत्युक्तैर्यमनियमैरन्यैश्चाश्रमधर्मैर्व्विशिष्टत्वेनानुष्ठातुमशक्यत्वादुक्तसंन्यासात् कर्म योगस्यविशिष्टत्वोक्तिर्युक्तेत्यर्थः नहिकश्चिदितिन्यायेन कर्मयोगस्येतरापेक्षयासु करत्वाच्च तस्यविशिष्टत्ववचनं श्लिष्टमित्याह सुकरत्वेनचेति प्रतिवचनवाक्यार्था लोचनात् सिद्धमर्थमुपसंहरति इत्येवमिति संन्यासकर्मयोगयोर्मिथोविरुद्धयोः समुच्चित्यानुष्ठातुमशक्ययोरन्यतरस्यकर्त्तव्यत्वेप्रशस्यतरस्य तद्भावातद्भावस्य चानि र्द्धारितत्वात्तन्निर्द्धारयिषयाप्रश्नः स्यादिति प्रश्नवाक्यार्थपर्यालोचनयाप्रष्टुरभिप्रा येणयथापूर्व्वमुपदिष्टस्तथाप्रतिवचनार्थनिरूपणेनापि तस्यनिश्चितत्वात् प्रश्नोपप त्तिःसिद्धेत्यर्थः ननुतृतीयेयथोक्तप्रश्नस्य भगवतानिर्णीतत्वान्नात्र प्रश्नप्रतिवचन योः सावकाशत्वमित्याशंक्यविस्तरेणोक्तमेवसम्बन्धंपुनः संक्षेपतोदर्शयति ज्यायसी चेदिति सांख्ययोगयोर्भिन्नपुरुषानुष्ठेयत्वेननिर्णीतत्वान्नपुनःप्रश्नयोग्यत्वमित्यर्थः इतोपिनतयोःप्रश्नविषयत्वमित्याह नचेति एवकारविशेषणञ्चानसहितसंन्यासस्य सिद्धिसाधनत्वंभगवतोभिमतं छित्त्वैनंसंशयंयोगामातिष्ठेतिचकर्मयोगस्य विधाना त्तस्यापिसिद्धिसाधनत्वमिष्टंततश्चनिर्णीतत्वान्नप्रश्नस्तद्विषयःसिद्धतीत्यर्थः केनाभि प्रायेणतर्हिप्रश्नःस्यादित्याशंक्य ज्ञानरहितसन्न्यासात् कर्मयोगस्यप्रशस्यतरत्व बुभुत्सयेत्याह ज्ञानरहितइति प्रष्टुरभिप्रायमेवंप्रदर्श्यप्रश्नोपपत्तिमुक्त्वाप्रश्नमुत्था पयति सन्न्यासमिति तर्हिइयंत्वयानुष्ठेयमित्याशंक्यतदशक्तेरुक्तत्वात् प्रशस्यत रस्यानुष्ठानार्थं तदिदमिति निश्चित्यवक्तव्यमित्याह यच्छ्रेयइति काम्यानां प्रतिषि द्धानाञ्चकर्म्मणांपरित्यागोमयोच्यते नसर्व्वेषामित्याशंक्यकर्म्मण्यकर्म्मेत्यादौविशेषदर्श नान्नैवमित्याह शास्त्रीयाणामिति अस्तुतर्हिशास्त्रीयाशास्त्रीययोरशेषयोरपिकर्म णोस्त्यागोनेत्याह पुनरिति तर्हिकर्मत्यागस्तद्योगश्चेत्युभयमादर्शितव्यमित्याशंक्य

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते २

आनन्दगिरिकृतटीका।

विरोधान्नैवमित्यभिप्रेत्याह अतइति द्वयोरेकेनानुष्ठानायोगस्योक्तत्वात्कर्त्तव्यत्वोक्तेश्चसंशयोजायते तमेवसंशयंविशदयति किंकर्मेति प्रश्नस्यतरवुभुत्साकिमर्थेत्याशंक्याह प्रश्नस्यतरञ्चेति तस्यैवानुष्ठेयत्वेप्रशंसावकाशत्वमाह अतश्चेति तदेवप्रश्नस्यतरंविशिनष्टि यदनुष्ठानादिति तदेकमन्यतरमस्मैब्रूहीतिसम्बन्धः उभयोरुक्तत्वेसति किमित्येकंवक्तव्यमितिनियुज्यतेतत्राह सहेति कर्मतत्त्यागयोर्मिथोविरोधादित्यर्थः १

स्वामिकृतटीका।

निवार्यसंशयंजिष्णोःकर्मसंन्यासयोगयोः जितेन्द्रियस्यचयतेः पञ्चमेमुक्तिमब्रवीत् अज्ञानसम्भूतं संशयंज्ञानासिना छित्त्वाकर्मयोगमातिष्ठेत्युक्तंतत्र पूर्व्वापरविरोधंमन्वानोऽर्जुनउवाचसंन्यासमिति यस्त्वात्मरतिरेवस्यादित्यादिनासर्व्वंकर्म्माखिलंपार्थेत्यादिनाच ज्ञानिनः कर्मसंन्यासंकथयसिज्ञानासिनासंशयंछित्त्वायोगमातिष्ठेतिपुनर्योगञ्चकथयसि नचकर्मसंन्यासःकर्मयोगश्चैकस्यैकदैवासम्भवतोविरुद्धस्वरूपत्वात्तस्मादेतयोर्मध्ये एकस्मिन्ननुष्ठातव्येसतिममयच्छ्रेयःसुनिश्चितं तदेकंब्रूहि १

भाषा अनुवाद।

अर्जुनकोइसप्रश्नकाउत्तर श्रीभगवानकहतेहैं किहेअर्जुन हमवेदान्ती तत्वज्ञानीकेप्रति कर्मयोग करनानहींकहते हैं क्योंकि तत्त्वज्ञानीकोकर्म त्यागके उपदेशदेनेसे विरोधपडेगा परन्तुदेहआदिमेआत्मअभिमानीतुमको जोवन्धुबधनिमित्तशोकमोहसे उत्पन्नसंशय तिसकोस्थूलशरीरआदि आत्माकी विवेकरूपज्ञानखड्गसे छेदनकेअनन्तर तत्त्वज्ञानउत्पन्नहोनेका उपायरूपयो निष्कामकर्मयोग सोईअनुष्ठानकरनेकोकहा है देखोनिःकामकर्मकरनेसे चित्त शुद्धहोके तत्त्वज्ञानउत्पन्नहोनेपर ज्ञानकेपरिपाकार्थ ज्ञाननिष्ठाकाअङ्गभूतकर्मकेत्यागकोमैनेकहा है परन्तुज्ञानमार्गमेआरूढपुरुषको कर्मकात्याग औरअनारूढपुरुषकोजोभगवदाराधन निःकामकर्मयोगकहा सोईकहतेहैं किसंन्यासऔर कर्मयोग येदोनोनिःश्रेयसमुक्तिकेकरनेवालेहैं परन्तु दोनोकेबीच संन्याससे कर्मयोगहीअधिकहै जिसहेतु कर्मयोगसेज्ञानप्राप्तहोके तबसंन्यासअर्थात् कर्मकात्याग विहितहै औरपहिलेहीत्याग नही कहागयाहै २

CC-0. In Public Domain. Digitized by eGangotri

ज्ञेयःसनित्यसंन्यासीयोनद्वेष्टिनकांक्षति निर्द्वन्द्वोहिमहाबाहोसुखंबन्धात्प्रमुच्यते ३

शाङ्करभाष्यं।

स्वाभिप्रायमाचक्षाणोनिर्णयायश्रीभगवानुवाच संन्यासइति संन्यासःकर्मणां परित्यागःकर्मयोगश्चतेषामनुष्ठानंतावुभावपिनिःश्रेयसकरौनिःश्रेयसं मोक्षंकुर्वा ते ज्ञानोत्पत्तिहेतुत्वेनउभौयद्यपिनिःश्रेयसकरौ तथापि तयोस्तुनिश्रेयसहेत्वोः कर्मसंन्यासात् केवलात् कर्मयोगोविशिष्यते इतिकर्मयोगंस्तौति २

आनन्दगिरिकृतटीका।

प्रश्नमेवमुत्थाप्यप्रतिवचनमुत्थापयति स्वाभिप्रायमिति निर्णायतद्द्वारेणय रस्यसंशयनिवृत्तयर्थमित्यर्थः एवंप्रश्नेप्रवृत्तेकर्मयोगस्यसौकर्यमभिप्रेत्य प्रशस्यतर त्वमभिधित्सुर्भगवान्प्रतिवचनंकिमुक्तवानित्याशंक्याह संन्यासइति उभयोरपि तुल्यत्वशङ्कांवारयति तयोरिति कथंतर्हिज्ञानस्यैवमोक्षोपायत्वंविवक्ष्यते तत्रा ह ज्ञानोत्पत्तीति तर्हिद्वयोरपिप्रशस्यत्वमप्रशस्यत्वंवातुल्यत्वमित्याशंक्याह उभा वितिज्ञानसहायस्यकर्मसन्न्यासस्यकर्मयोगापेक्षयाविशिष्टत्वविवक्षयाविशिनष्टि के वलादिति २

स्वामिकृतटीका।

अत्रोत्तरंश्रीभगवानुवाच संन्यासइति अयमत्रभावःनहिवेदान्तवेद्यात्मतत्त्वज्ञंप्रति कर्मयोगमहंब्रवीमि यतःपूर्वोक्तेनसंन्यासेनविरोधःस्यात् अपितुदेहात्माभिमा निनंत्वांबन्धुवधादिनिमित्तशोकमोहादिकृतमेनं संशयंदेहात्मविवेकज्ञानासिनाछि त्वापरमात्मज्ञानोपायभूतंकर्मयोगमातिष्ठेति ब्रवीमि कर्मयोगेन शुद्धचित्तस्यात्म तत्त्वज्ञाने जाते सति तत्परिपाकार्थंज्ञाननिष्ठाङ्गत्वेनसंन्यासःपूर्वमुक्तःएवञ्चस त्यङ्गप्रधानयोर्विकल्पायोगात् संन्यासःकर्मयोगश्चेत्येतावुभावपिभूमिकाभेदेनसमु च्चितावेवनिःश्रेयसंसाधयतः तथापितयोर्मध्येकर्मसंन्यासात् सकशात् कर्मयोगोवि शिष्ठोभवतीति २

भाषाअनुवाद।

जोसंन्याससेकर्मयोगकोविशेषकहासोईअबकर्मयोगकोप्रसंशाकरतेकहते हैं किजोकर्मकरताऊआभी नकिसेसेवैरकरताऔनकुछचाहताहै तथासुखदु खहानिलाभद्वन्द्वभावसेरहितहै सोईनित्यसन्यासीहै औरसंसारबन्धनसेछूटजा ताहै अथवा सन्यासीकेऐसेआचरणकरताऊआजोरागद्वेषरहितकर्मकरताहै सोनित्यसन्यासीकहेनिश्चयसन्यासीऔरसन्यासीतोसन्यासीहीहै क्योंक कर्मस न्यासश्रेष्ठहै इहांएकसन्यासीपन्थरहै दूसरासंन्यासपरजानो ३

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

कस्मादित्याह ज्ञेयोज्ञातव्यःसकर्मयोगीनित्यसंन्यासीति योनद्वेष्टिकिञ्चिन्नकांक्षति दुःखसुखेतत्साधनेचैवम्बिधोयःकर्मणिवर्त्तमानोपिसनित्यसंन्यासीति ज्ञातव्यइत्यर्थः निर्द्वन्द्वोद्वन्द्ववर्ज्जितोहियस्मान्महाबाहोसुखंबन्धान्नायासेनप्रमुच्यते ३

आनन्दगिरिकृतटीका।

कर्म्महिबन्धकारणंप्रसिद्धं तत्कथंनिःश्रेयसकरंस्यादितिशङ्कते कस्मादितिअकर्त्रात्मविज्ञानात् प्रागपिसर्व्वदासौसन्न्यासोज्ञेयोयोरागद्वेषौक्वचिदपिनकरोतीत्याह इत्याहेति यथाननुष्ठीयमानानिकर्म्माणिसन्न्यासिनंननिबध्नन्तिकृतानिच वैराग्येन्द्रियसंयमादीनिफलाभिसन्धिरहितानितथैवानभिसंहितफलानिनित्यनैमित्तिकानियोगिनमपिननिबध्नन्तिनिवर्तयन्ति चसञ्चितंदुरितमित्यभिप्रेत्याहनिर्द्वन्द्वोहीतिकर्मयोगिनोनित्यसंन्यासित्वज्ञानमन्यथाज्ञानत्वान्मिथ्याज्ञानमित्यशंक्याह एवम्बिधइति कर्म्मिणोपिरागद्वेषाभावेनसंन्यासित्वंज्ञातुमुचितमित्यर्थः रागद्वेषरहितस्यानायासेनबन्धप्रध्वंससिद्धेश्चयुक्तंतस्यसंन्यासित्वमित्याह निर्द्वन्द्वइति ३

यदुक्तं संन्यासकर्मयोगयोःनिःश्रेयसकरत्वं तदाक्षिपति ननुसंन्यासेति तत्रोत्तरत्वेनोत्तरश्लोकमवतारयति इति प्राप्तइति विवेकिनस्तर्हिकथंवदन्तीत्याकांक्षायामाह एकमिति संख्यामात्मसमीक्षामर्हतीति सांख्यंसंन्यासोयोगस्तुकर्मयोगस्तावुभावपिपृथगित्यस्यार्थमाह विरुद्धेति शास्त्रार्थविवेकशून्यत्वंबाल्यत्वं उत्तरार्द्धमवतारयितुंभूमिकांकरोति पण्डितास्त्विति ज्ञानिनोयोगिनश्चेतिशेषः द्वयोरविरुद्धफलत्वमेवप्रश्नपूर्व्वकंप्रकटयति कथमित्यादिना एकंसाधनमनुष्ठितवतोद्वयोरपिफलंभवतीति विरुद्धमित्याशंक्याह उभयोरिति सांख्ययोगयोःसन्न्यासकर्मानुष्ठानयोस्तत्त्वज्ञानद्वारानिःश्रेयसफलत्वान्नविरुद्धफलत्वशंकाइत्यर्थः सांख्ययोगयोरेकफलत्ववचनंप्रकरणाननुगुणमिति शङ्कते नन्विति अप्रस्तुतमसिद्धमिति परिहरति नैषदोषइति संन्यासंकर्मणामित्यादिनासंन्यासंकर्मयोगञ्चाङ्गी

स्वामिकृतटीका।

कृतइत्यपेक्षयासंन्यासित्वेनकर्मयोगिनंस्तुवंस्तस्यश्रेष्ठत्वंदर्शयति ज्ञेयइति रागद्वेषादिराहित्येनपरमेश्वरार्थंकर्म्माणियोऽनुतिष्ठति सनित्यंकर्मानुष्ठानकालेऽपिसंन्यासीत्येवज्ञेयः तत्रहेतुःनिर्द्वन्द्वोरागद्वेषादिद्वन्द्वशून्योहिशुद्धचित्तोज्ञानद्वारासुखमनायासेनैवसंसारात् प्रमुच्यते ३

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्य

ननुसन्न्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोःफलेपिविरोधेयुक्तोन तूभयोर्निःश्रेयसकरत्वमेवेति प्राप्तइदमुच्यते सांख्ययोगाविति सांख्ययोगौपृथ क्विरुद्धभिन्नफलौबालाःप्रवदन्ति नपण्डिताःपण्डितास्तुज्ञानिनएकंफलमविरुद्ध मिच्छन्तिकथमेकमपिसांख्ययोगयोःसम्यगास्थितः सम्यगनुष्ठितवानित्यर्थःउभयो र्विन्दतेफलमुभयोस्तदेवहिनिःश्रेयसंफलमतोनफलेविरोधोस्ति ननुसंन्यासकर्म योगशब्दैनप्रस्तुत्यसांख्ययोगशब्दयोःफलैकत्वंकथमिच्छाप्रकृतंब्रवीति नैषदोषःयद्य प्यर्जुनेनसंन्यासंकर्मयोगञ्चकेवलमभिप्रेत्यप्रश्नःकृतोभगवांस्तुतदपरित्यागेनैवस्वा भिप्रेतञ्चविशेषंसंयोज्यशब्दान्तरवाच्यतयाप्रतिवचनंददौ सांख्ययोगाविति तावेव संन्यासकर्मयोगौज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगशब्दवाच्याविति भगवतोमतमतोनाप्रकृतप्रक्रियेति ४

आनन्दगिरिकृतटीका

कृत्यप्रश्नेसन्न्यासःकर्मयोगश्चेत्यादिनातथैवप्रतिवचनेचकथंसांख्ययोगयोरेकफलत्व मप्रकृतंनभवतीत्युच्यते तत्राह यद्यपीति प्रतिवचनमपितदनुरूपमेवभगवतानिरू पितमिति विशेषानुपपत्तिरित्याशंक्याह भगवांस्त्विति तदपरित्यागेनेत्यत्रतत्पदेन प्रष्टाप्रतिनिर्दिष्टौकर्मसन्न्यासकर्मयोगावुच्येते सांख्ययोगाविति शब्दान्तरवाच्यत यातयोरेवसन्न्यासकर्मयोगयोरत्यागेनस्वाभिप्रेतञ्चविशेषंसंयोज्यभगवान्प्रति वचनंसन्ददाविति योजना यदुक्तंस्वाभिप्रेतञ्चविशेषंसंयोज्येति तदेवव्यक्ती करोति तावेवेति समबुद्धित्वादीत्यादिशब्देनज्ञानोपायभूतःशमादिरादीयते प्रकृतयोरेवसन्न्यासकर्मयोगयोरुपादानेफलितमाह अतइति सांख्ययोगावित्या दिश्लोकव्याख्यानसमाप्तिरितिशब्दार्थः ४

स्वामिकृतटीका।

यस्मादेवमङ्गप्रधानत्वेनोभयोरवस्थाभेदेनक्रमसमुच्चयोऽतोविकल्पमङ्गीकृत्यो भयोःकःश्रेष्ठइति प्रश्नोऽज्ञानामेवोचितःनविवेकिनामित्याह सांख्ययोगाविति सां ख्यशब्देनज्ञाननिष्ठावाचिनातदङ्गंसन्न्यासंलक्षयति सन्न्यासकर्मयोगावेकफलौस न्तौपृथक्स्वतन्त्रौवितिबालाअज्ञाएवप्रवदन्ति नतुपण्डिताः तत्रहेतुःअनयोरे कमपिसम्यगास्थितआश्रितवानुभयोःफलमाप्नोति तथाहि कर्मयोगंसम्यगनुतिष्ठ न्शुद्धचित्तःसन्ज्ञानद्वारायदुभयोःफलंकैवल्यंतद्विन्दतीति सन्न्यासंसम्यगास्थितो ऽपिपूर्वमनुष्ठितस्यकर्मयोगस्यापिपरम्परया यत्फलंकैवल्यंतद्विन्दतीति नपृथक्फ लत्वमनयोरित्यर्थः ४

CC-0. In Public Domain. Digitized by eGangotri

सांख्ययोगौपृथग्बालाःप्रवदन्तिनपण्डिताः एकमप्यास्थितःसम्यगुभयोर्विन्दतेफलं ४

शाङ्करभाष्यं

एकस्यापिसम्यगनुष्ठानात् कथमुभयोःफलंविन्दत इत्युच्यते यदिति यत् सांख्यैर्ज्ञाननिष्ठैःसंन्यासिभिः प्राप्यते स्थानंमोक्षाख्यं तद्योगैरपिज्ञानप्राप्त्युपायत्वेनेश्वरेसमर्प्यकर्म्माणिआत्मनःफलमनभिसन्धायानुतिष्ठन्ति येते योगिनःतैरपि परमार्थज्ञानसन्न्यासप्राप्तिद्वारेणगम्यत इत्यभिप्रायोऽत एकंसांख्यञ्चयोगञ्चयः पश्यति सपश्यति फलैकत्वात् सम्यक् पश्यतीत्यर्थः ५

आनन्दगिरिकृतटीका

प्रश्नपूर्व्वकंश्लोकान्तरमवतारयति एकस्यापीति केचिद्देवतयोरेकफलत्वंपश्यन्तीत्याशंक्यतेषामेवसम्यग्दर्शित्वंनेतरेषामित्याह एकमिति तिष्ठत्यस्मान्नच्यवते पुनरिति व्युत्पत्तिमाश्रित्याह मोक्षाख्यमिति योगशब्दार्थमाह ज्ञानप्राप्तीति येहि जिज्ञासवःसर्व्वाणिकर्म्माणिभगवत्प्रीत्यर्थत्वेनकुर्वन्तितेषांफलाभिलाषमकृत्वा ज्ञानप्राप्तौ बुद्धिशुद्धिद्वारेणोपायत्वेनानुतिष्ठन्तितेत्र योगाविवक्ष्यन्ते अच्प्रत्ययस्य मत्वर्थत्वं गृहीत्वोक्तंयोगिनइति सर्व्वोपिद्वैतप्रपञ्चोनवस्तुभूतोमायाविलासत्वा दात्मत्वविक्रियोऽद्वितीयोवस्तुसन्निति प्रयोजकज्ञानंपरमार्थज्ञानंतत्पूर्व्वकसन्न्यास द्वारेणकर्म्मिभिरपितदेवस्थानंप्राप्यमित्येकफलत्वं सन्न्यासकर्म्मयोरविरुद्धमित्याह तैरपीति फलैकत्वे फलितमाह अत इति ५

भाषाअनुवाद

जिसहेतुसंन्यासऔकर्मयोग दोनोप्रधानअङ्गरूपअवस्थाभेदमेपायेजाते हैं इससे इनमेकौनश्रेष्ठऐसापूछना अज्ञानीकोतोउचितहोसकताहै परज्ञानीकोतो नहीं यहीकहतेहैं किज्ञाननिष्ठाजोसांख्य औउसीकाअङ्गरूपसंन्यास तथासं न्याससेलक्षित कर्म्मयोगभीसन्न्यासहै इनदोनोकाफलएकहीहै तोभीदोनोभिन् नहैं यहकेवलअज्ञानीकहतेहैं औपण्डितऐसानहींकहते देखो इनमेएकपक्ष काआश्रयलेनेवालापुरुष दोनोके फलकोपाप्तहोताहै जैसे लोगनिःकामकर्म्मक रतेशुद्धचित्तहो त्तत्त्वज्ञानपाप्तिकेद्वाराउनदोनोकाफलजोकैवल्यसोलाभकरतेहैं ऐसेहीसबकर्म्मतत्यागरूपसंन्यासधारीलोगभी परम्पराद्वारेपजोकैवल्यमोक्षसोपावतेहैं तोअलवतादोनोकाफलपृथक्नहींहै सोईकहाकि सांख्यऔयोगकोबालक कहेअज्ञानीजन भिन्नकहते औरपण्डितनहींकहतेहैं एकमेभीअच्छीतरहसं स्थितहोके फलदोनोकाभी पावतेहैं इससेदोनोएकहैं ४

CC-0. In Public Domain. Digitized by eGangotri

यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते
एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति ५

शाङ्करभाष्यं

एवंतर्हि योगात् सन्न्यासएवविशिष्यते कथंतर्हि एवमुक्तंतयोस्तु कर्म्मसंन्यासात् कर्म्मयोगोविशिष्यते इतिश्रुणु तत्र कारणत्वयाप्तेकेवलंकर्मसन्न्यासंकर्मयोगञ्चाभिप्रेत्यतयोरन्यतरःकःश्रेयानिति तदनुरूपंप्रतिवचनंमयोक्तं कर्मसन्न्यासात् कर्मयोगोविशिष्यत इति ज्ञानमनपेक्ष्य ज्ञानापेक्षस्तु सन्न्यासःसांख्यमितिसमाभिप्रेतः परमार्थयोगस्तुसएवयस्तुकर्मयोगोवैदिकःसचतादर्थ्याद्योगःसन्न्यासइति चोपचर्य्यते कथंतादर्थ्यमित्युच्यते सन्न्यासइति सन्न्यासस्तुपारमार्थिकोहे महाबाहो दुःखमाप्तुमयोगतः योगेनविनायोगयुक्तो वैदिकेनकर्मयोगेनईश्वरसमर्पितरूपेणफलनिरपेक्षेणतेनयुक्तो मुनिर्मननादीश्वररूपस्यमुनिर्ब्रह्मपरमात्मज्ञाननिष्ठालक्षणत्वात् प्रकृतः सन्न्यासोब्रह्मोच्यते न्यासइतिब्रह्म ब्रह्महिपरइतिश्रुतेः ब्रह्मपरमार्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणंनचिरेणक्षिप्रमेवाधिगच्छतिप्राप्नोत्ययोमयोक्तं कर्मयोगोविशिष्यगइति ६

स्वामिकृतटीका।

एतदेवस्फुटयति यत् सांख्यैरिति सांख्यैर्ज्ञाननिष्ठैःसन्न्यासिभिर्यत्स्थानंमोक्षाख्यं प्रकर्षेणसाक्षात्प्राप्यते योगैरिति अर्शआदित्वान्मत्वर्थीयोऽत्रत्ययोद्रष्टव्यस्तेनकर्म्मयोगिभिरपि तदेवज्ञानद्वारेणगम्यतेऽवाप्यत इत्यर्थः अतःसांख्यञ्चयोगञ्चैकफलत्वेनैकंयः पश्यति सएवसम्यक्पश्यति ५

भाषा अनुवाद

सांख्यऔयोगदोनोमेसेएकेसम्यकअनुष्ठानकरनेसेदोनोकाफलकिसतरहप्राप्तहोता है इससंङ्कापरसांख्यऔयोगकाएकफलत्व प्रकाशकरते ऊये कहते हैं किसांख्यकहे ज्ञाननिष्ठसन्न्यासीजोमोक्षपदपावतेहैं सोईपदयोगशब्दवाच्य कर्मयोगीभीज्ञानकेद्वाराप्राप्तहोतेहैं इससेएकहीफलके हेतुरूपसन्न्यासऔयोगको जोएकरूपदेखतेहैं तेईसम्यक् दर्शीहैं सोईकहाकि जोपदसांख्यलोगपावतेसोई योगीपुरुषों कोभिमिलताहै और सांख्ययोगदोनोजोएकदेखतेसोदेखतेहैं वाकीसूरदासहैं अथवाजोकोईविरलेऐसेदेखतेहैं तोवेनहींवैसेदेखते हैं ५

CC-0. In Public Domain. Digitized by eGangotri

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ६

आनन्दगिरिकृतटीका

यदि यथोक्तज्ञानपूर्व्वकसंन्यासद्वारा कर्म्मिणामपि श्रेयोवाप्तिरिष्टा तर्हि संन्यासस्यैव श्रेयस्त्वप्राप्तमिति चोदयति एवं तर्हीति संन्यासस्य श्रेष्ठत्वे कर्मयोगस्य प्रशस्यत्ववचनमनुचितमित्याह कथं तर्हीति पूर्व्वोक्तमेवाभिप्रायं स्मारयन् परिहरति शृण्विति कर्मयोगस्य विशिष्टत्ववचनं तत्रेति परामृष्टं तदेव कारणं कथयति त्वयेत्यादिना केवलं विज्ञानरहितमिति यावत् तयोरन्यतरः कः श्रेयानिति इति शब्दोऽध्याहर्त्तव्यः त्वदीयं प्रश्नमसृत्य तदनुगुणं प्रतिवचनं ज्ञानमनपेक्ष्य तद्रहितात् केवलादेव संन्यासात् योगस्य विशिष्टत्वमिति यथोक्तमित्याह तदनुरूपमिति ज्ञानापेक्षः संन्यासस्तर्हि कीदृगित्याशंक्याह ज्ञानेति तर्हि कर्मयोगे कथं योगशब्दः संन्यासशब्दो वा प्रयुज्यते तत्राह यस्त्विति तादर्थ्यात् परमार्थज्ञानशेषत्वादिति यावत् तदेव तादर्थ्यं प्रश्नपूर्व्वकं प्रसाधयति कथमित्यादिना कर्मानुष्ठानाभावे बुद्धिशुद्धभावात् परमार्थसंन्यासस्य सम्यग्ज्ञानात्मनो न प्राप्तिरिति व्यतिरेकमुपन्यस्यान्वयमुपन्यस्यति योगेति पारमार्थिकः सम्यग्ज्ञानात्मकः सामग्र्याभावे कार्य्यप्राप्तिरयुक्तेति मत्वाह दुःखमिति योगयुक्तत्वं व्याचष्टे वैदिकेनेति ईश्वरस्वरूपस्य सविशेषस्येति शेषः ब्रह्मेति व्याख्येयं पदमुपादाय व्याचष्टे प्रकृत इति तत्र ब्रह्मशब्दप्रयोगे हेतुमाह परमात्मेति लक्षणशब्दो गमकविषयः संन्यासे ब्रह्मशब्दप्रयोगे तैत्तिरीयकश्रुतिं प्रमाणयति न्यास इति कथं संन्यासे हिरण्यगर्भवाची ब्रह्मशब्दप्रयुज्यते द्वयोरपि परत्वाविशेषादित्याह ब्रह्म हीति ब्रह्मशब्दस्य संन्यासविषयत्वे फलितं वा

भाषा अनुवाद।

जो ऐसा है कि योगी लोगों को भी शेष मे सन्यास ही से ज्ञाननिष्ठा होती औ ज्ञान के द्वारा मेक्षपद पावते तो फेर सन्यास से कर्मयोग को अधिक क्यों पीछे कहा उचित है कि प्रथम ही से संन्यास करै इस संशययुक्त अर्ज्जुन के प्रति भगवान कहते हैं कि प्रथम कर्मयोग के किये विना हे महाबाहो अर्ज्जुन संन्यास का अभ्यास करना अति कठिन औ दुख का मूल है क्योंकि चित्तशुद्ध भये विना ज्ञान होना असम्भव है परन्तु कर्म के अनुष्ठान करने वाले मुनि लोग चित्तशुद्धि के द्वारा सन्यासी हो अर्थात् कर्म छोड़कर अचिरात कहे शीघ्र ही ब्रह्मपद को प्राप्त होते हैं या वे ब्रह्मरूप हो जाते हैं इस से चित्तशुद्धि के पहले निष्काम कर्म करना ही सन्यास से श्रेष्ठ होता है तुमारी समझ मे फेर है ६

CC-0. In Public Domain. Digitized by eGangotri

योगयुक्तोविशुद्धात्माविजितात्माजितेन्द्रियः सर्व्वभूतात्मभूतात्माकुर्व्वन्नपिन लिप्यते ७

शाङ्करभाष्यं

यदापुनरयंसम्यग्दर्शनप्राप्त्युपायत्वेन योगेति योगेनयुक्तोविशुद्धात्माविशुद्धचित्तो विजितात्माविजितदेहोजितेन्द्रियश्च सर्व्वभूतात्मासर्वेषांब्रह्मादीनांस्तम्बपर्य्यन्तानां भूतानामात्माभूतआत्माप्रत्यक्चेतनोयस्यससर्व्वभूतात्मभूतात्मासम्यग्दर्शीत्यर्थः सतत्रै ववर्त्तमानोलोकसंग्रहायकर्मकुर्व्वन्नपिनलिप्यते योगयुक्तोनकर्मभिर्व्बध्यतइत्यर्थः ७

आनन्दगिरिकृतटीका

क्यार्थमाह ब्रह्मेत्यादिना नद्याःस्रोतांसीवनिम्नप्रवणानिकर्म्माभरितरांपरिप क्वकषायस्यकरणानिसर्व्वतोव्याप्ततातिनिरस्ताशेषकूटस्थप्रत्यगात्मान्वेषणप्रवणानि भवन्तीति सुकर्म्मयोगस्यपरमार्थसंन्यासप्राप्त्युपायत्वेफलितमाह अतइति ६

ननुपारिव्राज्यंपरिगृह्यश्रवणादिसाधनमसकृदनुतिष्ठतोलब्धसम्यग्बोधस्यापि यथापूर्व्वंकर्म्माण्युपलभन्तेतानिचबन्धहेतूनिभविष्यन्तीत्याशंक्यश्लोकान्तरमवतारय

स्वामिकृतटीका।

यदिकर्म्मयोगिनोऽप्यन्ततःसंन्यासेनैवज्ञाननिष्ठातर्हिआदितएवसंन्यासःकर्त्तुं युक्तइति मन्वानंप्रत्याह संन्यासस्त्विति अयोगतःकर्म्मयोगंविनासंन्यासःप्राप्तुःखं दुःखहेतुरशक्यइत्यर्थः चित्तशुद्ध्यभावेनज्ञाननिष्ठायाअसम्भवात्योगयुक्तस्तुशुद्धचि त्ततयामुनिःसंन्यासीभूत्वाअचिरेणब्रह्माधिगच्छति अपरोक्षंजानाति अतश्चित्त शुद्धेःप्राक्कर्म्मयोगएवसंन्यासाद्विशिष्यत इति पूर्व्वोक्तंसद्यंतदुक्तंवार्त्तिककृद्भिःप्र मादिनोहिश्चित्ताःपिशुनाःकलहोत्सुकाःसंन्यासिनोऽपिदृश्यन्तेदैवसंदूषिताशया इति ६

भाषा अनुवाद।

जोऐसाकहोकिकर्म्मकेअनुष्ठानसेचित्तशुद्धिप्राप्तहोती परम्पराप्रणालीक्रमसे ब्रह्मज्ञानहोनेकेअनन्तर इसज्ञानीकापूर्व्वकृतकर्म्मप्रतिबन्धककयोंनहोय इसआश ङ्कापरकहते हैं किजोपुरुषयोगयुक्तअर्थात् निष्कामकर्म्मयोगरूपभक्तिअनुष्ठान करताहै औरजिसनेचित्ततथाइन्द्रियगणअपनेवशीभूतकररा खाहै औरजोअप नेआत्माकोशरीरधारीदूसरेप्राणियोंकेआत्मासेभिन्नबुद्धिनकरके सर्व्वभूतमेंटिका जोचेतनरूपआत्मातिसकोअद्वैतकहेएकरूपविचारकरदेखते हैं इसीसेवेलोगशु द्धचित्तभिक्षाकेअर्थ अथवा स्वभावआधीनशौचभिक्षाआदिजोसबकर्म्मोकोकरते ऊयेभी उनकर्म्मोमेंलिप्तनहींहोते औरनकर्म्मउनकोलगते हैं ७

CC-0. In Public Domain. Digitized by eGangotri

नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ८

शाङ्करभाष्यम्।

नचासौपरमार्थतः करोतीत्येतन्नैवकिञ्चित् करोमीति युक्तःसमाहितः सन्मन्येत चिन्तयेत तत्त्ववित्आत्मनोयाथात्म्यं तत्त्वं वेत्तीति तत्त्ववित् परमार्थदर्शीत्यर्थः कदाकथम्बा तत्त्वमवधारयन् मन्येतेत्युच्यते पश्यन्निति मन्येतेति पूर्वेणसम्बन्धः ८

आनन्दगिरिकृतटीका।

ति यदापुनरिति सम्यग्दर्शनप्राप्त्युपायत्वेनयदापुनरयंपुरुषोयोगयुक्तत्वादिविशेषणःसम्यग्दर्शीसम्पद्यते तदाप्रातिभासिकींप्रवृत्तिमनुसृत्यकुर्व्वन्नपिनलिप्यतइति योजना योगेननित्यनैमित्तिककर्मानुष्ठानेनेतियावत् आदौनित्याद्यनुष्ठानवतोरजस्तमोमलाभ्यामकलुषितंसत्त्वंसिद्ध्यतीत्याह विशुद्धेति बुद्धिशुद्धौकार्य्यकारणसंघातस्यापिस्वाधीनत्वंभवतीत्याह विजितेति तस्य यथोक्तविशेषणवतोजायते सम्यग्दर्शित्वमित्याह सर्व्वभूतेति सम्यग्दर्शिनस्तर्हिकर्मानुष्ठानंकुत्रत्यंतदनुष्ठानेवाकुतोबन्धविश्लेषसिद्धिरित्याशंक्याह सतत्वेति सम्यग्दर्शनंसम्यर्थः ७

कर्माण्यङ्गीकृत्यतैरस्यविदुषोबन्धोनास्तीत्युक्तमिदानींवस्तुतस्तस्य कर्माण्येवन सन्तीत्याह नचेति लोकदृष्ट्याविदुषोपिकर्माणिसन्तीत्याशंक्यस्व दृष्ट्यातदभावमभिप्रेत्याह नैवेति सार्द्धंसमनन्तरश्लोकमाकाङ्क्षापूर्व्वकमुत्थापयति कदेत्यादिना च चक्षुरादिज्ञानेन्द्रियैर्व्वागादिकर्मेन्द्रियैः प्राणादिवायुभेदैरन्तःकरणचतुष्टयेनच तत्तच्चेष्टानिर्व्वर्त्तनावस्थायां तत्तदर्थेषुसर्व्वाप्रवृत्तिरिन्द्रियाणामेवेत्यनुसन्दधानोनैवकिञ्चित्करोमीतिविद्वान्प्रतिपद्यतेइत्यर्थः ८

स्वामिकृतटीका।

कर्म्मयोगादिक्रमेणब्रह्माधिगमेसत्यपितदुपरितनेनकर्म्मणाबन्धःस्यादेवेत्याशंक्याह योगयुक्तइतियोगेनयुक्तःअतएवविशुद्धआत्माचित्तंयस्यअतएवविजितआत्माशरीरंयेनअतएवविजितानीन्द्रियाणियेनततश्चसर्व्वेषांभूतानामात्मभूतआत्मायस्यसलोकसंग्रहार्थंस्वाभाविकंवाकर्म्मकुर्व्वन्नपिनलिप्यते ७

कर्म्मकुर्व्वन्नपिनलिप्यतइत्येतद्विरुद्धमित्याशंक्य कर्त्तृत्वाभिमानाभावान्नेत्याह नैवेति द्वाभ्यां कर्मयोगेनयुक्तः क्रमेणतत्त्वविज्ञानादर्शनश्रवणादीनिकुर्व्वन्नपीन्द्रि

CC-0. In Public Domain. Digitized by eGangotri

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि इन्द्रियाणीन्द्रियार्थेषुवर्त्तन्तइतिधारयन्॥९

शाङ्करभाष्यं

यस्यैवं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मसु अकर्मैव पश्यतः सम्यग्दर्शिन स्तस्य सर्वकर्मसंन्यासएवाधिकारः कर्मणोभावदर्शनान्नहिमृगतृष्णिकायामुदकबु द्ध्यापानायप्रवृत्तउदकाभावज्ञानेपितत्रैवपानप्रयोजनायप्रवर्त्तते ९

आनन्दगिरिकृतटीका।

यथोक्तस्यविदुषोविध्यभावेपिविद्यासार्थ्यात् प्रतिपत्तिकर्मभूतंकर्मसंन्यासंफला त्मकमभिलषति यस्येति अज्ञस्येवविदुषोपिकर्मसुप्रवृत्तिसम्भवात् कुतःसंन्यासेधि कारःस्यादित्याशंक्याह नहीति ९

स्वामिकृतटीका।

याणीन्द्रियार्थेषुवर्त्तन्तइतिधारयन्बुद्ध्यानिश्चिन्वन् किञ्चिदप्यहंनकरोमीतिमन्य ते तत्वदर्शनश्रवणस्पर्शनाघ्राणाश्नानिचक्षुरादिज्ञानेन्द्रियव्यापाराः गतिःपाद यो:स्वापोबुद्धेःश्वासःप्राणस्यप्रलपनंवागिन्द्रियस्यविसर्गःपायूपस्थयोः ग्रहणंहस्तयोः उन्मेषनिमेषणेकूर्माख्यप्राणस्येतिविवेकःएतानि सर्वाणिकुर्वन्नपिअनभिमानात्त त्त्वित्नलिप्यते तथाचपारमर्षंसूत्रंतदधिगमेउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्य पदेशादिति ८।९

भाषा अनुवाद।

औरजोऐसोशङ्काकरोकि कर्मअनुष्ठानकरकेभीउसमेलिप्तकहे आशङ्कान होनायहअत्यन्तअसम्भवहै लिप्तहोहीगा इसपरदोश्लोकमेकहतेहैं किकर्त्तृ त्वअभिमानरहितहोनाअसम्भवनहींहै क्योंकिनिष्कामकर्मयोगरूपभक्तिअनुष्ठा नकरनेवालेमनुष्य क्रमसेतत्त्वज्ञानीहोकेदर्शनआदिइन्द्रियव्यापारकरतेभीइन्द्रि यसबअपनाअपनाकामकरतीहैं औरहमकुछभीनहींकरतेऐसीबुद्धिउनकीनि श्चयबनीरहतीहै यथादर्शनश्रवणस्पर्शघ्राणभोजन येज्ञानइन्द्रियोंकेव्यापारऔर गमनवचनविसृजनकहेविष्ठामूत्रत्याग जोकर्मइन्द्रीयोंकेकाम औरग्रहण जोकर काव्यापार औरस्वप्नबुद्धिव्यापारनिद्राहोना श्वसन्प्राणवायुव्यापार औरउन्मेष निमेषकहे पलकलगनाखलना जोकूर्मवायुसेहोताहै यहसबइन्द्रियआदिकाकर्म है औरहमद्रष्टासाक्षीरूपहैं यहकुछहमनहींकरते ऐसेहीज्ञानीपुरुष इनक र्मोमेअभिमानशून्यलिप्तनहींहोतेहैं सोईकहादोश्लोकसे किइन्द्रियाणीन्द्रियार्थेषु वर्त्तन्तेइतिधारयन् यहांतक ८ आठ नव इनदोनोश्लोकका अर्थ एकहीसाथहै ९

CC-0. In Public Domain. Digitized by eGangotri

ब्रह्मण्याधायकर्माणिसङ्गंत्यक्त्वाकरोतियः लिप्यतेनसपापेनपद्मपत्रमिवाम्भसा १०

शाङ्करभाष्यं।

यस्तुपुनरतत्त्ववित्प्रवृत्तश्चकर्मयोगे ब्रह्मणीति ब्रह्मणीश्वरेआधायनिक्षिप्य तदर्थंकरोमीतिभृत्यइवस्वाम्यर्थंसर्व्वाणिकर्म्माणि मोक्षेपिफलेसङ्गंत्यक्त्वाकरोतियः सर्व्वकर्माणि लिप्यतेनसपापेनसंबध्यते पद्मपत्रमिवाम्भसोदकेन १०

केवलंसत्त्वशुद्धिमात्रफलमेवतस्यैवकर्मणःस्यात् यस्मात कायेनेति कायेन देहेनमनसाबुद्ध्याच केवलैरिन्द्रियैर्ममत्ववर्ज्जितैरपिईश्वर यैवकर्मकरोमीति नफला येति ममत्वबुद्धिशून्यैरिन्द्रियैरपिकेवलशुद्धैःकायादिभिरपिप्रत्येकंसम्बध्यते सर्व्व व्यापारेषुममतावर्ज्जनायायोगिनःकर्मिणःकर्मकुर्व्वन्तिसङ्गंत्यक्त्वाफलविषयमात्मशुद्ध येसत्त्वशुद्धयइत्यर्थः ११

आनन्दगिरिकृतटीका।

तर्हिविद्यावानिवाविद्यावानपि कर्मणि नप्रवर्त्तेत पापोपहतिसम्भवादित्याशंक्याह यस्त्विति यथाभृत्यःस्वाम्यर्थंकर्म्माणिकरोति नस्वफलमपेक्षते तथैवयोवि द्वान्मोक्षेपिसङ्गंत्यक्त्वाभगवदर्थमेवसर्वाणिकर्म्माणिकरोति नस्वकर्मणावध्यतेनहि पद्मपत्रमम्भसासम्बध्यतेतद्वदित्यर्थः १०

स्वामिकृतटीका

तर्हियस्यकरोमीत्यभिमानोऽस्तितस्यकर्मलेपोदुर्व्वारः तथाचविशुद्धचित्तत्वात् संन्यासोऽपिनास्तीतिमहत् सङ्कटमापन्नमित्याशंक्याह ब्रह्मणीति ब्रह्मण्याधायप रमेश्वरेसमर्प्यतत्फलेचसङ्गंत्यक्त्वा यःकर्म्माणि करोति असौपापेनवन्धहेतुतयापा पिष्ठेनपुण्यपापात्मकेनकर्मणानलिप्यते यथापद्मपत्रमम्भसिस्थितमपितेनाम्भसानलि प्यतेतद्वत् १०

भाषा अनुवाद।

औरजोमनुष्य हमकर्मकरतेहैं ऐसाअभिमानरखतेहैं तेईकर्ममेंलिप्त होतेऔउन्हीकोकर्मवन्धहोताहै फेरिचित्तकीअशुद्धतासेउनकोसंन्यासभीदुर्घट है इससेउनकोसबतरहशङ्कटहै जोऐसीशङ्काकरोतो यहउत्तरसुनोकिअ न्तर्यामीईश्वरकीप्रेरणासेहमसबकर्मकरतेहैं ऐसेविचारकरिकेसकलकर्मईश्वर मेंसमर्पणकरकेऔकर्मकालमेंआशक्तिरहितकर्मकरतेहैं तोउनकोकर्मप्रतिव न्धकनहींहोतेऔरवेकर्मसेलिप्तनहींहैं जैसेपद्मपत्रजलमेंनिरन्तररहतेभीज लसेअलगहै सोईकहाकि ब्रह्ममेंकर्मअर्पणकरिसङ्गकहेआशक्तिकोछोड़िजोकर्मक रैहै सोपापसेनहींलिप्तहोता जैसेकमलकापत्ताजलमेंरहतेभीजलसेभिन्नहै १०

CC-0. In Public Domain. Digitized by eGangotri

कायेनमनसाबुद्ध्याकेवलैरिन्द्रियैरपि योगिनःकर्म्मकुर्व्वन्तिसङ्गंत्यक्त्वात्मशुद्धये ११

शाङ्करभाष्यं।

तस्मात्तवैवतवाधिकारइति कुरुकर्मैवयस्माच्च युक्तइति युक्तईश्वरायकर्माणि करोमिनममफलायेति एवंसमाहितःसन्कर्मफलंत्यक्त्वापरित्यज्यशान्तिंमोक्षाख्यामाप्नोति नैष्ठिकींनिष्ठायाश्चवांसत्त्वशुद्धिज्ञानप्राप्तिसर्व्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषःयस्तुपुनरयुक्तोऽसमाहितःकामकारेणकरणंकारःकामस्यकारःकामकारस्तेनकामकारेणकामप्रेरिततयेत्यर्थःममलाभायेदंकरोमिकर्मेत्येवंफलेसक्तोनिबध्यते अतस्त्वंयुक्तोभवइत्यर्थः १२

आनन्दगिरिकृतटीका

अविदुषस्तर्हिकृतेनकर्मणाकिंस्यादित्याशंक्याह केवलमितिअज्ञस्येश्वरार्पणबुद्ध्यानुष्ठितंकर्मबुद्धिशुद्धिफलमित्यत्रैवहेतुमाह यस्मादिति केवलशब्दस्यप्रत्येकंसम्बन्धेप्रयोजनमाह सर्व्वव्यापारेष्विति ११

कर्मणश्चित्तशुद्धिफलत्वेतादर्थ्येनकर्मानुष्ठानमेवतवकर्त्तव्यमिति यस्मादित्यस्यापेक्षितंबदन्फलितमाह तस्मादिति युक्तःसन्फलंत्यक्त्वाकर्मकुर्व्वन्मोक्षाख्यांशान्तिंयस्मादाप्नोति तस्माच्चत्वयासङ्गंत्यक्त्वाकर्मकर्त्तव्यमितियोजना विपक्षेदोषमाह अयुक्तइति युक्तत्वंव्याकरोति ईश्वरायेति फलंपरित्यज्यकर्मकुर्व्वन्निति शेषःनैष्ठिकीशान्तिरित्येतदेवविशदयति द्वितीयमर्द्धंविभजते यस्त्विति असमाधानेदोषादर्जुनस्यनियोगंदर्शयति अतस्त्वमिति १२

स्वामिकृतटीका।

बन्धकत्वाभावमुक्तामोक्षहेतुत्वंसदाचारेणदर्शयति कायेनेति कायेनस्नानादिमनसाध्यानादिबुद्ध्यातत्त्वनिश्चयादिकेवलैः कर्माभिनिवेशरहितैरिन्द्रियैःश्रवणकीर्त्तनादिलक्षणंकर्मफलसङ्गंत्यक्त्वाचित्तशुद्धयेकर्मयोगिनःकुर्व्वन्ति ११

भाषा अनुवाद।

निष्कामकर्मबन्धकनहींहैं इसकहनेकेबाद अबउत्तममनुष्योंकोकर्मकेद्वारामुक्तिदिखावते हैं किशरीरसेस्नानादिमनसध्यानादिऔबुद्धिसेतत्त्वनिश्चयादितथाकर्ममेआशक्तिरहितऔरफलाभिलाषशून्यहोकर इन्द्रियोंकेद्वाराश्रवणकीर्त्तनआदिचित्तशुद्धिकेअर्थकर्मानुष्ठाईयोगीकर्मकरते हैं सोई कहाकिकायमनबुद्धिसेऔरकेवलइन्द्रियोंसेआत्मशुद्धिकेहेतुसङ्गछोड़ियोगीजनकर्मकरते हैं ११

CC-0. In Public Domain. Digitized by eGangotri

युक्तःकर्मफलंत्यक्त्वाशान्तिमाप्नोति नैष्ठिकीं अयुक्तःकामकारेणफलेसक्तो निबध्यते १२

शाङ्करभाष्यं

यस्तु परमार्थदर्शीससर्वेति सर्वाणि कर्माणिसर्वकर्माणिसंन्यस्यपरित्यज्य नित्यं नैमित्तिकं काम्यं प्रतिषिद्धञ्च तानि सर्वाणि कर्माणि मनसा विवेकबुद्ध्या कर्मादौअकर्मसन्दर्शनेनसंत्यज्येत्यर्थः आस्तेतिष्ठति सुखंत्यक्तवान्मनःकायचेष्टो यतिःनिरायासःप्रसन्नचित्तःआत्मनोऽन्यत्रनिवृत्तत्वाच्चसर्वप्रयोजनः सुखमास्तइत्यु च्यतेवशीजितेन्द्रियइत्यर्थः क्वास्तइत्याह नवद्वारेपुरेसप्तशीर्षण्यात्मनउपलब्धि द्वाराण्यवाग्द्वेमूत्रपुरीषविसर्गार्थेतैर्द्वारैर्नद्वारंपुरसुच्यतेशरीरंपुरमिवपुरमात्मैक स्वामिकंतदर्थप्रयोनैश्चेन्द्रियमनोबुद्धिविषयैरनेकफलविज्ञानस्योत्पादकैःपौरैरिवा धिष्ठितंतस्मिन्नवद्वारेपुरेदेहीसर्वंकर्मसन्न्यास्यास्तेइति किंविशेषणेनसर्वोहिदेही संन्यास्यसन्न्यासीवदेहएवास्तेतन्नानर्थकंविशेषणमुच्यते यस्त्वज्ञोदेहीदेहेन्द्रियसं घातमात्रात्मदर्शीससर्वोपिगेहेभूमावासनेवासेइतिमन्यते नहिदेहमात्रात्मदर्शि नोदेहइवदेहआसइतिप्रत्ययःसम्भवति देहादिसंघातव्यतिरिक्तात्मदर्शिनस्तुदेह आसइतिप्रत्ययउपपद्यते परकर्मणाञ्चपरस्मिन्नात्मन्यविद्ययाध्यारोपितानांविद्यया विवेकज्ञानेन मनसासन्न्यासउपपद्यते उत्पन्नविवेकविज्ञानस्यसर्वकर्मसन्न्यासिनो पिगेहइवदेहएव नवद्वारेपुरेआसनंप्रारब्धफलकर्मसंस्कारशेषानुवृत्तेर्देहएव विशेषविज्ञानोत्पत्तेर्देहएवास्तइत्यस्यैवविशेषणफलंविद्वदविद्वत्प्रत्ययभेदापेक्षत्वाद्

स्वामिकृतटीका।

ननुकथंतेनैवकर्मणाकश्चिन्मुच्यते कश्चिद्बध्यतइति व्यवस्थाअतआह युक्तइति युक्तः परमेश्वरैकनिष्ठःसन्कर्मणांफलंत्यक्त्वाकर्माणिकुर्वन्नात्यन्तिकींशान्तिंमोक्षंप्राप्नोति अयुक्तस्तुबहिर्मुखःकामकारेणकामतःप्रवृत्त्याफलेआसक्तोनितरांबन्धंप्राप्नोति १२

भाषा अनुवाद।

जोऐसीशङ्काकरो किवहीएककर्मसेकोइतोमुक्तऔकोइकोबन्धयहकैसीव्यव स्थाहै तोइसकानिवारणकरतेहुयेकहतेहैं कियोगीकहे कर्मकारीपुरुषईश्वरमे एकनिष्ठहोकर्मफलकोत्यागि कर्मअनुष्ठानकरिकेअत्यन्तशान्तिस्वरूपजोमुक्तिति सकोप्राप्तहोते हैं परन्तुअयुक्तकहे कामनाविशिष्टकर्मफलासक्त बहिर्मुखलोगका म्यकर्मसेअवश्यहीबद्धहोते हैं युक्तकहेईश्वरार्थकर्मकरनेवाले १२

सर्व्वकर्म्माणिमनसासंन्यस्यास्तेसुखंवशी नवद्वारेपुरेदेही नैवकुर्व्वन्नकारयन् १३

शाङ्करभाष्यं।

यद्यपि कार्य्यकरणकर्म्माण्यविद्यात्मन्यध्यारोपितानि सन्न्यस्यास्ते इत्युक्तंतथाप्यात्मसमवायिनुकर्त्तृत्वं कारयितृत्वञ्चस्यादित्याशंक्याह नैवकुर्व्वन्स्वयंनचकार्य्यकरणानिकारयन्क्रियासुप्रवर्त्तयन्किंयत्तत्कर्त्तृत्वं कारयितृत्वञ्चदेहिनःस्वात्मसमवायिसत् सन्न्यासान्नसंभवति यथागच्छतीगतिःगमनव्यापारपरित्यागेनस्यात्तद्वत् किंवास्वतएवात्मनोनास्तीत्यलोच्यते नास्यात्मनःस्वतःकर्त्तृत्वं कारयितृत्वञ्चोक्तंह्यविक्रार्य्योयमुच्यते शरीरस्थोपिकौन्तेय नकरोतिनलिप्यतइति ध्यायतीवलेलायतीवेतिश्रुतेः १३

आनन्दगिरिकृतटीका

तर्हिफलेसक्तिंत्यक्त्वासर्व्वैरपिकर्मकर्त्तव्यमितिकर्मसन्न्यासस्यनिरवकाशत्वमित्याशंक्याविदुषःसकाशाद्विदुषोविशेषंदर्शयति यस्त्विति सर्व्वकर्मपरित्यागेप्राप्तंमरणंव्यावर्त्तयति आस्तइति दृष्टिंलभमानोपिशरीरतापेनाध्यात्मिकादिनातप्यमानस्तिष्ठतीति चेन्नेत्याह सुखमिति कार्य्यकरणसंघातपारवश्यंपर्युदस्यति वशीति आसनस्थापेक्षितमधिकरणंनिर्दिशति नवेति देहसम्बन्धाभिमानाभासवत्त्वमाह देहीति मनसासर्वकर्मसंन्यासेपि लोकसंग्रहार्थंबहिःसर्वंकर्मकर्त्तव्यमितिप्राप्तंप्रत्याह नैवेति तान्येवसर्व्वाणिकर्माणिपरित्यज्यानिविशिनष्टि नित्यमिति तेषांपरित्यागेहेतुमाह तानीति यदुक्तं सुखमास्तइति तदुपपादयति त्यक्तेति जि

भाषाअनुवाद

इनसबबातोंसेअशुद्धचित्तमनुष्यकोसन्न्यासकीअपेक्षानिष्कामकर्मकरनाहीं श्रेयहै यहविस्तारपूर्वकककहिकर अबशुद्धचित्तपुरुषकोसन्न्यासहीश्रेष्ठहै यह कहतेहैंकिजितचित्तविवेकयुक्तपुरुषबुद्धिकेद्वाराविक्षेपकारकसबकर्मछाड़िजैसेसुखमेरहते तैसेज्ञाननिष्ठयुक्तहोकेभीसुखमेरहते हैं जोकहोकिकहांरहते तो कहते हैं किनवद्वारपुरजोअहङ्कारशून्यशरीर तिसमेंआत्मस्वरूपमेंस्थितरहतेहैं औरअहङ्कारकेअभावसेआपशरीरककर्मनहींकरते औरममताकेअभावसेदूसरेसेभी वेकोईकामनहीं करावतेहैं यहशुद्धऔरअशुद्धचित्तमनुष्योंकाभेद भगवाननेकहा १३

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

तेन्द्रियत्वंकायवयवीकारस्याप्युपलक्षणंद्वेश्रोत्रे द्वेचक्षुषीद्वेनासिकेवागेकेति सप्तशी र्षण्यानिशिरोगतानिशब्दाद्युपलब्धिद्वाराणि तथापिकथंनवद्वारत्वमधोगताभ्यां पायूपस्थाभ्यांसहेत्याह अर्वागिति शरीरस्यपुरसाध्यंस्वामिनापौरैश्चाधिष्ठितत्वेन दर्शयति आत्मेत्यादिना यद्यपिदेहेजीवनत्वाद्देहसम्बन्धाभिमानाभासमानवत्ति ष्ठते तथापिप्रवासीवपरगेहे तत्पूजापरिभवादिभिरप्रहृष्यन्नविषीदन्व्यामोहादि रहितश्चतिष्ठतीति मत्वाह तस्मिन्निति विशेषणमाक्षिपति किमिति तदनुपप त्तिमेवादर्शयति सर्वोहीति सर्वसाधारणेदेहावस्थानेसन्न्यस्यदेहेतिष्ठति विद्वा निति विशेषणमकिञ्चित्करमिति फलितमाह तत्रेति विशेषणफलंदर्शयन्नुत्त रमाह उच्यतइति किंह्यविवेकिनंप्रतिविशेषणानर्थक्यंचोद्यते किम्वाविवेकिनं प्रतीति विकल्पाद्यमङ्गीकरोति यस्त्विति अन्नत्वदेहित्वंस्फुट यति देहेति संघातात्मदर्शिनोपिदेहे स्थितिप्रतिभासःस्यादिति चेन्नेत्याह न हीति द्वितीयंदूषयति देहादीति गृहादिषुदेहस्यावस्थानेनात्मावस्थानभ्रमव्या वृत्त्यर्थंदेहे विद्वानास्तइति विशेषणमुपपद्यते विवेकवतो देहेवस्थानप्रतिभासस म्भवादित्यर्थः ननुविवेकिनोदेहावस्थानप्रतिभानेपिवाङ्मनोदेहव्यापारात्मनाकर्म णांतस्मिन्प्रसङ्गाभावात् तत्त्यागेनकृतस्तस्यदेहेवस्थानमुच्यते तत्राह परकर्मणाञ्चे ति ननुविवेकिनोदिगाद्यनवच्छिन्नवाह्याभ्यन्तराविक्रियब्रह्मात्मता मन्यमानस्यकु तोदेहेवस्थानमास्थातुंशक्यते तत्राह उत्पन्नेति तत्रहेतुमाह प्रारब्धेति प्रारब्धफलंध र्माधर्मात्मकंकर्मतस्योपभुक्तस्यशेषादनुपभुक्ताद्देहादिसंस्कारोनुवर्त्तते तदनुवृत्तेश्च तत्रैवदेहेविशेषविज्ञानमवस्थानविषयमुपपद्यते अतोविवेकवतःसन्न्यासिनोदेहेव स्थानव्यपदेशःसम्भवतीत्यर्थः अविद्वत्प्रत्ययापेक्षयाविशेषणासम्भवेपिविद्वत्प्रत्ययापेक्ष याविशेषणमर्थवदित्युपसंहरति देहएवेति देहेस्ववस्थानविषयोविद्वत्प्रत्ययस्तदवि षयश्चाविद्वत्प्रत्ययस्तयोरेवंभेदेविद्वत्प्रत्ययापेक्षयाविशेषणमर्थवदित्युपसंहरन्नेवहे तुंविशदयति विद्वदिति आरोपितकर्तृत्वाद्यभावेपिस्वगतकर्तृत्वादिदुर्वारमित्या शङ्कामनूद्यदूषयति यद्यपीत्यादिना क्रियासुप्रवर्त्तयन्नास्तइति पूर्वेणसम्बन्धःपूर्व स्यापिशतुरेवमेवसम्बन्धः कर्तृत्वंकारयितृत्वञ्चात्मनोनेत्यत्रविचारयति किमिति यत्कर्तृत्वंकारयितृत्वञ्चतत्किंदेहिनः स्वात्मसमवायिसदेवसन्यासान्नभवतीत्यु च्यते यथागच्छतोदेवदत्तस्यस्वगतैवगतिः तत् स्थित्यात्यागान्नभवति अथवास्वा रस्येनकर्तृत्वंकारयितृत्वञ्चात्मनोनास्तीति वक्तव्यमाद्येसक्रियत्वंद्वितीयेकूटस्थत्व

CC-0. In Public Domain. Digitized by eGangotri

नकर्त्तृत्वंनकर्माणि लोकस्यसृजतिप्रभुः नकर्मफलसंयोगं स्वभावस्तुप्रवर्त्तते १४

आनन्दगिरिकृतटीका

मित्यर्थः द्वितीयंपक्षमाश्रित्योत्तरमाह अत्रेति उक्तोऽर्थोवाक्योपक्रममनुकूलयति उक्तंहीति तत्रैववाक्यशेषमपिसम्पादयति शरीरस्थोपीति स्मृयुक्तेर्थेश्रुतिमपिदर्शयति ध्यायतीवेति उपाधिगतैवसर्व्वाविक्रियानात्मनिस्तोस्तीत्यर्थः १३

स्वामिकृतटीका ।

एवंतावत् चित्तशुद्धिशून्यस्यसंन्यासात् कर्मयोगोविशिष्यतइत्येतत्प्रपञ्चितं इदानींशुद्धचित्तस्यसंन्यासःश्रेष्ठइत्याह सर्व्वकर्म्माणीति वशीजितचित्तःसर्व्वकर्म्माणिविक्षेपकानिमनसाविवेकयुक्तेनसंन्यस्यसुखंयथाभवत्येवंज्ञाननिष्ठःसन्नास्ते क्वास्तइत्यतआह नवद्वारे नेत्रेनासिकेकर्णौमुखञ्चेति सप्तशिरोगतानि अधोगतेद्वेपायूपस्थरूपेइत्येवं नवद्वाराण्यस्मिन्पुरेपुरवदहङ्कारशून्येदेहेदेहीअवतिष्ठते अहङ्काराभावादेवस्वयंतेनदेहेननैवकुर्व्वन्ममकाराभावात्नकारयन्निति अशुद्धचित्ताद्व्यावृत्तिरुक्ताअशुद्धचित्तोहिसंन्यस्यपुनःकरोति कारयतिच नत्वयंतथा अतःसुखमास्तइत्यर्थः १३

भाषा अनुवाद

ईश्वरजिसकोइसलोकसे श्रेष्ठलोककोलेजानेकीइच्छाकरतेहैं उससेसत्कर्मकरावतेऔरजिसेअधोलोकलेजानेकीइच्छाकरतेउससेकुकर्मकरवावतेहैं यहश्रुतिमेकहाहै तोपरमेश्वरकीप्रेरणासे पराधीनजोमनुष्यसोकैसे वेकर्मत्यागकरनेशकैएक दूसरेजोपरमेश्वरहीकोप्रेरणासेशुभअशुभकर्ममेलोगप्रवृत्तहोतेहैं तोईश्वरभीविषमदृष्टिऔनिर्दयहै फेरिकर्मोकाकरवावनेवालाभीवहीहै तौउसकोभीपुन्यपापसम्बन्धक्योंनहोय जोयहशङ्काकरोतोइसकासिद्धान्त यहदोश्लोकसेकहतेहैं किप्रभुजोईश्वरसोमनुष्योंकोकर्त्तृत्वअथवाकर्मसृजननहींकिया किन्तुमनुष्योंकोपूर्व्वकर्मसंस्काररूपजोअज्ञान सोइकर्त्तृत्वादिमेप्रवृत्तकरैहै इसीसेअपनीअनादिअविद्यासेकामनावशहोप्रवृत्तियुक्तपुरुषकोईश्वरभीकर्ममेनियुक्तकरतेहैं औरईश्वरकुछआपसेउसकोप्रवृत्तिनहींदेतेहैं सोईकहाहैकिकर्त्तृत्वऔकर्मतथाफलयोगप्रभुनेनहींकिया लोगपूर्वसंस्काररूपस्वभावअर्थात्मायासेप्रवृत्तहैं १४

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

किञ्चनकर्त्तृत्वमिति नकर्त्तृत्वंस्वतःकुर्व्वितानापिकर्माणि रथघटप्रासादादी निर्ईप्सिततमानिलोकस्यसृजत्युत्पादयतिप्रभुरात्मानापिरथादिकृतवतस्तत्फलेन संयोगंनकर्मफलसंयोगंयदिकिञ्चिदपि स्वतोनकरोतिनकारयतिच देहीकरूर्हि कुर्व्वन् कारयंश्चप्रवर्त्ततइत्युच्यते स्वभावस्तुस्वोभावःस्वभावोऽविद्यालक्षणाप्रकृतिः मायाप्रवर्त्तते दैवीह्येत्यादीतिवक्ष्यमाणा १४

आनन्दगिरिकृतटीका

आत्मनोयदुक्तंकारयितृत्वंनास्तीति तत्प्रपञ्चयति नेत्यादिना यद्यपिलोकस्य कर्त्तृत्वंनसृजतीतिनास्तीति कारयितृत्वं तथापिरथशकटादीनिकुर्व्वन्भवतिकर्त्ते त्याशंक्याह नकर्माणीति तथापिभोजयितृत्वेनविक्रियावत्त्वंदुष्परिहारमित्याशंक्या ह नकर्म्मेति कस्यतर्हिप्रवर्त्तकत्वंतदाह स्वभावस्त्विति कुर्व्वितिकर्त्तृत्वंलोकस्य नसृजत्यात्मेतिसम्बन्धः रथादीनांकर्मत्वंसाधयति ईप्सितेति आत्मनोदेहादिस्वा मित्वेनप्रभुत्वं रथादिकृतवतोलोकस्य रथादिफलेनसम्बन्धमपि नसृजत्यात्मेत्यात्मनो भोजयितृत्वंप्रत्याचष्टे नापीति चतुर्थपादंशङ्कोत्तरत्वेनावतारयति यदीत्यादिना स्वभाववादस्तर्हीत्याशंक्यव्याकरोति अविद्यालक्षणेति प्रकृतेर्व्विद्यावत्वंव्युदसितुं मायेत्युक्तं साचसप्तमेवच्यते तेनप्रधानविलक्षणेत्याह दैवीह्येति १४

स्वामिकृतटीका।

ननुएषएवसाधुकर्मकारयतितं यमेभ्योलोकेभ्यउन्निनीषतेएषएवासाधुकर्म कारयतितं यमेभ्योलोकेभ्यअधोनिनीषतइत्यादिश्रुतेःपरमेश्वरेणैवशुभाशुभफलेषु कर्मसु कर्त्तृत्वेन प्रयुज्यमानोऽस्वतन्त्रः पुरुषः कथंतानिकर्माणित्यजेत् ईश्वरेणैव ज्ञानमार्गेप्रयुज्यमानः शुभान्यशुभानिचत्यक्ष्यतीतिचेत् एवंसतिवैषम्यनैर्घृण्याभ्या मीश्वरस्यापिप्रयोजककर्त्तृत्वात् पुण्यपापसम्बन्धःस्यादित्याशंक्याह नकर्त्तृत्वमिति द्वाभ्यां प्रभुरीश्वरोजीवलोकस्यकर्त्तृत्वादिकं नसृजति किन्तुजीवस्यस्वभावोऽविद्यै वकर्त्तृत्वादिरूपेणप्रवर्त्तते अनाद्यविद्याकामवशात् प्रवृत्तिस्वभावमेवलोकमीश्वरः कर्मसुनियुङ्क्ते नतुस्वयमेवकर्त्तृत्वादिकमुत्पादयतीत्यर्थः १४

CC-0. In Public Domain. Digitized by eGangotri

नादत्तेकस्यचित्पापंनचैवसुकृतंविभुः अज्ञानेनावृतंज्ञानंतेनमुह्यन्तिजन्तवः १५

शाङ्करभाष्यं।

परमार्थतस्तु नेति नादत्तेनचगृह्णातिभक्तस्यापिकस्यचित्पापंनचैवादत्ते सुकृतंविभुःभक्तैःप्रयुक्तंविभुःकिमर्थंतर्हिभक्तैः पूजादिलक्षणंयागदानहोमादिकञ्च सुकृतंप्रयुज्यतइत्याह अज्ञानेनावृतंज्ञानंविवेकविज्ञानंतेनमुह्यन्तिकरोमिकारयामिभोक्ष्येभोजयामीत्येवंमोहंगच्छन्त्यविवेकिनःसंसारिणोजन्तवः १५

आनन्दगिरिकृतटीका।

कर्तृत्वभोक्तृत्वैश्वर्य्यान्यात्मनोऽविद्याकृतानीत्युक्तमिदानीमीश्वरेसन्न्यस्तसमस्तव्यापारस्यतदेकशरणस्यदुरितं सुकृतम्वातदनुग्रहार्थंभगवानादत्तेमदेकशरणोमत्प्रीत्यर्थंकर्मकुर्व्वाणोदुष्कृताद्यनुमोदनेनानुग्राह्योमयेति प्रत्ययभाक्त्वादित्याशंक्य सोपिपरमार्थतोनास्यास्तविक्रियत्वादित्याह परमार्थतस्त्विति कथंतर्हिभक्तानामनुग्राह्यत्वमीश्वरस्यानुगृहीतृत्वमिति प्रसिद्धिस्तत्राह अज्ञानेनेति पूर्व्वार्द्धगतान्यक्षराणिव्याख्यायआकाङ्क्षापूर्व्वकमुत्तरार्द्धमवतार्य्यव्याचष्टे किमर्थमित्यादिना १५

स्वामिकृतटीका।

कोऽपिसन्प्रभुःकस्यचित्पापंसुकृतञ्चनैवादत्तेनभजतेतत्रहेतुः विभुःपरिपूर्णःआप्तकामइत्यर्थःयदिहिस्वार्थकामनयाकारयेत्तर्हितथास्यात्नत्वेतदस्तिआप्तकामस्यैवाचिन्त्यनिजमाययातत्तत्पूर्वकर्मानुसारेणप्रवर्त्तकत्वात् ननुभक्तानानुगृह्णतोऽभक्तान्निगृह्णतश्चवैषम्योपलम्भात् कथमाप्तकामत्वमित्यतआह अज्ञानेनेति निग्रहोऽपिदण्डरूपोऽनुग्रहएवेत्येवमज्ञानेनसर्वत्रसमः परमेश्वरइत्येवम्भूतंज्ञानमावृतं तेनहेतुनाजन्तवोजीवामुह्यन्ति भगवतिवैषम्यंमन्यन्तइत्यर्थः १५

भाषा अनुवाद।

जिसहेतुभगवान नकुछकरतेऔर नकिसीसेकुछकरवातेहैं वेतोविभु कहेव्यापक तथापूर्णकामहैं इससेभक्तअभक्तकिसीकेपुन्यपापकेभागीनहींहैं परन्तुपरमेश्वरकीअचिन्त्यजोमायासोई पूर्वकर्मकेअनुसारउंचनीचकर्ममेलोगोंकोप्रवृत्तिदेती औरअज्ञानसेज्ञानआवृत्तहै तिससेसबमोहितहोतेहैं जोकहो किपूर्णकामकोफेरिभक्तोंपरअनुग्रहऔरअभक्तोंकानिग्रहक्योंकरघटैहै तोकहते हैं किपरमेश्वरकानिग्रहरूपदण्डअनुग्रहहै अर्थात् दण्डहोनेसेपापोकापाप दूरहोजायगा ऐसेदण्डरूपअनुग्रहकानजाननाजोअज्ञान सोईपरमेश्वरविषयक ज्ञानकोआवृतकरताहै तोफेरिजीवमोहितहोयअपनेअज्ञानसे परमेश्वरमेंविषमदृष्टिकरतेहैं १५

CC-0. In Public Domain. Digitized by eGangotri

ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनः तेषामादित्यवज्ज्ञानंप्रकाशयतितत्परं १६
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छन्त्यपुनरावृत्तिंज्ञाननिर्धूतकल्मषाः १७

शाङ्करभाष्यं।

ज्ञानेनइति ज्ञानेनतुयेनअज्ञानेनावृत्तायामुह्यन्तिजन्तवः तदज्ञानंयेषांजन्तूनां विवेकज्ञानेनात्मविषयेण नाशितमात्मनोभवति तेषांजन्तूनामादित्यवत् यथादित्यः समस्तंरूपजातंअवभासयति तद्वत् ज्ञानज्ञेयञ्चवस्तुसर्व्वंप्रकाशयतितत् परमार्थतत्त्वं १६ यत्परंज्ञानंप्रकाशितं तद्बुद्धय इति तस्मिन्गतावुद्धिर्येषांतेतद्बुद्धयः तदात्मानस्तदेवपरंब्रह्मआत्मायेषांतेतदात्मानः तन्निष्ठाइति तन्निष्ठानिष्ठाभिनिवेशस्तात्पर्यंसर्व्वाणिकर्माणिसन्न्यस्य ब्रह्मण्येवावस्थानंयेषांतेतन्निष्ठास्तत्परायणाश्चतदेवपरमायनंपरागतिर्येषांभवतितेतत्परायणाः केवलात्मरतयइत्यर्थः तेगच्छन्त्येवम्विधाअ

आनन्दगिरिकृतटीका।

तर्हिसर्व्वेषामनाद्यज्ञानत्वात् व्यामोहाभावाच्चकुतः संसारनिवृत्तिरितितत्रा ह ज्ञानेनेति सर्वमितिपूर्णत्वमुच्यतेज्ञेयस्यैववस्तुनस्तत्परमिति विशेषणं तद्याच ष्टे परमार्थतत्त्वमिति १६

स्वामि कृतटीका

ज्ञानिनस्तुनमुह्यन्तीत्याह ज्ञानेनेति आत्मनोभगवतोज्ञानेनयेषांतद्वैषम्यो पलम्भकमज्ञानंनाशितंतज्ज्ञानंतेषामज्ञानंनाशयित्वा तत्परंपरिपूर्णमीश्वरस्व रूपंप्रकाशयति यथादित्यस्तमोनिरस्यसमस्तंवस्तुजातंप्रकाशयतितद्वत् १६

भाषा अनुवाद।

औरज्ञानसेजिनकाअज्ञाननाशहोगयाहै ऐसेज्ञानीपुरुषोंको परजोभग वत्स्वरूप सोप्रकाशमानहै जैसेसूर्यकेप्रकाशसेअन्धकारदूरहोवस्तुसबप्रकाशि तहोतीहैं लोगकेवलअपनेमोहसेईश्वरमेमोहकल्पनाकरतेहैं १६

ऐसेजोपरमेश्वरतिनकेउपासकोंकोप्राप्तजोफलहोताहै सोकहतेहैं कि भगवतकीभक्तिसेअवश्यही संसारसागरकोउतरजायंगे ऐसीजिनकेनिश्चयरूपबु द्धिहै औरतैसेहीभगवद्भक्तिमेसम्पन्नऔतत्परहैं औरपरमेश्वरहीजिनकेपरमअव लम्बहैं सोईजनईश्वरकेप्रसादसेनिःपापहोमुक्तिपदपाय आवागमनसेरहितहो तेहैं सोईकहाकिईश्वरमेबुद्धिऔईश्वरमेआत्माऔईश्वरमेनिष्ठा तथाईश्वरमेपरा यणपुरुषज्ञानसेनिर्द्धूतकल्मष अपुनरागमनपदमोक्षप्राप्तहोतेहैं

शाङ्करभाष्यं

पुनरावृत्तिं पुनर्देहसम्बन्धंनगृह्णन्ति ज्ञाननिर्धूतकल्मषाःयथोक्तेनज्ञानेननिर्धूतोतिष्टत्तोनाश्रितःकल्मषःपापादिसंसारकारणदोषोयेषांते ज्ञाननिर्धूतकल्मषाःयतयइत्यर्थः१७

येषांज्ञानेननाश्रितमात्मनोऽज्ञानंते पण्डिताःकथंतत्त्वंपश्यन्तीत्युच्यते विद्येति विद्याविनयसम्पन्नेविद्याचविनयश्चविद्याविनयौविद्यात्मनोबोधोविनयश्चउपशमःता

आनन्दगिरिकृतटीका।

विदुषांविविदिषूणाञ्चान्तरङ्गाणिविद्यापरिपाकसाधनानिदृत्युपदिदिक्षुरुत्तरश्लोकस्यापेक्षितंपूरयति यत्परमिति तस्मिन्परमार्थतत्वेपरस्मिन्ब्रह्मणि वाङ्मनसविषयमप्रोह्यगताप्रवृत्ताश्रवणमननिदिध्यासनैरसकृदनुष्ठितैर्बुद्धिःसाक्षात्कारलक्षणायेषांते तथेति प्रथमविशेषणंविभजते तस्मिन्निति तर्हिबोद्धाजीवोब्रह्मेव्यंब्रह्मेति जीवब्रह्मभेदाभ्युपगमोनेत्याह तदात्मानइति कल्पितंबोद्धृबोद्धव्यत्वंवस्तुतस्तुनभेदोस्तीत्यङ्गीकृत्याचष्टे तदेवेति ननुदेहादावात्माभिमानमपनीयब्रह्मण्येवाहमस्मीत्यवस्थानंतत्तदनुष्ठीयमानकर्म्मप्रतिबन्धान्नसिध्यतीत्याशंक्यविशेषणान्तरमादत्ते तन्निष्ठाइति तत्रनिष्ठाशब्दार्थंदर्शयन्विवक्षितमर्थमाह निष्ठेत्यादिना तथापिपुरुषार्थापेक्षाप्रतिबन्धात् कथंयथोक्तेब्रह्मण्येवावस्थानंसेद्धुंपारयति तत्राह तत्परायणश्चेति यथोक्तानामधिकारिणांपरमपुरुषार्थस्योक्तब्रह्मानतिरेकान्नान्यत्रासक्तिरिति तात्पर्य्यार्थमाह केवलेति ननुयथोक्तविशेषणवतांवर्त्तमानदेहपातेपिदेहान्तरपरिग्रहव्यग्रतयाकुतोयथोक्तेब्रह्मण्यवस्थानमास्थातुंशक्यते तत्राह तेगच्छन्तीतिसतिसंसारकारणेदुरितादौ संसारप्रसरस्यदुर्वारत्वान्नपुनरावृत्तिसिद्धिरित्याशंक्याह ज्ञानेति उक्तविशेषणसम्पत्यादर्शितफलशालित्वमाश्रमान्तरेष्वसम्भावितमिति मन्वानोविशिनष्टि यतयइति १७

स्वामिकृतटीका।

एवंभूतेश्वरोपासकानांफलमाह तदिति "तस्मिन्नेवबुद्धिर्निश्चयात्मिकायेषांतस्मिन्नेवआत्माप्रयत्नोयेषांतस्मिन्नेवनिष्ठातात्पर्य्यंयेषांतदेवपरमायनमाश्रयोयेषांततश्चतत्प्रसादलब्धेनात्मज्ञानेननिर्धूतंनिरस्तंकल्मषंयेषांतेऽपुनरावृत्तिंमुक्तिंयान्ति १७

CC-0. In Public Domain. Digitized by eGangotri

विद्याविनयसम्पन्नेब्राह्मणेगविहस्तिनि शुनिचैवश्वपाकेचपण्डिताःसमदर्शिनः १८

शाङ्करभाष्यम्।

श्यांविद्याविनयाभ्यांसम्पन्नोविद्वान्विनीतश्चयोब्राह्मणस्तस्मिन्ब्राह्मणेगविहस्तिनि शुनिचैवश्वपाकेचपण्डिताःसमदर्शिनोविद्याविनयसम्पनेउत्तमसंस्कारवति ब्राह्मणे सात्त्विकेमध्यमायाञ्चराजस्यांगविसंस्कारहीनायामत्यन्तमेवकेवलतामसेहस्त्यादौ चसत्त्वादिगुणैस्तज्ज्ञैश्चसंस्कारैस्तथाराजसैस्तथातामसैश्चसंस्कारैरत्यन्तमेवास्पृष्टं सममेकमविक्रियंब्रह्मद्रष्टुंशीलंयेषां तेपण्डिताःसमदर्शिनः १८

आनन्दगिरिकृतटीका

यदपुनरावृत्तिसाधनंतत्त्वज्ञानंतदेवप्रश्नद्वारेणविवृणोति येषामित्यादिना विद्यावेदार्थविज्ञानमित्यङ्गीकृत्यविनयंव्याचष्टे विनयइति उपशमोनिरहङ्कारत्व मनौद्धत्यंपदार्थमेवमुक्त्वावाक्यार्थंदर्शयति विद्वानिति गवीत्याद्यनूद्यवाक्यार्थंकथय ति विद्येति हस्त्यादौपण्डिताःसमदर्शिनइत्युत्तरत्रसम्बन्धः तत्रतत्रप्राणिप्रभेदे षुतत्तद्गुणैस्तत्तन्निमित्तसंस्कारैश्चसंसृष्टत्वसम्भवान्नब्रह्मणः समत्वमित्याशंक्याह सत्त्वादीतितज्ज्ञैश्चेत्यत्रतच्छब्देनसत्त्वमेवगृह्यतेसात्त्विकसंस्कारैरिवराजससंस्का रैरपिसर्व्वथैवासंस्पृष्टंब्रह्मेत्याह तथेति राजसैरिवतामसैरपिसंस्कारैर्ब्रह्मात्यन्त मेवास्पृष्टमित्याह तथातामसैरिति ब्रह्मणोऽद्वितीयत्वंकूटस्थत्वमसङ्गत्वञ्चोक्तोऽर्थे हेतुरितिमत्वा समशब्दार्थमाह सममिति समदर्शित्वमेव पाण्डित्यं तद्व्याचष्टे ब्रह्मेति १८

स्वामिकृतटीका।

कीदृशास्ते ज्ञानिनोयेऽपुनरावृत्तिंमुक्तिंगच्छन्तीत्यपेक्षायामाह विद्येति वि षमेष्वपिसमंब्रह्मैवद्रष्टुंशीलंयेषां तेपण्डिताज्ञानिनइत्यर्थः तत्रविद्याविनयाभ्यां युक्तेब्राह्मणेच शुनोयःपचतितस्मिंश्चेतिकर्म्मणोवैषम्यं गविहस्तिनिशुनिचेतिजाति तोवैषम्यंदर्शितं १८

भाषानुवाद।

तोवेतत्त्वज्ञानी जोमुक्तिलाभकरतेकैसेहोतेहैं सोईकहते हैं किविषमवस्तु मेंसमज्ञानअर्थात् सकलवस्तुमेंब्रह्मरूपदेखते हैं जैसेकिविद्याऔविनयसेयुक्तब्रा ह्मण औगऊ हाथी कुत्ता तथाचाण्डाल इनसबमेंपण्डितकहेज्ञानीपुरुषसमदर्शी होतेहैं अर्थात्सबमेंआत्मारूपईश्वरकोएकरूपसेदेखते हैं १८

CC-0. In Public Domain. Digitized by eGangotri

इहैवतैर्जितःस्वर्गोयेषांसाम्येस्थितंमनःनिर्दोषंहिसमंब्रह्मतस्माद्ब्रह्मणितेस्थिताः १९

शाङ्करभाष्यं

नन्वभोज्यान्नास्तेदोषवन्तःसमासमाभ्यांविषमसमेपूजातइति स्मृतेर्नतेदोषवन्तःकथं इहेति इहैवजीवद्भिरेवतैःसमदर्शिभिः पण्डितैर्जितोवशीकृतःसर्गोजन्मयेषांसाम्येसर्वभूतेषु ब्रह्मणिसमभावेस्थितंनिश्चलीभूतंमनोऽन्तःकरणंनिर्दोषंयद्यपिदोषवत्सु श्वपाकादिषुमूढैस्तद्दोषैर्दोषवदिवविभासते तथापितद्दोषैरसंस्पृष्टमितिनिर्दोषंहिदोषवर्जितं हियस्मान्नापिस्वगुणभेदभिन्नंनिर्गुणत्वाच्चैतन्यस्यवक्ष्यतिचभगवानिच्छादीनां क्षेत्रधर्मत्वमनादित्वान्निर्गुणत्वादितिच नाप्यन्त्यादिविशेषाआत्मनोभेदकाःसन्ति प्रतिशरीरंतेषांसत्त्वेप्रमाणानुपपत्तेरतःसमंब्रह्मैकञ्चतस्माद्ब्रह्मण्येवतेस्थिताःतस्मान्नदोषगन्धमात्रमपितान्स्पृशति देहादिसंघातात्मदर्शनाभिमानाभावात् तेषांदेहादिसंघातात्मदर्शनाभिमानवद्विषयन्तुतत् सूत्रंसमासमाभ्यांविषमसमेपूजातइति पूजाविषयत्वविशेषणात्दृश्यतेहिब्रह्मवित्षड्ङ्गवित्चतुर्वेदवित्इतिपूजादानादौगुणविशेषसम्बन्धः कारणंब्रह्मतुसर्वगुणदोषसम्बन्धवर्जितमित्यतोब्रह्मणितेस्थिताइतियुक्तं १९

आनन्दगिरिकृतटीका।

सात्त्विकेषु राजसेषु तामसेषु चासमत्वेषु समत्वदर्शनमनुचितमिति शङ्कते नन्विति सर्वत्रसमदर्शिनः तच्छब्देनपराम्रष्टव्यन्तेषांदोषवत्त्वादभोज्यान्नत्वमित्यत्रप्रमाणमाह समासमाभ्यामिति समानामध्ययनादिभिःसमानधर्मकाणांवस्त्वालङ्कारादिपूजयाविषमेप्रतिपत्तिविशेषे क्रियमाणेसत्यसमानाञ्चासमानधर्मकाणांकस्यचिदेकवेदत्वमपरस्यद्विवेदत्वमित्यादिधर्मवतां प्रागुक्तयापूजयासमेप्रतिपत्ति

भाषा अनुवाद।

यहसुनिजोसन्देहहोय किविषममेसमदृष्टिहोनाहीनिषिद्धहै फेरिसबमेसमदृष्टिमनुष्यपण्डितकैसेहै औरगौतमनेकहाकिविषममेसमपूजनऔसममेविषमपूजनकरनेवाले लोकपरलोकसेभ्रष्टहोतेहैं इससङ्काकोनिवारणकरतेऊयेकहतेहैं किजिनकामनसमभावमेस्थितहै उनोनेइहांई स्वर्गजयकरलियाहै क्योंकिसर्वत्रसमानरूपनिर्दोषब्रह्मपरिपूर्णहोरहाहै ऐसाजोजानतेहैं तेब्रह्ममेस्थितकहे ब्रह्मरूपहोनिर्दोषहैं औरगौतमकीबातज्ञानअवस्थाकेपहलीअवस्थाकीहै १९

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

विशेषेपूजयितापुरुषविशेषंज्ञात्वाप्रतिपत्तिमकुर्व्वन्धनाद्धर्म्माच्चहीयते तेनसात्त्विकेराजसतामसयोश्चसमबुद्धिंकुर्व्वन्प्रत्यवैतीर्थः उत्तरत्वेनोत्तरश्लोकमवतारयति नतेदोषवन्तइति स्मृत्यवष्टम्भेनसर्व्वसत्त्वेषु समत्वदर्शिनांदोषवत्त्वमुक्तंकथंनास्तीतिप्रतिज्ञामात्रेणसिध्यतीतिशङ्कते कथमिति स्मृतेर्गतिमग्रेवक्ष्यन्निर्दोषत्वंसमत्वदर्शिनांविषदयति इहैवेति सर्व्वेषां चेतनानां साम्येप्रवणमनसां ब्रह्मलोकगमनमन्तरेणअस्मिन्नेव देहेपरिभूतजन्मनामशेषदोषराहित्येहेतुमाह निर्दोषंहीति वर्त्तमानोदेहः सप्तम्यापरिगृह्यते तानेवसमदर्शिनोविशिनष्टि येषामिति ननुब्रह्मणो निर्दोषत्वमसिद्धं दोषवत्सुश्वपाकादिषु तद्दोषैर्दोषवत्त्वोपलम्भसम्भवात्तत्राह यद्यपीति यस्मात् तन्निर्दोषंतस्मात्तस्मिन्ब्रह्मणि स्थितैर्निर्दोषैः सर्गोजित इति सम्बन्धः ब्रह्मणो गुणभूयस्त्वादल्पीयान् दोषोपिस्यादित्याशंक्याह नापीति चेतनस्य गुणविशेषे विशिष्टत्वमानष्टं निर्गुणत्वश्रवणादित्ययुक्तं बुद्धिसुखादीनांपरिशेषादात्मधर्म्मत्वस्यकैश्चिन्निश्चितत्वादित्याशंक्याह वक्ष्यतिचेति आत्मनोनिर्गुणत्वेवाक्यशेषंप्रमाणयति अनादित्वादिति चकारोवक्ष्यतीत्यनेन सम्बन्धार्थः गुणदोषवशादात्मनोभेदाभावेपिभेदोन्यविशेषेभ्योभविष्यतीतिप्रसङ्गादाशंक्यदूषयति नापीति प्रतिशरीरमात्मभेदसिद्धौतद्धेतुत्वेनतेषांसत्त्वंतेषाञ्चसत्त्वेप्रतिशरीरमात्मनोभेदसिद्धिरिति परस्पराश्रयत्वमभिप्रेत्यहेतुमाह प्रतिशरीरमिति आत्मनोभेदकाभावेफलितमाह अतइति समत्वमेवव्याकरोति एकञ्चेति ब्रह्मणोनिर्व्विशेषत्वेनैकत्वाज्जीवानाञ्चभेदकाभावेनैकत्वस्योक्तत्वादेकलक्षणत्वादेकत्वंजीवब्रह्मणोरेष्टव्यमित्याह तस्मादिति जीवब्रह्मणोरेकत्वेजीवानांब्रह्मवन्निर्दोषत्वंसिध्यतीत्याह तस्मान्नेति तच्छब्दार्थमेवस्फोरयति देहादीति यदिसर्व्वसत्त्वेषुसमत्वदर्शनमदुष्टमिष्टं तर्हिकथंगोतमसूत्रमित्याशंक्याह देहासंघातेतिसूत्रस्यतथोक्ताभिमानवद्विषयत्वेगमकमाह पूजेति यदिचतुर्व्वेदानामेवसतांपूजयावैषम्यंयदिवाचतुर्व्वेदानांषड़ङ्गविदांब्रह्मविदाञ्चपूजयासाम्यं तदातेषामुक्तपूजाविषयाणांकेषाञ्चिन्मनोविकारसम्भवेकर्त्तात्रत्यवैतीत्यविद्वद्विषयत्वं सूत्रस्यप्रतिभातीत्यर्थः तत्रैवचानुभवमनुकूलत्वेनोदाहरति दृश्यतेहीति देहादिसंघाताभिमानवतां गुणदोषसम्बन्धसम्भवात्तद्विषयंसूत्रमित्युक्तमिदानींब्रह्मात्मदर्शनाभिमानवतांगुणदोषासम्बन्धान्नतद्विषयंसूत्रमित्यभिप्रेत्याह ब्रह्मेति १९

CC-0. In Public Domain. Digitized by eGangotri

नप्रहृष्येत्प्रियंप्राप्यनोद्विजेत्प्राप्यचाप्रियं स्थिरबुद्धिरसंमूढोब्रह्मविद्ब्रह्मणिस्थितः२०

शाङ्करभाष्यं।

कर्म्मविषयञ्चसमासमाभ्यामित्यादि इदन्तुसर्व्वकर्म्मसंन्यासिविषयंप्रस्तुतं सर्वकर्म्माणि मनसेत्यारभ्याध्यायपरिसमाप्तेः यस्मान्निर्दोषंसमंब्रह्मात्मातस्मात् नेति नप्रहृष्येत् नहर्षंकुर्य्यात् प्रियमिष्टंप्राप्यलब्ध्वानोद्विजेत् प्राप्यैवचाप्रियमनिष्टं लब्ध्वादेहमात्रात्मदर्शिनांहि प्रियाप्रियप्राप्तीहर्षविषादौकुर्व्वाते नकेवलात्मदर्शिनः तस्यप्रियाप्रियप्राप्त्यसम्भवात् किञ्चसर्व्वभूतेष्वेकःसमोनिर्दोषआत्मेति स्थिरानिर्विचिकित्साबुद्धिर्यस्य सस्थिरबुद्धिरसंमूढःसंमोहवर्জ্জितश्चस्यात् यथोक्तब्रह्मवित् ब्रह्मणिस्थितोऽकर्म्मकृत् सर्व्वकर्म्मसन्यासीत्यर्थः २०

आनन्दगिरिकृतटीका।

इतश्चनेदंसूत्रंब्रह्मविद्विषयमित्याह कर्मीति तत्रैवपूजापरिभवसम्भवादित्यर्थः ननुयत्रसमत्वदर्शनंतत्रैवत्विदंसूत्रंनतुकर्म्मिणिवेतित्रिभागोस्तितत्राह इदंत्विति समत्वदर्शनस्यसन्यासिविषयत्वेतेनप्रस्तुतत्वेहेतुमाह सर्व्वकर्माणीति अध्यायपरिसमाप्तेःसर्व्वकर्माणीत्यारभ्यतत्रतत्रसर्व्वकर्म्मसन्यासाभिधानात्तद्विषयमिदमसत्वदर्शनंगम्यते तत्रचनिरहङ्कारेनिरवकाशंसूत्रमित्यर्थः ननुइष्टानिष्टप्राप्तिभ्यांहर्षविषादौविद्वानपिकुर्व्वन्निर्दोषेब्रह्मणिकथंस्थितिं लभेतेत्याशंक्याकांक्षितंपूरयन्नुत्तरश्लो

स्वामिकृतटीका।

ननुविषमेषुसमदर्शननिषिद्धंकुर्व्वन्तोपिकथंतेपण्डिताः यथाहगौतमःसमासमाभ्यांविषमेसमेपूजातइति अस्यार्थःसमायपूजायांविषमेप्रकारेकृते सति विषमायचसमेप्रकारेकृते सति सपूजकइहलोकात् परलोकाच्चहीयतइति तत्राह इहैवेवि इहैवजीवद्भिरेव तैःसृज्यतइतिसर्गसंसारोजितोनिरस्तःकैःयेषांमनःसाम्ये समत्वेस्थितं तत्रहेतुःहियस्माद्ब्रह्मसमंनिर्दोषञ्चतस्मात्तेसमदर्शिनोब्रह्मण्येवस्थिताब्रह्मभावंप्राप्ताइत्यर्थः गौतमोक्तस्तुदोषोब्रह्मभावप्राप्तेःपूर्व्वमेव पूजातइति पूजकाबस्थाश्रवणात् १९

भाषा अनुवाद।

अबब्रह्मभावप्राप्तपुरुषका लक्षणकहतेहैं किब्रह्मज्ञानीहोके जोब्रह्ममेस्थितहैं वैसोईप्रियवस्तुपायके हर्षितनहींहोतेहैं औरअप्रियप्राप्तहोनेसेभी विषादनहींकरतेहैं क्योंकि वैलोग स्थिरबुद्धिऔमोहरहितहैं तथाब्रह्मवित् ब्रह्मरूपहैं २०

CC-0. In Public Domain. Digitized by eGangotri

बाह्यस्पर्शेष्वसक्तात्माविन्दत्यात्मनियत्सुखं सब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुते २१

शाङ्करभाष्यं ।

किञ्चब्रह्मणिस्थितःबाह्येबाह्यस्पर्शेषुबाह्याश्चतेस्पर्शाश्चबाह्यस्पर्शाःस्पृश्यन्त इतिस्पर्शाःशब्दादयोविषयास्तेषु बाह्यस्पर्शेषु असक्तआत्मान्तःकरणंयस्यसोयमस क्तात्माविषयेषुप्रीतिवर्जितः सविन्दतिलभते आत्मनियत्सुखंतद्विन्दतीत्येतत् सब्र ह्मयोगयुक्तात्मा ब्रह्मणियोगःसमाधिर्ब्रह्मयोगस्तेनब्रह्मयोगेनयुक्तःसमाहितस्तस्मि न्व्याप्तआत्मान्तःकरणंयस्य सब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुतेप्राप्नोति तस्मा द्बाह्यविषयप्रीतेःक्षणिकायादुन्द्रियाणिनिवर्त्तयेदात्मन्यक्षयसुखार्थीत्यर्थः २१

आनन्दगिरिकृतटीका

कस्मात्यजतीति यस्मादिति आत्मज्ञाननिष्ठावतोविदुषोहर्षविषादनिमित्ताभा वान्नतावुचितावित्याह स्थिरबुद्धिरिति ननुहर्षविषादनिमित्तत्वंप्रियाप्रिययोःसिद्ध मिति कथंतत्प्राप्तौहर्षाद्वेगौनकर्त्तव्याविति नियुज्यते तत्राह देहेति विदुषोपि प्रियाप्रियप्राप्तिसामर्थ्यादेवहर्षविषादौदुर्वारावित्याशंक्याह नकेवलेति अद्वितीयदर्शनशीलस्यव्यतिरिक्तप्रियाप्रियप्राप्तयोगान्नतन्निमित्तौहर्षविषादावित्यर्थः इतोपिविदुषोहर्षविषादावसम्भावितावित्याह किञ्चेति निर्दोषेब्रह्मणिप्रागुक्तेदृढप्र तिपत्तिःसंमोहेन हर्षादिहेतुनारहितोयथोक्तेसर्वदोषरहिते ब्रह्मण्यहमस्मीति विद्यावानशेषदोषशून्येतस्मिन्नेवब्रह्मणिस्थितस्तदनुरोधात् कर्माण्यत्यजन्नेवहर्षविषादभागीभवितुमर्हतीत्यर्थः २०

स्वामिकृतटीका ।

ब्रह्मप्राप्तस्यलक्षणमाह नप्रहृष्येदिति ब्रह्मविद्भूत्वाब्रह्मण्येवयःस्थितःसप्रि यंप्राप्यनप्रहृष्येत्नप्रहृष्टोहर्षवान्स्यात् अप्रियंप्राप्यचनोद्विजेत् नविषीदतीत्यर्थः यतःस्थिरबुद्धिःस्थिरानिश्चलाबुद्धिर्यस्यतत् कुतःयतोऽसंमूढःनिवृत्तमोहः २०

भाषा अनुवाद

मोहनिवृत्तमात्रहोनेसे बुद्धिस्थिरहोतीहै इसकाहेतुकहतेहैं कियाह्यइन्द्रि योंकेविषयमे अनासक्तचित्तपुरुष अपनेअन्तःकरणमे विक्षेपरहितशान्तियुक्तजो सात्विकसुख सोअनुभवकरते और वहीपुरुषशान्तिसुखप्राप्तहोके ब्रह्मयोगयुक्त आत्माकहिसमाधिकेद्वारा परमात्माकेसाथएकताप्राप्तिरूप जोअक्षयसुखसोभी लाभकरतेहैं २१

CC-0. In Public Domain. Digitized by eGangotri

येहिसंस्पर्शजाभोगादुःखयोनयएवते आद्यन्तवन्तःकौन्तेयनतेषुरमतेबुधः २२

शाङ्करभाष्यं।

इतश्चनिवर्त्तयेत् येहीति येहियस्मात् संस्पर्शजाविषयेन्द्रियसंस्पर्शेभ्योजाताभोगामुक्तयोदुःखयोनयएवतेऽविद्याकृतत्वात् दृश्यन्तेह्याध्यात्मिकादीनिदुःखानितन्निमित्तान्येवयथेहलोकेतथापरलोकेप्रीतिगम्यते एवशब्दान्नसंसारेसुखस्वगन्धमात्रमप्यस्तीतिबुध्वाविषयमृगतृष्णिकायां इन्द्रियाणिनिवर्त्तयेन्नकेवलंदुःखयोन

आनन्दगिरिकृतटीका

शब्दादिविषयप्रीतिप्रतिबन्धान्न कस्यचिदपिब्रह्मणिस्थितिःसिध्येदित्याशंक्याह किञ्चेति नकेवलंपूर्वोक्तरीत्याब्रह्मणिस्थितोहर्षविषादरहितः किन्तुविद्यान्तरेणापीत्यर्थः यावद्यावद्विषयेषुरागरूपमावरणं निवर्त्तते तावत्तावदात्मस्वरूपसुखमभिव्यक्तंभवतीत्याह बाह्येति नकेवलमसक्तात्माशमवशादेवसुखंविन्दते किन्तुब्रह्मसमाधिनासमाहितान्तःकरणः सुखमनन्तंव्याप्नोतीत्याह सब्रह्मेति तत्पूर्वार्द्धंव्याचष्टे बाह्यास्पर्शेति समाधानाधीनसम्यग्ज्ञानद्वारानिरतिशयसुखप्राप्तिमुत्तरार्द्धंव्याख्यानेन कथयति ब्रह्मणीत्यादिना शब्दादिविषयविमुखस्यानन्तसुखाप्तिसम्भवात्तदर्थिना प्रयत्नेन विषयवैमुख्यं कर्त्तव्यमिति शिष्यशिक्षार्थमाह तस्मादिति २१

स्वामि कृतटीका

मोहनिवृत्तावबुद्धिस्थैर्यहेतुमाह बाह्येति इन्द्रियैःस्पृश्यन्तइतिस्पर्शा विषयाः बाह्येन्द्रियविषयेष्वसक्तात्माअनासक्तचित्तः आत्मन्यन्तःकरणेयदुपशमात्मकंसात्त्विकंसुखंतद्विन्दतिलभते सचोपशमसुखंलब्ध्वाब्रह्मणियोगेनसमाधिनायुक्तस्तदैकंप्राप्तआत्मायस्य सोऽक्षयंसुखमश्नुतेप्राप्नोति २१

भाषा अनुवाद।

प्रियजोविषयभोगतिनकेनिवृत्तहोनेसेफेरिमुक्तिपुरुषार्थअर्थात्परमप्रियकैसेहै इससंशयपरकहतेहैं किजोस्पर्शआदिविषयऔरउनविषयोंसेप्रगट जोसुखसो भोगसमयमेंस्वर्गाकहे औरकाअधिकसुखदेखि इच्छाकीवृद्धिऔआयुर्दीहीभर हैं औरभोगपीछेकछुनहींहैं खालीचिन्तामात्रकरतेहैं इनसबहेतुवोंसेविषय केवलदुखकेकारणहैं औरउनकाआदिअन्तभीहै इससेकौन्तेय विवेकीलोगउ सबिषयसुखभोगमे नहींरमितहोतेहैं २२

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

यआद्यन्तवन्तश्चआदिर्विषयेन्द्रियतत्संयोगोभोगानामन्तश्च तद्वियोगएवातआद्यन्तवन्तोऽनित्यामध्यक्षणभावित्वादित्यर्थः कौन्तेय नतेषुरमतेबुधोभोगेषुविवेकी अवगतपरमार्थतत्त्वेऽत्यन्तमूढानामेवहि विषयेषु रतिर्दृश्यते यथापशुप्रभृतीनां २२

आनन्दगिरिकृतटीका।

तत्रैवहेत्वन्तरपरत्वेनोत्तरश्लोकमुदाहरति द्वतश्चेति विषयेभ्यः सकाशादिन्द्रियाणीतिशेषः वैराग्यार्थमेववैषयिकानिसुखानिदूषयति येहीति ननुविषयेन्द्रियसंप्रयोगसंभूतेषुभोगेषु जन्तूनामभिरुचिदर्शनात्कुतस्तेषां दुःखयोनित्वमित्याशंक्याविवेकिनांतेष्वासङ्गेपि नविवेकिनामित्याह आद्यन्तवन्तद्वति यस्मादाधिव्याधिजरामरणादिसहितेभ्यःसमागमनादिरूपभागिभ्यश्च विषयेन्द्रियसम्बन्धेभ्योभोगाःसुखलवानुभवाजायन्ते तस्मात्तेदुःखहेतवोभवन्तीतियोजना अविद्याकार्यत्वाद्दुखानांकुतोभोगजन्यत्वमित्याशंक्य भोगानामविद्याप्रयुक्तत्वात्तन्निबन्धनत्वंदुःखानांयुक्तमित्यभिप्रेत्याह अविद्येति भोगानांदुःखयोनित्वेमानमनुभवमुपन्यस्यति दृश्यन्तेहीति ऐहिकानांभोगानांदुःखनिमित्तत्वेपिनामुष्मिकाणांतथात्वमनुभवादित्याशंक्यावधारणसामर्थ्यसिद्धमर्थमाह यथेति पूर्वार्द्धस्याक्षरार्थमुक्त्वातात्पर्यार्थमाह नेत्यादिना द्वतश्चविषयेभ्यःसकाशादिन्द्रियाणिनिवर्त्तयितव्यानीत्याह नकेवलमिति आद्यन्तवत्त्वेमध्यक्षणवर्त्तित्वेनक्षणभङ्गुरत्वादुपेक्षणीयत्वंभोगानांसिध्यति अस्तिहितेषांक्षणभङ्गुरत्वंचरिकविषयाकारमनोवृत्तिव्यङ्ग्यत्वादितिमन्वानःसन्नाह अतद्वति बुद्धिपूर्वकारिणांविवेकवतांभोगेषूपेक्षोपलब्धेश्चतेषामाभासत्वंप्रतिभातीत्याह नतेष्विति प्रतीकोपादानमाद्यमिदंपुनर्व्याख्यानमिति नपुनरुक्तिं ननुकेषाञ्चिद्भोगेष्वभिरुचिरुपलभ्यते तत्राह अत्यन्तेति २२

स्वामिकृतटीका।

ननुप्रियविषयभोगानामपिनिवृत्तेःकथंमोक्षःपुरुषार्थःस्यात्तत्राह येहीति संस्पृश्यन्तद्वति संस्पर्शोविषयातेभ्योजातायेभोगासुखानितेहिवर्तमानकालेऽपिस्पर्द्धासूयादिव्याप्तत्वाद्दुःखस्यैवयोनयःकारणभूताः तथादिमन्तोऽन्तवन्तश्चअतोविवेकीतेषुनरमते २२

CC-0. In Public Domain. Digitized by eGangotri

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः २३

शाङ्करभाष्यं

अयञ्च श्रेयोमार्गप्रतिपक्षीकष्टतमोदोषः सर्वानर्थप्राप्तिहेतुर्निवार्य्यश्चेति तत्परिहारे यत्नाधिक्यं कर्त्तव्यमित्याह भगवान् शक्नोतीति शक्नोत्युत्सहते इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक्पूर्वं शरीरविमोक्षणात् आमरणात् इत्यर्थः मरणसीमाकरणं जीवतोऽवश्यम्भावीहि कामक्रोधोद्भवोवेगः अन्तनिमित्तवान्हि सइति यावन्मरणं तावन्नविश्रम्भणीयइत्यर्थः कामइन्द्रियगोचरप्राप्तेष्टविषयेश्रूयमाणेस्मर्यमाणेचानुभूते सुखहेतौयागृद्धिः तृष्णासकामः क्रोधश्चात्मनः प्रतिकूलेषुदुःखहेतुषुदृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वायोद्वेषः सक्रोधस्तौकामक्रोधौउद्भवोयस्यवेगस्यसकामक्रोधोद्भवोवेगः रोमाञ्चनहृष्टनेत्रवदनादिलिङ्गोऽन्तःकरणप्रक्षोभरूपः कामोद्भवोवेगः गात्रप्रकम्पप्रस्वेदसन्दष्टौष्ठपुररक्तनेत्रादिलिङ्गः क्रोधोद्भवोवेगस्तंकामक्रोधोद्भवंवेगं यउत्सहते सोढुं सहितुं शक्तः स युक्तोयोगीसुखीचेहलोकेनरः २३

आनन्दगिरिकृतटीका।

उत्तरश्लोकस्यतात्पर्य्यमाह अयञ्चेति श्रेयोमार्गप्रतिपक्षत्वंकष्टतमत्वेहेतुरुक्तस्तेवहेत्वन्तरमाह सर्व्वेति प्रयत्नाधिक्यस्यकर्त्तव्यत्वेहेतुं सूचयति दुर्निवार्य्य इति प्रसिद्धंहिकामक्रोधोद्भवस्यवेगस्यदुर्निवारत्वंयेनमातरमपिचाधिरोहति पितरमपिहन्तितमवश्यंपरिहर्त्तव्यंदर्शयतिशक्नोतीति ययोक्तंवेगंवहिरनर्थरूपेणपरिणामात् प्रागेवदेहान्तरुत्पन्नंयः सोढुंक्षमते तंस्तौति सयुक्तइति मरणसीमाकरणस्यतात्पर्य्यमाह मरणेति प्रसिद्धौहिदृष्टः तत्रहेतमाह अनन्तेति व्याध्युपहतानां दृष्टानाञ्चकामादिवेगोनभवतीत्याशंक्याह इति यावदिति कामक्रोधोद्भवंवेगंव्याख्यातुमादौकामंमनोविकारविशेषत्वेनव्याचष्टे कामइति कथमस्यमनोविकारविशेषत्वंतदाह इन्द्रियेति कामोगृद्धिस्तृष्णेति पर्य्यायाः सन्तःशब्दामनोविकारविशेषे

भाषा अनुवाद।

इससेमुक्तिहीपरमपुरुषार्थहै और कामक्रोधसेउत्पन्नजो क्षोभसोईमुक्तिका प्रति पक्षहैं अतएवउसवेगकोजोसहिसकैसोमुक्तिभागीहोयगायहीकहते हैं किशरीररहते अथवाशरीरसामर्थ्यरहते ऊयेजोकामक्रोधकेवेगकोसहिलेने सकैसोईनरयुक्तहेआत्मरूपऔरसुखीहैं २३

CC-0. In Public Domain. Digitized by eGangotri

योऽन्तःसुखोन्तरारामस्तथान्तर्ज्योतिरेव यः स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति २४

शाङ्करभाष्यं

कथमसौ ब्रह्मणिस्थितोब्रह्मप्राप्नोतीत्याह भगवान्यइति योन्तरात्मनिसुखंयस्यसोन्तःसुखस्तथांतरेवात्मन्यारामः क्रीड़ायस्यसोऽन्तरारामस्तथैवांतरात्मैवज्योतिःप्रकाशोयस्यसोऽन्तर्ज्योतिरेवयईदृशः सयोगीब्रह्मनिर्वाणंब्रह्मणिनिर्वृतिंमोक्षमिहजीवन्नेवब्रह्मभूतःसन्नधिगच्छति प्राप्नोति २४

आनन्दगिरिकृतटीका।

पर्यवस्यन्तीत्यर्थः क्रोधश्चमनोविकारविशेषस्तइत्याह क्रोधश्चेति तमेवक्रोधंस्पष्टयति आत्मनइति एवंकामक्रोधौव्याख्यायतयोरुत्कटत्वावस्थात्मनोवेगस्यताभ्यामुत्पत्तिमुपन्यस्यति ताविति यश्चोक्तवेगावगमोपायमुपदिशति रोमाञ्चनहृष्टनेत्रेत्यादिना उभयविधवेगंयोजीवन्नेवसोढुंशक्नोति तंपुरुषधौरेयत्वेनस्तौति तमित्यादिना २३

स्वामिकृतटीका।

तस्मान्मोक्षएवपरमःपुरुषार्थस्तस्यचकामक्रोधवेगोऽतिप्रतिपक्षोऽतस्तत्सहनसमर्थएवमोक्षभागित्याह शक्नोतीहैवेति कामात् क्रोधाच्चोद्भवति योवेगःमनोनेत्रादिक्षोभलक्षणस्तमिहैवतदुद्भवसमयएवयोनरःसोढुंप्रतिरोद्धुंशक्नोति तदपिनक्षणमात्रंकिन्तुशरीरविमोक्षणात् प्राग्देहपातादित्यर्थःयएवम्भूतःसएवयुक्तःसमाहितःसुखीचभवति नान्यः यद्वामरणाद्भूविलसन्तीभिर्युवतिभिरतिक्रम्यमानोऽपिपुत्रादिभिर्हृद्यमानोपियथाप्राणशून्यःकामक्रोधवेगंसहतेतथामरणात्प्रागपिजीवन्नेवयःसहतेसएवयुक्तःसुखीचेत्यर्थःतदुक्तंवशिष्ठेन प्राणेगतेयथादेहःसुखदुःखेनविन्दतितथाचेत् प्राणयुक्तोऽपिसकैवल्याश्रमेवसेदिति २३

भाषाअनुवाद

औरकेवलकामक्रोधकावेगजीतनेहीसे मुक्तनहींहोयहै औरभीकहतेहैं किजोअपनेअन्तरात्मामेसुखीऔविषयभोगमेसुखी नहींहै औरजोपुरुषआत्मारामहोके आत्माहीमेविहारकरताऔवाहरकेव्यापारसेविरततथाअन्तः प्रकाशहै अथवाआत्माहीमेदृष्टिऔनृत्यगीतआदिकविषयोंमेदृष्टिनहींरखताहै सोयोगी इहकहेजीवतेहीब्रह्मरूपब्रह्ममेलीनहोताहै २४

CC-0. In Public Domain. Digitized by eGangotri

लभंतेब्रह्मनिर्वाणमृषयःक्षीणकल्मषाः छिन्नद्वैधायतात्मानःसर्व्वभूतहितेरताः २५

शाङ्करभाष्यम् ।

किञ्चलभंतइति लभंतेब्रह्मनिर्व्वाणंमोक्षंऋषयःसम्यग्दर्शिनःसन्न्यासिनःक्षीण कल्मषाः क्षीणपापादिदोषाःछिन्नद्वैधाःछिन्नसंशयाःयतात्मानःसंयतेन्द्रियाःसर्व्व भूतहितेरताःसर्व्वेषांभूतानांहितेआनुकूल्येरता अहिंसकाइत्यर्थः २५

आनन्दगिरिकृतटीका

ज्ञानस्यात्यंतरङ्गमात्ममात्मनिष्ठत्वं दर्शयन्प्रकृतंब्रह्मविदमेवविशिनष्टि कथ मूतश्चेति यथांतरेवसुखंनवाह्यैर्विषयैस्तथांतरेवज्योतिर्नचोवादिभिरतो विष यांतरविज्ञानरहित इत्याह तथेति यथोक्तविशेषणसमाधिमान्जीवन्नेवमुक्ति मधिगच्छतीत्याह सयोगीति आत्मन्यंतरेवसुखमितिवाह्यविषयनिरपेक्षत्वं वि वक्षितमंतरारामत्वञ्चइन्द्रियादिविषयापेक्षामंतरेण क्रीड़ाप्रयुक्तफलभाक्त्वमभि मतमिन्द्रियादिजन्यप्रकाशशून्यत्वमात्मज्योतिष्ट्वमिष्टंयथोक्तविशेषणसम्पन्नः समा हितश्चजीवन्नेवब्रह्मभावंप्राप्नोतिब्रह्मणिपरिपूर्णेनिर्वृतिं सर्व्वानर्थनिवृत्तिपूर्वक चित्तां स्थितिमनतिशयानन्दाविर्भावलक्षणात् प्राप्नोतीत्याह यईदृशइति २४

मुक्तिहेतोर्ज्ञानस्य साधनान्तरमाह किञ्चेति यज्ञादिनित्यकर्म्मानुष्ठानात्पा पादिलक्षणंकल्मषंक्षीयते ततश्चश्रवणाद्याकृत्तेः सम्यक्दर्शनंजायते ततोमुक्तिरप्र यत्नेनभवतीत्याह लभन्तइति ज्ञानप्राप्त्युपायान्तरंदर्शयति छिन्नेति श्रवणादि नासंशयनिरसनं कार्यकारणनियमनञ्च दयालुत्वेनाहिंसकत्वमित्येतदपिसम्यक् ज्ञानप्राप्तौकारणमित्यर्थः अक्षरव्याख्यानंस्पष्टत्वान्नव्याख्यायते २५

स्वामिकृतटीका ।

नकेवलकामक्रोधवेगसम्भरणमात्रेणमोक्षंप्राप्नोति अपितुयोऽन्तरिति अंत रात्मन्येवसुखंयस्यनतुविषयेषुअंतरेवारामःक्रीड़ायस्यनबहिः अन्तरेवज्योतिर्दृ ष्टिर्यस्यनगीतनृत्यादिषुसएवंब्रह्मणिभूतःस्थितः सन्ब्रह्मनिर्वाणंतयमधिगच्छति प्राप्नोति २४

भाषानुवाद ।

मुक्तिका हेतुजोज्ञानतिसकीसाधनउपायप्रकारान्तरकहे दूसरीतरहसेकह तेहैं किऋषिकहे सम्यक्दर्शीसन्न्यासीलोग जोयज्ञआदिनित्यनैमित्तिककर्म्मक रिक्षीणकल्मषकहे निःपापऔनिःपापहोकेश्रवणआदिसेज्ञानकेद्वाराछिन्नद्वैधक हेसंशयरहितहोगयेहैं औरजिनकाचित्तऔइन्द्रियगणवशीभूतहैंऔप्राणियोंकेहि तकारीदयालुस्वभावअर्थात् हिंसारहितहैं वेईब्रह्मसेलयरूपमोक्षपातेहैं २५

CC-0. In Public Domain. Digitized by eGangotri

कामक्रोधविमुक्तानांयतीनांयतचेतसां अभितोब्रह्मनिर्वाणंवर्त्ततेविदितात्मनां २६

शाङ्करभाष्यं ।

किञ्चकामेति कामक्रोधविमुक्तानांकामश्चकोधश्चकामक्रोधौताभ्यांविमुक्तानांय तीनांसन्यासिनांयतचेतसांसंयतान्तःकरणानां अभितउभयतोजीवतांमृतानाञ्चब्र ह्मनिर्वाणंमोक्षोवर्त्तते विदितात्मनांविदितोज्ञातआत्मायेषांतेविदितात्मानस्तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः २६

सम्यग्दर्शननिष्ठानांसंन्यासिनांसद्योमुक्तिरुक्ताकर्म्मयोगश्चईश्वरार्पितसर्व्वभावे नेश्वरेब्रह्मण्याधायक्रियमाणःसत्त्वशुद्धिज्ञानप्राप्तिसर्व्वकर्म्मसंन्यासक्रमेणमोक्षायेति भगवान्पदेपदेऽब्रवीद्वक्ष्यतिच अथइदानींध्यानयोगंसम्यग्दर्शनस्यान्तरङ्गंविस्तरे णवक्ष्यामीति तस्यसूत्रस्थानीयान्श्लोकानुपदिशतिस्मभगवान्वासुदेवः स्पर्शानिति स्पर्शान्शब्दादीन्कृत्वाबहिर्बाह्यान्श्रोत्रादिद्वारेणान्तर्बुद्धौप्रवेशिताः शब्दादयो विषयास्तानचिन्तयतःशब्दादयोवाह्यावहिरेवकृताभवन्तितानेवंबहिःकृत्वाचक्षुश्चै वान्तरेभ्रुवोःकृत्वेत्यनुषज्यते तथाप्राणापानौनासाभ्यन्तरचारिणौसमौकृत्वा २७

आनन्दगिरिकृतटीका

पूर्व्वंकामक्रोधयोर्वेगःसोढव्योदर्शितःसम्प्रति तावेवत्याज्यावित्याह किञ्चेति ननु दर्शितविशेषवतांमृतानामेवमोक्षोनतुजीवतामिति चेन्नेत्याह अभितइति अस्मदा दीनामपितर्हिप्रभूतकामादिप्रभावविधुराणांकिमिति मोक्षोनभवतीत्याशंक्यसम्य गज्ञानवैशेष्याभावादित्याह विदितेति उक्तेर्थेश्लोकाच्चरणामन्वयमाचष्टेकामक्रोधे त्यादिना २६

स्वामिकृतटीका ।

किञ्चलभन्तइति ऋषयःसम्यग्दर्शिनःक्षीणंकल्मषंयेषांछिन्नंद्वैधंसंशयायेषां यतःसंयतआत्माचित्तंयेषांसर्व्वेषांभूतानांहितेरताः येक्षपालवस्तेब्रह्मनिर्व्वाणंमो क्षंलभन्ते २५ किञ्चकामेत्यादि कामक्रोधाभ्यांविमुक्तानांयतीनांसन्यासिनां संयतचित्तानांज्ञाताऽमतत्त्वानामभितउभयतोजीवतांमृतानाञ्चदेहान्तएवतेषांब्र ह्मणिलयोऽपि तुजीवतामपिवर्त्ततइत्यर्थः २६

भाषा अनुवाद ।

औरकामक्रोधसेविमुक्तज्ञानीजनसन्यासीयतचित्तलोगविदितहैं आत्माजि नकोते जीवितऔरमृतदोनोअवस्थामेंमुक्तहैं ऐसानहींकि देहान्तमेंवेमुक्तिपावेंगे वेजीवतेभी ब्रह्मकेसाथएकरूपहोयजीवन्मुक्तऐसेप्रसिद्धहोते हैं २६

CC-0. In Public Domain. Digitized by eGangotri

स्पर्शान्कृत्वाबहिर्बाह्यांश्चक्षुश्चैवान्तरेभ्रुवोः प्राणापानौसमौकृत्वानासाभ्यन्तरचारिणौ २७

आनन्दगिरिकृतटीका।

इत्तमनूद्योत्तरश्लोकत्रयस्यतात्पर्य्यार्थमाह सम्यग्दर्शनेति ईश्वरार्पितसर्व्वभावेनेति भगवति परस्मिन्नीश्वरेसमर्पितःसर्व्वेषांदेहेन्द्रियमनसांभावश्चेष्टाविशेषोन क्वचिदपिबहिस्तेषांव्यापारस्तेनेत्यर्थः कर्म्मयोगस्यतत्फलस्यचाभिधानानन्तरमित्यथशब्दार्थः स्वतोबाह्यानांविषयाणांकुतोबहिष्करणमित्याशंक्याह श्रोत्रादीतितेषांबहिष्करणंकीदृगित्याशंक्याह तानिति २७

स्वामिकृतटीका।

सयोगीब्रह्मनिर्व्वाणमित्यादिषुयोगीमोक्षमवाप्नोतीत्युक्तंतमेवयोगंसङ्क्षेपेणाह स्पर्शानिति द्वाभ्यां बाह्याएवस्पर्शरूपरसादयोविषयाश्चिन्तिताःसक्तोऽन्तःप्रविशन्तितांस्तच्चिन्तात्यागेनबहिरेवकृत्वाचक्षुषोरन्तरेभ्रूमध्यएवकृत्वाअत्यन्तंनेत्रयोर्निमीलनेनिद्रयाअनोलीयते उन्मीलनेचबहिःप्रसरति तदुभयदोषपरिहारार्थमर्द्धनिमीलनेनभ्रूमध्येदृष्टिंनिधायेत्यर्थ उच्छ्वासनिश्वासरूपेणनासिकयोरभ्यन्तरेचरन्तौप्राणापानावर्द्धाधोगतिरोधेनसमौकृत्वाकुम्भकंकृत्वेत्यर्थः यद्वा प्राणोऽयंयथानबहिर्निर्यांति तथाबाह्यपानोऽन्तर्नप्रविशति किन्तुनासाभ्यएवद्वावपियथाचरतस्तथामन्दाभ्यामुच्छ्वासनिश्वासाभ्यांसमौकृत्वेति २७

यतइति अनेनोपायेनयताःसंयताइन्द्रियमनोबुद्धयोयस्यमोक्षएवपरमयनंप्रायंयस्यअतएवविगताइच्छाभयक्रोधायस्यएवंभूतोयोमुनिः ससदाजीवन्नपिमुक्तएवेत्यर्थः २८

भाषा अनुवाद।

इसीअध्यायके २४ श्लोकमेंकहाकियोगीमोक्षपातेहैं सोईफेरिसंक्षेपसेकहतेहैं किशब्दस्पर्शआदिबहिर्विषयोंकोबाहरकरिकेऔचक्षुकेदृष्टिकोभौंहकेमध्यमेराखिप्राणअपानवायुकोसमकरिकेकुंभकप्राणायामकरैंभ्रूमध्यमेदृष्टिइसलियेकहाकिनेत्रबन्दकरनेसेनिद्रावशहोमनलयकहेलीनहोजाता औरखुलेरहनेसेमनविषयोंपरधावताहै अधखुलेरखनेसेभ्रूकेबीचनिकटदृष्टिरहतीहै औदोनोवायुसमकरनेसेनासिकारन्ध्रसेसञ्चारकरतीहैं जिसमेप्राणवायुबाहरऔअपानभीतरसञ्चार नकरै इसवास्तेयोगीकुंभकप्राणायामयोगकरै २७

CC-0. In Public Domain. Digitized by eGangotri

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः विगतेच्छाभयक्रोधोयःसदामुक्तएवसः २८

शाङ्करभाष्यं ।

यतेन्द्रियइति यतेन्द्रियमनोबुद्धिर्यतानिसंयतानिइन्द्रियाणिमनोबुद्धिश्चयस्य सयतेन्द्रियमनोबुद्धिर्म्मननात् मुनिःसंन्यासीमोक्षपरायणः एवंदेहसंस्थानोमोक्षपरायणोमोक्षएवपरमयनंपरागतिर्यस्य सोयंमोक्षपरायणोमुनिर्भवेत् विगतेच्छाभयक्रोधइच्छाचभयञ्चक्रोधश्चइच्छाभयक्रोधास्तेविगतायस्मात् सविगतेच्छाभयक्रोधः यएवंवर्त्ततेसदासंन्यासीमुक्तएवसन्तस्यमोक्षेऽन्यःकर्त्तव्योनास्ति २८

एवंसमाहितचित्तेनकिंविज्ञेयमिति चोद्यते भोक्तारमिति भोक्तारंयज्ञानां तपसाञ्चकर्त्तृरूपेण देवतारूपेणच यस्तंसर्व्वलोकमहेश्वरं सर्व्वेषां लोकानां महान्तंईश्वरंसर्व्वलोकमहेश्वरंसुहृदंसर्व्वभूतानांसर्व्वप्राणिनां प्रत्युपकारनिरपेक्षतयोपकारिणंसर्व्वभूतानांहृदयेशयंसर्वकर्म्मफलाध्यक्षंसर्व्वप्रत्ययसाक्षिणं मां नारायणं ज्ञात्वा शान्तिंसर्वसंसारोपरतिमृच्छति प्राप्नोति २९

इति श्रीमद्भगवद्गीताभाष्ये पञ्चमोऽध्यायः ५

आनन्दगिरिकृतटीका

विषयप्रावण्यंपरित्यज्यचक्षुरपिभ्रुवोर्म्मध्येविक्षेपपरिहारार्थंकृत्वाप्राणापानौनासाभ्यन्तरचरणशीलौसमौन्यूनाधिकवर्जितौ कुम्भकेननिरुद्धौकृत्वाकरणानिसर्व्वाण्येवंसंयम्यप्राणायामपरोभूत्वाकिंकुर्यादित्यपेक्षायामाह यतेन्द्रियेति इन्द्रियादिसंयमंकृत्वामोक्षमेवापेक्षमाणोमननशीलःस्यादित्यर्थः ज्ञानातिशयनिष्ठस्यसर्व्वदेच्छादिशून्यस्यसंन्यासिनोमुक्तेरनायाससिद्धत्वान्नतस्यकिञ्चिदपिकर्त्तव्यमस्तीत्याह विगतेति पूर्व्वार्द्धोत्तरार्द्धाणि व्याकरोति यतेत्यादिना द्वितीयार्द्धोत्तरार्द्धाणिव्याचष्टे विगतेत्यादिना २८

अधिकारिणोयथोक्तस्य कर्त्तव्याभावेज्ञातव्यमपिनास्तीत्याशंक्य परिहरति एवमित्यादिना प्रसिद्धंभोक्तारंव्यवच्छिनत्ति सर्वलोकेति ततोऽस्यवन्ध्यविपर्ययावितिन्यायेनसर्वफलदातृत्वंदर्शयति सुहृदमिति ईश्वरज्ञानेफलंकथयति ज्ञा

भाषा अनुवाद ।

औरइसीउपायसे जिसकीइन्द्री औमनबुद्धिआदिवशीभूतहैं औरमुक्तिप्राप्तिकेयोग्यहै औरजिसनेइच्छाभयक्रोधकोदूरकियाहै ऐसेगुणोंसेसदायुक्त जो मुनि सोजीवनकालमेभी मुक्तअर्थात्वहकर्म्मरहितजीवन्मुक्तहै २८

CC-0. In Public Domain. Digitized by eGangotri

भोक्तारंयज्ञतपसांसर्वलोकमहेश्वरं सुहृदंसर्वभूतानांज्ञात्वामांशान्तिमृच्छति२६

इतिश्रीभगवद्गीतायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेसंन्यासयोगोनामपञ्चमोऽध्यायः ५

आनन्दगिरिकृतटीका।

त्वेति यज्ञेषु तपःसुचविधाभोक्तृत्वंव्यनक्ति कर्त्तृरूपेणेति हिरण्यगर्भादिव्यवच्छेदार्थंविशिनष्टि महान्तमिति स्वपरिकरोपकारिणंराजानं व्यावर्त्तयति प्रत्युपकारेति ईश्वरस्यताटस्थंव्युदस्यति सर्वभूतानामिति तर्हितत्तत्तल्लब्धव्यस्थितकर्म्मतत्फलसंसर्गित्वंस्यादित्याशंक्याह सर्वकर्म्मेति नचतस्यबुद्धितद्वृत्तिसम्बन्धोपिवस्तुतोस्तीत्याह सर्वप्रत्ययेति यथोक्तेश्वरपरिज्ञानफलमभिदधाति मांनारायणमिति तदेवंकर्म्मयोगस्यामुख्यसंन्यासापेक्षयाप्रशस्तत्वेपि ततोमुख्यसंन्यासस्याधिक्यात्तद्वतो बुद्धिशुद्ध्यादियुक्तस्यकामक्रोधोद्भवंवेगमिहैवसोढुंशक्तस्यशमदमादिमतो योगाधिकृतस्यत्वंपदार्थाभिज्ञस्यपरमात्मानंप्रत्यक्त्वेनजानतोमुक्तिरितिसिद्धं २६

इति आनन्दगिरिकृतटीकायां पञ्चमोऽध्यायः ५

स्वामिकृतटीका।

नन्वेवमिन्द्रियादिसंयममात्रेणकथंमुक्तिः स्यान्नतावन्मात्रेणकिन्तु ज्ञानद्वारेणेत्याह भोक्तारमिति यज्ञानांतपसाञ्चैव ममभक्तैःसमर्पितानांयदृच्छयाभोक्तारं पालकमितिवासर्वेषांलोकानांमहान्तमीश्वरंसर्वभूतानांसुहृदंनिरपेक्ष्योपकारिणमन्तर्यामिणंमांज्ञात्वामत्प्रसादेनशान्तिंमोक्षमृच्छति प्राप्नोति विकल्पशङ्कापोहेनयेनैवंयोगसाख्ययोः समुच्चयःक्रमेणोक्तःसर्वज्ञंनौमितंगुरुं २६

इति श्रीधरस्वामिकृतटीकायांपञ्चमोऽध्यायः ५

भाषा अनुवाद।

जोकहोकिइन्द्रीमात्रवशकरनेसेपुरुषकैसेमुक्तहोय तिसपरकहतेकि हांमुक्ति ज्ञानहींकेद्वाराहोतीहै देखोहमारेभक्तोंसेसमर्पितयज्ञऔतपकेअयाचितरूपभोक्ताऔप्रतिपालकसर्वलोकमेंश्रेष्ठ ईश्वरसबसेनिरपेक्षअन्तर्यामीरूपहमकोजानिकै योगीलोगमेरीअनुग्रहसेशान्तिकहेमोक्षपावतेहैं २६

श्रीधरस्वामीकहतेकिजोअर्जुनकोकर्म्मयोगऔज्ञानयोगकीपृथकशङ्कानिवारणकरजिसनेक्रमसेदोनोकोएककहाहै सोईजगतगुरुश्रीकृष्णकोप्रणामकरतेहैं

इतिश्रीजगन्नाथशुक्लाविरचितायां मनभावनीटीकायांपञ्चमोध्यायः ५

CC-0. In Public Domain. Digitized by eGangotri

षष्ठोध्यायः

श्रीभगवानुवाच अनाश्रितःकर्म्मफलंकार्य्यंकर्मकरोतियः ससंन्यासीचयोगीचनिरग्निर्नचाक्रियः १

शाङ्करभाष्यं।

अतीतानन्तराध्यायान्तेध्यानयोगस्यसम्यग्दर्शनंप्रत्यन्तरङ्गस्यसूत्रभूताःश्लोकाःसमर्थान्कृत्वावहिरित्यादयउपदिष्टास्तेषांवृत्तिस्थानीयोयंषष्ठोध्यायआरभ्यते तत्रध्यानयोगस्यबहिरङ्गंकर्मेति यावद्ध्यानयोगारोहणासमर्थस्तावद्गृहस्थेनाधिकृतेनकर्त्तव्यंकर्मेति अतस्तत् स्तौति अनाश्रितइति ननुकिमर्थंध्यानयोगारोहणसीमाकरणंयावतानुष्ठेयमेवविहितंकर्मयावज्जीवंनारुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यतइतिविशेषादारूढस्यचशमेनैवसम्बन्धकरणादारुरुक्षोरारूढस्यचशमःकर्मचोभयंकर्त्तव्य

भाषा अनुवाद।

श्रीधरस्वामीछठयेअध्यायकेआरम्भमेवर्णनकरते हैं किमनुष्योंकोचित्तशुद्ध होनेसेभीध्यानकेविनाकेवलसन्यासमात्रसेमुक्तिनहींमिलतीहै इसीहेतुसेश्रीभगवानछठयेंअध्यायमेंध्यानयोगविस्तारकरिकहतेहैं किपञ्चमअध्यायकेअन्तभागमेंसंक्षेपसेकहागयाजोध्यानयोगसोई विस्तारकरनेकोछठयेंअध्यायका आरम्भ अर्थात् सर्व्वकर्माणिमनसासन्यस्यास्तेसुखंवशी इस ५ अध्यायके १३ श्लोकसेसबकर्मत्यागपूर्व्वकज्ञाननिष्ठाकीप्रशंसाकरनेसेऔरकर्मअनुष्ठानक्लेशकारीहै इससेहठात् कर्मत्यागकीअवस्थाविनाभीकर्मकात्यागमनुष्योंकेमनमेंहोयउठैहै तिसकेनिवारनकेअर्थकर्मछोड़नेसेकर्मकरनाश्रेष्ठहै यहकहिकर्मयोगकीबड़ईकरतेभये भगवानकहते हैं कि

अनाश्रितकहेकर्मफलकीआकाङ्क्षारहितहोयकरसबकर्मअवश्यहीकर्त्तव्यहैं इसविचारसेजोविहितकर्मकाअनुष्ठानकरैसोईसंन्यासीऔसोईहोगीहै नहींतोनिरग्निकहेअग्निसाध्ययज्ञादिकर्मत्यागीऔअक्रियअर्थात् वेअग्निकेकर्मकुंआंतालवावडीखनन तथादानादिकर्मत्यागीहोकेलोगअपनेकोयोगीसमझैंगे किन्तुऐसानहींहै तात्पर्ययहकिफलहीकात्यागउचितकर्मकात्यागनहीं अर्थात्उपरलिखेसबकर्मविषुप्रीत्यर्थकरनाहीचाहिये सोईकहाअनाश्रितःकर्मफलंकार्य्यंकर्मकरोतियः १

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

त्वेनाभिप्रेतञ्चेत् स्यात्तदारुरुक्षोरारूढस्येति श्रमकर्मविषयभेदेनविशेषणंविभा
गकरणञ्चानर्थकंस्यात् तस्माश्रमिणांकश्चित् योगमारुरुक्षुर्भवत्यारूढश्चकश्चिदन्ये
नारुरुक्षवोनचारूढास्तानपेक्ष्यारुरुक्षोरारूढस्यचेति विशेषणंविभागकरणञ्चोप
पद्यतएवेतिचेन्नतस्यैवेति वचनात् पुनर्योगग्रहणाच्च योगारूढस्येति यच्चसीत्
पूर्व्वंयोगमारुरुक्षुस्तस्यैवारूढस्यश्रमएवकर्त्तव्यंकारणंयोगफलंप्रत्युच्यतइत्यतोनयाव
ज्जीवंकर्त्तव्यत्वप्राप्तिःकस्यचिदपिकर्मणायोगविभ्रष्टवचनाच्चगृहस्थस्यचेत् कर्म्मिणोयो
गोविहितःषष्ठेध्याये सयोगविभ्रष्टोपिकर्मगतिंकर्मफलंप्राप्नोतीति तस्यनाशङ्कानु
पपन्नास्यादवश्यंहिकृतंकर्मकार्य्यंनित्यस्यामोक्षस्यनित्यत्वादनारभ्यत्वेपिस्वंफलमार
भतएवनित्यस्य चकर्मणोवेदप्रमाणावबुद्धत्वात् फलेनभवितव्यमित्यवोचामान्यथावेद
स्यानर्थक्यप्रसङ्गादिति नचकर्मणिसत्युभयविभ्रष्टवचनमर्थवत् कर्म्मिणोविभ्रंशका
रणानुपपत्तेः कर्मकृतमीश्वरेसंन्यस्येत्यतःकर्त्तरिकर्मफलंनारभतइतिचेन्नेश्वरेस
न्यासस्याधिकतरफलहेतुत्वोपपत्तेर्म्मोक्षायैवेतिचेत् स्वकर्मणांकृतानामीश्वरेन्यासो
मोक्षायैवनफलान्तराययोगसहितःयोगाच्चविभ्रष्टइत्यतस्तंप्रतिनाशाशङ्कायुक्तैवेति
चेन्नैकाकीयतचित्तात्मानिराशीरपरिग्रहोब्रह्मचारिव्रतेस्थित इतिकर्मसंन्यास
विधानात् नचात्मध्यानकालेस्त्रीसहायत्वाशङ्कायेनैकाकित्वंविधीयते नचगृहस्थस्य
निराशीरपरिग्रहइत्यादिवचनमनुकूलंउभयभ्रष्टप्रश्नानुपपत्तेश्चअनाश्रितइत्यनेन
कर्मिणएवसंन्यासित्वंयोगित्वञ्चोक्तंप्रतिषिद्धञ्चनिरग्नेरक्रियस्यचसन्यासित्वंयोगि
त्वञ्चेति चेन्नध्यानयोगंप्रति बहिरङ्गस्यसतःकर्मणःफलाकांक्षासंन्यासस्तुतिपरत्वा
न्नकेवलंनिरग्निरपियएवसंन्यासीयोगीव किंतर्हिकर्म्यपिकर्मफलासङ्गंसंन्यस्यकर्म
योगमनुतिष्ठन्सत्त्वशुद्ध्यर्थंसंन्यासीयोगीचभवतीतिस्तूयते नचैकेनवाक्येनकर्मफला
सङ्गसंन्यासस्तुतिश्चतुर्थाश्रमप्रतिषेधकोपपद्यते नचप्रसिद्धनिरग्नेरक्रियस्यपरमा
र्थसंन्यासिनःश्रुतिस्मृतिपुराणेतिहासयोगशास्त्रेषुविहितंसंन्यासित्वंयोगित्वञ्चप्रति
षेधति भगवान्स्ववचनविरोधाच्च सर्व्वकर्माणिमनसासंन्यस्यनैवकुर्व्वन्नकारयन्नास्ते
मौनीसन्तुष्टोयेनकेनचिदनिकेतःस्थिरमतिर्व्विहायकामान्यःसर्व्वान्पुमांश्चरतिनि
स्पृहःसर्व्वारम्भपरित्यागीतिच तत्रतत्रभगवतास्ववचनानिदर्शितानितैर्व्विरुध्येतचतु
र्थाश्रमविप्रतिषेधस्तस्मात् मुनेर्योगमारुरुक्षोःप्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादिक
र्मफलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वबुद्धिशुद्धिद्वारेणप्रतिपद्यत

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

इति ससंन्यासीचयोगीचेति स्तूयते अनाश्रितइति अनाश्रितोनआश्रितोऽनाश्रितः किंकर्म्मणःफलंकर्म्मफलंयत्तदनाश्रितःकर्म्मफलंतृष्णारहितइत्यर्थः योहिकर्म्मफलेतृष्णावान्सकर्मफलमाश्रितोभवति अयन्तुतद्विपरीतोऽतोनाश्रितःकर्मफलंएवञ्चातः सन्कार्यंकर्त्तव्यंनित्यंकाम्यविपरीतमग्निहोत्रादिकंकरोति निर्व्वर्तयतियःकश्चित् यईदृशःकर्म्मीसकर्म्मभ्यन्तरेभ्योविशिष्यतइत्येवमर्थमाह ससंन्यासीचयोगीचेति संन्यासःपरित्यागःसयस्यास्तिससंन्यासीचयोगीचयोगश्चित्तसमाधानंसयस्यास्तिसयोगी चेत्येवंगुणसम्पन्नोयंमन्तव्योनकेवलंनिरग्निरक्रियएवसंन्यासीयोगीचेति मन्तव्यः निर्गताअग्नयःकर्म्माङ्गभूतायस्मात् सनिरग्निरक्रियश्चअनग्निसाधनाश्रयविद्यमानाक्रियास्तपोदानादिकायस्यासावक्रियःननुचनिरग्नेरक्रियस्यैवश्रुतिस्मृतियोगशास्त्रेषुसंन्यासित्वंयोगित्वञ्चप्रसिद्धं कथमिहसाग्नेःसक्रियस्यसंन्यासित्वंयोगित्वञ्चाप्रसिद्धमुच्यते इति नैषदोषःकयाचिद्गुणदृष्ट्योभयस्यसम्भिपादयिषितत्वात्तत् कथं कर्मफलसंकल्पसंन्यासात्संन्यासित्वंयोगाङ्गत्वेनचकर्मानुष्ठानात् कर्मफलसङ्कल्पस्यचाचित्तविक्षेपहेतोःपरित्यागाद्योगित्वञ्चेति १

आनन्दगिरिकृतटीका।

ध्यानयोगप्रस्तावानन्तरंतद्योग्यताहेतुकर्मणःस्तुतिं भगवानुक्तवानित्याह श्री भगवानिति पूर्वोत्तराध्याययोःसङ्गतिमभिदधानोदृत्तमनूद्याध्यायान्तरमवतारयति अतीतेति सम्यग्दर्शनप्रकरणेध्ययोगस्यप्रसङ्गाभावंव्युदस्यति सम्यगिति संग्रहविवरणयोरतीतानन्तराध्याययोर्युक्तंहेतुहेतुमत्त्वमितिभावः अध्यायसम्बन्धमभिधायानाश्रितःकर्मफलमित्यादिश्लोकद्वयस्यतात्पर्य्यमाह तत्रेति कर्मयोगस्यसन्यासहेतोर्मर्य्यादांदर्शयितुंसाङ्गञ्चयोगंविचारयितुमध्यायेप्रवृत्तेसतीति सम्यग्व्यर्थःसंन्यासिनाकर्त्तव्यंकर्मेत्येवंप्रतिभासंव्युदस्यति गृहस्थेनेति कर्त्तव्यत्वंस्तुतियोग्यत्वमतःशब्दार्थःसमुच्चयवादी सोमाकरणमाक्षिपति नन्विति यावज्जीवश्रुतिवशात् ध्यानारोहणसामर्थ्येसत्यपिकर्मानुष्ठानस्यदुर्ब्बारत्वादिति हेतुमाह यावतेति भार्य्यावियोगादिप्रतिबन्धाद्यावज्जीवश्रुतिचोदितकर्मानुष्ठानवत्वैराग्यप्रतिबन्धादपितदनुष्ठानसम्भवाद्भगवतोविशेषवचनाच्च नयावज्जीवंकर्मानुष्ठानप्रसक्तिरितिपरिहरति नारुरुक्षोरिति उक्तमेवार्थंव्यतिरेकद्वारेणविवृणोति आरुरुक्षोरित्यादिना आरोढुमिच्छतीत्यारुरुक्षुरत्वारोहणेच्छाविशेषणमारोहणंकृतवानित्यत्रपुनरिच्छाविष

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

यभूततमारोहणंविशेषणमेवंशमकर्मविषययोर्भेदेनविशेषणं मर्य्यादाकरणानङ्गी करणेविरुद्धमापद्येततयोरेवंविभागकरणञ्चभागवतसीमानङ्गीकारेणयुज्येतेत्य र्थः विशेषणविभागकरणयोरन्यथोपपत्तिमाशङ्कते तत्रेति व्यवहारभूमिःसप्तम्यर्थः षष्ठीनिर्द्धारणे भवत्वधिकारिणांत्रैविध्यंतथापिप्रकृतेविशेषणादोकिमायातमित्याशं क्यतृतीयापेक्षयातदुपपत्तिरित्याह तानपेक्षेति आरुरुक्षोरारूढस्यचभेदे तस्यैवे ति प्रकृतपरामर्शानुपपत्तिरितिदूषयति नतस्येति यद्यनारुरुक्षुंपुरुषमपेक्षारुरु क्षोरिति विशेषणंतस्यचकर्मारोहणकारणमनारूढञ्चपुरुषमपेक्षारूढस्येति वि शेषणंतस्यचशमःसंन्यासोयोगफलप्राप्तौकारणमिति विशेषणविभागकरणयोरुप पत्तिस्तदारुरुक्षोरारूढस्यचभिन्नत्वात् प्रकृतपरामर्शिनःतच्छब्दस्यानुपपत्तेर्यु क्तमित्यविशेषणाद्यापादनमित्यर्थः किञ्च योगमारुरुक्षोस्तदारोहणेकारणंक र्मेत्युक्त्वापुनर्योगारूढस्येति योगशब्दप्रयोगात् योयोगंपूर्व्वमारुरुक्षुरासीत्तस्यैवा पेक्षितं योगमारूढस्यतत्फलप्राप्तौकर्मसंन्यासःशमशब्दाच्चोहेतुत्वेनकर्त्तव्यइति वचनादारुरुक्षोरारूढस्यचाभिन्नत्वप्रत्यभिज्ञानान्नतयोर्भिन्नत्वंशङ्कितुंशक्यमित्याह पुनरिति यत्तुयावज्जीवश्रुतिविरोधात् योगारोहणसीमाकरणंकर्मणोऽनुचितमि ति तत्राह उच्यइति पूर्व्वोक्तरीत्याकर्मतत्त्यागयोर्विभागोपपत्तौश्रुतेरन्यविषया त्वात् योगमारूढस्यमुमुक्षोर्जिज्ञासमानस्यनित्यनैमित्तिककर्मस्वपिपरित्यागसि द्धिरित्यर्थः इतश्चयावज्जीवंकर्मकर्त्तव्यत्वंनभवतीत्यर्थः ननु योगभ्रष्टशब्देनगृह स्थस्यैवाभिधानात्तस्यैवास्मिन्नध्याये योगविधानाद्योगारोहणयोग्यत्वेसत्यपियावजी वंकर्म्मकर्त्तव्यमिति नेत्याह गृहस्थस्येति तेनापिमुमुक्षुणाकृतस्यकर्म्मणोमोक्षाति रिक्तफलानारम्भकत्वाद्योगभ्रष्टोऽसौछिन्नाभ्रमिवनश्यतीतिशङ्कासावकाशेत्याशंक्य ह अवश्यंहोति अपौरुषेयान्निर्दोषाद्वेदात् फलदायिनीकर्म्मणःस्वाभाविकी शक्तिरवरा ब्रह्मभावस्यचस्वतःसिद्धत्वान्नकर्म्मफलवत्त्वमितिमोक्षातिरिक्तस्यैवफल स्यकर्मारम्भकमितिकर्म्मणियोगभ्रष्टेपिकर्म्मगतिंगच्छतीति निरवकाशशङ्केत्यर्थः ननुमुमुक्षुणाकाम्यप्रतिषिद्धयोगकरणात् कृतयोश्चनित्यनैमित्तिकयोरफलत्वात् कथंतदीयस्यकर्म्मणोनियमेनफलारम्भकत्वंतत्राह नित्यस्यचेति चकारेणनैमित्ति कंकर्मानुकृष्यते वेदप्रमाणकत्वेपिनित्यनैमित्तिकयोरफलत्वेदोषमाह चान्यथेति कर्मण्यनुष्ठितस्यफलारम्भकत्वौच्यात् गृहस्थोयोगभ्रष्टोपिकर्मगतिं गच्छतीति न

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

तस्यनाशाशङ्कैतिशेषः इतोपिगृहस्योयोगभ्रष्टोशब्दवाच्योनभवतीत्याह नचेति ज्ञानंकर्मचेत्युभयं ततोभ्रष्टोयंनश्यतीतिवचनंगृहस्थेकर्मणिसति नार्थवद्भवितुमर्हतस्य कर्मनिष्ठस्यकर्मणोविभ्रंशेहेत्वभावात् तत्फलस्यावश्यकत्वादित्यर्थः कृतस्यकर्मणोमुमुक्षुणाभगवति समर्पणात् कर्तरिफलानारम्भकत्वादितिविभ्रंशकारणमितिशङ्कते कर्मेति राजाराधनवृद्ध्याधनधान्यादिसमर्पणस्याधिकफलहेतुत्वोपलम्भादीश्वरेसमर्पणंनभ्रंशकारणमिति दूषयति नेत्यादिना अधिकफलहेतुत्वेपिमोक्षहेतुत्वमिष्यतामिति शङ्कते मोक्षायेति तदेवचोद्यंविष्टणोति स्वकर्म्मणामिति सहकारिसामर्थात्तस्यफलान्तरं प्रत्युपायत्वासिद्धिरितिहेतुं सूचयति योगेति ध्यानसहितस्यसंन्यासस्यमोक्षोपयिकत्वेकुतोयोगभ्रष्टमधिकृत्यनाशाशङ्केत्याशंक्याह योगाच्चेति सहकार्यभावेसामग्र्यभावात्फलानुपपत्तेर्युक्ता नाशाशङ्केत्यर्थः ध्यानसहितमीश्वरेकर्म्मसमर्पणंमोक्षायेत्यत्रप्रमाणाभावात्गृहस्योयोगभ्रष्टशब्दवाच्योनभवतीतिदूषयति नेति गृहस्यस्ययोगभ्रष्टशब्दवाच्यत्वाभावेहेत्वन्तरमाह एकाकीति नखल्वेतानिविशेषणानिगृहस्थसमवायीनिसम्भवन्तितेनतस्य ध्यानयोगविध्यभावात् नतंप्रतियोगभ्रष्टशब्दवचनमुचितमित्यर्थः एकाकित्ववचनं गृहस्थस्यापिध्यानकालेस्त्रीसहायत्वाभावाभिप्रायेणभविष्यतीत्याशंक्य अग्निहोत्रादिवज्ज्ञानस्यपत्नीसाध्यत्वाभावादप्राप्तप्रतिषेधप्रसङ्गान्नैवमित्याह नचात्रेति विशेषणान्तरपर्यालोचनयापिनायमेकाकिशब्दोगृहस्थपरोभवितुमर्हतीत्याह नचेति किञ्च गृहस्थस्यैवैकाकित्वादिविवक्षित्वाध्ययोगविधौतंप्रत्युभयभ्रष्टप्रश्नोनोपपद्यतइत्याह उभयेति नहिगृहस्थंप्रतिउभयस्मात्ज्ञानात्कर्म्मणश्चविभ्रष्टत्वमुपेत्यप्रष्टुं युज्यतेतस्यज्ञानात्भ्रंशेपिकर्म्मणस्तदभावादनुष्ठीयमानकर्म्मभ्रंशेपिप्रागनुष्ठितकर्म्मवशात् फलप्रतिलम्भादतोयथोक्तप्रश्नालोचनयानगृहस्थंप्रतिध्यानविधानोपपत्तिरित्यर्थः ननुभगवतासंन्यासस्यप्रतिषिद्धत्वात्गृहस्थस्यैव योगविधानात्तस्यैवयोगभ्रष्टशब्दवाच्यत्वमितिशङ्कते अनाश्रितइत्यनेनेति भगवद्वाक्यंनप्रतिषेधपरमिति परिहरति नध्यानेति स्तुतिपरत्वमेवस्फोरयति नकेवलमिति सत्त्वशुद्ध्यर्थमनुतिष्ठन्नितिसम्बन्धः वाक्ययोभयपरत्वमाशंक्यवाक्यभेदप्रसङ्गान्नैवमित्याह नचेति इतोपिभगवतःसंन्यासाश्रमप्रतिषेधोभिप्रेतोनभवतीत्याह नचप्रसिद्धमिति तस्यप्रसिद्धंसंन्यासित्वंयोगित्वञ्चेति सम्बन्धः प्रसिद्धत्वमेवव्याकरोति श्रुतीति इतोपिसंन्यासाश्रमंभगवान्न

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

गौणमुभयंनपुनर्मुख्यसंन्यासित्वंयोगीत्वञ्चाभिमतमित्येतमर्थंदर्शयितुमाह यं संन्यासमिति यंसर्वकर्मतत्फलपरित्यागलक्षणंपरमार्थसंन्यासंसंन्यासमितिप्राहुःश्रुतिस्मृतिविदोयोगंकर्म्मानुष्ठानलक्षणंतंपरमार्थसंन्यासंविद्धिजानीहिहेपाण्डवकर्मयोगस्यप्रवृत्तिलक्षणस्यतद्विपरीतेननिवृत्तिलक्षणेनपरमार्थसंन्यासेनकोहियं

आनन्दगिरिकृतटीका

प्रतिषेधतीत्याह स्ववचनेति विरोधमेवसाधयति सर्व्वकर्म्माणीत्यादिना अनाश्रित इत्यादिवाक्यस्ययथाश्रुतार्थत्वानुपपत्तेःस्तुतिपरत्वमुपपादितमुपसंहरति तस्मादिति कर्म्मफलसंन्यासित्वमत्रमुनिशब्दार्थःस्तुतिपरंवाक्यमत्तरयोजनार्थमुदाहरति अनाश्रितइति कर्म्मफलेभिलाषोनास्तीत्येतावताकथंतदनाश्रितत्ववाचोयुक्तिरित्याशंक्यव्यतिरेकमुखेनविशदयति योहीति कार्य्यमित्यादिव्याकरोति एवम्भूतःसन्निति कथंकर्म्मिणःसंन्यासित्वंयोगित्वञ्चकर्म्मित्वविरोधादित्याशंक्याह यईदृशइति स्तुतेरत्नविवक्षितत्वान्नानुपपत्तिश्चोदनीयेति मन्वानःसन्नाह इत्येवमिति ननिरग्निरित्यादेरर्थमाह नकेवलमिति अग्नयोगार्हपत्याहवनीयान्वाहार्य्यपचनप्रभृतयः नन्वनग्नित्वेसङ्गमक्रियत्वमग्निसाध्यत्वाक्रियाणां तथाचननिरग्निरित्येतावतैवापेक्षितसिद्धेर्नचाक्रियइत्यनर्थकमर्थपुनरुक्तेरिति तत्राह अनग्नीति उत्तरश्लोकस्यतात्पर्यंदर्शयितुंव्यावर्त्यमाशङ्कांदर्शयति ननुचेति प्रसिद्धंपरित्याज्याप्रसिद्धिरुपादीयमानाप्रसिद्धिविरुद्धेतिचोद्यंदूषयतिनैषदोषइति उभयस्यसाग्नौसक्रियेच संन्यासित्वस्ययोगित्वस्यचेत्यर्थः गुणवृत्तयोभयसम्पादनंप्रश्नपूर्वकंप्रकटयति तत्कथमित्यादिना १

स्वामिकृतटीका।

चित्तेशुद्धेऽपिनध्यानंविनासंन्यासमात्रतः मुक्तिःस्यादितिषष्ठेऽस्मिन्ध्यानयोगोवितन्यते पूर्वाध्यायान्तेसंक्षेपेणोक्तंयोगंप्रपञ्चयितुंषष्ठाध्यायारम्भस्तवतावत्सर्वकर्माणिमनसासंन्यस्येत्यारभ्य संन्यासपूर्वकायाज्ञाननिष्ठायास्तात्पर्येणाभिधानाद्धःस्वरूपत्वाच्चकर्मणःसहसासंन्यासातिप्रसङ्गंप्रागेवारयितुं संन्यासादपिश्रेष्ठत्वेनकर्म्मयोगंस्तौतिअनाश्रितइतिद्वाभ्यां कर्मफलमनाश्रितोऽनपेक्षमाणःसन्नवश्यंकार्यतयाविहितंकर्मयःकरोतिसएवसंन्यासीयोगीच नतुनिरग्निरग्निसाध्येष्ट्याख्यकर्मत्यागीनचाक्रियोऽनग्निसाध्यपूर्त्ताख्यकर्मत्यागीच १

CC-0. In Public Domain. Digitized by eGangotri

यंसन्यासमितिप्राहुर्योगंतंविद्धिपाण्डव नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चन २

शाङ्करभाष्यं ।

सामान्यमङ्गीकृत्यतद्भावउच्यतइत्वपेक्षायामिदमुच्यतेअस्तिपरमार्थसंन्यासेनसाद्ध्यंकर्त्तृद्वारकंकर्मयोगस्ययोहिपरमार्थसंन्यासो सत्यक्तसर्वकर्मसाधनतयासर्वकर्मतत्फलविषयंसङ्कल्पंप्रवृत्तिहेतुकामकारणंसंन्यस्यतिअयमपिकर्मयोगीकर्मकुर्वाणएवफलविषयंसङ्कल्पंसंन्यस्यतीत्येतमर्थंदर्शयन्नाह नहियस्मादसन्न्यस्तोसङ्कल्पोसंन्यस्तोऽपरित्यक्तःफलविषयसङ्कल्पोभिसन्धिर्येनसोऽसंन्यस्तसङ्कल्पः कश्चनकश्चिदपिकर्म्मीयोगीसमाधानवान्भवतिनसम्भवतीत्यर्थः फलसङ्कल्पस्यचित्तविक्षेपहेतुत्वात्तस्माद्यःकश्चनयोगीकर्म्मासंन्यस्तफलसङ्कल्पोभवेत् सयोगीसमाधानवान्भवति नविक्षिप्तचित्तोभवतिचित्तविक्षेपहेतोःफलसङ्कल्पस्यसंन्यस्तत्वात् इत्यभिप्रायः योगाङ्गत्वेनकर्म्मानुष्ठानात्कर्मफलसङ्कल्पस्यवाचित्तविक्षेपहेतोःपरित्यागात्योगित्वञ्चेतिसंन्यासित्वञ्चेत्यभिप्रेतमुच्यतेएवंपरमार्थसंन्यासकर्मयोगयोःकर्त्तृद्वारकंसंन्याससामान्यमपेक्ष्ययंसंन्यासमिति प्राहुर्योगंतंविद्धिपाण्डवेतिकर्मयोगस्यस्तुत्यर्थं संन्यासत्वमुक्तं २

आनन्दगिरिकृतटीका ।

सम्भवति मुख्ये संन्यासित्वादौकिमिति गौणमुभयमभीष्टमित्याशंक्यमुख्यस्यकर्म्मण्यसम्भवाद्गौणमेवस्तुतिसिद्ध्यर्थंतदिष्टमित्याह नपुनरिति चित्तव्याकुलत्वहेतुकामनात्यागाच्चित्तसमाधानसिद्धेर्योगित्वंकर्मिणोपियुक्तं संन्यासित्वंतुतस्यविरुद्धमितिशङ्कमानंप्रत्युक्तोर्थश्लोकमवतारयति इत्येतमिति परमार्थसंन्यासंप्राहुरिति सम्बन्धः इतीत्यंसंन्यासस्यप्रामाणिकाभ्युपगतत्वादितीति शब्दोयोज्योयोगंफलत्व

भाषा अनुवाद

यहसुनिअर्जुननेपुछा किहेकृष्ण किसकारणसे वैमनुष्ययोगीऔसंन्यासीनहींहैं इसपरकर्मयोगकोसंन्यासप्रतिपादनकरतेभयेकहतेहैं किहेपाण्डवअर्जुन संन्यासमात्रहीकोजोसवश्रुतियोंनेश्रेष्ठकहाहै सोईफलसंन्यासरूपकर्मको भीजानो जोकहोकिकैसेजानेतोकहतेहैं किइतिशब्दसेकहेजोहेतु सोयोगमे भीहैं सोईडेढ़श्लोकसेकहतेहैं किकर्मनिष्ठ या ज्ञाननिष्ठजोहोय परफलकीइच्छात्यागविनायोगीनहींहै इससेफलकामनामेंजिसकाचित्तविक्षिप्तनहीहै सोई योगीऔसंन्यासीहै सोईकहानह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चन २

CC-0. In Public Domain. Digitized by eGangotri

आरुरुक्षोर्मुनेर्योगंकर्म्मकारणमुच्यते योगारूढस्यतस्यैवशमःकारणमुच्यते ३

आनन्दगिरिकृतटीका

षणांपरित्यज्यसमाहितचेतस्त्वेतिशेषः यदुक्तंसंन्यासित्वंयोगित्वञ्चगृहस्थस्यगौणमिति तदुत्तरार्द्धयोजनयाप्रकटयितुमुत्तरार्द्धमुत्थापयति कर्मयोगस्येति कर्मयोगस्यपरमार्थसंन्यासेनकर्त्तृद्वारकंसाध्यमुक्त्वंव्यक्तं करोति योहीति त्यक्तानिसर्व्वाणिकर्म्माणिसाधनानिचयेनसतथोक्तस्यभावस्तत्तातयासर्वकर्मविषयंतत्फलविषयञ्चसंकल्पंत्यजतीत्यर्थः संकल्पत्यागेतत्कार्यकामत्यागः तत्त्यागेतज्जन्यप्रवृत्तित्यागश्चसिध्यतीत्यभिसन्धायविशिनष्टि प्रवृत्तीति कर्म्मिण्यपियथोक्तसंकल्पसंन्यासित्वमस्तीत्याह अयमपीति तदपरित्यागेव्याकुलचेतस्तयाकर्मानुष्ठानस्यैवदुःशक्यत्वादित्यर्थः उक्तमेवसाध्यंव्यक्तीकुर्वन्व्यतिरेकंदर्शयति इत्येतमिति फलसंकल्पापरित्यागेकिमिति समाधानवत्ताभावस्तत्राह फलेति व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेनोपसंहरति तस्मादिति हिशब्दार्थस्ययस्मादित्युक्तस्यतस्मादित्यनेन सम्बन्धः कर्म्मिणंप्रतियथोक्तविधौ हेतुहेतुमद्भावमभिप्रेत्य द्वितीयविधौहेतुमाह चित्तविक्षेपेति पूर्वश्लोकेपूर्व्वोत्तरार्द्धाभ्यामुक्तमनुवदति एवमिति २

स्वामिकृतटीका।

कुतइत्यपेक्षायांकर्मयोगस्यैवसंन्यासत्वंप्रतिपादयन्नाह यमिति यंसंन्यासंप्राहुःप्रकर्षेणश्रेष्ठत्वेन ऊ.सन्न्यासएवात्यरेचयदित्यादिश्रुतयइतिकेवलात्फलसन्न्यासाद्धेतोर्योगमेवतंजानीहि कुतइत्यपेक्षायामितिशब्दोक्तोहेतुर्योगेऽप्यस्तीत्याह नहीति नसन्न्यस्तःफलसङ्कल्पोयेनसकर्मनिष्ठोज्ञाननिष्ठोवाकश्चिदपियोगी नहिभवति अतःफलसङ्कल्पत्यागादेव चित्तविक्षेपाभावात् योगीचभवत्येवस इत्यर्थः २

भाषाअनुवाद

तौफेरिजावत्जीवनकहेजिन्दगीभरकर्मयोगहीकरनाचहिये जोऐसीशङ्का करोतोकर्मयोगकीअवधिकहते हैं किज्ञानयोगमेआरूढहोनेकीइच्छाकरनेवाले पुरुषोंकोउसराहकेचढ़नेमेकर्महींकारणरूपकहाहै क्योंकिनिष्कामकर्मचित्तशुद्धिकरताहै औरज्ञानयोगआरूढकहेज्ञानीकोशमकहेविक्षेपकारीकर्मसकलकात्यागहीउचितहै जिसलियेत्यागज्ञानपरिपाककाकारणरूपकहाहै ३

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ध्यानयोगस्यफलनिरपेक्षःकर्म्मयोगीबहिरङ्गसाधनमिति तंसंन्यासत्वेनस्तुत्वा धुनाकर्मयोगस्यध्यानयोगसाधनत्वंदर्शयति आरुरुक्षोरिति आरुरुक्षोरारोढुमिच्छतःअनारूढस्यध्यानयोगेवस्थातुमशक्तस्यैवेत्यर्थःकस्यतस्यारुरुक्षोर्मुनेःकर्मफलसंन्यासिनइत्यर्थःकिमारुरुक्षोर्योगंकर्मकारणंसाधनमुच्यते योगारूढस्यपुनस्तस्यैवशमउपशमःसर्व्वकर्मभ्योनिवृत्तिःकारणंयोगारूढत्वस्यसाधनमुच्यतइत्यर्थःयावद्यावत् कर्मभ्यउपरमते तावत्तान्निरायासस्यजितेन्द्रियस्यचित्तंसमाधीयते तथासतिसझटितियोगारूढोभवति तथाचोक्तंव्यासेन नैतादृशंब्राह्मणस्यास्तिवित्तंयथैकताशमतासत्यताच शीलंस्थितिर्दण्डनिधानमार्जवंततस्ततश्चोपरमःक्रियाभ्यइति ३

आनन्दगिरिकृतटीका।

परमार्थसंन्यासस्यकर्मयोगान्तर्भावेकर्मयोगस्यैवसदाकर्त्तव्यत्वमापद्येततेनेतरस्यापिकृतत्वसिद्धेरित्याशंक्योक्तानुवादपूर्व्वकमुत्तरश्लोकतात्पर्यमाह ध्यानयोगस्येति भाविन्याट्टच्यामुनेर्योगमारोढुमिच्छोरिष्यमाणस्ययोगारोहणस्यकर्महेतुश्चेदपेक्षितंयोगमारूढस्यापितत्फलप्राप्तौतदेवकारणंभविष्यति तस्यकारणत्वेकृतप्रणक्षित्वादित्याशंक्याह योगारूढस्येति अनारूढस्येत्येतस्यैवार्थंस्फुटयति ध्यानेति मुनित्वंकर्मफलसंन्यासिन्यौपचारिकमित्याह कर्मफलेति साधनंचित्तशुद्धिद्वाराध्यानयोगप्राप्तीच्छायामितिशेषःतस्येति प्रकृतस्यकर्म्मणोग्रहणंएवकारोभिन्नक्रमःशमशब्देनसम्बध्यतेकस्यान्ययोगव्यवच्छेदेनशमोहेतुरितितत्राह योगारूढत्वस्येति सर्व्वव्यापारोपरमरूपोपशमस्ययोगारूढ़त्वेकारणत्वंविवृणोति यावद्यावदिति सर्व्वकर्मनिवृत्तावायासाभावाद्वशीकृतस्येन्द्रियग्रामस्यचित्तसमाधानेयोगारूढत्वंसिध्यतीत्यर्थः सर्व्वकर्मोपरमस्यपुरुषार्थसाधनत्वेपौराणिकींसम्मतिमाह तथाचेति एकतासर्व्वेषुभूतेषुवस्तुनोद्वैताभावोपलक्षितत्वमिति प्रतिपत्तिःशमतातेष्वेवौपाधिकविशेषेपिस्वतोनिर्व्विशेषत्वधीःसत्यतातेषामेवहितवचनंशीलंस्वभावसम्पत्तिःस्थितिः स्थैर्यंदण्डनिधानमहिंसनंआर्जवमवक्रत्वंक्रियाभ्यःसर्व्वाभ्यःसकाशादुपरतिश्चेत्येतदुक्तंसर्व्वंयथायादृशमेतादृशंनान्यद्ब्राह्मणस्यवित्तंपुरुषार्थसाधनमस्तितस्मादेतदेवास्यनिरतिशयंपुरुषार्थसाधनमित्यर्थः ३

स्वामिकृतटीका।

तर्हियावज्जीवंकर्मयोगएवप्राप्तइत्याशंक्यतस्यावधिमाह आरुरुक्षोरिति ज्ञानयोगमारोढुंप्राप्तुमिच्छोःपुंसस्तदारोहेकारणंकर्मोच्यते चित्तशुद्धिकरत्वात्

CC-0. In Public Domain. Digitized by eGangotri

यदाहिनेन्द्रियार्थेषुनकर्मस्वनुषज्जते सर्वसङ्कल्पसंन्यासीयोगारूढ़स्तदोच्यते ४

शाङ्करभाष्यं

अथेदानींकदायोगारूढ़ोभवतीत्युच्यते यदेति यदासमाधीयमानचित्तोभवति योगीहीन्द्रियार्थेषुइन्द्रियाणामार्थाःशब्दादयस्तेष्विन्द्रियार्थेषुकर्मसुचनित्यनैमित्तिककाम्यप्रतिषिद्धेषुप्रयोजनाभावबुद्ध्यानानुषज्जते अनुषङ्गंकर्त्तव्यतावुद्धिंनकरोतीत्यर्थःसर्वसङ्कल्पसंन्यासीसर्वान्सङ्कल्पानिहामुत्रार्थकामहेतून्संन्यसितुंशीलंअस्येति ससर्वसङ्कल्पसंन्यासीयोगारूढ़ःप्राप्तयोगइत्येतत्तदातस्मिन्कालेयोगारूढउच्यते सर्वसंकल्पसंन्यासीतिवचनात् सर्वांश्चकामान्कामात्मकान्सर्वाणिच कर्माणिसंन्यसेदित्यर्थः संकल्पमूलाहिसर्वेकामाः संकल्पमूलःकामोवैयज्ञाःसंकल्पसम्भवाः कामंजानामितेमूलंसङ्कल्पात्त्वंहिजायसे नत्वांसङ्कल्पयिष्यामितेनमेनभविष्यसिइत्यादिस्मृतेः सर्वकामपरित्यागेचसर्वकर्मसंन्यासःसिद्धोभवति सयथाकामोभवति तत्क्रतुर्भवति तत्कर्मकुरुतेइत्यादिश्रुतिभ्यो यद्यद्धिकुरुतेकर्मतत्तत्कामस्यचेष्टितमित्यादिस्मृतिभ्यश्चन्यायाश्चनहिसर्वसंकल्पसन्न्यासेकश्चित्स्थन्दितुमपिसक्नोतस्मात् सर्वसङ्कल्पसन्न्यासीतिवचनात् सर्वान्कामान् सर्वाणिकर्माणिचत्याजयति भगवान ४

आनन्दगिरिकृतटीका

योगप्राप्तौकारणकथनान्तरं तत्प्राप्तिकालंदर्शयितुंश्लोकान्तरमवतारयति अथेति समाधानावस्थायदेत्युच्यते अतएवोक्तंसमाधीयमानचित्तोयोगीति शब्दादिषु कर्मसु चानुषङ्गस्य योगारोहणप्रतिबन्धकत्वात्तदभावस्यतदुपायत्वंप्रसिद्धमिति द्योतयितुंहीत्युक्तं सर्वेषामपिसङ्कल्पानांयोगारोहणप्रतिबन्धकत्वमभिप्रेत्यसर्वसङ्कल्पसंन्यासीत्यत्रविवक्षितमर्थमाह सर्वानिति सर्वसङ्कल्पसंन्यासेपिसर्वेषां

स्वामिकृतटीका।

ज्ञानयोगमारूढ़स्यतुतस्यैवज्ञाननिष्ठस्यशमोविक्षेपककर्मोपरमोज्ञानपरिपाकेकारणमुच्यते ३

भाषानुवाद।

जोपूछोकिवहज्ञानयोगआरूढ़पुरुषजिसकोविक्षेपकारीकर्मकात्यागकहागया कैसाहोताहै तोकहतेहैं किजबइन्द्रियोंकेभोगजोविषयतिनमे औरभोगकेसाधनभूतकर्मोमेआसक्तनहोय औरकर्मसंकल्पकोछोडिसकै तबउसकोजोगारूढ़कहते हैं ४

CC-0. In Public Domain. Digitized by eGangotri

उद्धरेदात्मनात्मानंनात्मानमवसादयेत् आत्मैवह्यात्मनोबन्धुरात्मैवरिपुरात्मनः ५

शाङ्करभाष्यं

यदैवंयोगारूढस्तदातेनात्मानोद्धृतोभवति संसारादनर्थजातादतः उद्धरेदिति उद्धरेत् संसारसागरेनिमग्नमात्मनात्मानंततउत् ऊर्द्धंहरेत् उद्धरेत् योगारूढता

आनन्दगिरिकृतटीका ।

कामानांकर्मणाञ्चप्रतिबन्धकत्वसम्भवेकुतोयोगप्राप्तिरित्याशंक्याह सर्वेति सर्व सङ्कल्पपरित्यागेयथोक्तविध्यनुष्ठानमयत्नसिद्धमिति मन्वानःसन्नाह सङ्कल्पेति मूलोन्मूलनेचतत्कार्यनिवृत्तिरयत्नसुलभेतिभावः तत्रप्रमाणमाह सङ्कल्पमूलइति तत्रान्वयव्यतिरेकावभिप्रेत्योक्तमुपपादयति कामेति सर्वसङ्कल्पाभावेकामाभावत्कर्माभावस्यसिद्धत्वेपिकर्मणां कामकार्यत्वात्तन्निवृत्तिप्रत्युक्तामपि निवृत्तिमुपन्यस्यति सर्वकामेति यदुक्तंकर्मणांकामकार्यत्वंतत्रश्रुतिस्मृतीप्रमाणयति सयथेति सपुरुषःस्वरूपमजानन्यत्फलकामोभवति तत्साधनमनुष्ठेयतयाबुद्धौधारयतीति तत्क्रतुर्भवति यच्चानुष्ठेयतयागृह्णाति तदेवकर्मवहिरपिकरोतीति कामाधीनंकर्मोक्तमितिश्रुत्यर्थः कामजन्यंकर्मेत्यन्वयव्यतिरेकसिद्धमिति द्योतयितुंस्मृतौहिशब्दः न्यायमेवदर्शयति नहिसर्वसङ्कल्पेति स्वाप्नादावदर्शनादित्यर्थः नित्यनैमित्तिककर्मानुष्ठानंदूरनिरस्तमिति वक्तुमपिशब्दः श्रुतिस्मृतिन्यायसिद्धमर्थमुपसंहरति तस्मादिति ४

स्वामि कृतटीका

कीदृशोऽयंयोगारूढोयस्यशमःकारणमुच्यतइत्यत्राह यदेति इन्द्रियार्थेष्विन्द्रियभोगेषु तत्साधनेषुचकर्मसु यदा नानुषज्जतेआसक्तिंनकरोति तत्रहेतुःआसक्तिमूलभूतान्सर्वान्भोगविषयान्कर्मविषयांश्चसङ्कल्पान् संन्यासितुंत्यक्तुंशीलंयस्यसतदायोगारूढउच्यते ४

भाषा अनुवाद ।

देखोविषयोंकीइच्छानिवृत्तिहोनेसेमोक्षऔविषयोंमेंआसक्तिसेबन्धहोताहै यहविचारिरागद्वेषादिस्वभावसेरहितहोना उचितसोईकहतेहैं किविवेकयुक्तआपही अपनेआत्मकोबुद्धिकेद्वारासंसारसेउद्धारकरैगा और अधोगतिकोनलेजायगा जिसहेतुकामनासेनिवृत्तजोआत्माकहेमन सोई अपनाबन्धुरूपउपकारीहै और कामकीकामनामेआसक्तजोमन सोशत्रुरूपअपकारीहै तोअपनाशत्रुमित्रआपहीहै ५

CC-0. In Public Domain. Digitized by eGangotri

बन्धुरात्मात्मनस्तस्ययेनैवात्मात्मनाजितः अनात्मनस्तुशत्रुत्वेवर्त्तेतात्मैवशत्रुवत् ६

शाङ्करभाष्यं।

मापादयेदित्यर्थः नात्मानमवसादयेन्नाधोनयेत् आत्मैवहियस्मादात्मनोबन्धुर्नह्यन्यः कश्चिद्बन्धुर्यःसंसारमुक्तयेभवति बन्धुरपितावन्मोक्षंप्रति प्रतिकूलएवस्नेहादिबन्धनायतनत्वात्तस्मादुक्तमवधारणमात्मैवह्यात्मनोबन्धुरिति आत्मैवरिपुःशत्रुर्योन्योऽपकारीवाह्यःशत्रुःसोऽप्यात्मप्रयुक्तएवेति युक्तमेवावधारणमात्मैवरिपुरात्मनइति ५

आत्मैवात्मनोबन्धुरात्मैवरिपुरात्मनइत्युक्तंतत्किंलक्षणआत्माआत्मनोबन्धुःकिंलक्षणोवाआत्मात्मनोरिपुरित्युच्यते बन्धुरिति बन्धुरात्मात्मनस्तस्यतस्यात्मनःसआ

आनन्दगिरिकृतटीका।

योगारूढस्यकिंस्यादित्याशंक्याह यदैवमिति योगारोहस्यदृष्टादृष्टोपायैरवश्यकर्त्तव्यतायैमुक्तिहेतुत्वंतद्विपर्ययस्याधःपतनहेतुत्वञ्चदर्शयति अतइति तत्रहेतुमाह आत्मैवहीति उद्धरणापेक्षामात्मनःसूचयति संसारेति संसारादुद्धरणंकीदृगित्याशंक्याह योगारूढतामिति योगप्राप्तावनास्थातु नकर्तव्येत्याह नात्मातमिति योगप्राप्त्युपायस्त्वेन्नानुष्ठीयते तदायोगाभावेसंसारपरिहारासम्भवादात्माधोनीतःस्यादित्यर्थः नन्वात्मानंसंसारेनिमग्नंतदायोबन्धुस्तस्मादुद्धरिष्यति नेत्याह आत्मैवहीति कुतोवधारणमन्यस्यापिप्रसिद्धस्यबन्धोःसम्भवात्तत्राह नहीति अन्योबन्धुःसन्नपिसंसारमुक्तयेनभवतीत्येतदुपपादयति बन्धुरपीति स्नेहादीत्यादिशब्दात्तदनुगुणप्रवृत्तिविषयत्वंगृह्यते आत्मातिरिक्तस्यापिशत्रोरपकारिणःसुप्रसिद्धत्वादवधारणमनुचितमित्याशंक्याह योन्यइति ५

स्वामिकृतटीका।

अतोविषयासक्तित्यागेमोक्षंतदासक्तौचबन्धंपर्य्यालोच्यरागादिस्वभावंत्यजेदित्याह उद्धरेदिति आत्मनाविवेकयुक्तेनात्मानंसंसारादुद्धरेत् नत्ववसादयेदधोनयेत् हियतआत्मैवमनःसङ्गाद्युपरतआत्मनःस्वस्यबन्धुरुपकारकःरिपुरपकारकः ५

भाषा अनुवाद।

अबआत्माहींतोकिसीमनुष्यकाबन्धु औकिसीकारिपुहैइसअपेक्षापरकहते हैं जिसनेअपनेआत्मासेआत्माकोजीताअर्थात्विज्ञानमय आत्माकर्त्तृककार्यकारणमिलितरूपजोआत्मास्थूलसूक्ष्मशरीरादि वशीभूतहोतीहै सोईविज्ञानमयजीवअपनाबन्धु है और अनात्माकहेशरीरादि अवशीकृतजोहै सोईआपअपनाशत्रुतुल्यहै ६

CC-0. In Public Domain. Digitized by eGangotri

जितात्मनःप्रशान्तस्यपरमात्मासमाहितः शीतोष्णसुखदुःखेषुतथामानावमानयोः७

शाङ्करभाष्यं।

त्मावन्धुर्येनात्मनात्मैवजितःआत्मकार्य्यकारणसंघातोयेनजितोवशीकृतोजितेन्द्रिय इत्यर्थःअनात्मनस्तुअजितात्मनस्तु शत्रुत्वेशत्रुभावेवर्त्ततशत्रुवत्यथानात्माशत्रुरात्मनोऽपकारीतथात्मात्मनोऽपकारेवर्त्तेत इत्यर्थः ६

जितात्मनइति जितात्मनःकार्यकरणादिसंघातआत्माजितोयेनसजितात्मा तस्यजितात्मनःप्रशान्तस्यपरमात्मासमाहितःसाक्षादात्मभावेनवर्त्ततइत्यर्थःकिञ्चशी तोष्णसुखदुःखेषुतथामानेऽवमानेचमानावमानयोःपूजापरिभवयोःसमःस्यात्इत्या ध्याहारः ७

आनन्दगिरिकृतटीका

उक्तमनूद्यप्रश्नपूर्वकंश्लोकान्तरमवतारयति आत्मैवेत्यादिना एकस्यैवात्मनो मिथोविरुद्धंबन्धुत्वंरिपुत्वञ्चलक्षणभेदमन्तरेणायुक्तमितिचोदिते वशीकृतसंघा तस्यात्मानंप्रतिबन्धुत्वमितरस्यशत्रुत्वमित्यविरोधंदर्शयति बन्धुरित्यादिना वशी कृतसंघातस्यविक्षेपाभावादात्मनिसमाधानसम्भवादुपपन्नमात्मानंप्रतिबन्धुत्वमि तिसाधयति तस्येति अवशीकृतसंघातस्यपुनर्विक्षेपोपपत्तेरात्मनिसमाधानायोगा दात्मानंप्रति शत्रुभावेप्रसिद्धशत्रुवत् आत्मैवशत्रुत्वेनवर्त्ततेत्युत्तरार्द्धंव्याकरोतिअ नात्मनइति दृष्टान्तंव्याचष्टे यथेति उक्तदृष्टान्तवशादवशीकृतसंघातःस्वस्यहितानु चरणादात्मानंप्रति शत्रुरेवेति दार्ष्टान्तिकमाह तथेति ६

स्वामिकृतटीका।

कथम्भूतस्यात्मैवबन्धुःकथंभूतस्यचात्मैवरिपुरित्यपेक्षायामाह बन्धुरिति येना त्मनैवात्माकार्य्यकरणसंघातरूपोजितोवशीकृतस्तस्यतथाभूतस्यात्मनआत्मैवब न्धुःअनात्मनोऽजितात्मनस्तुआत्मैवात्मनःशत्रुत्वेशत्रुवदपकारित्वेवर्त्तेत ६

भाषा अनुवाद।

जितात्मापुरुषकोजोअपनेआत्मासेबन्धुताहै सोखुलासाकरकेकहतेहैं कि जिसनेआत्माजोशरीरआदि तिसकोजीताअर्थात् अपनेआधीनकिया केवलउस प्रीतिविरोधआदिक्लेशरहितमनुष्यका मनशीतउष्णसुखदुःखआदिमेंसमाहितकहे सावधानरहताहै अर्थात्वहीआत्मनिष्ठहै अथवाउसीकाहृदय परमात्मामेंसमा हितअर्थात्विक्षेपरहितनिश्चलहोता किसीकाशत्रुकाहैमहींनहोसकताहै ७

CC-0. In Public Domain. Digitized by eGangotri

ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेन्द्रियः युक्तइत्युच्यतेयोगीसमलोष्टाश्मकाञ्चनः ८

शाङ्करभाष्यं।

ज्ञानेति ज्ञानविज्ञानतृप्तात्माज्ञानंशास्त्रोक्तपदार्थानांपरिज्ञानं विज्ञानन्तु शास्त्रतोऽज्ञातानांतथैवस्वानुभवकरणंताभ्यांज्ञानविज्ञानाभ्यांतृप्तः सञ्जातालंप्रत्यय आत्मान्तःकरणंयस्यसज्ञानविज्ञानतृप्तात्माकूटस्थोऽप्रकम्पोभवतिइत्यर्थः विजितेन्द्रि यश्चयईदृशोयुक्तःसमाहितइति सउच्यतेकथ्यते सयोगीसमलोष्टाश्मकाञ्चनःलो ष्टाश्मकाञ्चनानिसमानियस्यसःसमलोष्टाश्मकाञ्चनः ८

आनन्दगिरिकृतटीका।

कथंसंयतकार्यकरणस्यबन्धुरात्मेति तत्राह जितात्मनइति जितकार्यकरण संघातस्यप्रकर्षेणोपरतबाह्याभ्यन्तरकरणस्यपरमात्माविच्छेदेन पुनःपुनरनभिभूय मानोनिरन्तरंचित्तेप्रथतइत्यर्थः जितात्मानंसंन्यस्तसमस्तकर्माणमधिकारिणंप्रद र्श्य योगाङ्गानिदर्शयति शीतेति समःस्यादित्यध्याहारः पूर्ब्बार्द्धंव्याचष्टे जितेत्या दिना नकेवलंतस्यपरमात्मासाक्षादात्मभावेनवर्त्ततेकिन्तुशीतोष्णादिभिरपिना सौचाल्यतेतत्त्वज्ञानादित्युत्तरार्द्धंविभजते किञ्चेति तेषुसमःस्यादितिसम्बन्धः ७ चित्तसमाधानमेवविशिष्टफलञ्चेदिष्टं तर्हिकथम्भूतःसमाहितोव्यवह्रियते तत्राह ज्ञानेति परोक्षापरोक्षाभ्यांज्ञानविज्ञानाभ्यांसंजातोलंप्रत्ययोऽक्रियोहर्षविषादका मक्रोधादिरहितोयोगीयुक्तःसमाहितइति व्यवहारभागीभवतीति पादत्रयव्याख्या

स्वामिकृतटीका।

जितात्मनःस्वस्मिन्बन्धुत्वंस्पष्टयति जितात्मनइति जितआत्मायेनतस्यप्रशा न्तस्यरागादिरहितस्यैवपरंकेवलमात्माशीतोष्णादिषु सत्स्वपिसमाहितआत्मनि ष्ठोभवति नान्यस्य यद्वा तस्यहृदिपरमात्मासमाहितःस्थितोभवति ७

भाषा अनुवाद।

योगआरूढ़पुरुषकेलक्षणऔश्रेष्ठताकहतेहैं किज्ञानकहेसास्त्रसेअथवागु रूकेउपदेशसेजोहोय औरविज्ञानजोअनुभवसिद्धअर्थात्हमसोईब्रह्महैं यहप्रत्य क्षज्ञान इनदोनोसेजिसकाआत्माकहे चित्तसन्तुष्टहै औरजिसनेइन्द्रियगणको जीताहै तथाढेलापत्थरसोना ये जिसकोसमानअर्थात्लेनेछोड़नेकीबुद्धिजिससे नहींहै ऐसाजोनिरपेक्षनिर्विकार कूटस्थकहेअचलकेतुल्यनिश्चलपुरुषसोईयुक्त योगीकहेयोगारूढ़है ८

CC-0. In Public Domain. Digitized by eGangotri

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुष्वपिचपापेषुसमबुद्धिर्विशिष्यते ९

शाङ्करभाष्यम्।

किञ्चसुहृदिति सुहृदित्यादिश्लोकार्द्धमेकपदं सुहृदि। प्रत्युपकारमनपेक्ष्योपकर्त्तामित्रंस्नेहवान्अरिःशत्रुःउदासीनोनकस्यचित् पक्षंभजतेमध्यस्थोयोबिरुद्धयोरुभयोर्हितैषीद्वेष्यःआत्मनोप्रियोबन्धुःसम्बन्धीत्येतेषु साधुषुशास्त्रानुवर्त्तिष्वपिचपापेषु प्रतिषिद्धकारिषु सर्व्वेष्वेतेषु समबुद्धिःकःकिंकर्म्मेत्यव्याप्तबुद्धिरित्यर्थः बिशिष्यते बिमुच्यतइतिवापाठान्तरं योगारूढ़ानांसर्व्वेषामयमुत्तमइत्यर्थः ९

आनन्दगिरिकृतटीका

नेनदर्शयति ज्ञानमित्यादिना सचयोगीपरमहंसपरिव्राजकःसर्व्वत्रोपेक्षाबुद्धिरनतिशयवैराग्यभागीतिकथयति सयोगीति ८

योगारूढ़स्यप्रशस्तत्वमभ्युपेत्ययोगस्याङ्गान्तरंदर्शयति किञ्चेति पदच्छेदःपदार्थोक्तिरिति व्याख्यानाङ्गंसम्पादयति सुहृदितीति अरिर्नामपरोऽत्यन्तमपकारकःप्रत्यक्षमप्रियोद्वेष्यइतिविभागः समबुद्धिरितिव्याचष्टे कःकिमिति प्रथमोहिप्रश्नोजातिगोत्रादिविषयःद्वितीयोव्यापारविषयः उक्तप्रकारेणाव्याप्तबुद्धित्वेसर्व्वोत्कर्षोवसर्व्वोपायविमोक्षोवासिध्यतीत्याह विशिष्यतइति पाठद्वयेपिसिद्धमर्थंसंगृह्यकथयति योगारूढ़ानामिति ९

स्वामिकृतटीका।

योगारूढ़स्यलक्षणंप्रैढ्यंचोक्तमुपसंहरति ज्ञानेति ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवस्ताभ्यांतृप्तोनिराकांक्षआत्माचित्तंयस्यअतःकूटस्थोनिर्व्विकारःअतएवविजितानीन्द्रियाणियेनअतएवसमानिलोष्टादीनियस्यस्युत्खण्डपाषाणसुवर्णेषु हेयोपादेयबुद्धिशून्यःसयुक्तोयोगारूढइत्युच्यते ८

भाषा अनुवाद।

औरशत्रुमित्रआदिमेजोसमदर्शीमनुष्यसोयोगीसेभीअधिकहै यहकहतेहैं किसुहृदकहेस्वभावहीसेहितकारीऔमित्रजोस्नेहवशतेउपकारीऔअरिकहेघातकजोशत्रुऔउदासीनअर्थात्उपकारअपकारदोनोसेअलगनिरपेक्षजोहै औमध्यस्थकहे पक्षपातविनादोनोओरहितकारीऔद्वेष्यअर्थात् निःप्रयोजनशत्रुजोअकारणक्रोधीऔबन्धुजिनसेकुछसम्बन्धहै औ साधुकहे सुशीलसुन्दरआचरणजिनकाहै तथा पापजोदुराचारी इनसबकेविषेजिसकीबुद्धिसमानकहे प्रीतिविरोधरहितहै सोविशिष्टकहे योगीसेअधिकहै ९

CC-0. In Public Domain. Digitized by eGangotri

योगीयुञ्जीतसततमात्मानंरहसिस्थितः एकाकीयतचित्तात्मानिराशीरपरिग्रहः १०

शाङ्करभाष्यं।

अतएवमुत्तमफलप्राप्तये योगीति योगीध्यायीयुञ्जीतसमाद्ध्यात् सततंसर्वदात्मानमन्तःकरणंरहस्येकान्तेयोगीगिरगुहादौस्थितःसन्नेकाकीअसहायोरहसिस्थितएकाकीचेतिविशेषणात्संन्यासंद्योतयत्यर्थःयतचित्तात्माचित्तमन्तःकरणमात्मादेहश्चसंयतौयस्यसयतचित्तात्मा निराशीर्वीततृष्णोऽपरिग्रहश्चपरिग्रहरहितइत्यर्थःसंन्यासित्वेपिसतित्यक्तसर्वपरिग्रहःसन्युञ्जीतेत्यर्थः १०

आनन्दगिरिकृतटीका

यथोक्तविशेषणवतोयोगारूढेषूत्तमत्वे योगानुष्ठाने प्रयतितव्यमित्यङ्गाभिधानान्तरंप्रधानमभिदधाति अतएवमिति आदरनैरन्तर्यदीर्घकालत्वंविशेषणत्रयंयोगस्यसूचयति सततमिति तस्यैवपश्चाङ्गान्युपन्यस्यति रहसतीत्यादिना सर्वदेत्यादरदीर्घकालयोरुपलक्षणं प्रत्यागात्मानंव्यावर्त्तयति अन्तःकरणमिति गिरिगुहादावित्यादिशब्देनयोगप्रतिबन्धकदुर्ज्जनादिविधुरोदेशोगृह्यते विशेषणद्वयस्यतात्पर्यमाह रहसीति योगंयुञ्जानस्यसंन्यासिनोविशेषणान्तराणिदर्शयतियतेति सतिसंन्यासित्वेकिमित्यपरिग्रहग्रहणमर्थपुनरुक्तेरित्याशंक्यकौपीनाच्छादनादिष्वपिशक्तिनिवृत्त्यर्थमित्याह संन्यासित्वेपीति १०

स्वामिकृतटीका।

सुहृन्मित्रादिषु समबुद्धियुक्तस्ततोऽपिश्रेष्ठइत्याह सुहृदिति सुहृत्स्वभावेनैवहिताशंसीमित्रंस्नेहवशेनोपकारकःअरिर्घातुकः उदासीनोविवदमानयोरुभयोरप्युपेक्षकः मध्यस्थोविवदमानयोरुभयोरपिहिताशंसी द्वेष्योद्वेषविषयः बन्धु सम्बन्धी साधवःसदाचाराः पापादुराचाराःएतेषु समारागद्वेषशून्याबुद्धिर्यस्य सतु विशिष्टः ९

भाषाअनुवाद

योगीकेलक्षणकहिकरअबउसकाअङ्गरूपजोयोगसोइसश्लोकसेलेकरइसीअध्यायके सयोगीपरमोमतःइस३२श्लोकतककहतेहैं कियोगआरूढपुरुषसङ्गरहितहोय जिसकेअन्तःकरणऔशरीरवशीभूतहैं सोनिराकांक्षसर्वपरिग्रहरहितपुरुषएकान्तमेंअकेलासावधानबैठिकरअपनेआत्माकहे मनकोनिरन्तरभगवतकेमननमेंयुक्तकरै १०

CC-0. In Public Domain. Digitized by eGangotri

शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरं ११

शाङ्करभाष्यं ।

अथेदानींयोगंयुञ्जतआसनाहारविहारादीनांयोगसाधनत्वेननियमोवक्तव्यः प्राप्तयोगस्यलक्षणंतत्फलादिचेत्यतआरभ्यते तत्रासनमेवतावत् प्रथममुच्यते शुचाविति शुचौशुद्धेविविक्तेस्वभावतःसंस्कारतोवादेशेस्थानेप्रतिष्ठाप्यस्थिरमचलनमात्मनःआसनंनात्युच्छ्रितंनाप्यतिनीचंतच्चचेलाजिनकुशोत्तरंचेलमजिनंकुशाश्चउत्तरेयस्मिन्नासनेतदासनंचेलाजिनकुशोत्तरंपाठक्रमात् विपरीतोत्रअनुक्रमश्चैलादीनां ११

आनन्दगिरिकृतटीका

योगंयोगाङ्गानिचोपदिश्योत्तरसन्दर्भस्यतात्पर्य्यमाह अथेति योगस्वरूपकतिपयतदङ्गप्रदर्शनानन्तर्य्यमथशब्दार्थविहारादीनामित्यादिशब्देनयथोक्तासनादिगतावान्तरभेदग्रहणंतत्फलादिचेत्यादिशब्देनयोगफलं सम्यग्ज्ञानञ्चतत्फलंकैवल्यंततोभ्रष्टस्यात्यन्तिकाविनष्टत्वमित्यादिगृह्यते एवंसमुदायतात्पर्य्येदर्शिते किमासीनःशयानस्तिष्ठन्गच्छन्कुर्वन्वा युंजीतेत्यपेक्षायामनन्तरश्लोकतात्पर्यमाह तत्रेतिनिर्द्धारणेसप्तमी प्रथमंयोगानुष्ठानस्यप्रधानमासीनःसम्भवादिति न्यायादितियावत् विविक्तत्वंद्वेधाविभजते स्वभावतइति आसनस्थास्थैर्य्येतत्रोपविश्ययोगमनुतिष्ठतःसमाधानायोगात् योगासिद्धिरित्यभिसन्धायविशिनष्टि अचलनमिति आस्यतेस्मिन्निति व्युत्पत्तिमनुसृत्याह आसनमिति आत्मनइति परकीयासनव्युदासार्थं

स्वामिकृतटीका ।

एवंयोगारूढस्यलक्षणमुक्त्वेदानींतस्यसाङ्गंयोगंविधत्ते योगीत्यादिना सयोगीपरमोमतइत्यन्तेनग्रन्थेन योगीयोगारूढ़आत्मानंमनोयुञ्जीतसमाहितं कुर्य्यात् सततंनिरन्तरंरहसिएकान्तेस्थितःसन्एकाकीसङ्गशून्यः यतंसंयतंचित्तमात्मादेहश्चयस्यनिराशीर्निराकाङ्क्षःअपरिग्रहःपरिग्रहशून्यश्च १०

भाषा अनुवाद

उसीयोगकासासनऔनियमआदिदिखावते ऊये दोश्लोकसेकहतेहैं किपवित्रस्थानमेंअपनेआसनपरबैठनेकेअनन्तर योगअभ्यासकरै आसनकैसाचहिये किजोअचलऔनबहुतऊंचा नअतिनीचाहोय और चेलकृष्णवस्त्रअजिनव्याघ्रचर्मअर्थात् नींचेकुश तवचर्म उपरवस्त्र ऐसाआसनकरै ११

CC-0. In Public Domain. Digitized by eGangotri

तत्रैकाग्रंमनःकृत्वायतचित्तेन्द्रियक्रियः उपविश्यासनेयुंज्याद्योगमात्मविशुद्धये १२

शाङ्करभाष्यं

प्रतिष्ठाप्यकिं तत्रेति तत्रतस्मिन्नासनेउपविश्ययोगंयुञ्ज्यात् कथंसर्व्वविषयेभ्य उपसंहृत्यैकाग्रंमनःकृत्वायतचित्तेन्द्रियक्रियःसकिमर्थंयोगंयुञ्ज्यादित्याह आत्मवि शुद्धयेअन्तःकरणस्यशुद्ध्यर्थमित्येतत् १२

आनन्दगिरिकृतटीका।

पतनभयपरिहारार्थंनात्युच्चमित्युक्तंनाप्यतिनीचमिति भूतलपाषाणादिसंश्लेषेवात च्चोभाग्निमान्द्यादिसम्भावितदेशनिरासार्थं चेलंवस्त्रमजिनंचर्म्मपशूनां तच्चैतस्य कुशादर्भास्तेचोत्तरेयस्मिन्नुपरिष्टादारभ्य तत्तथोक्तं प्रथमंचेलंततोऽजिनंततश्चकु शादिति प्रतिपन्नक्रममापातिकंक्रममतिक्रम्यादौकुशास्ततोजिनंततश्चेलमितिक्रमं विविक्षित्वाह विपरीतोवेति ११

यथोक्तमासनंसम्याद्यकिंकर्त्तव्यमिति प्रश्नपूर्वकंकर्त्तव्यंतन्निर्दिशति प्रतिष्ठाप्ये ति योगंयुञ्जानस्येतिकर्त्तव्यताकलापंपृच्छति कथमिति सर्वेभ्योविषयेभ्यःसका शात् प्रत्याहृत्यमनसोयदेकस्मिन्नेवध्येयेविषयेसमाधानंयच्चित्तस्येन्द्रियाणाञ्चवा ह्यक्रियाणां संयमनंतदुभयंकृत्वायोगमनुतिष्ठेदित्याह सर्वेति आसनेयथोक्तेस्थि त्वायथोक्तयारीत्यायोगानुष्ठानस्यप्रश्नपूर्वकंफलमाह सकिमर्थमित्यादिना १२

स्वामिकृतटीका।

आसननियमंदर्शयन्नाह शुचाविति द्वाभ्यां शुद्धेस्थानेआत्मनःस्वस्यासनंस्थाप यित्वा कीदृशंस्थिरमचञ्चलंनात्युच्छ्रितंनचातिनीचंचेलंवस्त्रंअजिनंव्याघ्रादिचर्म्म चे लाजिनेकुशेभ्यउत्तरेयस्य कुशानामुपरिचर्म्मतदुपरिवस्त्रमास्तीर्य्येत्यर्थः ११

तत्रतस्मिन्नासनेउपविश्यएकाग्रंचित्तेपरहितंमनःकृत्वायोगंयुञ्ज्यादभ्यसेत्य तासंयताचित्तस्येन्द्रियाणांचक्रियायस्यआत्मनोमनसोविशुद्धयउपशान्तये १२

भाषा अनुवाद।

और जिसका चित्त औ इन्द्रिय निष्क्रिय कहे व्यापार रहितहैं सो मन की शान्तिकहे शुद्धिके अर्थ उक्तआसन पर बैठनेके बाद मनको एकाग्र चित्त परहित करके योग अभ्यास करै १२

CC-0. In Public Domain. Digitized by eGangotri

समंकायशिरोग्रीवंधारयन्नचलंस्थिरः संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन् १३

शाङ्करभाष्यं

वाह्यसाधनमासनमुक्तंअधुनाशरीरस्यधारणंकथमित्युच्यते समंमिति समंकाय शिरोग्रीवंकायश्चशिरश्चग्रीवाचकायशिरोग्रीवंतत् समंधारयन्अचलञ्चसमंधार यतश्चलनंनसम्भवत्यतोविशिनष्टि अचलमिति स्थिरःस्थिरोभूत्वेत्यर्थःस्वंनासिकाग्रं संप्रेक्ष्यसम्यक्प्रेक्षणंदर्शनंकृत्वेवेतीवशब्दोलुप्तोद्रष्टव्यो नहिस्वनासिकाग्रसंप्रेक्षण मिहविधित्सितं किंतर्हिचक्षुषोदृष्टिसन्निपातः सचान्तःकरणसमाधानापेक्षोविवि क्षितः स्वनासिकाग्रसंप्रेक्षणमेवचेद्विवक्षितं मनस्तत्रैवसमाधीयेत नात्मनिआत्म निहिमनसःसमाधानंवक्ष्यत्यात्मसंस्थं मनःकृत्वेति तस्मादिवशब्दलोपेनाक्ष्णोर्दृष्टि सन्निपातएवसंप्रेक्ष्येत्युच्यते दिशश्चानवलोकयन् दिशाञ्चावलोकनमकुर्वन्नित्येव मन्तराकुर्वन्नित्येतत् १३

आनन्दगिरिकृतटीका ।

उक्तमनूद्यानन्तरश्लोकस्यापुनरुक्तमर्थमाह वाह्येति समत्वमृजुत्वंकायःश रीरमध्यं अचलमिति विशेषणमवतार्य्यतस्यतात्पर्य्यमाह समंमिति कार्यकर णयोर्विषयप्रारवश्यशून्यत्वमचलत्वंस्थैर्यं किमितीवशब्दलोपोत्रकल्प्यते स्वना सिकाग्रसंप्रेक्षणमेवयोगाङ्गत्वेनात्रविधित्सितंकिंनस्यादित्याशंक्याह नहीति तर्हि किमत्रविविक्षितमिति प्रश्नपूर्वकमाह किंतर्हीति दृष्टिसन्निपातोदृष्टेश्चक्षुषोरूप प्रवृत्तिराहित्यं कथमसावनायासेनसिध्यति तत्राह तचेति समाधानस्यप्राधान्ये नात्रविविक्षितत्वात्दृष्टेर्बहिर्विषयत्वेनतद्भङ्गसङ्गात्तस्याविषयेभ्योव्यावृत्तान्तरेच सन्निपातोविविक्षितोभवतीत्यर्थः तथाप्रिकथंस्वनासिकाग्रसंप्रेक्षणमत्रश्रुतमविवि क्षितमित्याशंक्याह स्वनासिकेति तत्रैवमनःसमाधानेकाहानिरित्याशंक्यवाक्यशे षविरोधान्नैवमित्याह आत्मनिहीति किंतर्हिसंप्रेक्ष्येत्यादौविविक्षितमित्याशंक्या

भाषाअनुवाद ।

अवचित्तकीएकाग्रताकेउपयोगी जोदेहधारणादिसोदोश्लोकसेकहते हैं कि कायकहेशरीरकामध्यभाग औशिरग्रीवांअर्थात् मूलआधारसेलेमस्तकपर्यन्तश रीर कोअतियत्नसेसीधीराखिकेऔनिश्चलकरके धारणाकेवाद अपनीनासिका केअग्रभगमे अर्द्धउन्मीलनपूर्वक दोनोदृष्टीलगाय समाहितसावधानहोय और दिशोंमेदृष्टिनदेय १३

CC-0. In Public Domain. Digitized by eGangotri

प्रशान्तात्माविगतभीर्ब्रह्मचारिव्रतेस्थितः मनःसंयम्यमच्चित्तोयुक्त आसीतमत्परः १४

शाङ्करभाष्यं

किञ्चप्रशान्तेति प्रशान्तात्माप्रकर्षेणशान्तआत्मान्तःकरणंयस्यसोयंप्रशान्तात्माविगतभीर्विगतभयःब्रह्मचारिव्रतेस्थितःब्रह्मचारिणोव्रतंब्रह्मचारिव्रतंब्रह्मचर्यंगुरुशुश्रूषाभिक्षाभुक्त्यादितस्मिन्स्थितस्तदनुष्ठाताभवेदित्यर्थः किञ्चमनःसंयम्य मनसोवृत्तीरुपसंहृत्येत्येतत् मच्चित्तोमयिपरमेश्वरेचित्तंयस्यसोयंमच्चित्तोयुक्तःसमाहितःसंन्यासीचोपविशेत्मत्परोऽहंपरोयस्यसोयंमत्परोभवति कश्चित् रागी स्त्रीचित्तोनतुस्त्रियमेवपरत्वेनगृह्णाति किं तर्हिराजानंमहादेवंवा अयन्तुमच्चित्तोमत्परश्च १४

आनन्दगिरिकृतटीका

ह तस्मादिति दक्षिणोत्तरचक्षुषोर्यादृष्टिस्तस्यावाह्यविषयाद्वैमुख्येनान्तरेव सन्निपतनमवस्थकोयंनासिकाग्रंनासिकान्तंसंप्रेक्ष्येति विवक्षितमित्यर्थः तत्रैवोत्तरमपिविशेषणमनुकूलमित्याह दिशश्चेति अनवलोकयन्नासीदित्युत्तरसम्बन्धः अन्तरादिशामवलोकनमपियोगप्रतिबन्धकमिति तत्प्रतिषेधः १३

योगंयुञ्जानस्यविशेषणान्तराणिदर्शयति किञ्चेति अन्तःकरणस्यप्रशान्तिः रागद्वेषादिदोषरहित्यंतस्याश्चप्रकर्षोरागादिहेतोरपिनिवृत्तिःविगतभयत्वंसर्वकर्मपरित्यागेशास्त्रीयनिश्चयवशान्निःसन्दिग्धबुद्धित्वं भिक्षाभुक्त्यादीत्यादिशब्देनलिप्तवणस्नानशौचाचमनादिगृह्यते विशेषणान्तरमाह किञ्चेति उपसंहृत्ययोगनिष्ठोभवेदितिशेषः मनोवृत्तयुपसंहारेध्यानमपिनसिध्येत्तस्यतद्वृत्त्यावृत्तिरूपत्वा

स्वामिकृतटीका।

चित्तैकाग्र्योपयोगिनींदेहादिधारणांदर्शयन्नाह समामिति द्वाभ्यां कायइति देहस्यमध्यभागोविवक्षितःकायश्चशिरश्चग्रीवाचकायशिरोग्रीवंमूलाधारादारभ्यमर्द्धाग्रपर्यन्तंसममवक्रंनिश्चलंधारयन्स्थिरोदृढ़प्रयत्नोभूत्वेत्यर्थःस्वीयंनासिकाग्रंसंप्रेक्ष्यचार्द्धनिमीलितनेत्रइत्यर्थः इतस्ततोदिशश्चानवलोकयन्नासीतेत्युत्तरेणान्वयः १३

भाषाअनुवाद।

जिसकाचित्तप्रशान्तऔर जोनिर्भयऔब्रह्मचर्य्यव्रतमेंस्थितहोकेअपनेमनको सबतरफसेखींच मेरेमेलगायाहै औरजिसकोमहींपरमपुरुषार्थरूपकहे इष्ट हैं ऐसामत्परायणपुरुष उक्तमतयोगमेंसमाहितसावधानरहताहै १४

युञ्जन्नेवंसदात्मानंयोगीनियतमानसः शान्तिंनिर्व्वाणपरमांमत्संस्थामधिगच्छति १५

शाङ्करभाष्यं।

अथेदानींयोगफलमुच्यते युञ्जन्निति युञ्जन्समाधानंकुर्वन्नेवंयथोक्तेनविधानेनसदायोगीनियतमानसःनियतंसंयतंमानसंमनोयस्यसयंनियतमानसः सशान्तिमुपरतिंनिर्व्वाणपरमांनिर्व्वाणंमोक्षस्तत्परमानिष्ठायस्याःशान्तेःसानिर्व्वाणपरमातांनिर्व्वाणपरमांमत्संस्थांमदधीनतामधिगच्छति प्राप्नोति १५

आनन्दगिरिकृतटीका।

दित्याशंक्याह मच्चित्तइति विषयान्तरविषयमनोवृत्तिप्रसंहारेणात्यन्त्येवतन्नियमनान्नध्यानानुपपत्तिरित्यर्थः मच्चित्तत्वेनैवमत्परत्वसिद्धत्वात् मत्परइति पृथक् विशेषणमनर्थकमित्याशंक्याह भवतीति अन्तःकरणशुद्धिर्योगस्यावान्तरफलं १४

संप्रतिपरमफलकथनपरत्वेनानन्तरश्लोकमादत्ते अथेति योगस्वरूपंतदङ्गमासनमतिसत्कर्त्तृविशेषणमित्यस्यार्थस्यप्रकथनानन्तरमित्यथशब्दार्थः आत्मानं युञ्जन्निति सम्बन्धःआत्मशब्दोमनोविषयःयथोक्तोविधिरासनादिउक्तविशेषणत्रयद्योतनार्थंसदेत्युक्तंयोगीध्यायीसंन्यासीत्यर्थः मनःसंयमस्ययोगंप्रत्यसाधारणत्वं दर्शयति नियतेति शान्तिशब्दितोपरतेःसर्व्वसंसारनिवृत्तिपर्य्यवसायित्वंमत्वा विशिनष्टि निर्व्वाणेति यथोक्तायामुक्तेर्ब्रह्मस्वरूपावस्थानादनर्थान्तरत्वमाह मत्संस्थामिति मदधीनांमदात्मिकामित्यर्थः १५

स्वामिकृतटीका।

प्रशान्तेति प्रशान्तआत्माचित्तंयस्यविगताभीर्भयंयस्यब्रह्मचारिव्रते ब्रह्मचर्ये स्थितःसन् मनःसंयम्यप्रत्याहृत्यमय्येवचित्तंयस्य अहमेवपरःपुरुषार्थोयस्यसमत्परःएवंयुक्तोभूत्वातिष्ठेत् १४

भाषा अनुवाद।

अबयोगाभ्यासकरनेकाफलकहतेहैं किपूर्व्वोक्तप्रकारसेसदाआत्मामेमनकोयुक्तकरतेनियतकहे निरुद्ध है मानसअर्थात्चित्तजिसका सोईशान्तिकहे संसारनिवृत्तिकोप्राप्तहोताहै वहशान्तिकिसरूपकीहै सोकहतेहैं किजिससे परमनिर्व्वाणप्राप्तहोयहै सोईशान्तिऔरमत्संस्थाकहे मेरेरूपमेअवस्थिति सोभीउसकोमिलैहै १५

CC-0. In Public Domain. Digitized by eGangotri

नात्यश्नतस्तुयोगोऽस्तिनचैकान्तमनश्नतः नचातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन १६

शाङ्करभाष्यं।

इदानींयोगिनआहारादिनियमउच्यते नात्यश्नतइति नअत्यश्नतआत्मसंमितमन्नपरिमाणमत्तीत्यश्नतः अत्यश्नतोनयोगोऽस्तिनचएकान्तमनश्नतोयोगोऽस्तिय दुक्तबाआत्मसंमितमन्नंतदवति तन्नहिनस्तियङ्गयोहिनस्तितद्यत्कणीयोनतद वतीति श्रुतेः तस्मात् योगीनात्मसंमितादन्नादधिकंन्यूनंवाश्नीयादथवायोगिनोयो गशास्त्रेपरिपठितादन्नपरिमाणादतिमात्रमश्नतोयोगोनास्ति उक्तंहिअर्द्धमशनस्य सव्यञ्जनस्यतृतीयमुदकस्यतुवायोःसञ्चरणार्थन्तुचतुर्थमवशेषयेदित्यादिपरिमाणं तथानचातिस्वप्नशीलस्ययोगोभवति नैवचातिमात्रंजाग्रतोयोगोभवति चार्जुन १६

आनन्दगिरिकृतटीका।

आहारादीत्यादिशब्देनविहारजागरितादिचोच्यते आत्मसंमितमन्नपरिमाण मष्टग्रासादिआहारनियमेशतपथश्रुतिं प्रमाणयति यदितितदन्नंभज्यमानंयदुहवा इति प्रसिद्धाश्रुत्यानुदितमवत्यनुष्ठानयोग्यतामापाद्यानुष्ठानद्वारेणभोक्तारंरक्षति नपुनस्तदन्नमस्यानर्थायभवतीत्यर्थः यत्पुनरात्मसंमितात्भूयोधिकतरंशास्त्रमतिक्र म्यभुज्यतेतदात्मानंहिनस्तिभोक्तुरनर्थायभवति यच्चान्नंकणीयोऽल्पतरंशास्त्रनिश्च यामावाद्यते तदन्नमनुष्ठानयोग्यतादिद्वारानरक्षितुंक्षमतेतस्मादत्यधिकमत्यल्पं चान्नंयोगमारुरुक्षतात्याज्यमित्यर्थः श्रुतिसिद्धमर्थंनिगमयति तस्मादिति नेत्यादे र्व्याख्यानान्तरमाह अथवेति किंतदन्नपरिमाणंयोगशास्त्रोक्तंयदधिकंन्यूनम्वाभिव्य वहरतोयोगानुपपत्तिरित्याशंक्याह उक्तंहीति पूरयेदशनेनार्द्धंतृतीयमुदकेनतु वायोःसञ्चरणार्थायचतुर्थमवशेषयेदिति वाक्यमादिशब्दार्थः यथानात्यन्तमश्न

स्वामिकृतटीका।

योगाभ्यासफलमाह युञ्जन्नेवमिति एवमुक्तप्रकारेणसदाआत्मानंमनोयु ञ्जन्समाहितंकुर्वन्नियतंनिरुद्धंमानसंचित्तंयस्यसयोगीशान्तिंसंसारोपरमंप्राप्नोति क थंभूतांनिर्वाणंपरंप्राधंतस्थांतांमत्संस्थांमद्रूपेणावस्थितिं १५

भाषा अनुवाद।

योगाभ्यासीकोआहारशयनआदिकानियमकहतेहैं किहेअर्जुन अत्यन्तअ धिकआहारीऔरअन्तनिर हारी इनदोनोकोभीयोगजोसमाधिसोनहींहोसकती है औरअतिनिद्राकरनेवाला तथानिद्रात्यागी इनकोभीसमाधिनहींहोतीहै १६

CC-0. In Public Domain. Digitized by eGangotri

युक्ताहारविहारस्ययुक्तचेष्टस्यकर्म्मसु युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहा १७

शाङ्करभाष्यं

कथंपुनर्योगोभवतीत्युच्यते युक्तेति युक्ताहारविहारस्ययुक्तचेष्टस्याहि य तदाहारोऽन्नंविहरणंविहारःपादक्रमस्तौयुक्तौनियतपरिमाणौयस्यसयुक्ताहार विहारस्तस्ययुक्तचेष्टस्य तथान्याचयुक्तानियताचेष्टायस्यकर्म्मसु तथायुक्तस्वप्नावबोध स्ययुक्तौस्वप्नश्चावबोधश्चतौनियतकालौयस्यतस्ययुक्ताहारविहारस्यकर्मसुयुक्तस्व प्नावबोधस्ययोगिनोयोगोभवति दुःखहा दुःखानिसर्व्वाणिहन्तीति दुःखहासर्व्वसं सारदुःखक्षयकृद्योगोभवति इत्यर्थः १७

आनन्दगिरिकृतटीका।

तोऽनश्नतश्चयोगोनसम्भवति तथाऽत्यन्तस्वप्नतोजाग्रतश्चनयोगःसम्भवतीत्याह त येति १६

आहारनिद्रादिनियमविरहिणोयोगव्यतिरेकमुक्त्वातन्नियमवतोयोगान्वयं व्याचष्टे कथंपुनरित्यादिना अन्नस्यनियतत्वमर्द्धमश्नस्येत्यादिविहारस्यनियतत्वं योजनान्तरंगच्छेदित्यादिकर्म्मसुचेष्टायानियतत्वंयाङ्नियमादिरात्रौप्रथमतोदश घटिकापरिमिते कालेजागरणंमध्यतःस्वपनंपुनरपिदशघटिकापरिमिते जागरण मितिस्वप्नावबोधयोर्नियतकालत्वमेवंप्रयतमानस्ययोगिनोभवति योगस्यफलमाह दुःखहेति सर्व्वाणीत्याध्यात्मिकादिभेदभिन्नानीत्यर्थः यथोक्तयोगमन्तरेणापिस्वस्व प्नादौदुःखनिवृत्तिरस्तीतिविशिनष्टि सर्व्वेति विशुद्धविज्ञानद्वारेतिशेषः १७

स्वामि कृतटीका

योगाभ्यासनिष्ठस्याहारादिनियममाह नात्यश्नतइति द्वाभ्यां अत्यन्तमधिकं भुञ्जानस्यएकान्तप्रत्यन्तमभुञ्जानस्यापियोगःसमाधिर्नभवति तथातिनिद्राशील स्यातिजाग्रतश्चयोगोनैवास्ति १६

तर्हिकथम्भूतस्ययोगोभवतीत्यतआह युक्ताहारेति युक्तोनियताहारोविहा रश्चगतिर्यस्यकर्म्मसुकार्य्येषुयुक्तानियताचेष्टायस्ययुक्तोनियतौस्वप्नावबोधौनिद्राजा गरौयस्यतस्यदुःखनिवर्त्तकोयोगोभवति सिद्ध्यति १७

भाषा अनुवाद।

तोफेरिकैसेपुरुषकोसमाधिहोसकतीहै इसअपेक्षापरकहतेहैं कियतरू पआहारऔविहारहै जिसका तथाकर्मोमेपरिमितचेष्टाकहेव्यापारहै जिसका औरयथाउचितहै सोवनाजागनाजिसका उसीकोयोगकहे समाधिहोतीहै औ रदुखदूरकरतीहै अर्थात् संयमकरनेसेसमाधिऔसमाधिसेदुखदूरहोताहै १७

CC-0. In Public Domain. Digitized by eGangotri

यदाविनियतंचित्तमात्मन्येवावतिष्ठते निष्पृहःसर्व्वकामेभ्योयुक्तइत्युच्यतेतदा १८

शाङ्करभाष्यं।

अथाधुनाकदायुक्तोभवतीत्युच्यते यदेति यदाविनियतंचित्तंविशेषेणनियतंसंयतमेकाग्रतामापन्नंचित्तंहित्वावाह्यंचित्तमात्मन्येवकेवलेऽवतिष्ठते स्वात्मनिस्थितिंलभतइत्यर्थःनिष्पृहः सर्व्वकामेभ्योनिर्गताद्दृष्टादृष्टविषयेभ्यःस्पृहातृष्णायस्ययोगिनःसयुक्तःसमाहितइत्युच्यतेतदातस्मिन्काले १८

योगिनःसमाहितंयच्चित्तंतस्योपमोच्यते यथेति यथादीपःप्रदीपोनिवातस्थोनिवातेवातवर्जितेस्थानेस्थितोनेङ्गतेनैजतिनचलति साऽउपमाऽउपमीयतेऽनयेत्युपमायोगञ्चैश्चित्तप्रचारदर्शिभिःस्मृताचिन्तितायोगिनोयतचित्तस्यसंयतान्तःकरणस्ययुञ्जतोयोगमनुतिष्ठतआत्मनःसमाधिमनुतिष्ठतइत्यर्थः १९

आनन्दगिरिकृतटीका

सफलस्यसाङ्गस्ययोगस्योत्यनन्तरं यदाहीत्यादावुक्तकालानुवादेनयुक्तंलक्षयितुमनन्तरश्लोकप्रवृत्तिंदर्शयति अथाधुनेति विशेषेणसंयतत्वमेवसंक्षिपति एकाग्रतामिति आत्मन्येवेत्येवकारार्थंकथयति हित्वेति केवलत्वमद्वितीयत्वं तस्यात्मस्थितिंविवृणोति स्वात्मनीति चित्तस्यहिकल्पितस्यात्मैवतत्त्वं तत्पुनरन्यतःसर्व्वतोनिवारितमधिष्ठानेनिमग्नंतिष्ठतीतिभावः तस्यामवस्थायांसर्व्वेभ्योविषयेभ्योव्यावृत्तत्वेनयुक्तोव्यवह्रियतइत्याह निष्पृहइति १८

स्वामिकृतटीका।

कदानिष्पन्नयोगःपुरुषोभवतीत्यपेक्षायामाह यदेति विनियतंविशेषेणनिरुद्धंसच्चित्तमात्मन्येव यदानिश्चलंतिष्ठति तदाप्राप्तयोगइत्युच्यते १८

भाषा अनुवाद।

कौनसमयमेयोगसम्पन्नअर्थात् समाधिसिद्धहोगा सोकहतेहैं किजबपुरुषकाचित्तएकाग्रकहे अच्छीतरह सबओरमेरुककरअर्थात्वाह्यकहे बाहरकेसकलविषयोंकोछोडिकर केवलआत्मामेंनिश्चलरूपमेंलगैअर्थात् अपनेआत्मामेंस्थितिकरै औरसबमनोरथकीइच्छानरहेअर्थात्देखीसुनीजोसंसारिकविषय तिनकीकामनामेंस्पृहाकहे तृष्णानउठै तबवहयोगसिद्धकहे युक्तसमाहितकहाजाताहै सोईकहाकि यदाविनियतंचित्तमात्मन्येवावतिष्ठतेइति १८

CC-0. In Public Domain. Digitized by eGangotri

यथादीपोनिवातस्थोनेङ्गतेसोपमास्मृता योगिनोयतचित्तस्ययुञ्जतोयोगमात्मनः१९

शाङ्करभाष्यं ।

एवंयोगाभ्यासबलादेकाग्रीभूतंनिवातप्रदीपकल्पंसत् यत्रेति यत्रयस्मिन्काले उपरमते चित्तंउपरतिं गच्छति निरुद्धंसर्व्वतोनिवारितप्रचारंयोगसेवयायोगानुष्ठानेनयत्रचैवयस्मिंश्चकालेआत्मनासमाधिपरिशुद्धेनान्तःकरणेनआत्मानंपरं चैतन्यंसर्व्वतोज्योतिःस्वरूपंपश्यन्नुपलभमानःस्वेएवात्मनितुष्यति तुष्टिंभजते २०

आनन्दगिरिकृतटीका ।

उपमायोगिनश्चित्तस्थैर्य्यस्योदाहरणमित्यर्थः उपमाशब्दस्यप्रदीपविषयत्वसिद्ध्यर्थंकरणव्युत्पत्तिंदर्शयति उपमीयत इति योगिनोयथोक्तविशेषणवतश्चित्तस्थैर्य्यस्येतिशेषः १९

द्विविधःसमाधिःसंप्रज्ञातोऽसंप्रज्ञातश्चध्येयैकाकारसत्त्ववृत्तिर्भेदेनकथञ्चित् ज्ञायमानःसंप्रज्ञातःसमाधिःकथमप्यिष्टथग्ज्ञायमानासैवसत्त्ववृत्तिरसंप्रज्ञातःसामाधिरूपसामान्येनसमाधिलक्षणमभिधायासंप्रज्ञातस्यसमाधेरधुनालक्षणंविवक्षन्ना

स्वामिकृतटीका ।

आत्मैकाकारतयावस्थितस्यचित्तस्योपमानमाह यथेति वातशून्येदेशेस्थितोदीपोयथानेङ्गतेनचलतिसाउपमादृष्टान्तःकस्यआत्मविषयंयोगंयुञ्जतोऽभ्यस्यतोयोगिनो यतं नियतं चित्तं यस्यनिष्कम्पतयाप्रकाशकतयाचाचञ्चलं तच्चित्तं तद्वृत्तिष्ठतीत्यर्थः १९

भाषा अनुवाद ।

आत्माकाराकारितरूपअवस्थितचित्तकहे आत्मारूपताकोप्राप्तजोचित्त तिसकादृष्टान्तकहतेहैं किजैसेनिर्व्वातस्थानमेदीपशिखाहलचलनहींहोतीसोईउपमाकहे दृष्टान्तजानो यहकिसकादृष्टान्तहै जोपूछोतोकहतेहैं किआत्मविषयकयोगाभ्यासीयोगीपुरुषजिसकाचित्तवशीभूतहै उसीकाचित्तनिर्व्वातस्थानस्थितदीपशिखाकेसमानआत्मामेस्थिरहै यहांचित्तशब्दकाअर्थअन्तःकरणहै सोअन्तःकरणवृत्तिभेदसेचारिप्रकारकाहै सङ्कल्पात्मककहे सङ्कल्परूपअन्तःकरणकीवृत्तिकहे स्वभावकोमनकहतेहैं औरनिश्चयात्मकअन्तःकरणकीवृत्तिकोबुद्धिकहते औरअनुसन्धानकहे किसीवस्तुकेजाननेकेलिये तद्वस्तुरूपहोरहनाअनुसन्धानात्मकअन्तःकरणवृत्तिकोचित्तकहतेहैं औरअभिमानयुक्तअन्तःकरणअहङ्कारकहाजाताहै १९

CC-0. In Public Domain. Digitized by eGangotri

यत्रोपरमते चित्तंनिरुद्धंयोगसेवया यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति २०

शाङ्करभाष्यं।

किञ्च सुखमिति सुखमात्यन्तिकमत्यन्तमेवभवतीत्यात्यन्तिकंअनन्तमित्यर्थः यत्तद्बुद्धिग्राह्यंबुद्धेरेवेन्द्रियनिरपेक्षयागृह्यतइति बुद्धिग्राह्यमतीन्द्रियगोचरातीतमविषयजनितमित्यर्थःवेत्ति यदीदृशंसुखमनुभवतियत्रयस्मिन्काले नचएवअयंविद्वानात्मस्वरूपेस्थितस्तस्मात्नैवचलति तत्त्वतःतत्त्वस्वरूपान्नप्रच्यवतइत्यर्थः २१

आनन्दगिरिकृतटीका

ह एवमिति कालेसमाध्युपलक्षिते एवकारस्तुष्यतीत्यनेनसम्बध्यते चकारस्यसम्बन्धमाह यस्मिंश्चेति कालस्तुपूर्ववत्सकर्मकारकत्वेननिर्दिष्टमात्मानंतत्पदार्थत्वेन व्याचष्टे परमिति आत्मनीत्यस्यत्वंपदार्थविषयत्वमाह स्वेएवेति परमात्मानंप्रतीत्येवतद्भावेनापरोक्षीकुर्वन्नतुष्टिहेत्वभावात्तुष्यत्येवेत्यर्थःतस्मिन्कालेयोगसिद्धिर्भवतीतिशेषः २०

स्वामिकृतटीका।

यंसन्यासमितिप्राङ्मयोगंतंविद्धिपाण्डवेत्यादौ कर्म्मैवयोगशब्देनोक्तं नात्यश्नतस्तुयोगोऽस्तीत्यादौतुसमाधिर्योगशब्देनोक्तस्तत्रमुख्योयोगःकथंत्यपेक्षायांसमाधिमेवस्वपतःफलतश्चलक्षयन्सएवमुख्योयोगइत्याह यत्रेति सार्द्धैस्त्रिभिःयत्रयस्मिन्नवस्थाविशेषेयोगाभ्यासेननिरुद्धंचित्तमुपरतंभवतीति योगस्यस्वरूपलक्षणमुक्तं तथाचपातञ्जलसूत्रं योगश्चित्तवृत्तिनिरोधइतिइष्टप्राप्तिलक्षणेनफलेनतमेवलक्षयतियत्रचयस्मिन्नवस्थाविशेषेआत्मनाशुद्धेनमनसाआत्मानमेवपश्यति नतुदेहादिपश्यंश्चात्मन्येवतुष्यति नतुविषयेषुयत्रेत्यादीनांतंयक्ष्यद्भानांयोगसंज्ञितंविद्यादितिचतुर्थेनान्वयः २०

भाषा अनुवाद।

यत्सन्यासमितिप्राङ्मयोगंतद्विद्धिपाण्डव इसीअध्यायकेइसदूसरेश्लोकमेंयोगहीकोकर्म्मकहाहै औरनात्यश्नतस्तुयोगोस्ति इससोलहेंश्लोकमेंयोगशब्दसेसमाधिकहा तोइनमेंमुख्ययोगकिसकोकहैं इसअपेक्षामेंफलऔस्वरूपतथालक्षणक्रमसेसमाधिहीमुख्यहै यहसाढेतीनिश्लोकसेकहते हैं किजिसअवस्थामेंयोगाभ्याससेनिरुद्धकहेंएकाग्रचित्तहोताहै औरजिसअवस्थामे आपअपनेस्वरूपकोदेखतेऊयेसन्तुष्टहोताहै ऐसीजोसमाधिकहेचित्तवृत्तिकोएकाग्नता सोईयोगहै सोईपातञ्चलसूत्रमेंकहा कियोगश्चित्तवृत्तिनिरोधः योगचित्तवृत्तिकारोंकनाहै २०

CC-0. In Public Domain. Digitized by eGangotri

सुखमात्यन्तिकंयत्तद्बुद्धिग्राह्यमतीन्द्रियं वेत्तियत्रनचैवायंस्थितश्चलतितत्त्वतः २१
यंलब्ध्वाचापरंलाभंमन्यते नाधिकंततः यस्मिंस्थितोनदुःखेनगुरुणापिविचाल्यते २२

शाङ्करभाष्यम्।

किञ्च यंलब्ध्वेति यंलब्ध्वायमात्मलाभंलब्ध्वाप्राप्यचअपरमन्यल्लाभान्तरंततोधिकमस्तीति नमन्यते नचिन्तयति किञ्चयस्मिन्नात्मतत्त्वेस्थितोदुःखेनशस्त्रनिपातादिलक्षणेनगुरुणामहतापिनविचाल्यते २२

आनन्दगिरिकृतटीका

योगसिद्धिकालंप्रकारान्तरेणप्रकटयति किञ्चेति बुद्धिशब्दःस्वानुभवविषयइन्द्रियनिरपेक्षस्वानुभवगम्यत्वोक्तेरतीन्द्रियमिति पुनरुक्तमित्याशंक्याह अविषयेतिपदच्छेदः नचेत्यादि अपेक्षितपूरणंआत्मस्वरूपइति तस्मात्तत्त्वतइति सम्बन्धः नैवेत्येवकारसंबन्धोक्तिःचकारःसमुच्चयासम्बन्धनीयः यत्रेति पूर्ववत् सम्बन्धः २१

प्रकारान्तरेणप्रकृतंयोगंविशिनष्टि किञ्चेति आत्मलाभान्नपरंविद्यतेइतिस्मृत्याव्याचष्टे यमात्मलाभमिति लाभान्तरंपुरुषार्थभूतंतत्तस्मादात्मलाभादिति यावत् तंविद्यादित्युत्तरत्रसम्बन्धः यस्मिन्नित्याद्यवतारयति किञ्चेति अपरिपक्व

स्वामिकृतटीका।

आत्मन्येवतोषेहेतुमाह सुखमिति यत्रयस्मिन्नवस्थाविशेषे यत्तत् किमपिनिरतिशयमात्यन्तिकंनित्यंसुखंवेत्ति ननुतदाविषयेन्द्रियसम्बन्धाभावात् कुतःसुखंस्यात्तत्राह अतीन्द्रियंविषयेन्द्रियसम्बन्धातीतंकेवलंबुद्ध्यैवात्माकारयाग्राह्यंअतएवच यत्रस्थितःसंस्तत्त्वतआत्मस्वरूपान्नैवचलति २१

भाषाअनुवाद

आत्मसन्तोषकाहेतुकहतेहैं किजिसअवस्थाविशेषमे योगीजन कोईनिरतिशयकहेअत्यन्तनित्यसुखरूपका अनुभवकरतेहैं जोकहोकिउसअवस्थामेतोविषयसम्बन्धकाअभावहै तोसुखकासम्भवकैसेहोय तिसपरकहतेहैं किविषयइन्द्रियसम्बन्धसेरहितजोकेवलआत्माकाररूपबुद्धिसेग्रहणकेयोग्यहै इसीसेउसमेस्थितहो योगीआत्मस्वरूपसेविचलित नहींहोते हैं २१

उसीकाअचलत्वप्रतिपादनकरतेहैं किआत्मआनन्दसुखजोआत्मस्वरूपलाभ लक्षितकहेपायकरिकेऔरलाभकैरिउससेअधिक नहींगिनते अर्थात् बडेदुखभीगीतउष्णआदिउसकाकुछनहींकरसकते हैं औरकाव्यालेखाहै २२

CC-0. In Public Domain. Digitized by eGangotri

तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितं सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा२३

शाङ्करभाष्यं।

यत्रोपरमतेइत्याद्यारभ्ययावद्भिर्विशेषणैर्विशिष्टआत्मावस्थाविशेषोयोग उक्तः तमिति तंविद्यात्विजानीयात्दुःखसंयोगवियोगंदुःखैःसंयोगोदुःखसंयोगस्तेनवियोगोदुःखसंयोगवियोगस्तंदुःखसंयोगवियोगंयोगइत्येवसंज्ञितंविपरीतलक्षणेनविद्यात्विजानीयादित्यर्थः योगफलमुपसंहृत्यपुनरन्वयारम्भेणयोगस्यकर्त्तव्यतोच्यते निश्चयानिर्वेदयोर्योगस्यसाधनविधानार्थंसयथोक्तफलोयोगोनिश्चयेनाध्यवसायेनयोक्तव्योऽनिर्विन्नचेतसाननिर्विण्णं अनिर्विण्णं तच्चेतस्तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः २३

आनन्दगिरिकृतटीका

योगेयथादर्शितेनदुःखेनप्रच्याव्यतेनचैवंविचाल्यते यस्मिंस्थितोयोगीतंयोगंविद्यादिति पूर्ववत् २२

तंविद्यादित्याद्यपेक्षितं पूरयन्नवतारयति यत्रेति तमित्यात्मावस्थाविशेषं परामृशति दुःखसंयोगस्यवियोगोवियोगसंज्ञितोयुज्यते सकथंयोगसंज्ञितःस्यादित्याशंक्याह विपरीतेति इयंहियोगावस्थासमुत्खातनिखिलदुःखभेदेति दुःखसंयोगाभावोयोगसंज्ञामर्हतीत्यर्थः उपसंहृतयोगफले किमितिपुनर्योगस्यकर्त्तव्यत्वमुच्यतेतत्राह योगफलमिति प्रकारान्तरेणयोगस्यकर्त्तव्योपदेशारम्भोवान्वारम्भःयोगंयुञ्जानस्तत्त्वणादुक्तांससिद्धिमलभमानःसंशयानोविवर्त्तेतेति तन्निवृत्त्य

स्वामिकृतटीका।

अचलत्वमेवोपपादयति यमिति यतोयमात्मस्वरूपंलब्ध्वाततोऽधिकंलाभं नमन्यते तस्यैवनिरतिशयसुखत्वात् यस्मिंश्चस्थितोमहतापिशीतोष्णादिदुःखेनन विचाल्यते नाभिभूयते एतेनानिष्टनिवृत्तिफलेनापियोगस्यलक्षणमुक्तंद्रष्टव्यं २२

भाषा अनुवाद।

ऐसोदुखसंयोगकेअभावअवस्थाविशेषको योगसंज्ञाजानो दुखशब्दसेविषयसुखजोहैं उनकोग्रहणकरतेहैं अर्थात्जिसअवस्थामे दुखकालेशमात्रभीनहींहै सोईअवस्थायोगहै इससेथिरचित्तहोकरनिश्चयसे योगअभ्यासकरनाअवश्यहीकर्त्तव्यहै निर्वेदशब्दकाअर्थतो यत्नकरनेमेशैथिल्यहैं सोईकहाकि अनिर्विन्नचित्तहोय अर्थात् शैथिल्यछोडि यत्नपूर्वकअभ्यासकरैविषयसुखभीदुखहै २३

CC-0. In Public Domain. Digitized by eGangotri

संकल्पप्रभवान्कामांस्त्यक्त्वासर्व्वानशेषतः मनसैवेन्द्रियग्रामंविनियम्यसमन्ततः२४

शाङ्करभाष्यं।

किञ्च सङ्कल्पेति सङ्कल्पप्रभवान्सङ्कल्पःप्रभवोयेषां कामानां तेसङ्कल्पप्रभवाःकामास्तान्कामांस्त्यक्त्वापरित्यज्यसर्व्वानशेषतोनिर्लेपेन किञ्चमनसैवविवेकयुक्तेनइन्द्रियग्राममिन्द्रियसमुदायं विनियम्यनियमनंकृत्वा समन्ततःसमन्तात् २४

आनन्दगिरिकृतटीका।

थंपुनःकर्त्तव्योपदेशोऽर्थवानिति मत्वाह निश्चयेति तयोःसाधनत्वविधानमेवाक्षरयोजनयासाधयति सयथेति इहजन्मनिजन्मान्तरेवासेत्स्यतीत्यध्यवसायेनयोक्तव्यःकर्त्तव्यः २३

इतश्चयोगस्यकर्त्तव्यत्वमितिप्रतिजानीते किञ्चेति केनक्रमेणकर्त्तव्यत्वमित्यपेक्षायामह सङ्कल्पेति सङ्कल्पःशोभनाध्यासः 'सर्वानित्युक्त्वापुनरशेषतइति पुनरुक्तिरित्याशंक्याह निर्लेपेनेति यथाशेषोनभवति तथासर्वेषां कामानां शोभनाध्यासाधीनानां त्यागस्ययोगानुष्ठानशेषत्ववद्विवेकयुक्तेनमनसाकरणसमुदायस्यसर्वतोनियमनमपितच्छेषत्वेनकर्त्तव्यमित्याह किञ्चेति २४

स्वामिकृतटीका।

तमिति यएवंभूतोऽवस्थाविशेषस्तंदुःखसंयोगवियोगयोगसंज्ञितंविद्यात्दुःखशब्देनदुःखमिश्रितंवैषयिकंसुखमपिगृह्यते दुःखस्यसंयोगेनसंस्पर्शमात्रेणापिवियोगोयस्मिंस्तमवस्थाविशेषंयोगसंज्ञितं योगशब्दवाच्यं जानीयात् परमात्मनिचेत्तस्ययोजनंयोगःयद्वादुःखस्यसंयोगेन वियोगएवशूरेकातरशब्दवद्विरुद्धलक्षणयायोगउच्यते कर्म्मणितुयोगशब्दस्तदुपायत्वादौपचारिकइतिभावःयस्मादेवंमोक्षफलोयोगस्तस्मात्सएवयत्नतोऽभ्यसनीयइत्याह सइति सार्द्धेन सयोगोनिश्चयेनशास्त्राचार्य्योपदेशजनितेनयोक्तव्योऽभ्यसनीयःयद्यपिशीघ्रंनसिध्यति तथाप्यनिर्विण्णेननिर्वेदरहितेनचेतसायोक्तव्यःदुःखबुद्ध्याप्रयत्नशैथिल्यंनिर्वेदः २३

भाषा अनुवाद

सङ्कल्पसेप्रभवकहे प्रगटजो योगकेप्रतिकूलकहेविरोधी बाधकरूप सकल कामना उनकोवासनासमेत त्यागकरिकेविषयोंके दोषदेखताऊआ पुरुष मनके द्वारा सर्वत्रधावमानइन्द्रियोंको सबओरसेदमनकरिके योगाभ्यासकरै अथवा सर्वत्रधावतीऊई इन्द्रियोंको मनहीसेरोंककर योगकरै यहऊढश्लोकसेकहा २४

CC-0. In Public Domain. Digitized by eGangotri

शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया आत्मसंस्थंमनःकृत्वानकिंचिदपिचिन्तयेत् २५

शाङ्करभाष्यं

शनैरिति शनैःशनैर्नसहसाउपरमेत् उपरतिं कुर्य्यात् कयाबुद्ध्याकिंविशिष्टयाधृतिगृहीतयाधृत्याधैर्य्येणगृहीतयाधैर्य्येणयुक्तयेत्यर्थःआत्मनिसंस्थितं आत्मैवसर्वंनततोऽन्यत् किञ्चिदस्तीत्येवमात्मसंस्थंमनःकृत्वानकिञ्चिदपिचिन्तयेत् एषयोगस्यपरमोविधिः तत्रैवमात्मसंस्थंमनःकर्त्तुं प्रवृत्तोयोगी २५

आनन्दगिरिकृतटीका

कामत्यागद्वारेणेन्द्रियाणिप्रत्याहृत्यकिंकुर्यादितिशङ्कितारंप्रत्याह शनैःशनैरिति सहसाविषयेभ्यःमकाशादुपरमं मनसोनस्वास्थ्यंसम्भवतीत्यभिप्रेत्याह नसहसेति तत्रसाधनंधैर्ययुक्तबुद्धिरित्याह कयाइत्यादिना भूम्यादीरव्याकृतपर्यन्ताःप्रकृतीरष्टौपूर्वंपूर्वंधारणंकृत्वोत्तरक्रमेणप्रविलापयेदिति भावः अव्यक्तमात्मनिप्रविलाप्यआत्ममात्रनिष्ठंमनोविधायचिन्तयितव्याभावादति स्वस्थोभवेदित्याह आत्मेति तत्रसंस्थितिमेवमनसोविशृणोति आत्मैवेति योगविधिमुपक्रम्यकिमिदमुक्तमित्याशंक्याह एषइति यन्मनसोनैश्चल्यमिति शेषः ननुमनसःशब्दादिनिमित्तानुरोधेनरागद्वेषवशादत्यन्तचञ्चलस्यास्थिरस्यतत्रतत्र स्वभावेनप्रवृत्तस्यकुतोनैश्चल्यंनैश्चिन्त्यञ्चेति तत्रेति योगप्रारम्भःसप्तभ्यर्थएवशब्देनमनसैवेत्यादिउक्तप्रकारोगृह्यते २५

स्वामिकृतटीका

किञ्च सङ्कल्पेति सङ्कल्पात्प्रभवोयेषांतान्योगप्रतिकूलान्सर्वान्कामानशेषतःसवासनास्त्यक्त्वामनसैवविषयदोषदर्शिना सर्वतःप्रसरन्तमिन्द्रियसमूहं विशेषेणनियम्ययोगोयोक्तव्यइति पूर्वेणान्वयः २४

भाषाअनुवाद।

औरजोमन पूर्वजन्मकृतकर्म्मकेसंस्कारसे चलविचलहोय तौभीधारणाजोधैर्यरूपबुद्धिशक्ति तिससेथिरकरैयहकहते हैं किधारणासेवशीभूतजोबुद्धि तिससेमनकोआत्मामेंअच्छीतरहस्थापनकरिके उपरमकरैअर्थात् फेरिनकुछचिन्तनकरै परन्तुयहभीसनैःसनैःकहेधीरेधीरेधैर्यवती बुद्धिकेद्वारा क्रमसेमनकोआत्मामेंथिरकरै सहसानकरै अर्थात् जल्दी नकरै तोआत्मास्वरूपआनन्दपावे २५

CC-0. In Public Domain. Digitized by eGangotri

यतोयतोनिश्चलति मनश्चञ्चलमस्थिरं ततस्ततोनियम्यैतदात्मन्येववशंनयेत् २६

शाङ्करभाष्यं

यतइति यतोयतोयस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चलति निर्गच्छति स्वभावदोषान्मनश्चञ्चलमत्यर्थंचलमतएवास्थिरंततस्ततस्तस्माच्छब्दादेर्निमित्तान्नियम्यतत्तन्निमित्तंयाथात्म्यनिरूपणेनाभासीकृत्यवैराग्यभावनयाचैतन्मनआत्मन्येववशंनयेत् आत्मवश्यतामापादयेत् २६

एवंयोगाभ्यासबलाद्योगिनआत्मन्येवप्रशाम्यति मनःप्रशान्तेति प्रशान्तमनसंप्रकर्षेणशान्तंमनोयस्यसप्रशान्तमनास्तंप्रशान्तमनसंह्येनंयोगिनंसुखमुत्तमंनिरतिशयमुपैत्युपगच्छति शान्तरजसंप्रक्षीणमोहादिक्लेशरजसमित्यर्थःब्रह्मभूतंजीवन्मुक्तंब्रह्मैवसर्वंइत्येवंनिश्चयवन्तंब्रह्मभूतमकल्मषंधर्माधर्मादिवर्जितं २७

आनन्दगिरिकृतटीका ।

स्वाभाविकोदोषोमिथ्याज्ञानाधीनोरागादिःशब्दादेर्मनसोनियमनंकथमित्याशंक्याह तत्तन्निमित्तमिति याथात्म्यनिरूपणंचक्षिण्वादुःखसंभिन्नत्वाद्यालोचनंतेनतत्रतत्र वैराग्यभावनयातत्तदाभासीकृत्य ततस्ततोनियम्यैतन्मनइतिसम्बन्धः २६

स्वामिकृतटीका ।

यदितुप्राक्तनकर्म्मसंस्कारेणमनोविचलेत्तर्हिधारणयास्थिरीकुर्य्यादित्याह शनैरिति धृतिर्धारणातयागृहीतयाबुद्ध्याआत्मसंस्थमात्मन्येवसम्यक्स्थितं निश्चलंमनःकृत्वाउपरमेत् तत्तुशनैरभ्यासक्रमेणनतुसहसाउपरमस्वरूपमाह न किञ्चिदपिचिन्तयेत्निश्चलेमनसिस्वयमेवप्रकाशमानपरमानन्दनिर्वृतोभूत्वाआत्मध्यानादपिनिवर्त्तेतइत्यर्थः २५

एवमपिरजोगुणवशाद्यदिमनःप्रचलेत्तर्हिपुनःप्रत्याहारेणवशीकुर्य्यादित्याह यतोयतइति स्वभावतश्चञ्चलंधार्य्यमाणमप्यस्थिरंमनोयंयंविषयंप्रति निर्गच्छति ततस्ततःप्रत्याहृत्य आत्मन्येवस्थिरंकुर्य्यात् २६

भाषाअनुवाद ।

फिरिभीजोरजोगुणवशते मनविचलितहोय तोफेरिउसकोअपनेवशकरनाय हकहतेहैं किस्वभावहीसेचञ्चलमनधारणाकीइच्छाकरतेभीजोचञ्चलहोयतो जिसजिसविषयमेंगमनकरै उसीउसीविषयसेखैञ्चिकरिआत्माहीमेंथिरकरै २६

CC-0. In Public Domain. Digitized by eGangotri

प्रशान्तमनसंह्येनंयोगिनंसुखमुत्तमं उपैतिशान्तरजसंब्रह्मभूतमकल्मषं २७
युञ्जन्नेवंसदात्मानंयोगीविगतकल्मषः सुखेनब्रह्मसंस्पर्शमत्यन्तंसुखमश्नुते २८

शाङ्करभाष्यं।

युञ्जन्निति युञ्जन्नेवंयथोक्तेनक्रमेणयोगीयोगान्तरायवर्जितःसदासर्व्वदात्मानंयुञ्जन्विगतकल्मषोविगतपापः सुखेनानायासेनब्रह्मसंस्पर्शं ब्रह्मणापरेण संस्पर्शोयस्यतद्ब्रह्मसंस्पर्शंसुखमत्यन्तमुत्कृष्टं सुखं निरतिशयंसुखमश्नुतेव्याप्नोति २८

आनन्दगिरिकृतटीका।

मनसोवशीकरणेनोपशमेकिंस्यादित्याह एवमिति योगाभ्यासोविषयविवेकद्वारामनोनिग्रहाद्यावृत्तिःप्रशान्तमात्मन्येवप्रलीनमितियावत् मनस्तद्वृत्त्योरभावे स्वरूपभूतसुखाविर्भावस्यस्वाभाद्यौप्रसिद्धिंद्योतयितुं हिशब्दः मोहादिक्लेशप्रतिबन्धाद्योगिनियथोक्तसुखाप्राप्तिमाशंक्यमनोविलयमुपेत्यपरिहरति प्रशान्तेति तस्यास्मदादिविलक्षणत्वमाह ब्रह्मभूतमिति अस्मदादेरपिस्वतोब्रह्मभूतत्वेनतुल्यं जीवन्मुक्तत्वमित्याशंक्याह ब्रह्मैवेति धर्म्माधर्म्मप्रतिबन्धादयुक्तायथोक्तसुखप्राप्तिरित्याशंक्योक्तं अकल्मषमिति २७

स्वामिकृतटीका।

एवंप्रत्याहारादिभिःपुनःपुनर्मनोवशीकुर्वन्तं रजोगुणक्षयेसति योगसखंप्राप्नोतीत्याह प्रशान्तेति एवमुक्तप्रकारेणशान्तरजोयस्यतंअतएवप्रशान्तंमनोयस्यतमेनं निष्कल्मषं ब्रह्मत्वं प्राप्तं योगिनमुत्तमं सुखं समाधिसखं स्वयमेवोपैति प्राप्नोति २७

भाषा अनुवाद।

इसप्रकारमनऔइन्द्रीवशकारीपुरुषको रजोगुणकीक्षयहोनेसे परेयोगसुख प्राप्तहोताहै सोईकहतेहैं किपूर्वोक्तरीतिसे जिसकारजोगुणनाशभया औअच्छीतरहमनभीशान्तभयाहै सोईपापरहितप्रक्षीणमोह तथाब्रह्मभावकोप्राप्त योगी उत्तमसमाधिसुखको अनायासपावताहै २७

अबयोगीजनकीकृतार्थताकहतेहैं किइसीप्रकारसर्वदामनवशीभूतकारीपुरुष जिसकासम्पूर्णपापदूरभयाहै सोईयोगीअनायासब्रह्मसंस्पर्शअर्थात्अविद्यानिवृत्तिकारी जोप्रत्यक्षब्रह्मज्ञान सर्वोत्तमसुख सोपावतेअर्थात्जीवन्मुक्तहोतेहैं२८

CC-0. In Public Domain. Digitized by eGangotri

सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः २९

शाङ्करभाष्यं

इदानींयोगस्ययत्फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत्प्रदर्श्यते सर्वेति सर्वभूतस्थंसर्वेषु भूतेषु स्थितंस्वमात्मानंसर्वभूतानि चात्मनि ब्रह्मादीनि स्तम्बपर्यन्तानिच सर्वभूतान्यात्मन्येकतां गतानि ईक्षतेपश्यति योगयुक्तात्मासमाहितान्तःकरणःसर्वत्रसमदर्शनःसर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु समं निर्विशेषंविक्रियारहितं ब्रह्मात्मैकत्वविषयं दर्शनंज्ञानंयस्य ससर्वत्रसमदर्शनः२९

आनन्दगिरिकृतटीका।

उक्तंसुखंयोगिनोभवतीत्युक्तंतदेवस्फुटयति युञ्जन्निति क्रमोयथोक्तोमनसेन्द्रियग्राममित्यादि योगान्तरायोरागद्वेषादिसदात्मानं युञ्जन्निति सम्बन्धः २८

पापपदमुपलक्षणंपुण्यस्यापिसंस्पर्शस्तादात्म्यैकरसंउत्कर्षाविषयासंस्पर्शोयोगमनुतिष्ठतोब्रह्मभूतस्य सर्वानर्थनिवृत्तिनिरतिशयसुखप्राप्तिलक्षणोद्विविधोमोक्षो हेतुनाकेनस्यादिति शङ्कमानंप्रत्याह इदानीमिति स्वमात्मानमीक्षतइति सम्बन्धः सर्वभूतान्यपि तद्विशेषणत्वेनपश्यति चेन्नशुद्धस्तुज्ञानमिति नाविद्यानिवृत्तिरित्याशंक्याह सर्वभूतानीति उक्तेदर्शनेचित्तसमाधानमुपायंदर्शयति योगेति विषमेषु उपाधिषु तदनुरोधाद्विषममेवदर्शनं उपदर्शितदर्शनप्रतिबन्धकं प्रत्युदस्यति सर्वत्रेति २९

स्वामिकृतटीका।

ततश्चकृतार्थोभवतीत्याह युञ्जन्निति एवमनेनप्रकारेणसर्व्वदाआत्मानंमनो युञ्जन्वशीकुर्वन् विशेषेण सर्वात्मनाविगतं कल्मषंयस्य सयोगीसुखेनानायासेन ब्रह्मणः संस्पर्शोऽविद्यानिवर्त्तकः साक्षात्कारस्तदेवात्यन्तं सर्वोत्तमं सुखमश्नुते जीवन्मुक्तोभवतीत्यर्थः २८

भाषा अनुवाद।

ब्रह्मसाक्षात्काररूपअपरोक्षज्ञानकैसाहोता सोदेखावतेहैं कियोगयुक्तात्मा पुरुष ब्रह्मसेलेस्थावरपर्यन्तमे समदर्शीसर्वभूतकहे प्राणीमात्रमे अपनेकोदेखता औरयावत्जीवोंकोभी अपनेमेदेखताहै अर्थात् अविद्याकृतदेहादिभेद दूरहो ब्रह्ममयज्ञानवान सर्वत्रसमदर्शीहोताहै अर्थात् ईश्वरछोडऔरनहींदेखता २९

CC-0. In Public Domain. Digitized by eGangotri

योमांपश्यतिसर्व्वत्रसर्व्वञ्चमयिपश्यति तस्याहंनप्रणश्यामिसचमेनप्रणश्यति ३०

शाङ्करभाष्यं।

एतस्यात्मैकत्वदर्शनस्य फलमुच्यते योमामिति योमांपश्यति वासुदेवंसर्व्वात्मानंसर्व्वत्रसर्व्वेषुभूतेषुपश्यति सर्व्वञ्चब्रह्मादिभूतजातंमयिसर्व्वात्मनिपश्यतितस्यैवमात्मकत्वदर्शिनःअहमीश्वरोनप्रणश्यामिनपरोक्षतांगमिष्यामि सचमेनप्रणश्यतिसचविद्वान्मेममवासुदेवस्यनप्रणश्यति नपरोक्षोभवति तस्यचममचैकात्मकत्वात् स्वात्माहिनामात्मनःप्रियएवभवति ३०

आनन्दगिरिकृतटीका।

उक्तस्यैकत्वज्ञानस्यफलविकल्पत्वशङ्कांनिराचिकीर्षन्नयति एतस्येति तत्रैकत्वदर्शनमनुवदति योमामिति तत्फलमिदानीमुपन्यस्यति तस्येति ज्ञानानुवादभागंविभजतेयोमामितितत्फलोक्तिभागंव्याचष्टे तस्यैवमितिअनेकत्वदर्शिनोपीश्वरोनित्यत्वान्नप्रणश्यतीत्याशंक्याह नेति अहंपरमानन्दोनतंप्रति परोक्षोभवामीत्यर्थः सचेत्यादिव्याचष्टे विद्वानिति विद्वानिवाविद्वानीश्वरस्यननश्यतीत्याशंक्योक्तं नेत्यादिना अविदुषश्चस्वरूपेणसतोपिव्यवहितत्वादविद्ययानष्टप्रायतेत्यर्थः ईश्वरस्यविदुषश्चपरस्परमपरोक्षत्वेहेतुमाह तस्यचेति आत्मैकत्वेपिकथंमिथोऽपरोक्षत्वंतत्राह स्वात्मेति ३०

स्वामिकृतटीका।

ब्रह्मसाक्षात्कारमेवदर्शयति सर्वभूतस्थमिति योगेनाभ्यस्यमानेनयुक्तात्मासमाहितचित्तःसर्वत्रसमंब्रह्मैवपश्यतीति तथासस्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यंसर्वभूतेषु ब्रह्मादिस्थावरान्तेष्ववस्थितं पश्यति तानिचआत्मन्यभेदेनपश्यति २९

एवंभूतात्मज्ञानेचसर्वभूतात्मतयाभदुपासनंमुख्यकारणमित्याह योमामितिमांपरमेश्वरंसर्वत्रभूतमात्रेयःपश्यति सर्वंचप्राणिमात्रंमयियःपश्यति तस्याहंनप्रणश्यामिअदृश्योनभवामि सचममादृश्योनभवति प्रत्यक्षोभूत्वाकृपादृष्ट्यातंविलोक्यानुगृह्णामीत्यर्थः ३०

भाषा अनुवाद।

अबपूर्वोक्तज्ञानीको जोफल होतासोकहते हैं किसाक्षात्परमेश्वरजोमैतिसको यावद्वस्तमात्रसबमें औरसकलजोकुछहै सोमेरेमे जोदेखताहै तोउसकोहम अदृश्यनहींहोते औरहमकोवहभीअदृश्यनहीहोताअर्थात् हमप्रत्यक्षहोयकर कृपादृष्टिसेउसपरअनुग्रहकरतेहैं ३०

CC-0. In Public Domain. Digitized by eGangotri

सर्व्वभूतस्थितंयोमांभजत्येकत्वमास्थितः सर्व्वथावर्त्तमानोपिसयोगीमयिवर्त्तते ३१

शाङ्करभाष्यं ।

यस्माच्चाहमेवससर्व्वात्मैकत्वदर्शीइत्येतत्पूर्व्वश्लोकार्थंसम्यग्दर्शनमनूद्य तत्फलंमोक्षोभिधीयते सर्व्वेति सर्व्वथासर्व्वप्रकारैर्व्वर्त्तमानोपिसम्यग्दर्शीयोगीमयिवैष्णवेपरमेपदेवर्त्तते नित्यमुक्तएवसःनमोक्षप्रतिबंधेनचित् प्रतिबध्यतइत्यर्थः ३१

किञ्चान्यत् आत्मेति आत्मौपम्येन आत्मास्वयमेवउपमीयत इति उपमातस्याः उपमायाः भावआत्मौपम्यं तेनआत्मौपम्येनसर्व्वत्रसर्व्वभूतेषु समंतुल्यंपश्यति योऽर्जुन सचकिंसमंपश्यतीत्युच्यते यथाममसुखमिष्टं तथासर्व्वप्राणिनां सुखमनुकूलं वाग्रूप्यार्थं यदिवायच्चदुःखंममप्रतिकूलमनिष्टं यथातथासर्व्वप्राणिनां दुःखमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुखदुःखेअनुकूलप्रतिकूले तुल्यतयासर्वभूतेषु समंपश्यति नकस्यचित् प्रतिकूलमाचरत्यहिंसकइत्यर्थः यएवमहिंसकः सम्यग्दर्शननिष्ठः सयोगीपरमउत्कृष्टोमतोऽभिप्रेतः सर्व्वयोगिनां मध्ये ३२

आनन्दगिरिकृतटीका ।

विद्वदीश्वरयोरेकत्वानुवादेनविद्याफलंविष्टणोति यस्माच्चेति तस्मादेकदर्शनार्थंप्रयतितव्यमिति शेषः पूर्व्वार्द्धेनानूद्योत्तरार्द्धेनफलविधिरिति मत्वाह इत्येतदिति रागादिरहितस्ययमनियमादिसंस्कारवतःस्वैरप्रवृत्त्यसम्भवेपि तामङ्गीकृत्यज्ञानंस्तौति सर्व्वथेति प्रतिभासतेपियथेष्टचेष्टाङ्गीकारेकुतोज्ञानवतोनित्यमुक्तत्वंप्रातीतिकदुराचारप्रतिबन्धादित्याशंक्याह नमोक्षमिति ३१

स्वामिकृतटीका ।

नचैवंभूतोविधिकिङ्करःस्यादित्याह सर्व्वस्थितमिति सर्व्वभूतेषुस्थितंनामाभेदमास्थितआश्रितोयोमजति सयोगीज्ञानीसन्सर्व्वथाकर्म्मपरित्यागेनापिवर्त्तमानोमय्येववर्त्ततेमुच्यते नतुभ्रश्यतीत्यर्थः ३१

भाषा अनुवाद ।

एकभूतपुरुष विधिकहे कर्मकेअधीननहींहै सोकहते हैं किसर्व्वभूतमेवर्त्तमानजोमै तिसकोएकबुद्धिकहे एकमोहिंछोडऔरबुद्धिनहींहैजिसकेसो मेरेही कोआश्रयकरिकेभजताहै सोयोगीतत्त्वज्ञानीसकलकर्म्मपरित्यागकरिकेसर्व्वथावर्त्तमानकहे जीवितदशामेभी मेरेमेप्राप्तहै अर्थात्सायुज्यगतिकोप्राप्तहै ३१

CC-0. In Public Domain. Digitized by eGangotri

आत्मौपम्येनसर्व्वत्रसमंपश्यतियोऽर्जुन सुखंवायदिवादुःखंसयोगीपरमोमतः ३२

शाङ्करभाष्यं।

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसम्पादतामालक्ष्य शुश्रूषुः ध्रुवंतत्प्राप्त्युपायमर्जुनउवाच योयमिति योयं योगस्त्वयाप्रोक्तःसाम्येनसमत्वेन हे मधुसूदन एतस्य योगस्याहं नपश्यामि नोपलभे चञ्चलत्वान्मनसः किंस्थिरा मचलांस्थितिंप्रसिद्धमेतत् ३३

आनन्दगिरिकृतटीका

स्वैराचरणस्याप्रतिबन्धकत्वकथनात् परपीड़नस्य योगिनःसम्यग्दर्शनंप्रत्यप्र तिबन्धकत्वप्रसक्तावुक्तं किञ्चेति अन्यदपि किञ्चिदुच्यते परमयोगिनोनिर्द्देशद्वा रायोगमाहात्म्यमित्यर्थः उपमैवौपम्यमात्माच तदौपम्यञ्चतेनसर्व्वभूतेषु यःस मंपश्यतीत्युक्तं तदेवसमदर्शनं प्रश्नपूर्व्वकं विवृणोति किमित्यादिना विकल्पार्थत्वं वारयति वाशब्दइति उपदर्शितसमदर्शनफलमभिलषति नकस्यचिदिति किम पेक्षया तस्यपरमत्वंतत्राह सर्व्वेति ३२

मनश्चंचलमस्थिरमित्युपन्यस्य निर्विशेषेचित्तस्थैर्यंदुःशक्यमिति मन्वानस्तदुपायबुभु त्सया पृच्छतीति प्रश्नमुत्थापयति एतस्येति तत्प्राप्त्युपायंशुश्रूषुरिति मन्वानः मनश्चंचलत्वेपि तन्निग्रहद्वारायोगस्थैर्य्यं सम्पाद्यतामित्याशंक्याह एतस्येति प्रसि द्धमिति सम्बन्धः ३३

स्वामिकृतटीका।

एवञ्चमां भजतां योगिनांमध्येसर्व्वभूतानुकम्पीश्रेष्ठइत्याह आत्मौपम्येनेति आत्मौपम्येन स्वसादृश्येन यथाममसुखंप्रियंदुःखञ्चाप्रियंतथान्येषामपीति सर्व्व त्रसमंपश्यन्सुखमेवसर्व्वेषायोवाञ्छति नतुकस्यापिदुःखंसयोगीश्रेष्ठोममाभिमत इत्यर्थः ३२

भाषा अनुवाद।

और ऐसे योगीजनोंकेबीचमेंजोमेंपरअनुग्रहकरनेवालाश्रेष्ठहै सोकहते हैं किहेअर्जुन जोअपनीउपमाकहे औरसबमेंभी अपनेसमानसुखयादुखतथाप्रि यअप्रियदेखताहै औरसबकोभीसुखकीइच्छाकरताऔदुखनहींदेखसकताहै सोईयोगीयोगीजनोंकेबीचमेंश्रेष्ठहै ३२

CC-0. In Public Domain. Digitized by eGangotri

अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन
एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम् ३३
चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ३४

शाङ्करभाष्यं

चञ्चलमिति चञ्चलं हि मनः कृष्ण इति कृषतेर्विलेखनार्थस्य रूपं भक्तजन पापादिदोषाकर्षणात् कृष्ण हि यस्मान्मनः चञ्चलं नकेवलमत्यर्थं चञ्चलं प्रमाथि चप्रमथनशीलंप्रमथ्नाति शरीरमिन्द्रियाणिचविक्षिपति परवशीकरोति किञ्च बलवत्प्रबलं नकेनचिन्नियन्तुं शक्यंदुर्निवारत्वात् किञ्चदृढंतन्तु नागवदच्छेद्यंतस्यै वम्भूतस्यमनसोहं निग्रहं रोधं मन्येवायोरिव यथावायोर्दुष्करोनिग्रहस्तथोपिमन सोदुष्करंमन्यइत्यभिप्रायः ३४

आनन्दगिरिकृतटीका।

मनसश्चञ्चलत्वेपि कृष्णपदपरिनिष्पत्तिप्रकारंसूचयति कृष्णइतीति कथं कर्षकत्वमाप्तकामस्य भगवतःसम्भवतीत्याशंक्याह भक्तेति ऐहिकामुष्मिकसर्वस म्पदामाकर्षणशीलत्वाच्चेति द्रष्टव्यं प्रमथ्नातिक्षोभयति तदेवक्षोभकत्वंप्रकट

स्वामिकृतटीका

उक्तलक्षणस्य योगस्यासम्भवंमन्वानोऽर्जनउवाच योऽयमिति साम्येनमनसो लयविक्षेपशून्यतया केवलात्माकारावस्थानेन योऽयं योगस्त्वया प्रोक्तएतस्य योग स्यस्थिरां दीर्घकालां स्थितिं नपश्यामि मनसश्चंचलत्वात् ३३

भाषा अनुवाद।

ऐसेयोगकेलक्षणभगवानसेसुनिकरि असम्भवजानिअर्जुनकहतेहैं किमन कोलयऔविक्षेपशून्यकरि केवलआत्मामेजोअवस्थानकहै समभावसेमनका थिरहोरहना रूपयोग जोआपनेकहा सोहेमधुसूदनमनकोचञ्चलतईकेहेतुसे हमकोइसयोगकीदीर्घकालअवस्थितिकहे थिररहनानहीं देखपडताहै ३३

औरबहीचञ्चलताकोविस्तारकरिकहतेहैं किहेकृष्णयहमनस्वभावहीसे चञ्चलऔप्रमाथीअर्थात्देहइन्द्रियोंकोविक्षिप्तकारी औरबलवानकहेविचारसे इसकाजीतनाअसाध्यहै तथादृढकहे विषयवासनासेबद्ध इसमनकोविषयोंसेभि न्नकरनाअतिदुष्करकहेकठिनहै इससेजैसेआकाशमेंवायुकोनिश्चलकरनाकठि नतैसेइसमनकाभी ग्रहकहे थिरकरनाहमकोअतिअसाध्यबोधहोताहै ३४

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच असंशयंमहाबाहोमनोदुर्निग्रहंचलं अभ्यासेनतुकौन्तेय वैराग्येणचगृह्यते ३५

शाङ्करभाष्यं।

श्रीभगवानुवाच एवमेतद्यथात्ववीषिअसंशयंनास्तिसंशयोमनोदुर्निग्रहंचञ्चलमित्यत्र हेमहाबाहो किन्तुअभ्यासेनतुअभ्यासोनामचित्तभूमौकस्याञ्चित् समानप्रत्ययावृत्तिचित्तस्यवैराग्येणचगृह्यते वैराग्यंनामदृष्टादृष्टेषुभोगेषुदोषदर्शनाभ्यासात् वैतृष्णंविषयेषुवितृष्णांवैराग्यं तेनचवैराग्येणगृह्यते विक्षेपरूपःप्रचारश्चित्तस्यैवंतन्मनोगृह्यते निरुध्यतइत्यर्थः ३५

आनन्दगिरिकृतटीका

यति विक्षिपतीति दुर्निवारत्वमभिप्रेताद्विषयादाकृष्टुमशक्यत्वं विशेषणान्तरमाह किञ्चेति अच्छेद्यत्वंविशेषणान्तरमाह किञ्च दृढमिति तन्तुनागोवरूथपाशशब्दितोजलचारीग्रदार्थोऽत्यन्तदृढतयाछेत्तुमशक्यत्वेनप्रसिद्धोविवक्षितः वायोरित्युक्तंव्यनक्ति यथेति ३४

प्रश्नमङ्गीकृत्यप्रतिवचनमुत्थापयति श्रीभगवानिति कुतसंशयराहित्यंतत्राह मनइति कथंतर्हिमनोनिरोधोभवति तत्राह किन्त्विति अभ्यासस्वरूपंसामान्ये

स्वामिकृतटीका।

एतत्स्फुटयति चञ्चलमिति चञ्चलंस्वभावेनैवचपलंकिञ्चप्रमाथिप्रमथनशीलंदेहेन्द्रियक्षोभकरमित्यर्थः किञ्चबलवद्विचारेणापि जेतुमशक्यं किंचदृढंविषयवासनानुबन्धतयादुर्भेद्यंअतोयथाकाश्येदोधूयमानस्यवायोःकुक्षादिषु निरोधनमशक्यं तथाहं तस्यमनसोनिग्रहं निरोधंसुदुष्करंसर्ब्बथाकर्त्तुमशक्यंमन्ये ३३

भाषा अनुवाद।

अर्जुनकीकहीमनकोचञ्चलताअङ्गीकारकरि भगवानउसकेनिग्रहकरनेकी उपायकहतेहैं किहेमहाबाहो हांमनकीचञ्चलतारोंकनाकठिन यहजोतुमकहतेहौसोनिःसन्देहठीकहै परतौभीहेकौन्तेय अभ्यासकेद्वारामनपरमात्माकारवृत्तिमे विषयोंकीबैराग्यवशते निग्रहीतहोसकैहै अभ्याससेजयऔरवैराग्यसेनिचेप येदोनोदूरहोय यहमननिर्वृत्तिहोय अर्थात्औरविषयोंकोछोडकरपरमात्माकारतापायकर थिरहोताहै क्योंकियोगशास्त्रमेकहाहै किवृत्तिशून्यमनकोब्रह्माकाराकारितरूपस्थितिहोतीहै उसीकोनिर्विकल्पकसमाधिकहतेहैं ३५

CC-0. In Public Domain. Digitized by eGangotri

असंयतात्मनायोगोदुष्प्राप्यइतिमेमतिः वश्यात्मनातुयतताशक्योवाप्तुमुपायतः ३६

शाङ्करभाष्यं।

यःपुनरसंयतात्मातेन असंयतेति असंयतात्मनाअभ्यासवैराग्याभ्यांअसंयत आत्माअन्तःकरणं यस्यसोयमसंयतात्मातेनासंयतात्मनायोगोदुःप्रापोदुःप्राप्यइति मेमतिःयस्तुपुनर्वश्यात्माअभ्यासवैराग्याभ्यां वश्यमापादितआत्मामनोयस्यसोयंव श्यात्मातेनतुयतताभूयोपिप्रयत्नंकुर्वताशक्योवाप्तुं योगउपायतोययोक्तादुपायात् ३६

आनन्दगिरिकृतटीका

ननिदर्शयति अभ्यासोनामेति कस्याञ्चिच्चित्तभूमावित्यविशेषितोध्येयोविषयोनि र्दिश्यते समानप्रत्ययावृत्तिर्विजातीयप्रत्ययान्तरितेतिशेषः चित्तस्येति षष्ठीप्रत्यय स्यतद्विकारत्वद्योतनार्थं वैराग्यस्वरूपंनिरूपयति वैराग्यमिति तेषुवैतृष्ण्यं वैराग्यंनामेतिसम्बन्धः तत्रहेतुंमूचयति दोषेति विषयेषु वितृष्णाविषयेषुदो षदर्शनमभ्यस्यते तेनवैतृष्ण्यंजायते तेननिगृह्यमाणंनिर्दिशति चित्तेपेति तस्मि न्गृहीतेनिरुद्धेमनोनिरोधेऽस्यकिंस्यादित्यपेक्षायामाह एवमिति अभ्यासहेतुकवै राग्यद्वारा चित्तप्रचारनिरोधे निरुद्धवृत्तिकं मनोविषयविमुखमन्तर्निष्ठं भव तीत्यर्थः ३५

स्वामिकृतटीका।

तदुक्तंचञ्चलादिकमङ्गीकृत्यैवमनोनिग्रहोपायंश्रीभवानुवाच असंशयमिति च ञ्चलत्वादिना मनोनिरोद्धमशक्यमितियद्दृष्टंतन्निःसंशयमेव तथापितुअभ्यासे नपरमात्माकारयावृत्त्याविषय वैतृष्ण्यंनचगृह्यतेअभ्यासेनलप्रतिबन्धाद्वैराग्येणच चित्तेपप्रतिबन्धादुपरतवृत्तिकंसत् परमात्माकारेणपरिणतंतिष्ठतीत्यर्थः तदुक्तं योगशास्त्रे मनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः यासंप्रज्ञातनामासौसमाधिर भिधीयतइति ३५

भाषा अनुवाद।

औरसंयतआत्माको योगप्राप्तिसुलभहैं यहकहतेहैं किउक्तरीतिसेअभ्या सऔवैराग्यकेद्वारा जिसकाचित्तवशनहींहै उसकोयहयोगदुःप्रापहै औरजि सकाचित्तवशीभूतहै औरजोपूर्वकथितउपायसेयत्नकरताहै वहमेरेमतसेयो गप्राप्तहोसकताहै असंयतात्मावहहै जिसकाचित्तवशीभूतनहींहै ३६

CC-0. In Public Domain. Digitized by eGangotri

अर्जुनउवाच अयतिःश्रद्धयोपेतोयोगाच्चलितमानसः अप्राप्ययोगसंसिद्धिं कांगतिंकृष्णगच्छति ३७

शाङ्करभाष्यम्।

तत्र योगाभ्यासाङ्गीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्म्माणि संन्यस्तानियोगसिद्धिफलंच मोक्षसाधनं सम्यग्दर्शनं नप्राप्तमिति योगीयोगमार्गान्मरणकालेचलितचित्तइति तस्यनाशमाशंक्यार्जुनउवाच अयतिरिति अयतिरप्रयत्नवान्योगमार्गेश्रद्धयान्वितबुद्ध्यायोगतोयोगादन्तकालेपिचलितं मानसं मनोयस्य सचलितमानसोभ्रष्टस्मृतिः सोऽप्राप्ययोगसंसिद्धिं योगफलं सम्यग्दर्शनं कां गतिं हेकृष्ण गच्छति ३७

आनन्दगिरिकृतटीका

संयतात्मनोयोगप्राप्तिःसुलभेत्युक्त्वाव्यतिरेकंदर्शयति यःपुनरित व्यतिरेको पन्यासपरंपूर्वार्द्धमनूद्यव्याकरोति असंयतेति पूर्वोक्तान्वयव्याख्यानपरमुत्तरार्द्धंव्याचष्टे यस्त्वित्यादिना अन्तःकरणस्यस्ववशत्वेसिद्धेपिवैराग्यादावास्थावता भवितव्यमित्याह यततेति उपायवैराग्यादिपूर्वकोमनोनिरोधः ३६

प्रशान्तमुत्थापयति तत्रेत्यादिना मनोनिरोधस्यदुःखसाध्यत्वमाशंक्यपरिहृतेसति प्रष्टापुनरवकाशंप्रतिलभ्येवाचेति सम्बन्धः लोकद्वयप्रापककर्म्मसम्भवेकु

स्वामिकृतटीका।

एतावांस्त्विह निश्चयइत्याह असंयतेति उक्तप्रकारेणाभ्यासवैराग्याभ्यांफलसंयतआत्माचित्तंयस्यतेनयोगोदुःप्राप्यःप्राप्तुमशक्यः अभ्यासवैराग्याभ्यां वश्योवशवर्त्तीआत्माचित्तंयस्य तेनपुरुषेण पुनश्चानेनैवोपायेनप्रयत्नंकुर्वता योगःप्राप्तुं शक्यः ३६

भाषाअनुवाद

अभ्यासवैराग्यकेअभावसे या औरकोईप्रकारउपायसेजिसकोतत्त्वज्ञाननभया ऐसामनुष्यकौनफलपायसकताहै औकिसगतिकोजाताहै यहप्रश्नअर्जुनकरतेहैं किहेकृष्ण जोप्रथमकपटरहितश्रद्धायुक्तहो योगमेप्रवृत्तभया परन्तुतिसपीछेयत्नकियाअर्थात्अभ्यासमेंशिथिलकहे ढीलारहा औरजिसकामनविषयमेमग्नरहाकहे विषयसेविरागनभया ऐसामनुष्ययोगसंसिद्धि जोज्ञानरूपफलतिसकोनप्राप्तहोके किसरूपगतिकोपायसकताहै अर्थात्कौनगतिकोजाताहै ३७

CC-0. In Public Domain. Digitized by eGangotri

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिवनश्यति अप्रतिष्ठोमहाबाहोविमूढोब्रह्मणः पथि २८

शाङ्करभा ।

कच्चिदिति कच्चित् किंनोभयविभ्रष्टःकर्म्ममार्गात् योगमार्गाच्चविभ्रष्टःसन् छिन्नाभ्रमिवनश्यतिकिंवाननश्यति अप्रतिष्ठोनिराश्रयोहेमहाबाहोविमूढ़ःसन्ब्रह्मप्राप्तिमार्गे ३८

आनन्दगिरिकृतटीका ।

तोयोगिनोनाशाशङ्केत्याशंक्याह योगाभ्यासेति तथापियोगानुष्ठानपरिपाकपरिप्राप्तिसम्यग्दर्शनसामर्थ्यान्मोक्षोपपत्तौकुतस्तस्यनाशाशंकेति चेन्मैवमनेकान्तरायवत्त्वाद्योगस्येह जन्मनिप्रायेणसंसिद्धेरसिद्धिरित्यभिसन्धायाह योगसिद्धीति अभ्युदयनिःश्रेयसबहिर्भावेनाशोयोगमार्गेतत्फलस्यसम्यग्दर्शनादिति शेषः तर्हितोबहिर्मुखत्वमेवात्यन्तिकंसंवृत्तमित्याशंक्याह अङ्गेति तर्हियोगमार्गमाश्रयतेनेत्याह योगादिति मरणकालेव्याकुलेन्द्रियस्यज्ञानसाधनानुष्ठानावकाशाभावादयुक्तं ततश्चलितमानसत्वमित्याशंक्याह भ्रष्टेति गम्यतइतिगतिःपुरुषार्थःसामान्यप्रश्नमन्तर्भाव्यविशेषप्रश्नोद्रष्टव्यः ३७

स्वामिकृतटीका ।

अभ्यासवैराग्याभावेनकथञ्चिदप्राप्तसम्यग्ज्ञानःकिंफलंप्राप्नोतीत्यर्जुनउवाच अयतिरिति प्रथमंश्रद्धयोपेतएवयोगेप्रवृत्तःनतुमिथ्याचारतयाततःपरत्वयतिःसम्यक्नयततेशिथिलाभ्यासइत्यर्थः तथायोगाच्चलितं मानसंविषयप्रवणं चित्तं यस्यमन्दवैराग्यइत्यर्थः एवमभ्यासवैराग्यशैथिल्याद्योगस्यसंसिद्धिंफलं ज्ञानमप्राप्यकांगतिं प्राप्नोति ३७

भाषा अनुवाद

पूर्वोक्तप्रश्नकीअभिप्रायकोविस्तारसेअर्जुनकहतेहैं किनतोनिष्कामकर्म्मकरिईश्वरकोसमर्पणकिया औरनकाम्यकर्म्महीकाअनुष्ठानकिया तोस्वर्गादिफलसेभीरहितरहा औरयोगकीअसम्पन्नताकहे अपूर्णतासे मोक्षभीनमिली तोफेरिहे महाबाहोवहअप्रतिष्ठितकहे प्रतिष्ठारहितमनुष्य दोनोंओरसेभ्रष्टहोछिन्नमेघकेसमान क्यानष्टतोनहींहोजाताहै जैसे मेघदलसेभिन्नभयामेघ औरमेघकोन प्राप्तहोके अन्तरिक्षहीमेविलायजाताहै याउसकोभीकोईगतिहै ३८

CC-0. In Public Domain. Digitized by eGangotri

एतन्मेसंशयंकृष्णछेत्तुमर्हस्यशेषतः त्वदन्यःसंशयस्यास्यछेत्तानह्युपपद्यते ३९

शाङ्करभाष्यं

एतदिति एतन्मेममसंशयंकृष्णछेत्तुमपनेतुमर्हसि अशेषतःत्वदन्यःत्वत्तोऽन्यःऋषिर्देवोवाछेत्तानाशयिता संशयस्यास्य नहि यस्मादुपपद्यते नसम्भवतिअतस्त्वमेव छेत्तुमर्हसीत्यर्थः ३९

आनन्दगिरिकृतटीका

प्रश्नमेवविवृणोति कच्चिदिति प्रशस्तप्रश्नार्थत्वंकच्चिदित्यस्याङ्गीकृत्यव्याचष्टे किमिति उभयविभ्रष्टत्वंस्पष्टयति कर्म्मेत्यादिना वायुनाछिन्नंविशकलितमभ्रं यथानश्यति तद्वदित्याह छिन्नेति नाशाशङ्कानिमित्तमाह निराश्रयइति कर्म्ममार्गरूपाश्रयाभावेपिज्ञानमार्गावष्टम्भस्तस्यभविष्यतीत्याशंक्याह विमूढःसन्निति नहिकर्म्मिणं प्रतीयमाशङ्कायुक्ताभिलाषंत्यक्त्वेश्वरेसमर्प्यवाक्कर्म्मानुतिष्ठतोनिरुपचारेणतद्भ्रंशवचनासम्भवात् सर्व्वकर्म्मसंन्यासिनस्तुविहितानांत्यागात् ज्ञातोपायाच्चविच्युतेरनर्थप्राप्तिशङ्कायुक्तेति भावः ३८

यथोपदर्शितसंशयापाकरणार्थमर्जुनोभगवन्तं प्रेरयन्नाह एतदिति मत्तोन्यःकश्चिदृषिर्व्वादेवोवात्वदीयंसंशयंछेत्स्यतीत्याशंक्याह त्वदन्यइति अन्यस्यसंशयच्छेत्तुरभावेफलितमाह अतइति ३९

स्वामिकृतटीका

प्रश्नाभिप्रायंविवृणोति कच्चिदिति कर्म्मणामीश्वरेऽर्पितत्वादननुष्ठानाच्चतावत्कर्म्मफलंस्वर्गादिकंनप्राप्नोति योगानिष्पत्तेश्चभोक्षंनप्राप्नोति एवमुभयस्माद्भ्रष्टःअप्रतिष्ठोनिराश्रयःअतएवब्रह्मप्राप्त्युपायेपथिमार्गेविमूढःसन्कच्चित्किंननश्यति किम्वानश्यतीत्यर्थः नाशेदृष्टान्तःयथाछिन्नमभ्रंपूर्व्वस्मादभ्राद्विश्लिष्टमभ्रान्तमप्राप्तंसन्मध्यएवविलीयते तद्वदित्यर्थः ३८

भाषाअनुवाद।

जिससेआपसर्वज्ञहौ इससेआपकोछोडऔरकोई इसहमारीसंशयकादूरकरनेवालानहींहै अर्जुनयहीकहतेहैं किहेकृष्णमेरीइससन्देहकोआपहीछेदनकरनेयोग्यहौ औरआपकेविनादूसराइसन्देहकानिवृत्तिकर्त्तानहींहै सोइससन्देहकोकृपाकरमेरेमनसेदूरकरो ३९

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच पार्थनैवेह नामुत्रविनाशस्तस्यविद्यते नहि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति ४०

शाङ्करभाष्यं

पार्थेति हेपार्थनैवइहलोकेनामुत्रपरस्मिन्वालोकेविनाशस्तस्यविद्यते नास्ति नाशोनामपर्व्वस्माद्दीनजन्मप्राप्तिः स तस्ययोगभ्रष्टस्यनास्तिनहियस्मात्कारणात् कल्याणकृत् शुभकृत्कश्चिद्दुर्गतिं कुत्सितां गतिं हेतात तनोत्यात्मानं पुत्ररूपेणेति पिता तातउच्यते पितैवपुत्रइति पुत्रोपि तातउच्यो शिष्योपिपुत्रतुल्यउच्यतें यतोनगच्छति ४०

आनन्दगिरिकृतटका।

योगिनोनाशाशङ्कां परिहरन्नुत्तरमाह भगवानिति यदुक्तमुभयभ्रष्टोयोगीनश्यतीति तत्राह पार्थेति तत्रहेतुमाह नहीति योगिनोमर्त्यादिभ्रष्टस्यैहिकोनाशःशिष्टगर्हालक्षणोनभवतीति अग्रादेः सद्भावात्तथापिकथमामुष्मिकनाशशून्यत्वमित्याशंक्यतद्रूपनिरूपणपूर्व्वकंतदभावंप्रतिजानीते नाशोनामेति तत्रहेतुभागंविभजते नहीत्यादिना उभयभ्रष्टस्यापिश्रद्धेन्द्रियसंयमादेःसामिकृतश्रवणादेश्चभावादुपपन्नंशुभकृत्त्वं तातेतिकथंपुत्रस्थानीयःशिष्यःसम्बोध्यते पितुरेवतातशब्दत्वादित्याशंक्याह तनोतीति तेनपुत्रस्थानीयस्यशिष्यस्यतातेति सम्बोधनमविरुद्धमित्यर्थः नगच्छतिकुत्सितां गतिं कल्याणकरत्वादिति नाशाभावः ४०

स्वामिकृतटीका।

त्वयैवसर्वज्ञेनायं ममसन्देहोनिरसनीयःत्वत्तोऽन्यस्तुएतत्सन्देहनिवर्त्तकोनास्तीत्याह एतदिति एतत् एतत्कृत्तानिवर्त्तकः स्पष्टमन्यत् ३९

अथोत्तरं श्रीभगवानुवाच पार्थेति सार्द्धैश्चतुर्भिः इहलोकेनाशउभयभ्रंशात्

भाषा अनुवाद।

अर्जुनकीइसप्रश्नकाउत्तर श्रीभगवानसाढेचारिश्लोकसेकहतेहैं किहेपार्थ उसअधूरेयोगाभ्यासीकोयोगभ्रष्टहोनेसे यहलोकनाशकहे इसलोकमेपातक औरपरलोकमेनरकप्राप्ति येदोनोनहींहोतेहैं जिमहेतुकिसीकल्याणकृतकहे शुभआचरणकरनेवालापुरुष तातकहे हेभाईअर्जुन दुर्गतिकोनहींप्राप्तहोताहै तातशब्दसेलोकरीतिदेखावतेभये भगवाननेस्नेहपूर्वकअर्जुनकोसम्बोधनकरिकहाहै तातकाअर्थपिताऔपुत्रहै और शिष्यभी पुत्रकेतुल्यहै ४०

CC-0. In Public Domain. Digitized by eGangotri

प्राप्य पुण्यकृतां लोकानुषित्वाशाश्वतीः समाः शुचीनां श्रीमतां गेहे योग भ्रष्टोऽभिजायते ४१

शाङ्करभाष्यं

किन्त्वस्यभवति प्राप्येति योगमार्गेषु प्रवृत्तसंन्यासीसामर्थ्यात् प्राप्यगत्वापुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्रचउषित्वावासमनुभूयशाश्वतीर्नित्याःसमाः सम्वत्सरान्तद्भोगक्षयेशुचीनां यथोक्तकारिणां श्रीमतां विभूतिमतां गेहेगृहेयोगभ्रष्टोऽभिजायते ४१

अथेति अथवाश्रीमतांकुलादन्यस्मिन्योगिनामेव दरिद्राणांकुलेभवति जायते धीमतांबुद्धिमतां एतद्विजन्म यद्दरिद्राणांयोगिनांकुलेदुर्लभतरंदुःखेनलभ्यतरंपूर्वमपेक्ष्यलोकेजन्मयदीदृशं यथोक्तविशेषणेकुलेयस्मात् ४२

आनन्दगिरिकृतटीका।

योगभ्रष्टस्यलोकद्वयेपि नाशाभावेकिंभवतीति पृच्छति किंत्विति तत्रस्वर्गे नोत्तरमाह प्राप्येति कथंसंन्यासीति विशेष्यते तत्राह सामर्थ्यादिति कर्म्माणि व्याप्तस्यकर्म्मिणोयोगमार्गप्रवृत्त्यनुपपत्तिस्तत्प्रवृत्तावपि फलाभिलाषविकलस्येश्वरे समर्पितसर्व्वकर्म्मणस्तद्भंगाशङ्कानवकाशादित्यर्थः समानां नित्यत्वंमानुषसमाविलक्षत्वं वैराग्याभावविवक्षयाविभूतिमतां गृहे जन्मेति विशिष्यते ४१

स्वामिकृतटीका

पातित्यंअमुत्रपरलोकेनाशोनरकप्राप्तिस्तदुभयं तस्यनास्तेप्रवृत्तःकल्याणकृत्शुभकारीकश्चिदपिदुर्गतिंनगच्छति अयञ्चशुभकारी श्रद्धयायोगेप्रवृत्तत्वात्तातेतिलोकरीत्याऽर्जुनालालयन् सम्बोधयति ४०

तर्हि कमसौप्राप्नोतीत्यपेक्षायामाह प्राप्येति पुण्यकारिणामश्वमेधादियाजिनांलोकान्प्राप्यतत्रशाश्वतीः समवहून् संवत्सरानुषित्वा वासमुखमनुभूयशुचीनां सदाचाराणां श्रीमतां धनिनां गेहे सयोगभ्रष्टोजन्मप्राप्नोति ४१

भाषा अनुवाद।

तोफेरिवेयोगभ्रष्टलोगकिसगतिकोजातेहैं इसअपेक्षापरकहतेहैं किजिसस्वर्गआदिलोकको अश्वमेधआदियज्ञकरिके मनुष्यजातेहैं पुण्यकर्म्मकारीयोगभ्रष्टपुरुषभी उसीउत्तमलोकमेजायकर बहुतवरसतकतहांवसि सुखभोगकरिके फेरिसत्कर्म्मकारीधनीलोगोंकेघरमें आयजन्मग्रहणकहतेहैं ४१

CC-0. In Public Domain. Digitized by eGangotri

अथवायोगिनामेवकुलेभवतिधीमतां एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं ४२
तत्रतंबुद्धिसंयोगंलभतेपौर्व्वदैहिकं यततेचततोभूयःसंसिद्धौकुरुनन्दन ४३

शाङ्करभाष्यं।

अथवेति तत्रयोगिनांकुलेतंबुद्धिसंयोगं बुद्यासंयोगं बुद्धिसंयोगं लभतेपौर्व्वदैहिकंपूर्व्वस्मिन्देहेभवंपौर्व्वदैहिकंयततेच यत्नंकरोति ततस्तस्मात् पूर्व्वकृतात् संस्काराद्भूयोबृहत्तरंसंसिद्धिनिमित्तंहेकुरुनन्दन ४३

आनन्दगिरिकृतटीका

अद्धावैराग्यादिकल्याणाधिक्ये पक्षान्तरमाह अथवेति योगिनामिति कर्म्मिणांग्रहणंमाभूदिति विशिनष्टि धीमतामिति ब्रह्मविद्यावतां शुचीनां दरिद्राणां कुलेजन्मदुर्लभंप्रमादकारणाभावादित्याह एतद्धीति किमपेक्ष्याख्यजन्मनोदुःखलभ्यादपि दुःखलभ्यतरत्वंतदाह पूर्व्वमिति यद्यपिविभूतिमतां शुचीनांगृहेजन्मदुःखलभ्यंतथापितदपेक्षयाइदंजन्मदुःखलभ्यतरं यदीदृशंशुचीनां दरिद्राणां विद्यावतामिति विशेषणोपेतेकुले लोकेजन्मलक्षणमित्यर्थः यदुक्तमतरं जन्मोक्तंतस्योत्तमत्वेहेत्वन्तरमाह यस्मादिति ४२

स्वामिकृतटीका।

अल्पकालाभ्यस्तयोगभ्रंशेगतिविशेषमुक्त्वा चिराभ्यस्तयोगभ्रंशेपक्षान्तरमाह अथवेति योगनिष्ठानां धीमतां ज्ञानिनामेवकुलेजायते ननुपूर्व्वोक्तानामनारूढयोगानांकुलेएतज्जन्मस्तौति ईदृशंजन्म एतद्धिलोकेदुर्लभतरंमोक्षहेतुत्वात् ४२

भाषा अनुवाद।

थोड़ेदिनयोगाभ्यासकरिकेयोगसेभ्रष्टहुयेपुरुषकीगतिकहिचुके अबवहुतकालअभ्यासकरकेभ्रंशहुये योगीकीगतिकहतेहैं किअथवासतपात्रधनियोंकेघरजन्मलेनेसे औरजोदरिद्रबुद्धिमानयोगाभ्यासियोंकेकुलमेजन्मग्रहण सोउत्तमहै ऐसाजन्मलोकमेंअतिदुर्लभहै सोचिरकालयोगाभ्यासीयोगभ्रष्टहोय ऐसेहीघरमेउत्पन्नहोतेहैं ४२

सोईजन्मग्रहणकेवादिक्याहोताहै यह डेढ़श्लोकसेकहतेहैं किहेकुरुनन्दन तेईदोनोप्रकारकेयोगभ्रष्टलोग जन्मधारणकरिकेभी पूर्व्वदेहकेअभ्याससेब्रह्मविषयकबुद्धिसंयोगयुक्तहोतेहैं औरफेरिभी मोक्षकीसिद्धिकेलियेअधिकयत्नकरतेहैं ४३

CC-0. In Public Domain. Digitized by eGangotri

पूर्व्वाभ्यासेनतेनैवक्रियतेह्यवशोऽपिसः जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्त्तते ४४

शाङ्करभाष्यं।

कथंभूतंपूर्व्वदेहबुद्धिसंयोगंइति तदुच्यते पूर्व्वेति यःपूर्व्वजन्मनिकृतोऽभ्यासः सपूर्व्वाभ्यासस्तेनैवबलवताह्रियतेसंसिद्धौ हियस्मादवशोऽपिसःयोगभ्रष्टःनकृतंचेत् योगाभ्यासजात् संस्कारात् बलवत्तरमधर्मादिलक्षणंकर्मतदायोगाभ्यासजनितेनसंस्कारेणाह्रियतेऽधर्मश्चेद्बलवत्तरःकृतस्तेनयोगजोऽपिसंस्कारोऽभिभूयतएवतत्क्षयेतुयोगजःसंस्कारःस्वयमेवकार्य्यमारभते नदीर्घकालस्यस्यापिविनाशस्तस्यास्तीत्यतोजिज्ञासुरपियोगस्यस्वरूपंज्ञातुमिच्छन् योगमार्गेप्रवृत्तःसंन्यासीयोगभ्रष्टःसामर्थ्यात् सोऽपिशब्दब्रह्मवेदोक्तकर्मानुष्ठानफलमतिवर्त्तते कर्मानुष्ठानलक्षणमतिक्रामति अपाकरिष्यति किमुतवुद्ध्यायोयोगंतन्निष्ठोभ्यासंकुर्य्यात् ४४

आनन्दगिरिकृतटीका

बुद्धेत्यात्मविषयेतिशेषः पूर्व्वस्मिन्देहेभवंतत्वानुष्ठितसाधनविशेषयुक्तमित्यर्थः तर्हि यथोक्तजन्मनिसाधनानुष्ठानमन्तरेणैवबुद्धिसम्बन्धः स्यादित्याशंक्याह यततेचेति प्रयत्नःश्रवणाद्यनुष्ठानविषयः ४३

स्वामिकृतटीका।

ततःकिमतआह तत्रेति सार्द्धेन सतत्रद्विप्रकारेऽपिजन्मनेपूर्व्वदेहभवंपौर्व्वदैहिकं तमेवब्रह्मविषययाबुद्ध्या संयोगंलभते ततश्चभूयोऽधिकंसंसिद्धौमोक्षेप्रयत्नं करोति ४३

भाषा अनुवाद।

वहपूर्व्वदेहकाबुद्धिसंस्कारकैसाहै औरउसकाकारणयहहै किसोईपूर्व्वदेहकीअभ्याससेअवशअर्थात् जोकोईकारणयाबिभवलते इच्छानभीहोय तौभीमोक्षसिद्धिकेअर्थ पूर्व्वसंस्कारकेजोरसेअवशकीनाईं यत्नकरते हैं अर्थात् विषयोंसेविमुखहोब्रह्मनिरतहोतेहैं औरइसतरहपूर्व्वअभ्यासकेकारणसेमुक्तिकेअर्थ यत्नकारीमनुष्यजिसक्रमसेमुक्तहोतेहैं सो कैमुक्तिकन्यायसे डेढश्लोककेद्वाराकहतेहैं कि जिज्ञासूकहेयोगस्वरूपजाननेकीइच्छाकरनेवाला कुछकेवलयोगहीकोनहींप्राप्तहोता किन्तुयोगप्रविष्टमनुष्यपापवशते योगभ्रष्टहोयभीशब्दब्रह्मजोवेदतिसकोअतिवर्त्तनकरता अर्थात् वेदोक्तफलकीअपेक्षा अधिकफलप्राप्तहोयकेफेरिमुक्तहोताहै इतनाहीं नहीं इससेभीअधिक इसोको कैमुतिकन्यायकहतेहैं ४४

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

कुतश्चयोगित्वंश्रेयइति प्रयत्नादिति प्रयत्नात् प्रयतमानादविकतरंयत मानइत्यर्थः तत्रयोगीविद्वान्संशुद्धकिल्बिषोविशुद्धचित्तः सशुद्धपापोऽनेकेषुज न्मसुकिञ्चित् किञ्चित् संस्कारजातमुपचित्य तेनोपचितेनानेकजन्मकृतेनसंसिद्धो ऽनेकजन्मसंसिद्धः ततोलब्धसम्यग्दर्शनः सन् यातिपरांप्रकृष्टांगतिं ४५

आनन्दगिरिकृतटीका

यदिपूर्वसंस्कारोऽस्येच्छामुपनयन्प्रवर्त्तयति तथाचाप्रवृत्तिरनिच्छयास्यादित्या शंक्याह पूर्वेति सहियोगभ्रष्टः समनन्तरजन्मकृतसंस्कारवशादुत्तरस्मिन्जन्मनि अनिच्छन्नपियोगंप्रत्येवाकृष्टोभवतीत्यर्थः तत्रकौमुतिकन्यायंसूचयति जिज्ञासु रिति पूर्वार्द्धंविभजते पूर्वेति तस्मान्नेच्छयातस्यप्रवृत्तिरिति शेषः योगभ्रष्टस्या धर्मादिप्रतिबन्धेपितर्हिपूर्वाभ्यासवशाद्बुद्धिसम्बन्धःस्यादित्याशंक्याह नेत्यादिना य दियोगभ्रष्टेनयोगाभ्यासजनितसंस्कारप्राबल्यात्प्रबलतरधर्मप्रभेदरूपंकर्मनकृतं स्यात्तदातेनसंस्कारेणवशीकृतःसन्निच्छादिरहितोपि बुद्धिसम्बन्धभाग्भवतीत्य र्थः विपक्षेयोगसंस्कारस्याभिभूतत्वान्नकार्यारम्भकत्वमित्याह अधर्मश्चेदिति यो गजसंस्कारस्याधर्माभिभूतस्यकार्यमकृत्वैवाभिभावकप्राबल्येप्रणाशःस्यादित्याशंक्या ह ततश्चयेत्विति कालव्यवधानान्निवृत्तिंशङ्कित्वोक्तेनेति तत्रदृष्टान्तश्रु त्यासंस्कारस्यदीर्घतायाःसमधिगतत्वादिति भावः कौमुतिकन्यायोक्तिंपरमुत्तरार्द्धं विभजते जिज्ञासुरपीत्यादिना अत्रापिसंन्यासीति विशेषणंपूर्ववदवधेयमित्याह सामर्थ्यादिति नहिकर्मीकर्ममार्गेप्रवृत्तस्ततोभ्रष्टःशङ्कितुंशक्यते अतःसंन्यासीपु र्वोक्तैर्विशेषणैःविशिष्टोयोगभ्रष्टोऽभीष्ट सोपिवैदिकंकर्मततफलञ्चातिवर्त्तते किं मुतयोगंबुद्ध्वातन्निष्ठःसदाभ्यासंकुर्वन्कर्मततफलञ्चातिवर्त्तते किमितिवक्तव्यमिति योजना योगनिष्ठस्यकर्मततफलातिवर्त्तनंततोधिकफलावाप्तिर्विवक्ष्यते ४४

स्वामिकृतटीका।

तत्रहेतुः पूर्वेति तेनैवपूर्वदेहकृताभ्यासेनावशोऽपिकृतश्चिदन्तरायादनिच्छ न्नपिसक्रियते विषयेभ्यःपराहृत्य ब्रह्मनिष्ठःक्रियते तदेवंपूर्वाभ्यासवशेनप्रयत्नं कुर्वन्श्रनैर्मुच्यतइतीममर्थंकैमुत्यन्यायेनस्पष्टयति जिज्ञासुरिति सार्द्धेन योगस्य स्वरूपं जिज्ञासुरेवकेवलंनतुप्राप्तयोगःएवंभूतोयोगेप्रविष्टमात्रोऽपिपापवशाद्यो गभ्रष्टोऽपिशब्दब्रह्मवेदमतिवर्त्तते वेदोक्तकर्मफलान्यतिक्रामति तेभ्योऽधिकंफलं प्राप्य मुच्यतइत्यर्थः ४३

CC-0. In Public Domain. Digitized by eGangotri

प्रयत्नात्यतमानस्तुयोगीसंशुद्धकिल्बिषः अनेकजन्मसंसिद्धस्ततोयातिपरांगतिं ४५

शाङ्करभाष्यं ।

तस्मादेवं तस्मात् तपस्विभ्यइति तपस्विभ्योऽधिकोयोगीज्ञानिभ्योपिज्ञान मात्रशास्त्रार्थपाण्डित्यं तद्वद्भ्योपिमतो ज्ञातोधिकः श्रेष्ठःइति कर्मिभ्योऽग्निहोत्रा दिकर्मतद्वद्भ्योऽधिकोयोगीविशिष्टःतस्माद्योगीभवार्जुन ४६

आनन्दगिरिकृतटीका ।

योगनिष्ठस्यश्रेष्ठत्वेहेत्वन्तरंवक्तुं उत्तरश्लोकमवतारयति कुतश्चेति मद्प्रयत्नोपि क्रमेण नोक्ततेचेदधिकप्रयत्नस्यल्पेहेतोरकिञ्चित्करत्वमित्याशंक्य हेत्वन्तरमेव प्रकटयति प्रयत्नादिति तत्रयोगविषयेप्रयत्नातिरेकेसतीत्यर्थःततःसञ्चितसंस्का रसमुदायादिति यावत् समुत्पन्नसम्यग्दर्शनबलात्प्रकृष्टागतिः सन्न्यासिनालभ्य ते तेनशीघ्रं मुक्तिमिच्छन्नधिकप्रयत्नोभवेदल्पप्रयत्नस्तुचिरेणैवमुक्तिभागित्यर्थः ४५

सम्यग्ज्ञानद्वारामोक्षहेतुत्वं योगस्योक्तमनूद्य योगिनःसर्वाधिकत्वमाह यस्मादिति योगस्यसर्वस्मादुत्कर्षादवश्यकर्त्तव्यत्वाय योगिनःसर्वाधिक्यंसाधयति तपस्विभ्यइति योगिनोज्ञानविनश्वपर्यायत्वात् कथंतस्यज्ञानिभ्योधिकत्वमित्याशं क्याह ज्ञानमिति योगिनःसर्वाधिकत्वेफलितमाह तस्मादिति ४६

नत्वादित्योविराड़ात्मासूत्रंकारणमक्षरमित्येतेषामुपासकाभूयांसोयोगिनो गण्यन्तेतेषांकतमःश्रेयानिष्यतेतत्राह योगिनामिति योमांभगवन्तंसगुणंनिर्गुणम्वा यथोक्तेनचेतसाश्रद्धानःसन्ननवरतमनुसन्धत्तेसयुक्तानांमध्येऽतिशयेनयुक्तः अया

स्वामिकृतटीका ।

यदैवंमद्प्रयत्नोऽपियोगीपरांगतिंयाति तदायत्नयोगीप्रयत्नादुत्तरोत्तरमधिकं योगेयतमानोयत्नं कुर्वन्योगेनैवसंशुद्धकिल्बिषोविधूतपापः सोऽनेकेषुजन्मसुपचि तेनयोगेनसंसिद्धःसम्यग्ज्ञानीभूत्वा ततः श्रेष्ठांगतिंयातीतिकिमुक्तव्यमित्यर्थः ४५

भाषा अनुवाद ।

जिसहेतुमन्दयत्नकारीयोगी श्रेष्ठगतिकोप्राप्तहोतेहैं तोउत्तरोत्तरयोगमेजो अधिकयत्नकरते वेयोगसेनिःपापहोअनेकजन्मसंसिद्धअर्थात् सम्यक्ज्ञानीहोय श्रेष्ठगतिपावेंगे इसमेंऔरकुछकहना या सन्देहक्याबाकीहै सोईकहाकि अछी तरहसेयत्नकरतायोगी संशुद्धकिल्बिष निःपाप अनेकजन्मसेसिद्धहोय फेरि परमगतिको याताहै ४५

CC-0. In Public Domain. Digitized by eGangotri

तपस्विभ्योऽधिकोयोगी ज्ञानिभ्योऽपिमतोऽधिकः कर्मिभ्यश्चाधिकोयोगी तस्माद्योगी भवार्जुन ४६ योगिनामपिसर्वेषांमद्गतेनान्तरात्मना श्रद्धावान्भज तेयोमांसमेयुक्ततमोमतः ४७ इति श्रीभगवद्गीतायांध्यानयोगोनामषष्ठोऽध्यायः ६

शाङ्करभाष्यं ।

योगिनामिति योगिनापिसर्वेषांरुद्रादिध्यानपराणांमध्येमद्गतेनमयिवासुदेवेसमाहितेनान्तरात्मनान्तःकरणेनश्रद्धावान्श्रद्दधानःसन्भजते सेवते योमांसमेममयुक्ततमोऽतिशयेनयुक्तोमतोऽभिप्रेतइति ४७ इति श्रीभगवद्गीताभाष्येषष्ठोध्यायः ६

आनन्दगिरिकृतटीका ।

नीश्वरस्याभिप्रेतःनहितदीयोभिप्रायोन्यायाभवितुमर्हतीत्यर्थः तदनेनाध्यायेनकर्मयोगस्य संन्यासहेतोर्मर्य्यादांदर्शयतासाङ्गयोगंविदृणवतामनो निग्रहोपायोपदेशेनयोगभ्रष्टस्यात्यन्तिक नाशशङ्काञ्चशिथिलयतात्वंपदार्थाभिज्ञस्यज्ञाननिष्ठत्वोक्त्या वाक्यार्थज्ञानान्मुक्तिरितिसाधितं ४७ इति आनन्दगिरिकृतठीकायांषष्ठोऽध्यायः

स्वामिकृतटीका ।

यस्मादेवंतस्मात्तपस्विभ्यइति कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्योऽपिज्ञानिभ्यःशास्त्रविज्ञानवद्भ्योऽपिकर्म्मिभ्यइष्टापूर्त्तादिकर्मकारिभ्योपियोगिश्रेष्ठोममाभिमतःतस्मात्त्वंयोगीभव ४६ योगिनामपियमनियमादिपराणांमध्येमद्भक्तःश्रेष्ठइत्याह योगिनामपीति मद्गतेनमय्यासक्तेनान्तरात्मनामनसायोमांपरमेश्वरंश्रद्धायुक्तःसन्भजते सयोगयुक्तेभ्यःश्रेष्ठोममसम्मतः अतोमद्भक्तोभवेति भावः आत्मयोगमवोचद्योभक्तियोगशिरोमणिं तंबन्देपरमानन्दं माधवंभक्तसेवधिं ४७ इति षष्ठोऽध्यायः ६

भाषा अनुवाद ।

जिसकारणसेऐसाहै किकृच्छ्रचान्द्रायणआदितपमेंनिरतश्रौतस्मार्तसेजोज्ञानी इनसेभीयोगीअधिकहै तथायज्ञकुवांतालवागदानकर्मकारीजोकर्मीतिससेभीअधिकहै हमारेमतमेयोगी इससेहेअर्जुनतुमयोगीहोउ ४६ योगियोंके मध्यअर्थात् यमनियमपरायणलोगोंकेबीचमेमेराभक्तहोश्रेष्ठहै यहकहते हैं किमैजोपरमेश्वर सोमद्गतअर्थात् मेरेमेमनलगयश्रद्धासेजोहमकोभजेहै मेरेमतसे सोईश्रेष्ठइससेअर्जुनतुममेरेभक्तहोउ ॥ श्रीधरस्वामीप्रभुकोप्रणामकरतेहैं किपरमानन्दभक्तसेवितलक्ष्मीपतिकीमैवन्दनाकरताहूं जिसनेभक्तियोगशिरोमणिरूपआत्मयोगउपदेशकियाहै ४७ इति मत्तभावदीपिकायांषष्ठोध्यायः ६

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता

सप्तमोध्यायः

श्रीभगवानुवाच। मय्यासक्तमनाः पार्थ योगंयुञ्जन्मदाश्रयः। असंशयं समग्रं मां यथाज्ञास्यसितच्छृणु ॥ १ ॥

शाङ्करभाष्यं।

योगिनामपिसर्व्वेषांमद्गतेनान्तरात्मनाश्रद्धवान्भजते योमांसमेयुक्ततमोमत इति प्रश्नबीजमुपन्यस्यस्वयमेवईदृशंमदीयंतत्त्वमेवंभद्गतान्तरात्मा स्यादित्येतद्दिदर्शयिषुर्भगवानुवाच मयीति मयिवक्ष्यमाणविशेषणेपरमेश्वरेआसक्तंमनोयस्यसमव्यासक्तमनाःहेपार्थ योगंयुञ्जन्मनःसमाधानंकुर्व्वन्मदाश्रयोऽहमेवपरमेश्वरआश्रयोयस्यसमदाश्रयोयोहिकश्चित्पुरुषार्थेनकेनचिदर्थीभवतिस तत्साधनंकर्म्माग्निहोत्रादितपोदानंवाकिञ्चिदाश्रयंप्रतिपद्यतेअयन्तुयोगीमामेवाश्रयं प्रतिपद्यतेहित्वान्यत्साधनान्तरंमय्येवासक्तमनाःभवतियस्त्वमेवम्भूतःसन्असंशयंसमग्रं समस्तं विभूतिबलशक्त्यैश्वर्य्यादिगुणसम्पन्नंमांयथायेनप्रकारेणज्ञास्यसिसंशयमन्तरेणैवमेवभगवानिति तच्छृणूच्यमानंमया १

आनन्दगिरिकृतटीका।

कर्म्मसंन्यासात्मकसाधनप्रधानत्वंपदार्थप्रधानत्वाप्रथमषट्कंव्याख्याय मध्यमषट्कमुपाख्यनिष्ठंतत्पदार्थनिष्ठंवा व्याख्यातुमारभमानः समनन्तराध्यायमवतार

भाषाअनुवाद

अबइसअध्यायमे भजनीयईश्वरकास्वरूपकहतेहैं किजोपूर्व्वअध्यायकेअन्तमेकहा किमदात्मकहोयजोमेरीभजनकरैहै सोउत्तमहै इसपरजोकहोकि सोभगवानकैसेहैं जिनकीभक्तिकरनाचाहिये इसअभिप्रायपर अपनेस्वरूपकानिरूपणकरनेकेअर्थश्रीकृष्णअर्जुनसेकहतेहैं किहेअर्जुन मेरेमे जिसकामनलगाहै औरमैहींहौं अबलम्बजिसके ऐसाअनन्यशरणागतहोय योगाभ्यासकरनेकेअनन्तर संशयरहित समग्रकहेविभूतिबलऐश्वर्यसहित मेरेरूपकोजैसे जानिसकैगा सोईमेरेबचन तुमश्रवणकरो १

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

यति योगिनामिति अतीताध्यायान्तेनान्तरात्मनायोभजतेमामिति प्रश्नबीजंप्रदर्श्य कीदृशंभगवतस्तत्वंकथम्बामङ्गतान्तरात्मास्यादित्यर्जुनस्य प्रश्नद्वयेजातेस्वयमेव भगवान्अदृष्टमेव तद्वक्तुं इच्छन्नुक्तवानित्यर्थः परमेश्वरस्यवक्ष्यमाणविशेषणंसकलजगदायतनत्वादिनानाविधविभूतिभागित्वंतत्रासक्तिर्म्मनसोविषयान्तरपरिहारेणतन्निष्ठत्वं मनसोभगवत्येवासक्तौहेतुमाह योगमिति विषयान्तरपरिहारेहिगोचरमालोच्यमानोभगवत्येवप्रतिष्ठितोभवतीत्यर्थः तथापि स्वाश्रयेपुरुषोमनःस्थापयतिनान्यत्रेत्याशंक्याह मदाश्रयइति योगिनोयदीश्वराश्रयत्वेनतस्मिन्नेवासक्तमनस्त्वमुपन्यस्तंतदुपपादयति योहीति ईश्वराख्याश्रयस्यप्रतिपत्तिमेवप्रकटयति हित्वेति अस्तुयोगिनस्त्वदाश्रयप्रतिपत्त्रामनसस्त्वय्येवासक्तिस्तथापिममकिमायातमित्याशंक्यद्वितीयार्द्धंव्याचष्टे यस्त्वमेवमिति एवम्भूतोयोक्तध्यानोनिष्ठपुरुषवद्देवमप्यासक्तमनायस्त्वंसत्यंतथाविधः सन्नसंशयमविद्यमानःसंशयोयत्रज्ञानेतद्यथास्यात्तथामांसमग्रंज्ञास्यसीतिसम्बन्धः समग्रमित्यस्यार्थमाह समस्तेति विभूतिर्नानाविधैश्वर्योपायसम्पत्तिःबलंशरीरगतं सामर्थ्यं शक्तिर्म्मनोगतंप्रागल्भ्यं ऐश्वर्यमीक्षितव्यविषयमीक्षणसामर्थ्यं आदिशब्देन ज्ञानेच्छादयोगृह्यन्ते असंशयमितिपदस्य क्रियाविशेषणत्वं विशदयन्क्रियापदेनसम्बन्धंदर्शयति संशयमिति विनासंशयंभगवत्तत्त्वपरिज्ञानमेवस्फोरयति एवमेवेति भगवत्तत्त्वे ज्ञातव्येकथंममज्ञानमुपदेक्ष्यति नहित्वामृतेतदुपदेष्टाकश्चिदस्तीत्याशंक्याह तच्छृणुविति १

ज्ञास्यसीत्युक्त्या परोक्षज्ञानशङ्कायां तन्निष्टत्यर्थंतदुक्तिप्रकारमेव विवृणोतितच्चेति इदमपरोक्षंज्ञानंचैतन्यं तस्यसविज्ञातस्य प्रतिलम्भेकिं स्यादित्याशंक्याह यज्ज्ञात्वेति इदमाचैतन्यस्यपरोक्षत्वंव्यावर्त्तते तदेव सविज्ञानमिति

स्वामिकृतटीका

विज्ञेयमात्मनस्तत्त्वंसयोगंसमुदाहृतं भजनीयमथेदानीमैश्वरंरूपमीर्यते पूर्वाध्यायान्तेमङ्गतेनान्तरात्मनायोमांभजतेसमेयुक्ततमोमतइत्युक्तं तत्रकीदृशस्त्वंयस्यभक्तिःकर्त्तव्येत्यपेक्षायां स्वस्वरूपं निरूपयिष्यन् श्रीभगवानुवाच मयीति मयिपरमेश्वरेआसक्तमभिनिविष्टं मनोयस्यसः मदाश्रयोऽहमेवाश्रयोयस्य अनन्यशरणःसन् योगंयुञ्जन्मद्व्यतिरिक्तंसंशयंयथाभवत्येवं मांसमग्रंविभूतिबलैश्वर्यादिसहितं यथाज्ञास्यसितदिदंमयावक्ष्यमाणंशृणु १

CC-0. In Public Domain. Digitized by eGangotri

ज्ञानंतेऽहंसविज्ञानमिदंवक्ष्याम्यशेषतः यज्ज्ञात्वानेहभूयोऽन्यज्ज्ञातव्य मवशिष्यते २

शाङ्करभाष्यं

तच्चमद्विषयंज्ञानमिति ज्ञानंतेतुभ्यमहंसविज्ञानं विज्ञानसहितंसानुभव संयुक्तमिदंवक्ष्यामिकथयिष्याम्यशेषतःकार्त्स्नेनतज्ज्ञानंविवक्षितंस्तौतिश्रोतुरभि मुखीकरणायायत्ज्ञात्वायत्ज्ञानंज्ञात्वानेहभूय.पुनःज्ञातव्यंपुरुषार्थसाधनमवशि ष्यते नावशेषोभवतीतितत्त्वज्ञोयःससर्वज्ञोभवतीत्यर्थः २

अतोविशिष्टफलत्वात्दुर्लभतरंज्ञानंकथमित्युच्यते मनुष्याणामिति मनु ष्याणांमध्येसहस्रेष्वनेकेषुकश्चिद्यतति सिद्धयेसिद्ध्यर्थंयततिप्रयत्नकरोति तेषांयत तामपिसिद्धानांसिद्धाएवंविधे येमोक्षायमोक्षमार्गेयतन्तेतेषांकश्चिदेवमांवेत्तितत्त्व तोयथावत् ३

नन्दगिरिकृतटीका

विशेषणेनस्फुटयति अशेषतःअनवशेषेण तद्वेदनफलोपन्यासेन श्रोतारंतत्श्रवण प्रवणंकरोतितज्ज्ञानमिति एकविज्ञानेनसर्वविज्ञानश्रुतिमाश्रित्योत्तरार्द्ध ता त्पर्यमाह यज्ज्ञात्वेति २

भगवत्तत्त्वज्ञानस्यविशिष्टफलत्वमुक्त्वाफलितमाह अतइति ज्ञानस्यदुर्ल भत्वं प्रश्नपूर्वकंप्रकटयति कथमित्यादिना सहस्रशब्दस्य बहुवाचकत्वमुपेत्य व्याकरोति अनेकेष्विति सिद्धयेसत्त्वशुद्धिद्वाराज्ञानोत्पत्त्यर्थमित्यर्थः सिद्ध्यर्थंयत मानानां कथंसिद्धत्वमित्याशंक्याह सिद्धाएवेति सर्वेषामेवतेषांज्ञानोदयात्तस्य सुलभत्वमित्याशंक्याह तेषामिति ३

स्वामिकृतटीका।

वक्ष्यमाणंस्तौति ज्ञानमिति ज्ञानंशास्त्रीयं विज्ञानमनुभवस्तत्सहितमिदं मद्विषयमशेषतःसाकल्येनवक्ष्यामियज्ज्ञात्वाइहश्रेयोमार्गेवर्त्तमानस्य पुनरन्यज्ज्ञा तव्यमवशिष्टं नभवति तेनैव कृतार्थोभवतीत्यर्थः २

भाषा अनुवाद।

अबभगवानजोकहतेहैं उसीकीप्रसंशाकरतेहैं किविज्ञानजो अनुभवऔर ज्ञानजोशास्त्रसेमेरेविषयमेहोताहै येदोनोमैंतुमारेप्रतिकहूंगा जो जानिकर मुक्तिमार्गमे आरूढ़पुरुषको औरकेरिकुछजाननाबाकीनहीं रहताहै इसीसेकृतार्थ होतेहैं २

CC-0. In Public Domain. Digitized by eGangotri

मनुष्याणांसहस्रेषुकश्चिद्यतति सिद्धये यततामपिसिद्धानांकश्चिन्मांवेत्ति तत्त्वतः ३

शाङ्करभाष्यं ।

अतःश्रोतारंप्रत्योचनेनाभिमुखीकृत्याह भूमिरिति भूमिरिति पृथिवीतन्मात्रमुच्यते नस्थूलाभिन्नाप्रकृतिरष्टधेति वचनात् तथावादयोपितन्मात्राण्येवोच्यन्ते अपोऽनलोवायुःखंमनोमनइति मनसःकारणमहङ्कारोगृह्यते बुद्धिरित्यहङ्कारकारणंमहत्तत्त्वं अहङ्कारइत्यविद्यासंयुक्तमव्यक्तं यथाविषसंयुक्तमन्नंविषमुच्यते एवमहङ्कारवासनाबद्व्यक्तं मुलकारणमहङ्कारइत्युच्यते प्रवर्त्तकत्वादहङ्कारस्याहङ्कारएवहिसर्व्वस्यप्रवृत्तिबीजंदृष्टंलोकेइतीयंयथोक्ताप्रकृतिर्मेममैश्वरीभायाशक्तिरष्टधाभिन्नाभेदमागता ४

आनन्दगिरिकृतटीका

ज्ञानार्थंप्रयत्नस्यतद्द्वाराज्ञानलाभस्यतदुभयद्वारेणमुक्तेश्चदुर्लत्वाभिधानस्यश्रवणप्ररोचनंफलमितिमत्वाह श्रोतारमिति आत्मनःसर्व्वात्मकत्वेनपरिपूर्णत्वमवतारयन्नादावपरांप्रकृतिमुपन्यस्यति आहेति भूमिशब्दस्यव्यवहारयोग्यस्थूलपृथिवीविषयत्वंव्यावर्त्तयति भूमिरितीति तत्रहेतुमाह भिन्नेति प्रकृतिसमनभिव्या

स्वामिकृतटीका

मद्भक्तिंविनातुमज्ज्ञानंदुर्लभमित्याह मनुष्याणामिति असंख्यातानांजीवानांमध्येमनुष्यव्यतिरिक्तानांश्रेयसि प्रवृत्तिरेवनास्ति मनुष्याणान्तुसहस्रेषुमध्येकश्चिदेवपुण्यवशात्सिद्धयेआत्मज्ञानायप्रयतते प्रयत्नंकुर्व्वतामपिसहस्रेषुप्राक्तनपुण्यवशादात्मानंवेत्तितादृशानांचात्मज्ञानंसहस्रेषुकश्चिदेवमांपरमात्मानंमत्प्रसादेनतत्त्वतोवेत्ति तदेवमतिदुर्लभमप्यात्मतत्त्वं तुभ्यमहंवक्ष्यामीत्यर्थः ३

भाषाअनुवाद ।

हमारीभक्तिविना हमैजाननेसकैयहअति दुर्लभहै सोईकहते हैं किअसंख्यजीवोंकेमध्यमे मनुष्यकोडिऔरकिसीकोमोक्षकेविषयमेप्रवृत्तिनहीहोतीहै औरहजारमनुष्यकेबीच कोईएकपुन्यकेप्रभावसेआत्मज्ञानकेहेतुयत्नकरताहै ऐसेहीयत्नकारीहजारकेमध्य कोईएकअतिउत्तमपुन्यवशते अपनेकोजानिशकैहै औरऐसेआत्मज्ञानीहजारकेबीचमे कोईएकमेरीकृपासे परमात्मस्वरूपमुझे यथार्थरूपसेजानैहै सोई अति कठिनज्ञानहमतुमसेकहैंगे ३

CC-0. In Public Domain. Digitized by eGangotri

भूमिरापोऽनलोवायुःखंमनोबुद्धिरेवच अहङ्कारइतीयंमेभिन्नाप्रकृतिरष्टधा ४

आनन्दगिरिकृतटीका।

हारात् गन्धतन्मात्रस्थूलपृथिवीप्रकृतिरुत्तरविकारोभूमिरित्युच्यते नविशेषइत्यर्थः भूमिशब्दवदवादिशब्दानामपिसूक्ष्मभूतविषयत्वमाह तथेति तेषामपिप्रकृतिसमानाधिकृतत्वाविशेषात्तन्मात्राणांपूर्वपूर्वप्रकृतीनामुत्तरोत्तरविकाराणांनविशेषसिद्धिरित्यर्थः मनःशब्दस्यसङ्कल्पविकल्पात्मककरणवियत्वमाशंक्याह मनइतीति नखल्वहङ्काराभावेसङ्कल्पविकल्पयोरसम्भवात्तदात्मकंमनःसम्भवतीत्यर्थः निश्चयलक्षणाबुद्धिरित्युपगमाद्बुद्धिशब्दस्यनिश्चयात्मककरणविषयत्वमाशंक्याह बुद्धिरितीति नहिहिरण्यगर्भसमष्टिबुद्धिरूपमन्तरेणव्यष्टिबुद्धिःसिध्यतीत्यर्थः अहङ्कारस्याभिमानविशेषात्मकत्वेनान्तःकरणप्रभेदत्वंव्यावर्त्तयति अहङ्कारइति अविद्यासंयुक्तमित्यविद्यात्मकमित्यर्थः कथंमूलकारणस्याहङ्कारशब्दत्वमित्याशङ्क्योक्तमर्थंदृष्टान्तेनस्पष्टयति यथेत्यादिना मूलकारणस्याहङ्कारशब्दत्वेहेतुमाह प्रवर्त्तकत्वादिति तस्यप्रवर्त्तकत्वंप्रपञ्चयति अहङ्कारएवेतत्सत्येवाहङ्कारे ममकारोभवति तयोश्चभावे सर्वाप्रवृत्तिरिति प्रसिद्धमित्यर्थः उक्तांप्रकृतिमुपसंहरति इतीयमिति इयमित्यपरोक्षासाक्षिदृश्येतियावत् ऐश्वरीतदाश्रया तदैश्वर्योपाधिभूताप्रक्रियते महदाद्याकारेणेति प्रकृतिस्त्रिगुणं जगदुपादानं प्रधानमितिमतं व्युदस्यति मायेति तस्यास्तत्कार्याकारेण परिणामयोग्यत्वं द्योतयति शक्तिरिति अष्टधेति अष्टभिः प्रकारैरिति यावत् ४

भाषा अनुवाद।

इनवातोंसेश्रोताअर्जुनकोउत्साहयुक्तकरके अवप्रकृतिजोमाया तिसकेद्वारा सृष्टिआदिकाकर्त्तृत्वजोअङ्गीकारकियाहैईश्वरत्व उसकानिरूपण उत्तमअधम भेदक्रमसेदोश्लोकसेकर्त्तेहैं किभूमिआदिपञ्चभूतऔरमन शब्दसेमनकाकारणरूपअहङ्कार तथाबुद्धिकाकारणमहत्तत्त्व औरअहङ्कारकाकारणभूतजोअविद्याकहेअज्ञान इसप्रकारसेमेरीप्रकृतिमायाआठप्रकारकीहै अथवा पञ्चभूतसेरूपादिमात्राऔरअहङ्कारसे कार्यरूपइन्द्रीऔमनबुद्धियेआठप्रकारजानो यद्यपिइहांचौविशभेदोंको इनआठकेअन्तर्भूतकरिमायाकेआठहीप्रकारकहा तौभी क्षेत्राध्यायजोतेरहवां तहांप्रकृतिकेचौविशही तत्त्वरूपविभागकहैंगे ४

CC-0. In Public Domain. Digitized by eGangotri

अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेऽपरां जीवभूतांमहाबाहोययेदंधार्य्यतेजगत् ५

शाङ्करभाष्यं ।

अपरेति अपरा नपरानिकृष्टाशुद्धानर्थकरीसंसाररूपाबन्धनात्मिकेयमितो न्यांयथोक्तायास्तुअन्यांविशुद्धांप्रकृतिंममात्मभूतांविद्धि मेपरांप्रकृष्टांजीवभूतांक्षेत्रज्ञ लक्षणांप्राणधारणनिमित्तभूतां हेमहाबाहो ययाप्रकृत्याइदंधार्य्यतेजगदन्तप्रवि ष्टया ५

आनन्दगिरिकृतटीका ।

अचेतनवर्गमेकीकर्त्तुंप्रकृतेरष्टधापरिणाममभिधायविकारावच्छिन्नंकार्यक ल्यंचेतनवर्गमेकीकर्त्तुंपुरुषस्यचैतन्यस्यविद्याशक्त्यवच्छिन्नस्यापिप्रकृतित्वंकथयितु मुक्तांप्रकृतिमनूद्यदर्शयति अपरेति निकृष्टत्वंस्पष्टयति अनर्थकरीति अनर्थक

स्वामिकृतटीका ।

एवंश्रोतारमभिमुखीकृत्येदानींप्रकृतिद्वारा सृष्ट्यादिकर्त्तृत्वेनेश्वरतत्त्वंप्रति ज्ञातंनिरूपयिष्यन्परापरभेदेनप्रकृतिद्वयमाह भूमिरिति द्वाभ्यां भूम्यादीनिपञ्च भूतसूक्ष्माणि मनःशब्देनतत्कारणभूतोऽहङ्कारः बुद्धिशब्देनतत्कारणंमहत्तत्त्वं अहङ्कारशब्देनतत्कारणमविद्या इत्येवमष्टधाभिन्ना यद्वाभूम्यादिशब्दैःपञ्चमहा भूतानिसूक्ष्मैःसहैकीकृत्यगृह्यन्ते अहङ्कारशब्देनैवाहङ्कारस्तेनैवतत्कार्याणीन्द्रि यण्यपिगृह्यन्ते बुद्धिरितिमहत्तत्त्वं मनःशब्देनतुमनसैवोन्नेयमव्यक्तस्वरूपंप्रधा नमित्यनेनप्रकारेणमेप्रकृतिर्मायाख्याशक्तिरष्टधाभिन्नाविभागंप्राप्ता चतुर्विंशतिभे दभिन्नाषष्ठस्वेवान्तर्भावविवक्षयाष्टधाभिन्नेत्युक्तं तथाचक्षेत्राध्यायेइमामेवप्रकृतिंच तुर्विंशतितत्त्वात्मनाप्रपञ्चयिष्यति । महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेवच इन्द्रि याणिदशैकञ्चपञ्च चेन्द्रियगोचरा इति ४

भाषा अनुवाद ।

अपरकहेआठप्रकारनिकृष्टप्रकृतिकहिकर अवपरकहेउत्कृष्टप्रकृतिको कहते हैं किहेमहाबाहो यहपूर्वकहीजोअष्टप्रकारकीप्रकृति सोअपरकहे नि कृष्टहै क्योंकि वहजडऔउत्तमप्रकृतिकेअधीनहै किन्तुऔरपरकहेउत्कृष्टमे रीप्रकृति व्यवहारिकजीवस्वरूप इसप्रकृतिसेभिन्नजानो जोइसजगत्कोधारण करतीहै अर्थात्इसकेउत्कृष्टतामे कारणयह किक्षेत्रज्ञरूपचेतन्यशक्तिक र्त्तृकस्वकर्मद्वारा यहसंसारस्थित है जीवस्वरूपविनाजगतधारणकैसेहो ५

CC-0. In Public Domain. Digitized by eGangotri

एतद्योनीनिभूतानि सर्व्वाणीत्युपधारय अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा ६

शाङ्करभाष्यं।

एतदिति एतद्योनीन्येतेपरापरेचेलक्षेत्रलक्षणे प्रकृतीयोनीयेषांभूतनांतान्येतद्योनीनिभूतानिसर्व्वाणीत्येवमुपधारयजानीहि यस्मान्ममप्रकृतिर्योनिःकारणंसर्व्वभूतानांअतोहंकृत्स्नस्यसमस्तस्यजगतःप्रभवःउत्पत्तिःप्रलयोविनाशस्तथाप्रकृतिद्वयद्वारेणाहंसर्व्वज्ञईश्वरोजगतःकारणमित्यर्थः ६

आनन्दगिरिकृतटीका

रत्वमेवस्फोरयति संसारेति कथञ्चिदप्यनन्यत्वव्यावृत्त्यर्थस्तूशब्दः अन्यामत्यन्तविलक्षणामितियावत् अन्यत्वमेवस्पष्टयति विशुद्धामिति प्रकृतिशब्दस्यावप्रयुक्तस्यार्थान्तरमाह ममेति प्रकृष्टमेवभोक्तृत्वेनस्पष्टयति जीवभूतामिति प्रकृत्यन्तरादस्याःप्रकृतेरवान्तरविशेषमाह ययेति नहिजीवरहितंजगद्धारयितुंशक्यमित्याशयेनाह अन्तरिति ५

उक्तप्रकृतिद्वये कार्यलिङ्गकमनुमानंप्रमाणयति एतद्योनीति प्रकृतिद्वयस्यजगत्कारणत्वेकथमीश्वरस्यजगत्कारणत्वंतदुपगतमित्याशङ्क्याह अहमिति एत

स्वामिकृतटीका।

अपरामिमांप्रकृतिमुपसंहरन्परांप्रकृतिमाह अपरेयमिति अष्टधा याप्रकृतिरुक्ताइयमपरानिकृष्टाजडत्वात्परार्थत्वाच्चइतःशब्दाशात्परांप्रकृष्टामन्यांजीवभूतांजीवस्वरूपांमेप्रकृतिंजानीहि परत्वेहेतुःययाचेतनयाक्षेत्रक्षस्वरूपयास्वकर्मद्वारेणेदञ्जगद्धार्यते ५

भाषा अनुवाद।

प्रकृतिकेपरऔअपर येदोभेददेखायकै अवप्रकृतिकेद्वारासृष्टिआदिकेआपहीकारणहैं सेईकारणत्वकहतेहैं किहेधनञ्जय क्षेत्रकहेशरीरऔक्षेत्रज्ञकहे जीव यहजोदोप्रकारकीप्रकृतिहैयोनिकहेकारणजिनका ऐसेस्थावरजङ्गमयावत्भू तइसीकारणसेउत्पन्नहैं यहजानो औरविशेषयहीहै किजड़रूपनिकृष्टप्रकृतिदेहरूपअनेकरूपभावतीहै औरमेराअंशजोचैतन्य सोभोक्तारूपशरीरमेप्रवेशकरकेअपनेकर्मकेअनुसार अनेकदेहधारणकरतारहताहै औरयहप्रकृतिहमीसेउत्पन्नहै औइसकारणभीहमकोजानोकिसम्पूर्णजगतकेप्रभवकहेउत्पन्नकरनेवाले औप्रलयकहेसंहारकर्त्ताभी हमहीं है ६

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

यस्मादेतत्ततः मत्तः इति मत्तः परमेश्वरात्परतरं अन्यत्कारणान्तरं किञ्चिन्नास्ति नविद्यते अहमेव जगत्कारणमित्यर्थः हेधनञ्जय यस्मादेवं तस्मान्मयि परमेश्वरे सर्व्वाणिभूतानि सर्व्वमिदं जगत्प्रोतमनुस्यूतमनुगतमनुविद्धं ग्रथितमित्यर्थः दीर्घतन्तुषुपटवत् सूत्रेचमणिगणाइव ७

आनन्दगिरिकृतटका ।

योनीत्युक्ते समनन्तरप्रकृतजीवभूतप्रकृतावेतच्छब्दस्याव्यवधानात्प्रवृत्तिमाशंक्य व्याकरोति एतदिति सर्व्वाणिचेतनाचेतनानिजनिमन्तीत्यर्थः सर्व्वभूतकारणत्वेनप्रकृतिद्वयमङ्गीकृतञ्चेत्कथमहमित्यथयुक्तमित्याशंक्याह यस्मादिति ममप्रकृतीपरमेश्वरस्योपाधितयास्थिते इत्यर्थः तर्हिप्रकृतिद्वयंकारणमीश्वरश्चेति जगतोऽनेकविधकारणाङ्गीकरणंस्यादित्याशंक्याह प्रकृतीति अपरप्रकृतिरचेतनत्वात्परप्रकृतेश्चेतनत्वेपिकिञ्चिज्ज्ञत्वात्ईश्वरस्यैवसर्व्वज्ञसर्व्वकारणत्वंयुक्तमित्याह सर्व्वज्ञेति ६

प्रधानात्परतोऽक्षरात्पुरुषवत्परमात्मनोपिपरादन्यत्परंस्यादित्याशंक्यप्रकृतिद्वयद्वारासर्वकारणत्वमीश्वरस्योक्तमुपजीव्यपरिहरति यस्मादिति नान्यदस्तिपरमित्यत्रहेतुमाह मयीति परतरशब्दार्थमाह अन्यदिति स्वातन्त्र्यव्याघातप्रयोजनमन्तरशब्दः निषेधफलंकथयति अहमेवेति सर्व्वजगत्कारणत्वेनसिद्धमर्थंदितीयार्द्धव्याख्यानेनविशदयति यस्मादिति अतोदीर्घेषुतिर्यञ्चुचपटघटितेषुतन्तुषुपटस्यानुगतिरवगम्यतेतद्वन्मय्येवानुगतंजगदित्याह दीर्घेति यथाचमणयःसूत्रेऽनुस्यूतास्तेनैवधीयन्तेतद्भावेविप्रकीर्यन्ते तथामय्येवात्मभूतेनसर्व्वंव्याप्तंततोनिष्कृष्टंविनष्टमेवस्यादितिश्लोकोक्तंदृष्टान्तमाह सूत्रेइति ७

स्वामिकृतटीका ।

अनयोःप्रकृतित्वंदर्शयन्स्वस्यतद्द्वारासृष्ट्यादिकारणत्वमाह एतदिति एतेचेतरचेतरज्ञस्वरूपेप्रकृतीयोनीकारणभूतेयेषां तानिएतद्योनीनिस्थावरजङ्गमात्मकानिसर्व्वाणिभूतानीतिउपधारयबुध्यस्व तत्रजड़ाप्रकृतिर्देहरूपेणपरिणमतेचेतनातुमदंशभूताभोक्तृत्वेनदेहेषुप्रविश्यस्वकर्मणातानिधारयति तेचमदीयेप्रकृतीमत्तःसम्भूतेअतोऽहमेवकृत्स्नस्यसप्रकृतिकस्यजगतःप्रभवः प्रकर्षेणभवत्यस्मादितिप्रभवःपरमकारणमहमित्यर्थः तथाप्रलीयतेऽनेनेतिप्रलयः संहर्त्तापिचहमेवेत्यर्थः ६

CC-0. In Public Domain. Digitized by eGangotri

मत्तःपरतरंनान्यत्किञ्चिदस्तिधनञ्जय मयिसर्व्वमिदंप्रोतंसूत्रेमणिगणाइव ७

शाङ्करभाष्यं।

केनकेनधर्म्मेणविशिष्टेत्वयिसर्व्वमिदं प्रोतमित्यच्यते रसइति रसोहमपांयः सारःरसस्तस्मिन्रसभूतेमय्याप्रोताइत्यर्थःएवंसर्व्वत्रयथाहमप्सु रस एवंप्रभास्मि शशिसूर्ययोःप्रणवःओङ्कारःसर्व्ववेदेषुतस्मिन्प्रणवभूतेमयि सर्व्ववेदाः प्रोताःतथा खेआकाशेशब्दःसारभूतःतस्मिन्मयिखंप्रोतं तथा पौरुषं पुरुषस्यभावःपौरुषंयतः पुंवृत्तिःनृषु तस्मिन्मयि पुरुषाःप्रोताः ८

आनन्दगिरिकृतटीका।

अवादीनांरसादिषु प्रोतत्वप्रतीतेस्त्वय्येवसर्व्वंप्रोतमित्ययुक्तमिति मत्वाऽच्छति केनेति तत्रोत्तरमुत्तरग्रन्थेनदर्शयति उच्यतइति सारोमधुरोहेतुरितियावत् रसोहमितिकथंतत्राह तस्मिन्निति अप्सुयोरसःसारस्तस्मिन्मयिमधुररसेकारणभूतेप्रोताआपइतिवदुत्तरत्रसर्वत्र व्याख्यानंकर्त्तव्यमित्याह एवमिति उक्तमर्थं दृष्टान्तंकृत्वा प्रभास्मीत्यादिव्यचष्टे यथेति चन्द्रादित्ययोर्याप्रभातद्भूतेमयितौप्रोता वित्यर्थः तत्रवाक्यार्थंकथयति तस्मिन्निति प्रणवभूतेतस्मिन् वेदानांप्रोतत्ववदाकाशेय.सारभूतःशब्दस्तद्रूपेपरमेश्वरेप्रोतमाकाशमित्याह तथेति पौरुषंनृष्विति भागंपूर्ववद्विभजते तथेत्यादिना पुरुषत्वमेवविशदयति यतइति पुंस्त्वसामान्यात्मकेपरस्मिन्नीश्वरेप्रोतास्तद्विशेषास्तदुपादानत्वेनतत्स्वभावत्वादित्यर्थः ८

स्वामिकृतटीका।

यस्मादेवंतस्मान्मत्तइति मत्तःसकाशात्परतरंश्रेष्ठंजगतःसृष्टिसंहारयोः स्वतन्त्रंकारणंकिञ्चिदपिनास्ति स्थितिहेतुरप्यहमेवेत्याह मयीति मयिसर्व्वमिदंजगत्प्रोतंग्रथितमाश्रितमित्यर्थःदृष्टान्तःस्पष्टः ७

जगत्स्थितिहेतुत्वमेवप्रपञ्चयति रसोऽसहमिति पञ्चभिः अप्सुरसोऽहंरसतन्मात्रस्वरूपयाविभूत्याआश्रयत्वेनाप्सुस्थितोऽहमित्यर्थः तथा शशिसूर्ययोःप्रभास्मि चन्द्रेसूर्येचप्रकाशरूपयाविभूत्यातदाश्रयत्वेन स्थितोऽहमित्यर्थः अन्यत्राप्येवंद्र

भाषा अनुवाद

हेधनञ्जय इसीसेहमसेऔरकोईभीजगतकीसृष्टिऔसंहारका श्रेष्ठस्वतन्त्र कारणनहींहै औरस्थितिकेभीहेतुहमहैं यहकहतेहैं किमेरेहीमेयह समस्त जगतग्रथितहैजैसेसूतमेमणिगणपोहेरहते औकपडेमेसूतओतप्रोतरहतेहैं ७

CC-0. In Public Domain. Digitized by eGangotri

रसोहमप्सुकौन्तेय प्रभास्मि शशिसूर्य्ययोः प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ८

शाङ्करभाष्यं ।

पुण्यइति पुण्यःसुरभिगन्धःपृथिव्याञ्चाहंतस्मिन्मयिगन्धभूते पृथिवीप्रोता पुण्यत्वंगन्धस्यस्वभावतएवपृथिव्यांदर्शितमवादिषुरसादेःपुण्यत्वोपलक्षणार्थमपुण्यत्वन्तु गन्धादीनामविद्याधर्म्माद्युपेक्षंसंसारिणांभूतविशेषसंसर्गनिमित्तंभवति तेजोदीप्तिश्चास्मिविभावसावग्नौ तथाजीवनंसर्वभूतेषु येनजीवन्तिसर्वाणिभूतानि तज्जीवनं तपश्चास्मितपस्विषु तस्मिन्तपसिमयि तपस्विनः प्रोताः ९

आनन्दगिरिकृतटीका ।

मयिसर्वमिदंप्रोतमित्यस्यैवपरिपूरणार्थंप्रकारान्तरमाह पुण्यइति पृथिव्यां पुण्यशब्दितोयःसुरभिगन्धःसोहमस्मीत्यत्र वाक्यार्थंकथयति तस्मिन्निति कथंपृथिव्यांगन्धस्यपुण्यत्वंतत्राह पुण्यत्वमिति यत्तुपृथिव्यांगन्धस्यस्वाभाविकंपुण्यत्वंदर्शितंतदवादिषुरसादेःस्वाभाविकपुण्यत्वस्योपलक्षणार्थमित्याह पृथिव्यामिति प्रथमोत्पन्नाःपञ्चापिगुणाःपुण्याएवसिद्धादिभिरेवभोग्यत्वादितिभावः कथंतर्हिगन्धादीनामपुण्यत्वप्रतिभानंतत्राह अपुण्यत्वन्विति तदेवस्फुटयति संसारिणामिति गन्धादयःस्वकार्यैर्भूतैःसहपरिणममानाःप्राणिनांपापादिवशादपुण्याःसंपद्यन्तइत्यर्थः पञ्चाग्नौतेजःतद्भूतेमयि प्रोतोऽग्निरित्याह तेजइति जीवनभूतेच मयि सर्वाणिभूतानि प्रोतानीत्याह तथेति जीवनशब्दार्थमाह येनेति अन्नरसेनामृताख्येनेत्यर्थः तपश्चास्मीत्यादेस्तात्पर्यमाह तस्मिन्निति चित्तैकाग्र्यमनाशकादिवातपस्तदात्मनीश्वरेप्रोतास्तपस्विनोविशेषणाभावेविशिष्टस्यवस्तुनोभावादित्यर्थः ९

स्वामिकृतटीका ।

दृष्टं सर्वेषुवेदेषुवैखरीरूपेषुतन्मूलभूतओङ्कारोऽस्मि खेआकाशे शब्दःशब्दतन्मात्ररूपोऽस्मिनृषुपुरुषेषुपौरुषमुद्यमोऽस्मिउद्यमेपुरुषास्तिष्ठन्ति ८

भाषा अनुवाद

इसश्लोकसेलेकरपांचश्लोकतक जगतकीस्थितिकाकारणविस्तारकरि कहतेहैं किहेकुन्तीपुत्रअर्जुन जलमेंरसरूपऔचन्द्रसूर्यमेंप्रकाशरूप और वेदमे मूलभूत प्रणवओंकाररूपमैहौंहूं तथाआकाशमेंशब्दरूप औपुरुषोंमेंपौरुष कहे उद्यमरूपभी मैहौं यहजानो ८

CC-0. In Public Domain. Digitized by eGangotri

पुण्योगन्धःपृथिव्याञ्चतेजश्चास्मिविभावसौ जीवनंसर्व्वभूतेषुतपश्चास्मितपस्विषु ९
बीजंमांसर्व्वभूतानांविद्धिपार्थसनातनं बुद्धिर्बुद्धिमतामस्मितेजस्तेजस्विनामहं १०

शाङ्करभाष्यं

बीजमिति बीजंप्ररोहकारणंमांविद्धिसर्व्वभूतानां हेपार्थ सनातनंचिरन्तनं किञ्चबुद्धिर्विवेकशक्तिरन्तःकरणस्यबुद्धिमतांविवेकशक्तिमतामस्मि तेजःप्रागल्भ्यं तद्वतांतेजस्विनामहं १०

आनन्दगिरिकृतटीका

ननुसर्व्वाणिभूतानिस्वकारणेप्रोतानि कथंतेषांत्वयिप्रोतत्वं तत्राह बीजमिति बीजान्तराद्यपेक्षयानवस्थांवारयति सनातनमिति चैतन्यस्याभिव्यञ्जकं तत्त्वनिश्चय सामर्थंबुद्धिस्तद्वतांयाबुद्धिस्तद्भूतेमयिसर्व्वेबुद्धिमन्तःप्रोताभवन्तीत्याह किञ्चेति प्रागल्भ्यवतांयत्प्राभल्भ्यंतद्भूतेमयितद्वन्तःप्रोताइत्याह तेजइति तद्धि प्रागल्भ्यंपरा भिभवसामर्थ्यं परैश्चाप्रधृष्यत्वं १०

स्वामिकृतटीका ।

किञ्चपुण्यइति पुण्योऽविकृतो गन्धोगन्धतन्मात्रंपृथिव्याश्रयभतोऽहमित्यर्थः यद्वाविभूतिरूपेणाश्रयत्वस्यविवक्षितत्वात् सुरभिगन्धस्यैवोत्कृष्टतयाविभूतित्वात् पुण्योगन्धइत्युक्तं तथाविभावसौअग्नौयत्तेजोदुःसहादीप्तिस्तदहं सर्व्वभूतेषुजीवनं प्राणधारणमायुरहमित्यर्थः तपस्विषुवानप्रस्थादिषुद्वन्द्वसहनरूपंतपोऽस्मि ९

किञ्चबीजमिति सर्व्वेषांचराचराणांभूतानां बीजं सजातीर्योत्पादनसा र्थ्यं सनातनंनित्यंउत्तरोत्तरसर्व्वकार्येष्वनुस्यूतं तदेवबीजंमद्विभूतिंविद्धि नतु प्रकृति

भाषा अनुवाद

औरपवित्रगन्धरूपमात्रापृथिवीमे और तेजरूपअग्निमे तथा जीवनरूपसब भूतकहेप्राणियोंमे औतपस्वियोंमेतपरूपमैहूं अर्थात्मेरीहीविभूति है ९

औरहेपार्थ स्थावरजङ्गमजोकुछभूतमात्रहैं उसकासनातनकहेउत्तरोत्तर समस्तकार्यमेअनुगतकहेप्राप्तअनाशीबीजरूपहमैजानो अर्थात्समानजातीयकार्य उत्पादनसामर्थ्यरूपजोकारण सोभीमेरीहीविभूतिजानो परन्तुसामान्यबीजजै सेअंकुरहोनेपरनष्टहोतेहैं तैसेमेराविभूतिरूपबीजनाशनहीं होता इसीसेस नातनहै औरबुद्धिमानोकीबुद्धिकहेविवेकशक्तिमैहींहौं और तेजस्वियोंके तेज कहेप्रगल्भताप्रलापरूपअर्थात् ढीठेपनकेबोलभीमहींहूं यहजानो १०

CC-0. In Public Domain. Digitized by eGangotri

बलंबलवतांचाहंकामरागविवर्जितं धर्म्माविरुद्धोभूतेषुभूकामोऽस्मिभरतर्षभ ११

शाङ्करभाष्यं।

बलमिति बलंसामर्थ्यमोजोबलवतामहंतच्चबलं कामरागविवर्जितं कामश्च रागश्चकामरागौकामस्तृष्णाअसन्निकृष्टेषुविषयेषुरागोरञ्जना प्राप्तेषुविषयेषुता भ्यांकामरागाभ्यांविवर्जितंदेहादिधारणमात्रार्थंबलंसत्त्वमहमस्मि ननु यत् संसा रिणांतृष्णारागकारणं किञ्चधर्म्माविरुद्धोधर्म्मेणशास्त्रार्थेनअविरुद्धोयःप्राणिषुभू तेषुकामोयथादेहधारणमात्राद्यर्थोऽशनपानादिविषयःकामोस्मिहेभरतर्षभ ११

आनन्दगिरिकृतटीका

यच्चबलवतांबलंतद्भूतेमयितेषांप्रोतत्वमित्याह बलमिति कामक्रोधादिपूर्वक स्यापिबलस्यानुमतिं वारयति तच्चेति कामरागयोरेकार्थत्वमाशंक्यार्थभेदमावेद यति कामस्तृष्णेत्यादिना विशेषणसामर्थ्यसिद्धंव्यावर्त्यदर्शयति नत्विति शास्त्रा र्थाविरुद्धकामभूतेमयि तथाविधकामवतांभूतानांप्रोतत्वंविवक्षित्वाह किञ्चेति ध र्म्माविरुद्धंकाममुदाहरति यथेति ११

स्वामिकृतटीका

व्यक्तिरिवनश्यत् तथाबुद्धिमतांबुद्धिःप्रज्ञाहमस्मि तेजस्विनां प्रगल्भानांतेजप्रा गल्भ्यमहं १०

किञ्च बलमिति कामोऽप्राप्तेषुवस्तुष्वभिलाषोराजसःरागःपुनरभिलषितेऽ र्थेप्राप्तेऽपिपुनरधिकेऽर्थेचित्तरञ्जनात्मकस्तृष्णापर्यायस्ताभ्यांसंस्ताभ्यांविवर्जितं बल वतांबलमस्मि सात्त्विकंस्वधर्म्मानुष्ठानमामर्थ्यमहमित्यर्थः धर्म्मेणाविरुद्धःस्वदारेषु पुत्रोत्पादनमात्रोपयोगी कामोऽहमिति ११

भाषाअनुवाद।

औरकामरागविवर्जितअर्थात्कामकहेअप्राप्तविषयमे अभिलाषस्वरूपजोर जोगुणकाकार्यइच्छा औररागकहेअभिलषितअर्थप्रायकेउससेभीअधिकके अर्थ जोचित्तकाअनुरागकहेतमोगुणकाकार्यतृष्णारूपइच्छाहै इनदोनोकोछोड़िओ रयावतबलवानोंकाबलभीमैहौं अर्थात्सात्विकस्वधर्म्मानुष्ठानकीसामर्थ्यमैहूं और हेभरतर्षभ भरतवंशमेश्रेष्ठअर्जुन धर्म्मअविरुद्धअर्थात्स्वभार्यामेपुत्रमात्रउत्पन्नक रनेकेअर्थउपयोगीजोकामभोग सोभीमैहींहूं धर्म्मअविरुद्धकहनेसेवधआदि का मका निषेधआया ११

CC-0. In Public Domain. Digitized by eGangotri

येचैवसात्त्विकाभावाराजसास्तामसाश्चये मत्तएवेतितान्विद्धिनत्वहंतेषुते मयि १२

शाङ्करभाष्यं

किञ्च येचैवेति येचैवसात्त्विकाःसत्त्वनिर्वृताःभावापदार्था राजसाःरजो निर्वृताराजसास्तमोनिर्वृताश्चयेकेचित्प्राणिनांस्वकर्म्मवशात् जायन्तेभावाः तान्मत्तएवजायमानानित्येवंविद्धि सर्व्वान्समस्तानेव यद्यपितेमत्तोजायन्ते तथापि नत्वहंतेषुतदधीनस्तद्वशो यथासंसारिणस्तेपुनर्म्मयिमद्वशामदधीनाः १२

एवम्भूतमपिपरमेश्वरंनित्यशुद्धबुद्धमुक्तस्वभावंसर्व्वभूतात्मानंनिर्गुणंसंसारदोषबीजप्ररोहकारणंमानाभिजानाति जगदित्यनुक्रोशंदर्शयति भगवान्तच्चकिंनि

आनन्दगिरिकृतटीका

चिदानन्दयोरभिव्यञ्जकानांभावानां ईश्वरात्मत्वाभिधानादन्येषामतदात्मत्व प्राप्तावुक्तं किञ्चेति प्राणिनांवैचित्र्येहेतुं दर्शयन्वाक्यार्थमाह येकेचिदिति तर्हि पितुरिवपुत्राधीनत्वंततोजायमानानांतदधीनत्वंतवापिस्यादिति विक्रियावत्त्वदृष्य त्वप्रसक्तिरित्याशंक्याह यद्यपीति ममपरमार्थत्वात्तेषांकल्पितत्वान्नतद्गुणदोषौ मयिस्याताम्इत्यर्थः तेषामपितद्देवस्वतन्त्रतासम्भवात् किमिति कल्पितत्वमित्या शंक्याह तेपुनरिति त्रिविधानांभावानांनस्वातन्त्र्यमीश्वरकार्यत्वेनतदधीनत्वात्तथा चकल्पितस्याधिष्ठानसत्ताप्रतीतिन्यायेनतद्वत्त्वात्तन्मात्रत्वसिद्धिरित्यर्थः १२

स्वामिकृतटीका

किञ्च येचैवेति येचान्येपिसात्त्विकाभावाःशमदमादयःराजसाश्चहर्षदर्पादयः तामसाश्चयेशोकमोहादयःप्राणिनांस्वकर्म्मवशाज्जायन्तेतान्सर्व्वान्मत्तएवजाता न्विद्धि मदीयप्रकृतिगुणत्रयकार्यत्वात्एवमपितेष्वहं न वर्त्ते जीववत्तदधीनोऽहं नभवामीत्यर्थः तेतुमदधीनाःसन्तो मयिवर्त्तन्तइत्यर्थः १२

भाषा अनुवाद

और जोसात्त्विकभावअर्थात् शमदमआदि और राजसभावकहे हर्षगर्वआदि औतामसभावजोशोकमोहादि येसबप्राणीमात्रकोस्वकर्म्म वशते जन्मैहैं सोमेरे सेउत्पन्नजानोजिसहेतु वैमेरीमायाकेतीनगुणोंकेकार्यहैं किन्तुतौभीउनमेहमवर्त्त तेनहीं अर्थात् जीवकेसमानइनगुणोंकेअधीनहोतेनहीं बलुयेगुणमेरे अधीन होयमेरेमेरहतेहैं सोईकहाकिवेमेरेमेहैं औरमैउनमेनहीं हौं जैसेसंसारी मेरेअधीनहै यह जानो १२

CC-0. In Public Domain. Digitized by eGangotri

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदंजगत् मोहितंनाभिजानातिमामेभ्यः परमव्ययं १३

शाङ्करभाष्यं ।

मित्तंजगतोऽज्ञानमुच्यते त्रिभिरिति त्रिभिर्गुणमयैर्भावैर्गुणविकारैः रागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्यथोक्तैः सर्व्वमिदंप्राणिजातंजगत् मोहितमविवेकतामापादितंसत् नाभिजानाति मामेभ्योयथोक्तेभ्योगुणेभ्यः परंव्यतिरिक्तंविलक्षणञ्चाव्ययंव्ययरहितंजन्मादिसर्व्वभावविकारवर्जितमित्यर्थः १३

कथंपुनर्दैवीमेतांत्रिगुणात्मिकांवैष्णवींमायामतिक्रामन्तीत्युच्यते दैवीति दैवीदेवस्यममेश्वरस्यविष्णोःस्वभावभूता हियस्मात् एषायथोक्तागुणमयीममायादुरत्ययादुःखेनात्ययोऽतिक्रमणंयस्याःसादुरत्यया तत्रैवंसतिसर्वधर्म्मान्परित्यज्यमामेवमायाविनंस्वात्मभूतंसर्वात्मनायेप्रपद्यन्ते तेमायानेतांसर्व्वभूतचित्तमोहिनींतरन्त्यतिक्रामन्ति संसारबन्धनात् मुच्यन्तइत्यर्थः १४

आनन्दगिरिकृतटीका ।

सतीश्वरस्यस्वातन्त्र्येनित्यशुद्धत्वादौचकुतोजगतस्तदात्मकस्यसंसारित्वमित्याशंक्यतदज्ञानादित्याह एवम्भूतमपीति यद्यप्रपञ्चोविक्रियश्चत्वंकस्मात्त्वामात्मभूतंस्वयंप्रकाशंसर्व्वोजनस्तथानजानातीतिमत्वाशङ्कते तच्चेति श्लोकेनोत्तरमाह उच्यतइति एभ्यःपरमित्यप्रपञ्चकत्वमुच्यते अव्ययमिति सर्व्वविक्रियाराहित्यं १३

स्वामिकृतटीका ।

एवंभूतमीश्वरंत्वामेवंजनःकिमिति नजानातीत्यतआह त्रिभिरिति त्रिभिस्त्रिविधैरेभिःपुर्व्वोक्तैर्गुणमयैःकामलोभादिभिर्गुणविकारैर्भावैःस्वभावैर्मोहितमिदंजगत् अतोमांनाभिजानाति कथंभूतंएभ्योभावेभ्यःपरंएभिरस्पृष्टंएतेषांनियन्तारंअतएवाव्ययंनिर्व्विकारमित्यर्थः १३

भाषाअनुवाद

जोकहोकिऐसेपरमेश्वरको किसकारणसेलोगनहींजानतेहैं इसपरकहते हैं किपूर्व्वोक्तयहीतीनिप्रकारकामलोभआदिगुणविकारस्वभाववशते अविवेकताकोप्राप्तप्राणी मोहितहोय हमकोनहींजानते हैं औरआपकैसेहैं इसअपेक्षासे कहते हैं किहमयेतीनभावसेपरकहेसंस्पर्शरहितऔरइनसबभावोंकेनियन्ताइसीसेअव्ययकहे निर्व्विकारभैहौं १३

CC-0. In Public Domain. Digitized by eGangotri

दैवीह्येषागुणमयीममायादुरत्यया मामेवयेप्रपद्यन्तेमायामेतांतरन्तिते १४
नमांदुष्कृतिनोमूढाःप्रपद्यन्तेनराधमाः माययापहृतज्ञानाआसुरंभावमाश्रिताः१५

आनन्दगिरिकृतटीका

यथोक्तःनादिसिद्धमायायाःवश्यपरिवर्जनायोगाज्जगतोनकदाचिदपितत्त्वबोधसमुदयसम्भावनेत्याशङ्कते कथंपुनरिति भगवदेकशरणतयातत्त्वज्ञानद्वारेणमायातिक्रमःसम्भवतीतिपरिहरति उच्यतइति कथंदुरत्ययत्वेनतदत्ययः स्यादितित्राह मामेवेति प्रधानस्येवस्वातन्त्र्यंमायायाव्युदस्यति देवस्येति स्वातन्त्र्यमायात्वानुपपत्तिंहिशब्दद्योतितांहेतुंकरोति यस्मादिति अनुभवसिद्धासानाकस्मादपलापमर्हतीत्याह एषेति जगतस्तत्वप्रतिबन्धकीभूता गुणाःसत्वादयो ममेति प्रागुक्तमेवमायायाःसम्बन्धमनूद्यविधित्सितंदुरत्ययत्वंविभजते दुःखेनेति मामेवेत्यादिव्याचष्टेतवेति तस्मिन्मायारूपेयथोक्तरीत्यादुरत्ययेसतीतियावत् मामेवेत्येवकरेण मायायावेद्यकोटिनिवेशाभावोविवक्षते सर्वात्मनाकर्म्मानुष्ठानादिव्यग्रतामन्तरेणेत्यर्थः मयातिक्रमेमोहातिक्रमोभवतीतिमत्वाविशिनष्टि सर्वेति मायातत्प्रयुक्तमोहयोरतिक्रमेपि कथंपुरुषस्यपुरुषार्थसिद्धिरित्याशंक्याह संसारेति १४

स्वामिकृतटीका।

केतर्हित्वांजानन्तीत्यतआह दैवीति दैवीअलौकिकीअत्यद्भुतेत्यर्थःगुणमयीसत्त्वादिगुणविकारात्मिकाममपरमेश्वरस्यशक्तिर्म्मायादुरत्ययादुस्तरा हि प्रसिद्धमेतत्तथापिमामेवेत्येवकारेणाव्यभिचारिण्याभक्त्या ये प्रपद्यन्तेभजन्ति मायामेतांसुदुस्तरामपि तेतरन्ति ततोमांजानन्तीति भावः १४

भाषा अनुवाद।

लोकहोकितुमकोफेरिकौनजाननेशकै इसपरकहतेहैं किदैवीकहेअद्भुतऔसत्वआदिगुणबिकारात्मकमेरीशक्तिजोदुस्तरमायाहै इसकोजो अव्यभिचारिणीभक्तिसेहमैभजे सोईहमारीमायाकेपारहोके हमकोजानिशकैहै १४

तौफेरिसबमनुष्यतुमकोकाहेनहींभजतेहैं जोयह कहो तो उत्तरसुनो किमनुष्योंकेमध्यमेजोअधमहैं तेईमेरीभजननहीं करतेहैं कारणयह किवे लोग पापपरायणऔमायासेअपहृतज्ञान अर्थात् शास्त्रयाआचार्यकेद्वारा ज्ञानहोनेसेभीमैउनकोनिस्तारकर्ताहूंऔरसोरहें अध्यायमेचौथेश्लोकसेकहैंगे जोआसुरभावउसकोप्राप्तहोयनेरीभक्तिनहींकरतेहैं १५

CC-0. In Public Domain. Digitized by eGangotri

चतुर्विधाभजन्तेमांजनाःसुकृतिनोऽर्जुन। आर्त्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ १६

शाङ्करभाष्यं

यदित्वांप्रपन्नाःमायामेतांतरन्तिकस्मात्त्वामेवसर्व्वेनप्रपद्यन्तेइत्युच्यतेनमामिति नमांपरमेश्वरंदुष्कृतिनःपापकारिणोमूढाःप्रपद्यन्तेनराधमाःनराणांमध्ये अधमा निकृष्टास्तेचमायययापहृतज्ञानाआसुरंभावंहिंसानृतादिलक्षणमाश्रिताः १५

येपुनर्नरोत्तमाःपुण्यकर्माणःचतुर्विधेति चतुर्विधाश्चतुःप्रकाराभजन्ते सेवन्तेमांजनाःसुकृतिनःपुण्यकर्म्माणोहेअर्जुनआर्त्तःअर्त्तिंपरिगृहीतः तत्करव्या धिरोगादिनाअभिभूतः अभिभवंआपन्नोजिज्ञासुर्भगवत्तत्त्वंज्ञातुमिच्छतियोऽर्थार्थी धनकामोज्ञानीविष्णोस्तत्त्वविच्चहेभरतर्षभ १६

आनन्दगिरिकृतटीका

भगवन्निष्ठायामयातिक्रमहेतुत्वेतदेकनिष्ठत्वमेवसर्वेषामुचितमिति पृच्छति यदीति पापकारित्वेनाविवेकभूयस्त्वयाहिंसानृतादिभूयस्त्वाद्बहूयसांजन्तूनांन भगव न्निष्ठत्वसिद्धिरित्याहउच्यतइति भौढ्यंपापकारित्वेहेतुरतएवनिकृष्टा.संदूषितमि वतिरस्कृतंज्ञानंस्वस्वरूपचैतन्यमेषामितितेतथा १५

केषां तर्हितन्निष्ठतासुकरेति तत्राह येपुनरिति तेभजन्तेभगवन्तमिति

स्वामिकृतटीका

किमिति तर्हिसर्वेत्वामेवनभजन्तीत्यतआहनमामिति नरेषुयेऽधमास्तेमांन प्रपद्यन्तेनभजन्तिअधमत्वेहेतुःमूढाविवेकशून्याःतत्कुतोदुष्कृतिनःपापशीला अ तोमयापहृतंनिरस्तंशास्त्राचार्योपदेशाभ्यांजातमपिज्ञानंयेषांतेतथाअतएवदम्भोद र्पोऽभिमानश्चक्रोधपारुष्यमेवचेत्यादिनाबध्यमाणमासुरंभावंस्वभावंप्राप्तास्तोन मांभजन्ति १५

भाषा अनुवाद

सत्कर्म्मकारीमनुष्यहीमेरीभजनकरतेहैं औरवैभीपुण्यकेन्यूनअधि बहुतेचारिप्रकारकेहैसोईकहतेहैं किहेअर्जुनजोपूर्वजन्मअवधिपुन्यवानहैं ते ईहमकोभजतेहै चारिप्रकारभक्तयेहैं प्रथमआतुरकहेरोगग्रस्तदूसरा जिज्ञा सुकहेआत्मज्ञानकीइच्छाहें जिसैतीसराअर्थार्थीअर्थात्लोकयापरलोककाभाग साधनअर्थाकांक्षीचौथाज्ञानीहै परयेचारोपूर्वपुण्यकेप्रभावहोनेसेभजतेहै नहीं तोऔरओरदेवतोंकोभक्तिकरिअपनाकामनिकारलेतेपरबहकामकामनहीहै १६

CC-0. In Public Domain. Digitized by eGangotri

तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियः १७

शाङ्करभाष्यं

तेषामिति तेषांचतुर्णांमध्येज्ञानीतत्ववित्त्वान्नित्ययुक्तो भवत्येकभक्तिश्चान्यस्य भजनीयस्यादर्शनादतःसएकभक्तिर्विशिष्यतेविशेषमाधिक्यमापद्यते अतिरिच्यत इत्यर्थःप्रियोहियस्मादहमात्माज्ञानिनोऽतस्तस्याहमत्यर्थंप्रियःप्रसिद्धंहिलोके आत्मा प्रियोभवति इतितस्मात्ज्ञानिनआत्मत्वाद्वासुदेवःप्रियोभवतीत्यर्थःसचज्ञानी ममवा सुदेवस्यात्मैवेति ममात्यर्थंप्रियः १७

आनन्दगिरिकृतटीका

शेषः येत्वां भजन्ते तेकिंसर्वेमायांतरन्तिनैवंप्रार्थनावैचित्र्यादित्याह चतुर्विधाइति आपन्नस्तन्निवृत्तिमिच्छन्नितिशेषः तत्वविदितिशब्दज्ञानवानात्मतत्त्वसाक्षात्कार मात्रार्थमुमुक्षुरित्यर्थ १६

चतुर्विधानांतेषांसुकृतिनांभगवदभिमुखानांतुल्यत्वमाशंक्याह तेषामितितस्य विशिष्यमाणत्वेहेतुमाह प्रियोहीति नित्ययुक्तत्वंभगवत्यात्मनि सदासमाहितचेत स्त्वं असारेसंसारेभगवानेवसारःसोहमस्मीत्येकस्मिन्नद्वितीयेस्वस्मादत्यन्तमभिन्नेभ गवति भक्तिःस्वेहविशेषोस्त्येकभक्तिःतस्याधिक्येहेतुंविवृणोति प्रियोहीत्यादिना भगवतोज्ञानिनश्चपरस्परंप्रेमास्पदत्वेप्रसिद्धिप्रमाणयति प्रसिद्धंहीति आत्मनोज्ञा निनंप्रति प्रियत्वेपिभगवतोवासुदेवस्यकथंतंप्रतिप्रियत्वमित्याशंक्याह तस्मादिति

स्वामिकृतटीका।

सुकृतिनस्तुमांभजन्त्येवतेचसुकृततारतम्येनचतुर्विधाइत्याह चतुर्विधाइतिपूर्व जन्मसुयेकृतपुण्यास्तेमांभजन्तितेचतुर्विधाःआर्त्तोरोगाद्यभिभूतःसयदि पूर्वं कृतपु ण्यस्तर्हिमांभजतिअन्यथाक्षुद्रदेवताभजनेनसंसरति एवमुत्तरत्रापिद्रष्टव्यंजिज्ञासु रात्मज्ञानेच्छुरर्थार्थीत्रत्रपरत्रच भोगसाधनभूतार्थप्रेप्सुः ज्ञानीचात्मवित् १६

भाषा अनुवाद।

परन्तुइनकेमध्यमेज्ञानीभक्तश्रेष्ठहै सोईकहते हैं किज्ञानीपुरुषनित्ययुक्तअ र्थात्सर्वदाहीमेरेमेनिष्ठरहताहैऔर केवलहमाराहीएक भक्तऔर ज्ञानीकोश रीरआदिमेअहंबुद्धिकाअभावरहनेसेमनकीविक्षेपशक्तिकेअभावसे नित्ययुक्तव उसकोहै औरइसज्ञानीकोहमअत्यन्तप्रियहैं और वहभीहमकोअतिप्रियहै इन कारणोंसेज्ञानीभक्तउत्तमहै १७

CC-0. In Public Domain. Digitized by eGangotri

उदाराः सर्व्वएवैतेज्ञानीत्वात्मैवमेमतं आस्थितःसहियुक्तात्मामामेवानुत्तमांगतिं १८

शाङ्करभाष्यं ।

नतर्हिआर्त्तादयस्त्वयोवासुदेवस्याप्रियाःनकिंतर्हि उदाराइति उदाराउत्कृष्टाःसर्व्वएवैतेत्रयोपिममप्रियाएवेत्यर्थः नहिकश्चिन्मद्भक्तोममवासुदेवस्याप्रियोभवतीति ज्ञानीत्वत्यर्थंप्रियोभवतीतिविशेषःतत्कस्मादित्याह ज्ञानीत्वात्मैवनान्योमदिति मेममतंनिश्चयः आस्थितआरोढुं प्रवृत्तःसचज्ञानी हियस्मादहमेवमगवान्वासुदेवोनान्योस्मीत्येवंयुक्तात्मा समाहितचित्तःसन्मामेवपरंब्रह्म गन्तव्यमनुत्तमांगतिं गन्तुं प्रवृत्तइत्यर्थः १८

आनन्दगिरिकृतटीका

अहंज्ञानीनोनिरुपाधिकप्रेमास्पदंपरमपुरुषार्थत्वेनात्मत्वेनचगृहीतत्वादित्यर्थःज्ञानिनोपिभगवन्तंप्रतिप्रियत्वंप्रकटयति सचेति १७

ज्ञानीचेदत्यर्थमीश्वरस्यप्रियोभवति तर्हिविशेषणसामर्थ्यादितरेषामप्रियत्वं प्राप्तमितिशङ्कते नतर्हीति तेषांभगवन्तंप्रति प्रियतमत्वविवक्षितमित्याह नेति अत्यर्थमिति विशेषणस्यतर्हिकिंप्रयोजनमितिपृच्छति किंतर्हीति सर्व्वेषांभगवदभिमुखत्वादुत्कर्षेपिज्ञानिनितदतिरेकमङ्गीकृत्य विशेषणमित्याह उदाराइति किंतत्प्रमाणमित्याशंक्य ईश्वरज्ञानमित्याह मेममतमिति ज्ञानीत्वात्मैवेत्यत्रहेतुमाह आस्थितइति सर्व्वशब्दस्यज्ञानिव्यतिरिक्तविषयत्वमाह त्रयोपीति ज्ञानिव्यति

स्वामीटीका ।

तेषांमध्येज्ञानी श्रेष्ठइत्याह तेषामिति तेषांमध्येज्ञानीविशिष्टःतत्रहेतवःनित्ययुक्तःसदामन्निष्ठःएकस्मिन्मय्येवभक्तिर्यस्यतःज्ञानी नोदेहाद्यभिमानाभावेन चित्तविक्षेपाभावान्नित्ययुक्तत्वमेकान्तभक्तित्वञ्चसम्भवतिनान्यस्य अतएव तस्याहमत्यन्तप्रियःसचममतस्माद्धेतैर्नित्ययुक्तत्वादिभिश्चतुर्भिर्हेतुभिःसउत्तमइत्यर्थः १७

भाषा अनुवाद ।

तोक्याबाकीतीनिप्रकारकेभक्तसंसारगतिकोप्राप्तहोतेहैं ऐसीशङ्काकोबारबारनिषेधकरिकहतेहैं कि नहीं नहींभक्तभीउदारकहेमहानहैं अर्थात्मोक्षपावनेकेयोग्यहैं परन्तुमेरीयहअभिप्रायहै किज्ञानीभक्तमेराहीस्वरूपहै जिसहेतुवहमदेकचित्तहै इससेसर्व्वोत्तमगतिरूपहमकोआश्रयकरकेऔरकोई फलकीइच्छानहींरखताहै १८

CC-0. In Public Domain. Digitized by eGangotri

बहूनांजन्मनामन्तेज्ञानवान्मांप्रपद्यते वासुदेवःसर्वमिति समहात्मासुदुर्लभः १९

शाङ्करभाष्यं ।

ज्ञानीपुनरपिस्तूयते बहूनामिति बहूनांजन्मनांज्ञानार्थसंस्कारार्जनाश्रयाणांअन्तेसमाप्तौज्ञानवान्प्राप्तपरिपाकज्ञानोमांवासुदेवंप्रत्यगात्मानंप्रत्यक्षतःप्रतिपद्यते कथंवासुदेवःसर्वमिति यएवंसर्वात्मानंमांप्रतिपद्यते समहात्मानतत्समोन्योस्त्यधिकोवातःसुदुर्लभोमनुष्याणांसहस्रेष्वित्युक्तं १९

आनन्दगिरिकृतटका ।

रिक्तानांभगवदभिमुखत्वेपिज्ञानाभावापराधान्नभगवत्प्रीतिविषयतेत्याशंक्याह न हीति कस्तर्हिज्ञानवति सति विशेषस्तत्राह ज्ञानीत्विति तमेवविशेषं प्रश्नपूर्वकंप्रकटयति कस्मादित्यादिना सर्वमात्मानं पश्यतोपिअपक्षपातिनःतस्यतवकथंयथोक्तोनिश्चयःस्यादित्याशंक्याश्वितइत्येतत्व्याकरोति आरोढुमिति आरोहेहेतुंसूचयति सचज्ञानीतिअारढुंप्रवृत्तमेवस्फुटयति मामेवेति १८

उत्तरश्लोकस्यगतार्थत्वंपरिहरति ज्ञानीति ज्ञानार्थसंस्कारोवासनातत्तज्जन्मनि पुण्यकर्मानुष्ठानजनितावुद्धिशुद्धिस्तदाश्रयाणां तद्वतामनन्तानांजन्मनामिति यावत् ज्ञानवत्त्वं प्राक्तनेष्वपिजन्मसुसम्भावितमित्याशंक्याह प्राप्तेति ज्ञानवतो भगवत्प्रतिपत्तिंप्रश्नद्वाराविवृणोति कथमिति यथोक्तज्ञानस्यतद्वतश्चदुर्लभत्वंसूचयति यएवमिति महत् सर्वोत्कृष्टमात्मगोचरं चित्तमस्येति महात्मत्वेफलितं हेतुमाह अतइति तत्रवाक्योपक्रमानुकूल्यंकथयति मनुष्याणामिति १९

स्वामिकृतटीका ।

तर्हिइतरेलयस्तज्ज्ञाःकिंसंसरन्ति नहिनहीत्याह उदाराइति सर्वेऽप्येते उदारामहान्तःमोक्षभाजएवेत्यर्थःज्ञानीतुपुनरात्मैवेति मेमतंनिश्चयःहियस्मात् सज्ञानीयुक्तात्मामदेकचित्तःसन्नविद्यते उत्तमायस्थास्तामनुत्तमांऋद्धिंउत्तमांगतिं मामेवाश्रितआश्रितवान् मत्व्यतिरिक्तमन्यत्फलंनमन्यतइत्यर्थः १८

भाषा अनुवाद ।

ऐसेभक्तअतिदुर्लभहैं यहकहते हैं अनेकजन्मसेकुछकुछपुण्यसंचितकरे इकट्ठीहोनेसे शेषजन्ममेतत्त्वज्ञानीहोयकरयहजोचराचरात्मकहै स्थावरजंगमरूपब्रह्माण्ड सोसम्पूर्णएकवासुदेवमात्रहै इसप्रकारसर्वत्रआत्मदृष्टिकेद्वारा हमकोभजताहै अपरिच्छिन्नकहे अबाधितदृष्टिसे ऐसामहात्माज्ञानीदुर्लभहै १९

CC-0. In Public Domain. Digitized by eGangotri

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः तंतंनियममास्थायप्रकृत्यानियतास्वया २०

शाङ्करभाष्यं

आत्मैवसर्व्वंवासुदेवइत्येवमप्रतिपत्तौकारणमुच्यते कामैरिति कामैस्तैस्तैः पुत्रपशुस्वर्गादिविषयैर्हृतज्ञानाअपहृतविवेकविज्ञानाः प्रपद्यन्ते अन्यदेवताः प्राप्नुवन्ति वासुदेवादात्मनोऽन्यादेवतास्तं तंनियमंदेवताराधनेप्रसिद्धोयोयोनियमस्तंतमास्थायाश्रित्यप्रकृत्यास्वभावेनजन्मान्तरार्जितसंस्कारविशेषेणनियतनियमिताःस्वयाआत्मीयया २०

आनन्दगिरिकृतटीका।

किमिति तर्हिसर्व्वेषांप्रत्यग्भूते भगवति यथोक्तज्ञानंनोदेतीत्याशंक्य नमामित्यवोक्तंहृदिनिधायज्ञानानुदयेहेत्वन्तरमाह आत्मैवेति कामैर्नानाविधैरपहृतविवेकविज्ञानस्यदेवतान्तरनिष्ठत्वमेवप्रत्यग्भूतपरदेवताप्रतिपत्तिप्रभावेकारणमित्याह कामैरिति देवतान्तरनिष्ठत्वेहेतुमाह तंतमिति प्रसिद्धोनियमोजपोपवासप्रदक्षिणनमस्कारादिः नियमविशेषाश्रयणेकारणमाह प्रकृत्येति २०

स्वामिकृतटीका।

एवंभूतोमद्भक्तोऽतिदुर्लभइत्याह बहूनामिति बहूनांजन्मनांकिञ्चित्पुण्योपचयेनअन्तेचरमेजन्मनिज्ञानवान्सन्सर्व्वमिदंचराचरंवासुदेवइति सर्व्वात्मदृष्ट्या मांप्रपद्यते भजति अतःसमहात्मा अपरिच्छिन्नदृष्टिःसुदुर्लभः १९

तदेवंकामिनोऽधिसन्तःकामप्राप्तयेपरमेश्वरमेवयेभजन्तितेकामान्प्राप्यशनैर्मुच्यन्तइत्युक्तंयेत्वत्यन्तंराजसास्तामसाश्चकामाभिभूताःक्षुद्रदेवताःसेवन्ते ते संसरन्तीत्याह कामैरिति चतुर्भिः येतुतैस्तैःपुत्रकीर्त्तिशत्रुजयादिविषयैःकामैरपहृत

भाषा अनुवाद।

सतोगुणीकामनाकरिकैजोमनुष्यपरमेश्वरहीकोभजतेहैं तोकामनाप्राप्त होय क्रमसेमुक्तहोतेहैं परन्तुजोरजोगुणतमोगुणकाआलम्बनकरकेकामनाकेबशहोयऔर २ देवतोंकीउपासनाकरतेहैं तेईसंसारगतिकोपावतेहैं इसश्लोकसेचौथेश्लोकतक कहतेहैं किजोपुत्रकलत्रधनशत्रुनाशआदिमनोरथसेहतबुद्धिहो भूतप्रेतपिशाचयक्षक्षुद्रकहेनीचदेवतोंकोपूजतेहैं वें नियमऊपवासबलिदान अङ्गीकारकरिकेअपनीकामनाकीबासनाकेवशहोय प्रकृत्याकहे स्वभावहीसेउन देवतोंकीसेवाकरतेहैं २०

CC-0. In Public Domain. Digitized by eGangotri

योयोयांयांतनुं भक्तः श्रद्धयार्च्चितुमिच्छति तस्यतस्याचलांश्रद्धांतामेवविदधाम्यहं २१
सतयाश्रद्धयायुक्तस्तस्याराधनमीहते लभतेचततःकामान्मयैवविहितान्हितान् २२

शाङ्करभाष्यं

तेषाञ्चकामिनांयोयइति योयःकामीयांयांदेवतातनुं श्रद्धयासंयुक्तो भक्तश्चस न्नर्च्चितुंपूजयितुमिच्छतितस्यतस्यकामिनोऽचलांस्थिरांश्रद्धांतामेवविदधामिस्थिरी करोमियथेवंपूर्व्वंप्रवृत्तःस्वभावतोयोयोयांदेवतातनुं श्रद्धयार्च्चितुमिच्छतीति २१

सतयेति सतयामद्विहितयाश्रद्धयायुक्तःसन्तस्यादेवतायाःतन्वाआराधनमी हतेचेष्टतेलभतेचततःतस्याआराधितायादेवतातन्वाःकामानीप्सितान्मयैव परमे श्वरेणसर्व्वज्ञेनकर्म्मफलविभागज्ञतयाविहितान्निर्म्मितांस्तान्हि यस्मात्तेभगवतावि

आनन्दगिरिकृतटीका

तत्तद्देवताप्रसादात्कामिनामपिसर्व्वेश्वरेसर्व्वात्मकेवासुदेवे क्रमेण भक्तिर्भवि ष्यतीत्याशंक्याहतेषाञ्चेति स्वभावतोजन्मान्तरीयसंस्कारवशादित्यर्थः भगवद्विहि तयास्थिरयाश्रद्धयासंस्काराधीनयादेवताविशेषमाराधयतोपि भगवदनुग्रहादेवफ लप्राप्तिरित्याहयोयोयामिति ईहतेनिर्व्वर्त्तयतीत्यर्थः २१

स्वामिकृतटीका ।

विवेकाःसन्तोन्याःक्षुद्रभूतप्रेतयक्षादिदेवताभजन्ति किंकृत्वातत्तद्देवताराधने यो योनियमउपवासादिलक्षणस्तंतंनियमंस्वीकृत्यतत्रापिचस्वीययाप्रकृत्यापूर्व्वाभ्यास वासनयानियताश्रीकृताःसन्तोदेवताविशेषंभजन्ति २०

तेषांमध्येयोयइति योयोभक्तोयांयांतनुंदेवतारूपांमदीयामेवमूर्त्तिंश्रद्धयाअ र्च्चितुंइच्छतिप्रवर्त्ततेतस्यतस्यभक्तस्यतत्तन्मूर्त्तिविषयांतामेवश्रद्धामचलां दृढामहम न्तर्यामीविदधामिकरोमि २१

भाषा अनुवाद

भक्तोंकेबीचजोजोभक्तमेरीमूर्त्तिविशेषकोयानेजिसमूर्त्तिकोअर्थात्देवता रूप कोश्रद्धासेपूजनेमेप्रवृत्तहोतेहैं उसीउसीभक्तकीभावनाके अनुसार वहइच्छाअ न्तर्यामीरूपसेमैपूरीकर्ताहौंअर्थात्सोईमूर्त्तिधारणकर उनकाइष्ट सिद्ध करता हूं २१ सो मेराभक्तउसअपनीश्रद्धासेउसीदेवकीपूजाकरताहै और कामनों कोपावताहैं परवेकामनामैहीदेताहूं क्योंकिमैसर्व्वदेवमय हौं और देवतामेरे आधीनहैं २२

CC-0. In Public Domain. Digitized by eGangotri

अन्तवत्तुफलंतेषांतद्भवत्यल्पमेधसां देवान्देवयजोयान्तिमद्भक्तायान्तिमामपि२३

शाङ्करभाष्यं।

हिताःकामास्तस्मात्तानवश्यंलभन्तेइत्यर्थ हितानितिपदच्छेदेहितत्वं कामानामुपचरितंकल्प्यंनहिकामाहिताःकस्यचित् २२

यस्मादन्तवत्साधनव्यापाराअविवेकिनःकामिनश्चतेअतः अन्तवदिति अन्तवद्विनाशितुफलंतेषांतद्भवत्यल्पमेधसामल्पप्रज्ञानांदेवान्देवयजोयान्ति देवान् जयन्तिइतिदेवयजःतेदेवान्जान्तिमद्भक्तायान्तिमामपिएवं समानेप्यायासे मामेवन प्रतिपद्यन्ते अनन्तफलायाहोखलुकष्टंवर्ततइत्यनुक्रोशंदर्शयति भगवान् २३

आनन्दगिरिकृतटीका।

आराधितदेवताप्रसादात्फलप्राप्तौकिमीश्वरेणेत्याशंक्यतस्यसर्व्वज्ञस्य सर्व्वकर्म्मफलविभागाभिज्ञस्यतत्तद्देवताधिष्टातृत्वात्तस्यैवफलदातृत्वमित्याह सर्व्वज्ञेनेति एकोबहूनांयोविदधातिकामानित्यादिश्रुतिमाश्रित्य हितानिति पदद्वयंव्याचष्टे यस्मादिति हितानीत्येकंपदमितिपक्षंप्रत्याह हितानिति मुख्यत्वसम्भवे किमित्यौपचारिकत्वमित्याशंक्याह नहीति २२

प्रेक्षापूर्व्वकारीणिकामानांहितत्वाभावेहेतुमाह यस्माज्जिति किञ्च ये कामिनस्तेनविवेकिनस्ततश्चाविवेकपूर्व्वकत्वात्कामानांकुतोहितत्वाशङ्केत्याह अविवेकिन इति कामानामनन्तफलत्वेनहितत्वमाशंक्याह अतइति तेषामविवेकपूर्व्वकत्वमतः

स्वामिकृतटीका।

ततश्च सततेति सभक्तस्तयादृढ़या श्रद्धयातस्याःस्थानेराराधनमीहते करोति ततश्चकामाःयेसङ्कल्पितास्तांश्चतेदेवताविशेषाल्लभतेकिन्तुमयैवतत्तद्देवतान्तर्यामिनाविहितान्निर्म्मितान्हिस्फुटमेतत्तत्तद्देवतानामपिमदधीनत्वान्मूर्त्तित्वाच्चेत्यर्थः २२

भाषाअनुवाद।

अबकहतेहैं कियद्यपिदेवतामेरीहीमूर्त्तिहैं औरउनकीपूजाभी मेरीही पूजाहै तथाकर्म्मफलदाताभीहमहींहैं परतौभीउनअल्पबुद्धियोंकोअन्तवत्त फलहोताअर्थात्स्वर्गआदिसांसारिक सुखकुछदिनकेलियेहोताहै क्यों किसाक्षात्मेरीउपासनानहींकियाहै औरजोजिसदेवताकोआरधै है सोउसी कोप्राप्तहोता औरमेरेभक्तजन्मनाशरहितहोयके मेरेहीकोप्राप्तहोताहै २३

CC-0. In Public Domain. Digitized by eGangotri

अव्यक्तंव्यक्तिमापन्नंमन्यन्तेमामबुद्धयः परंभावमजानन्तोममाव्ययमनुत्तमं २४

शाङ्करभाष्यं।

किंनिमित्तंत्वामेवनप्रपद्यन्तेइत्युच्यतेअव्यक्तमिति अव्यक्तमप्रकाशंव्यक्तिमापन्नंप्रकाशंगतंइदानींमन्यन्ते मांनित्यप्रसिद्धमीश्वरमपि सन्तमबुद्धयोऽविवेकिनःपरं भावं परमात्मस्वरूपमजानन्तोऽविवेकिनोममाव्ययंव्ययरहितमनुत्तमं निरतिशयं मदीयंभावमजानन्तोमन्यन्तइत्यर्थः २४

आनन्दगिरिकृतटीका।

शब्दार्थःतुशब्दोवधारणार्थः कामफलस्यानाशित्वेकिमिति कामनिष्ठत्वंजन्तूनामित्याशंक्य प्रज्ञामान्द्यादित्याह अल्पेति किंतर्हिसाधनमनन्तफलायेत्याशंक्य भगवद्भक्तिरित्याह मद्भक्ताइति अक्षरार्थमुक्त्वाश्लोकस्यतात्पर्यार्थमाह एवमिति देवताप्राप्तौभगवत्प्राप्तौचेतिशेषः मामेवेत्यादौदेवताविशेषंप्रतिपद्यन्ते अन्तवत्फलायेतिवक्तव्यं उक्तवैपरीत्येकारणमविवेकातिरिक्तंनास्तिइत्यभिप्रेत्याह अहोखल्विति २३

भगवज्जनस्योत्तमफलत्वेपिप्राणिनांप्रायेणतन्निष्ठत्वाभावे प्रश्नपूर्व्वकंनिमित्तं निवेदयति किंनिमित्तमित्यादिना अप्रकाशंशरीरग्रहणात्पूर्व्वमितिशेषः इदानीं

स्वामिकृतटीका।

तदेवं यद्यपिसर्व्वाअपिदेवतामामेवतनवोऽतस्तदाराधनमपिवस्तुतो मदाराधनमेवतत्तत्फलदातापिचाहमेवतथापिसाक्षान्मद्भक्तानाञ्चतेषाञ्चफलवैषम्यंभवतीत्याह अन्तवदिति अल्पमेधसांपरिच्छिन्नदृष्टीनांमयादत्तमपितत्फलमन्तवत्विनाशिभवतितदेवाहदेवान्यजन्तीति देवयजस्तेदेवानन्तवतोयान्तिमद्भक्तास्तु मामनाद्यनन्तंपरमानन्दंप्राप्नुवन्ति २३

भाषा अनुवाद

औरजोऐसीशङ्काकरो किध्यानपूजाआदिप्रयत्नतोसमान और फलमेवैषम्यकहे बडाअन्तरहै तोफेरिसवदेवतोंकोत्यागकरिकेतुमहींकोक्योंन सबभजैं इसपर कहतेहैं किअल्पबुद्धिमनुष्य प्रपञ्चरहितहमकोमनुष्यमत्स्यकूर्मरूप ठहराते हैं इसकाकारणयह किवेलोगमेरेश्रेष्ठरूपकोनहींजानतेहैं सोई रूपप्रकाशितकरतेहैं किजोअव्ययकहेनाशरहित औरजिससेऔरकोईउत्तमनहीं है परन्तु संसारकीरक्षाकेअर्थलीलासेविशुद्धसत्त्वप्रधानजोमैं तिसकोकर्मसेउत्पन्नभौतिककहेपञ्चभूतमयदेहधारीऔर देवताकेसमानजानिकैहमारेप्रतिअधिकआदरनहींकरतेहैं बलुशीघ्रफलदाताऔरदेवतोंको भजतेहैं वेई अन्तवन्तफलपावते २४

CC-0. In Public Domain. Digitized by eGangotri

नाहंप्रकाशःसर्व्वस्ययोगमायासमावृतः मूढोयंनाभिजानातिलोकोमामजव्ययं२५

शाङ्करभाष्यं।

तदज्ञानंकिंनिमित्तंइत्युच्यते नाहमिति नाहंप्रकाशःसर्व्वस्य लोकस्य केषाञ्चिदेवमद्भक्तानांप्रकाशोहमित्यभिप्रायःयोगमायासमावृतःयोगोगुणानां युक्तिर्घटनंसैवमायायोगमायातयायोगमाययासमावृतः संच्छन्नइत्यर्थःअतएव मूढलोकोयं नाभिजानातिमामजमव्ययं २५

आनन्दगिरिकृतटीका

लीलाविग्रहपरिग्रहावस्थायामित्यर्थः प्रकाशस्यतर्हि कादाचित्कत्वंभगवतिप्राप्तं नेत्याह नित्येति कथंतर्हिभगवन्तमागन्तुकप्रकाशंमन्यन्तेतत्रावुद्धयइत्युत्तरंतद्विष्टणोति परमिति परमनुत्तममिति विशेषणद्वयंसोपाधिकनिरुपाधिकभावार्थं २४

अविवेकरूपमज्ञानंभगवन्निष्ठाप्रतिवन्धकमुक्तंतस्मिन्नपिनिमित्तंप्रश्नपूर्व्वकमनाद्यज्ञानमुपन्यस्यति तदज्ञानमित्यादिना त्रिभिर्गुणमयैरित्यनौपाधिकरूपस्याप्रतिपत्तौकारणमुक्तमत्रतु सोपाधिकस्यापितिद्विशेषंगृहीत्वा व्याचष्टे नाहमिति तर्हिभगवद्भक्तिरनुपयुक्तेत्याशंक्याह केषाञ्चिदिति सर्व्वस्यलोकस्य न प्रकाशोहमित्यत्रहेतुमाह योगेति अनाद्यनिर्व्वाच्याज्ञानाच्छन्नत्वादेवमद्विषये लोकस्यमोढंयत तश्चमदीयस्वरूपविवेकाभावान्मन्निष्ठत्वराहित्यमित्याह अतएवेति २५

स्वामिकृतटीका।

ननुचसमानेप्रयासेमहतिचफलविशेषेसतिसर्व्वेऽपिकिमितिदेवतान्तरं हित्वात्वामेवनभजन्ति तत्राह अव्यक्तमिति अव्यक्तंप्रपञ्चातीतंमांव्यक्तिं मनुष्यमत्स्यकूर्म्मादिभावंप्राप्तमल्पबुद्धयोमन्यन्ते तत्रहेतुःममपरंभावंस्वरूपमजानन्तःकथंभूतंअव्ययंनित्यं नविद्यते उत्तमोभावोयस्मात्तं मद्भावंअतोजगद्रक्षणार्थं लीलयाविष्कृतनानाविशुद्धोर्जितसत्त्वमूर्त्तिमां परमेश्वरंकर्म्मनिर्मितभौतिकदेहं देवतान्तरसमं पश्यन्तोमन्दमतयोमांनातीवाद्रियन्ते प्रत्युतक्षिप्रफलदंदेवतान्तरमेवभजन्तेतेचोक्तप्रकारेणान्तवत्फलंप्राप्नुवन्तीत्यर्थः २४

भाषा अनुवाद

मूढलोगोंकेअज्ञानमे कारणकहतेहैं किउनलोगोंकेसामने हमप्रगट नहीं होते परन्तुअपनेभक्तोंकेसामनेप्रगटहोते हैं क्योंकि मूढ़लोगमेरीयोगमायासे आवृतहैं तौफेरिकहोकैसेअव्ययस्वरूपहमकोजानिशकै २५

CC-0. In Public Domain. Digitized by eGangotri

वेदाहंसमतीतानिवर्तमानानिचार्जुन भविष्यानिचभूतानिमान्तुवेदनकश्चन २६

शाङ्करभाष्यं।

ययायोगमायायासमाहृतंमांलोकोनाभिजानातिनासौयोगमाया मदीयासती ममेश्वरस्यमायाविनोज्ञानंप्रतिबध्नातियथान्यस्यापिमायाविनोमायाज्ञानं तद्वत् यत एवमतःवेदाहमिति अहन्तुवेदजानेसमतीतानिसमतिक्रान्तानि भूतानितथा बर्तमानानिचार्जुन भविष्याणिचभूतानिवेदाहंमान्तुवेदनकश्चन मद्भक्तं मच्छरण मेकंमुक्त्वामत्तत्त्ववेदनाभावादेवन मांभजते २६

आनन्दगिरिकृतटीका

मायया भगवानाहृतश्चेत्तस्यापिलोकस्येवज्ञानप्रतिबन्धः स्यादित्याशंक्याह ययेति नहीयंमायामायाविनोविज्ञानंप्रतिबध्नाति मायात्वात्लौकिकमायावत् अथवा नेश्वरोमायाप्रतिबद्धज्ञानोमायावित्वात् लौकिकमायाविवदित्यर्थः भगवतोमाया प्रतिबद्धज्ञानत्वाभावेनसर्वज्ञत्वमप्रतिबद्धंसिद्धमित्याह यतइति लोकस्य मायाप्रतिब द्धविज्ञानत्वादेवभगवदाभिमुख्यशून्यत्वमित्याह मांत्विति कालत्रयपरिच्छिन्नसम स्तवस्तुपरिज्ञानेप्रतिबन्धोनेश्वरस्यास्तीति द्योतनार्थस्तुशब्दः मांत्विति लोकस्य भगवत्तत्त्वज्ञानेप्रतिबन्धं द्योतयति तर्हित्वद्भक्तिर्विफलेत्याशंक्याह मद्भक्तमिति तर्हि

स्वामिकृतटीका

तेषांस्वज्ञानेहेतुमाह नाहमिति सर्वस्यलोकस्यनाहंप्रकाशःप्रकटोन भवामि किन्तुमद्भक्तानामेवयतोयोगमायायासमाहृतःयोगयुक्तिर्ममदीयः कोऽप्यचिन्त्यःप्रज्ञा बिलासःसएवमायाअघटमानघटनापटीयस्त्वात्तयासंछन्नअतएवमत्स्वरूपज्ञानें मूढःसन्नयंलोकोऽजमव्ययञ्चमां नजानातीति २५

भाषा अनुवाद।

मेरेसर्वोत्तमस्वरूपकोअज्ञानीलोगनहींजानते यहजोपूर्वमेंकहा सोईस्वस्व रूपकीउत्तमताऔअनाहृतत्वज्ञानरूपमेंदेखावतेऊचेऔरोंकोअज्ञानताकहते हैंकिजिसहेतुहेअर्जुन हममायाकेआश्रयहैंइससेभूतकालवर्त्तमानकाल औभवि ष्यतकालइनतीनोकाल केवर्तीचराचरसबकोहमजानतेहैंक्योंकिमायाअपनेआश्र यकोमोहनहींकरसकतीहै परन्तुमेरीमायासेमोहितकोईभी हमेनहींजानिशकै है मायाअपनेआश्रयकेअधीन तथा औरोंकोमोहतीहै यह प्रसिद्ध है २६

CC-0. In Public Domain. Digitized by eGangotri

इच्छाद्वेषसमुत्थेनद्वन्द्वमोहेनभारत सर्व्वभूतानिसम्मोहंसर्गेयान्ति परन्तप२७

शाङ्करभाष्यं ।

केनपुनस्तत्त्वेदनप्रतिबन्धेनप्रतिबद्धानिसन्तिजायमानानिसर्व्वभूतानित्वांनबिन्दन्तिइत्यपेक्षायामिदमाह इच्छेति इच्छाद्वेषसमुत्थेनइच्छाचद्वेषश्च इच्छाद्वेषौतावंशसमुत्तिष्टतीति इच्छाद्वेषसमुत्थेनकेनेतिबिशेषापेक्षायामिदमाह द्वन्द्वमोहेनेति द्वन्द्वनिमित्तोमोहोद्वन्द्वमोहस्तावेवइच्छाद्वेषौशीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुबिषयौयथाकालंसर्व्वभूतैःसंबध्यमानौद्वन्द्वशब्देनाभिधीयेतेतत्रयदाईच्छाद्वेषौसुखदुःखतद्धेतुसंप्राप्तप्रालब्धात्मकोभबतस्तदातौसर्व्वभूतानां प्रज्ञायाःस्वबशापा

आनन्दगिरिकृतटीका ।

सर्व्वोपित्वभक्तिद्वारात्वांज्ञास्यतिनेत्याह मत्तत्त्वेति विवेकबतोमज्जनंनतु विवेकशून्यसर्वस्यापीत्यर्थः २६

भगबत्तत्त्वविज्ञानप्रतिबन्धकंमूलाज्ञानातिरिक्तप्रश्नद्वारेणोदाहरति केनेत्यादिना पुनःशब्दात् प्रतिबन्धकान्तरबिबक्षागम्यते अपरोक्षमबान्तरप्रतिबन्धकमिदमागृह्यते बिशेषमाकाङ्क्षापूर्व्वकंनिक्षिपति केनेति बिशेषापेक्षायामितिद्वन्द्वशब्देनगृहीतयोरपिइच्छाद्वेषयोर्ग्रहणं द्वन्द्वशब्दार्थोपलक्षणार्थमित्याह तावेति

स्वामिकृतटीका ।

सर्व्वोत्तमंमत्स्वरूपमजानन्तइत्युक्तंतदेव स्वस्य सर्व्वोत्तमत्वमनादृतज्ञानशक्तित्वेनदर्शयन्नन्येषामज्ञानमेबाह वेदाहमिति समतीतानि बिनष्टानि वर्त्तमानानिच भावीनिचत्रिकालबर्त्तीनिभूतानि स्थाबरजङ्गमानिसर्व्वाण्यहंवेदजानामिमायाश्रयत्वान्ममतस्याःस्वाश्रयव्यामोहकत्वाभावात्मान्तुकोऽपिनवेत्ति मन्मायामोहितत्वात्प्रसिद्धंहिलोकेमायाःस्वाश्रयाधीनत्वमन्यमोहकत्वञ्चेति २६

भाषाअनुवाद

मायासेमोहितजीवोंकोपरमेश्वरविषयकज्ञानकाअभाव जो कहा सोईअज्ञानकीदृढ़तासेकारणकहतेहैं किहेभारतसृष्टिकहेस्थूलदेहधारणहोनेसेजोदेहकेअनुकूलविषयमेइच्छा औरउसदेहकेप्रतिकूलसेजोद्वेष औरउनदोनोइच्छाओद्वेषसेउत्पन्न जोसुखदुखआदि तिससेमयाजोविवेकअज्ञान इससेप्राणीमोहकोप्राप्तहैं अर्थात् हममुखीहमदुखीऐसीनिश्चयरखतेहैं इसीसेयेअज्ञानीहमकोनहींभजतेहै २७

CC-0. In Public Domain. Digitized by eGangotri

येषामन्तगतंपापंजनानांपुण्यकर्म्मणां तेद्वन्द्वमोहनिर्मुक्ताभजन्तेमांदृढव्रताः २८

शाङ्करभाष्यं

दनद्वारेणपरमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबन्धकारणंमोहंजनयतःनहीच्छा द्वेषदोषवशीकृतचित्तस्ययथाभूतार्थविषयज्ञानमुत्पद्यतेवहिरपिकिमुवक्तव्यंताभ्या मविष्टबुद्धेःसंमूढस्यप्रत्यगात्मनिबह्वप्रतिबन्धेज्ञानंनोत्पद्यतइत्यतस्तेनेच्छाद्वेषसमु त्थेनद्वन्द्वमोहेनभारतभरतान्वयसर्व्वभूतानिसंमोहितानिसन्तिसंमोहंसंमूढतांसर्गे जन्मनिउत्पत्तिकालइत्येतत् यान्तिगच्छन्तिहेपरन्तपमोहवशान्येवसर्वभूतानिजा यमानानिजायन्तइत्यभिप्रायः २७

यतएवमतस्तेनद्वन्द्वमोहेनप्रतिबद्धप्रज्ञानानिसर्व्वभूतानि संमोहितानि मामात्म भूतंनजानन्तिअतएवात्मभावेनमान्तुनभजन्तेकेपुनरनेन द्वन्द्वमोहेन निर्मुक्ताःस न्तःत्वांविदित्वायथाशास्त्रमात्मभावेनभजन्तइत्यपेक्षितमर्थंदर्शयितुमुच्यते येषा

आनन्दगिरिकृतटीका

तयोरपर्य्यायमेकत्वानुपपत्तिंगृहीत्वाविशिनष्टियथाकालमिति नचतयोरनधिकरणं किञ्चिदपिभूतंसंसारमण्डलेसम्भवतीत्याह सर्व्वभूतैरिति तथापिकथंतयोर्मोहहे तुत्वमित्याशंक्याह तत्रेति तयोराश्रयः सम्भव्यर्थः उक्तमेवार्थंकैमुतिकन्यायेनप्रपञ्च यति नहीति पूर्व्वभागानुवादपूर्व्वकमुत्तरभागेन फलितमाह अतइति प्रत्यगात्मन्य हङ्कारादिप्रतिबन्धप्रभावतोज्ञानोत्पत्तेरसम्भवोऽतःशब्दार्थः कुलप्रयुक्तमहिम्नाख रूपशक्त्याचयुक्तस्यैवयथोक्तप्रतिबन्धप्रतिविधानसामर्थ्यमिति द्योतनार्थं भारत भर न्तपेतिसम्बोधनद्वयतत्त्वज्ञानप्रतिबन्धं प्रकृतमवान्तरकारणमुपसंहरतिमोहेति २७

स्वामिकृतटीका ।

तदेवंमायाविषयत्वेनजीवानांपरमेश्वराज्ज्ञानमुक्तंतस्यैवाज्ञानस्यदृढत्वे कारण माह इच्छेति सृजतइति सर्गःसर्गेस्थूलदेहोत्पत्तौसत्यांतदनुकूलेइच्छातत्प्रतिकूले चद्वेषस्ताभ्यांसमुत्थःसमुद्भूतोयःशीतोष्णसुखदुःखादिद्वन्द्वनिमित्तोमोहोविवेक भ्रंश स्तेनसर्व्वाणिभूतानिसम्मोहंयान्ति अहमेवसुखीदुःखीचेतिगाढ़तरमभिनिवेशं प्रा प्नुवन्तिअतस्तानिमज्ज्ञानाभावान्मांनभजन्तीति भावः २७

भाषा अनुवाद ।

तौफैरिकोईकोइजोतुमारीभजनकरतेहैं इसश्लोकमेंकहतेहैं कि जोपुण्य कर्मआचरणशीलहैं उनके सर्व्वप्रतिबन्धकस्वरूप सबपापनष्टही गयेहैं वैलोगसु खदुखआदिद्वन्द्वसेमुक्त औरएकाग्रचित्तहोयहमकोभजतेहैं २८

CC-0. In Public Domain. Digitized by eGangotri

जरामरणमोक्षायमामाश्रित्ययतन्तियें तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्म्मचाखिलं२९

शाङ्करभाष्यं

मिति येषान्तुपुनरन्तगतंसमाप्तप्रायंक्षीणंपापंजनानांपुण्यकर्म्मणां पुण्यंकर्म येषां सत्त्वशुद्धिकारणंविद्यते तेपुण्यकर्म्माणस्तेषांपुण्यकर्म्मणां ते द्वन्द्वमोहनिर्म्मुक्तायथो क्तेनद्वन्द्वमोहेननिर्म्मुक्ताभजन्ते मांपरमात्मानंदृढव्रताएवमेवपरमार्थतत्त्व नान्यथेत्ये वंसर्व्वपरित्यागव्रतेननिश्चितविज्ञानादृढ़व्रताउच्यन्ते २८

आनन्दगिरिकृतटीका

जायमानभूतानांमोहपरतन्त्वत्वेफलितमाह यतइतिभगवत्तत्त्ववेदनाभावेतन्नि ष्ठत्ववैधुर्य्यंफलतीत्याहअतएवेति यदिसर्व्वाणिभूतानिजन्मप्रतिपद्यमानानिसंमूढ़ा निसन्तिभगवत्तत्त्वपरिज्ञानशून्यानिभगवद्भजनपराङ्मुखानितर्हिशास्त्रानुरोधेनभ गवद्भजनपराङ्मुखानितर्हि शास्त्रानुरोधेनभगवद्भजनमुच्यमानमधिकार्य्यभावा दनर्थकमापद्येतेति शङ्कते केपुनरिति अनेकेषुजन्मसुसुकृतवशादपाकृतदुरितानां द्वन्द्वप्रयुक्तमोहविरहिणांब्रह्मचर्य्यादिनियमवतांभगवद्भजनाधिकारित्वान्नशास्त्रवि रोधोस्तीति परिहरति उच्यतइति तुशब्द्योत्यमर्थमाह पुनरिति मुक्तेरर्वा क्तसिद्ध्यर्थंसमाप्तप्रायमित्युक्तं प्रकृतोपयोगंपुण्यस्यकर्म्मणोदर्शयितुंविशिनष्टि सत्त्वे ति उभयविधशुद्धेद्वन्द्वनिमित्तमोहनिवृत्तफलमाह तेद्वन्द्वेति मोहनिवृत्तेर्भगवन्नि ष्ठापर्यन्तत्वमाह भजन्तइति तेषांनानापरिग्रहवतांभगवद्भजनप्रतिहतिमाशंक्याह दृढ़ेति २८

स्वामिकृतटीका

कुतस्तर्हिकेचनत्वांभजन्तोदृश्यन्तेतत्राह येषामिति येषान्तुपुण्याचरणशी लानांसर्व्वप्रतिबन्धकंपापमन्तगतं नष्टंते द्वन्द्वनिमित्तेनमोहेनविनिर्म्मुक्ताःदृढ़व्रताः एकान्तिनःसन्तोमांभजन्ति २८

भाषा अनुवाद

औरऐसेजोमेरेभक्तजनतेईजानवेजोगबस्तुकोअच्छीतरहजानिकेकृतार्थहो ते हैं यहकहतेहैं किजरामरणनिवारणार्थमेरीआश्रयलेजोमनुष्ययत्नकरतेहैं वेपरब्रह्मकोजानिश्कैहै औरसम्पूर्णअध्यात्मविद्याजानैहैं आर्थात् अध्यात्मज्ञानसे प्राप्तव्य सोईदेहादिसेभिन्नशुद्धआत्माकोभीजानतेहैं औरतत्त्वज्ञानकेसाधनरूपक र्म्मभीजानिश्कतेहैं २९

CC-0. In Public Domain. Digitized by eGangotri

साधिभूताधिदैवंमांसाधियज्ञञ्चयेविदुः प्रयाणकालेपिचमांतेविदुर्युक्तचेतसः३०
इतिश्रीभगवद्गीतायांयोगशास्त्रेकृष्णार्जुनसंवादेविज्ञानयोगोनामसप्तमोध्यायः७

शाङ्करभाष्यं

ते किमर्थंभजन्तइत्युच्यते जरेति जरामरणमोक्षायजरामरणयोर्मोक्षार्थं मांपरमेश्वरंआश्रित्यमत्समाहितचित्ताःसन्तोयतन्तिप्रयतन्तेयेतें यद्ब्रह्मपरंतद्विदुः कृत्स्नंसमस्तमध्यात्मंप्रत्यगात्मविषयंवस्तुतद्विदुःकर्म्मचाखिलंसमस्तंविदुः २९

आनन्दगिरिकृतटीका

यथोक्तानामधिकारिणां भगवद्भजनफलंप्रश्नद्वारादर्शयति ते किमर्थमिति जरामरणादिलक्षणोयोबन्धस्तद्विश्लेषार्थं भगवद्भजनमित्यर्थः सम्प्रति सगुणस्यसप्रपञ्चस्यमध्यमानुग्रहार्थं ध्येयत्वमाह मामाश्रित्येति जरादिसंसारनिवृत्त्यर्थंनिर्गुणं निःप्रपञ्चंमामुत्तमाधिकारिणोजानन्तीत्युक्तंमामेवयेप्रपद्यन्तइत्यादावित्याह जरेति मध्यमाधिकारिणंप्रत्याह मामिति परमेश्वराश्रयणंनामविषयविमुखत्वेनभगवदेकनिष्ठत्वमित्याहमत्समाहितेति प्रयतनंभगवन्निष्ठासिद्ध्यर्थंबहिरङ्गानांयज्ञादीनामन्तरङ्गानाञ्चश्रवणादीनामनुष्ठानं प्रागुक्तंजगदुपादानंपरंब्रह्म कथंब्रह्म विदुरित्यपेक्षायांसमस्ताध्यात्मवस्तुत्वेनसकलकर्मत्वेनचतद्विदुरित्याहकृत्स्नमिति२९

स्वामिकृतटीका

एवञ्चमांभजन्तस्तेसर्वंविज्ञेयंविज्ञायकृतार्थाभवन्तीत्याह जरेति जरामरणयोर्निरसनार्थंमामाश्रित्ययेप्रयतन्तेतें तत् परंब्रह्मविदुःकृत्स्नमध्यात्मञ्चविदुःयेनतत्प्राप्स्यंतंदेहादिव्यतिरिक्तंशुद्धमात्मानञ्चजानन्तीत्यर्थःतत्साधनभूतमखिलंसरहस्यंकर्म्मचजानन्तिइत्यर्थः २९

भाषा अनुवाद

और ऐसेमेरेभक्तोंकोयोगसेभ्रष्टहोनेकोशङ्कानहींहै यहीइससे.कसे कहते हैं किमधिभूतअधिदैवअधियज्ञसहितजोहमकोजानतेहैं तेईमदासक्तचित्तमरणसमयमेभीहमकोजानिशकैंहैं उसवेलाभीव्याकुलहोयहमकोनहीं भुलतेहैं इससेमेरेभक्तकोयोगभ्रष्टहोनेकाडरनहीहै श्रीधरस्वामीअध्यायभरकाअर्थकहतेहैं कृष्णकेभक्तहीयत्नसेज्ञानलाभकरतेहैं यहीविज्ञानयोगनामक सप्तमअध्याय भगवाननेप्रकाशित किया ३०

इति श्रीजगन्नाथशुक्लविरचितायांमनभावनीटीकायांसप्तमोध्यायः ७

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

साधीति साधिभूतादिदैवंअधिभूतं चाधिदैवञ्चअधिभूतादिदैवंतेनसह अधिभूताधिदैवेनवर्त्ततेइति साधिभूताधिदैवंमांयेविदुःसाधियज्ञञ्चसह अधियज्ञेनसाधियज्ञंयेविदुःप्रयाणकालेमरणकालेपिचतेमांविदुःयुक्तचेतसःसमाहितचित्ताइति ३०

इति श्रीमद्भगवद्गीताभाष्येसप्तमोऽध्यायः ७

आनन्दगिरिकृतटीका।

न केवलंभगवन्निष्ठानांसर्व्वाध्यात्मककर्म्मात्मकब्रह्मविन्त्वमेव किन्त्वधिभूतादि सहितंतद्वेदित्वमपि सिध्यतीत्याहसाधिभूतेति अध्यात्मं कर्म्माधिभूतमधिदैवमधियज्ञश्चेतिपञ्चकंकर्मतद्ब्रह्मयेविदुस्तेषांययोक्तज्ञानवतां समाहितचेतसामापदवस्थायामपिभगवत्तत्त्वज्ञानमप्रतिहतंतिष्ठतीत्याह प्रयाणेति अपिचेतिनिपाताभ्यां तस्यामवस्थायांकरणग्रामस्यव्यग्रतयाज्ञानसम्भवेपिमयि समाहितचित्तानामुक्तज्ञानवतांभगवत्तत्त्वज्ञानमयत्नलभ्यमिति द्योत्यतेतद्वेनेन सप्तमेनोत्तममधिकारिणंप्रतिज्ञेयंनिरूपयतातदर्थमेवसर्व्वात्मकत्वादिकमुपदिशता प्रकृतिद्वयद्वारेणसर्व्वकारणत्वादिति च वदतातत्पदवाच्यंतल्लक्ष्यञ्चोपेक्षितं ३०

इतिआनन्दगिरिकृतटीकायांसप्तमोऽध्यायः७

स्वामिकृतटीका।

नचैवंभूतानांयोगभ्रंशशङ्कापीत्याहसाधिभूतेति अधिभूतादिशब्दानामर्थंश्रीभगवानेवोत्तराध्यायेव्याख्यास्यति अधिभूतेनाधिदैवेन च सहअधियज्ञेन च सह मांयेजानन्तितेयुक्तचेतसोमय्यासक्तमनसःप्रयाणकालेऽपिमरणसमयेपिमांविदुर्जानंतिनतुतदापिव्याकुलीभूयमांविस्मरंति अतोमद्भक्तानां न योगभ्रंशशङ्केतिभावःकृष्णभक्त्यैवयत्नेनब्रह्मज्ञानमवाप्यते इतिविज्ञानयोगाख्येसप्तमेसम्प्रकाशितं ३०

इति श्रीधरस्वामिकृतटीकायांसप्तमोध्यायः ७

CC-0..In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता ।

अष्टमोध्यायः

अर्जुनउवाच किन्तद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम् अधिभूतञ्चकिं प्रोक्तमधिदैवंकिमुच्यते १

शाङ्करभाष्यं ।

तेब्रह्मतद्विदुःकृत्स्नमित्यादिनाभगवतार्जुनस्यप्रश्नबीजानिउक्तानि अतस्तत्प्रार्थंअर्जुनउवाच १

आनन्दगिरिकृतटीका ।

सप्तमाध्यायान्तेयेषामन्तर्गतंपापमित्यादिनायेषां ब्रह्मादीनामनुसन्धानमुक्तंयच्चप्रयाणकालेभगवतः स्मरणंदर्शितंतदिदंजिज्ञासमानःसन्पृच्छतीति प्रश्नसमुदायमबतारयतिते ब्रह्मेति प्रश्नबीजानितद्विषयभूतानि ब्रह्मादीनिबस्तुनीति यावत् बुभुत्सितविषयप्रतिलम्भानन्तरंतेषा प्रश्नद्वारानिर्णयार्थमाहअतइति यदुक्तंतेब्रह्मतद्विदुरितितत्किंसोपाधिकं निरुपाधिकम्वा ब्रह्मशब्दस्योभयत्रापिसम्भवादितिमत्वाहकिंतदिति यच्चोक्तंकृत्स्नमध्यात्ममिति तत्प्रात्मानंदेहमधिकृत्यतस्मिन्नधिष्ठानेतिष्ठतीत्यध्यात्मशब्देनश्रोत्रादिकरणग्रामोवाप्रत्यग्भूतंब्रह्मैववा विवक्षितमित्याहकिमध्यात्ममिति विज्ञानंयज्ञंतनुतेकर्म्माणितनुतेपिचेतिश्रुतौ कर्म्मणोद्वैविध्यनिर्द्धारणात्कर्मचाखिलमित्यत्रकर्मगृहीतमिति पृच्छतिकिमिति चराचराख्यां कार्य्यका

भाषा अनुवाद ।

सप्तम अध्यायमेजोसंक्षेपसेकहाकिभगवद्भजनमेएकचित्तभक्तजनब्रह्मकर्मऔ अधिभूतआदिसातपदार्थजानिसकैहै सोईजोसप्तमअध्यायमेकहा ब्रह्मकर्म्मादितिसकोभगवानअष्टमअध्यायमेप्रकाशरूपसेकहैंगेसोयहकिसतयेंअध्यायकेअन्तमेप्रसङ्गवशभगवाननेकहाजोब्रह्मऔअध्यात्मसातपदार्थतिनकेज्ञानेच्छुक अर्जुनदोश्लोकसेप्रश्नकरतेहैंकिहे पुरुषोत्तमआपनेकहाजोब्रह्मसोकिसरूपकहै और अध्यात्महींबाकिसप्रकारकाजानैंतथाकर्म्महीवाक्याहै और अधिभूतयाअधिदैव किसकोकहतेहै यह प्रश्नकिया १

CC-0. In Public Domain. Digitized by eGangotri

अधियज्ञः कथंकोऽत्रदेहेस्मिन्मधुसूदन प्रयाणकालेचकथंज्ञेयोऽसिनियतात्मभिः२

शाङ्करभाष्यं

एषांप्रश्नानांयथाक्रमंनिर्णयायअक्षरमिति अक्षरंनक्षरतीतिपरमात्माएतस्यवाक्षरस्यप्रशासनेगार्गीति श्रुतेःओंकारस्यचोमित्येकाक्षरं ब्रह्मेति परैरविशेषणात्तद्ग्रहणंपरमिति चनिरतिशयेब्रह्मण्यक्षरेउपपन्नतरंविशेषणंतस्यैव परस्य ब्रह्मणःप्रतिदेहंप्रत्यगात्मभावःस्वभावोइति स्वोभावःस्वभावोऽध्यात्मंउच्यते आत्मानंदेहमधिकृत्यप्रत्यगात्मतयाप्रवृत्तंपरमार्थब्रह्मावसानं वस्तुस्वभावोध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयते भूतभावोद्भवकरःभूतानांभावोभूतभावस्तस्योद्भवोभूतभावोद्भवस्त

आनन्दगिरिकृतटीका

रणाभ्यांअतीतस्यभगवतोनकिञ्चिदवेद्यमस्तीति सूचयति पुरुषोत्तमेति साधिभूताधिदैवमित्यत्राधिभूतशब्देनपृथिव्यादिषुभूतेषुवर्त्तमानंकिञ्चिदेवगृह्यते किम्बासमस्तमेवकार्यमिति निर्द्धारयिषयाप्रच्छतिअधिभूतमिति अधिदैवमितिचदैवतविषयमनुध्यानंबादैवतेष्वादित्यमण्डलादिषुवर्त्तमानं चैतन्यंबा जिघृक्षितमिति प्रश्नान्तरंप्रस्तौतिअधिदैवमिति १

साधियज्ञश्चेत्यत्राधियज्ञशब्देनयज्ञमधिकृतोविज्ञानात्मावापरदेवतावेतिप्रश्नान्तरंप्रतिकरोति अधियज्ञइति सचकथंकेनप्रकारेण ब्रह्मत्वेनचिन्तनीयःकिंतादात्म्येनकिम्वात्यन्ताभेदेनेत्याह कथमिति सर्व्वथापिसकिमस्मिन्देहेवर्त्ततेततो

स्वामिकृतटीका।

ब्रह्मकर्म्माधिभूतादिविदुःक्षणैकचेतसः इत्युक्तंब्रह्मकर्म्मादिसप्तमष्टमउच्यते पूर्व्वाध्यायान्तेभगवतोपज्ञिप्तानांब्रह्माध्यात्मादिसप्तपदार्थानांतत्त्वं जिज्ञासुरर्जुनउवाचकिंतद्ब्रह्मेति द्वाभ्यां स्पष्टोर्थः १

भाषा अनुवाद।

औरशरीरकेद्वाराजोयज्ञादिकर्म्मकियेजायहै उनका अधियज्ञ कहे अधिष्ठाता औरकर्मफलदाताकोहैं अधियज्ञकास्वरूप पूंछिकरके अबउसका अधिष्ठानभूतवस्तु पूंछतेहैं किहे मधुसूदनयहअधियज्ञपुरुषइसदेहमेंकिसप्रकारसेस्थितहोकेयज्ञादिकर्मोंकानियोगकहे अवधारणऔरयज्ञफलप्रदानकरतेहैं और अंतकालमेंसंयतचित्तपुरुषतुमकोकिसउपायसेजानतेहैं यहांयज्ञशब्दसेसबकर्मोंकाग्रहणहै यहजानो २

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच अक्षरंपरमंब्रह्मस्वभावोऽध्यात्ममुच्यते भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ३

शाङ्करभाष्यं।

करोतीतिभूतभावोद्भवकरोभूतवस्तूत्पत्तिकरइत्यर्थः विसर्गोविसर्जनंदेवतोद्देशेन चरुपुरोडासादेःस्वस्यद्रव्यस्यपरित्यागः स एषविसर्गलक्षणोयज्ञः कर्मसंज्ञितःकर्मशब्दितइत्यर्थः इत्येतस्माद्बीजभूतात्दृष्ट्यादिक्रमेणस्थावरजङ्गमानिभूतानि उद्भवन्ति ३

आनन्दगिरिकृतटीका

बहिर्वा देहेचेत्सकोत्रवुड्यादितद्व्यतिरिक्तोवेतिजिज्ञासयाब्रूते कोत्रेति अधियज्ञःकथंकोवेति न प्रश्नभेदकःकथमिति किन्तुप्रकारभेदविवक्षयेतिद्रष्टव्यं यत्तु समाहितचित्तानामुत्क्रमणकालेपिभगवदनुसन्धानंसिध्यतीतितदयुक्तमुत्क्रमणदशायांकरणग्रामवैयग्र्याच्चित्तसमाधानानुपपत्तिरित्यभिप्रेत्याह प्रयाणेति २

स्वामिकृतटीका।

किञ्च अधियज्ञइति अत्रदेहेयोयज्ञोवर्त्ततेतस्मिन्कोऽधिष्ठाताप्रयोजकः फलदाताचकइत्यर्थःस्वरूपंदृष्ट्वाधिष्ठानप्रकारंपृच्छति कथंकेनप्रकारेणअसावस्मिन्देहेस्थितःयज्ञमधितिष्ठतीत्यर्थःयज्ञग्रहणंसर्वकर्मणामुपलक्षणार्थं अन्तकालेच नियतचित्तैःपुरुषैःकथंकेनोपायेनज्ञेयोऽसि २

भाषा अनुवाद।

श्रीकृष्णभगवानइससश्लोकसेलेकरतीनश्लोकोंद्वारा अर्जुनकोप्रत्येक प्रश्नकासिद्धान्तरूपउत्तरकहतेहैंकिनक्षरतिगच्छति इति अक्षरंअर्थात् जिसकागमनआदि आगमननहींहै सोईअक्षरब्रह्महै जोकहोकिजीवचैतन्यभीअक्षरहोयक्योंनतो कहतेहैं किनहींजोपरमअक्षरकहेजगतकामूलकारणहैसोईब्रह्मजानोक्योंकि श्रुतिमेभीकहाहैकि हेगार्गिवेदइसीब्रह्माण्डहीको सोईब्रह्मकहतेहैं यहबात प्रसिद्धहै औरउसीब्रह्मकाअंशजोजीवरूपहोनेसे नामस्वभावऔरदेहआदिअङ्गीकारकरिकेभोक्तारूपसेवर्त्तमानहै उसीजीवकोअध्यात्म कहाहै औरभूतकहे जरायुजआदिकोंकीउत्पत्तिऔरउद्भवशब्दकायहअर्थहै किसूर्य्यसेवर्षावर्षासेअन्नऔ अन्नसेप्रजाऐसेक्रमसेउत्तमरूपजोदृष्टिसोभूतोंकाभावऔरउद्भवकारीजो विसर्ग अर्थात्सर्वकर्मकाउपलक्षणरूपदेवतोंकोउद्देशकरिद्रव्यत्यागरूपजोयज्ञ सोईकर्महै ३

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

व्याख्यातप्रश्नसप्तकस्य प्रतिवचनं भागवतमवतारयति एषामिति क्रमेणकृतानांप्रश्नानांक्रमेणैवप्रतिवचनेप्रष्टुरभीष्टंप्रतिपत्तिसौकर्य्यञ्चसिध्यतीति बुद्ध्यमानोविशिनष्टि यथाक्रममिति तत्प्रश्नत्रयं निर्णेतुंभगवद्वचनमुदाहरति अक्षरमिति किंतद्ब्रह्मेति प्रश्नस्यप्रतिवचनमक्षरंब्रह्मपरममिति तत्राक्षरशब्दस्यनिरुपाधिकेपरस्मिन्नात्मन्यविनाशित्वव्याप्तिमत्वसम्बन्धात्प्रवृत्तिंव्युत्पादयति अक्षरमित्यादिना कथंपुनरक्षरशब्दस्ययथोक्तेपरमात्मनिरूढप्रयोगमन्तरेणव्युत्पत्त्याप्रवृत्तिराश्रीयते व्युत्पत्तेरर्थान्तरेपिसम्भवादित्याशंक्यद्याबा पृथिव्यादिविषयनिरङ्कुशप्रशासनस्यपरस्मादन्यस्मिन्नसम्भवात्तथाविधप्रशासनकर्तृत्वेनश्रुतमक्षरंब्रह्मैवेत्याह एतस्येति रूढियोगमपहरतीतिन्यायादोंकारेवर्णसमुदायात्मन्यक्षरशब्दस्य रूढ्या प्रवृत्तिराश्रयितुमुचितेत्यशंक्याह ओंकारस्येति प्रतिवचनोपक्रमेप्रक्रान्तमोङ्काराख्यमोत्तरमेवोत्तरत्वविशेषितंभविष्यतीत्याशंक्यपरमविशेषणविरोधात् नतस्यप्रक्रमःसम्भवतीत्याह परममिति चेति किमध्यात्ममिति प्रश्नस्योत्तरंस्वभावोध्यात्ममित्यादि तद्व्याचष्टे तस्यैवेति स्वकीयोभावःस्वभावःओंनादिकरणग्रामःसचात्मनिदेहेऽहंप्रत्ययवेद्येवर्त्ततइति अमुंप्रतिभासंव्यावर्त्तस्वभावपदंगृह्णाति स्वोभावइति एवं विग्रहपरिग्रहे स्वभावोध्यात्ममुच्यते इत्यस्यायमर्थोनिष्पन्नोभवतीत्यनुवादपूर्व्वकंकथयति स्वभावइति तस्यैवपरस्येत्यादिनोक्तंनविस्मर्त्तव्यमितिविशिनष्टि परमार्थेति परमेवहिब्रह्मदेहादौप्रविश्यप्रत्यगात्मभावमनुभवतितत्सृष्ट्वातदेवानुप्राविशदिति श्रुतेरित्यर्थः किंकर्मेति प्रश्नस्योत्तरमुपादत्ते भूतेति भूतान्येवभावास्तेषामुद्भवःसमुत्पत्तिस्तांकरोतीतिव्युत्पत्तिंसिद्धवत्कृत्यविधान्तरेणव्युत्पादयति भूतानामिति भावःसद्भावोवस्तुभावोऽतएवभूतवस्तूत्पत्तिकरइतिबध्यतिवैदिकंकर्म्मलौकिकविशेषणं कर्मशब्दितमितिविसर्गशब्दार्थंदर्शयन्विशदयति विसर्गइत्यादिना कथंपुनर्यथोक्तस्ययज्ञस्य सर्व्वेषुभूतेषुसृष्टिस्थितिप्रलयहेतुत्वेन तदुद्भवकरत्वमित्याशंक्याग्नौप्रास्ताज्जुतिरित्यादिस्मृतिमनुस्मृत्याह एतस्माद्धीति ३

स्वामिकृतटीका

प्रश्नक्रमेणैवोत्तरं श्रीभगवानुवाच अक्षरमितित्रिभिः नक्षरति नचलतीत्यक्षरं ननुजीवोऽप्यक्षरस्तत्राह परमंयदक्षरंजगतांमूलकारणंतद्ब्रह्मएतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदन्तीश्रुतेःस्वयैवब्रह्मणएवांशतयाजीवरूपेणभवनं स्वभावःसए

CC-0. In Public Domain. Digitized by eGangotri

अधिभूतंक्षरोभावःपुरुषश्चाधिदैवतं अधियज्ञोऽहमेवात्रदेहेदेहभृतांवर ४

शाङ्करभाष्यं।

अधिभूतमिति अधिभूतंप्राणिजातमधिकृत्यभवतीतिकोसौक्षरः क्षरतीतिक्ष रोविनाशीभावोयत्किञ्चिज्जनिमद्वस्त्वित्यर्थःपुरुषःपूर्णमनेनसर्व्वमितिपुरि शयना द्वापुरुषःआदित्यान्तर्गतोहिरण्यगर्भःसर्व्वप्राणिकरणानामनुग्राहकःसोधिदैवतं अ धियज्ञःसर्व्वयज्ञाभिमानिनीदेवताविष्णुर्व्यायज्ञोवैविष्णुरिति श्रुतेः सहिविष्णुरह मेवात्रास्मिन्देहे योयज्ञस्तस्याहमधियज्ञःयज्ञोहिदेहनिर्व्वर्त्तत्वेनदेहसमवायी तिदेहाधिकरणो भवति देहभृतांवर ४

स्वाटीमञ्जका।

वात्मानंदेहमधिकृत्यभोक्तृत्वेनवर्त्तमानोऽध्यात्मशब्देनोच्यतइत्यर्थः भूतानां जरायु जादीनांभावःसत्ताउत्पत्तिःउद्भवश्चआदित्याज्जायतेवृष्टिरितिक्रमेणवृष्ट्युत्कृष्टत्वेन भवनमुद्भवःतौभूतभावोद्भवौकरोति योविसर्गोदेवतोद्देशेनद्रव्यत्यागरूपोयज्ञः स र्व्वकर्म्मणामुपलक्षणमेतत्सचकर्मशब्दवाच्यः ७

भाषा अनुवाद

औरक्षरकहैविनश्वरजोदेहआदिसोप्राणीमात्रकोअधिकारकरके स्थितिकरै है इससेअधिभूतकहावैहै औरपुरुषकहतेहैं सूर्यमण्डलवर्त्तीविराटकोजो अ पने अंशरूपसमस्तदेवतोंकेअधिपतिहैं वेईअधिदैवहैंअधिदैवकहते अधिष्ठात्री देवताकोयहश्रुतिमेंकहाहै किसोईविराटपुरुष प्रथमशरीरधारीसकलभूतोंके आदिकर्त्ताऔरब्रह्माकेभीपूर्व्ववर्त्तमानथे औरइसशरीरमेअन्तर्यामीरूपसे वर्त्तमान हमकोअधियज्ञकीअधिष्ठात्रीदेवता तथाकर्मफलदाताजानो इससेअधियज्ञकिसरू पस्थितिकरतेइसप्रश्नकाउत्तरभया क्योंकियहीअन्तर्यामीकीअसङ्गआदि गुणके द्वा रा जीवकेसाथभिन्नतापूर्व्वकदेहकेबीचवर्त्तमानतालोकमेंप्रसिद्धहै सोश्रुतिभीकह तीहैकिमित्रभावसेएकस्थानमेंरहनेवालेजोजीवऔअन्तर्यामीरूपयेदोनो सुन्दर पक्षयुक्तशरीररूप एकवृक्षपरस्थितिकियेहैं तिनकेमध्यएकफलभोगीऔदूसरा सा क्षीमात्रकहैदेखनेवालाहै औरहेदेहभृतांवरनरश्रेष्ठअर्जून इससम्बोधनसेयह जनायाकि तुमभीअपनीप्रवृत्तिरूपकर्म्मोकेअन्वयव्यतिरेकानुरूप सिद्धिअसिद्धिमे वकहीअन्तर्यामीकेअधीनहौ तौसुतरांअन्वयतिरेककेद्वारा इसअन्तर्यामीकोतुम आपअपनेसेजानवेयोग्यहौ ४

CC-0. In Public Domain. Digitized by eGangotri

अन्तकालेचमामेवस्मरन्मुक्त्वाकलेवरं यःप्रयाति समद्भावंयाति नास्त्यत्रसंशयः ५

आनन्दगिरिकृतटीका

संप्रतिप्रश्नत्रयस्योत्तरमाह अधिभूतमिति अधिभूतञ्चकिंप्रोक्तमित्यस्यप्रतिवचनमधिभूतंक्षरोभावइति तत्राधिभूतपदमनूद्यवाच्यमर्थंकथयति अधिभूतमित्यादिना तस्यनिर्देशमन्तरेणनिर्ज्ञातुमशक्यत्वात्प्रश्नद्वारातन्निर्दिशति कोसाविति कार्यमात्रमत्रसंगृहीतमितिवक्तुमुक्तमेवव्यनक्ति यत्किञ्चिदिति अधिदैवंकिमिति प्रश्ने पुरुषश्चेत्यादिप्रतिवचनं तत्रपुरुषशब्दमनूद्यमुख्यमर्थंतस्योपन्यस्यति पुरुषइति तस्यैव सम्भावितमर्थान्तरमाहपुरिशयनाद्देति वैराजंदेहमासाद्यमादित्यमण्डलादिषुदैवत्येषुयोन्तरवस्थितोलिङ्गात्माव्यष्टिकरणानुग्राहकोत्र पुरुषशब्दार्थःसचाधिदैवतमितिस्फुटयति आदित्येति अधियज्ञःकथमित्यादिप्रश्नपरिहरन्नधियज्ञशब्दार्थमाह अधियज्ञइति कथमुक्तायांदेवतायामधियज्ञशब्दःस्यादित्याशंक्यश्रुतिमनुसरन्नाह यज्ञोवेइति परैवदेवताधियज्ञशब्देनोच्यते साच ब्रह्मणःसकाशादत्यन्ताभेदेन प्रतिपत्तव्येत्याह सहिविष्णुरिति शास्त्रीयव्यवहारभूमिरत्रेत्युक्ता देहसामानाधिकरण्याद्भावेत्यस्यव्याख्यानं अस्मिन्निति किमधियज्ञोबहिरन्तर्वा देहादिति सन्देहो माभूदित्याह देहइति ननुयज्ञस्यदेहाधिकरणत्वाभावात्कथंतस्यार्बिधयज्ञानिदेवतात्वंभगवतोविवक्ष्यतेतत्राह यज्ञोहीति एतेनतस्यबुद्ध्यादिव्यतिरिक्तत्वमुक्तमवधेयं नहिपरादेवतादर्शितरीत्यादियज्ञशब्दितावुद्ध्यादिष्वन्तर्भावमनुभावयितुमलंदेहान्बिभर्तीति देहभृतःसर्व्वेप्राणिनस्तेषामेषवरःश्रेष्ठःयुक्तंहिभगवतासाक्षादेव प्रतित्वेणसम्बादंविदधानस्यार्जुनस्यसर्व्वेभ्यःश्रैष्ठ्यं ४

स्वामिकृतटीका ।

किञ्च अधिभूतमिति क्षरोविनश्वरोभावःदेहादिपदार्थः भूतंप्राणिमात्रमधिकृत्यभवतीत्यधिभूतमुच्यते पुरुषोवैराजःसूर्यमण्डलवर्त्तीस्थांस्थभूतसर्व्वदेवतानामधिपतिरधिदैवतमुच्यते आधिदेवतमाधिष्ठात्रीदेवता सवैशरीरीप्रथमःसवैपुरुष उच्यतेआदिकर्त्ता सभूतानां ब्रह्माग्रे समवर्त्तत इति

भाषा अनुवाद

औरतुमअन्तकालमेकैसेजानेजातेहौ इसविषयमेअन्तसमयज्ञानकोउपायऔउसकाफलदेखावतेहैं किउक्तजोअन्तर्यामिस्वरूपपरमेश्वरमैं सोमेरेकोस्मरणपूर्व्वकदेहत्यागकरिकैं जोप्रकटरूपसेअर्चिरादिकहे सूर्यमण्डलमेंहोयके उत्तरायणराहसेगमनकरतेहैं वेमेरेस्वरूपकोप्राप्तहोतेहैं इसमेंसंशयनहींहै मेरास्मरणहीतत्त्वज्ञानकोउपायहै औमेरेरूपताकोप्राप्तहीफलहै ५

CC-0. In Public Domain. Digitized by eGangotri

यंयंवापिस्मरन्भावंत्यजत्यन्तेकलेवरं तंतमेवैति कौन्तेयसदातद्भावभावितः ६

शाङ्करभाष्यं

अन्तकालइति अन्तकालेचमरणकालेमामेवपरमेश्वरंविष्णुंस्मरन्मुक्त्वापरित्यज्यकलेवरंशरीरंयःप्रयातिगच्छति समद्भावंवैष्णवंतत्त्वंयाति नास्तिनविद्यते अत्रास्मिन्नर्थेसंशयोयाति वानवेति ५

आनन्दगिरिकृतटीका

यत्तुप्रयाणकालेचेत्यादिचोदितंतत्राह अन्तकालेचेति मामेवेत्यवधारणेनअध्यात्मादिविशिष्टत्वेनस्मरणंव्यावर्त्तते विशिष्टस्मरणेहिचित्तविक्षेपान्नप्रधानस्मरणमपिस्यान्नचमरणकालेकार्यकरणपारवश्याद्भगवदनुस्मरणासिद्धिःसर्वदैवनैरन्तर्येणआदरधियाभगवति समर्पितचेतसःतत्कालेपिकार्यकरणजातमगणयतोभगवदनुसन्धानसिद्धेःशरीरेतस्मिन्नहंममाभिमानाभावादितियावत् प्रयातीत्यत्रप्रकृतशरीरमपादानं ब्रह्मविदब्रह्मैवभवतीत्यादिश्रुतिमाश्रित्याह नास्तीति व्यासेध्यंसंशय मेवाभिनयति याति वेति ५

स्वामिकृतटीका।

श्रुतेः अत्रास्मिन्देहे स्थितोहमेवाश्रियज्ञोयज्ञस्याधिष्ठात्रीदेवतायज्ञादिकर्म्मप्रवर्त्तकस्तत्फलदाताचकथमित्यस्यात्युत्तरमनेनैवोक्तं द्रष्टव्यमन्तर्यामिनोऽसत्तादिभिर्गुणैर्जीववैलक्षण्येनदेहान्तर्वर्त्तित्वप्रसिद्धत्वात् तथाचश्रुतिः द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते तयोरन्यःपिप्पलंस्वाद्वत्यनश्नन्योऽपिचकास्तीति देहभृतांमध्येश्रेष्ठइति सम्बोधयन्त्वमप्येवंभूतमन्तर्यामिणंपराधीनस्वप्रवृत्तिनिवृत्त्यन्वयव्यतिरेकाभ्यांबोद्धमर्हसीति सूचयति ४

प्रयाणकालेचकथंज्ञेयोऽसीत्यनेनदृष्टमन्तकालेज्ञानोपायंतत्फलञ्चदर्शयति अन्तकालइति मामेवोक्तलक्षणमन्तर्यामिरूपंपरमेश्वरंस्मरन्देहंत्यक्त्वायःप्रकर्षे

भाषाअनुवाद

अन्तकालमेमेरास्मरणकरकेमेरीप्राप्तिहोयकेवलयहीनहीं सोईकहतेहैं कि हेकुन्तीपुत्रअर्जुन अन्तकालमे जोकोई जिसदेवताका याऔरकिसीविषयकाध्यानकरदेहछोडैहै सोउसीकोप्राप्तहोता जिसकाध्यानकियाहै देखोसर्व्वदाजिसकाचिन्तनकरतेरहो तोअन्तकालमेभीअन्तःकरणमेउसीकासंस्काररहता और नयीअपूर्व्ववस्तुकास्मरणहोनाकठिनहै ६

CC-0. In Public Domain. Digitized by eGangotri

तस्मात् सर्व्वेषुकालेषुमामनुस्मरयुध्यच मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ७

शाङ्करभाष्यं।

नमद्विषयएवायंनियमःकिंतर्हियं यमिति यंयंवापियंयंभावंदेवताविशेषंस्म रंश्चिन्तयन्त्यजति परित्यजति अन्तेप्राणवियोगकालेकलेवरंतंतमेवस्मृतंभाव मेवैति नान्यंकौन्तेय सदासर्व्वदातद्भावभावितस्तस्मिन्भावस्तद्भावःसभावितःस्म र्यमाणतयाभ्यस्तोयेनसतद्भावभावितःसन् ६

यस्मादेवमन्त्याभावनादेहान्तरप्राप्तौकारणं तस्मादिति तस्मात् सर्व्वेषुकालेषु मामनुस्मरयथाशास्त्रंयुध्यचयुद्धञ्चस्वधर्म्मंकुरु मयिवासुदेवेऽर्पितेमनोबुद्धिर्यस्यतव सत्वंमय्यर्पितमनोबुद्धिःसन्मामेवयथास्मृतमेष्यसिआगमिष्यसिअसंशयोनसंशयोत्र विद्यते ७

आनन्दगिरिकृतटीका।

अन्तकालेभगवन्तमनुध्यायतोभगवत्प्राप्तिर्नियमवदन्यमपितत्कालेदेवादिविशे षंध्यायतोदेहंत्यजतस्तत्प्राप्तिरवश्यंभाविनीति दर्शयति नेत्यादिना कथपुनरन्त कालेपरवशस्यनियतविषयस्मृतिर्भवितुमुत्सहते तत्राह सदेति देवादिविशेषस्य स्मन्निति सप्तम्यर्थः भावोभावनाबासनासभावोभावितःसंपादितोयेनपुंसासतथाबि धःसन्यंयंभावंस्मरति तन्तमेवदेहत्यागादूर्द्धंगच्छतीति सम्बन्धः ६

स्वामिकृतटीका।

णअर्च्चिरादिमार्गेणउत्तरायणपथायाति समद्भावंमद्रूपतांयाति अत्रसंशयोनास्ति स्मरणंज्ञानोपायोमद्भावाप्तिस्तुफलमित्यर्थः ५

नकेवलंमांस्मरन्मद्भावंप्राप्नोतीतिनियमःकिंतर्हि यंयमिति यंयंभावंदेवता न्तरंवाअन्यमपिवाअन्तकालेस्मरन्देहंत्यजति तंतमेवस्मर्य्यमाणंभावंप्राप्नोतिअ न्तकालेभावविशेषस्मरणेहेतुःसदातद्भावभावितइति सर्व्वदातस्यभावोभावनानु चिन्तनंतेनभावितोवासितचित्तः ६

भाषाअनुवाद।

पूर्ब्बवासनाहीजिसलियेमरणकाकेस्मरणमेहेतुहै औरअन्तसमयविवशप्रा णीकोअपूर्ब्बवस्तूकास्मरणअसंभवहै इससेसर्व्वदाहमकोचिन्तनकरोपरन्तुमेराचि न्तनभीचित्तशुद्धविनादुर्लभहै सोतुमचित्तशुद्धिकेअर्थयुद्धरूपस्वधर्म्मकाअनुष्ठानक रो औरतुमारासंकल्पात्मकमन तथाव्यवसायात्मिकाबुद्धिमेरेमेअर्पितभईहै इससे अनायासहमकोप्राप्तहोउगे इसमेंसंशयनहीहै ७

CC-0. In Public Domain. Digitized by eGangotri

अभ्यासयोगयुक्तेनचेतसानान्यगामिना परमंपुरुषंदिव्यंयातिपार्थानुचिन्तयन् ८

शाङ्करभाष्यं

किञ्च अभ्यासेति अभ्यासयोगयुक्तेनमयिचित्तसमर्पणविषयभूते एकस्मिन् तुल्यप्रत्ययावृत्तिलक्षणोविलक्षणप्रत्ययान्तरितोभ्यासःसचासौयोगस्तेनयुक्तंतत्रैवव्यावृतंप्रवृत्तंयोगिनश्चेतस्तेनचेतसानान्यगामिनानान्यत्रविषयान्तरेगन्तुंशीलमस्येति नान्यगामि तेननान्यगामिनापरमंनिरतिशयंपुरुषंदिव्यंदिविसूर्यमण्डलेभवंदिव्यंयाति गच्छति हेपार्थ अनुचिन्तयन्शास्त्राचार्योपदेशमनुध्यायन्नित्येतत् ८

आनन्दगिरिकृतटीका

सततंभावनाप्रतिनियतफलप्राप्तिनिमित्तान्यप्रत्ययहेतुरित्यङ्गीकृत्यानन्तरश्लोकमवतारयति यस्मादिति विशेषणत्रयवतो भगवदनुस्मरणस्यभगवत्प्राप्तिहेतुत्वं भातितस्मादित्युच्यतेसर्वेषुकालेष्वादरनैरन्तर्य्याभ्यां सहेति यावत्भगवदनुस्मरणे विशेषणत्रयसाहित्यंयथाशास्त्रमिति द्योत्यते भगवदनुसन्धानंकर्त्तव्यमुक्तातेनसहस्वधर्म्ममपिकुरुयुद्धमित्युपदिशता भगवतासमुच्चयोज्ञानकर्म्मणोरङ्गीकृतोभातीत्याशंक्याह मयीति मनोबुद्धिगोचरंक्रियाकारकफलजातंसकलमपिब्रह्मैवेतिभावयन् युद्धस्वेतिब्रुवताक्रियादिकलापस्यब्रह्मातिरिक्तस्याभावाभिलापान्नात्रसमुच्चयोविवक्षितइत्यर्थः उक्तरीत्यास्वधर्ममनुवर्त्तमानस्यप्रयोजनमाह मामेवेति उक्तसाधनवशात्फलप्राप्तौप्रतिबन्धाभावंसूचयति असंशयइति ७

स्वामिकृतटीका ।

तस्मादिति यस्मात्पूर्ववासनैवान्तकालेस्मृतिहेतुर्नतुतदाविवशस्यस्मरणोद्यमःसम्भवति अस्मात् सर्व्वदामामनुस्मरअनुचिनंतयसन्ततस्मरणमाह चित्तशुद्धिंविनानभवति अतोयुध्यचयुध्यस्वचित्तशुद्ध्यर्थंयुद्धादिकंस्वधर्म्ममनुतिष्ठेत्यर्थःएवंमय्यर्पितंमनः संकल्पात्मकंबुद्धिश्चव्यवसायात्मिकायेनत्वयासत्वमनायासेनमामेवप्राप्स्यसिअसंशयःसंशयोऽत्रनास्ति ७

भाषा अनुवाद

औरस्मरणमेंपरमकारणअभ्यासकोदेखावतेहुयेकहतेहैं किअभ्यासकहे समानजातीयकीप्रतीतिकाप्रवाहजोधारावहयोगहै अर्थात् उपायहै उससेएकाग्रहोयजिसकीबुद्धिअन्यविषयमेंनजाय ऐसामनुष्यबुद्धिकेद्वाराप्रकाशरूपपरमेश्वरकोनिरन्तरचिन्तनकरिके हे पार्थ उसपरमेश्वरकोप्राप्तहोताहै ८

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

किंविशिष्टञ्चपुरुषंयातीत्युच्यते कविमिति कविंक्रान्तदर्शिनंसर्व्वज्ञं पुराणंचिरन्तनमनुशासितारंसर्व्वस्यजगतःप्रशासितारंअणोःसूक्ष्मादप्यणीयांसंसूक्ष्मतरंअनुस्मरेदनुचिन्तयेत्यःकश्चित्सर्व्वस्यकर्म्मफलजातस्यधातारंविचित्रतया प्राणिभ्योविभक्तारंविभज्यदातारमचिन्त्यरूपं नास्यरूपंनियतंविद्यमानमपि केनचित्चिन्तयितुंशक्यते इत्यचिन्त्यरूपस्तंआदित्यवर्णमादित्यस्येवनित्यचैतन्यप्रकाशोवर्णोयस्य तमादित्यवर्णंतमसःपरस्तादज्ञानलक्षणान्मोहान्धकारात्परं तमनुचिन्तयन्यातीति पूर्व्वेणैवसम्बन्धः ८

आनन्दगिरिकृतटीका

इतश्च पूर्व्वश्लोकोक्तार्थानुष्ठायी भगवन्तमन्तकालेप्राप्नोतीत्याह किञ्चेति अभ्यासंबिजभते मयीति नहि चित्तसमर्पणस्यविषयभूतंभगवतोऽर्थान्तरं वस्तुसदस्तीतिमन्वानोविशिनष्टि चित्तेति अन्तरालकालेपिविजातीयप्रत्ययेषु बिच्छिद्यविच्छिद्यजायमानेष्वपिसजातीयप्रत्ययावृत्तिरयोगिनोपिस्यादित्याशंक्याह बिलक्षणेति अभ्यासाख्येनयोगेन युक्तत्वंचेतसोविशिनष्टि तत्रैवेति तृतीययापरामृष्टोऽभ्यासयोगःसप्तम्यापिपरामृश्यते ननुप्राक्तनानां चेतस्त्वयेत्याशंक्यबिशिनष्टि योगिनइति तत्रचेतोविषयान्तरंपरामृशेन्नतर्हिपरमपुरुषार्थप्राप्तिहेतुःस्यादित्याशंक्याह नान्यगामिनेति प्रामादिकंबिषयान्तरपारवश्यमभ्यनुज्ञातुंताच्छील्यप्रत्ययात्तेनतात्पर्यादपरामृष्टार्थान्तरेण परमपुरुषनिष्ठेनेत्यर्थः तदेवपुरुषस्यनिरतिशयत्वंयदपरामृष्टाखिलानर्थत्वमनतिशयानन्दत्वंतच्च प्रागेवव्याख्यातंनेहव्याख्यानमपेक्षतेयञ्चासावादित्येइत्यादिश्रुतिमनुसृत्याह दिवीति तत्रविशेषतोऽभिव्यक्तिरेवभवनंपूर्व्वोक्तेनचेतसायथोक्तंपुरुषमनुचिन्तयन् यातितमेवेतिसम्बन्धः अनुचिन्तयन्नित्यत्रानुशब्दार्थंव्याचष्टे शास्त्रेति चिन्तयन्निति व्याकरोतिध्यायन्निति ८

स्वामिकृतटीका।

सन्ततस्मरणस्यचाभ्यासोऽन्तरङ्गसाधनमिति दर्शयन्नाह अभ्यासयोगेति अभ्यासःसजातीयप्रत्ययप्रवाहःसएवयोगउपायस्तेनयुक्तेनैकाग्रेण अतएवनान्यं विषयंगन्तुंशीलंयस्यतेनचेतसादिव्यंद्योतनात्मकंपरमेश्वरमनुचिन्तयन्हेपार्थतमेवयातीति ८

CC-0. In Public Domain. Digitized by eGangotri

कविंपुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः सर्व्वस्यधातारमचिन्त्य रूपमादित्यवर्णंतमसःपरस्तात् ९

आनन्दगिरिकृतटीका

किंविशिष्टपुरुषमनुचिन्तयन्निति सम्बन्धः चकारात्क्रयाबानाद्योत्क्रामन्नित्यनुकृष्यतेतद्ध्यानद्वाराप्राप्यस्यपुरुषस्यविशेषणानिदर्शयति उच्यतइति क्रान्तदर्शित्वमतीतादेरशेषस्यवस्तुनोदर्शनशालित्वं तेनानिष्पन्नमर्थमाह सर्व्वज्ञमिति चिन्तनमादिमतःसर्व्वस्यकारणत्वादनादिमित्यर्थः सूक्ष्ममाकाशादितःसूक्ष्मतरंतदुपादानत्वादित्यर्थःयोयथोक्तमनुचिन्तयेत्सतमेवानुचिन्तयन्यातीतिपूर्व्वेणैव सम्बन्धइति योजना ननुविशिष्टज्ञात्यादिमतोयथोक्तमनुचिन्तनंफलवद्भवति नत्वस्मदादीनामित्याशंक्याह यःकश्चिदिति फलमतउपपत्तेरितिन्यायेनाह सर्व्वस्येति एतदप्रमेयं ध्रुवमिति श्रुतिमाश्रित्याह अचिन्त्यरूपमिति नहिपरस्यकिञ्चिदपिरूपादिवस्तुतोऽस्ति अरूपवदेवहीतिन्यायात्कल्पितमपिनास्मदादिभिःशक्यते चिन्तयितुमित्याह नास्येति मूलकारणादज्ञानात्तत्कार्याच्चपुरस्तादुपरिष्टाद्यवस्थितं परमर्थतोज्ञानतत्कार्यास्पृष्टमित्याह तमसइति ९

स्वामिकृतटीका ।

पुनरप्यनुचिन्तनीयंपुरुषंविशिनष्टि कविमितिद्वाभ्यां कविंसर्व्वज्ञंसर्व्वविद्यानिर्म्मातरं पुराणमनादिसिद्धंअनुशासितारंनियन्तारंअणोःसूक्ष्मादप्यणीयांसमतिसूक्ष्मंआकाशकालदिग्भ्योऽप्यतिसूक्ष्मतरंसर्व्वस्यधातारंपोषकंअपरिमितमहिमत्वादचिन्त्यरूपंमलीमसयोर्म्मनोबुद्ध्योरगोचरंआदित्यवत् स्वरूपप्रकाशात्मकोवर्णः स्वरूपंयस्यतंतमसःप्रकृतेःपरस्ताद्वर्त्तमानंवेदाहमेतंपुरुषंमहान्तमादित्यवर्णंतमसःपरस्तादितिश्रुतेः ९

भाषा अनुवाद ।

फेरिभीचिन्तनीयपुरुषकाखरूपदोश्लोकसेकहतेहैं किकविकहेसर्व्वज्ञसकलविद्योंकेनिर्म्माणकर्त्तापुराणकहेअनादिसिद्धअनुशासिताकहेसमस्तजगतके नियन्ता औअणोरणीयांसकहे सूक्ष्मसेभीसूक्ष्मआकाशकालदिशोंसेभीसूक्ष्मऔसबके धाताकहेपोषणकर्ताअपरिमितमहिमासेअचिन्तरूप अर्थात् मलयुक्तमनबुद्धिके अगोचरकहेअदृश्य औआदित्यवर्णतथातमजोप्रकृतिमाया तिससेपर ऐसेमेरे रूप कोजोस्मरणकरैहैं ९

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

किञ्च प्रयाणकालइति प्रयाणकालेमरणकालेमनसाचलेनप्रचलनवर्जितेनभक्त्यायुक्तोभजनंभक्तिःतयायुक्तोयोगबलेनचैव योगस्यबलंयोगबलंतेनसमाधिजसंस्कारप्रचयजनितंस्वचित्तस्थैर्य्यलक्षणंयोगबलंतेनचयुक्तइत्यर्थः पूर्व्वंहृदयपुण्डरीकेवशीकृत्यचित्तंततऊर्द्धगामिन्यानाड्याभूमिजयक्रमेणभ्रुवोर्म्मध्येप्राणमावेश्यस्थापयित्वासम्यगप्रमत्तःसन्सएवंबुद्धिमान्योगी कविंपुराणमित्यादिलक्षणं तंपरंपुरुषमुपैति प्रपद्यते दिव्यंद्योतनात्मकं १०

आनन्दगिरिकृतटीका ।

इतश्चभगवदस्मरणंसफलत्वादनुष्ठेयमित्याह किञ्चेति कदा तदनुस्मरणेप्रयत्नातिरेकोऽभ्यर्थ्यतेतत्राह प्रयाणकालइति कथंतदनुस्मरणमित्युपकरणकलापमपेक्ष्यमाणंप्रत्याह मनसेति योनुस्मरेत्सकिमुपैतितत्राह सतमिति मरणकालेक्लेशबाहुल्येपिप्राचीनाभ्यासप्रसादासादितबुद्धिवैभवोभगवन्तमनुस्मरन् यथास्मृतमेवदेहाभिमानविगमानन्तरमुपागच्छतीत्यर्थः भगवदनुस्मरणस्य साधानं मनसैवानुद्रष्टव्यमिति श्रुत्युपदिष्टमाचष्टे मनसेति तस्यचञ्चलत्वान्नस्थैर्य्यमीश्वरे सिध्यतितत्कथंतेनतदनुस्मरणमित्याशंक्याह अचलेनेति ईश्वरानुस्मरणेप्रयत्नेनप्रवर्त्तितंविषयविमुखंतस्मिन्नेवानुस्मरणयोग्येपौनःपुन्येनप्रवृत्त्या निश्चलीकृतं ततश्चलनविकलंतेनेति व्याचष्टे प्रचलनेति संप्रत्यनुस्मरणाधिकारिणंविशिनष्टि भक्त्येति परमेश्वरेपरेणप्रेम्णासहितोविषयान्तरविमुखोस्मर्त्तव्यइर्थः योगबलमेव स्फोरयति समाधिजेति योगःसमाधिःचित्तस्यविषयानंतरवृत्तिनिरोधेनपरस्मिन्नेवस्थापनंतस्यबलंसंस्कारप्रचयोध्येयैकाग्र्यकरणंतेनतत्रैवस्थैर्यमित्यर्थः चकारसूचितमन्वयमन्वाचष्टे तेनचेति यत्तुकयानाड्योत्कामन्यातीति तत्राह पूर्व्वमिति चित्तंहिस्वभावतोविषयेषुव्यापृतंतेभ्योविमुखीकृत्यहृदयेपुण्डरीकाकारेपरमात्मस्थानेयत्नतःस्थापनीयं अथयदिदमस्मिन्ब्रह्मपुरेइत्यादिश्रुतेस्तत्रचित्तंवशीकृत्यआदावनन्तरंकर्त्तव्यमुपदिशति ततइति इडापिङ्गलेदक्षिणोत्तरेनाड्यौहृदयान्निःसृते निरुध्यतस्मादेवहृदयाग्रादूर्द्धगमनशीलयासुषुम्नयानाड्या हार्दंप्राणमानीयकण्ठावलम्बितंस्तनसदृशंमांसखण्डंप्रापद्य तेनाध्वनाभ्रुवोर्म्मध्येतमावेश्यअप्रमादवान् ब्रह्मरन्ध्राद्विनिःक्रम्यकविंपुराणमित्यादिविशेषणंपरमपुरुषमुपगच्छतीत्यर्थः भूमिजयक्रमेणेत्यत्रभूम्यादीनांपञ्चानांभूतानांजयोवशीकरणंतस्यतस्यभूतस्यस्वाधीनचेष्टावैशिष्ट्यंतद्वारेणेत्येतदुच्यते सतमित्यादिव्याचष्टे सएवमिति १०

CC-0. In Public Domain. Digitized by eGangotri

प्रयाणकालेमनसाऽचलेनभक्त्यायुक्तोयोगबलेनचैव भ्रुवोर्मध्येप्राणमावेश्यसम्यक्सतंपरंपुरुषमुपैति दिव्यं १०

शाङ्करभाष्यं।

योगमार्गानुगमनेनैवब्रह्मविद्यामन्तरेणापिब्रह्माप्यतइत्येवंप्राप्तइदमुच्यते पुनरपिवक्ष्यमाणेनोपायेनप्रतिपित्सितस्यब्रह्मणोवेदविद्वदनादिविशेषणविशेष्यस्याभिधानंकरोति भगवान् यदक्षरमिति यदक्षरंनक्षरतीति अक्षरंअविनाशिवेदविदोवेदार्थञ्चावदन्तितद्वाएतदक्षरंगार्गिब्राह्मणाअभिवदन्तीतिश्रुतेः सर्वविशेषनिवर्त्तकत्वेनाभिवदन्त्यस्थूलमनण्वित्यादिविशन्तिप्रविशन्ति सम्यग्दर्शनप्राप्तौसत्यांयद्यतयोयतनशीलाः संन्यासिनोवीतरागाविगतोरागोयेष्वस्तेवीतरागाःयच्चाक्षरमिच्छन्तोब्रह्मचर्यंगुरौचरन्तीति तत्तेपदंयदक्षराख्यंब्रह्माख्यंपदं पदनीयं तेतुभ्यंसंग्रहेणसंग्रहःसंक्षेपःतेनसंक्षेपेणप्रवक्ष्येकथयिष्यामिसयोहतद्ब्रह्मवन् मनुष्येषुप्राणायामोङ्कारमभिध्यायीत कतमस्मावसतेनलोकंजयतीति तस्मै सहोवाचएतद्वैसत्यकामपरञ्चापरञ्चब्रह्मयदोङ्कारइत्युपक्रम्यः पुनरेतंत्रिमात्रेणोमित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीत प्रणवोधनुःसरोह्यात्माब्रह्मतल्लक्ष्यमुच्यतेअप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभवेदित्यादिना वचनेनअन्यत्रधर्म्मादन्यत्राधर्म्मादिति चोपक्रम्य सर्वेवेदायत्पदमामनन्तितपांसिसर्वाणिचयद्वदन्तियदीच्छन्तोब्रह्मचर्य्यंचरन्तितत्तेपदंसंग्रहेणब्रवीम्योमित्येतदित्यादिभिश्चवचनैः परस्यब्रह्मणोवाचकरूपेणप्रतिभावत् प्रतीकरूपेणचपरब्रह्मप्रतिपत्तिनत्वेनमन्दमध्यमबुद्धीनांविवक्षित

स्वामिकृतटीका

सप्रपञ्चप्रकृतिं भित्त्वायस्तिष्ठति एवंभूतंपुरुषंअन्तकालेभक्तियुक्तोनिश्चलेनचित्तेपरहितेनमनसायोऽनुस्मरेत् मनोनैश्चल्येहेतुःयोगबलेनसम्यक् सुषुम्नामार्गेणभ्रुवोर्मध्येप्राणमावेश्यइति सतं परंपुरुषंपरात्मस्वरूपंदिव्यंद्योतनात्मकंप्राप्नोति १०

भाषा अनुवाद

प्रपञ्चसहितप्रकृति कोभिन्नकरिकै जोस्थितहै ऐसेपुरुषकोभक्तियुक्त जोपुरुषचित्तेपरहितनिश्चलमनसे आसन्नकालमेधारावाहिकचित्तवृत्तिसेस्मरणकरैहै उस केस्मरणविषयकमनकीस्थिरताका कारणयहीहै किसम्पूर्णयोगबलसे सुषुम्नामार्गक्रमसे उसकीप्राणवायुभ्रूमध्यमेप्रविष्ट होतीहै ऐसापुरुषपरमात्मारूपप्रकाशात्मकंपुरुष कोप्राप्तहोता है १०

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम् ।

स्योङ्कारस्योपासनंकालान्तरेमुक्तिफलमुक्तं यत्तदेवेहापिअधिकृतंकविंपुराणमनु शासितारंयदक्षरंवेदविदोवदन्तीतिचोपन्यस्तस्यचपरस्यब्रह्मणः पूर्वोक्तरूपेणप्रति पत्त्युपायभूतस्योङ्कारस्यकालान्तरमुक्तिफलमुपासनंयोगधारणासहितंवक्तव्यं ११

आनन्दगिरिकृतटीका ।

येन केन चिन्मन्त्रादिना ध्यानकालेभगवदनुस्मरणे प्राप्तेसत्यभिधानत्वेन नियन्तुं स्मर्तव्यत्वेन प्रकृतपरमपुरुषस्य वैविद्यादृष्टप्रसिद्धया प्रामाणिकत्वमाह पुनरपीति उपायोवक्ष्यमाणओङ्कारः अविषये प्रतीचिब्रह्मणिवेदार्थविदामपिकथं वचनमित्याशंक्या विषयत्वमित्येतावतैवेतिमत्वा श्रुतिमुदाहरति तद्देति तथापितस्मिन्नविषयेसर्वविशेषशून्यवचनमनुचितमित्याशंक्याह सर्वेति नकेवलंविद्वदनुभवसिद्धंयथोक्तंब्रह्मकिन्तुमुक्तोपसृप्यतयामुक्तानामपिप्रसिद्धमित्याह किञ्चेति केषांपुनःसन्यासित्वंतदाह वीतरागाइति ज्ञानाब्रह्मचर्यविधानादपिब्रह्मज्ञेयत्वेनप्रसिद्धमित्याह यद्वेति कथंतर्हियथोक्तंब्रह्ममज्ञातुंशक्यमित्याकुलितचेतसमर्जुनं प्रत्याह तत्तेपदमिति वक्ष्यमाणेनोपायेनेत्युक्तंव्यक्तीकुर्वन्नोङ्कारद्वारात्रह्मोपासनंश्रुत्युक्तमनुक्रामति सयोहेति सत्यकामेनाभिध्यानफलंजिज्ञासुनाभगवन्निति पिप्पलादःसम्बोध्याभिमुखीक्रियते निपातौतुप्रसिद्धमर्थमवद्योतयन्तावभिधानस्य फलत्वेनकर्त्तव्यत्वमावेदयतःमनुष्येषु मध्येसयोधिकृतोमनुष्यस्तत्प्रसिद्धमभिध्यानंयथासिध्यति तथासर्ववेदसारभूतमोङ्कारमाभिमुख्येनध्यायीत तच्चाभिध्यानमाक्रायणादिति न्यायेनमरणान्तमनुष्ठेयं सचैवमनुतिष्ठन्प्रकृतेनाभिध्यानेनलोकानां जेतव्यानांवक्तृत्वात्कृतमंलोकंजयतीति प्रश्नेष्टवतेसत्यकामायपिप्पलादनामाकिलाचार्यःप्रतिवचनंप्रोवाच तत्प्रथमंअभिध्येयमोङ्कारंपरापरब्रह्मत्वेनमहीकरोति एतद्वाइतिनिमात्रेणाकारमकारात्मकेनेति यावत् योभिध्यायीत तमेवयथाभिध्यातंपुरुषमधिगच्छतीत्यादि वचनेनोपासनमोङ्कारस्योक्तमित्यर्थः प्रश्नश्रुतिवत् कठवल्लीचतत्रैवार्थेप्रवृत्तेत्याह अन्यत्रेति अव्यवधानेनोपनिषदांव्यवधानेनचकर्म्मश्रुतीनांपरस्मिन्नात्मनिपर्य्यवसानंदर्शयति सर्वइति तपसामपिसर्वेषांचित्तशुद्धिद्वारातत्रैवपर्य्यवसानमित्याह तपांसीति तस्यैवचज्ञानार्थमष्टाङ्गंब्रह्मचर्यंतत्रतत्रविहितमित्याह यदिच्छन्त इति तत्पदनीयस्यब्रह्मणःसंक्षेपेणकथमोंकारद्वारकमिति कथयति ओमित्येतदिति उदाहृतवचनानांतात्पर्यंदर्शयति परस्येति तस्यवाचकरूपेणवात

CC-0. In Public Domain. Digitized by eGangotri

यदक्षरंवेदविदो वदन्तियद्यतयोवीतरागाः यदिच्छन्तोब्रह्मचर्य्यंचरन्ति तत्तेप दंसंग्रहेणप्रवक्ष्ये ११

आनन्दगिरिकृतटीका

स्यैवप्रतीकरूपेणवाविवक्षितस्योङ्कारस्योपासनंयथोक्तैर्व्वचनैरुक्तमितिसम्बन्धः ननु परस्मिन्ब्रह्मणि तत्त्वमस्यादिवाक्यादेव प्रतिपत्तिरधिकारिणोभविष्यतिकिमित्यु पासनमोङ्कारस्योपन्यस्यतेतत्राह परेति यद्यपिविशिष्टस्याधिकारिणोविनैवोपा सनमुपनिषद्भ्योब्रह्मणिप्रतिपत्तिरुत्पद्यतेतथापि मन्दानांमध्यमानाञ्चतद्धिहेतुत्वे नोंकारोविवक्षितःतच्चोपासनं ब्रह्मदृष्ट्यायुतिभिरुपदिष्टमित्यर्थः तस्यक्रममुक्ति फलत्वादनुष्ठेयत्वंसूचयति कालान्तरेति भवत्वेवंश्रुतीनांप्रवृत्तिस्तावताप्रकृतेकिमा यातमित्याशंक्याह उक्तंयदिति तदेवेहापिवक्तव्यमित्युत्तरेणसम्बन्धः उपासनमेवो पास्योपन्यासद्वारास्फोरयति कविमित्यादिना पूर्व्वोक्तरूपेणेत्यभिधानत्वेनप्रतीक त्वेनचेत्यर्थःओतस्योपासनस्यानुद्यमानस्यसोपस्करत्वंसङ्गिरते योगेति ११

स्वामिकृतटीका।

केवलाभ्यासयोगादपिप्रणवाभ्यासमन्तरङ्गंविधित्सुःप्रतिजानीते यदक्षरमिति यदक्षरंवेदार्थज्ञावदन्तिएतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्य्याचन्द्रमसौविधृतौतिष्ठ तइतिश्रुतेःवीतोरागोयेभ्यस्तेवीतरागायतयःप्रयत्नवन्तोयद्विशन्ति यच्च ज्ञातुमिच्छ न्तोगुरुकुलेब्रह्मचर्य्यंचरन्तितत्तेतुभ्यंपदंपद्यतेगम्यतइति पदंप्राप्यंसंग्रहेणसंक्षेपेण प्रवक्ष्ये तत्प्राप्त्युपायंकथयिष्यामीत्यर्थः ११

भाषाअनुवाद

तिसप्रकाशपुरुषकीप्राप्तिकाहेतुजोअभ्यासयोगतिसकोअपेक्षाप्रणवअभ्यासको अंतरङ्गकहेश्रेष्ठसाधनकहनेकीइच्छारखते ऊये भगवानउसकेकहनेकीप्रति ज्ञाकरते हैं किहेगार्गि यहीअक्षरस्वरूपपरब्रह्मकीशिक्षाक्रमसेसूर्यऔचन्द्रमेनि युक्तहोयस्थिति करतीहै अर्थात् अक्षरस्वरूपब्रह्मकीशिक्षाचन्द्रऔसूर्यकरते हैं यहश्रुतिकेकहनेसे वेदवितलोगजिसकोअक्षरकहते हैं औरजिसकेरागआदिगत होगयेहैं ऐसायती कहेयत्नकारीपुरुष जिसमेप्रवेशकरते औरजिसकेजाननेके अर्थगुरूकुलमेंवासकरिब्रह्मचर्यकरते हैं सोईब्रह्मपदतुमकोअबमैसंक्षेपसेकह ताहूं ११

CC-0. In Public Domain. Digitized by eGangotri

सर्वद्वाराणिसंयम्यमनोहृदिनिरुध्यच मूर्ध्न्याधायात्मनःप्राणमास्थितोयोगधारणां १२

शाङ्करभाष्यं

प्रसक्तानुप्रसक्तञ्चयत्किञ्चिदित्येवमर्थउत्तरोग्रन्थआरभ्यते सर्वेतिसर्वद्वाराणिस र्वाणिचतानिद्वाराणिचसर्वद्वाराणिउपलब्धौतानिसर्व्वाणिसंयम्यसंयमनंकृत्वाम नोहृदिहृदयपुण्डरीकेनिरुध्यनिरोधंकृत्वानिःप्रचारतामापाद्यतत्रवशीकृतेनमन साहृदयादूर्द्ध्वगामिन्यानाड्याऊर्द्धमारुह्यमूर्द्धमारुह्यमूर्द्धन्याधायात्मनःप्राणमास्थितः प्रवृत्तोयोगधारणांधारयितुं १२ तत्रैवचधारयन् ओमिति ओमित्येकाक्षरं ब्रह्मब्रह्मणोभिधानभूतमोङ्कारंव्याहरन्नुच्चरंस्तदर्थभूतं मामीश्वरमनुस्मरन्ननुचि

आनन्दगिरिकृतटीका ।

तर्हिकथमनन्यचेताःसततमित्यादिवक्ष्यतेतत्राह प्रसक्तेति ओङ्कारोपासनंप्र सक्तंतदनन्तरंतत्फलमनुप्रसक्तंतद्द्वाराचापुनरावृत्त्यादिवक्ष्यकोटिनिविष्टमित्य र्थः उक्तेर्थेसमनन्तरग्रन्थमुत्थापयति इत्येवमर्थइति श्रोत्रादीनांकुलद्वारवक्तंतत्राह उपलब्धाविति तेषांसंयमनंविषयेषुप्रवृत्तानांदोषदर्शनद्वारातेभ्योवैमुख्यापादनंको यंमनसोहृदयेनिरोधस्तत्राह निःप्रचारमिति मनसोविषयाकारवृत्तिंनिरुध्यहृ दिवशीकृतस्यकार्य्यंदर्शयति तत्रेति ऊर्द्धमित्यत्रापिहृदयादितिसम्बध्यते सर्वाण्युप लब्धिद्वाराणिश्रोत्रादीनिसंनिरुध्यवायुमपिसर्व्वेभ्यो निगृह्यहृदयमानीयततोनिर्ग तयासुषुम्नयाकण्ठभ्रूमध्यललाट क्रमेण प्राणंमूर्द्ध्न्याधाययोगधारणामारूढोब्रह्म व्याहरन्माञ्चतदर्थमनुस्मरन् परमांगतिं यातीतिसम्बन्धः १२

स्वामिकृतटीका ।

प्रतिज्ञातमुपायंसाङ्गमाह सर्वेतिद्वाभ्यां सर्वाणीन्द्रियद्वाराणिसंयम्यप्रत्याहृ त्यचक्षुरादिभिर्व्वाह्यविषयग्रहणमकुर्वन्नित्यर्थःमनश्चहृदिनिरुध्य ब्राह्मविषयस्मर णमप्यकुर्वन्नित्यर्थःमूर्ध्नि भ्रुवोर्म्मध्येप्राणमाधाययोगस्यधारणां स्थैर्यमास्थितआश्रित वान् सन् १२

भाषा अनुवाद ।

ब्रह्मपदप्राप्तिकीअङ्गसमेतउपायकोदोश्लोकसेकहतेहैं किइन्द्रियोंकोप्रत्याहर णपूर्वकअर्थात् चक्षुआदिसेवाह्यरूपादिविषयोंकाग्रहणछोडिमनकोहृदयमेरोध करकेअर्थात्विषयोंकास्मरणत्यागकरतेऊपरेभौंहकेमध्यभ्रुकुटीदेशमेंवायुकोस्थाप न करनेकेअनन्तर योगकाधारणरूपजोधैर्य उसकाअवलंबनकरके १२

CC-0. In Public Domain. Digitized by eGangotri

ओमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन् यःप्रयातित्यजन्देहंसयातिपरमांगतिं १३
अनन्यचेताःसततंयोमांस्मरतिनित्यशः तस्याहंसुलभःपार्थनित्ययुक्तस्ययोगिनः १४

शाङ्करभाष्यं।

न्तयन्यःप्रयातिम्रियतेसत्यजन् परित्यजन्देहंशरीरंत्यजन्देहमितिप्रयाणविशेषणार्थंदेहत्यागेनप्रयाणमात्मनोनस्वरूपनाशेनेत्यर्थः सएवंत्यजन्प्रयातिगच्छतिपरमांप्रकृष्टांगतिं १३ किञ्च अनन्येति अनन्यचेतानान्यविषयेचेतोयस्यसोयमनन्यचेतायोगी सततंसर्वदायोमांपरमेश्वरंस्मरतिनित्यशःसततमितिनैरन्तर्यमुच्यते नित्यशइति दीर्घकालत्वमुच्यतेनषण्मासंसंवत्सरंवाकिंतर्हियावज्जीवंनैरन्तर्येणयोमांस्मरतीत्यर्थःतस्ययोगिनोहंसुलभःसुखेनलभ्यःपार्थ नित्ययुक्तस्यसदासमाहितस्ययोगिनःयत एवमतोऽनन्यचेताःसन्मयिसदासमाहितोभवेत् १४

आनन्दगिरिकृतटीका

यथोक्तयोगधारणार्थंप्रवृत्तोभूर्त्वनिप्राणमाधायधारयन्किंकुर्यादित्याशंक्यानन्तरश्लोकमवतारयति तत्रैवेति एकञ्चतदक्षरंचेतिएकाक्षरमोमित्येवंरूपंतत्कथंब्रह्मणइति यःप्रयातीति मरणमुक्त्वात्यजन्देहमितिब्रुवतापुनरुक्तिराश्रितास्यादित्याशंक्यविशेषणार्थंविवृणोति देहेति एवमोंकारमुच्चारयन्नर्थंचाभिध्यायन्ध्याननिष्ठःसपुमानित्यर्थ.परमामिति गतिविशेषणंक्रममुक्तिविवक्षयाद्रष्टव्यं १३

स्वामिकृतटीका।

ओमिति ओमित्येकंयदक्षरंतदेवब्रह्मवाचकत्वात् ब्रह्मप्रतिमादिवद्ब्रह्मप्रतीकत्वाद्वाब्रह्मतद्व्याहरन्नुच्चारयन्तद्वाच्यञ्चमामनुस्मरन्नेवंदेहंत्यजन्यःप्रकर्षेण याति अर्चिरादिमार्गेणसपरमांश्रेष्ठांमङ्गतिंप्राप्नोति १३

भाषा अनुवाद।

ओंकाराख्यएकजोअक्षरसोब्रह्मकावाचकअथवाब्रह्मप्रतीककहेप्रतिमाकेसमानदूनदोनोहेतुसेब्रह्महै ऐसेप्रणवकहेओंकारकेउच्चारणपूर्वकतद्वाच्यरूपहमकोस्मरणकरिदेहत्यागकरते जोमनुष्यअर्चिरादिमार्गअर्थात्चन्द्रसूर्यमार्गसेगम नकरते हैं तेईसर्वोत्तममेरीगतिकोपावतेहैं १३ ऐसेहीअन्तकालमेधारणक्रमसेनित्यअभ्यासकारीपुरुषकोमेरीप्राप्तिहोतीऔरकोनहीं एतावतापूर्ववचनहींकोस्मरणकरावतेहैं किहेपार्थ जिसमनुष्यकाचित्तभगवतकोछोडिऔरमेनहींहै ऐसाअनन्यचित्तहोयजोनिरन्तर या प्रतिदिनहमकोस्मरणकरैहै उसीसमाहितपुरुषकोहमअनायासमिलतेहैं औरकोनहींप्राप्तहोतेहैं यहजानो १४

CC-0. In Public Domain. Digitized by eGangotri

मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतं नाप्नुवन्तिमहात्मानःसंसिद्धिंपरमाङ्गताः १५

शाङ्करभाष्यं।

तवसौलभ्येनकिंस्यादित्युच्यते शृणुतन्ममसौलभ्येनयद्भवति मामुपेत्येति मामुपेत्यमामीश्वरमुपेत्यमत्भावमापद्यपुनर्जन्मपुनरुत्पत्तिंनप्राप्नुवन्तिकिंविशिष्टंपुनर्जन्मनप्राप्नुवन्तितद्विशेषणमाह दुःखालयंदुःखानामाध्यात्मिकादीनामालयमाश्रयं आलीयन्तेयस्मिन् दुःखानितंदुःखालयंजन्मनकेललंदुःखालयमशाश्वतमनवस्थितस्वरूपञ्चनाप्नुवन्तीदृशंपुनर्जन्ममहात्मानोयतयःसंसिद्धिंमोक्षाख्यांपरमांप्रकृष्टांगताःप्राप्ताः १५

आनन्दगिरिकृतटीका।

ननुवायुनिरोधविधुराणांउदीरितयारीत्यास्वेच्छाप्रयुक्तोत्क्रोरणासम्भवाद्दुर्लभापरमागतिरापतेदिति तत्राह किञ्चेति इतश्चभगवदनुस्मरणेप्रयतितव्यमित्यर्थःसततंनित्यशइति विशेषणयोरपुनरुक्तत्वमाह सततमित्यादिना उक्तमेवापौनरुक्तिंव्यक्तीकरोति नेत्यादिना जितासुरिच्छयादेहंत्यजति तदितरस्तुकर्म्मक्षयेणैवेति विशेषंविवक्षन्नाह यतइति १४

अनन्यचेतसंसमाहितचेतसंप्रतीश्वरस्यसौलभ्यमेवमित्युच्यते किंत्वांप्राप्तास्त्वयेवावतिष्ठन्तेकिम्वापुनरावर्त्तन्तेचन्द्रलोकादिवेति सन्देहात् पृच्छति तवेति तत्रोत्तरश्लोकेननिश्चयंदर्शयति उच्यतइति ईश्वरोपगमनंनसामीप्यमात्रमिति व्याचष्टे मद्भावमिति पुनर्जन्मनोऽनिष्टत्वंप्रश्नद्वारास्पष्टयति किमित्यादिना महात्मत्वंप्रकृष्टसत्त्ववैशिष्ट्यंयत्यस्तस्मिन्नेवेश्वरेसमुत्पन्नसम्यग्दर्शिनोभूत्वेतिशेषः १५

स्वाटीमकृका।

एवञ्चान्तकालेधारणया मत्प्राप्तिर्नित्याभ्यासवशतएवभवति नान्यस्येति पूर्व्वोक्तमेवानुस्मारयति अनन्येति नास्त्यन्यस्मिन्चेतोयस्यतथाभूतःसन्योमांसततंनिरन्तरंनित्यशःप्रतिदिनंस्मरति तस्यनित्ययुक्तस्यसमाहितस्याहंसुखेनलभ्योऽस्मि नान्यस्येति १४

भाषा अनुवाद

जोतुमस्वभक्तकोऐसेअनायासमिलते हौ तोफेरिउसकाक्याहोता है इसशङ्कापरकहते हैं किपूर्व्वोक्तमहात्मालोगमेरीभक्तिसेमेरेकोप्राप्तहोयदुःखकाभवनऔअनित्यजोजन्म तिसकोफेरिनहींप्राप्तहोते हैं क्योंकि वेपरमसिद्धिकोप्राप्तभयेअर्थात्जीवन्मक्तहोय जन्ममरणसंसारदुःसेछूटिजाते हैं १५

CC-0. In Public Domain. Digitized by eGangotri

आब्रह्मभुवनाल्लोकाःपुनरावर्त्तिनोऽर्जुन मामुपेत्यतुकौन्तेयपुनर्जन्मनविद्यते १६

शाङ्करभाष्यं

येपुनर्मानप्राप्नुवन्तितें पुनरावर्तन्तेकेपुनस्त्वत्तोन्यत् प्राप्ताःपुनरावर्त्तन्तइत्युच्यते आब्रह्मेतिआब्रह्मभुवनाद्भवन्तियस्मिन्भूतानीतिभुवनं ब्रह्मभुवनंब्रह्मलोकइत्यर्थः आब्रह्मभुवनात् सहब्रह्मभुवनेनलोकाःसर्वेपुनरावर्त्तिनः पुनरावर्तनस्वभावाःहे अर्जुन मामेकमुपेत्यतुकौन्तेयपुनर्जन्मपुनरुत्पत्तिर्नविद्यते १६

आनन्दगिरिकृतटीका

भगवन्तमुपगतानामपुनरावृत्तौततोविमुखानामनुपजातसम्यग्धियांपुनरावृत्तिरर्थसिद्धेत्याह येपुनरिति अपामसोममभूतासभूमेतिश्रुतेः स्वर्गादिगतानामपिसमानैवानावृत्तिरिति आशङ्कते केपुनरिति अर्थवादश्रुतौकर्म्मिणामस्तत्वस्यापेक्षिकत्वविवक्षित्वापरिहरति उच्यतइति एतेनभूरादिलोकचतुष्टयंप्रविष्टानांपुनरावृत्तावपिजनादिलोकत्रयंप्राप्तानामपुनरावृत्तिरिति विभागोक्तिरप्रामाणिकत्वादेवहेयेत्यवधेयं तर्हितद्वदेवेश्वरंप्राप्तानामपिपुनरावृत्तिःशङ्कते नेत्याह मामिति यावत्संपातश्रुतिबलीश्वरंप्राप्तानांनिवृत्ताविद्यानांपुनरावृत्तिरप्रमाणकीत्यर्थः १६

स्वामिकृतटीका

यद्येवंत्वंसुलभोऽसितत:किमतआह मामिति उक्तलक्षणमाहात्म्यानोमद्भक्तामां प्राप्यपुनर्दुःखाश्रयमनित्यञ्चजन्मनप्राप्नुवन्तियतस्तेपरमांसिद्धिं मोक्षमेवप्राप्ताःपुनर्जन्मनोदुःखानाञ्चालयं स्थानंमासुपेत्यनप्राप्नुवन्तीतिवा १५

तदेवंसर्वेष्वपिलोकेषुपुनरावृत्तिंदर्शयन्निर्धारयति आब्रह्मभुवनादिति ब्रह्मणोभुवनंवासस्थानंब्रह्मलोकस्तमभिव्याप्यसर्वेलोकाः पुनरावर्त्तनशीलाःब्रह्मलोकस्यापिविनाशित्वात् तत्प्राप्तानामनुत्पन्नज्ञानानामवश्यंभाविपुनर्जन्मयएवंक्रममु

भाषा अनुवाद।

इसतरह और और लोकमेंभीउनभक्तोंकोपुनर्जन्मकाअभावदेखायकरअपुनरावृत्तिनिर्धारणकरतेहैं किहेअर्जुन ब्रह्माकेलोकपर्यन्तप्राप्तहोकेभीप्राणीपुनर्व्वार संसारगामीहोतेहैं क्योंकिब्रह्मलोककाभीएकदिननाशहै औरक्रममुक्तिजोकहा है सोकिसीविरलेकोउपासनाकेद्वारा ब्रह्मलोकमेंजायज्ञानप्राप्तहोयब्रह्माकेसाथ मुक्तिमिलतीहै परन्तुहे कौन्तेयमद्रूपप्राप्तमेरेभक्तकापुनर्जन्मतोनहींहोताहै १६

CC-0. In Public Domain. Digitized by eGangotri

सहस्रयुगपर्य्यन्तमहर्यद्ब्रह्मणोविदुः रात्रिंयुगसहस्रान्तांतेऽहोरात्रविदोजनाः १७

शाङ्करभाष्यं ।

ब्रह्मलोकसहितालोकाःकस्मात्पुनरावर्तिनःकालपरिच्छिन्नत्वात् कथं सहस्रेति सहस्रयुगपर्य्यन्तंसहस्राणियुगानिपर्य्यन्तपर्यवसानंयस्याह्नस्तदहःसहस्रयुगपर्यन्तंब्रह्मणःप्रजापतेः विराजोविदुःरात्रिमपियुगसस्रामहःपरिमाणमेवकेविदुरित्याह तेऽहोरात्रविदः कालसंख्याविदोजनाइत्यर्थः १७

आनन्दगिरिकृतटीका

यस्यस्वाभाविकीवंशप्रयुक्ताचशुद्धिस्तस्यैवोक्तेर्थेबुद्धिरुदेतीति मत्वासंबुद्धिद्वयंब्रह्मलोकसहितानांपुनरावृत्तौहेतुंप्रश्नद्वारादर्शयति ब्रह्मेति उक्तमेवहेतुमाकाङ्क्षापूर्व्वकमुत्तरश्लोकेनसाधयति कथमित्यादिना यथोक्ताहोरात्रावयवमासर्त्वयनसम्वत्सरावयवंशतसंख्यायुरवच्छिन्नत्वात्प्रजापतेस्तदन्तर्व्वर्त्तिनामपिलोकानांयथायोग्यकालपरिच्छिन्नत्वेनपुनरावृत्तिरित्यभिप्रेत्यव्याचष्टे सहस्रेत्यादिना १७

स्वामिकृतटीका ।

क्तिफलाभिरुपासनाभिर्ब्रह्मलोकंप्राप्तास्तेषामेवतत्रोत्पन्नज्ञानानांब्रह्मणासहमोक्षोनान्येषांतथाचब्रह्मणासहते सर्व्वेसम्प्राप्तेप्रतिसञ्चरे परस्यान्तेकृतात्मानःप्रविशन्तिपरंपदं परस्यान्तेब्रह्मणःपरमायुषोऽन्तेकृतात्मानोब्रह्मभावापादितमनोवृत्तयःकर्म्मद्वारेणयेषांब्रह्मलोकप्राप्तिस्तेषांनमोक्षइतिपरिनिष्ठितिः मामुपेत्यवर्त्तमानानांतुपुनर्जन्मनास्त्येवेति १६

भाषा अनुवाद

औरजोकहोकितपस्वीदानीबिगतरागऔक्षमाशीललोगत्रैलोकके उपरशोकरहितस्थानकोप्रस्थानकरिबासकरतेहैं इसपुराणकेवचनसेमहर्लोकआदिलोकोंकीऔरलोकसेउत्तमतामालूमहोतीहै परन्तुविनाशतोसबकाहै इसपक्षमेसबकीअपकृष्टताहीहै हांविशेषयहीकिवेलोकबहुतदिनतकस्थिररहतेहैं औरब्रह्माकीअपनेबरषोंसेसौवर्षकीआयुर्दाहै औत्रैलोकअर्थात् स्वर्गमर्वपाताल येब्रह्माकेप्रतिदिनमेउत्पन्नऔप्रतिरात्रिमेप्रलयहोतेहैंब्रह्माकाएकदिनमनुष्यकेहजारचतुर्युगकाहोताऔरउतनीहीरात्रिहै औरमनुष्यकाएकवर्षदेवतोंकारातिदिनहै इसहिसाबसेदेवतोंकेबारह हजारबर्षमेचारियुगहोतें हैं जोयहजानतें सोईसर्वज्ञहैं औरजोचन्द्रसूर्यकीगति कोराति दिनजानतें वेनहींजानतें हैं १७

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

यतएवंकालपरिच्छिन्नास्तेऽतःपुनरावर्त्तिनोलोकाःप्रजापतेरहनियद्भवतिरात्रौचतदुच्यते अव्यक्तेति अव्यक्तादव्यक्तंप्रजापतेःस्वापावस्थातस्मादव्यक्तात्व्यक्तयोव्यज्यन्तइतिव्यक्तयःस्थावरजङ्गमलक्षणाःसर्वाःप्रजाःप्रभवन्त्यभिव्यज्यन्ते अह्नआगमोऽहरागमस्तस्मिन्नहरागमेंकालेब्रह्मणःप्रबोधकाले तथारात्र्यागमेब्रह्मणःस्वापकालेप्रलीयन्तेसर्वाव्यक्तयस्तत्रैवपूर्व्वोक्तेऽव्यक्तसंज्ञके १८

आनन्दगिरिकृतटीका।

अक्षरार्थमुक्त्वातात्पर्यार्थमाहयतइति यत्प्रजापतेरहस्तद्युगसहस्रपरिमितंयाचतस्यरात्रिःसापितथेतिकालविदामभिप्रायमनुसृत्य ब्राह्मस्याहोरात्रस्य कालपरिमाणंदर्शयित्वा तत्रैवविभज्यकार्यंकथयति प्रजापतेरिति अव्यक्तमव्याकृतमितिशङ्कांवारयति अव्यक्तमित्यादिना जातिप्रतियोगिभूताव्यक्तीर्व्यावर्त्तयति स्थावरेति असदुत्पत्तिप्रसक्तिंप्रत्यादिशति अभिव्यज्यन्तइति पूर्व्वोक्तमव्यक्तसंज्ञकंस्वापावस्थं ब्रह्मप्रजापतिशब्दितंतस्मिन्नितियावत् १८

स्वामिकृतटीका।

ननुचतपस्विनोदानशीलावीतरागास्तितिक्षवः त्रैलोक्यस्योपरिस्थानंलभन्तेशोकवर्जितं इत्यादिपुराणवाक्यैस्त्रिलोक्याःसकाशान्महर्लोकादीनामुत्कृष्टत्वगम्यतेविनाशित्वेचसर्व्वेषामवैशिष्ट्येकथमसौविशेषःस्यादित्याशंक्य बहुकल्पकालावस्थायित्वनिमित्तोसौविशेष इत्याशयेनस्वमानेनशतवर्षायुषोब्रह्मणोऽहन्यहनित्रिलोक्याउत्पत्तिर्निशिनिशिचप्रलयोभवतीति दर्शयिष्यन्ब्रह्मणोऽहोरात्रयोःप्रमाणमाह सहस्रेति सहस्रंयुगानिपर्यन्तोऽवसानंयस्यतद्ब्रह्मणोयदहस्तद्येविदुःयुगसहस्र मन्तोयस्यास्तांरात्रिञ्चयोगवलेनयेविदुस्तएवसर्व्वज्ञाजनाअहोरात्रविदःयेषान्तकेवलं चन्द्रादित्यगत्यैवज्ञानंतेतथाहोरात्रविदोनभवन्ति अल्पदर्शित्वात्युगशब्देनात्र चतुर्युगमभिप्रेतंचतुयुगसहस्रन्तुव्रणोदिनमुच्यतइतिविष्णुपुराणोक्तेः ब्रह्मणइतिचमहर्लोकादिवाशिनामुपलक्षणार्थं तत्रायंकालगणनाप्रकारःमनुष्याणांयद्वर्षंतद्देवानामहोरात्रं तादृशैरहोरात्रैःपक्षमासादिकल्पनयाद्वादशभिर्वर्षसहस्रैश्चतुर्युगंभवति चतुर्युगसहस्रन्तुब्रह्मणोदिनंतावत्प्रमाणैवरात्रिस्तादृशैश्चाहोरात्रैः पक्षमासादिक्रमेणवर्षशतंब्रह्मणःपरमायुरिति १७

CC-0. In Public Domain. Digitized by eGangotri

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे रात्र्यागमेप्रलीयन्तेतत्रैवाव्यक्तसंज्ञके १८

शाङ्करभाष्यं

अकृताभ्यामकृतविप्रणाशदोषपरिहारार्थंबन्धमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थंअविद्यादिक्लेश मूलकर्म्माशयवशाच्चावशीभूतग्रामोभूत्वाप्रलीयतइत्यर्थः संसारेवैराग्यप्रदर्शनार्थञ्चेदमाह भूतग्रामइति भूतग्रामोभूतसमुदायःस्थावरजङ्गमलक्षणोयःपूर्व्वस्मिन्कल्पेआसीत्सएवायंनान्योभूत्वापुनःअहरागमेप्रलीयते पुनःपुनःरात्रागमेऽहःक्षयेऽवशोऽस्वतन्त्रएवपार्थप्रभवतिजायतेसएवअहरागमे १९

आनन्दगिरिकृतटीका

ननुप्रबोधकालेब्रह्मणोयोभूतग्रामोभूत्वात्स्यैवस्वापकालेविलीयते तस्माद्न्योभूयोभूयोब्रह्मणोऽहरागमेभूत्वापुनरात्रागमेपरवशोविनश्यति तदेवंप्रत्यवान्तरकल्पंभूतग्रामविभागोभवेदित्याशंक्यानन्तरश्लोकतात्पर्यमाह अकृतेति प्रतिकल्पंप्राणिनिकायस्यभिन्नत्वेसतिअकृताभ्यागमादिदोषप्रसङ्गात्तत् परिहारार्थंभूतग्रामस्य प्रतिकल्पमैक्यमास्थेयमित्यर्थः यदिस्थावरजङ्गमलक्षणप्राणिकायस्यप्रतिकल्पमन्यथात्वंतदेकस्यबन्धमोक्षान्वयिनोभावात्कारुढयात्मनोबन्धमोक्षार्थस्यशास्त्रस्यप्रवृत्तिरफलाप्रसज्येतअतस्तत्साफल्यार्थमपिप्रतिकल्पंप्राणिवर्गस्य नवीनत्वानुपपत्तिरित्याह बन्धेति कथंपुनर्भूतसमुदायोऽस्वतन्त्रः सन्नवशीभूत्वाप्रविलीयतेतत्राह

स्वामिकृतटीका ।

ततःकिमतआह अव्यक्तादित्यादिकार्यस्याव्यक्तरूपंकारणात्मकंतस्माद्व्यक्तात् कारणरूपात्व्यज्यन्तइतिव्यक्तयश्चराचराणिभूतानिप्रादुर्भवन्तिकदा अहरागमेब्रह्मणोदिवसस्योपक्रमेतथारात्रेरागमेब्रह्मशयनेतस्मिन्नेवाव्यक्तसंज्ञके कारणरूपे प्रलयंयान्ति यद्वा तेऽहोरात्रविदइत्येतन्नविधीयते किन्तुतेप्रसिद्धाअहोरात्रविदोजनाब्रह्मणोयदहर्विदुस्तस्याह्नआगमेऽव्यक्ताद्व्यक्तयःप्रभवन्ति याच्चरात्रिं विदुस्तस्यारात्रेरागमेप्रलीयन्तइति द्वयोरन्वयः १८

भाषा अनुवाद

जिससेकालगतिकेपराधीनसबलोकहैं इससेपुनरावृत्तिहोतीहै सोईकहते हैं किकार्यरूपजगतकेअव्यक्तकहेसूक्ष्मरूपकारणस्वरूपहीकोप्रकृतिकहतेहैं उसीकारणरूपप्रकृतिसेब्रह्माकेदिनमेंचराचरसकलउत्पन्नहोतेऔररात्रिआनेसेफेरिउसीप्रकृतिमेंलयपातेहैं १८

CC-0. In Public Domain. Digitized by eGangotri

भूतग्रामःसएवायंभूत्वाभूत्वाप्रलीयते रात्र्यागमेऽवशःपार्थप्रभवत्यहरागमे १९

शाङ्करभाष्यं

यदुपन्यस्तमक्षरंतस्यप्राप्त्युपायोनिर्दिष्टओमित्येकाक्षरंब्रह्मेत्यादिनाथेदानीमक्षरस्यैवस्वरूपनिर्दिदिक्षयेदमुच्यते परइति अनेनयोगमार्गेणेदंगन्तव्यमितिपरस्तस्मादितिपरोव्यतिरिक्तोभिन्नः कुतस्तस्मात्पूर्वोक्ताद्व्यक्तात् तुशब्दोऽव्यक्ताक्षरस्यविवक्षितस्यव्यक्ताद्वैलक्षण्यविशेषणार्थःभावोऽक्षराख्यंपरंब्रह्मव्यतिरिक्तत्वेसत्यपिसालक्षण्यप्रसङ्गोऽस्तीतितद्विनिवृत्त्यर्थमाह अन्यइति अन्योविलक्षणःसचाव्यक्तोऽनिन्द्रियगोचरःपरस्तस्मादित्यक्तःकस्मात्पुनःपरः पूर्वोक्ताद्भूतग्रामबीजभूताद्विद्यालक्षणाद्व्यक्तादन्योविलक्षणोभावइत्यभिप्रायः सनातनश्चिरन्तनोयः सभावः सर्वेषुभूतेषुब्रह्मादिषुनश्यत्सुनविनश्यति २०

आनन्दगिरिकृतटीका।

अविद्यादीति आदिशब्देनास्मितारागद्वेषाभिनिवेशागृह्यन्ते यथोक्तंक्लेशपञ्चकंमूलप्रकृतिलक्ष्यकल्पंप्रतिलक्ष्यधर्माधर्मात्मकंकर्मराशिरुच्यतेतद्वशादेवास्वतन्त्रोभूतसमुदायोजन्मविनाशावनुभवतीत्यर्थःप्राणिनिकायस्यजन्मनाशाभ्यासोक्तेरर्थसिद्धमर्थमाह इत्यतइति संसारेविपरिवर्त्तमानानांप्राणिनामस्वातन्त्र्यादवशानामेवजन्ममरणप्रबन्धसम्बाधत् अलमनेनसंसारेणेति वैराग्यंतस्मिन्प्रदर्शनीयं तदर्थञ्चेदंभूतानामहोरात्रमात्रत्तिवचनमित्यर्थः समनन्तरवाक्यमिदमापरामृश्यते रात्र्यागमेलयमनुभवतोऽहरागमेचप्रभवंप्रतिपद्यमानस्यप्राणिवर्गस्यतुल्यंप्रारवश्यमित्याशयवानाह अक्षइति १९

स्वामिकृतटीका।

तत्रचक्षतनाशाक्षताभ्यागमशङ्कांवारयन् वैराग्यार्थंसृष्टिप्रलयप्रवाहस्य बिच्छेदंदर्शयति भूतग्रामइति भूतानांचराचरप्राणिनांग्रामःसमूहोयःप्रागासीत्सएवायमहरागमेभूत्वाभूत्वारात्रेरागमेप्रलीयते प्रलीयपुनरप्यहरागमेऽवशःकर्म्मादिपरतन्त्रःसन्प्रभवतिनान्यइत्यर्थः १९

भाषाअनुवाद

अबविषयोंसेवैराग्यहोनेकेअर्थ सृष्टिऔलयकाप्रबाहदेखावतेहैं किहेपार्थजोचराचरप्राणीमात्रपूर्वमेथे तेईअवशकर्म्मकेआधीनवारम्वारहोतेऔजातेहैंजबब्रह्माकादिनभयातबप्रगटे जबरातिआईतोफेरिप्रकृतिमेलीनहोगयेऐसेही फेरफेरलगारहता है १९

CC-0. In Public Domain. Digitized by eGangotri

परस्तस्मात्तुभावोन्योव्यक्तोव्यक्तात्सनातनः यःससर्व्वेषुभूतेषुनश्यत्सुनविनश्यति २०

शाङ्करभाष्यं

अव्यक्तइति योसावव्यक्तोक्षरइत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तंभावंआहुः परमाप्रकृष्टांगतिंयंभावंप्राप्यगत्वाननिवर्त्तन्तेसंसारायतद्धामस्थानंपरमंप्रकृष्टंसमविष्णोःपरमंपदमित्यर्थः २१

आनन्दगिरिकृतटीका

अक्षरंब्रह्मपरमित्युपक्रम्यतदनुपयुक्तंकिमिदमन्यदुक्तमित्याशंक्यदृष्टमनूद्यानन्तरगण्यसङ्गतिमाह यदुपन्यस्तमिति अक्षरस्वरूपेनिर्दिदिक्षितेतस्मिन् पूर्वोक्तयोगमार्गस्यकथमुपयोगःस्यादित्याशंक्यतत्प्राप्तुप्रापयत्वेनेत्याह अनेनेति गन्तव्यमितियोगमार्गोक्तिरूपयुक्तेतिशेषः पूर्वोक्ताद्व्यक्तादितिसम्बन्धः परशब्दस्यव्यतिरिक्तविषयत्वेतुशब्देनवैलक्षण्यमुक्त्वापुनरन्यशब्दप्रयोगात्पौनरुक्त्यमित्याशंक्याह व्यतिरिक्तत्वइति तुनाद्योतितंवैलक्षण्यमन्यशब्देनप्रकटितंयतोभिन्नेष्वपि भावभेदेषु सालक्षण्यमालक्ष्यतेततश्चाव्यक्ताद्भिन्नत्वेपिब्रह्मणस्तेनसादृश्यमाशङ्कते तन्निवृत्तयेपरमन्यपदमित्यर्थः यद्वापरशब्दस्यप्रकृष्टवाचिनोभावविशेषणार्थत्वेपुनरुक्तिशङ्कैवनास्तीतिद्रष्टव्यःअनादिभावस्याक्षरस्याविनाशित्वमर्थसिद्धंसमर्थयतेयः सभावइति सर्व्वंहिविनश्यद्विकारजातंपुरुषान्तंविनश्यति सतुविनाशहेत्वभावान्नविनष्टुमर्हतीत्यर्थः २०

यथोक्तेऽव्यक्तेभावेश्रुतिसम्मतिमाह अव्यक्तइति तस्यपरमगतित्वंसाधयति यः प्राप्येति योसावव्यक्तोभावोनदर्शितःसयेनाक्षरंपुरुषंवेदसत्यमित्यादिश्रुतावक्षरइ

स्वामिकृतटीका।

लोकानांमनित्यत्वं प्रपंच्यपरमेश्वरस्वरूपस्यनित्यत्वंप्रपञ्चयति परइति द्वाभ्यांतस्माच्चराचरकारणभूताद्व्यक्तात्परस्तस्यापि कारणभूतोयोन्यस्तद्विलक्षणोऽव्यक्तश्चक्षुराद्यगोचरोभावः सनातनोऽनादिः सतुसर्वेषुकार्यकारणलक्षणेषुभूतेषु नश्यत्स्वपिनविनश्यति २०

भाषा अनुवाद।

सकललोककोअनित्यतादिखायअबदोश्लोकसेपरमेश्वरकानित्यत्व विस्तारकरिकेकहते हैं किसोईचराचरकोकारणरूपप्रकृतिसेपरअर्थात्उसकाभीकारणस्वरूपऔउससेभिन्नचक्षुआदिकाअगोचरभावजोअनादिपुरुष सोयावतकार्यकारणरूपभूतमात्रकानाशहोनेसेभी नष्टनहींहोते हैं २०

CC-0. In Public Domain. Digitized by eGangotri

अव्यक्तोऽक्षरइत्युक्तस्तमाहुःपरमांगतिं यंप्राप्यननिवर्त्तन्तेतद्धामपरमंमम २१

शाङ्करभाष्यं

तल्लब्धेरुपायउच्यते पुरुषइति पुरुषःपुरिशयनात्पूर्णत्वाद्वासपरःपार्थपरो निरतिशयोयस्मात् पुरुषान्नपरंकिञ्चित् सभक्त्यालभ्यस्तुज्ञानलक्षणयानन्ययाआत्मविषययायस्यपुरुषस्यान्तःस्थानि मध्यस्थानिकार्य्यभूतानिकार्य्यंहिकारणस्यान्तर्वर्त्तिभवतियेनपुरुषेणसर्व्वमिदंजगत्ततंव्याप्तंआकाशेनेवघटादि २२

आनन्दगिरिकृतटीका।

क्षरंभावंपरमांगतिंपुरुषान्नपरंकिञ्चित् साकाष्ठासापरागतिरित्याद्याःश्रुतयोवदन्तीत्याह योसाविति परमपुरुषस्यपरमगतित्वमुक्तंव्यनक्ति यंभावमिति तद्विष्णोःपरमंपदमिति श्रुतिमनसम्वादयति तद्धामेति २१

ननुव्यक्तादतिरिक्तस्यतद्विलक्षणस्यपरमपुरुषस्यप्राप्तौकश्चिदसाधारणोहेतुरेषितव्योयस्मिन्प्रेक्षापूर्व्वकारीयत्प्रेक्षयाप्रवृत्तोनिवर्त्तेतेति तमाह तल्लब्धेरिति परस्यपुरुषस्यसर्व्वकारणत्वंसर्व्वव्यापकत्वञ्चविशेषणद्वयमुदाहरति यस्येति निरतिशयत्वंविशदयति यस्मादिति तुशब्दोऽवधारणार्थःभक्तिर्भजनं सेवाप्रदक्षिणप्रणामादिलक्षणान्तांव्यवर्त्तयति ज्ञानेति उक्तायाभक्तेर्विषयतोवैशिष्ट्यमाह अनन्ययेति को

स्वामिकृतटीका

अविनाशेप्रमाणंदर्शयन्नाह अव्यक्तइति योभावोऽव्यक्तोतीन्द्रियःअक्षरःप्रवेशनाशशून्यइति तथाअक्षरात् सम्भवतीहविश्वमित्यादिश्रुतिष्वक्षरइत्युक्तःतंपरमांगतिं गम्यंपुरुषार्थमाहुःपुरुषान्नपरंकिञ्चित् साकाष्ठासापरागतिरित्यादिश्रुतयःपरमततित्वमेवाह यंप्राप्यनपुनर्निवर्त्तन्तइति तद्धाममैवधामस्वरूपंममेत्युपचारेषष्ठीराहोःशिरइतिवत् अतोऽहमेवपरमागतिरित्यर्थः २१

भाषाअनुवाद

अवपरमेश्वरके अविनाशित्वमेप्रमाणदर्शायकरकहते हैं किजोभावरूपइन्द्रियअगोचरप्रवेशनाशशून्यअक्षरस्वरूपपरमेश्वरजिससेइसविश्वकाउद्भवहैऔश्रुति जिसकोअक्षरकहतीहैं किपुरुषान्न किञ्चित्परंसाकाष्ठापरागतिजोसबकेपरऔरजिससेपरकोईनहींऐसेश्रुतिजिसको उत्कृष्टगतिकहतींहैं औरजिसकोपायकरफेरिसंसारगति नहींहोतीवहीमेरास्वरूपहै इससे मैहींपरमगतिहौंयहजानो २१

CC-0. In Public Domain. Digitized by eGangotri

पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया यस्यान्तःस्थानिभूतानियेनसर्व्वमिदंततं २२

शाङ्करभाष्यं ।

प्रकृतानांप्रणवावेदितब्रह्मवुद्धीनांकालान्तरमुक्तिभाजांतत्ब्रह्मप्रतिपत्तयेउत्तरोमार्गोवक्तव्यइति यत्रकालइत्यादिविवक्षितार्थसमर्पणार्थमुच्यते आवृत्तिमार्गोपन्यासइतरमार्गस्तुत्यर्थः यत्रेति यत्रकालेप्रयाताइति व्यवहितेनसम्बन्धः यत्रयस्मिन् कालेत्वनावृत्तिमपुर्जन्मआवृत्तिंतद्विपरीताञ्चैवयोगिनइतिकर्म्मिणश्चोच्यन्तेकर्म्मिणस्तुगुणतःकर्म्मयोगेनयोगिनामिति विशेषणात् तत्रविभज्यन्तेयोगिनःयत्रकालेप्रयाताश्चतायोगिनोनावृत्तिंयान्तियत्रकालेचप्रयाताश्चता आवृत्तिंयान्तितंकालंवक्ष्यामिभरतर्षभ २३

आनन्दगिरिकृतटीका ।

सौपुरुषोयद्विषयाभक्तिस्तत्प्राप्तौपर्य्याप्तेत्याशंक्योत्तरार्द्धंव्याचष्टे यस्येति कथम्भूतानां तदवस्थत्वंतत्राह कार्यंहीति सपर्यगादिति श्रुतिमाश्रित्याह येनेति २२

ननुज्ञानायत्तापरमपुरुषप्राप्तिरुक्तानचज्ञानंमार्गमपेक्ष्यफलायकल्पते विदुषोगत्युत्क्रान्तिनिषेधश्रुतेः तथाचमार्गोक्तिरयुक्तेत्याशंक्यसगुणब्रह्मोपासनानांतदुपदेशोऽर्थवानित्यभिप्रेत्याह प्रकृतानामिति वक्तव्यइति यत्रकालइत्याद्युच्यतेइति सम्बन्धः सचेदुक्तव्यस्तर्हिकिमित्यध्यात्मादिभावेनसविशेषंब्रह्मध्यायतांफलाप्तयेमूर्द्धन्यनाडीसम्बन्धेदेवयानेपथ्युपास्यत्वायवक्तव्यंकालोनिर्दिश्यतेंतत्राह विवक्षितेति सोऽर्थोमार्गस्तदुक्तिशेषत्वेनकालोक्तिरित्यर्थः पितृयानमार्गापन्यासस्तर्हिकिमिति क्रियतेतत्राह आवृत्तिमिति मार्गान्तरस्यावृत्तिफलत्वादस्यचानावृत्तिफलत्वात्तदपेक्षयामहीयानयमितिस्तुतिर्ब्विवक्षितेतिभावः योगिनइति ध्यायिनांकर्म्मिणाञ्चत

स्वामिकृतटीका ।

तत्प्राप्तौचभक्तिरन्तरङ्गोपायइत्युक्तमेवेत्याह पुरुषइति सचाहपरःपुरुषोऽनन्ययानविद्यतेन्यःशरणत्वेनयस्यासत्याएकान्तरभक्त्यैवलभ्योनान्यथापरत्वमेवाह यस्य कारणभूतस्यान्तर्मध्येभूतानियेनचकारणभूतेनेदंसर्व्वंजगत्ततंव्याप्तं २२

भाषाअनुवाद ।

इसपरमेश्वरकीप्राप्तिमेभक्तिहीसबसेवढ़िकैपरमउपायहै इसकोकहते हैं किसोईपरमपुरुषमैअनन्यभक्तिमेअर्थात् जिसमेहमैछोडिऔरकोईभीचिन्तनीयनहींहै ऐसीएकान्तभक्तिसेमैमिलताहूं औरअवप्राप्तव्यपुरुषकीश्रेष्ठताकहते हैं किजिसपुरुषमे येभूतसकलस्थितहैं औरजोकारणरूपसेसमस्तजगतमेव्यापरहा है सोईमैहूं २२

CC-0. In Public Domain. Digitized by eGangotri

यत्रकालेत्वनावृत्तिमावृत्तिञ्चैवयोगिनः प्रयातायान्तितंकालंवक्ष्यामिभरतर्षभ २३

आनन्दगिरिकृतटीका

न्त्रेणाभिधानमित्याह योगिनइति कथंकर्म्मिषुयोगिशब्दोवर्त्ततामित्याशंक्यानुष्ठानगुणयोगादित्याह कर्म्मिणस्त्विति गुणतोयोगिनइति सम्बन्धःतत्रैववाक्योपक्रमस्यानुकूल्यमाह कर्म्मयोगेनेति अवशिष्टान्यक्षराणिव्याचक्षाणोवाक्यार्थमाह यत्रेति योगिनोत्रविवक्षिताःयेआवृतावधिकृतायोगिनःकर्म्मिणइति विभागःकालप्राधान्येनमार्गद्वयोपन्यासमुपक्रम्यतमेवप्रधानीकृत्यदेवयानंपन्थानमवतारयति नकालमिति २३

यथोपक्रमंव्याख्याययथाश्रुतंव्याख्याति अथवेति कथंतर्हिदेवतानामभिनेत्रीणांग्रहणेकालप्राधान्येननिर्देशोश्लिष्यते तत्राह भूयसांत्त्विति मार्गद्वयेपिकालाद्य

स्वामिकृतटीका

तदेवंपरमेश्वरोपासकास्तत्पदंप्राप्यननिवर्त्तन्ते अन्येत्वावर्त्तन्तइत्युक्तं तत्रकेनमार्गेणगतानावर्त्तन्तेकेनवावर्त्तन्तइत्यपेक्षायामाह यत्रेति यत्रयस्मिन्कालेप्रयातायोगिनोऽनावृत्तिंयान्ति यस्मिंश्चकालेप्रयाताआवृतिंयान्तितंकालंवक्ष्यामीत्यन्वयःअत्रचरश्म्यानुसारीअतश्चायनेऽपिदक्षिणइति सूचितन्यायेनोत्तरायणादिकालविशेषमरणस्यत्वविवक्षितत्वात्कालशब्देन कालाभिमानिनीभिरातिवाहिकीभिर्देवताभिःप्राप्योमार्गउपलक्ष्यते अतोऽयमर्थःयस्मिन्कालाभिमानिदेवतोपलक्षिते मार्गंप्रायातायोगिनउपासकाःकर्म्मिणश्चयथोक्तमनावृत्तिभावत्वञ्चयान्ति तंकालाभिमानिदेवतोपलक्षितंमार्गंकथयिष्यामीति अग्निज्योतिषोःकालाभिमानित्वाभावेऽपिभूयसामहरादिशब्दोक्तानां कालाभिमानिनां साहचर्य्यादाभ्रवनमित्यादिवत् कालशब्देनोपलक्षणमविरुद्धं २३

भाषाअनुवाद

इसप्रकारसेभगवतउपासकपरमपदप्राप्तहोके फेरिसंसारगतिमेनहींआवतेहैं यहतीनिश्लोकसेकह अवकौनमार्गसेगमनकरिके फेरिआवते औकौनमार्गगामी फेरिनहींआवते यहीप्रकाशरूपसेकहतेहैं किहेअर्ज्जुन योगिजनजिसकालमेगमनकरिआवते औरजिससेगमनकरिनहींआवते सोकालतुमसेकहूंगा यद्यपिदेहत्यागमेउत्तरायणकालश्रेष्ठऔदक्षिणायननिकृष्टहै तौभीव्याससूत्रमेकहाहै किभगवतभक्तदक्षिणायनमेभीउत्तमगतिकोजातेहैं यहांयोगीकहेकर्मी औकालसेतदभिमानिनीदेवतालेतेहैं २३

CC-0. In Public Domain. Digitized by eGangotri

अग्निर्ज्योतिरहःशुक्लषण्मासाउत्तरायणं तत्रप्रयातागच्छन्तिब्रह्मब्रह्म

बिदोजनाः २४

शाङ्करभाष्यं ।

तंकालमाह अग्निर्ज्योतिरिति अग्निःकालाभिमानिनीदेवतातथाज्योतिर्देवते वकालाभिमानिनी अथवाअग्निर्ज्योतिषीयथाश्रुतेएवदेवते भूयसान्निर्देशोयत्र कालेतंकालमिति आभ्रवनवत् तथाहर्देवताहरभिमानिनीशुक्लपक्षदेवतातथाषण्मासाउत्तरायणं तत्रापिदेवतैवमार्गभूतेतिस्थितोन्यत्रन्यायस्तत स्मिन्मार्गेप्रयातामृतागच्छन्तिब्रह्मब्रह्मविदोब्रह्मोपासकाःब्रह्मोपासनपराजनाःक्रमेणेति वाक्यशेषोन हिसद्योमुक्तिभाजांसम्यग्दर्शननिष्ठानांगतिर्वाक्वचिदस्तिनतस्यप्राणाउत्क्रामन्तीति श्रुतेःब्रह्मसंलीनप्राणाएवतें ब्रह्ममयाब्रह्मभूताएवतें २४

आनन्दगिरिकृतटीका

भिमानिन्योदेवताःकालशब्देनोच्यन्ते कालाभिमानिनीनांभूयस्त्वात् कालशब्देनस र्वासांदेवतानामुपलक्षणत्वंविवक्षित्वाकालकथनमित्यर्थःयथाम्राणांभूयस्त्वादिद्यमाने ष्वपिद्रुमान्तरेषुआभ्रैरेववनंनिर्दिश्यते तद्वदित्युदाहरणमाह आभ्रेति ननुभोगचि ह्नानांभोगभूमीनांवातत्तच्छब्दैरुपादानसम्भवेकिमिति देवताग्रहणमित्याशंक्याति वाहिकास्तल्लिङ्गादितिन्यायेनोत्तरमाह इतिस्थितइति तेषांअग्न्यादीनांसमी पमितिसामीप्ये तत्रेतिसप्तमी ब्रह्मकार्य्योपाधिकंपरंबाब्रह्मपरम्परयामुत्यालम्बन मतएवक्रमेणेत्युक्तंनिर्गुणमप्रपद्यंब्रह्मास्मीति विद्यावतोव्यवच्छेदःत्र ब्रह्मोपासने ति ननुब्रह्मशब्दस्यमुख्यार्थत्वार्थंपरब्रह्मविदामेवेयंगतिरुच्यते नबादर्य्यधिकरण विरोधादित्याह नहीति २४

स्वामिकृतटीका ।

तत्रानावृत्तिभागमाह अग्निरिति अग्निज्योतिःशब्दाभ्यांतेऽर्चिषमभिसम्भवन्ती

भाषा अनुवाद

औरजिसमार्गसेप्रयाणकरिके फेरिनहींसंसारगतिकोप्राप्तहोतेहैं सोईमा र्गकहते हैं किअर्चिअभिमानिनीअर्थात् अग्नि या ज्योतिरूपऔर अहकहेदिन औशुक्लपक्षतथाउत्तरायणजोछमासऔर संवत्सरइनसबकीअभिमानिनीदेवताइ हांलेतेहैं यथाप्रथमजोतिमेप्रवेशकरिफेरिदिनमेदिनसेपक्षमेपक्षसेउत्तरायणछ माहींसेउससेसंवत्सरमे संवत्सरसेदेवलोकमेप्राप्तहोयफेरिभगवतउपासकब्रह्मज्ञ होयसाक्षात् ब्रह्मस्वरूपहोतेहैं निष्कामकर्म्मकारी इसगतिसेजाते हैं ३४

CC-0. In Public Domain. Digitized by eGangotri

धूमोरात्रिस्तथाकृष्णषण्मासादक्षिणायनं तत्रचान्द्रमसंज्योतिर्योगीप्राप्यनिवर्त्त्यते २५

शाङ्करभाष्यं।

धूमइति धूमोरात्रिःधूमाभिमानिनीरात्र्यभिमानिनीचदेवतातथाकृष्णःकृष्णपक्षदेवताषण्मासादक्षिणायनमितिचपूर्व्ववद्देवतैव तत्रचन्द्रमसिभवंचान्द्रमसंजोतिस्तत्फलंइष्टादिकारीयोगीकर्म्मीप्राप्यमुक्त्वातत्क्षयादिहनिवर्त्तते पुनः २५

आनन्दगिरिकृतटीका।

प्रकृतंदेवयानंप्रस्थानंस्तोतुंपितृयानमुपन्यस्यति धूमइति तत्रापिमार्गचिह्नानि भोगभूमीश्चव्यवच्छिद्यआतिवाहिकदेवताविषयत्वंधूमादिपदानांविभजते धूमेत्यादिना तत्रेतिसप्तमीपूर्व्ववदेवसामीप्यार्था इष्टादीत्यादिशब्देनपूर्त्तदत्तेगृह्येते कृतात्ययेऽनुशयवानितिन्यायंसूचयति तत्क्षयादिति आरोहावरोहयोरभ्यासवाचिना पुनःशब्देन संसारस्यानादित्वंसूच्यते २५

स्वामिकृतटीका

तिश्रुत्युक्तार्च्चिरभिमानिनीदेवतोपलक्ष्यते अहरिति दिवसाभिमानिनी शुक्लइति शुक्लपक्षाभिमानिनीउत्तरायणरूपाःषण्मासाइत्युत्तरायणाभिमानिनीएतच्चान्यासामपि श्रुत्युक्तानांसम्वत्सरदेवलोकादिदेवतानामुपलक्षणार्थं एवंभूतयोमार्गस्तत्र प्रयातागताभवदुपाकाजनाब्रह्मप्राप्नुवन्ति यतस्तेब्रह्मविदः तथाचश्रुतिः तेऽर्च्चिषमभिसम्भवन्तिअर्च्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्य्यमाणपक्षाद्यान्षण्मासानुदङादित्यएतिमासेभ्योदेवलोकमिति २४

आवृत्तिमार्गमाह धूमइति धूमाभिमानिनीदेवतारात्र्यादिशब्दैश्चपूर्व्ववदेवरात्रिकृष्णपक्षदक्षिणायनरूपषण्मासाभिमानिन्यस्तिस्रोदेवताउपलक्ष्यन्ते एताभिरुपलक्षितोयोमार्गस्तत्रप्रयातःकर्मयोगीचान्द्रमसंज्योतिस्तदुपलक्षितंस्वर्गलोकंप्राप्य तत्रेष्टापूर्त्तकर्मफलंभुक्त्वापुनरावर्त्ततेतत्रापिश्रुतिःतेधूममभिसम्भवन्ति धूमाद्रात्रिं

भाषा अनुवाद

औरजिसराहसेगमनकरि फेरिसंसारमेआवते सोकहतेहैं किप्रथमधूममे प्राप्तहो फेरिधूमसेरात्रिमेरात्रिसेकृष्णपक्षमेकृष्णपक्षसेदक्षिणायनछमासमेतव पितृलोकमे उससेफेरिचन्द्रजोतिमेप्राप्तहोय योगीफेरिनिवृत्तहोतेहैं इहांभी धूमादिशब्दोंसे तदभिमानिनीदेवतालेतेहैं कामनाकरिकर्मकरियोंकीयहगति है किकर्म्मफलभोगकरि फेरिसंसारहोताहैं तोनिःकामकर्महींठीकहै १५

CC-0. In Public Domain. Digitized by eGangotri

शुक्लकृष्णेगतीह्येते जगतःशाश्वते मते एकयायात्यनावृत्तिमन्ययावर्त्ततेपुनः २६

शाङ्करभाष्यम् ।

शुक्लेति शुक्लकृष्णे शुक्लाचकृष्णाचशुक्लकृष्णेज्ञानप्रकाशकत्वात् शुक्ला तद्भावात्कृष्णाएतेशुक्लकृष्णे हिगतीजगतइत्यधिकृतानांज्ञानकर्म्मणोर्न जगतःसर्व्वस्यैवैते गतीसम्भवतःशाश्वतेनित्येसंसारस्यनित्यत्वान्नित्येमतेऽभिप्रेते तत्रैकयाशुक्लयायात्य नावृत्तिमावृत्तिमन्ययेतरयावर्त्ततेपुनःभूयः २६

आनन्दगिरिकृतटीका ।

रात्र्यादौम्रियतानां ब्रह्मविदामब्रह्मप्राप्तिशङ्कानिवृत्त्यर्थमभिमानिनोदेवताग्रह णायमार्गयोर्नित्यत्वमाह शुक्लेति ज्ञानप्रकाशकत्वाद्विद्याप्राप्यत्वादर्च्चिरादिप्रका शोपलक्षितत्वाच्चशुक्ला देवयानाख्यागतिस्तद्भावाज्ज्ञानप्रकाशकत्वाभावात् धूमा द्यप्रकाशोपलक्षितत्वादविद्याप्राप्यत्वाच्चकृष्णापितृयानलक्षणागतिःतयोर्गत्योःश्रुति स्मृतिप्रसिध्योर्हिशब्दः जगच्छब्दस्यज्ञानकर्म्माधिकृतविषयत्वेनसङ्कोचेहेतुमाह नजगतइति अन्यथाज्ञानकर्म्मोपदेशानर्थक्यादित्यर्थः तयोर्नित्यत्वेहेतुमाह संसार स्येति मार्गयोर्यावत्संसारभावित्वेफलितमाह तत्रेति क्रममुक्तिरावृत्तिःभूयोभो क्तव्यकर्मक्षयेशेषकर्मवशादित्यर्थः २६

स्वामिकृतटीका ।

रात्रेरपक्षीयमाणपक्षमयत्वोयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्यरतिमार्गेभ्यः पितृलोकंपितृलोकात्चन्द्रंतेचन्द्रंप्राप्यान्नंभवन्तीत्यादि तदेवंनिवृत्तिकर्म्मसहितो पासनयाक्रममुक्तिः काम्यकर्मभिश्चस्वर्गभोगानन्तरमावृत्तिः निषिद्धकर्मभिस्तुनरक भोगानन्तरमावृत्तिः क्षुद्रकर्मणान्तु जन्तूनांअत्रैवपुनःपुनर्जन्मेति द्रष्टव्यं २५

उक्तमार्गावुपसंहरति शुक्लेति शुक्लाऽर्च्चिरादिगतिः प्रकाशमयत्वात् कृष्णाधू मादिगतिस्तमोमयत्वात् एतेगती मार्गौ ज्ञानकर्माधिकारिणोजगतःशाश्वते अना दीसंमते संसारस्यानादित्वात्तयोरेकयाशुक्लयानावृत्तिंमोक्षंयाति अन्ययाकृष्णया तुपुनरावर्त्तते २६

भाषाअनुवाद

येदोशुक्लकृष्णदोगती जगतमेंसनातनसे चलीआवतीहैं इनमेंनिःकामकर्म्मका री ज्ञानी शुक्लकहे प्रकाशमार्गसेगमनकरकेमुक्तहोते औरनानामनोरथकरके यज्ञादिकर्म्मकारीमनुष्य कृष्णकहे अन्धेरीधूममार्गसे गमनकर कर्म्मफलभोग केअनन्तर फेरिसंसारमेंआय जन्मग्रहणकरते हैं सोएदोमार्गहै २६

CC-0. In Public Domain. Digitized by eGangotri

नैतेसृतीपार्थजानन्योगीमुह्यतिकश्चन तस्मात्सर्व्वेषुकालेषुयोगयुक्तोभवार्जुन २७

शाङ्करभाष्यं

नैतइति नैतेयथोक्तेसृतीमार्गौ पार्थजानन्संसारायैकान्यामोक्षायचेति योगीन मुह्यतिनकश्चनकश्चिदपि तस्मात्सर्व्वेषुकालेषुयोगयुक्तः समाहितोभावार्जुन २७

शृणुयोगस्यमाहात्म्यं वेदेष्विति वेदेषु सम्यगधीतेषुयज्ञेसुच साद्गुण्येनानुष्ठितेषुतपस्सुचसुतप्तेषुदानेषुचसम्यग्दत्तेषुयदेतेषुपुण्यफलंप्रदिष्टं शास्त्रेणात्येत्यतीत्यगच्छति तत्सर्व्वंफलजातमिदंविदित्वासप्तप्रश्ननिर्णयद्वारेणोक्तंसम्यगवधार्य्यानुष्ठायइहयथायोगीपरंउत्कृष्टमैश्वरंस्थानमुपैतिप्रतिपद्यते आद्यमादौभवंकारणं ब्रह्मेत्यर्थः २८ इतिश्रीभवद्गीताभाष्येअष्टमोध्यायः ८

आनन्दगिरिकृतटीका

गतेरुपास्यत्वायतद्विज्ञानंस्तौति नैतइति योगस्यमोहापोहकत्वे फलितमाह तस्मादिति ज्ञानप्रकारमनुवदति संसारायेति मोक्षायक्रममुक्त्यर्थमित्यर्थः योगी ध्याननिष्ठोगतिमपिध्यायन्नैव मुह्यति केवलंकर्म्मदक्षिणमार्गाप्रापकंकर्त्तव्यत्वेन न प्रत्येतीत्यर्थः योगस्यापुनरावृत्तिफलत्वे नित्यकर्त्तव्यत्वंसिद्धमित्युपसंहरति तस्मादिति २७

श्रद्धावृद्ध्यर्थंयोगंस्तौति शृणुइति पवित्रपाणित्वप्राङ्मुखत्वादिसाहित्यमध्ययनस्यसम्यक्त्वमङ्गोपाङ्गोपेत्यमनुष्ठानस्यसाद्गुण्यं तपसांशास्त्रोक्तानांसुतप्तत्वंमनोबुद्ध्याद्येकाग्रपूर्व्वकत्वंदानस्यचसम्यक्त्वंदेशकालपात्रानुगुणत्वमिदंविदित्वेत्यत्रेदंशब्दा

स्वामिकृतटीका।

मार्गज्ञानफलंदर्शयन्भक्तियोगमुपसंहरति नैतेइति एतेसृतीमार्गौ मोहसंसारप्रापकौजानन्कश्चिदपियोगीनमुह्यति सुखबुद्ध्यास्वर्गादिफलं नकामयते किन्तुपरमेश्वरनिष्ठएवभवतीत्यर्थः स्पष्टमन्यत् २७

भाषा अनुवाद।

उक्तदोनोमार्गकेज्ञानसेजोफलहोतासोदिखावतेहुयेभक्तियोगकहतेहैंकिहेपार्थमोक्षऔसंसारकीदेनेवालीइनदोनोमार्गकोजानिकर कोईयोगीपुरुष सांसारिकमोहकोनहींपावता अर्थात्सुखसमझिस्वर्गादिफलकीकामनानहींकरता वलकिपरमेश्वरहीमेनिष्ठाकरताहैइससेअर्जुनतुममेरीभक्तियोगमेयुक्तहोकेरहो २७

CC-0. In Public Domain. Digitized by eGangotri

वेदेषुयज्ञेषुतपःसुचैव दानेषुयत्पुण्यफलंप्रदिष्टं अत्येतितत्सर्वमिदंविदित्वा योगीपरंस्थानमुपैति चाद्यम् २८ इतिश्रीभगवद्गीतासुयोगशास्त्रेषुश्रीकृष्णार्जुनसंवादेतारकब्रह्मयोगोनामअष्टमोऽध्यायः ८

आनन्दगिरिकृतटीका।

र्थमेवस्फुटयति सप्तेति यद्यपिकिंतद्ब्रह्मेत्यादावधियज्ञःकथं कोवेत्यत्रप्रश्नद्वयंप्रतिभासानुसारेण कैश्चिदुक्तं तथापि प्रतिवचनालोचनायां द्वित्वप्रतीत्यभावात् प्रकारभेदविवक्षयाचशब्दद्वयस्य प्रतिनियतत्वान्नसप्तेतिविरुध्यते नचेदंवेदनमायन्तिकं किंत्वनुष्ठानपर्यन्तमित्याह सम्यगिति प्रकृतोध्याननिष्ठोयोगीत्युच्यते ऐश्वरंविष्णोः परमंपदंतद्वैवतिष्ठत्यस्मिन्नशेषमितिस्थानंयोगानुष्ठानादशेषफलातिशायिमोक्षलक्षणंफलंक्रमेणलभ्यंशश्वमितिभावःतदनेनसप्तप्रतिवचनेनयोगमार्गंदर्शयताधेयत्वेनतत्पदार्थोव्याख्यातः २८ इतिआनन्दगिरिकृतटीकायांअष्टमोध्यायः ८

स्वामिकृतटीका

अध्यायार्थमष्टप्रश्नार्थनिर्णयसफलमुपसंहरति वेदेषु अध्ययनादिभिःयज्ञेषु अनुष्ठनादिभिःतपःसु कायशोषणादिभिःदानेषसत्पात्रेऽर्पणादिभिः यत्पुण्यफलमुपदिष्टं शास्त्रेषुतत्सर्वमत्येति ततोऽपिश्रेष्ठंयोगैश्वर्यं प्राप्नोति किंकृत्वा इदमष्टप्रश्नार्थनिर्णयेनोक्तं तत्वंविदित्वा ततश्चयोगीज्ञानीभूत्वापरमुत्कृष्टंआद्यं जगन्मूलभूतं स्थानंविष्णोःपदंप्राप्नोति २८ इति स्वामिकृतटीकायामष्टमोध्यायः ८

भाषाअनुवाद

अध्यायका अर्थस्वरूप आठप्रश्नकीअर्थनिर्णय फलकेसहितकहतेहैं किवेदों मेंअध्ययनकेद्वारा औरयज्ञोंमेंअनुष्ठानकेद्वारा औतपस्योंमेंशरीरशोषणकेद्वारा औसर्वदानमेंसत्पात्रकेअर्पणसे जोउत्तमपुण्यफल सबशास्त्रोंनेकहाहै उसफलको उल्लंघनकरि अर्थात् उसफलकीअपेक्षाअधिकजानियोगीश्रेष्ठयोगरूपऐश्वर्यको प्राप्तहोतेहैं अर्थात् परमपदपावतेहैं अर्थात् आठप्रश्नमेंकहाजोतत्वतिसकेजाननेहीसे योगऐश्वर्यपावते औरफेरिसे.ईयोगीजनज्ञानीहोयके उत्तमजोभगवतकापदकहेस्थानसोलाभकरते हैं २८ इतिश्रीजगन्नाथसुकुलविरचितमनभावनीनामभाषाटीकायां अष्टमोऽध्यायः ८

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता ।

नवमोध्यायः

श्रीभगवानुवाच इदन्तुते गुह्यतमं प्रवक्ष्याम्यनसूयवे ज्ञानंविज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् १

शाङ्करभाष्यं

अष्टमेनाडीद्वारेणधारणायोगसगुणउक्तस्तस्यचफलमग्न्यर्चिरादिक्रमेण कालान्तरेब्रह्मप्राप्तिलक्षणमेवानावृत्तिरूपंनिर्दिष्टं तत्रानेनैवप्रकारेण मोक्षप्राप्तिफलमधिगम्यतेनान्यथेति तदाशङ्क्याव्याविष्टत्सयाभगवानुवाच इदमितिइदंब्रह्मज्ञानंवक्ष्यमाणमुक्त्वापूर्व्वेष्वध्यायेषुतद्द्वौसन्निधीक्रत्येदमित्याह तुशब्दोविशेषनिर्द्धारणार्थः इदमेवतुसम्यक्ज्ञानंसाक्षान्मोक्षप्राप्तिसाधनंवासुदेवःसर्व्वमित्यात्मैवेदं सर्वमेकमेवाद्वितीयमित्यादिश्रुतिस्मृतिभ्योनान्यदथ येन्यथातोविदुरन्यराजानस्तेऽक्षयलोकाभवन्तीत्यादिश्रुतिभ्यश्चतेतुभ्यंगुह्यतमंगोप्यतमंप्रवक्ष्यामिकथयिष्याम्यनसूयवेऽसूयारहिताय किंतज्ज्ञानंकिंविशिष्टंविज्ञानसहितमनुभवयुक्तं यत्ज्ञानंज्ञात्वा प्राप्यमोक्षसेऽशुभात् संसारबन्धनात् १

भाषाअनुवाद

केवलभक्तिहीकेद्वारासे परमेश्वरपायेजातेअर्थात्ईश्वरका तत्त्वज्ञानभक्तिविनाकोईउपायसेसुलभनहींहै यहीअष्टमअध्यायमेस्थिरकियाहै सोईईश्वरकाअद्भुतऐश्वर्य औअपनोभक्तिकीसर्वश्रेष्ठमहिमा अवनवयेंअध्यायमेविस्तारसेभगवानआपकहतेहैं कि जिससेपरमेश्वरजानेजांय सोईविज्ञानकहेउपासना तिसके सहित ईश्वरविषयक जोयहज्ञानगुह्यतम अर्थात्शास्त्रोक्तधर्म्मज्ञानगुह्य कहेगोपनीयहै औरउसकीअपेक्षा देहादिसेभिन्न जोआत्मज्ञान सोगुह्यतरकहे अधिकगोपनीयहै फेरिआत्मज्ञानसेभीपरमात्मज्ञान गुह्यतमहै अत्यन्तगोपनीयहै सोअसूयारहित अर्थात्वारवारअपनामाहात्मउपदेशकरतेऊये मेरेमेदोषदृष्टिरहित तुमहौ इससे मैअबदयाकरि तुमसेकहूंगा किजिनकोजानिकरिके इसअशुभरूपसंसारबन्धनसेछूटिजावोगे १

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

अतीतेनागामिनोऽध्यायस्यागतार्थत्वंवक्तुं वृत्तंअनुद्रवति अष्टमइति नाडीसुषुम्नाख्याधारणाख्येनाङ्गेनयुक्तोयोगःधारणायोगःसगुणः सर्व्वद्वारसंयमनादिगुणस्तेन सहितइत्यर्थः तत्फलोक्त्यर्थमनन्तराध्यायारम्भमाशंक्याह तस्यचेति अग्निरर्चिरित्यादिनोपलक्षितेनक्रमवतादेवयानेनयथेतियावत् ज्ञानान्तरमेवयथोक्तफललाभात् अलमनेनमार्गेणेत्याशंक्याह कालान्तरइति अर्चिरादिमार्गेण ब्रह्मप्राप्तौ मुक्तेः मार्गायत्तत्वात्नतस्येत्यादिश्रुतिविरोधःस्यादित्याशयेनशङ्कते तदेति वृत्तोर्थःसम्भ्यर्थः उक्ताशङ्कानिवृत्त्यर्थमनन्तराध्यायमुत्थापयति तदाशङ्केति संप्रयुक्तत्वेनापरोक्षत्वाभावेपि पूर्व्वोत्तरग्रन्थालोचनयाबुद्धिसन्निधानादिदंशब्देन ब्रह्मज्ञानं गृहीतं इत्याह तद्ब्रह्मेति प्रकृताज्ज्ञानात् ज्ञानस्यवैशिष्ट्यावद्योतीतुशब्दइत्याह तुशब्दइति निपातार्थमेवस्फुटयति इदमेवेति तस्मिन्नर्थेसम्वादकत्वेन श्रुतिस्मृतिं दर्शयति वा मुदेवइति अद्वैतज्ञानवत्द्वैतज्ञानमपिकेषाञ्चिन्मोक्षहेतुरित्याशंक्याह नान्यदिति द्वैतज्ञानंमोक्षायनक्षममित्यत्रश्रुतिमुदाहरति अथेति अविद्याप्रकरणोपक्रमार्थोऽथशब्दः अतोद्वैतादन्यथाभिन्नत्वेनेत्यर्थः विदुरूक्त्वमितिशेषः द्वैतस्य दुर्निरूपत्वेन कल्पितत्वात्तज्ज्ञानंरज्जुसर्पादिज्ञानतुल्यत्वान्नक्षेमप्राप्तिहेतुरितिचकारार्थः असूयागुणेषुदोषाविष्करणंतद्रहिताय ज्ञानाधिक्यतायइत्यर्थः ज्ञानंब्रह्मचैतन्यंतद्विषयम्वाप्रमाणज्ञानंतस्यतेनैवविशेषितत्वानुपपत्तिमाशंक्यव्याकरोति अनुभवेति विज्ञानमनुभवःसाक्षात्कारस्तेनसहितमित्यर्थः उक्तज्ञानंप्राप्तस्य किंस्यादित्याशंक्याह यज्ज्ञानमिति १

स्वामिकृतटीका।

परेशःप्राप्यते शुद्धभक्त्येति स्थितमष्टमे॥ नवमेतु तदैश्वर्यमत्याश्चर्यंप्रपंच्यते एवंतावत्सप्तमाष्टमयोःस्वीयपरमेश्वरतत्वंभक्त्यैवसुलभं नान्यथेत्युक्तमिदानीमचिन्त्यं स्वकीयमैश्वर्यंभक्तेश्चासाधारणप्रभावंप्रपञ्चयिष्यन्श्रीभगवानुवाच इदमिति विशेषेणज्ञायते अनेनेतिविज्ञानमुपासनंतत्सहितंज्ञानमीश्वरविषयमिदंतुतेऽनसूयवेपुनःपुनःस्वभाहात्म्यमेवोपदिशतीत्येवंपरमकारुणिकेमयि दोषदृष्टिरहिताय तुभ्यं वक्ष्यामि तुशब्दोवैशिष्ट्ये तदेवाह गुह्यतममित्यादिना गुह्यंधर्मज्ञानंततोदेहादिव्यतिरिक्तात्मज्ञानंगुह्यतरंततोऽपिपरमात्मज्ञानमतिरहस्यत्वाद्गुह्यतमंतज्ज्ञात्वाऽशुभात्संसारबन्धान्मोक्ष्यसे सद्यएवमुक्तोभविष्यसि १

CC-0. In Public Domain. Digitized by eGangotri

राजविद्याराजगुह्यंपवित्रमिदमुत्तमं प्रत्यक्षावगमंधर्म्यंसुसुखंकर्त्तुमव्ययम् २

शाङ्करभाष्यं

तच्चस्तौति राजविद्येति राजविद्याविद्यानांराजादीप्यतिशयत्वात्दीप्यतेहीय मतिशयेनब्रह्मविद्यासर्व्वविद्यानांराजगुह्यं तथागुह्यानांराजापवित्रं पावनमिदमुत्तमं सर्व्वेषांपावनानांशुद्धिकारणानामिदंब्रह्मविज्ञानमुत्कृष्टतममनेकजन्मसहस्रसञ्चितमपिधर्म्माधर्मादिसमूलंकर्म्म क्षणमात्राद्भस्मीकरोति यतोऽतःकिं तस्यपावनत्वंवक्तव्यं किञ्चप्रत्यक्षावगमंप्रत्यक्षेणसुखादेरिवावगमोयस्यततप्रत्यक्षावगमंचनेकगुणवतोपिधर्म्मविरुद्धत्वंदृष्टं श्येनयागइव नतथा आत्मज्ञानंधर्म्मविरोधि किन्तुधर्म्यंधर्म्मादनपेतंएवमपिस्यात्दुःसंपाद्यमित्यतआह सुसुखंकर्त्तुं यथा रत्नविवेकविज्ञानंतत्साध्यायासानांअन्येषांकर्मणांसुखसंपाद्यानामल्पफलत्वं दृष्टं दुष्कराणाञ्चमहाफलत्वंदृष्टमितीदन्तुसुखसंपाद्यत्वात्त फलक्षयाद्येतीति प्राप्तौतत्रःह्यव्ययंनास्यफलतःकर्मबद्धयोस्तीतिअव्ययं अतःश्रद्धेयमात्मज्ञानं २

आनन्दगिरिकृतटीका

तदाभिमुख्यसिद्धयेजज्ञानंस्तौति तच्चेति ब्रह्मविद्याविद्यानांराजाश्रेष्ठाइत्यत्र हेतुमाह दीप्तीति कुतोब्रह्मविद्यायाःविद्यान्तरेभ्योदीप्यतिशयित्वं तदाह दीप्यते हीति दृश्यते हिविद्वद्दन्तरेभ्योलोकेपूजातिरेकोब्रह्मविद्यामिति भावः उत्कृष्टतमंशुद्धिकारणंब्रह्मज्ञानमित्येतदुपपादयति अनेकेति तत्रश्रुतिस्मृतिप्रमाणयितव्येनशास्त्रैकगम्यमिदंज्ञानंकिन्तुप्रत्यक्षप्रमेयमित्याह किञ्चेति प्रत्यक्षमवगम्यमानमस्मिन्निति तथा यद्वावगम्यतइति अवगमः फलंप्रत्यक्षोवगमोस्येतिदृष्टफलत्वं ज्ञानस्योच्यते धर्म्यमित्येतद्व्याकरोति अनपेतमिति धर्मस्यैवतस्यक्लेशसाध्यत्वमाशंक्याह एवमपीति रत्नविषयंविवेकज्ञानंसम्प्रयोगादुपदेशापेक्षादनायासेनदृष्टंतथेदंब्रह्मज्ञान

भाषा अनुवाद।

अबअर्जुनकीइच्छाबढावनेकेहेतु जोज्ञानकहैंगेउसकीप्रशंसाकरतेहैं कियह जोज्ञान सोसकलविद्योंका राजाऔरगोपनीयजोकुछहै उसकाभीराजाअर्थात् सबसेश्रेष्ठहै और यहअत्यन्तपावनतथाउत्तमहै औज्ञानियोंकोप्रत्यक्षावगम कहे जिसकाबोध सुलभ है और धर्म्य कहेधर्मसेभिन्ननहींअर्थात् वेदविहितसर्वधर्मकाफलस्वरूपहै औरसुसुखंकहेअनायाससाधनकियाजायसकै है और जिसहेतुअक्षय फलहै इससे अव्ययअर्थात्नाशरहित है २

CC-0. In Public Domain. Digitized by eGangotri

अश्रद्दधानाःपुरुषाधर्म्मस्यास्यपरन्तप अप्राप्यमांनिवर्त्तन्तेमृत्युसंसारवर्त्मनि ३

शाङ्करभाष्यं

येपुनःअश्रद्दधानाइति अश्रद्दधानाःअश्रद्धाविरहिताःआत्मज्ञानस्यधर्म्मस्यास्यस्वरूपेतत्फलेचनास्तिकाःपापकारिणोऽसुराणामुपनिषदंदेहमात्रात्मदर्शनमेवप्रतिपन्नाअसन्तःपुरुषाःपरन्तप अप्राप्यमांपरमेश्वरंमत्प्राप्तौनैवाश्रद्धेति मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमप्यप्राप्येत्यर्थःनिवर्त्तन्तेनिश्चयेनआवर्त्तन्ते का मृत्युसंसारवर्त्मनिमृत्युयुक्तःसंसारस्तस्यवर्त्मनरकतिर्यगादिप्राप्तिमार्गस्तस्मिन्नेवावर्त्तन्तइत्यर्थः ३

आनन्दगिरिकृतटीका

मित्याह यथेति अव्ययमिति विशेषणमाशङ्कापूर्व्वकंविवृणोति तत्रेत्यादिना व्यवहारभूमिःसप्तम्यर्थःज्ञानस्याक्षयफलत्वेफलितमाह अतइति २ आत्मज्ञानाख्येधर्म्मेश्रद्धावतांतन्निष्ठानांपरमपदप्राप्तिमुक्त्वाततोविमुखानांसंसारप्राप्तिमाह येपुनरिति आत्मज्ञानतत्फलयोर्नास्तिकानेवविशिनष्टि पापेति उक्तानामात्मश्रद्धारहितानांभगवत्प्राप्तिसम्भावनाभावादप्राप्यमामित्यप्रसक्तंप्रतिषेधःस्यादित्याशंक्याह मत्प्राप्ताविति ३

स्वामिकृतटीका ।

किञ्चराजविद्येति इदंज्ञानंराजविद्याविद्यानांराजाराजगुह्यं गुह्यानाञ्चराजाविद्यासुगोप्येषुचातिरहस्यंश्रेष्ठमित्यर्थः राजदन्तादित्वादुपसर्जनस्यापिपरत्वंराज्ञांविद्याराज्ञांगुह्यमितिवा उत्तमंपवित्रमिदमत्यन्तपावनं ज्ञानिनांप्रत्यक्षावगम्यत्वात्प्रत्यक्षःस्पष्टोऽवगमोऽवबोधोयस्यतत्प्रत्यक्षावगमंदृष्टफलंइत्यर्थः धर्म्यं धर्म्मादनपेतं वेदोक्तसर्व्वधर्म्मफलत्वात्कर्त्तुञ्चसुसुखं सुखेनकर्त्तुंशक्यमित्यर्थः अव्ययञ्चाक्षयफलत्वात् २ नन्वेवमत्यतिसुकरत्वेन केनामसंसारिणःस्युस्तत्राह अश्रद्दधानाइति अस्यभक्तिसहितज्ञानलक्षणस्यधर्म्यस्येतिकर्म्मणिषष्ठीइमंधर्म्ममश्रद्दधानाआस्तिक्येनास्वीकुर्व्वन्तउपायान्तरैर्मत्प्राप्तयेकृतप्रयत्नाअपि मामप्राप्यमृत्युयुक्तेसंसारवर्त्मनिनिवर्त्तन्ते मृत्युव्याप्तसंसारमार्गे परिभ्रमन्तीत्यर्थः ३

भाषा अनुवाद

जोइसज्ञानसेऐसासुखसुलभहै तोफेरिकौनऐसा अभागीजनजोसंसारी होगा इसशङ्कापरकहतेहैं कियहीभक्तिसहितज्ञानस्वरूपधर्मको नकरिकेदूसरीउपायसे मेरीप्राप्तिकेलिये जोलोगयत्नकरतेहैं वेमनुष्य हमकोनपायकेमृत्युयुक्तसंसारमार्गमेंप्रवृत्तहोतें अर्थात् मृत्युकेअर्थ संसारमेंवारवार आतेऔरजातें हैं ३

CC-0. In Public Domain. Digitized by eGangotri

मयाततमिदंसर्व्वंजगदव्यक्तमूर्त्तिना मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थितः ४

शाङ्करभाष्यं ।

इतिज्ञानंस्तुत्यार्জ्जुनमभिमुखीकृत्याह मयेति मयाममयःपरोभावस्तेनततं व्याप्तं सर्व्वमिदंजगदव्यक्तमूर्त्तिना नव्यक्तामूर्त्तिःस्वरूपंयस्यममसोहमव्यक्तमूर्त्तिस्तेन मयाव्यक्तमूर्त्तिनाकरणागोचरस्वरूपेणेत्यर्थःतस्मिन्मय्यव्यक्तमूर्त्तौ स्थितानि मत्स्थानिसर्व्वभूतानिब्रह्मादीनिस्तम्बपर्यन्तानि नहिनिरात्मकंकिञ्चिज्ज्ञातंव्यवहारायावकल्पतेऽतोमत्स्थानिमयात्मनात्मवत्त्वेनस्थितानि अतोमय्यस्थितानीत्युच्यते तेषांभूतानामहमेवआत्माइत्यतस्तेषुस्थितइतिमूढबुद्धीनामवभासतेऽतोब्रवीमि नचाहंतेषु भूतेष्ववस्थितोमूर्त्तवत्संश्लेषाभावेनाकाशस्याप्यन्तस्तमोह्यहं ४

आनन्दगिरिकृतटीका ।

स्तुतिनिन्दाभ्यांज्ञाननिष्ठांमहीकृत्यज्ञानंव्याख्यातुमारभतें स्तुत्येति सोपाधिकस्य व्याप्यप्रसक्तवमभिप्रेत्यविशिनष्टि ममेति अनवच्छिन्नस्यभगवद्रूपस्यनिरुपाधिकत्वमेव साधयति करणेति व्याप्यव्यापकत्वे नजगतोभगवतश्चपरिच्छेदमाशंक्याह तस्मिन्निति तथापिभगवतोभूतानाञ्चाधाराधेयत्वे नभेदःस्यादित्याशंक्याह नहीति निरात्मकस्यव्यवहारानर्हत्वेफलितमाह अतइति ईश्वरस्यभूतात्मत्वे तेषुस्थितिःस्यादित्याशंक्याह तेषामिति तस्यतेषुस्थित्यभावंव्यवस्थापयति मूर्त्तवदिति ४

स्वामिकृतटीका ।

तदेवंवक्तव्यतयाप्रस्तुतस्यज्ञानस्यश्रुत्याश्रोतारमभिमुखीकृत्यतदेवज्ञानं कथयति मयेति द्वाभ्यां अव्यक्ताअतीन्द्रियामूर्त्तिःस्वरूपंयस्यतादृशेनमयाकारणभूतेनसर्व्वमिदं जगत्ततंव्याप्तंतत्सृष्ट्वातदेवानुप्राविशदित्यादिश्रुतेः अतएवकारणभूतेमयि तिष्ठन्तीति मत्स्थानिसर्व्वाणिभूतानिचराचराणि एवमपिघटादिषुस्वकार्येषुमृत्तिकेवतेषु भूतेषुनाहमवस्थित आकाशवदसङ्गत्वात् ४

भाषा अनुवाद

इसप्रकारसेअवसरप्राप्तज्ञानकाखंडतिसकेश्रोताअर्জ्जुनकोउत्साहयुक्तकरिके सोईज्ञानदोश्लोकमेंकहतेहैं किजिसकास्वरूपअव्यक्तकहे इन्द्रियोंका अगोचर ऐसाकारणरूपजोमैं सोमेरेसेसम्पूर्णजगतव्याप्तहै क्योंकिश्रुतिकहतीहैं कि सोई ब्रह्मसंसारसृष्टिकरिके उसकेबीचजीवरूपहोयप्रविष्ट है इसकारणचराचरात्मक भूतमात्रकारणरूपमेरेहीमेंस्थितहैं परन्तुऐसाहैंतौभीमृत्तिकाकार्यघटादिमेमृत्तिकाके तुल्य मैंभूतोंमेंनहींहूं जिसहेतुमैंआकाशकेसमानसंगरहितअर्थात्अलगहौं ४

CC-0. In Public Domain. Digitized by eGangotri

नचमत्स्थानिभूतानिपश्यमेयोगमैश्वरं भूतभृन्नचभूतस्थोममात्माभूतभावनः ५

शाङ्करभाष्यं।

नह्यसंसर्गिवस्तुक्वचिदाधेयभावेनावस्थितंभवत्यतएवासंसर्गित्वान्मम नचेति नच मत्स्थानिभूतानिब्रह्मादीनिपश्यमेयोगंयुक्तिःघटनंमेममैश्वरंयोगमात्मनः ईश्वरस्येदमैश्वरंमाहात्म्यमित्यर्थः तथाचात्मनोयाश्रुतिरसंसर्गित्वादसङ्गतांदर्शयत्यसङ्गोनहि सज्जतइदञ्चाश्चर्यमन्यत्पश्यभूतभृदसङ्गोपिसन्भूतानिबिभर्त्तिनचभूतस्थोयथोक्तेन न्यायेनदर्शितत्वात्भूतस्थत्वानुपपत्तेःकथंपुनरुच्यते असौममात्मेतिविभज्यदेहादिसंघातंतस्मिन्नहङ्कारमध्यारोप्य लोकबुद्धिमनुस्मरन् व्यपदिशति ममात्मेति नपुनरात्मनआत्मा अन्यइति लोकवदज्ञानंस्तथाभूतभावनोभूतानिभावयति उत्पादयतिवर्द्धयतिवा भूतभावनः ५

आनन्दगिरिकृतटीका

संश्लेषाभावेपिकिमितिनाधेयत्वमतआह नहीति परमेश्वरस्यभूतेषुस्थित्यभावेपि भूतानांतत्रस्थितिरास्थितेतिकुतोऽसङ्गत्वंतत्राह अतएवेति नचेत्तत्रचकारोऽवधारणार्थः भूतानामीश्वरेणैवस्थितिरित्यत्रहेतुमाह पश्येति आत्मनोऽसङ्गत्वस्वरूपमित्यत्रप्रमाणमाह तथाचेति असङ्गश्चेदीश्वरस्तर्हिकथंमत्स्थानिभूतानीत्युक्तंकथञ्च तथोक्तांश्चमत्स्थानीतितद्विरुद्धमुदीरितमित्याशंक्याह इदञ्चेति तर्हिभूतसम्बन्धः स्यादितिनेत्याह नचेति यथोक्तेनन्यायेनअसङ्गत्वेनेतियावत् असङ्गतयावस्तुतोभूतासम्बन्धेपिकल्पनयातदविरोधान्नमिथोविरोधोऽस्तीतिभावःआत्मनःसकाशादात्म

भाषा अनुवाद।

औरदेखोकि हमसबसेअलगहैं इसहेतुस्थावरजङ्गमभूतहमारेमेनहींस्थित हैं औरजोशङ्काकरोकि पीछेतुमनेअपनासर्व्वव्यापित्वऔसबकेआश्रय यहकहाहै तोकहतेहैं किहमारीअघटघटनारूपचातुरीदेखोकिमेरीयोगमायाकेविभवबल सेमेरीचातुरीबूझनेकेअयोग्यहैपरमेराकहनातोकिसीअंशमेविरूद्ध नहीं है और आचार्यलोगभीभूतभावनपालनकर्त्ताकहतेहैं तौभीहमाराउत्कृष्टरूपभूतभावननहीं है जैसेजीव देहधारणऔपालनकरतेऊयेअहङ्कारसेदेहकेसाथमिलते हैं तैसेनिरहङ्कारहेतुसे भूतोंका लालनपालनकरतेऊयेभी हम उनसे पृथ कहैं यहीमेराऐश्वर्य है किजैसे आकाश औबायुसबमेरहते औजुदेहैं ५

CC-0. In Public Domain. Digitized by eGangotri

यथाकाशस्थितोनित्यंवायुःसर्व्वत्रगोमहान् तथासर्व्वाणिभूतानिमत्स्थानीत्युपधारय ६

शाङ्करभाष्यं।

यथोक्तेनश्लोकद्वयेनउक्तमर्थंदृष्टान्तेनोपपादयन्नाह यथेति यथालोकेआकाशस्थितःआकाशेस्थितोनित्यंसदावायुःसर्व्वत्रगच्छतीतिसर्व्वत्रगःमहान्परिमाणतस्तथाकाशवत् सर्व्वगतें मय्यसंश्लेषेणैवस्थितानि मत्स्थानीत्येवमुपधारय जानीहि ६

आनन्दगिरिकृतटीका।

नोऽन्यत्वायोगाय कुतःसम्बन्धोक्तिरित्याशंक्याह असाविति यथालोकोवस्तुतत्वमजानन्भेदमारोप्य ममायमितिसम्बन्धमनुभवतिनतथेहसम्बन्धव्यपदेशःआत्मनि स्वतोभेदाभावादतोभेदेसत्येवलोकेसम्बन्धबुद्धिदर्शनमनुसरन्भगवानात्मनोदेहादिसंघातंविभज्याहङ्कारंतस्मिन्नारोप्य असौममात्मेतिभेदं व्यपदिशति तथाचसंघातस्यममेति व्यपदेशात्ततोनिकृष्टस्यस्वरूपस्यात्मशब्देननिर्देशान्नभूतस्थोसावित्यर्थः पूर्व्वोक्तासंगत्वाङ्कोकारेणैवात्माभूतानिभावयतीत्याह तथेति ५

सृष्टिस्थितिसंहाराणामसङ्गात्माधारत्वंमयाततमिदमित्यादिश्लोकद्वयेनोक्तोर्थ

स्वामिकृतटीका

किञ्च नचेति नचमयिस्थितानिभूतानिअसङ्गत्वादेवमम ननुतर्हि व्यापकत्वमाश्रयत्वञ्च पूर्व्वोक्तंविरुद्धमित्याशंक्याह पश्येति मेऽसाधारणंयोगंयुक्तिंअघटनघटनाचातुर्य्यमिदंपश्य मदीययोगमायावैभवस्याबितर्क्यत्वान्नकिञ्चित्विरुद्धमित्यर्थः अन्यदप्याश्चर्यंपश्येत्याह भूतेति भूतानिबिभर्त्तिधारयतीतिभूतस्तद्भूतानिभावयतिपालयतीतिभूतभावनः एवंभूतोऽपिममात्मापरंस्वरूपंभूतस्थोनभवतीति अयंभावः यथा देहंबिभ्रत्पालयंश्चजीवोऽहङ्कारेणतत्संश्लिष्टस्तिष्ठति एवमहं भूतानिधारयन्पालयन्नपितेषु नतिष्ठामि निरहङ्कारत्वादिति ५

भाषाअनुवाद

अनमिलवस्तुभीआधारआधेयअर्थात् रहनेकोजगहऔररहनेवालीवस्तुहोसकैहै यहदृष्टान्तदेखायकरकहतेहैं किआकाशकेबिनाकिसीवस्तुकेरहनेकाअसम्भवहैं इससेआकाशमेंस्थित जोवायु सोसर्व्वगतऔमहानहोकेभीआकाशकेसाथमिलनेकी कोईउपायनरहनेसे जैसेआकाशकेसाथ नहींमिलतीहै तैसेभूतमेरेमेरहते भीअलगजानो अर्थात्जैसेआधाररूपआकाशमेंरहिकर वायुनिर्लिप्तहै तैसेभूतोंकेरहतेहुयेभी आधारस्वरूप ब्रह्म निर्लिप्तहै अर्थात् सबसे अलगहै ६

CC-0. In Public Domain. Digitized by eGangotri

सर्वभूतानिकौन्तेयप्रकृतिंयान्तिमामिकां कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहं ७

शाङ्करभाष्यं

एवंवायुराकाशइवमयिस्थितानिसर्वभूतानिसर्वाणिभूतानिस्थितिकालेतानिसर्वभूतानिकौन्तेय प्रकृतिंत्रिगुणात्मिकामपरांनिकृष्टांयान्ति मामिकांमदीयां कल्पक्षयेब्राह्मे प्रलयकालेपुनर्भूयस्तानिभूतान्युत्पत्तिकालेकल्पादौ विसृजाम्युत्पादयाम्यहंपूर्ववत ७

आनन्दगिरिकृतटीका।

स्वदृष्टान्तेनोपपादयन्नादौदृष्टान्तमाहेतियोजना सदेत्युत्पत्तिस्थितिसंहारकालोपलक्ष्यते आकाशादेर्महतोऽन्याधारत्वंकथमित्याशंक्याह महानिति यथासर्वगामित्वात् परिमाणतोमहान्वायुराकाशेसदास्थितिष्ठति तथाआकाशादीनिमहान्त्यपिसर्वाण्यपिभूतान्याकाशकल्पेपूर्णेप्रतीच्यसङ्गे परस्मिन्नात्मनिसंश्लेषमन्ततेऽस्थितानीत्यर्थः ६

आकाशेवाय्वादिस्थितिवदाकाशादीनिभूतानिस्थितिकालेपरमेश्वरेस्थितानि चेत्तर्हि प्रलयकालेततोन्यत्रतिष्ठेयुरित्याशंक्याह एवमिति प्रकृतिशब्दस्यस्वभाववचनत्वंव्यावर्त्तयति त्रिगुणात्मिकामिति साचापरेयमिति प्रागेवसूचितेत्याह अपरामिति तस्याश्चेश्वराधीनत्वेनास्वातन्त्र्यमाह मदीयामिति प्रलयकालेभूतानि यथोक्तांप्रकृतिं यान्तिचेदुत्पत्तिकालेपितत्प्रेषामुत्पत्तिरीश्वराधीनत्वं भूतसृष्टेर्नित्यादित्याशंक्याह पुनरिति ७

स्वामिकृतटीका।

असंश्लिष्टयोरपिआधाराधेयभावंदृष्टान्तेनाह यथेति अवकाशंविनावस्थानानुपपत्तेर्नित्यमाकाशस्थितोवायुःसर्वगोऽपिमहानपिनाकाशेनसंश्लिष्यते निरवयवत्वेनसंश्लेषायोगात् तथासर्वाण्यपिभूतानिमय्यस्थितानिजानीहि ६

तदेवमसङ्गस्यैवयोगमायावस्थितिहेतुत्वमुक्तंतयैवसृष्टिप्रलयहेतुत्वञ्चाह सर्वेति कल्पक्षयेप्रलयकालेसर्वाण्यपिभूतानिमदीयांप्रकृतिंयान्ति त्रिगुणात्मिकांयामायालीयन्ते पुनःकल्पादौसृष्टिकालेतानिविसृजामि विशेषेणसृजामि ७

भाषाअनुवाद।

इससेअसङ्गरूपईश्वरकीयोगमायासेचराचरकोस्थिति ईश्वरमे कहीगईअब सोईयोगमायासेसृष्टिऔपालनकेभी हेतुईश्वरहैं यहकहते हैं किप्रलयकेसमयमे सकलभूतसत्वरजतमगुणमयीमेरोप्रकृतिमे लीनहोते फेरिसृष्टिकेसमयम स्थूल सूक्ष्मनानारूपभूतोंको मैसिर्जनकरताहूं हे कौन्तेय अर्जुन ७

CC-0. In Public Domain. Digitized by eGangotri

प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनः भूतग्राममिमंकृत्स्नमवशंप्रकृतेर्वशात् ८

शाङ्करभाष्यं

एवमविद्यालक्षणां प्रकृतिमिति प्रकृतिंस्वांस्वीयामवष्टभ्यवशीकृत्यविसृजामि पुनःपुनःप्रकृतितोजातंभूतग्रामंभूतसमुदायंइमंवर्त्तमानंकृत्स्नंसमग्रमवशमस्वतन्त्र मविद्यादिदोषैःपरवशीकृतंप्रकृतेर्वशात् स्वभाववशात् ८ तर्हितस्यैवपरमेश्वर स्यतभूग्रामंविषमंविदधतःतन्निमित्ताभ्यांधर्माधर्माभ्यांसम्बन्धःस्यादितीदमाह भगवा न् नचमामिति नचमामीशंतानिभूतग्रामस्यविषमविसर्गनिमित्तानिकर्माणिनिबध्न न्ति धनञ्जय तत्कर्मणामसम्बन्धत्वेकारणमाह उदासीनवदासीनंयथोदासीनउ पेक्षकःकश्चित् तद्वदासीनमात्मनोऽविक्रियत्वमसंसक्तंफलसङ्गरहितमभिमानवर्जित मह्ङ्करोमीति तेषु कर्मस्वतोऽन्यस्यापिकर्त्तृत्वाभिमानाभावःफलंसङ्गाभावश्चाबन्ध कारणमन्यथा कर्मभिर्बध्यतेमूढःकोशकारवदित्यभिप्रायः ९

आनन्दगिरिकृतटीका

तर्हिकीदृशीप्रकृतिः साचकथंसृष्टावुपयुक्तेत्याशंक्याह एवमिति संसारस्या नादित्वद्योतनार्थंपुनःपुनरित्युक्तं भूतसमुदायस्याविद्यास्मितादिदोषपरवशत्वेहेतु माह स्वभाववशादिति ८

स्वामिकृतटीका

नन्वसङ्गोनिर्विकारश्चत्वंकथंसृजसीत्यपेक्षायामाह प्रकृतिमित्यादि स्वांस्वाधी नांप्रकृतिमवष्टभ्यअधिष्ठाय प्रलयेलीनंसन्तंचतुर्विधमिमंसर्वंभूतग्रामंकर्मादिपरव शंपुनःपुनर्विविधंसृजामिविशेषेणसृजामीतिवा कथंप्रकृतेर्वशात् प्राचीनकर्मनिमि त्ततत्स्वभाववशात् ८

नन्वेवंनानाविधानिकर्माणिकुर्वतस्तवजीववद्बन्धःकथंनस्यादित्यतआह नच मामिति तानिविश्वसृष्ट्यादीनिकर्माणिमांननिबध्नन्ति कर्मासक्तिर्हिबन्धहेतुःसा चाप्तकामत्वान्ममनास्ति अतउदासीनवद्वर्त्तमानस्यमेबन्धंनोपपादयन्ति उदासीनत्वे कर्त्तृत्वानुपपत्तेः कर्त्तृत्वेचोदासीनत्वानुपपत्तेरुदासीनवत् स्थितमित्युक्तं ९

भाषा अनुवाद।

जोकहोकितुमजोअसङ्गनिर्विकारसोकैसेसृष्टिकरतेहौ इसअपेक्षापरकहते हैं किमैअपनेअधीनप्रकृतिको अंगीकारकरि प्राचीनकर्मोंकेस्वभाववशपराधी नभयेकर्मकेवश भूतसकलकोंमैहीं फेरिनानारूपसिर्जनकरतारहताहूं ८

CC-0. In Public Domain. Digitized by eGangotri

नचमांतानिकर्माणिनिबध्नन्तिधनञ्जय उदासीनवदासीनमसक्तंतेषुकर्मसु ९

शाङ्करभाष्यं

तत्रभूतग्राममिमंविसृजाम्युदासीनवदासीनमितिचविरुद्धमुच्यते तत्परिहारार्थमाह मयेति मयासर्व्वतोदृष्टिमात्मस्वरूपेणाविक्रियात्मनाध्यक्षेणसमभिप्रायात्रिगुणात्मिकाऽविद्यालक्षणाप्रकृतिःसूयतेऽउत्पादयतिसचराचरंजगत् तथाचमन्त्रवर्णएकोदेवःसर्व्वभूतेषुगूढःसर्व्वव्यापीसर्वभूतान्तरात्मा कर्म्माध्यक्षःसर्वभूताधिवासः साक्षीचेताकेवलोनिर्गुणश्चेति साक्षिमात्रेणहेतुनानिमित्तेनानेनाध्यक्षत्वेन कौन्तेय जगत्सचराचरंव्यक्तात्मकंविपरिवर्तते सर्व्वावस्थासुदृष्टिकर्मत्वापत्तिनिमित्ताहि जगतःसर्व्वाप्रवृत्तिरहमिदंभोक्ष्येपश्यामीदंदृष्टवानीदंसुखमनुभवामि दुःखमनुभवामि तदर्थमिदंकरिष्याम्येतदर्थमिदंकरिष्य इदंकरोमीत्याद्यवगतिनिष्ठाअवगतिरवसानोयोऽध्यक्षःपरमेव्योमन्नित्यादयश्चमन्त्रा एतमर्थंदर्शयन्ति ततश्चैकस्यदेवस्य सर्व्वाध्यक्षभूतचैतन्यमात्रस्यपरमार्थतःसर्व्वभोगानभिसम्बन्धिनोऽन्यस्यचेतनान्तरस्याभावेभोक्तुरन्यस्याभावात् किंनिमित्तेयंसृष्टिरित्यत्रप्रश्नप्रतिवचनेनुपपन्ने कोऽद्धावेदकइहप्रवोचत्कुतआयातःकुतइयंविसृष्टिरित्यादिमन्त्रवर्णैश्चोदर्शितञ्चभगवता अज्ञानेनाऽवृतंज्ञानंतेनमुह्यन्तिजन्तवइति १०

आनन्दगिरिकृतटीका।

यदिप्राक्तंभूतग्रामंस्वभावादविद्यातन्त्रंविषमंविदधासि तर्हितवविषमसृष्टिप्रयुक्तंधर्मादिमत्त्वमित्यनीश्वरत्वापत्तिरितिशङ्कते तर्हीति तत्रेति सप्तम्यापरमेश्वरोनिरुच्यते ईश्वरस्यफलसङ्गाभावात् कर्त्तृत्वाभिमानाभावाच्चकर्मसम्बन्धवदीश्वरादन्यस्यापितदुभयाभावोधर्मादिसम्बन्धेकारणमित्याह अतोन्यस्येति यदिकर्मसुकर्त्तृत्वाभिमानोवाकस्यचित्कर्म्मफलसंयोगोवास्यात्ततआह अन्यथेति ९

भाषाअनुवाद

औरजोकहोकिइसप्रकारनानप्रकारकर्मकारीजोतुमतोतुमाराभी जीवके समानबन्धनक्योंनहोय तोइसपरकहतेहैं किवेकर्महमकोबन्धनहींकरसकते क्योंकिकर्ममेंजोआसक्तिसोई बन्धनकाकारणहै औरहमपूरणकामहै इससेवहआसक्ति हमकोनहींहै हमतोउदासीनके समानवर्त्तमानहैं इससेउदासीनकेसमानकर्मकरोकुछडरनहीहै कोईकर्म तुमकोभीनलगेंगे हे धनंजयअर्जुन ९

CC-0. In Public Domain. Digitized by eGangotri

मयाध्यक्षेणप्रकृतिः सूयतेसचराचरं हेतुनानेनकौन्तेय जगद्विपरिवर्तते १०

आनन्दगिरिकृतटीका

ईश्वरेसृष्टत्वमौदासीन्यत्वञ्चविरुद्धमितिशङ्कते तत्रेति पूर्वग्रन्थःसप्तम्यर्थः विरोधपरिहारार्थमुत्तरश्लोकमवतारयति तदिति तृतीयाद्वयंसमानाधिकरणमित्यभ्युपेत्यव्याचष्टे मयेत्यादिना प्रकृतिशब्दार्थमाह ममेति तस्याअपिच्छानत्वंव्यावर्तयति त्रिगुणेति परोभिप्रेतंप्रधानंव्युदस्यति अविद्येति साक्षित्वेप्रमाणमाह तथाचेति मूर्तित्रयात्मनोभेदंवारयति एकइति अखण्डजाड्यंप्रत्याह देवइति आदित्यवत्साटस्थंप्रत्यादिशति सर्वभूतेष्विति किमितितर्हिसर्व्वैर्नोपलभ्यतेतत्राह गूढइति बुद्ध्यादिवत्परिच्छिन्नत्वंव्यवच्छिनत्ति सर्व्वव्यापीति तर्हिनभोवदनात्मत्वंनेत्याह सर्वभूतेति तर्हितत्तत्कर्म्मतत्फलसम्बन्धित्वंस्यात्तत्राह कर्मेति सर्व्वाधिष्ठानत्वमाह सर्व्वेति सर्वेषुभूतेषुसत्तास्फूर्त्तिप्रदत्वेन संनिधिर्व्यवोच्यते नकेवलंकर्मणामेवायमध्यक्षोपितुतद्वतामपीत्याह साक्षीति दर्शनकर्त्तृत्वशङ्कांशातयति चेतेति अद्वितीयत्वंकेवलत्वंधर्म्माधर्मादिराहित्यमाह निर्गुणइति किंवक्तुनासर्व्वविशेषशून्यइति चकारार्थः उदासीनस्यापीश्वरस्यसाक्षित्वमात्रंनिमित्तीकृत्यजगदेतत्पौनःपुन्येनसर्गसंहारावनुभवतीत्याह हेतुनेति कार्य्यवत्कारणस्यापिसाक्ष्यधीनाप्रवृत्तिरितिवक्तुं व्यक्ताव्यक्तात्मकमित्युक्तं सर्व्वावस्थास्वित्यनेनसृष्टिस्थितिसंहारावस्थागृह्यन्ते तथापिजगतःस्वर्गादिभ्योभिन्नाप्रवृत्तिःस्वाभाविकीनेश्वरायत्तेत्याशंक्याह दृशीति नहिदृशाव्याप्तत्वंविना जडवत्स्वर्गकापिप्रवृत्तिरितिहिशब्दार्थः तामेवप्रवृत्तिमुदाहरति अहमित्यादिना भोग्यस्यविषयोपलम्भाभावासम्भवान्नानाविधांविषयोपलब्धिंदर्शयति पश्यामीतिभोगफलमिदानींकथयति सुखमिति विहितप्रतिषिद्धाचरणनिमित्तंसुखदुःखञ्चेत्याह तदर्थमिति नच विमर्शपूर्व्वकंविज्ञानंविनानुष्ठानमित्याह इदमिति इत्याद्याप्रवृत्तिरितिसम्बन्धः साचप्रवृत्तिःसर्वाटकर्मत्वमुररीकृत्यैवविवृणोतिइत्युक्तंनिगमयति अवगीतीति तत्रैवचप्रवृत्तेरवसानमित्याह अवगतिरवसानइति परस्याध्यक्षत्वमात्रेणजगच्चेष्टेत्यत्रप्रमाणमाह योऽयेति अस्यजगतोयोध्यक्षोनिर्विकारःसपरमेप्रकृष्टेहार्दैव्यो

भाषाअनुवाद

सोईकहतेहैंकिअधिष्ठाताकारणस्वरूपमेरेबलसे यहप्रकृतिचराचरविश्वको बारबारउत्पन्नकरतीहै तात्पर्ययहकिमेरीसान्निध्यसे प्रकृतिसृष्टिकरनेकोसमर्थहोतीहै इससे हमको कर्तृत्व औ उदासीनत्व दोनोअसङ्गतनहींहैं क्योंकियहमायाहमारेसहारेविनअसमर्थहै अर्थात् आपअकेलीकुछनहींकरसकतीहै १०

CC-0. In Public Domain. Digitized by eGangotri

अवजानन्तिमांमूढा मानुषीन्तनुमाश्रितं परंभावमजानन्तो ममभूतमहेश्वरं ११

शाङ्करभाष्यं

एवंमांनित्यशुद्धमुक्तस्वभावंसर्वजन्तूनामात्मानमपिसन्तं अवेति अवजानन्त्यवज्ञांपरिभवंकुर्वन्ति मांमूढाअविवेकिनोमानुषींमनुष्यसम्बन्धिनींतनुंदेहमाश्रितंमनुष्यदेहेनव्यवहरन्तमित्येतत्परंप्रकृष्टंभावंपरमात्मतत्वमाकाशकल्पमाकाशादप्यन्तरतममजानन्तोममभूतमहेश्वरंसर्वभूतानांमहान्तमीश्वरंस्वमात्मानंततश्चतस्य मामवज्ञानभावनेनहताःवराकास्ते ११

आनन्दगिरिकृतटीका।

न्निस्थितोनिर्विकारःनपरमेप्रकृष्टेहार्दैव्योन्निस्थितोदुर्विज्ञेयइत्यर्थः ईश्वरस्यसाक्षित्तमात्रेणसृष्टत्वे स्थिते फलितमाह ततश्चेति किंनिमित्तापरस्येयंसृष्टिर्नताबद्भोगार्थापरस्यपरमार्थतो भोगासम्बन्धित्वात्तस्यसर्वसाक्षीभूतचैतन्यमात्रत्वान्नचान्यो भोक्ता चेतनान्तराभावादीश्वरस्यैकत्वादचेतनस्याभोक्तृत्वान्नचसृष्टिरपवर्गार्थतद्विरोधित्वान्नैवंप्रश्नोवा तदनुरूपंप्रतिवचनंवायुक्तं परस्यमायानिबन्धनेसर्गेतस्यानवकाशत्वादित्यर्थः परस्यात्मनोदुर्विज्ञेयत्वेश्रुतिमुदाहरति कोऽङ्गेति तस्मिन्प्रवक्तापि संसारमण्डलेनास्तीत्याह कइहेति जगतःसृष्टिकर्त्तृत्वेनपरस्यज्ञेयत्वमाशंक्यकूटस्थात्ततोनसृष्टिर्जातेत्याह कुतइति नहीयंविविधासृष्टिरन्यस्मादपिकस्माच्चिदुपपद्यतेअन्यस्यवस्तुनोभावादित्याह कुतइति कथं तर्हिसृष्टिरित्याशंक्याज्ञानाधीनेत्याह दर्शितञ्चेति १० सर्वाध्यक्षःसर्वभूताधिवासोनित्यमुक्तश्चेत्त्वंतर्हिकिमितित्वा

स्वामिकृतटीका

तदेवोपपादयति मयेति मयाअध्यक्षेणअधिष्ठात्रानिमित्तभूतेनप्रकृतिःसचराचरंविश्वंसूयतेजनयति अनेनमदधिष्ठानेनहेतुनाइदंजगद्विपरिवर्त्ततेपुनःपुनर्जायते सन्निधिमात्रेणाधिष्ठातृत्वात् कर्त्तृत्वमुदासीनत्वञ्चाविरुद्धमितिभावः १०

भाषा अनुवाद

औरजोकहोकिऐसेजोपरमेश्वरतुम तोतुमकोकोईकोईआदरनहींक्योंकरतेहैं तोदोश्लोकसेकहतेहैं किसर्वभूतकेईश्वरजोहम सोहमरा परमतत्व जोलोग नहींजानतें तेईमूढ हमरानिरादरकरतेहैं इसमेकारणयहहै किहमविशुद्धस्वरूपहोयकेभी अपनेभक्तोंकीइच्छावशतें मनुष्यकेसमानशरीरधरतेऔतैसेही कर्म्मभीकरतेहैं इसीसेलोग अपनेसमान हमकोभीमानतेहैं ११

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

कथंमोघाशेति मोघाशाटथाआशाआशिषेा येषांतेमोघाशास्तथामोघकर्म्माणो यानिचाग्निहोत्रादीनि तैरनुष्ठीयमानानिकर्म्माणि तानिचतेषांभगवत्परिभवात् स्वात्मभूतस्यावज्ञानान्मोघान्येवनिःफलानिकर्म्माणिभवन्तीति मोघकर्माणस्तथामोघ ज्ञानाःमोघंनिःफलंज्ञानंयेषांतेमोघज्ञानाःज्ञानमपितेषांनिःफलमेवस्यात्विचेतसो विगतविवेकास्तेभवन्तीत्यभिप्रायःकिञ्चतेभवन्तिराक्षसीरक्षसांप्रकृतिंस्वभावं आ सुरीमसुराणाञ्चप्रकृतिंमोहनीमोहकरीदेहादिवादिनींश्रिताआश्रिताःकिन्विभि न्दिपिवखादपरस्वमपहरेत्येवंवदनशीलाःक्रूरकर्म्मकुर्व्वाणाभवन्तीत्यर्थः असुर्य्यानाम तेलोकाइतिश्रुतेः १२ येपुनःश्रद्दधानाःभगवद्भक्तिलक्षणेमोक्षमार्गेप्रवृत्ताःमहा

आनन्दगिरिकृतटीका

मेवात्मत्वेनभेदेनवासर्वेनभजन्तेतत्राहएवमिति विपर्य्यस्तबुद्धित्वं भगवदवज्ञायांक रणमित्याह मूढाइति भगवतोमनुष्यदेहसम्बन्धात्तस्मिन्विपर्यासःसम्भवतीत्याह मानुषीमिति अस्मदादिवर्दृहतादात्म्याभिमानंभगवतोव्यावर्त्तयति मनुष्येतिभगव न्तामवजानतामविवेकमूलाज्ज्ञानं हेतुमाह परमिति ईश्वरावज्ञानात्किंभवतीत्य पेक्षायां तदवज्ञानप्रतिबन्धबुद्धयःशोच्यामवन्तीत्याह ततश्चेति भगवदवज्ञानादेव हेतोरवजानन्तस्ते जन्तवोवराकाः शोच्याःसर्व्वपुरुषार्थबाह्याःस्युरितिसम्बन्धः तत्र हेतुंसूचयति तस्येति प्रकृतस्यभगवतोऽवज्ञानमनादरणंनिन्दनम्बातस्यभावनंपौ नःपुन्यं तेनहतास्तज्जनितदुरितप्रभावात्प्रतिबन्धबुद्धयइत्यर्थः ११

भगवत्तमवजानतांप्रश्नपूर्वकंशोच्यत्वंविशदयति कथमिति भगवन्निन्दापरा णांनकाचिदपिप्रार्थनार्थवतीत्याह दृष्टेति ननुभगवन्तंनिन्दतोपिनित्यंनैमित्तिकम्बा कर्म्मानुतिष्ठन्तितदनुष्ठानाच्चतेषांप्रार्थताःसार्थाभविष्यन्तीतिनेत्याहतथेति परिभव स्तिरस्करणंअवज्ञानमनादरणं तेषामपिशास्त्रार्थावज्ञानबनांतद्वाराप्रार्थनार्थवत्त्व मित्याशंक्याह तथामोघेति तथापियौक्तिकविवेकवशात्तत्प्रार्थनासाफल्यमित्याशं क्याह विचेतसइति नकेवलमुक्तविशेषणवत्त्वमेबतेषांकिन्तुवर्त्तमानदेहपतादनन्त रंतत्तदतिक्रूरयोनिप्राप्तिश्चनिश्चितेत्याह किञ्चेति मोहकारीमिति प्रकृतिद्वये

स्वामिकृतटीका।

नन्वेवंभूतंपरमेश्वरंत्वांकिंमिति केचिन्नाद्रियन्तेतत्राह अवजानन्तीतिद्वयां सर्वभू तमहेश्वररूपंमदीयंपरंभावंतत्त्वमजानन्तो मूढामूर्खामामवजानन्ति मामवमन्यन्ते अवज्ञानेहेतुःशुद्धसत्त्वमयीमपितनुंभक्तेच्छावशान्मनुष्याकारामाश्रितवन्तमिति ११

CC-0. In Public Domain. Digitized by eGangotri

मोघाशामोघकर्माणोमोघज्ञानाविचेतसः राक्षसीमासुरीञ्चैवप्रकृतिंमोहनीं श्रिताः १२

शाङ्करभाष्यं

त्मानइति महात्मानस्तुअक्षुद्रचित्तामामीश्वरंपार्थदेवींदेवानांप्रकृत्तिं शमदमद यास्रङ्गादिलक्षणामाश्रिताःसन्तोभजन्तिसेवन्तेऽनन्यमनसोऽनन्यचित्ताज्ञात्वामां भूतादिंभूतानांआश्रयमादिकारणं त्रियदादीनांप्राणिनांचादिकारणमाश्रयमव्य यम् १३

श्रामन्दगिरिकृतटीका

पितुल्यंविशेषणं छिन्धिभिन्दिपिवखादेतिप्राणिहिंसारूपोरक्षसां स्वभावोऽसुराणां स्वभावस्तुनदेहिनोजुक्षधि परस्वमेवापहरेत्यादिरूपःमोहोमिथ्याज्ञानं उक्तमेव स्फुटयति छिन्धीति १२ केपुनर्भगवन्तंभजन्तेतानाह येपुनरिति महान् प्रकृष्टोयज्ञादिभिःशोधितआत्मासत्त्वं येषामितिव्युत्पत्तिमाश्रित्याह अक्षुद्रेति तुश ब्दोऽवधारणे प्रकृतिंविशिनष्टि शमेति अनन्यस्मिन्प्रत्यगभूतेमयिपरस्मिन्नेवमनो येषामिति व्युत्पत्त्याव्याकरोति अनन्यचित्ताइति अज्ञातेसेवानुपपत्तेः शास्त्रोपप त्तिभ्यामादौज्ञात्वाततःसेवन्तेइत्याह ज्ञात्वेति अव्ययमविनाशिनं १३ भजनप्र

स्वामिकृतटीका।

किञ्च मोघाशाइति मत्तोऽन्यद्देवतान्तरंक्षिप्रंफलंदास्यतीत्येवंभूता मोघानिः फलैवाशायेषांतेअतएवमद्विमुखत्वान्मोघानिनिःफलानिकर्माणियेषांते मोघमेव नानाकुतर्काश्रितंशास्त्रज्ञानंयेषांतेअतएवविचेतसोविच्छिन्नचित्ताःसर्वत्रहेतुः राक्ष सींतामसीहिंसादिप्रचुरां आसुरीञ्चराजसींकामदर्पादिवल्लांमोहनीं बुद्धिभ्रंशकरींप्रकृतिंस्वभावंश्रिताःआश्रिताःसन्तो मामवजानन्तीतिपूर्वेणैवान्वयः १२

केतर्हित्वामाराधयन्तीत्यतआह महात्मानइति महात्मानःकामाद्यनभिभूतचि त्ताःअतएवअभयंसत्त्वसंशुद्धिरित्यादिनावक्ष्यमाणांदैवींप्रकृतिंस्वभावमाश्रिताःअत एवमद्व्यतिरेकेणनास्त्यन्यस्मिन्मनोयेषांतेतुभूतादिंजगत्कारणंअव्ययंनित्यञ्चमां ज्ञा

भाषा अनुवाद

औरजोमनुष्यहमसेभिन्नऔरदेवतोंसे किशीघफलदेयंगेऐसीनिःफल आशा करतेहैं औरहमसेविमुख जेफलकेहेतुकर्मकरैंहैं औरजिनके शास्त्रसेजोज्ञा नसोनानाकुतर्कयुक्तहै वेईसकलविचेतसकहेविच्छिन्नचितलोग अनर्थकेहेतुहिंसा दितामसकर्मतथाकामअभिमानसेभरीपूरीजोराजसीवृद्धितिसकेआश्रितहोयहम कोनजानिहमारानिरादरकरतेहैं अभिमानकरते औरजीवमारते हैं १२

CC-0. In Public Domain. Digitized by eGangotri

महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः भजन्त्यनन्यमनसोज्ञात्वाभूतादिमव्ययं १३
सततंकीर्त्तयन्तोमांयतन्तश्चदृढव्रताः नमस्यन्तश्चमांभक्त्यानित्ययुक्ताउपासते १४

शाङ्करभाष्यं।

कथंसततमिति सततंसर्वदाभगवन्तंब्रह्मस्वरूपंमांकीर्त्तयन्तोयजन्तश्चेन्द्रियोपसंहारशमदमदयाहिंसादिलक्षणैःधर्मैःप्रयतन्तश्च दृढव्रताद्दढंस्थिरमचाञ्चल्यं व्रतंयेषांतेदृढव्रतानमस्यन्तश्चमांहृदयेश्रयमात्मानं भक्तानित्ययुक्ताःसन्तउपासते सेवन्ते १४ तेकेनकेनप्रकारेणोपासतइत्युच्यते ज्ञानेति ज्ञानयज्ञेनज्ञानमेवभगवद्विषयंयज्ञस्तेनज्ञानयज्ञेनयजन्तःपूजयन्तोमामीश्वरं चान्येऽन्यामुपासनां परित्यज्य उपासतेतच्चज्ञानमेकत्वेनएकमेवपरंब्रह्मेति परमार्थदर्शनेनयजन्तउपासते केचिच्चपृथक्त्वेनआदित्यचन्द्रादिभेदेनसएवभगवान्विष्णुरादित्यादिरूपे

आनन्दगिरिकृतटीका

कारंपृच्छति कथमिति तत्प्रकारमाह सततमिति सर्वदेति अवसरावस्थागृह्यन्ते कीर्त्तनंवेदान्तश्रवणंप्रणवजपञ्चव्रतंब्रह्मचर्यादिनमस्यन्तोमांप्रति चेतसा प्रह्वीभवन्तो भक्त्यापरेणप्रेम्णानित्ययुक्ताःसन्तःसदासंयुक्ताः १४

स्वामिकृतटीका

त्वामजन्ति १३ तेषांभजनप्रकारमाह सततमिति द्वाभ्यां सततंसर्व्वदास्तोत्रमन्त्रादिभिःकीर्त्तयन्तः केचिन्मामुपासतेसेवन्तेदृढानिव्रतानिनियमायेषांतादृशाःसन्तोयतन्तश्चऐश्वर्यज्ञानादिषुप्रयत्नंकुर्व्वन्तःकेचिद्भक्त्यानमस्यन्तश्चप्रणमन्तः अन्येनित्ययुक्ताअनवरतंअवहिताःसेवन्ते भक्त्येतिनित्ययुक्ताइतिचकीर्त्तनादिष्वपिद्रष्टव्यं१४

भाषाअनुवाद

तोतुमारीआराधनाकौनकरतेहैं जोयहपूछोतोकहतेहैं किकामादिकमेजिनकाचित्तअवशनहीं ऐसेजोमहात्मालोग वेदैवीप्रकृतिकेआश्रितहोतेहैं इसीसेहमकोछोडिऔरमेंजिनका मननहींहै तेमनुष्यहमकोसमस्तभूतकेआदि कहे जगतकेकारणनित्यस्वरूपजानिकै भक्तिपूर्वकआरधनकरतेहैं १३ अबभक्तोंकेभजनकाप्रकारदोश्लोकसेकहतेहैं किसर्वदास्तोत्रऔमंत्रसेकोईमेरा कीर्त्तनकरतेऊये मेरीउपासनाकरतेहैं औरकोईदृढ़नियमकरकेऐश्वर्यऔ ज्ञानमेयत्नकरतेऊयेमेरेउपासकहोतेहैं औरकोईभक्तिपूर्वकप्रणतहोय मेरासेवनकरतेहैं ऐसेनित्ययुक्तकहे सावधान मेरेमेतत्परहोय मेरेभक्त सुभ्रू सेवतेहैं १४

CC-0. In Public Domain. Digitized by eGangotri

ज्ञानयज्ञेनचाप्यन्येयजन्तोमामुपासते एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखम् १५
अहंक्रतुरहंयज्ञःस्वधाहमहमौषधं मन्त्रोहमहमेवाज्यमहमग्निरहंहुतम् १६

शाङ्करभाष्यं

णावस्थितइत्युपासतेकेचिद्बहुधावस्थितःस एव भगवान्सर्वतोमुखोविश्वरूपइति तंविश्वरूपंसर्वतोमुखंबहुधा बहुप्रकारेणोपासते १५ यदिबहुभिःप्रकारैरुपासतेकथंत्वामेवोपासतइत्यतआह अहमिति अहंश्रौतकर्म्मभेदोऽहमेवाहंयज्ञः स्मार्त्तःकिञ्चस्वधान्नमहंपितृभ्योयद्दीयतेतत्स्वधा तथाअहमौषधं सर्वप्राणिभिर्यद्द्यतेतदौषधशब्दवाच्यव्रीहियवादिसाधनमथवा स्वधेति सर्वप्राणिसाधारणमन्नमौषधमिति व्याध्युपशमार्थभेषजंमन्त्रोहंयत्पितृभ्योदेवताभ्यश्च हविर्दीयतेऽहमेवाज्यंहविश्चाहमग्निर्यस्मिन्हूयते सोप्यग्निरहमेवाहंहुतंहवनंकर्म्मच १६

आनन्दगिरिकृतटीका।

उपासनप्रकारभेदप्रतिपित्सयाप्रच्छति तेकेनेति तत्प्रकारभेदोदीरणार्थं श्लोकमवतारयति उच्यतइति इज्यतेपूज्यतेपरमेश्वरोनेनेतिप्रकृतेर्ज्ञानेयज्ञशब्दः ईश्वरश्चेति चकारोवधारणे देवतान्तरध्यानत्यागमपिशब्दसूचितंदर्शयति अन्यामिति अन्येचब्रह्मनिष्ठामिति यावत् ज्ञानयज्ञमेवविभजते तत्रेति उत्तमाधिकारिणामुपासनमुक्त्वा मध्यमानामधिकारिणामुपासनप्रकारमाह केचित्त्रेति तेषामेवअहंयज्ञः स्मार्तःकिञ्चस्वधाहंपितृभ्योयद्दीयतेतत्स्वधा तथासमौषधंसर्वप्राणिभिर्यद्द्यतेप्रकारान्तरेणोपासनमुदीरयति केचिदिति बहुप्रकारेणाग्न्यादित्यादिरूपेणेतियावत् १५ भगवदेकविषयमुपासनंतर्हिनसिध्यतीति शङ्कते यदीति प्रकारभेदमादायध्यायन्तोपिभगवन्तमेवध्यायन्तितस्यसर्वात्मत्वादित्याह अतआहेति क्रतुयज्ञश्च

भाषाअनुवाद

औरचराचरमात्रश्रीकृष्णऐसाजोआत्मदर्शनसोईज्ञानऔसोईयज्ञइसप्रकारज्ञानयज्ञसेकितनेहमकोपूजते हैं देखोकोईअभेदभावसेऔकोईहमभगवानकेदासइसभेदभावसेउपासनाकरतेहैं औरकोईहमकोब्रह्मारुद्रआदिरूपसमझकरसेवते हैं १५ अबअपनीसर्वरूपता चारिश्लोकसेकहतेहैं किमैहींक्रतुकहेवेदोक्तअग्निष्टोमआदियज्ञ औरयज्ञकहेधर्म्मशास्त्रोक्तजोपञ्चयज्ञबलिवैश्वदेवादि औरस्वधाकहेश्राद्धऔर औषधअर्थात् फलहोनेसेजोपकिजाय इससेअन्नभीआयगये औमंत्र औआज्यकहेघृतआदि औअग्निकहेयज्ञाग्नि औहोम यहजोकुछ हैसोहमहैं १६

CC-0. In Public Domain. Digitized by eGangotri

पिताहमस्यजगतोमाताधातापितामहः वेद्यंपवित्रमोङ्कारऋक्सामयजुरेवच १७
गतिर्भर्त्ताप्रभुःसाक्षीनिवासःशरणंसुहृत् प्रभवःप्रलयःस्थाननिधानंबीजमव्ययं १८

शाङ्करभाष्यम्।

किञ्च पितेति पिताजनयितास्मिन्जगतोमाताजनयित्रीधाताकर्म्मफलस्यप्राणिभ्यो विधाता पितामहःपितुःपितावेद्यंवेदितव्यंपवित्रंपावनंओङ्कारश्चऋक्सामयजुरेवच१७

किञ्च गतिरिति गतिःकर्म्मफलंभर्त्तापोष्टाप्रभुःस्वामीसाक्षीप्राणिनांज्ञाताच तस्यनिवासोयस्मिन्प्राणिनोनिवसन्तिशरणमार्त्तानांप्रपन्नानामार्त्तिहरःसुहृत् प्र त्युपकारानपेक्षउपकारीप्रभवउत्पत्तिर्जगतःप्रलयःप्रलीयते यस्मिन्इति प्रलयःतथा

आनन्दगिरिकृतटीका।

द्वयोऽनयोरपौनरुक्त्यंदर्शयन्व्याचष्टे औतइति क्रियाकारकफलज्ञानंभगवदतिरि क्तंनास्तीति समुदयार्थः १६ इतश्च भगवतःसर्व्वात्मकत्वमनुमन्तव्यमित्याह किञ्चेति पवित्रंपूयतेऽनेनेतिव्युत्पत्त्यापरिशुद्धेकारणंपुण्यंकर्म्मेत्याह पावनमिति वेदितव्येब्रह्म णिवेदनसाधनमोङ्कारस्तत्प्रमाणत्वेगादिच चकारादथर्व्वाङ्गिरसोगृह्यन्ते १७

स्वामिकृतटीका।

किञ्च ज्ञानेति वासुदेवःसर्वमित्येवंसर्व्वात्मदर्शनंज्ञानंतदेवयज्ञस्तेनज्ञानयज्ञेनमां यजन्ताःपूजयन्तोऽप्युपासते तत्रापिकेचिदेकत्वेनाभेदभावनयाकेचित्पृथग्भावनया दासोऽहमितिकेचित्तुविश्वतोमुखंसर्व्वात्मकंमांबहुधाब्रह्मरुद्रादिरूपेणोपासते १५ सर्व्वात्मतांप्रपञ्चयति अहंक्रतुरिति चतुर्भि क्रतुःश्रौतोऽग्निष्टोमादिःयज्ञःस्मार्त्तप ञ्चयज्ञादिःस्वधापितॄनर्थंश्राद्धादिःऔषधंओषधिप्रभवमन्नंभेषजम्वामन्त्रोयाज्यपुरो धोवाज्यादिःआज्यंहोमादिसाधनंअग्निराहवनीयादिःहुतंहोमःएतत्सर्वमहमेव१६

भाषाअनुवाद

औरइसजगतकेपितामाता तथाधाताकहे कर्मफलदाताऔपितामह तथावेद्य ज्ञेयवस्तुऔपावनकहेशुद्धकरनेवालेऔओङ्कार तथाऋक्यजुरसामअथर्ववेदयहस मस्तमैहींहौं १७ औरमैहींगतिकहेप्राप्यकर्मफलरूप औभर्ताकहेपोषणकर्त्ता औप्रभुनियामक तथासाक्षीशुभअशुभकेद्रष्टाऔनिवासभोगस्थान तथाशरणकहेर कएवंसुहृत् कहे हेतुरहितहितकारीप्रभवअर्थात् जगतकेउत्पन्नकर्त्ताप्रलयकहेसं चहर्त्तास्थानकहे बिश्वकेआधारऔरनिधानकहेलयस्थानऔबीजकहेकारणऔअ व्ययकहेअबिनाशीमैहींहौं १८

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

स्यानंतिष्ठत्यस्मिन्निति निधानंनिक्षेपःकालान्तरोपभोग्यप्राणिनांबीजंप्ररोहकारणं प्ररोहधर्म्मिणामव्ययं यावत्संसारभावित्वाद्व्ययं नह्यबीजंकिञ्चित् प्ररोहति नित्यञ्चप्ररोहदर्शनाद्बीजसन्ततिर्नव्येतीत्येवगम्यते १८

आनन्दगिरिकृतटीका

भगवतासर्व्वात्मकत्वेहेत्वन्तरमाह किञ्चेति गम्यतइति प्रकृतिविलयपर्य्यन्तं कर्म्मफलंगतिरित्याह कर्मेति पोष्टाकर्म्मफलस्यैवप्रदाता कार्य्यकारणप्रपञ्चस्याधिष्ठानमित्याह निवासइति शीर्य्यते दुःखमस्मिन्नितिव्युत्पत्तिमाश्रित्याह शरणमिति प्रभवत्यस्माज्जगदिति व्युत्पत्तिमादायोक्तं उत्पत्तिरिति कारणस्यकथमव्ययत्वमित्याशंक्याह यावदिति कारणान्तरेणापिकार्य्यंकदाचिदुद्देष्यति किंकारणेत्याशंक्याह नहीति मामूत्तर्हिसंसारदशायामेवकार्य्योत्पत्तिरित्याशंक्याह नित्यञ्चेति कारणव्यक्तेर्नाशमङ्गीकृत्य तदन्यतमव्यक्तिशून्यत्वंपूर्वकालस्यनास्तीति सिद्धवत्कृत्यविशिनष्टि बीजेति १८

इतश्चसर्वात्मत्वेभगवतोनविवदितव्यमित्याह किञ्चेति आदित्याज्जायतेवृष्टिरिति स्मृतिमवष्टभ्यव्याचष्टे कैश्चिदिति वर्षोत्सर्गनिग्रहावेकस्यैकस्मिन्काले विरुद्धौइत्याशंक्याह अष्टभिरिति क्रतुभेदेनवर्षस्यनिग्रहोत्सर्गावेककर्त्तृकावविरुद्धावित्यर्थः यस्यकारणस्यसम्बन्धित्वेनयत्कार्य्यमभिव्यज्यते तदिहसदित्युच्यते कारणसम्बन्धेनानभिव्यक्तंकारणमेवअनभिव्यक्तनामरूपमसदिति व्यवह्रियन्तेतदेतदाह सदेति शून्यवादंव्युदस्यति नपुनरिति भगवतोऽत्यन्तसत्वेकार्यकारणकल्पनानिरधिष्ठाना नतिष्ठेदित्यर्थः तर्हियथाश्रुतंकार्य्यस्यसत्त्वंकारणस्यचासत्त्वमास्थेयमित्याशंक्य बाधशब्देननिषेधति कार्य्येति तर्हिकार्य्यस्यात्यन्तिकंसत्त्वंवाचारम्भणश्रुतेर्नापी

स्वामिकृतटीका

किञ्च पिताहमस्येति भ्रातामातामहःपितामहइत्यादिसम्बन्धिनामेवात्रग्रहणं ज्ञेयंवस्तुपवित्रंशोधकंप्रायश्चित्तात्मकंवा ओङ्कारःप्रणवःऋगादयोवेदास्त्राहमेव स्रष्टमन्यत् १७ किञ्च गतिरिति गम्यतइतिगतिः फलंभर्त्तापोषणकर्त्ताप्रभुर्नियन्तासाक्षीशुभाशुभद्रष्टानिवासोभोगस्थानंशरणंरक्षकःसुहृत् हितकर्त्ताप्रकर्षेणभवत्यनेनेति प्रभवःस्रष्टाप्रलीयतेऽनेनेतिप्रलयःसंहर्त्ता तिष्ठन्त्यस्मिन्नितिस्थानमाधारः निधीयतेऽस्मिन्नितिनिधानंलयस्थानं बीजंकारणं तथाप्यव्ययमविनाशि नतुव्रीह्यादिबीजवदिनश्वरमित्यर्थः १८

CC-0. In Public Domain. Digitized by eGangotri

तपाम्यहमहंवर्षंनिगृह्णाम्युत्सृजामिच अमृतञ्चैवमृत्युश्चसदसच्चाहमर्जुन १९

शाङ्करभाष्यं

किञ्च तपामीति तपाम्यहमादित्योमूत्वा कैश्चित्रश्मिभिस्तपामि अहंवर्षंकैश्चिद्रश्मिभिरुत्सृजामिउत्सृज्यपुनर्निगृह्णामिकैश्चिद्रश्मिभिरष्टाभिर्म्मासैः पुनरुत्सृजामिप्रावृषिअमृतञ्चैवदेवानांमृत्युश्चमर्त्यानां यत्यस्ययत्सम्बन्धितयाविद्यानांतद्विपरीतंअसच्चैवाहंअर्ज्जुन नपुनरत्यन्तमेवासद्भगवान्स्वयंकार्यकारणेवासदसतीयेपूर्वोक्तैःनिवृत्तिप्रकारैरेकत्वपृथक्त्वादिविज्ञानैर्यज्ञैर्म्मां पूजन्तउपासते ज्ञानविदस्ते यथाविज्ञानं मामेवप्राप्नुवन्ति १९

येपुनरज्ञाःकामकामाः त्रैविद्येति त्रैविद्याऋग्यजुःसामविद याज्ञिकाःयेषांते मांवस्वादिवेदरूपिणंइष्ट्वासम्पूज्ययज्ञशेषंसोमपाःसोमंपिवन्तीतिसोमपास्तेनैव सोमपानेनतेपूतपापाःशुद्धकिल्विषायज्ञैरग्निष्टोमादिरिष्ट्वापूजयित्वास्वर्गतिंस्वर्गगमनंस्वरेवगतिः स्वर्गतिस्तांप्रार्थयन्तेयाचयन्तेतेचपुण्यंपुण्यफलमासाद्यसम्प्राप्यसुरेन्द्रलोकं शतक्रतोःस्थानंअश्नन्तिभुञ्जते दिव्यान्दिविभवान्अप्राकृतान्देवभोगान् देवानांभोगांस्तान् २० ते तमिति तेतंभुक्त्वास्वर्गलोकंविशालंविस्तीर्णंक्षीणे

आनन्दगिरिकृतटीका

तरस्यात्यन्तिकंअसत्त्वंकुतस्तुखल्वित्यादिश्रुतेरित्यर्थः उक्तैर्ज्ञानयज्ञैर्भगवदभिध्यानाभिनिविष्टबुद्धीनांकिंफलमित्याशंक्य सद्योवा क्रमेणवा मुक्तिरित्याह येइति १९

स्वामिकृतटीका।

किञ्च तपाम्यहमिति आदित्यात्मनास्थित्यानिदाघकालेतपामिजगतस्तापंकरोमि वृष्टिसमयेचवर्षणमुत्सृजामिविमुञ्चामि कदाचित्तुवर्षंनिगृह्णामिआकर्षामिअमृतं जीवनंमृत्युश्चनाशःसत्स्थूलंदृश्यंअसच्चसूक्ष्ममदृश्यंएतत्सर्व्वमहमेवेति एवंमत्वामामेव बहुधोपासते इति पूर्व्वेणैवान्वयः १९

भाषाअनुवाद

औरग्रीष्मकालमेसूर्यरूपमैहींतापदेताहूं औवर्षाकालमेजलवृष्टिभीहमीकरते हैं औतथाकोईसमैमेजलकिरणोसेखींचते औकभीफेरिजलकोछोडतेभीहमींहैं अमृतकहेजीवन मृत्युकहेमरणऔरसतकहेपृथिवीआदिस्थूलपदार्थऔअसत् कहेसूक्ष्मवस्तु रूपादिमात्राभीहेअर्जुन हमहींकोजानो इसीसेलोगनानारूप हमारी उपासनाकरते हैं १९

CC-0. In Public Domain. Digitized by eGangotri

त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयन्ते तेपुण्यमासाद्य सुरेन्द्रलोक मश्नन्तिदिव्यान्दिविदेवभोगान् २०

शाङ्करभाष्यं ।

पुण्ये मर्त्यलोकमिमंविशन्त्याविशन्ति एवंहियथोक्तेनप्रकारेणत्रयीधर्म्मंकेवलंवैदिकं कर्म्मानुप्रपन्नास्तेगतागतं गतञ्चागतञ्चगतागतंगमनागमनंकामकामाः कामंका मयन्त इतिकामकामा लभन्ते गतागतमेव नतुस्वातन्त्र्यं क्वचिल्लभन्तइत्यर्थः २१

आनन्दगिरिकृतटीका

भगवज्ज्ञानामपिनिःकामानामेवमुक्तिरितिदर्शयितुंसकामानांपुंसां संसार मवतारयति येपुनरिति तिस्रोविद्याअधीयन्तेविदन्तीतिवा तेत्रैविद्या वेदविदस्त दाह ऋगिति वस्यादोत्यादिशब्देनसवनद्वयेशानादित्यारुद्राश्चगृह्यन्तेशुद्धकिल्बिषा निरस्तपापाइतियावत् २० तर्हिस्वर्गप्राप्तेरपिभगवत्प्राप्तितुल्यतामित्याशंक्याह

स्वामिकृतटीका ।

तदेवमभजानन्ति मां मूढाइत्यादिश्लोकद्वयेन क्षिप्रफलाशयादेवतान्तरं यज न्तो मां नाद्रियन्तइत्यभक्तादर्शिताः महात्मानस्तुमांपार्थेत्यादिनाचभक्ताउक्तास्तत्रै कत्वेन पृथक्त्वेन वा ये परमेश्वरंनभजन्तितेषांजन्मस्त्यप्रवाहोदुर्वारइत्याह त्रै विद्याइति द्वाभ्यां ऋग्यजुःसामलक्षणास्तिस्रोविद्यायेषांते त्रिविद्यास्त्रिविद्याएव त्रैविद्याःस्वार्थेऽण् तिस्रोविद्याअधीयन्ते जानन्तीति वा त्रैविद्यावेदत्रयोक्तकर्म्मपरा इत्यर्थःवेदत्रयविहितैर्यज्ञैर्मामिष्ट्वाममैवरूपंदेवतान्तरमित्यजानन्तोऽपिवस्तुत इन्द्रा दिरूपेणमामेवेड्वासंपूजयन्यज्ञशेषंसोमंपिबन्तीतिसोमपास्तेनैव पूतपापाः शोधित कल्मषाःसन्तःस्वर्गतिंस्वर्गंप्रतिगतिंयेप्रार्थयन्तेतेपुन्यफलरूपंसुरेन्द्रलोकंस्वर्गमासा द्य प्राप्य दिविस्वर्गेदिव्यानुत्तमान्देवानांभोगानश्नन्तिभुञ्जते २०

भाषा अनुवाद ।

मूढमेराअनादरकरतेऔमहात्मामेरीभजनकरतेऐसेपूर्वमे भक्तअभक्तोंका लक्षणकहिके अबमूढोंकाजन्मस्त्युरूपसंसारप्रवाहदुर्निवारहैयहदोश्लोकमेंकहते हैं किजोमनुष्यऋक्यजुःसामवेदपढतेवेत्रैविद्यअर्थात्वेदोक्तकर्म्मपरायणयज्ञके द्वा रा सर्वरूपजोमैंहूंसो मेरीहीपूजाकरिऔरसोमलताकारसपीकरपूतपापहोयस्वे च्छासेस्वर्गलोककोजातें औरपुण्यफलरूपस्वर्गकोप्राप्तहोय वहांके उत्तमदेवभोग्य वस्तुवोंकाभोगकरतेहैं २०

CC-0. In Public Domain. Digitized by eGangotri

तेतंभुक्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्यलोकंविशन्ति एवंत्रयीधर्म्ममनुप्रपन्ना गतागतंकामकामालभन्ते २१

शाङ्करभाष्यं

येपुनःनिःकामासम्यग्दर्शिनःअनन्याइति अनन्याअपृथग्भूताःपरंदेवं नारायणं आत्मत्वेनगताःसन्तश्चिन्तयन्तोमांयेजनाःसंन्यासिनःपर्युपासतेतेषांपरमार्थदर्शिनां नित्याभियुक्तानांसततामियोगिनांयोगक्षेमंयोगोऽप्राप्तस्यप्रापनं क्षेमस्तद्रक्षणं तदुभ यंवहामिप्रापयाम्यहं ज्ञानीत्वात्मैवमेमतंसचममप्रियोयस्मात्तस्मात्तेममात्मभूताःप्रि याश्चेति नन्वेषामपिभक्तानांयोगक्षेमंवहत्येवभगवान्सत्यमेवंवहत्येव किन्त्वयंविशे षोऽन्येभे येभक्तास्तेस्वात्मार्थंस्वयमपियोगक्षेममीहन्ते अनन्यदर्शिनस्तुनात्मार्थं योग क्षेममीहन्ते नहितेजीवितेमरणेवात्मनोग्रन्थिंकुर्व्वन्ति केवलमेवभगवच्छरणास्ते अतोभगवानेवतेषां योगक्षेमंवहतीति २२

आनन्दगिरिकृतटीका।

तेतमिति पुण्येस्वर्गप्राप्तिहेताविति यावत्प्रसिद्धोऽर्थोहिशब्दःत्रयाणां होत्रादीनां वेदत्रयविहितानांधर्म्माणांसमाहारस्त्रिधर्म्मंतदेवत्रैधर्म्यंतदनुप्रपन्नास्तदनुगताइति यावत् कामकामानांगमनागमनद्वाराकामितत्फलाप्तिस्त्वेदिष्टमेव चेष्टितमित्याशं क्याह गतेति २१ फलमनभिसन्धायत्वामेवाराधयतां सम्यग्दर्शननिष्ठानामत्य न्तनिःकामानांकथंयोगक्षेमंस्यातामित्याशंक्याह येपुनरिति तेषांयोगक्षेमंवहामी त्युत्तरवाक्यसम्बन्धः येभ्योऽन्योनविद्यतइतिव्युत्पत्तिमाश्रित्याह अपृथगिति कार्यस्ये बकारणेकर्म्मतादात्म्यंव्यावर्त्तयति परमिति अहमेववासुदेवःसर्व्वात्मानमतोऽन्यत्

स्वामिकृतटीका।

ततश्चतेतमिति तेस्वर्गकामास्तंप्रार्थितंविपुलंस्वर्गलोकंतत्सुखंभुक्त्वाभोगप्रापके पुण्येक्षीणेसति मर्त्यलोकंविशन्ति पुनरप्येवमेववेदत्रयविहितंधर्म्ममनुगताः काम कामा भोगान्कामयमानागतागतंयातायातंलभन्ते २१

भाषाअनुवाद।

फेरितेई स्वर्गकामीमनुष्य अपनादृष्टविपुल स्वर्गसुखभोगकरिके जबपुण्यक्षीण भई तबफेरिमर्त्तलोकमेआवतेहैं आयकरके फेरिवहीवेदत्रयीविहितधर्म्मकर्म करिके भोगकामनाकारीलोग गमनागमनमात्रलाभकियाकरतेहैं अर्थात्ऊभी नीचेआतेऔकभीउपरजातेरहतेहैं २१

CC-0. In Public Domain. Digitized by eGangotri

अनन्याश्चिन्तयन्तोमांयेजनाःपर्युपासते तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं २२

शाङ्करभाष्यं

नन्वन्याअपिदेवतास्त्वमेवचेत्तद्भक्ताश्चत्वामेवभजन्तेसत्यमेवं येऽन्यदेवताभक्ता अन्यासुदेवतासुभक्ताअन्यदेवताभक्ताःसन्तोयजन्तेपूजयन्तिश्रद्धयास्तिक्यबुद्धा अन्विताअनुगतास्तेऽपिमामेवकौन्तेययजन्तिविधिपूर्वकमविधिरज्ञानंतत्पूर्वकंअज्ञानपू

आनन्दगिरिकृतटीका

किञ्चिदस्तीति ज्ञात्वातमेवप्रत्यक्षंसदाध्यायन्तइत्याह चिन्तयन्तइति प्राक्तनान्व्यावर्त्य मुख्यानधिकारिणोनिर्दिशति संन्यासिनइति पर्युपासतेपरितःसर्वतोनबच्छिन्नतयापश्यन्तीत्यर्थः नित्याभियुक्तानामित्यनवरतमादरेणध्यानेव्याप्तानामित्याह सतेति योगश्चक्षेमश्चयोगक्षेमंतवापुनरुक्तमर्थमाह योगइति किमर्थंपरमार्थदर्शिनां योगक्षेमंवहामीत्याशंक्याह ज्ञानीत्विति अतस्तेषांयोगक्षेमंवहामिइतिसम्बन्धः सम्यग्दर्शननिष्ठानामेवयोगक्षेमंवहतिभगवानितिविशेषणमसृष्यमाणःशङ्कते नन्विति अन्येषामपिभक्तानां भगवान्योगक्षेमंवहतीत्येतदङ्गीकरोति सत्यमिति तर्हिभक्तेषुज्ञानिषुचविशेषोनास्तीतिपृच्छति किंत्विति तत्रविशेषंप्रतिज्ञायविष्टणोति अयमित्यादिना योगक्षेममुद्दिश्यस्वयमीहन्तेचेष्टांकुर्वन्तीतियावत् आत्मविदांस्वार्थं योगक्षेममुद्दिश्य चेष्टाभावंस्पष्टयति नहीति ग्रन्थिरपेक्षकानामित्येतत् ज्ञानिनां तर्हिसर्वत्रानास्थेत्याशंक्याह केवलमिति तेषांतदेकशरणत्वेफलितमाह अतइति इतिशब्दोविशेषशब्देनसम्बध्यते २२

स्वाकिकृतटीका

मद्भक्तास्तुमत्प्रसादेनकृतार्थाभवन्तीत्याह अनन्याइति अनन्यानास्तिमद्यतिरेकेनान्यत्कार्य्यंयेषांतेतथाभूताये जनामांचिन्तयन्तःसेवन्तेतेषांतुनित्याभियुक्तानांसर्वथामदेकनिष्ठानांयोगंधनादिलाभंचक्षेमञ्चतत्पालनंमोक्षम्वातैरप्रार्थितमपिअहमेववहामिप्रापयामि २२

भाषा अनुवाद।

और हमारेभक्तजनमेरीकृपाहीसेकृतार्थहोते यहकते हैं किजिनकेहमैछोडि औरकोईकामनानहींहै तेईअनन्यभक्तहमारीसेवाकरतेहैं नित्याभियुक्त सर्वदा एकमेरेमेतत्परहैंमनजिनका उनकायोगक्षेम अर्थात्योगजोधन आदिलाभऔ रक्षेमजोप्राप्तवस्तुकारक्षण सोमैकरता हूं अथवा निर्वाणजोमुक्ति यद्यपि वेनहीं चाहते परमउनकोमै अपनीइच्छासेदेता हौं २२

CC-0. In Public Domain. Digitized by eGangotri

येप्यन्यदेवताभक्तायजन्तेश्रद्धयान्विताः तेपिमामेवकौन्तेययजन्त्यविधिपूर्वकं २३
अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच नतुमामभिजानन्तितत्वेनातश्च्यवन्तिते २४

शाङ्करभाष्यं

र्वकंयजन्तइत्यर्थः २३ कस्मात्तेऽविधिपूर्वकंयजन्तइत्युच्यतेयस्मात् अहमिति अहं हिसर्वयज्ञानांश्रौतानांस्मार्त्तानाञ्चसर्वेषांयज्ञानां देवात्मत्वेनभोक्ताचप्रभुरेवचमत् स्वामिकोहियज्ञोऽधियज्ञोऽहमेवात्रेतिचोक्तंतथानतुमामभिजानन्तितत्त्वेन यथावद् तश्चाविधिपूर्वकमिष्ट्वायागफलात्च्यवन्तिते २४ यप्यन्यदेवताभक्तिमत्वेनावि

आनन्दगिरिकृतटीका

तत्तद्देवतात्मना परस्यैवात्मनःस्थित्यभ्युपगमाद्देवतान्तरपराणामपि भगवच्छरणत्वाविशेषात्तदेकनिष्ठत्वमकिञ्चित्करमितिमन्वानःशङ्कते नन्विति उक्तमङ्गीकृत्य परिहरति सत्यमित्यादिना देवतान्तरयाजिनांभगवद्याजिभ्योविशेषमाह अविधीति तद्व्याकरोति, अविधिरिति २३ ननुबस्वादित्येन्द्रादिज्ञानपूर्वकमेवतद्भक्तास्त्वद्याजिनोभवन्तीति कथमविधिपूर्वकंतेषांयजनमिति शङ्कते कस्मादिति देवतान्तरयाजिनांयजनमविधिपूर्वकमित्यत्र हेत्वर्थत्वेनश्लोकद्वयमुत्थापयति उच्यतइति सर्वेषां द्विविधानांयज्ञानांवस्वादिदेवतात्वेनाहमेवभोक्ता स्वेनान्तर्यामिरूपेण प्रभुश्चाहमेवेति प्रसिद्धमेतदितिहिशब्दः प्रभुरेवचेत्युक्तंविवृणोति मत्स्वामिकोहीति तत्पूर्वाध्यायगतवाक्यंप्रमाणयति अधियज्ञोहमिति तथापिदेवतान्तरयाजिनांयजनमविधिपूर्वकमिति कुतःसिद्धंतत्राह तथाहीति ममेवयज्ञेषुभोक्तृत्वेप्रभुत्वेचसतीतियावत् तयो

भाषा अनुवाद

जोकहो कबिचारसेतोसर्व्वदेवरूपतुमकोछोडि औरदेवताकौनहै देखो सबरूपजोतुमारेहैं तोइन्द्रादिकेपूजकलोगभीतुमारेहीउपासकहैं फेरिक्याकारणहै जोवेबिचारेउपरनीचेगमनागमनकियाकरतेहैं इसपरकहतेहैं किंहां अश्रद्धायुक्तजोइन्द्रादिदेवतोंकोआराधनाकरतेहैं सोसत्यहमारीहीसेवाहै परन्तु वैअविधिसेअर्थात्मोक्षकीदेनहारविधिकोछोडिकर पूजनकरतेहैं इसीसेपुनःपुनः संसारपावते हैं २३ पूर्व्वकथितवाक्यकोविस्तारसेकहतेहैं किदेवतास्वरूपयज्ञफलभोक्ता महींहों औरप्रभुकहेयज्ञफलदाताभीमैहींहूं परइसतरहसे वेदेवपूजकलोगयथावत्कहेठीकनहींजानतेहैं इसीसेफेरिसंसारगतिकोपावतेहैं औरसर्व्वदेवमेहमकोअन्तर्यामीरूपदेखि जोमेराअर्चनकरतेवेपुनःसंसारगतिको नहींपावतेहैं २४

CC-0. In Public Domain. Digitized by eGangotri

यान्तिदेवव्रतादेवान्पितॄन्यान्तिपितृव्रताः भूतानियान्तिभूतेज्यायान्तिमद्या जिनोपिमाम् २५

शाङ्करभाष्यं।

धिपूर्व्वकंयजन्तेतेषामपियागफलमवश्यम्भाविकंकथंयान्तीतियान्तिगच्छन्तिदेवव्रता देवेषुव्रतंनियमोभक्तिश्चयेषांतेदेवव्रतादेवान्यान्तिपितॄनग्निष्वात्तादीन्यान्तिपितृ व्रताःश्राद्धादिक्रियापराःपितृभक्ताःभूतानिविनायकमातृगणचतुर्भगिन्यादीनि या न्तिभूतेज्याभूतानांपूजकाःयान्तिमद्याजिनोमद्यजनशीलावैष्णवाःमामेवयान्तिस मानेऽप्यायासे मामेवनभजन्तेअज्ञानात्तेन ते अल्पफलभाजोभवन्तीत्यर्थः २५

आनन्दगिरिकृतटीका।

र्भोक्तृप्रभ्वोर्भावस्तत्वंतेनभोक्तृत्वेनप्रभुत्वेनचमांयथावद्यतोनजानन्ति अतोभोक्तृत्वा दिनाममाज्ञानान्मयिअनर्पितकर्म्माणश्चावर्त्तन्तेकर्म्मफलादित्याह अतश्चेति २४

यद्यन्यदेवताभक्ताभगवत्तत्त्वाज्ञानात्कर्म्मफलाच्चप्रवन्तेतर्हितेषांदेवतायजनम किञ्चित्करमित्याशंक्याह येप्रीति देवतान्तरयाजिनामनाद्यत्तिफलाभावेपि तत्तद्दे वतायागानुरूपफलप्राप्तिप्रधौव्यान्नतदाकिञ्चित्करमित्यर्थः देवतान्तरयाजिनामावश्य कंतत्फलमाशङ्कापूर्व्वकमुदाहरति कथमित्यादिना नियमोवल्युपहारप्रदक्षिणप्र

स्वामिकृतटीका

ननुचत्वद्यतिरेकेणवस्तुतोदेवतान्तरस्याभावादिन्द्रादिसेविनोऽपि त्वद्भक्ताएवेति कथंतेगतागतंलभेरंस्तत्राह येप्रीति अद्वयोपेताःसन्तोयेजनाअन्यदेवता इन्द्रादिरू पायजन्तेतेऽपिमामेवयजन्तीतिसत्यं किन्तु अविधिपूर्व्वकंमोक्षप्रापकंविधिंविनायज न्तिअतस्तेपुनरावर्त्तन्ते २३ एतदेवविवृणोति अहमिति सर्व्वेषांयज्ञानांतत्तद्देवता रूपेणाहमेवभोक्ताप्रभुश्चस्वामीफलदाताचाहमेवेत्यर्थः एवंभूतंमांतेतत्वेन यथावन्ना भिजानन्ति अतश्चयन्तिप्रच्यवन्तिपुनरावर्त्तन्तेयेतुसर्व्वदेवतासु मामेवान्तर्यामि नंपश्यन्तोयजन्ति तेतुनावर्त्तन्ते २४

भाषा अनुवाद

अबवहीउक्तवाक्यकाप्रतिपादनकरतेहैं किजोदेवव्रतकहेइन्द्रादिदेवउपासक हैं वेलोग देवलोककोजाते औपितृउपासनाकरनेवाले पितृलोककोजाते तथा भूतसेवाकारी अन्तमेंभूतजोनिपावतेहैं औरजोमेरीपूजाकरैंहै सो मद्याजी अक्षय परमानन्दस्वरूप हमकोप्राप्तहोतेहैं फेरिगमनागमनहोतानहीं २५

CC-0. In Public Domain. Digitized by eGangotri

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः २६

शाङ्करभाष्यं।

नकेवलं मद्भक्तानामनावृत्तिलक्षणमनन्तफलमुक्तं सुखाराधनञ्चाहं कथं पत्रमिति पत्रं पुष्पं फलं तोयमुदकं यो मे मह्यं भक्त्या प्रयच्छति तदहं पत्रादिभक्त्युपहृतं भक्तिपूर्वकं प्रापितं भक्त्युपहृतमश्नामि गृह्णामि प्रयतात्मनः शुद्धबुद्धेः २६ यतएवमतः यत् करोसीति यत् करोषि यदाचरसि शास्त्रीयं कर्म्म स्वतः प्राप्तं यदश्नासि यत् खादसि यज्जुहोषि हवनं निर्वर्त्तयसि औतं स्मार्त्तं वा यत् ददासि प्रयच्छसि ब्राह्मणादिभ्योहिरण्मयपात्रत्वादि यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणं मत्समर्पणं २७

आनन्दगिरिकृतटीका।

ह्रीभावादित्यर्थः देवतान्तराराधनस्यान्तवत् फलमुक्त्वा भगवदाराधनस्यानन्त फलत्वमाह यान्तीति भगवदाराधनस्यानन्तफलत्वे देवतान्तराराधनंत्यक्त्वा भगवदाराधनमेवयुक्तमायाससाध्यात्फलातिरेकाच्चेत्यत्राशंक्याह समानेपीति अज्ञानाधीनत्वेनदेवतान्तराराधनवतां फलतोन्यूनतांदर्शयति तेनेति २५ अनन्तफलत्वाद्भगवदाराधनमेवकर्त्तव्यमित्युक्तं सुकरत्वाच्चतथेत्याह नकेवलमिति भगवदाराधनस्य

स्वामिकृतटीका।

तदेवोपपादयति यान्तीति देवेष्विन्द्रादिषुव्रतंनियमोयेषां तेऽन्तवतोदेवान्यान्तिअतःपुनरावर्त्तन्तेपितृव्रतं येषांश्राद्धादिक्रियापराणांतेपितॄन्यान्ति भूतेषुविनायकमातृगणादिषुद्रव्ययजयेषां तेभूतेज्याभूतानियान्ति मांयष्टुंशीलंयेषांतेमद्याजिनस्तेमामक्षयं परमानन्दस्वरूपं यान्ति २५ तदेवंस्वभक्तानामक्षयफलमुक्त्वाऽनायासत्वञ्चस्वभक्तेर्दर्शयति पत्रमिति पत्रपुष्पादिमात्रमपिमह्यं भक्त्यायःप्रयच्छति तस्यप्रयतात्मनःशुद्धचित्तस्यनिष्कामभक्तस्य तत्पत्रपुष्पादिकंभक्त्यातेनोपहृतंसमर्पितमहमश्नामिप्रीत्यागृह्णामि नहिमहाविभूतिपतेःपरमेश्वरस्यममक्षुद्रदेवतानामिववस्तुवित्तसाध्ययागादिभिःपरितोषःस्यात्किञ्चभक्तिमात्रेणअतोभक्तेनसमर्पितंयत् किञ्चित् पत्रादिमात्रमपितदनुग्रहार्थमेवाश्नामीतिभावः २६

भाषाअनुवाद

अबस्वभक्तकोअक्षयफलत्वऔस्वभक्तिकासुलभत्वदेखावतें हैं जोमनुष्यभक्तिपूर्वकपत्रपुष्पफलजलमात्रभी हमैदेयहै वहविमलचित्तभक्तजनका प्रीतिसेदियाहुआपुष्पादि मैअति प्रसन्नहोय ग्रहणकरताहूं इसकाभावयहहै किऔरदेवकेसमानवडीपूजासामग्री हमैनचाहिये हमकेवलभावभक्तिसे प्रसन्नहोतें हैं २६

CC-0. In Public Domain. Digitized by eGangotri

यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौन्तेयतत्कुरुष्वमदर्पणं २७

शाङ्करभाष्यं

एवंकुर्व्वंस्त्वयङ्गवति तच्छृणु शुभेति शुभाशुभफलैरेवंशुभाशुभेइष्टानिष्टफलेये षांतानिशुभाशुभफलानिकर्माणि तैःशुभाशुभफलैःकर्मबन्धनैरेवंमत्समर्पणंकुर्व्वन् मोक्ष्यसेसोयंसंन्यासयोगोनामसंन्यासश्चासौमत्समर्पणतयाकर्मकर्त्तृत्वाद्योगश्चासा वितितेनसंन्यासयोगेनयुक्तआत्मान्तःकरणंयस्यतव सत्वंसंन्यासयोगयुक्तात्मासन्वि मुक्तःकर्मबन्धनैर्जीवन्नेव पतितेचास्मिन्शरीरे मामुपेष्यस्यागमिष्यसि २८

आनन्दगिरिकृतटीका ।

सुकरत्वमेवप्रश्नपूर्व्वकंप्रपञ्चयति कथमित्यादिना यद्विपुष्पादिकंभक्तिपूर्व्वकंमदर्थमर्पि तंतेनायंशुद्धचेताःतपस्वीमामाराधयतीत्यहमबधारयामीत्याह फलमित्यादिना २९ तदाराधनस्यसुकरत्वेतदेवावश्यकमित्याह यतइति स्वतःशास्त्राद्गुरोःप्राप्तंगमनादी तियावत् यदश्नासि यंकिञ्चिद्भोगंभुंक्षे इदंनस्वतस्त्वंवारयति औतमिति मत्स मर्पणंतत्सर्व्वंमह्यंसमर्पयेत्यर्थः २७ किमतोभवति तदाह एवमिति भगवदर्प णबुद्ध्यासर्व्वकर्मकुर्वतोजीवन्मुक्तस्यप्रारब्धकर्मावसानेविदेहकैवल्यमावश्यकमित्याह शुभेत्यादिना भगवदर्पणकारणान्मुक्तिः संन्यासयोगाच्चेति साधनद्वयशङ्कांशात यति सोयमिति २८

स्वामिकृतटीका ।

नचफलपुष्पादिकमपियत्किञ्चार्थपशुसोमादिद्रव्यवन्मदर्थमेवोद्यमैरापाद्यसमर्प णीयंकिन्तर्हियत्करोसीति स्वभावतःशास्त्रतोवायत्किञ्चित् कर्मकरोषि तथाय दश्नासियज्जुहोषि यद्ददासि यच्चतपस्यसितपःकरोषि तत्सर्व्वंमय्यर्पितंयथाभवति एवंकुरुष्व २७ एवञ्च यत् फलंप्राप्स्यसितच्छृणु इत्याह शुभाशुभेति एवं कुर्व्वन् कर्मबन्धनैःकर्मनिमित्तैरिष्टानिष्टफलैर्मुक्तोभविष्यसि कर्मणांमयिसमर्पित त्वेनतवतत्फलसम्बन्धानुपपत्तेः तत्रविमुक्तःसन्संन्यासयोगयुक्तात्मासंन्यासःकर्मव दर्पणंसएवयोगस्तेनयुक्तआत्माचित्तंयस्य तथाभूतस्त्वं मांप्राप्स्यसीत्यर्थः २८

भाषा अनुवाद ।

जिसलियेमैकेवलभावभक्तिसेभक्तपरप्रसन्नहोताहूं इससे हेकौन्तेयकुन्तीपुत्र जो कुछकर्मकरो याआहारकरो यायज्ञकरो यादानकरो सोसबमदर्पणअर्थात् मेरे कोसमर्पणकरो तोवहसबअक्षयफलहोगा औरदोषकिसीतरहकानलगैगा २७

CC-0. In Public Domain. Digitized by eGangotri

शुभाशुभफलैरेवंमोक्ष्यसेकर्मबन्धनैः संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि २८
समोहंसर्वभूतेषुनमेद्वेष्योऽस्तिनप्रियः येभजन्तितुमांभक्त्यामयितेतेषुचाप्यहं २९

शाङ्करभाष्यं

रागद्वेषवान्तर्हिभगवान्यतोभक्ताननुगृह्णाति नेतरानीति तन्न समोहमिति समःतुल्योहंसर्वभूतेषुनमेद्वेष्योऽस्तिनप्रियःअग्निवदहंदूरस्थानांयथाग्निःशीतंनापनयति समीपमुपसर्पतामपनयति तथाहंभक्ताननुगृह्णामिनेतरान् येभजन्तितुमामीश्वरंभक्त्यामयिते स्वभावतएव नममरागनिमित्तंमयिवर्त्तन्ते तेषुचाप्यहं स्वभावत एववर्त्ते नेतरेषुनैतावतातेषुद्वेषोमम २९

आनन्दगिरिकृतटीका

भगवतोरागद्वेषवत्त्वेनानीश्वरत्वमाशंक्यपरिहरति रागेत्यादिना तर्हि भगवन्न जनमर्चाञ्चित्करमित्याशंक्याह अग्निवदिति तत्प्रपञ्चयति यथेति भक्तानभक्तां श्चानुगृह्णतोऽननुगृह्णतश्चभगवतोनकथंरागादिमत्त्वमित्याशंक्याह येभजन्तीति ये हिवर्णाश्रमादिधर्म्मामांजन्ति तेतेनैवभजनेनाचिन्त्यमात्मेश्वरं परिशुद्धबुद्धयोमयि मत्समीपेवर्त्तन्ते मदभिव्यक्तियोग्यचित्ताभवन्ति तुशब्देस्वविशेषस्यद्योतनार्थःतेषुच समीपेसमत्वंतेषामहमपिस्वभावतोवर्त्तमानस्तदनुग्रहपरोभवामि यथाव्यापकमपि सावित्रतेजःस्वच्छेदर्पणादौप्रतिफलति तथापरमेश्वरोऽवर्जनीयतयाभक्तिनिरस्तस मस्तकलुषसत्वेषुपुरुषेषुसन्निधत्ते दैवींप्रकृतिमाश्रितानामजन्तीत्युक्त्वादित्यर्थः २९

भाषा अनुवाद

इसप्रकारआचरणकरनेसेजोफलहोगा सोसुनोकिउक्तप्रकारसेकर्मसकलभगवत्समर्पणकरनेसे कर्मबन्धनअर्थात् कर्मजनितइष्टअनिष्टफलप्राप्तिसेवंचिरहोगे औरमेरेसेसमर्पितजोकर्मसन्यासयोगउसीसेयुक्तचित्तहोके तुम हमकोनिःसन्देह प्राप्तहोउगे २८ भलाजोमक्तोंकोइसभांति मुक्तकरतेहो औअभक्तोंकोनहींतो क्या तुमारेमीप्रीति बिरोधकृतविषमस्वभावहै इसकेउपरअपनेभावकाअभावक हतेहैं किसकालभूतमे हमसमानरूपसेहैं इसीसेहमारेनकोईप्रियऔरनअप्रिय है औरजोहमारीभक्तिकरताहै सोहमारेमेवर्त्तमानहै औरमैभीउसपरअनुग्रह करतारहताहूं इसकाभावार्थयहहै किजैसे अग्निकेसेवनकरनेवालेका अन्धकार औशीतादिदुखकानिवारणकारीअग्निमेंविषमभावनहींहै औरजैसेकल्पवृक्षअप नेसेवककोसकलपदार्थदेताहै तोइनकोप्रियअप्रियकोईनहीं परन्तुफलजोहै सो भक्तहीकोहै इससेभक्तिहीकी महिमा यहसबजानो २९

CC-0. In Public Domain. Digitized by eGangotri

अपिचेत्सुदुराचारोभजतेमामनन्यभाक् साधुरेवसमन्तव्यःसम्यग्व्यवसितोहिसः ३०
क्षिप्रंभवतिधर्मात्माशश्वच्छान्तिंनिगच्छति कौन्तेयप्रतिजानीहिनमेभक्तःप्रणश्यति ३१

शाङ्करभाष्यं ।

भगवद्भक्तेर्माहात्म्यं अपिचेदिति अपिचेत्यद्यपिसुष्ठुदुराचारः सुदुराचारोऽतीवकुत्सिताचारोपिभजतेमांअनन्यभाक्नान्यभक्तिःसन् साधुरेवस मन्तव्यःज्ञातव्यःसम्यग्यथावत्व्यवसितोहियस्मात्साधुनिश्चयःसः ३०

आनन्दगिरिकृतटीका

प्रकृतंभगवद्भक्तिंस्तुवन्प्रापीयसामपितत्राधिकारोस्तीति सूचयति भगवद्भ गृह्यत्तएवभगवद्भक्तोज्ञातव्यइत्यत्रहेतुमाह सम्यगिति ३० हेत्वर्थमेवप्रपञ्चयति उ त्सृज्येति भगवन्तं भजमानस्यकथंदुराचारतापरित्यक्ता भवतीत्याशंक्याह क्षिप्रमि

स्वामिकृतटीका ।

यदितुभक्तेभ्यएवमोक्षंददासिनाभक्तेभ्यस्तर्हितवापिकिंरागद्वेषादिकृतंवैषम्यमस्ति नेत्याह समोहमिति सर्वेषुभूतेष्वहंसमःअतोममप्रियश्चद्वेष्यश्चनास्त्येव एवंसत्यपिये मांभजन्ति तेभक्त्यामयिवर्त्तन्ते अहमपितेष्वनुग्राहकतयावर्त्ते अयंभावःयथाग्नेःस्व सेवकेष्वेवतमःशीतादिदुःखभयाकुर्वतोऽपिनवैषम्यं यथावाकल्पवृक्षस्यतथैव भक्तप क्षपातिनोऽपिमम वैषम्यंनास्त्येव किन्तुभक्तेरेवायंमहिमेति २९

भाषा अनुवाद ।

और अपनीभक्तिकाअपूर्वअचिन्त्यप्रभावदेखावतेहैं कि अत्यन्तदुराचारकहेऔर औरदेवताभीवासुदेवहीहैं इसरूपएकबुद्धिहोय यद्यपिऔरोंकीभक्तिनकरके केवलपरमेश्वरस्वरूपमहींकोभजैहै तौभीसोसाधुओंश्रेष्ठहै क्योंकिमेरेमेउत्तमनि श्चयतोकियाहै ३० औसामनुष्यकिसप्रकारउत्तमहै इसशङ्कापरकहतेहैं कि अ त्यन्तदुराचारीभीहमारीभक्तिकरकेस्वधर्म्मचित्तहोताहै अर्थात्चित्तकोतरङ्गनिष्ट त्तहोपरमेश्वरमेंनिष्ठाअवश्यपावताहै औतुर्त्तधर्म्मात्माहोताऔरशान्तिकोप्राप्तहो ताहै परइसबातकोकुतर्ककर्कशवादीलोगनमानैंगे इसशङ्कासेव्याकुलअर्जुनको भगवानउत्साहदेतेहैं किहेकौन्तेय नगारावजायविवादकारीलोगोंकीसभामेंजा यहाथ उठाय तुमनिःशङ्कहोयहप्रतिज्ञाकरो किपरमेश्वरकेभक्तअतिदुराचारहो नेसेभी नष्टनहींहोतेवस्तुतःकृतार्थहोतेहैं ऐसोप्रतिज्ञाकरनेपर तुमारोजयऔरवेन कुतर्कहोयतुमकोगुरूकरमानैंगे सोतुमयहजानो किमेरेभक्तका नाशनहींहै ३१

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

उत्सृज्यचवाह्यादुराचारतामन्तःसम्यग्व्यवसायसामर्थ्यात् क्षिप्रमिति क्षिप्रं शीघ्रं भवतिधर्मात्माधर्मचित्तएवशश्वत्नित्यंशांन्तिञ्चोपशमंनिगच्छति प्राप्नोति शृणु परमार्थंकौन्तेयप्रतिजानीहि निश्चितांप्रतिज्ञांकुरु नमेममभक्तःमयिसमर्पितान्तरात्मा मद्भक्तोनप्रणश्यतीति ३१ किञ्च मांहीति मांहियस्मात्पार्थव्यपाश्रित्यमामाश्रित्याश्रयत्वेनगृहीत्वायेपिस्युर्भवेयुःपापयोनयःपापानियोनिःयेषांतेपापजन्मानःकेत इत्याह स्त्रियोवैश्यास्तथाशूद्रास्तेपियान्तिगच्छन्ति परांगतिंप्रकृष्टांगतिं ३२

किंपुनरिति किंपुनर्ब्राह्मणाःपुण्यापुण्ययोनयःभक्ताराजर्षयस्तथाराजानश्चेक्ष्वाकवः

आनन्दगिरिकृतटीका

ति सति दुराचारेकथंधर्मचित्तत्वंतदाह शश्वदिति उपशमो दुराचरादुपरमः किमितितभक्तस्यदुराचारादुपरतिरुच्यते दुराचारोपहतचेतस्त्वाकिमित्यतोन नंक्ष्यतीत्याशंक्यःह शृणुविति ३१ इतश्चभगवद्भक्तिर्विधातव्येत्याह किञ्चेति न मेभक्तःप्रणश्यतीत्यत्रहेतुमाचष्टेब्राह्मणो भक्त्याधिकारे जातिनियमोनास्तीत्याह मांहीति ३२

स्वामिकृतटीका

अपिचमद्भक्तेरेवायमभितर्क्यःप्रभावइतिदर्शयन्नाह अपिचेदिति अत्यन्तदुराचारोऽपियद्यप्यष्टयक्त्वेनष्टयग्देवतापिवासुदेवएवेतिबुद्ध्यादेवतान्तरभक्तिमकुर्वन्मामेवपरमेश्वरंभजते तर्हिसाधुःश्रेष्टएवसमन्तव्यःयतोऽसौसम्यग्व्यवसितःशोभनमध्यवसायंकृतवान् ३० ननुकथंसमीचीनाध्यवसायमात्रेण साधुर्मन्तव्यस्तत्राह क्षिप्रमिति सुदुराचारोऽपिमांभजन्शीघ्रं धर्मचित्तोभवति ततश्चशश्वच्छान्तिंचित्तोपशमरूपांपरमेश्वरनिष्ठांनितरांगच्छति प्राप्नोति कुतर्ककर्कशवादिनोनैतन्मन्येरन्नितिशङ्काकुलमर्जुनं प्रोत्साहयति हेकौन्तेय षट्हादिमहाघोषपूर्वकं विवदमानानांसभांगत्वावाऽऽसुत्क्षिप्यनिःशङ्कं प्रतिजानीहि प्रतिज्ञांकुरु कथंमे परमेश्वरस्यभक्तःसुदुराचारोऽपिनप्रणश्यति अपितुकृतार्थएवभवतीति ततश्चैते तत्प्रौढिविजृम्भात्विध्वंसितकुतर्काःसन्तोनिःसंशयंत्वामेवगुरुत्वेनाश्रयेरन् ३१

स्वाचारस्त्वष्टंमद्भक्तिःपवित्रीकरोतीति किमत्रचित्रं यतोमद्भक्तिर्दुष्कुलानष्यनधिकारिणोऽपिसंसारान्मोचयतीत्याह मांहीति येऽपिपापयोनयःस्युर्निकृष्टजन्मानोऽन्त्यजादयोभवेयुःयेऽपिवैश्याःकेवलंकृष्यादिनिरताःअतःस्त्रियःशूद्राश्चाध्ययनादिरहितास्तेऽपि मांव्यपाश्रित्य संसेव्य परांगतिंयान्ति हिनिश्चितं ३२

CC-0. In Public Domain. Digitized by eGangotri

मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयःस्त्रियोवैश्यास्तथाशूद्रास्तेपियान्तिपरांगतिं ३२

शाङ्करभाष्यं।

यस्मेति राजर्षयःयतएवमतोऽनित्यंचक्षणभङ्गुरमसुखंचसुखवर्जितंमनुष्यलोकंप्राप्यपुरुषार्थसाधनं दुर्लभमनुष्यत्वं लब्ध्वा भजस्व सेवस्व मां ३२

कथंमन्मनाइति मयिमनोयस्यतवसत्वंमन्मनाभव तथामद्भक्तोभव मद्याजीमद्यजनशीलोभव मामेवचनमस्कुरु मामेवेश्वरमेष्यसिआगमिष्यसि युक्त्वा समाधायचि

आनन्दगिरिकृतटीका।

यदिपापयोनिःपापाचारश्चत्वद्भक्त्यापरांगतिंगच्छति तर्हिकिमुतजातिनिमित्तेनसन्यासादिना किम्वासद्वृत्तेनेत्याशंक्याह किंपुनरिति उत्तमजातिमतांब्राह्मणादीनामतिशयेनपरागतिर्यतोलभ्यते अतोभगवद्भजनंतैःएकान्तेनविधातव्यमित्याह यतइति मनुष्यदेहातिरिक्तेषुपश्वादिदेहेषुभगवद्भजनयोग्यताभावात् प्राप्तेमनुष्यत्वेतद्भजनेप्रयतितव्यंइत्याह दुर्लभमिति ३३ भगवद्भक्तेरित्यस्मावंष्टच्छति कथमिति ईश्वरभजनेइति कर्त्तव्यतांदर्शयति मन्मनाइति एवंभगवन्तंभजमानस्यममकिंस्यादित्यादिशंक्याह मामेवेति समाधायभगवत्येवेति शेषः एवमात्मानमित्येतद्विवृणोति अहंहीति अहमेवपरमयनंतवेति मत्परायणस्तथाभूतःमामेवात्मानमेष्यसीति सम्बन्धः तदेवंमध्यमानांध्येयंनिरूप्य नवमेनाधमानामाराध्याभिधानमुखेन निजेनपारमार्थिकेनरूपेणप्रत्युक्तेनज्ञानं परमेश्वरस्यपरमाराधनमित्यभिधतासोपाधिकंतत्पदवाच्यं निरूपाधिकञ्च तत्पदलक्ष्यं व्याख्यातं ३४ इति ९

भाषाअनुवाद

अत्यन्ताचारभ्रष्टोंकोभीजोमेरीभक्तिपवित्रकरतीहैइसमेंक्याआश्चर्य्यहैक्यों कि देखोमेरीभक्तिअनधिकारीयोंकोभी संसारसेमुक्तकरतीहै तोदुराचारीकोमुक्तिमेंक्यासन्देहहै सोई कहतेहैं किकोईनिकृष्टजन्मचाण्डालआदिक्योंनहो और स्त्रीमेंभीवेश्याक्योंनहो वेश्याहीकोवैश्याकहतेस्वार्थमेंअणप्रत्ययकरनेसेवैश्याहोताहै औरशूद्र येभीहमारीभजनकरिउत्तमगतिकोप्राप्त होते हैं यहनिश्चयजानोजो कोई वैश्याकाअर्थवणिकजातिपरलगाते उनकीभूलकितनीवडीहै किवेदब्रह्मकेअधिकारी तथासंध्याउपासनाकर्म्मकेअधिकारी तथायज्ञउपवीतधारी द्विजातिशब्दसेप्रसिद्ध वैश्य जोअनधिकारीहैंतोब्राह्मणक्षत्रीभीतैसेहीहैं मनमानाअर्थकरोवेदशास्त्रक्याकरनाहै परमाप्यकारआनन्दगिरि श्रीधरस्वामी वहीअर्थकियाहै ३२

CC-0. In Public Domain. Digitized by eGangotri

किंपुनर्ब्राह्मणाःपुण्याभक्तोराजर्षयस्तथा अनित्यमसुखंलोकमिमंप्राप्यभजस्वमां ३३
मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणः ३४
इति श्रीभगवद्गीतायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेराजगुह्यनामनवमोध्यायः ९

शाङ्करभाष्यं

त्तमेवमात्मानंमामेवमहंहिसर्व्वेषांभूतानांआत्मापराचगतिःपरमयनं तंमामेवम्भूतंए
ष्यसीत्यतीतेनपदेनसम्बन्धः मत्परायणःसन्नित्यर्थः ३४ इति भाष्येनवमोध्यायः ९

स्वामिकृतटीका

यदेवंतदासत्कुलाःसदाचाराश्चमद्भक्ताःपरांगतिं यान्तीति किंवक्तमित्याह किं
पुनरिति पुण्याःसुकृतिनोब्राह्मणाःतथाराजानश्चते ऋषयश्चेति एवंभूताश्चपरांग
तिं यान्तीति किंवक्तव्यमित्यर्थः अतस्त्वंइमंराजर्षिरूपंदेहंप्राप्यलब्ध्वामांभजस्व कि
ञ्च अनित्यमध्रुवंअसुखंसुखरहितञ्चेमंमर्त्यलोकंप्राप्य अनित्यत्वादिलम्बमकुर्व्वन्
असुखत्वाच्चसुखार्थंसुद्यमंहित्वा मामेवभजस्वेत्यर्थः ३३ भजनप्रकरंदर्शयन्नुप
संहरति मन्मनाइति मय्येवमनोयस्यसमन्यानास्त्वंभवतथाममैवभक्तःसेवकोभव
मद्याजीमत्पूजनशीलोभव मामेवनमस्कुरु एवमेभिःप्रकारैर्मत्परायणःसन्नात्मानं
मनोमययुक्त्वासमाधाय मामेवपरमानन्दरूपमेष्यसिप्राप्स्यसिनिजमैश्वर्यमाश्चर्यं
भक्तेश्चाद्भुतवैभवं नवमेराजगुह्याख्येकृष्णयाऽवोचदच्युतः ३४
इति नवमोध्यायः ९

भाषा अनुवाद

अबकिमेरीभक्तिजोअनधिकारीयोंकोंसुकिदेतीतोफेरिब्राह्मणकहेब्राह्मणआदि
तीनोवर्णजोब्राह्मणक्षत्रीवैश्यपवित्रऔमेरेभक्तउनकीमुक्तिमेक्यासंदेहहै तिसमेरा
जर्षिअर्थात्राजवंशक्षत्रियराजालोगजोदशदिक्यालोंकेअंशसेप्रगटहैं उनकोक्या
कहनाहै सोतुमराजवंशहौ इसअनित्यसंसारसुखकोत्यागकरिकेइहलोककहेनर
देहपायहमकोभजो ३३ भजनप्रकारदेखावतेकहतेहैंकिमेरेमेंजिसकामनहै
ऐसेतुममन्मनाहोउ औरमेरेहीभक्तहोउऔमेरीहीपूजाकरोऔरमैहींकोप्रणाम
करोइसीप्रकारसेमत्परायणहोके आत्माजोमनतिसकोमेरेमेयोगकहेलगायके प
रमआनन्दरूपमेरेस्वरूपकोप्राप्तहोउगे इसनवयेंअध्यायमेंअपनीभक्तिकाअद्भुत
प्रभावराजयोगनामभगवानने प्रकाशकियाहै ३४ इति भाषायांनवमोध्यायः ९

CC-0. In Public Domain. Digitized by eGangotri

योमामजनादिञ्चवेत्तिलोकमहेश्वरं असंमूढ़ःसमर्त्येषु सर्व्वपापैःप्रमुच्यते ३
वुद्धिर्ज्ञानमसंमोहःक्षमासत्यंदमःशमः सुखंदुःखंभवोभावोभयञ्चाभयमेवच ४

शाङ्करभाष्यम्।

सर्वप्रकारैः २ किञ्च योमामिति योमामजमनादिञ्चयस्मादहमादिर्हिदेवानांमह र्षीणाञ्चनममान्यःआदिर्विद्यतेऽहमजोऽनादिश्चअनादित्वमजत्वेहेतुस्तं मामजमना दिञ्चयोवेत्तिविजानाति लोकमहेश्वरंलोकानांमहान्तमीश्वरमसंमूढःसंमोहवर्जि तःसमर्त्वेषुमनुष्येषुसर्वपापैःसर्वैःपापैःमतिपूर्व्वामतिपूर्वकृतैःप्रमुच्यते प्रमोक्ष्यते ३

आनन्दगिरिकृतटीका

प्रभावंविदुरित्यर्थः २ इतश्चकश्चिदेवभगवत्प्रभावंवेत्तीत्याह किञ्चेति कोसौ प्र भावोभगवतो यंवहवोनविदुरित्यपेक्षायांपारमार्थिकंप्रभावंतदधीनफलञ्च कथय ति योमामिति पदद्वयांपौनरुक्त्यमाह अनादित्वमिति ३

भगवतोलोकमहेश्वरत्वेहेत्वन्तरमाह इतश्चेति मुमुक्षुभिराराध्यत्वसिद्धये व न्धमोक्षसाधनंपुरस्कृत्याशेषजगत्प्रकृत्यधिष्ठातृत्वलक्षणंसोपाधिकं भगवत्प्रभावम

स्वामिकृतटीका

प्रकृष्टंफलंजन्मरहितस्यापिनानाविभूतिभिराविर्भावंसुरगणापिमहर्षयोपिभृग्वा दयोनजानन्ति तत्रहेतुःअहंहिदेवानांमहर्षीणाञ्चादिःकारणंसर्व्वशःसर्वैःप्रकारै रुत्पादकत्वेनवुद्ध्यादिप्रवर्त्तकत्वेनच अतोमदनुग्रहंविनामांकेऽपिनजानन्तीत्यर्थः २ एवंभूतात्मज्ञानेफलमाह योमामिति सर्वकारणत्वादेवनविद्यतेआदिःकारणं यस्य तमनादिं अतएवाजंजन्मशून्यंलोकानांमहेश्वरञ्चमां योवेत्ति समनुष्येषु सम्मोहर हितःसन् सर्वपापैःप्रमुच्यते ३ लोकमहेश्वरतांस्फुटयति वुद्धिरितित्रिभिः वुद्धिः

भाषाअनुवाद

कोईकारणनहींहै ऐसेअनादिऔजन्मरहित सकललोककेमहेश्वर जोमै सोमुझे जोकोईजानैहै तोमनुष्योंकेमध्यमेवहीअच्छीतरह मोहरहितहोके समस्त पापों सेछूटिजायहै ३

अवतीनश्लोकसे अपनीलोकमहेश्वरताप्रकाशकरतेहैं किवुद्धिकहेसारअसार वस्तुविचारकीचातुरी औज्ञानतथाअसंमोहऔक्षमासत्यवचनऔरदमकहेबाहर कीइन्द्रियोंकादमनऔशमकहेमनकानिग्रहऔसुखदुखजन्मनाशऔभयअभय ये सव हमसेहोतेहैं ४ औरअहिंशाशमताकहेप्रीतिविरोधकाअभावऔतुष्टिकहे

CC-0. In Public Domain. Digitized by eGangotri

अहिंसासमतातुष्टिस्तपोदानंयशोऽयशः भवन्तिभावाभूतानांमत्तएवपृथग्विधाः ५

शाङ्करभाष्यं

इतश्चाहंमहेश्वरोलोकानांबुद्धिरिति बुद्धिरन्तःकरणस्य सूक्ष्मादयर्थावबोधनसामर्थ्यं तद्वन्तं बुद्धिमानितिहिवदन्तिज्ञानमात्मादिपदार्थानामवबोधःअसंमोहःप्रत्युपन्नेषुवोद्व्येषुद्रव्येषुविवेकपूर्विकाप्रवृत्तिःक्षमा आक्रुष्टस्यताडितस्यवाअविक्षतचित्तता सत्यंयथादृष्टस्ययथाश्रुतस्यचात्मानुभवस्यपरबुद्धिसंक्रान्तये तथैवोच्चार्यमाणा वाक्सत्यमुच्यतेदमोबाह्येन्द्रियोपशमःशमोऽन्तःकरणस्योपशमःसुखंआह्लादोदुःखं सन्तापोभवउद्भवःअभावस्तद्विपर्ययःभयञ्चत्रासोऽभयमेवचतद्विपरीतं ४ अहिंसेति अहिंसाअपीडाप्राणिनां समतासमचित्ततातुष्टिःसन्तोषःपर्याप्तबुद्धिर्लाभेषु तपइन्द्रियसंयमपूर्वकंशरीरपीडनंदानंयथाशक्तिसंविभागःयशोधर्म्मनिमित्ताकीर्त्तिः अयशस्वधर्म्मनिमित्ताकीर्त्तिःभवन्तिभावायथोक्तावुद्यादयोभूतानांप्राणिनांमत्तएवेश्वरात् पृथग्विधानानाविधा स्वकर्म्मानुरूपेण ५

आनन्दगिरिकृतटीका।

भिधत्ते बुद्धिरिति सूक्ष्मादीत्यादिशब्देनसूक्ष्मतरःसूक्ष्मतमश्चार्थोगृह्यते उक्तसामर्थ्यंबुद्धिरित्यस्मिन्नर्थेप्रसिद्धिंप्रमाणयति तद्वन्तमिति आत्मादीतितदवबोधवन्तंहि ज्ञानिनंवदन्तिअन्तःकरणस्योपशमोविषयेभ्योव्यावृत्तिरितिशेषः ४

यथाशक्तीति पात्रेश्रद्धयास्वशक्तिमनतिक्रम्यार्थानादेशकालानुगुण्येनप्रतिपादनमित्यर्थः उक्तानांबुद्ध्यादीनांसाध्ययाणामीश्वरादुत्पत्तिंप्रतिजानीतेभवन्तीति नानाविधत्वेहेतुमाह स्वकर्म्मेति ५

स्वामिकृतटीका

सारासारविवेकनैपुण्यंज्ञानमात्मविषयंअसम्मोहोव्याकुलत्वाभावः क्षमासहिष्णुत्वं सत्यंयथार्थभाषणं दमोबाह्येन्द्रियसंयमःशमोऽन्तःकरणसंयमः सुखमनुकूलसंवेद्नीयंदुःखञ्चतद्विपरीतंभवउद्भवःअभावस्तद्विपरीतःभयंत्रासःअभयंतद्विपरीतंअस्य श्लोकस्यमत्तएवभवन्तीत्युत्तरेणान्वयः ४ किञ्च अहिंसेति अहिंसापरपीडानि

भाषाअनुवाद

वेमांगेयथालाभसन्तोषऔतपस्याजो १७ अध्यायमेकहैंगे औरदानकहेस्वधर्म्मसेउपार्जितधनसत्यात्मकोदेना औरयशअयशयेनानाप्रकार के भाव सबहमहीसे उत्पन्नहोते हैं ५

CC-0. In Public Domain. Digitized by eGangotri

महर्षयःसप्तपूर्व्वेचत्वारोमनवस्तथा मद्भावामानसाजातायेषांलोकइमाःप्रजाः ६

शाङ्करभाष्यं

किञ्चमहर्षयइति महर्षयःसप्तभृग्वादयःपूर्वेऽतीतकालसम्बन्धिनश्चत्वारो मनवस्तथासावर्णाइति प्रसिद्धाःते चमद्भावामद्भावना वैष्णवेनवासामर्थेनोपेता मानसामनसैवोत्पादितामया यताउत्पन्नायेषांमनूनांमहर्षीणाञ्च सृष्टिर्लोकइमाःस्थाव

आनन्दगिरिकृतटीका

कथञ्चिदपितेषामात्मातिरेकेणाभावात् मत्तएवेत्युक्तं न केवलंभगवतः सर्व्वप्रकृतित्वमेव किन्तुसर्वज्ञत्वसर्व्वेश्वरत्वरूपमधिष्ठातृत्वमपीत्याह किञ्चेति आद्याभृग्वादयोवशिष्ठान्ताःसर्वज्ञाविद्यासंप्रदायप्रवर्त्तकास्तथेति मनूनामपिपूर्व्वत्वेनाद्यत्वमनुकृष्यते केते मनवस्तत्राह सावर्णाइति इतिप्रसिद्धाःपौराणेषुप्रजानांपालकाःस्वयमीश्वराश्चेतिशेषः महर्षीणांमनूमनाञ्चतुल्यंविशेषणं तेचेति मयिसर्वज्ञेसर्व्वेश्वरे गताभावनायेषांतेतथा भावनाफलमाह वैष्णवेनेति वैष्णव्याशक्त्याधिष्ठितत्वेनज्ञानैश्वर्यवन्तइत्यर्थः तेषांजन्मनोवैशिष्ट्यमाचष्टेमानसाइति मन्वादीनेवविशिनष्टि येषामिति विद्ययाजन्मनाचसन्ततिभूतामन्वादीनामस्मिन्लोकेसर्व्वाःप्रजाइत्यर्थः ६

स्वामिकृतटीका ।

वृत्तिःममतारागद्वेषादिराहित्यंतुष्टिर्देवलब्धेनसन्तोषःतपःशारीरादि वक्ष्यक्ष्माणं दानंन्यायार्जितस्यधनादेःपात्रेऽर्पणंयशःसत्कीर्त्तिःअयशोदुष्कीर्त्तिः एतेबुद्धिज्ञानादयस्तद्विपरीताश्चाबुद्ध्यादयोनानाविधाभावाःप्राणिनांमत्तःसकाशादेवभवन्ति ५

किञ्च महर्षयइति सप्तमहर्मयोभृग्वादयःसप्तब्राह्मणाइत्येतेपुराणेनिश्चयंगता इत्यादिपुराणप्रसिद्धास्तेभ्योऽपिपूर्व्वेन्येचत्वारोमहर्षयःसनकादयस्तथामनवः स्वायम्भूवादयोमद्भावामदीयोभावःप्रभावोयेषुतेहिरण्यगर्भात्मनोममैवमनसःसङ्कल्पमात्राज्जाताः प्रभावमेवाह येषामिति येषांभृग्वादीनांसनकादीनाञ्चइमाब्राह्मणाद्यालोकेवर्द्धमाना यथायथंपुत्रपौत्रादिरूपाःशिष्यप्रशिष्यादिरूपाश्चप्रजाःप्रजायन्ते ६

भाषाअनुवाद

औरभृगुआदिसप्तमहर्षियेईपुराणोमे सातब्राह्मणकरकेप्रसिद्धहैं औ इनके भीपूर्व्वसनकादिचारि ब्राह्मणहैं औरस्वयम्भुआदिचौदहमनु इनसबमेकेमेराप्रभावहैऔरयेसकलहिरण्यगर्भजोमैसोमेरीइच्छासेप्रगटेहैं येईसातऋषियोंसेपुत्रपौत्रशिष्यप्रशिष्यक्रमसेप्रजारूपब्राह्मणादिवर्णसकलजन्मेहैं ६ अवयहसवउक्त वि

CC-0. In Public Domain. Digitized by eGangotri

एतांविभूतिंयोगञ्चममयोवेत्तितत्वतः सोऽविकल्पेनयोगेनयुज्यतेनात्रसंशयः ७

शाङ्करभाष्यं

रजङ्गमलक्षणाःप्रजाः ६ एतामिति एतांयथोक्तांविभूतिंविस्तारंयोगञ्च युक्तिं चात्मनोघटनमथवायोगैश्वर्यसार्थ्यंसर्वज्ञत्वञ्चयोगजंयोगउच्यतेममममदीयंयोगंयो वेत्तितत्त्वतस्तत्त्वेनयथावदित्येतत्सःअविकल्पेनाप्रचलितेनयोगेन सम्यक्दर्शनस्थै र्यलक्षणे नयुज्यतेसंबध्यते नात्रसंशयःनास्मिन्नर्थेसंशयोस्ति ७

कीदृशेनाविकल्पेनयोगेनयुज्यतइत्युच्यते अहमिति। अहंपरंब्रह्मवासुदेवा ख्यंसर्वस्यजगतःप्रभवउत्पत्तिर्यस्मात्तएवस्थितिनाशक्रियाफलोपभोगलक्षणं विक्रिया

आनन्दगिरिकृतटीका

सोपाधिकंप्रभावंभगवतोदर्शयित्वातज्ज्ञानफलमाह एतामिति बुद्ध्याद्युपादान त्वेनविविधाभूतिर्भवनंवैभवंसर्वात्मकत्वंतदाह विस्तारमिति ईश्वरस्यतत्तदर्थसंपाद नसामर्थ्ययोगस्तदाह आत्मनइति योगस्तत्फलमैश्वर्यंसर्वज्ञत्वंसर्वेश्वरत्वञ्च मदीयं शक्तिज्ञानलेशमाश्रित्यमन्वादयोऽष्टावादयस्त्रेशतेजानतेचतदाह अथवेति यथातौवि भूतियोगौतथानिरङ्कुशत्वेनेतिवेदनस्यनिरङ्कुशत्वंदर्शयति यथावदिति सोपाधिकं ज्ञानंनिरुपाधिकज्ञानेद्वारमित्याह सोविकल्पेनेति उक्तेर्थे प्रतिबन्धाभावमाह ना स्मिन्निति ७ कथंतावकविभूत्यैश्वर्यज्ञानमुक्तयोगस्यहेतुरिति मत्वा पृच्छति कीदृशेनेतिउक्तज्ञानमाहात्म्यात्प्रतिष्ठितामभगवन्निष्ठासिध्यतीत्याह उच्यतइति प्रभ बत्यस्मादिति प्रभवःसर्वप्रकृतिःसर्वात्मेत्याह उत्पत्तिरिति सर्वज्ञात्सर्वेश्वरान्मत्तो निमित्तात्सर्गस्थितिनाशादिभवति मयान्तर्यामिणाप्रेर्यमाणंसर्वं यथास्वं मर्य्यादा मनतिक्रम्यचेष्टतेतदाह मत्तइति इत्थंममसर्वात्मत्वंसर्वप्रकृतित्वंसर्वेश्वरत्वं सर्वज्ञ

स्वामिकृतटीका।

यथोक्तविभूत्यादितत्त्वज्ञानस्यफलमाह एतामितिएतांश्लोकादिलक्षणांमम विभूतिं योगञ्चैश्वर्यलक्षणंतत्त्वतोयोवेत्तिसःअविकल्पेननिःसंशयेनयोगेन सम्यग्दर्शनेन युक्तोभवति नास्त्यत्रसंशयः ७

भाषाअनुवाद।

भूतिकहेअपनीसम्पतिके तत्त्वज्ञानकाफलकहतेहैंकियेईश्वरगुआदिहभारीविभूति औरैश्वर्यरूपयोगहैं यहजोमनुष्ययथार्थसेजानैहै सोसंशयरहितसर्वज्ञ सम्यक् दर्शनहोय है ७ अवविभूति औयोगजाननेसे जिसप्रकारसम्यक्ज्ञानप्राप्तिहो

CC-0. In Public Domain. Digitized by eGangotri

अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्त्तते इतिमत्वाभजन्तेमांबुधाभावसमन्विताः ८
मच्चित्तामद्गतप्राणाबोधयन्तःपरस्परं कथयन्तश्चमांनित्यंतुष्यन्तिचरमन्तिच ९

शाङ्करभाष्यं ।

रूपंसर्वंजगत्प्रवर्त्ततेइत्येवंमत्वाभजन्ते सेवन्तेमांबुधाअवगतपरमार्थतत्त्वार्थाःभाव समन्विताःभावोभावनापरमार्थतत्वाभिनिवेशस्तेनसमन्विताः संयुक्ताइत्यर्थः ८
किञ्चमच्चित्ताइति मच्चित्तामयिचित्तंयेषांतेमच्चित्तामद्गतप्राणाःमयि गताः प्राप्ता श्चक्षुरादयःप्राणायेषांतेमद्गतप्राणामय्युपसंहृतकरणाइत्यर्थःअथवामद्गतप्राणा म द्गतजीवनाइत्येतद्बोधयन्तोऽवगमयन्तःपरस्परमन्योन्यंकथयन्तो ज्ञानबलवीर्यादिभ

आनन्दगिरिकृतटीका

त्वच्चमहिमानंज्ञात्वामय्येवनिष्ठावन्तोभवन्तीत्याह इत्येवमिति संसारासारताज्ञा नवतांभगवद्भजनेधिकारंद्योतयति अवगतेति परमार्थतत्वेपूर्वोक्तरीत्याज्ञातेप्रेमाद रावभिनिवेशाख्योभवतस्तेनसंयुक्तत्वच्चभगवद्भजनेभवति हेतुरित्याह भावेति ८
नकेवलमुक्तमेवभगवद्भजनेसाधनान्तरञ्चास्तीत्याह किञ्चेति ईश्वरात्प्रतीचः प्रागुक्तादन्यत्रचित्तप्रचाररहित्यंभगवद्भजनोपायमाह मयीति चक्षुरादीनांभगवत्य

स्वामिकृतटीका ।

यथाचविभूतियोगयोर्ज्ञानेसम्यग्ज्ञानावस्थिरत्वदर्शयति अहमित्यादिचतुर्भिः अहंसर्वस्यजगतःप्रभवोभृग्वादिमन्वादिरूपविभूतिद्वारेणोत्पत्तिहेतुःमत्तएवच स र्वस्यबुद्धिर्ज्ञानमसंमोहइत्यादिसर्वंप्रवर्त्तते इत्येवंमत्वाअवबुध्यबुधाविवेकिनोभावस मन्विताःप्रीतियुक्तामांभजन्ते ८

भाषा अनुवाद

तोहै सोई चारिश्लोकमेंदेखावतेहैं किमैहीं समस्तजगतकाप्रभव अर्थात्भृगुआ दिमनुआदि रूप बिभूतिकेद्वारा उत्पत्तिकाहेतुहौंऔरहमीसेबुद्धिऔज्ञानसकल उत्पन्नहोते यहीजानिकेबिवेकीलोग प्रीतियुक्तहोय हमारी भजनकरतेहैं ८
प्रीतिपूर्वकभजनकास्वरूपकहतेहैं किजिसकाचित्तमेरेहीमेंनिरतहै सोम च्चित्तऔरजिसके प्राणकहेसकलइन्द्रियअथबाजीवनमेरेमेंअर्पितहैं ऐसेमद्गतप्रा णविवेकीजन हमकोबुद्धिऔश्रुतिप्रमाणसेजानतेहैं औरसर्वदापरस्परमेरीहीच र्चाकरतेऊये सदासन्तुष्टमनमेरेगुणगानमे रममाणपूर्णकामइस असारसंसारकेज ञ्जालसे मुक्तिपावतेहैं ९ ऐसेहीभक्तोंकोहमज्ञानप्रदानकरतेहैं सोईकहतेहैं

CC-0. In Public Domain. Digitized by eGangotri

तेषांसततयुक्तानांभजतांप्रीतिपूर्व्वकं ददामिबुद्धियोगंतंयेनमामुपयान्तिते १०

शाङ्करभाष्यं

र्म्मैर्विशिष्टंमांतुष्यन्तिचपरितोषमुपयान्तिरमन्तिचरतिञ्चप्राप्नुवन्तिप्रियसंगत्यैव ९

ये यथोक्तैःप्रकारैर्भजन्तेमांभक्ताःसन्तःप्रीतिपूर्व्वकंतेषामिति तेषांसततयुक्तानां नित्याभियुक्तानांभजतांसेवमानानांकिमर्थित्वादिनाकारणेनेत्याह प्रीतिपूर्व्वकंप्रीतिः स्नेहस्तत्पूर्व्वकंमांभजतामित्यर्थःददामिप्रयच्छामिबुद्धियोगंबुद्धिःसम्यग्दर्शनंमत्तत्त्व विषयंतेन योगोबुद्धियोगस्तंबुद्धियोगंयेनबुद्धियोगेनसम्यग्दर्शनलक्षणेनमां परमे श्वरमात्मभूतं आत्मत्वेनोपयान्ति प्रतिपद्यन्ते १०

आनन्दगिरिकृतटीका

प्राप्तिस्तदगोचरत्वात्तस्येत्याशंक्याह मय्युपसंहृतेति मदतिरेकेणजीवनेपि नाद रस्तदपिमय्येवार्पितंभक्तानामित्याह अथवेति आचार्येभ्यःश्रुत्वावादकथयापरस्परं भगवन्तंसब्रह्मचारिणोवोधयन्ति तदपिभगवद्भजनसाधनमित्याह वोधयन्तइति आगमोपपत्तिभ्यांभगवन्तमेवविशिष्टधर्म्माणंशिष्येभ्योगुरवोव्यपदिशन्ति तदपिभग वद्भजनमेवेत्याह कथयन्तइति भक्तानांतुष्टिरतीस्वरसतःस्यातामित्याह तुष्यन्तीति मनोरथपूर्त्यारतिप्राप्तौकामुकसंमतमुदाहरणमाह प्रितेति ९

यदुक्तंसोविकल्पेनेत्यादितदर्थंभूमिकांकृत्वातदिदानीमुदाहरति येयथोक्तेति नित्याभियुक्तानामनवरतंभगवत्येकाग्रसंपन्नानामित्यर्थः पुत्रादिलोकत्रयहेत्वर्थि त्वेनवागर्भदासत्वेनवाप्रत्यहंजीवनोपायसिद्धयेवाभजनमिति शङ्कित्वादूषयति कि मित्यादिना प्रागुक्तांज्ञानाख्यांभक्तिंस्नेहेनकुर्व्वतामित्यर्थःतेभ्योहंतत्त्वज्ञानंप्रयच्छा

स्वामिकृतटीका।

प्रीतिपूर्व्वकंभजनमाह मच्चित्ताइति मयेवचितंयेषांतेमच्चिताःमामेवगताः प्रा प्ताःप्राणाइन्द्रियाणियेषांतेमद्गतप्राणाःमय्यर्पितजीवनाइतिवाएवंभूतास्तेवुधा अ न्योन्यंमांन्यायोपेतैःश्रुत्यादिप्रमाणैर्बोधयन्तोवुध्वाचमांकथयन्तःसंकीर्तयन्तःसन्तःनि त्यंतुष्यन्तिअनुमोदनेनतुष्टिंयान्ति रमन्तिच निर्वृतिंयान्ति ९

भाषा अनुवाद

किएवम्भूतमेरेमेसदाआसक्तचितऔप्रीति पूर्वकभजनकारीभक्तलोगोंकोमैसोई बु द्धिरूपयोगकहेउपायदेताहूं औरउसउपायसेवेमेरे भक्त मुझे अनायास प्राप्त होतेहैं १० बुद्धि योगदेकरकेउनअपनेभक्तोंकाफेरिअविद्याकृतसंसार नाश

CC-0. In Public Domain. Digitized by eGangotri

आहुस्त्वामृषयःसर्वेदेवर्षिर्नारदस्तथा असितोदेवलोव्यासःस्वयञ्चैवब्रवीषिमे१३

शाङ्करभाष्यं

ईदृशंआहुःकथयन्तित्वामृषयोवशिष्ठादयःसर्वेदेवर्षिर्नारदस्तथाअसितोदेवलोव्येवमाह व्यासश्चस्वयञ्चैवब्रवीषिमेमह्यं १३ सर्वमिति सर्वमेतद्यथोक्तमृषिभिस्त्वयाचैतदृतंसत्यमेवमन्येयन्मांप्रतिवदसिभाषसेहेकेशवनहितेतवभगवन्व्यक्तिंप्रभवंविदुर्नदेवानदानवा १४ यतस्त्वंदेवादीनामादिरतःस्वयमिति स्वयमेवात्मना

आनन्दगिरिकृतटीका ।

नितं सम्यग्दर्शनफलंतदेवभाःतद्वतात्तत्पर्यन्तेनेत्यर्थः तेनाज्ञानेसकार्यनिवृत्तेभगवद्भावः स्वयमेवप्रकाशोभवतीतिमत्वा व्याख्यातमेवपदमनुवदति ज्ञानेति ११ निरस्ताशेषविशेषंनिरुपाधिकंसोपाधिकञ्चसर्वात्मत्वादिभगवतोरूपं तद्विफलञ्चश्रुत्वानिरुपाधिकरूपस्यप्राकृतबुद्ध्यनवगाह्योक्तिपूर्वकंमन्दानुग्रहार्थंसर्वदासर्वबुद्धिग्राह्यंसोपाधिकंरूपंविस्तरेणश्रोतुमिच्छन्नृच्छतीत्याह यथोक्तामिति परंब्रह्मभवानिति लक्ष्यनिर्देशःतस्यलक्षणार्थंपरंधामेत्यादिविशेषणत्रयं धामशब्दस्यस्थानवाचित्वं व्यावर्त्तयन्व्याचष्टे तेजइति तस्यचैतन्यस्यपरमत्वंजन्मादिराहित्येनकौटस्थ्यंप्रकृष्टं पावनमत्यन्तशुद्धत्वमुच्यतेयदेवंलक्षणंपरमंब्रह्मतद्भवानेवनान्यइत्यर्थः कुतस्त्वमेवमज्ञासीरित्याशंक्याप्तवाक्यादित्याह पुरुषमिति दिविपरमेव्योम्निभवतीतिदिव्यःसर्वप्रपञ्चातीतंदीव्यतिद्योततइति देवःसचादिःसर्वमूलत्वादतएवाजस्त्वांसर्वगतमाहुरितिसम्बन्धः १२ उक्तविशेषणंत्वामृषयःसर्वेयस्मादाहुस्तस्मात्तद्वचनातद्यथोक्तंब्रह्मत्वंयुक्तमित्याह ईदृशमिति ऋषिग्रहणेनगृहीतानामपिनारदादीनावि

स्वाकिकृतटीका

जिज्ञासुर्भगवन्तंस्तुवन्नर्जुनउवाच परंब्रह्मेतिसप्तमिःपरंब्रह्मपरंधामचाश्रयः परमंपवित्रंभवानेवकुतइत्यतआह यतःशाश्वतंनित्यंपुरुषंतथादिव्यंद्योतनात्मकं स्वयं प्रकाशंआदिश्चासौदेवश्चेतिदेवानामादिभूतमित्यर्थः तथाअजंअजन्मानंविभुञ्च व्यापकंत्वामेवाहुः १२ केतेइत्याह आहुरिति ऋषयोष्टौआदयःसर्वे देवर्षिश्चनारदः असितश्चदेवलश्चव्यासश्चस्वयंत्वमेवसाक्षान्मेमह्यंब्रवीषि १३ अतोममेदानींत्वदी

भाषाअनुवाद

कौनऐसाकहतेहैं तोइसपरकहतेकिभृगुआदिऋषिसकलऔरदेवर्षिनारदअसितऋषि देवलव्यासदेव ये सबकहते हैं औरआपभीसाक्षात्हममेंकहतेहो १३

CC-0. In Public Domain. Digitized by eGangotri

सर्वमेतदृतं मन्येयन्मांवदसिकेशव नहितेभगवन्व्यक्तिंविदुर्देवानदानवाः १४

शाङ्करभाष्यं

मानंवेत्यजानासित्वंकथम्भूतंनिरतिशयज्ञानैश्वर्य्यबलादिशक्तिमन्तमीश्वरंपुरुषोत्तमं भूतानिभावयतोतिभूतभावनःतत्सम्बुद्धौहेभूतभावन भूतेशभूतानामीशहे देवदेव जगत्पते १५ वक्तुमिति वक्तुं कथयितुमर्हस्यशेषेणविद्याह्यात्मविभूतयःआत्मनो

आनन्दगिरिकृतटीका।

शिष्टत्वात् पृथक्ग्रहणंअसितोदेवलस्यपिता किमन्यैस्त्वंस्वयमेवात्मानमुक्तरूपंमह्य मुक्तवानित्याह स्वयञ्चेति १३

ऋषिभिस्तथाचोक्तत्वादुक्तंसर्वं सत्यमेवेति मममनोपेत्याह सर्वमिति किंतादित्या शंक्यात्मरूपमित्याह यन्मामिति देवादिभिःसर्वैरुच्यमानतयातद्रूपेविशिष्टवक्तृग्रह णमनर्थकमित्याशंक्याह नहीति प्रभवोनामप्रभवोनिरुपाधिकस्वभावः यद्देवादी नामपिदुर्विज्ञेयंतवरूपं तदाकाकथामनुष्याणामित्यर्थः १४

कश्चिदेवमहताकष्टेनानेकजन्मसंसिद्धोजानाति त्वदनुगृहीतस्तद्रूपमित्यभिप्रे त्याह यतइति स्वयमेवोपदेशमन्तरेणेत्यर्थः आत्मनाप्रत्येकेनाविषयतयेतियावत आत्मानंनिरुपाधिकंरूपं नचतवसोपाधिकमपिरूपमन्यस्यगोचरेतिष्ठतीत्याह नि रतिशयेति पुरुषश्चासावुत्तमश्चेति चराचरातीतपूर्णचैतन्यरूपत्वंसम्बोधनेन

स्वामिकृतटीका।

यैश्वर्य्येऽसम्भावनानिष्टतेत्याह सर्वमेतदिति एतद्भवानेवपरंब्रह्मेत्यादिसर्वमपि ऋट तंसत्यंमन्ये यन्मांप्रतित्वंकथयसिनमेविदुःसुरगणाइत्यादितदपिसत्यमेवमन्येइत्याह नहीति हेभगवंस्तवव्यक्तिं देवानविदुःअस्मदनुग्रहार्थमियमभिव्यक्तिरितिनजान न्ति दानवाश्चअस्मन्निग्रहार्थमितिनविदुरेवेति १४

भाषाअनुवाद

इससेअबआपकेऐश्वर्य्यमे असंभावनाबुद्धि निवृत्तहोगई यहकहतेहैं कि हे केशव आपजोकहतेहौ किसबरूपहमहैं सोमैनेसत्यकरि माना औरजोआपनेक हाकिसकलदेवता हमकोनहींजानते वहभी यथार्थकरके मैनेजानाहै सोईअर्जुन कहते हैं किहेभगवान भक्तों औदेवतोंके अनुग्रहअर्थ जोतुमारेअवतार यहदे वतानहींजानते हैं औरदानवभीयहनहींजानतें किहमारेनिग्रहके लियेभगवा नकाशरीरधारणभयाहै १४

CC-0. In Public Domain. Digitized by eGangotri

स्वयमेवात्मनात्मानंवेत्थत्वंपुरुषोत्तम भूतभावनभूतेशदेवदेवजगत्पते १५ वक्तु मर्हस्यशेषेणदिव्याह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्यतिष्ठसि १६

शाङ्करभाष्यं ।

विभूतयोयास्तावक्तुमर्हसियाभिर्विभूतिभिरात्मनोमाहात्म्यविस्तरैरिमान्लोकांस्त्वं व्याप्यतिष्ठसि १६

आनन्दगिरिकृतटीका

बोध्यते सर्वप्रकृतित्वंसर्वकर्तृत्वञ्चकथयति भूतानीति सर्वेश्वरत्वमाह भूताना मिति उक्तंतेसोपाधिकंरूपंदेवादीनामाराध्यतामधिगच्छतीत्याह देवेति जग तःसर्वस्वस्वामित्वेनपालयितृत्वमाह जगदिति १५ यस्मादस्मदृशामगोचरस्त वात्माजिज्ञासितश्चतस्मात्त्वयैवतद्भूयंवक्तव्यमित्याह वक्तुमिति दिव्यत्वमप्राकृतत्वं संप्रत्यन्वयमन्वाचष्टे आत्मनइति वक्तव्याविभूतीर्विशिनष्टि याभिरिति यद्द्वारा लोकान्पूरयित्वावर्त्तसे तांविभूतीरशेषेण वक्तुमर्हसीत्यर्थः १६

स्वामिकृतटीका ।

किंतर्हि स्वयमिति स्वयमेवत्वमात्मानंवेत्थजानासिनान्यः तदप्यात्मनास्वेनैववे त्थनसाधनान्तरेणअत्यादरेणवक्तुधासम्बोधयति हेपुरुषोत्तमउत्तत्वेहेतुगर्भसम्बो धनानिहेभूतभावनभूतोत्पादकभूतानामीशनियन्तादेवानामादित्यादीनां देवप्रका शक जगत्पते विश्वपालक १५ यस्मात्तवाभिव्यक्तिंत्वमेववेत्सि नदेवादयस्तस्माद्व क्तुमिति या आत्मनस्तवदिव्याश्रुताविभूतयस्ताःसर्वावक्तुंत्वमेवार्हसियोग्योऽसि याभिरिति विभूतीनांविशेषणंस्पष्टार्थं १६

भाषा अनुवाद

तोइसकाफलितअर्थक्याहै इसआकांक्षापरकहते हैं किहेपुरुषोत्तमआपही आपनेकोजानतेहो औरकोईतुमकोनहींजानैहै यहअतिआदरसे वारम्बारसम्बो धनदेकहते हैं किहेभूतभावनभूतेशदेवदेवजगत्पते इनसबसम्बोधनोसेश्रीकृ ष्णकापुरुषोत्तमत्वसाधनकियाहै १५ जिसहेतुतुमारातत्त्वऔरअभिव्यक्तिकहेप्र गटहोनातुमकोछोड़िदेवादिभी नहीं जानते इससेतुमारीजोअद्भुतविभूति सोतु मारेहीकहनेयोग्यहैं किजिनविभूतियोंसेतुमसकललोकमेंव्यापरहेहो सोआपनी उनदिव्यविभूतियोंकोकृपाकरके कहोतोमेरेमनकासन्देहछूटजाय १६

CC-0. In Public Domain. Digitized by eGangotri

कथंविद्यामहंयोगिंस्त्वांसदापरिचिन्तयन् केषुकेषुचभावेषुचिन्त्योसिभगवन्मया १७
विस्तरेणात्मनायोगंविभूतिञ्चजनार्द्दन भूयःकथयतृप्तिर्हिशृण्वतोनास्तिमेऽमृतं १८

शाङ्करभाष्यं

कथमिति कथंविद्यांविजानीयांअहं हेयोगिन्त्वांसदापरिचिन्तयन् केषु केषुचभावेषुवस्तुषुचिन्त्योसिध्येयोसि भगवन्मया १७ विस्तरेणेति विस्त रेणात्मनोयोगंयोगैश्वर्यंशक्तिविशेषंविभूतिञ्चविस्तरंध्येयपदार्थानां हेजनार्द्दन अर्द तेर्गतिकर्मणोरूपं असुराणांदेवप्रतिपक्षभूतानां जनानांनरकादिगमयितृत्वाज्ज नार्द्दन अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनंसर्व्वैर्जनैर्याच्यत इति वाभूयःपूर्व्वमुक्तम पिकथयतृप्तिर्हि परितोषोयस्मान्नास्तिमेममशृण्वतःत्वन्मुखनिःसृतवाक्यामृतं १८

आनन्दगिरिकृतटीका

किमर्थंविभूतीः श्रोतुमिच्छतीत्याशंक्यध्यानसौकर्यप्रकारप्रश्नेनफलंकथयति क थमिति योगोनामैश्वर्य्यंतदस्यास्तीति योगी तस्यसम्बुद्धौहेयोगिन्नहंस्थविष्टमति स्त्वांकेनप्रकारेणसततमनुसन्दधानोविशुद्धबुद्धिर्भूत्वानिरुपाधिकंत्वां विजानीयामि ति प्रश्नः प्रश्नान्तरंप्रस्तौति केषुकेष्विति चेतनाचेतनभेदादुपाधिवदुक्त्वाच्चवदु वचनं १७ प्रकृतप्रश्नमुपसंहरति विस्तरेणेति अर्द्दतेर्गतिकर्मणोजना र्द्दनेतिरूपं तत्व्युत्पादयति असुराणामिति प्रकारान्तरेणशब्दार्थंव्युत्पादयति

स्वामिकृतटीका

कथनप्रयोजनंदर्शयन्प्रार्थयते कथमिति द्वाभ्यां हेयोगिन्कथंकैर्विभूतिभेदैः सदापरिचिन्तयन्नहंत्वांविद्यांजानीयां विभूतिभेदेनचिन्त्योसित्वंकेषुकेषुपदार्थेषुमया चिन्तनीयोऽसि १७ तदेवंबहिर्मुखेऽपिचित्ते तत्तत्तद्विभूतिभेदेनत्वच्चिन्तैवयथाभवें

भाषा अनुवाद।

इससेअर्जुनअपनेकहनेकाप्रयोजनदेखलायकरप्रार्थनाकरतेहैं किहेयोगिन्श्रीकृ ष्ण मैतुमकोकिस्तरह तुमारीविभूतिभेदकेद्वारा निरन्तरभावनाकरिजाननेसकौं गा औरभिन्नभिन्नविभूतिमेंचिन्तनीयतुम कौनकौनपदार्थमे मेरीभावनाकेयोग्य हो अर्थात्किसकिसवस्तुमे तुमेंहमजानें १७ चित्तकीवृत्तिबहिर्मुखहोनेपरभी उससमैतुमारीविभूतियोंकेद्वारा जिसप्रकारतुमाराचिन्तनहोय ऐसीउपायविस्ता रसेकहो यहअर्जुनपूछतेहैं कितुमारासर्वज्ञत्वऔरसर्वशक्तिमत्ताआदिस्वरूप जोयोगकाऐश्वर्यऔरसम्पूर्णविभूतिजोहै सोसब हेजनार्दनविस्तारसेपुनर्वारकहो क्योंकिआपकेअमृतस्वरूपवचनश्रवणकरतें कभीभीमेरामनतृप्तनहीहोताहै १८

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच हन्तते कथयिष्यामिदिव्याह्यात्मविभूतयः प्राधान्यतःकुरु श्रेष्ठनास्त्यन्तोविस्तरस्यमे १९

शाङ्करभाष्यं ।

हन्ततइति हन्तेदानीतेतवदिव्या दिविभवाआत्मविभूतयःआत्मनोममविभूतयोयास्ताःकथयिष्यामीत्येतत् प्राधान्यतोयत्रयत्रप्रधानायाविभूतिस्तांतांप्रधानां प्राधान्यतःकथयिष्याम्यहंकुरुश्रेष्ठ अशेषतस्तुवर्षशतेनापिनशक्यते वक्तुमतोनास्त्यन्तोविस्तरस्यमेविभूतीनामित्यर्थः १९ तत्रप्रथममेवतावच्छृणु अहमिति अहमात्माप्रत्यगात्मागुडाकेशगुडाकानिद्रातस्याईशोगुडाकेशोजितनिद्रइत्यर्थःघनकेशइति वा सर्वेषांभूतानां आशयेन्तर्हृदिस्थितोऽहमात्मा प्रत्यगात्मानित्यंध्येयस्तदशक्तेनचोत्तरेषुभावेषुचिन्योऽहंचिन्तयितुंशक्यः यस्मादहमेवादिर्भूतानांकारणं तथामध्यञ्चस्थितिरन्तःप्रलयश्चएवञ्चध्येयोहं २०

आनन्दगिरिकृतटीका

अभ्युदयेति ननुपूर्व्वमेवसप्तमेनवमेचविभूतिरैश्वर्यञ्चेश्वरस्यदर्शितं तत्किमिति श्रोतुमिष्यते तत्राह भूयइति अमृतममृतप्रख्यमित्यर्थः १८

प्रष्टारंविश्वमयितुंभगवानुक्तवानित्याह श्रीभगवानिति हन्तेत्यनुमतिं व्यावर्त्यजिज्ञासावच्छिन्नंकालंदर्शयति इदानीमिति दिविभवत्वमप्राकृतत्वमस्मदगोचरत्वंवाक्यान्वयंद्योतयति यास्ताइति सर्वविभूतीनांवक्तव्यत्वप्राप्तावुक्तं यत्रेति किमित्यनवशेषतोविभूतयोनोच्यन्ते तत्राह अशेषतस्त्विति तत्रहेतुर्यतइति १९

स्वामिकृतटीका

त्तथाविस्तरेणकथयेत्याह विस्तरेणेति आत्मनस्तवयोगंसर्व्वज्ञत्वंसर्व्वशक्तित्वादिलक्षणंयोगैश्वर्यंविभूतिञ्चविस्तरेणपुनःकथय यतस्तववाक्यममृतरूपंशृण्वतोममतृप्तिरलंबुद्धिर्नास्ति १८ एवंप्रार्थितःसन्श्रीभगवानुवाच हन्तेति हन्तेत्यनुकम्पासम्बोधनें दिव्यायामद्विभूतयस्ताःप्राधान्येनतुभ्यंकथयिष्यामि यतोऽवान्तरस्यविभूतिविस्तरस्यमदीयस्यान्तोनास्ति अतःप्रधानभूताःकतिचिद्वर्णयिष्यामि १९

भाषाअनुवाद

जबअर्जुननेऐसीप्रार्थनाकिया तबभगवानकहते हैं किहेकुरुश्रेष्ठअर्जुन मेरी जोदिव्यविभूतीं हैं सोतुमकोअच्छीप्रकारसेकहूंगा औरविस्तारसेकहनेकोतो मेरीविभूतियोंकाअन्तनहींहै इससेप्रधानप्रधानजोहैं सोसबकहूंगा १९

CC-0. In Public Domain. Digitized by eGangotri

अहमात्मागुडाकेशसर्वभूताशयस्थितः अहमादिश्चमध्यञ्चभूतानामन्तएवच २०
आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान् मरीचिर्मरुतामस्मिनक्षत्राणामहं
शशी २१

शाङ्करभाष्यं

आदित्यं आदित्यानांद्वादशानांविष्णुरात्योहंज्योतिषांरविःप्रकाशयिटृणामंशुमान्
रश्मिमान्मरीचिर्नाममरुतांमरुद्देवताभेदानामस्मिनक्षत्राणामहंशशीचन्द्रमाः २१

आनन्दगिरिकृतटीका

विभूतिप्रदर्शनेप्रस्तुतें सत्यादावेवपारमार्थिकंपारमेश्वरंरूपंदर्शयितुंअीर
र्जुनस्यमनःसमाधानार्थंअर्थयतें तत्रेति सोपाधिकमपिकाल्पनिकंपरस्यरूपंश्रुत्वा
द्रुच्यमाणंश्रोतुश्चित्तसमाधानञ्चकर्त्तव्यमेवेत्याह तावदिति आशेरतेस्मिन्विद्या
कर्मपूर्वप्रज्ञादुत्याशयोहृदयंसर्व्वेषांभूतानांहृदयेन्तःस्थितोयःप्रत्यगात्मासोहमेवेति
वाक्यार्थमाह सर्व्वेषामिति यस्तुमन्दोमध्यमोवा परमात्मानमात्मत्वेनध्यातुंनालंतं
प्रत्याह तदशक्तेनेति वक्ष्यमाणादित्यादिषुपरस्यनध्येयत्वमन्यदेवकारणंकिञ्चित्त
त्तत्र ध्येयमित्याशंक्याह यस्मादिति सर्व्वकारणत्वेनसर्वज्ञत्वेनसर्वेश्वरत्वेनच परस्य
ध्येयत्वमत्रेप्सितं नान्यस्यकस्यचित्कारणस्यादित्यादिषुध्येयतेत्यर्थः उक्तध्यानाश
क्तेभ्योवक्ष्यंविभूतियोगमुपदिशति एवञ्चेति तत्तत्र प्रधानत्वेनपरस्यध्येयत्वं २०

स्वामिकृतटीका।

तत्रप्रथममैश्वरंरूपंकथयति अहमिति हेगुडाकेश सर्वेषांभूतानामाशयेष्व
न्तःकरणेषुसर्वज्ञत्वादिगुणैर्नियन्तत्वेनावस्थितःपरमात्माहं आदिर्जन्ममध्यं स्थितिः
अन्तःसंहारः सर्वभूतानांजन्मादिहेतुश्चाहमेवेत्यर्थः २०

भाषा अनुवाद

अवप्रथमईश्वरकास्वरूपकहतेहैं किहेगुड़ाकेशजितनिद्रअर्जुन परमात्मारूप
मैंतावतभूतमात्रकेअन्तःकरणमेसर्वज्ञत्वआदिगुणोंसेनियन्तारूपस्थितहौं औरआ
दिमध्यअन्तकहेसर्वभूतोंकेसृष्टिस्थितिसंहारकाहेतुभीमैहींहौंयहजानोगुडाकानि
द्राकोकहतेहैंअथवागुडाकहेगुडचियालेषुंघुरालेहैंकेशजिसकेसोगुडाकेशहै २०
अवदशश्लोकसेलेकरअध्यायसमाप्तिपर्यन्तअपनीविभूतिकहतेहैं किवारहअदिति
केपुत्रोंमेविष्णुनामआदित्यमैहूं औप्रकाशकरूपोंमेसर्वत्रव्यापीरविरूपमैहौंऔस
प्तदेवतोंकेबीचमरीचिनामहमैजानोऔनक्षत्रोंमेचन्द्रमाभी महींकोमानो २१

CC-0. In Public Domain. Digitized by eGangotri

वेदानांसामवेदोऽस्मिदेवानामस्मिवासवः इन्द्रियाणांमनश्चास्मिभूतानामस्मिचेतना २२
रुद्राणांशङ्करश्चास्मिवित्तेशोयक्षरक्षसां वसूनांपावकश्चास्मिमेरुःशिखरिणामहं २३
पुरोधसाञ्चमुख्यं मांविद्धिपार्थबृहस्पतिं सेनानीनामहंस्कन्दःसरसामस्मिसागरः २४

शाङ्करभाष्यं

वेदानामिति वेदानांमध्येसामवेदोऽस्मिदेवानांरुद्रादित्यादीनांवासवइन्द्रोऽस्मि इन्द्रियाणामेकादशानांमनश्चास्मिचक्षुरादीनांसङ्कल्पविकल्पात्मकंमनश्चास्मिभूताना मस्मिचेतना कार्यकारणसंघातेऽभिव्यक्तावुइष्टैत्तिश्चेतना २२ रुद्राणामिति रुद्रा णामेकादशानां शङ्करश्चास्मि वित्तेशःकुबेरोयक्षरक्षसांयक्षाणांरक्षसाञ्च वसूना मष्टानां पावकश्चास्मिअग्निः मेरुःशिखरिणांशिखरवतांहं २३ पुरोधसामिति

आनन्दगिरिकृतटीका

एवंशब्दार्थमेवदर्शयति आदित्यानामित्यादिना २१ मन्त्रब्राह्मणसमुदायाना मृगादीनांमध्येसामवेदोस्मीति ध्यानान्तरमुदाहरति वेदानामिति संघातेजीवाधि ष्ठिते इति यावत् पञ्चत्वंसर्व्वव्यापिनीचैतन्याभिव्यक्तिकेति शेषः २२ २३

स्वामिकृतटीका।

इदानींविभूतीःकथयति आदित्यानामिति यावत्समाप्ति आदित्यानाञ्चद्वाद शादित्यानांमध्येविष्णुनामाहंज्योतिषांप्रकाशकानांमध्येअंशुमान्वियद्व्यापिरश्मियु क्तोरविःसूर्योऽहं मरुतांवायुनांमध्ये मरीचिनामाहस्मि यद्वासप्तमरुद्गणादेवविशेषा स्तेषांमध्ये चन्द्रोऽहं अत्रचादित्यानामहंविष्णुरित्यादिषुप्रायशोनिर्धारणेषष्ठीक्वचि च्चभूतानामस्मिचेतनेत्यादिषुसम्बन्धेषष्ठी तच्चतत्रैवदर्शयिष्यामःविष्णुरित्यादिष्ववता रोऽपिप्रभावातिशयमात्रविवक्षयाविभूतित्वेनानिर्द्दिश्यते अतःपरञ्चाध्यायस्यस ष्टार्थत्वेऽपिक्वचित् किञ्चिद्व्याख्यास्यामः २१

वेदानामिति वासवइन्द्रःभूतानांसम्बन्धिनीचेतना ज्ञानशक्तिरहमस्मि २२

भाषाअनुवाद

औरवेदोंमेसामवेद देवतोंमेइन्द्र औइन्द्रियोंकेमध्यमे मनप्रधानइन्द्रीमैहौं तथाभूतकहेप्राणियोंकेविषे चेतना जोज्ञानशक्ति सोमैहौं २२ औरएकादशरुद्रों मेशङ्कर औयक्षराक्षसोंमेकुबेरमैहौं अष्टवसुवोंकेबीचअग्निऔपर्वतोंमेसुमेरु नामपर्वतहमैजानो २३ औरहेअर्जुन पुरोहितोंमेमुख्यबृहस्पतिहमहैं औसेनापतियोंमेस्वामकार्त्तिकमीहमहैं औरसरसांकहे थिरजलाशयोंकेमध्यस मुद्रहमकोजानो २४ और महर्षियोंमेभृगुमैहौं औरअक्षरतथापदआत्मक

CC-0. In Public Domain. Digitized by eGangotri

महर्षीणांभृगुरहंगिरामस्येकमक्षरं यज्ञानांजपयज्ञोस्मिस्थावराणांहिमालयः २५
अश्वत्थःसर्ववृक्षाणांदेवर्षीणाञ्चनारदःगन्धर्वाणांचित्ररथःसिद्धानांकपिलोमुनिः २६
उच्चैःश्रवसमश्वानांविद्धिमाममृतोद्भवं ऐरावतंगजेन्द्राणांनराणाञ्चनराधिपं २७

शाङ्करभाष्यम्।

पुरोधसांराजपुरोहितानांमुख्यं प्रधानंमांविद्धिजानीहि हेपार्थबृहस्पतिंसहीन्द्रस्येतिमुख्यःस्यात्पुरोधाःसेनानीनां सेनापतीनामहंस्कन्दोदेवसेनापतिःसरसांयानिदेवखातानिसरांसितेषांसरसां सागरोस्मि भवामि २४ महर्षीणामिति महर्षीणांभृगुरहंगिरांवाचांपदलक्षणानामेकमक्षरमोङ्कारोस्मि यज्ञानामिति यज्ञानांजपयज्ञोस्मि स्थावराणांस्थितिमतांहिमालयः २५

अश्वत्थइति अश्वत्थःसर्ववृक्षाणांदेवर्षीणाञ्चनारदःदेवाएवसन्तऋषित्वं प्राप्ताःमन्त्रदर्शित्वादेतेदेवर्षयः तेषांनारदोस्मिगन्धर्वाणांचित्ररथोनामगन्धर्वोस्मि सिद्धानांजन्मनैवधर्मज्ञानवैराग्यैश्वर्यातिशयंप्राप्तानांकपिलोमुनिः २६ उच्चैरिति उच्चैःअवसमश्वानांउच्चैः अवानामाश्वस्तंमांविद्धिजानीहिअमृतोद्भवंअमृतनिमित्तमथनोद्भवंऐरावतमिरावत्याअपत्यंगजेन्द्राणांहस्तीश्वराणांतंमांविद्धिइत्यनुवर्त्ततेनराणां मनुष्याणाञ्चनराधिपंराजानंमांविद्धिजानीहि २७

आनन्दगिरिकृतटीका

पुरोहितेषुबृहस्पतेर्मुख्यत्वेहेतुमाह सहीति २४ एकमित्योङ्कारस्यब्रह्मप्रतीकत्वेनतदभिमानत्वेन च प्रधानत्वमुच्यते जपयज्ञस्यसर्वयज्ञान्तरेभ्योहिंसादिराहि

स्वामिकृतटीका

रुद्राणामिति रक्षसामपिक्रूरत्वादिसाम्यात्यक्षैःसहैकीकृत्य निर्देशः तेषांमध्येवित्तेशःकुबेरोऽस्मिपावकोग्निःशिखरिणांशिखरवतामुच्छ्रितानांमध्येमेरुः २३
पुरोधसामितिपुरोधसांमध्येदेवपुरोहितत्वान्मुख्यंबृहस्पतिंमांविद्धिसेनानीनां

भाषाअनुवाद

वाच्यकेवीचओंकारअक्षरभीमैहौं औयज्ञोंमे हिंसारहितहेतुसे जपरूपयज्ञमैहौं तथास्थावरोंमे हिमालयगरि हमहैं २५ औरवृक्षजातियोंमेअश्वत्थकहेपीपर औदेवऋषियोंमेनारदमैहौं औगन्धर्वगणोंमेचित्ररथ औसिद्धकहेआजन्मसेपरमार्थतत्त्वज्ञानियोंमे कपिलमुनिमैहौं २६ अश्वकहेघोड़ोंमेउच्चैःश्रवा औगजेन्द्रोंमे ऐरावत तथामनुष्योमेनरपति कहेराजाभीमैहींहौं २७

CC-0. In Public Domain. Digitized by eGangotri

आयुधानामहंवज्रं धेनूनामस्मिकामधुक् प्रजनश्चास्मिकन्दर्पः सर्पाणामस्मिवासुकिः २८
अनन्तश्चास्मिनागानां वरुणोयादसामहं पितॄणामर्य्यमाचास्मियमः संयमतामहं २९

शाङ्करभाष्यं

आयुधानामिति आयुधानामहंवज्रं दधीच्यस्थिसम्भवंमांविद्धि धेनूनांदोग्ध्रीणामस्मिकामधुक्वशिष्ठस्यसर्व्वकामानांदोग्ध्रीसामान्यावाकामधुक् प्रजनःप्रजनयितास्मिकन्दर्पःकामःचास्मि सर्पाणांसर्पभेदानामस्मिवासुकिःसर्पराजः २८ अनन्तइति अनन्तश्चास्मिनागानांनागविशेषाणांनागराजः वरुणो यादसामहमब्देवतानांराजाहं पितॄणामर्यमानामपितृराजश्चास्मि यमःसंयमतांसंयमनंकुर्व्वतामहं २९

आनन्दगिरिकृतटीका।

त्येनप्रधान्यमुपेत्याह यज्ञानामिति शिखरवतामुच्छ्रितानांपर्व्वतानांमध्येमेरुरहमित्युक्तेपिस्थितिशीलानांतेषामेवहिमवान्पर्व्वतराजोस्मीत्यर्थभेदंगृहीत्वाह स्थितिमतामिति २५ सर्व्वदृक्षाणामित्यत्रसर्व्वशब्देनवनस्पतयोगृह्यन्ते २६ २७
प्रजनयतीतिव्युत्पत्तिमाश्रित्याहप्रजनयितेतिसर्पानागाश्चजातिभेदाद्भिद्यन्ते २८२९३०

स्वामिकृतटीका

सेनापतीनांमध्ये देवसेनापतिःस्कन्दोऽहमस्मिसरसांस्थिरजलाशयानांमध्य समुद्रोऽस्मि २४ महर्षीणामिति गिरांवाचांपदात्मिकानांमध्येएकमक्षरमोङ्काराख्यं पदमस्मि २५ अश्वत्थइति देवाएवसन्तोये मन्वदर्शनेनऋषित्वंप्राप्तास्तेषांमध्ये नारदोऽस्मिसिद्धानामुत्पत्तितएवाधिगतपरमार्थतत्त्वानांमध्ये कपिलाख्योमुनिरस्मि २६ उच्चैःश्रवसमिति अमृतार्थंक्षीरोदाब्धिमथनादुद्भूतं उच्चैश्रःवसनामाश्वमद्विभूतिंविद्धिअमृतोद्भवमित्येतदैरावतेऽपिसंबध्यतेनराधिपंराजानंमांविद्धि २७

आयुधानामिति कामान्दोग्धीतिकामधुक्प्रजनःप्रजोत्पत्तिहेतुःकन्दर्पःकामोऽस्मिनकेवलंसम्भोगमात्रप्रधानःकामोमद्विभूतिरशास्त्रीयत्वात्सर्पाणांसविषाणांराजावासुकिरस्मि २८ अनन्तइति नागानांनिर्विषाणांराजाअनन्तः शेषोहमस्मि

भाषाअनुवाद

और आयुधोंमेवज्रऔधेनुवोंमेकामधेनुऔप्रजावोंका उत्पत्तिकारी जोकन्दर्पसो मैहौं तथासर्पोंमेवासुकीभीहमैजानो विषधारियोंकीसर्पसंज्ञाहै २८ नागों मेअनन्तशेषनाग औरजलजीवो मेवरुणराजामैहौं औपित्तरो मेअर्यमातथा दण्डकारियोंमेयमराजहमैहूं नागऔसर्पकेवीचविषरहितकोनाग कहते हैं २९

CC-0. In Public Domain. Digitized by eGangotri

प्रल्हादश्चास्मिदैत्यानांकालःकलयतामहं मृगाणाञ्चमृगेन्द्रोऽहंवैनतेयश्चपक्षिणां ३०
पवनःपवतामस्मिरामःशस्त्रभृतामहं झषाणांमकरश्चास्मिस्रोतसामस्मिजाह्नवी ३१

शाङ्करभाष्यं

प्रल्हादइति प्रल्हादोनामचास्मिदैत्यानांदितिवंश्यानां कालःकलयतांकलनंगणनंकुर्व्वतामहंमृगाणाञ्चमृगेन्द्रःसिंहोव्याघ्रोवाहं वैनतेयश्चगरुत्मान्विनतासुतः पक्षिणांपतत्रिणामहं ३० पवनोवायुःपवतांपावयितॄणांअस्मि रामःशस्त्रभृतामहं शस्त्राणांधारयितॄणांदाशरथीरामोहंझषाणांमत्स्यादीनांमकरोनामजातिविशेषोहंस्रोतसांस्रवन्तीनामस्मिजाह्नवीगङ्गा ३१ सर्गाणामिति सर्गाणांसृष्टीनां आदिरन्तश्चमध्यञ्चैवाहमुत्पत्तिस्थितिलयानांअहमर्जुनभूतानां जीवाधिष्ठितानामेवादिरन्तश्चेत्याद्युक्तमुपक्रमइहतुसर्व्वस्यैवसर्गमात्रस्येतिविशेषःअध्यात्मविद्याविद्यानामोक्षार्थत्वात्प्रधानमस्मिवेदोर्थनिर्णयहेतुत्वात्प्रवदतांप्रधानमतःसोहमस्मि प्रवक्तृद्वा

आनन्दगिरिकृतटीका

अहमादिश्चेत्यादावुक्तमेवपुनरिहोच्यतेतथाचपुनरुक्तिरित्याशंक्याह भूतानामिति सर्गशब्देनसृज्यन्तइतिसर्व्वाणिकार्याणिगृह्यन्ते अध्यात्मविद्येति आत्मन्यन्तःकरणपरिणतिरविद्यानिवर्त्तिकागृहीताप्रवदतांसवन्धीवादोवीतरागकथा तत्वनिर्णयावसाना यदाप्रवदतामिति लक्षणय कथाभेदोपादानंतदानिर्द्धारणेषष्ठीयाह प्रवक्तीति ३१ ३२

स्वामिकृतटीका।

यादसांजलचराणां मध्येराजावरुणोऽस्मि पितॄणांराजाअर्यमास्मि संयमतां नियमनंकुर्वतांमध्येयमोऽस्मि २९ प्रल्हादइति कलयतांवशीकुर्व्वतांगणयतांवामध्येकालोहमस्मि मृगेन्द्रःसिंहःपक्षिणांमध्येगरुडोऽस्मि ३० पवनइति पवतां पावयितॄणांवेगवतांवा मध्येवायुरहमस्मि रामोदाशरथिः झषाणांमत्स्यानांमध्येमकरनाम मत्स्यजातिविशेषोहं स्रोतसांप्रवाहोदकानांमध्येभागीरथी ३१

भाषाअनुवाद

दैत्योंमेप्रल्हादमैहौंऔरवशकरनेवालोंमेअथवासंख्यामेकालमैहौं मृगजातिमेमृगेन्द्रकहेसिंहमै तथापक्षियोंमेगरुडमैहौं ३० औरपवित्रतथावेगवानोंमे पवनकहेवायुऔ शस्त्रधारियोंमेराम दशरथकेपुत्रहमकोजानो तथामछलियोंमेमकरनाममत्स्यमैहौंऔरस्रोत कहे प्रवाहरूपनदियोंमे जान्हवीगङ्गाभीमैहौं ३१

CC-0. In Public Domain. Digitized by eGangotri

सर्गाणामादिरन्तश्चमध्यञ्चैवाहमर्जुन अध्यात्मविद्याविद्यानांवादःप्रवदतामहं ३२
अक्षराणामकारोस्मिद्वन्द्वःसामासिकस्यच अहमेवाक्षयःकालोधाताहंविश्वतोमुखः३३

शाङ्करभाष्यं ।

रेणवदनभेदानामेववादजल्पवितण्डानामिहग्रहणंप्रवदतामिति ३२

अक्षराणामिति अक्षराणांवर्णानामकारोवर्णोस्मिहन्द्वःसमासोस्मि सामासिकस्यसमाससमूहस्यकिञ्चअहमेवाक्षयोऽक्षीणःकालःप्रसिद्धःक्षणलवाख्यःअथवा परमेश्वरःकालस्यापिकालोस्मि धाताहंकर्मफलस्यविधातासर्व्वजगतोविश्वतोमुखःसर्वतोमुखः ३३

आनन्दगिरिकृतटीका

सर्व्वेश्वरशब्दस्यमुखमर्थान्तरमाह अथवेति ३३ भाविकल्पानामित्युक्तमेवस्पष्टयति उत्कर्षेति कीर्त्तिर्धार्म्मिकत्वनिमित्ता ख्यातिःश्रीर्लक्ष्मीःकान्तिःशोभावाक्वाणीसर्व्व

स्वामिकृतटीका ।

सर्गाणामिति सृज्यन्तइति सर्गआकाशादयस्तेषामादिरन्तश्चमध्यञ्चैवाहं अहमादिश्चमध्यञ्चेत्यनष्टत्वादिकर्तृत्वंपारमैश्वर्यमुक्तं अनतुसृष्टिस्थितिप्रलयामद्विभूतित्वेनधेयादित्युच्यतइतिविशेषः अथात्मविद्याआत्मविद्याप्रवदतांवादिनांसम्बन्धिन्योवादजल्पवितण्डाख्यास्तिस्रःकथाप्रसिद्धास्तासांमध्येवादोऽहं यत्रद्वाभ्यामप्रमाणतस्तर्कतश्चस्वपक्षःस्थाप्यते परपक्षश्चदूषणजातिनिग्रहस्थानैर्दूष्यते सजल्पोनामयत्रत्वेकःस्वपक्षंस्थापयति अन्यतुकूलजातिनिग्रहस्थानैस्तत्पक्षंदूषयति नतुस्वपक्षंस्थापयति साचितण्डनामकथा तत्रजल्पवितण्डेविजिगीषमाणयोर्वादिनोःशक्तिपरीक्षामात्रफले वादस्तवीतरागयोः शिष्याचार्ययोर्व्वातत्वनिरूपणफलः अतोऽमौश्रेष्ठत्वान्मद्विभूतिरित्यर्थः ३२ अक्षराणामिति अक्षराणांवर्णानांमध्येअकारोऽस्मितस्यसर्व

भाषाअनुवाद ।

सर्गकहे आकाशादिपदार्थोंमे आकाशजोआदिमध्यअन्तमेसदावर्त्तमानसोमैहौं अथवासृष्टिमे आदिमध्यअन्तमैहूं तथाहे अर्जुन विद्योंमे अध्यात्मविद्याऔप्रवादकरनेवालोंकेवीचवादरूपमैहौं जिससेसिद्धान्तपक्षस्थिरहोताहै ३२
औरअक्षरोंकेमध्यमेअकारअक्षरमैहूं औरसमासोंकेविषेउभयपदप्रधान द्वन्द्वसमासमैहौंहूं औरअक्षयप्रवाहरूपकालजोसोहमहै औरफलप्रदानकरनेवालोंमे विश्वतोमुख कहेसर्वप्रकारऔसबतरफसेसर्वफलविधानकर्त्तामैंहौं ३३

CC-0. In Public Domain. Digitized by eGangotri

मृत्युः सर्व्वहरश्चाहमुद्भवश्च भविष्यतां कीर्त्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ३४

शाङ्करभाष्यं।

मृत्युरिति मृत्युर्द्विविधो धनादिहरः प्राणहरश्च तत्रयः प्राणहरः सर्व्वहरः स उच्यते सोहमित्यर्थोऽथवा परईश्वरः प्रलये सर्व्वहरणात् सर्वहरः सोऽहमुद्भव उत्कर्षोऽभ्युदयस्तत्प्राप्तिहेतुश्चाहं केषां भविष्यतां भाविकल्याणानामुत्कर्षप्राप्तियोग्यानामित्यर्थः कीर्त्तिः श्रीर्वाक्च नारीणां स्मृतिर्म्मेधा धृतिः क्षमेत्येता उत्तमाः स्त्रीणामहमस्मि यासामाभासमात्रसम्बन्धेनापि लोकाः कृतार्थमात्मानं मन्यन्ते ३४ बृहत्सामेति बृहत्सामतथा सम्नां मोक्षप्रतिपादकसामवेविशेषः प्रधानमस्मि गायत्री छन्दसामहं गाय

आनन्दगिरिकृतटीका

स्य प्रकाशिकास्मितश्चिरानुभूतस्मरणशक्तिः मेधा ग्रन्थधारणशक्तिः धृतिर्धैर्यं क्षमा मानापमानयोरविकृतचित्तता स्त्रीषु कीर्त्त्यादीनामुत्तमत्वमुपपादयति यासामिति ३४ वेदानां सामवेदोस्मीत्युक्तं तत्रावान्तरविशेषमाह बृहदिति छन्दसां मध्ये गायत्रीनामयच्छन्दस्तदहमित्ययुक्तं छन्दसामृग्ज्योतिरेकेण स्वरूपाभावादित्याशंक्याह गायत्र्यादीति द्विजातेर्द्वितीयजन्मजननत्वादित्यर्थः मार्गशीर्षो मृगशीर्षेण युक्ता पौर्णमास्यस्मि

स्वामिकृतटीका।

वाङ्मयत्वेन श्रेष्ठत्वात् तथा च श्रुतिः अकारो वै सर्वा वाक् सैषा स्पर्शोस्म्यभिव्यज्यमाना बह्वीनानारूपा भवतीति स्तूयत इति श्रैष्ठ्यं सामासिकस्य समाससमूहस्य मध्ये द्वन्द्वः रामकृष्णावित्यादिसमासोऽस्मि उभयपदप्रधानत्वेन श्रेष्ठत्वात् अक्षयः प्रवाहरूपः कालोहमस्मि कालः कलयतामहमित्यत्रायुर्गणनात्मकः सम्वत्सरशताद्यायुः स्वरूपकालः उक्तः स च तस्मिन्नायुषि क्षीणे सति क्षीयते अत्र तु प्रवाहात्मकोऽक्षयः काल उच्यत इति विशेषः कर्म्मफलविधातॄणां मध्ये विश्वतोमुखो धाता सर्वकर्म्मफलविधाताहमित्यर्थः ३३

मृत्युरिति संहारकाणां मध्ये सर्वहरो मृत्युरहं भविष्यतां भाविकल्पानां प्राणिनामुद्भवोऽभ्युदयोऽहं नारीनां मध्ये कीर्त्त्याद्याः सप्तदेवतारूपाः स्त्रियोऽहं यासामाभासमात्रयोगेन प्राणिनः श्लाघ्या भवन्तीति ताः कीर्त्त्याद्याः स्त्रियो मद्विभूतयः ३४

भाषाअनुवाद।

संहारकारियों के मध्य मे सर्वसंहारकारी मृत्यरूप हम को जानो और होनेवाली वस्तुवों मे उद्भवपदार्थ हम हैं और स्त्रियों मे सप्त नारी कहे कीर्त्ति श्री वाणी स्मृति मेधा धृति क्षमा ये रूप मेरे हैं कि जिनको पाय कर मनुष्य धन्य होते है ३४

CC-0. In Public Domain. Digitized by eGangotri

बृहत्सामतथासाम्नांगायत्रीच्छन्दसामहं मासानांमार्गशीर्षोहमतूनांकुसुमाकरः ३५
द्यूतंछलयतामस्मितेजस्तेजस्विनामहं जयोऽस्मिव्यवसायोस्मिसत्वंसत्ववतामहं ३६
वृष्णीनांवासुदेवोस्मिपाण्डवानांधनञ्जयः मुनीनामप्यहंव्यासःकवीनामुशनाःकविः ३७

शाङ्करभाष्यं

त्र्यादिछन्दोविशिष्टानामचांगायत्रीऋगहमित्यर्थः मासानामितिमासानांमार्गशीर्षोऽहमतूनांकुसुमाकरोवसन्तः ३५ द्यूतमिति द्यूतमक्षदेवनादिलक्षणंछलयतांछलस्यकर्तृणामस्मि तेजस्विनांतेजोऽहं जयोस्मिजेतृणां व्यवसायोस्मि व्यवसायिनां सत्त्वंसत्त्ववतां सात्विकवतांसात्त्विकानांमहं ३६

आनन्दगिरिकृतटीका ।

न्निति मागशीर्षोमासःसोहं पक्वशस्याद्यत्वादित्याह मासानामिति वसन्तोरमणीयत्वादिति शेषः ३५ द्यूतमुक्तलक्षणंसर्व्वस्वापहारकारणमन्यायापदेशेनपराभिप्रेतंनिघ्नतां स्वाभिप्रेतंवासंपादयतामित्याह छलस्येति तेजोऽप्रतिहताज्ञा उत्कर्षो जयः व्यवसायःफलहेतुरुद्यमः धर्म्मज्ञानवैराग्यादिसत्त्वकार्यंसत्वं उशनाःशुक्रः कविशब्दोत्रयौगिको नरूढ़ःपौनरुक्त्यात् ३६ ३७

स्वामिकृतटीका

बृहदिति त्वांइन्द्रहवामहइत्यस्यांऋचिगीयमानंबृहत्सामाहं तेनचेन्द्रः सर्व्वेश्वरत्वेनस्तूयतइतिश्रैष्ठ्यं छन्दोविशिष्टानांमन्त्राणांमध्येगायत्रीमन्त्रोऽहं द्विजत्वापादकत्वेनसोमाहरणेनचश्रेष्ठत्वात् कुसुमाकरोवसन्तः ३५ द्यूतमिति छलयतामन्योन्यवञ्चनपराणांसम्बन्धिद्यूतमस्मि तेजस्विनांप्रभाववतांतेजःप्रभावोस्मि जत्रीणांजयोस्मि व्यवसायिनामुद्यमवतांव्यवसायउद्यमोस्मि सत्त्ववतांसात्त्विकानांसत्त्वमहं ३६

भाषाअनुवाद

औरसामवेदमेमन्त्रब्राह्मणगद्यपद्यभूतश्रुतियोंकेमध्यमें बृहत्सामनामहमको जानो जिससेइन्द्रगायेजातेहैं औरछन्दबन्धयुक्तमन्त्रोंकेमध्य गायत्रीहमहैं और मासमहीनोंमे मार्गशीर्षकहेअगहनमासहमहैं औऋतुवोंमे वसन्तऋतुमैहौं ३५ छलवस्तुवोंमे द्यूतकहेजुआमैहौं औरतेजस्वियोंमे तेजजोप्रतापसोमै तथा जयऔरव्यवसायकहेउद्यमभीमै औरसतोगुणीजितनेहैंउनमे सतोगुणहमहैं ३६ औरवृष्णिवंशियोंमे वासुदेवकृष्णहमहैं जोतुमकोउपदेशकरतेहैं और पाण्डवोंमेअर्जुनजोतुमसोमैहूं औमुनियोमे व्यासदेवतथाकवियोंमे उसनाशुक्रहमहैं ३७

CC-0. In Public Domain. Digitized by eGangotri

दण्डोदमयतामस्मिनीतिरस्मिजिगीषतां मौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहं ३८
यच्चापिसर्वभूतानांबीजंतदहमर्जुन नतदस्तिविनायत्स्यान्मयाभूतंचराचरं ३९

शाङ्करभाष्यं

दृष्णीनामिति दृष्णीनांयादवानांवासुदेवोस्मिअयमेवाहंत्वत्सखा पाण्डवानांधनञ्जयस्त्वमेव मुनीनांमननशीलानांसर्वपदार्थज्ञानिनामप्यहंव्यासः कवीनांक्रान्तदर्शिनामुशनाःकविरस्मि ३७ दण्डइति दण्डोदमयतांदमयितृणामस्मिअदान्तानांदमनकारणंनीतिरस्मिजिगीषतांजेतुमिच्छतां मौनञ्चैवास्मिगुह्यानांगोप्यानांज्ञानंज्ञानवतामहं ३८ यच्चापीति यच्चापिसर्वभूतानांबीजंप्ररोहकारणंतदहमर्जुन प्रकरणोपसंहारार्थं विभूतिसंक्षेपमाह नतदस्तिभूतंचराचरंवा मयाविनायत्स्याच्चेन्मयाप्रकृष्टंपरित्यक्तंनिरात्मकंशून्यं हितत्स्यादतोमदात्मकंसर्वमित्यर्थः ३९

आनन्दगिरिकृतटीका

अदान्तानुत्पथान्पथिप्रवर्त्तयतांदण्डोऽनुत्पथप्रवृत्तौनिग्रहेहेतुरित्यर्थःनीतिर्न्यायोधर्म्मस्यजयःपापस्यप्रकाशकः मौनंवाचःसंयमत्वमुत्तमावा चतुर्थाश्रमवृत्तिः श्रवणादिद्वारापरिपक्वसमाधिजन्यं सम्यग्ज्ञानं ३८ जाड्यमात्रप्रतिबिम्बितंचैतन्यंबीजं किमितिस्थावरंजङ्गमंवा त्वदतिरेकेणनभवति तत्राह मयेति तस्यापिस्वरूपेणसत्वमाशंक्योक्तं शून्यंहीति आत्मनोपकर्षादित्यर्थः मयेवसच्चिदानन्दस्वरूपेण सर्वस्यसिद्धेरित्यतःशब्दार्थः ३९ दिव्यानांविभूतीनांपरिमितत्वशङ्कांवार

स्वामिकृतटीका।

दृष्णीनामिति वासुदेवोयोहंत्वामुपदिशामि धनञ्जयस्त्वमेवमद्विभूतिःमुनीनांवेदार्थमननशीलानांवेदव्यासोस्मि कवीनांशास्त्रदर्शिनामुशनानामाकविःशुक्रः ३७
दण्डइति दमयतांदमनकर्त्तॄणांसम्बन्धीदण्डोऽस्मियेनासंयताअपिसंयताभवन्तिसदण्डोमद्विभूतिःजेतुमिच्छतांसम्बन्धिनीसामाद्युपायरूपानीतिरस्मि गुह्यानांगोप्यानांगोपनहेतुर्मौनवचनमस्मि नहितूष्णींस्थितस्याभिप्रायोज्ञायतेज्ञानवतांतत्वज्ञानिनांयत्ज्ञानं तदहमस्मि ३८ यच्चापीति यदपिसर्वभूतानांबीजंप्ररोहकार

भाषा अनुवाद

दमकरनेवालोंमेदण्डरूपहम तथाजीतनेवालोंकीनीतिहमैमानो गुह्यपदार्थोंमेमौन जोसोहम औरज्ञानवानोंमेज्ञानरूपमीहमी है ३८ औरयावतजीवोंमे जोबीज सोहेअर्जुनहमहैं औरजोमेरेबिनाहै सोकुछनहींहै अर्थात्चराचर

CC-0. In Public Domain. Digitized by eGangotri

नान्तोऽस्तिममदिव्यानांविभूतीनांपरन्तप एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरोमया ४०
यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेववा तत्तदेवावगच्छत्वं ममतेजोंशसम्भवः ४१

शाङ्करभाष्यं

नान्तोस्तीति नान्तोस्तिममदिव्यानांविभूतीनांविस्तराणांपरन्तप नहीश्वरस्य सर्वात्मनोदिव्यानांविभूतीनांदृयत्ताशक्यावक्तुं ज्ञातुंवाकेनचित्एषतूद्देशतएकदेशेन प्रोक्तो विभूतेर्विस्तरोमया ४०

यद्यदिति यत्यत्लोकेविभूतिमद्विभूतियुक्तंसत्ववस्तुजातंश्रीमदूर्जितमेव वा श्रीः लक्ष्मीःतयासहितंऊत्साहोपेतंवा तत्तदेवावगच्छत्वंजानीहिममेश्वरस्य तेजोंशसम्भवंतेजसोंशःएकदेशःसम्भवोयस्य तत्तेजोंशसम्भवमित्यवगच्छत्वंजानीहि ४१

आनन्दगिरिकृतटीका ।

यति नेत्यादिना तदेवोपपादयति नहीति कथंतर्हिविभूतेर्विस्तरोदर्शितस्तत्राह एषत्विति ४० अनुक्तअपिपरस्यविभूतीःसंग्रहीतुंलक्षणमाह यद्यदिति वस्तुप्राणिजातंश्रीमत् सम्पद्विमद्वाशोभावद्वाकान्तिमद्वासप्राणंबलवदूर्जितंतदाह उत्साहेति सम्भवत्यात्मादितिसम्भवःतेजसश्चैतन्यस्येश्वरशक्तेर्वांशस्तेजोंशःसम्भवोस्येतितेजोंशसम्भवं

स्वाकिकृतटीका

णंतदहंतत्रहेतुःमयाविनायत्स्यात् भवेत्तच्चरमचरंवा भूतंनास्त्येवेति ३९ प्रकरणार्थमुपसंहरति नान्तोऽस्तीति अनन्तत्वाद्विभूतीनां ताःसाकल्येनवक्तुंनशक्यन्ते एषतुविभूतिविस्तरउद्देशतःसंक्षेपतःप्रोक्तः ४०

पुनश्चसाकांक्षंप्रतिकथञ्चित्साकल्येनकथयति यत्यदिति विभूतिमदैश्वर्ययुक्तं श्रीमत्सम्पत्तियुक्तं ऊर्जितंकेनापिप्रभाववलादिनागुणेनातिशयितंयद्यत्सत्वं वस्तुमात्रं तत्तदेवममतेजसःप्रभावख्यांशेनसम्भूतंजानीहि ४१ अथवाकिमेतेनपरिच्छि

भाषाअनुवाद

मेरेविनाभीकुछबाकीनहींहै ३९ जिसहेतुहेपरन्तपअर्जुन मेरीदिव्यविभूतियों काअन्तनहींहै इससेसम्पूर्णकहीनहोंजायसकतींहैं इतनीजोकहा सोउद्देशकहे संक्षेपसे मैनेलक्षित कराया है ४०

यहसुनिअधिकश्रवणकेआकांक्षीअर्जुनसेभगवानसंक्षेपरूपअपनीसर्वरूपता कहतेहैं कि ऐश्वर्ययुक्त अथवाबलयुक्त या प्रभावयुक्त तथाविद्याबुद्धिरूपगुणयुक्त जोवस्तुमात्रहै सोमेरेअंशऔप्रभावसेजानो अर्थात्उसमेमेराविशेषअंशहै ४१

CC-0. In Public Domain. Digitized by eGangotri

अथवावहुनैतेनकिंज्ञातेनतवार्जुन विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् ४२
इति श्रीभगवद्गीतायांयोगशास्त्रेविभूतियोगोनामदशमोऽध्यायः १०

शाङ्करभाष्य

अथवेति अथवावहुनाएतेनैवमादिनाकिंज्ञातेनतवार्जुनस्यात् सावशेषेण अशेषतस्त्वमिममुच्यमानमर्थंशृणु विष्टभ्यविशेषतस्तम्भनंदृढंकृत्वाइदंकृत्स्नंजगत् एकांशेन एकावयवेनैकपादेनसर्व्वभूतस्वरूपेणेत्येतत्तथाचमन्त्रवर्णपादोस्यसर्व्वाभूतानीति स्थितोहंइति ४२ इति श्रीशाङ्करभाष्येदशमोध्यायः १०

आनन्दगिरिकृतटीका

तदाह तेजसइति ४१ सर्व्वेषांसुगमत्वायावयवस्यविभूतिमुक्त्वा भक्तानुग्रहार्थं साकल्येनतामाह अथवेति पक्षान्तरपरिग्रहार्थमथवेत्युक्तं वहुनाविस्तीर्णेनैतेनग्रन्थेन संज्ञातेनसावशेषेणतवशक्तस्यनकिञ्चित्फलंस्यादित्याह वहुनेति नहिविभूतियुक्तासु ज्ञातासुसर्व्वंज्ञायते कासाञ्चिदेवविभूतीनामुक्तत्वादित्यर्थःतर्हिकेनोपदेशेनाल्पाक्षरेणसर्वार्थोज्ञातुंशक्यतेतत्राह अशेषतइति विशेषतस्तम्भनंविधरणं सर्व्वभूतस्वरूपेणसर्व्वप्रपञ्चोपादानशक्त्युपाधिकेनैकेनपादेनकृत्स्नंजगत्विधृत्यस्थितोस्मीति सम्बन्धः तत्रैवश्रुतिंप्रमाणयति तथाचेति तदनेनभगवतोनानाविधविभूतीर्ध्येयत्वेन ज्ञेयत्वेनचोपदिश्यान्तेसर्व्वप्रपञ्चात्मकंध्येयंरूपंदर्शयित्वा त्रिपादस्यामृतंदिवीति प्रपञ्चाधिकंनिरुपाधिकंतत्वमुपदिशता परिपूर्णः सच्चिदानन्दैकतानः तत्पदलक्षोऽर्थोनिर्द्धारितः ४२ इति आनन्दगिरिकृतटीकायांदशमोध्यायः १०

स्वामिकृतटीका

न्नविभूतिदर्शनेनसर्व्वत्रसमदृष्टिमेवकुर्वित्याह अथवेति वहुनापृथग्ज्ञातेनकिंतव कार्यं यस्मादिदंसर्व्वंजगदेकांशेनैकदेशमात्रेणविष्टभ्यधृत्वाव्याप्येतिवा अहमेवावस्थितः नमद्व्यतिरिक्तंकिञ्चिदस्ति पादोस्यविश्वाभूतानीतिश्रुतेः इन्द्रियद्वारतश्चित्तेवहिर्धावतिसत्यपि इशदृष्टिविधानायविभूतीर्दशमेऽब्रवीत् ४२ इतिदशमोध्यायः १०

भाषाअनुवाद

अथवाहेअर्जुन इससवबखेडेसेतुमकोक्याप्रयोजनहै सकलवस्तुमेहमको देखोयहकहतेहैंकियावत्पदार्थमेमैव्यापरहाहौं यहजगतमेरारूपहैमोहिछोडिकुछमात्रभी नहीं है ४२ इति जगन्नाथसुकुलविरचितमनभानीनामभाषायांदशमोध्यायः१०

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता ।

एकादश अध्यायः

अर्जुनउवाच मदनुग्रहायपरमंगुह्यमध्यात्मसंज्ञितं यत्त्वयोक्तंवचस्तेनमोहोयं विगतोमम १

शाङ्करभाष्यं ।

भगवतोविभूतयउक्तास्तत्रचविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदितिभगवताभिहितंश्रुत्वायज्जगदात्मरूपमाद्यमैश्वरं तत्साक्षात्कर्त्तुमिच्छन्नर्जुनउवाच मदनुग्रहार्थंपरमंनिरतिशयंगुह्यंगोप्यंअध्यात्मसंज्ञितमात्मनात्मविवेकविषयं निरतिशयंयत्त्वयोक्तंवचोवाक्यं तेनवचसामोहोयंविगतो ममाविवेकबुद्धिरपगतेत्यर्थः १

आनन्दगिरिकृतटीका ।

तेनतेनात्मनाभगवदनुसन्धानार्थमुक्ताविभूतीरनुवदति भगवतइति परस्यसोपाधिकंनिरुपाधिकञ्च चिद्रूपंध्येयत्वेनज्ञेयत्वेनचोक्तमित्यर्थः सोपाधिकमैश्वरंरूपमशेषजगदात्मकंविश्वरूपाख्यमधिकृत्याध्यायान्तरमवतारयन्ननन्तरप्रश्नोपयोगित्वेनवृत्तंकीर्त्तयति तत्रचेति यदेतदशेषप्रपञ्चात्मकमखिलस्यैतस्यजगतःकारणंसर्वज्ञंसर्वैश्वर्यवद्रूपमुक्तंतदिदंश्रुत्वा तस्यसाक्षात्कारंयियाचयिषुरादौष्टष्टवानित्याह श्रुत्वेति मयिकरुणांनिमित्तीकृत्योपकारोनुग्रहस्तदर्थमिति वचसोविशेषणं निरतिशयत्वं परमपुरुषार्थसाधनत्वं अशोच्यानित्यादित्वंपदार्थप्रधानवाक्यं मोहस्यायमित्यात्मसात्त्विकत्वं दर्शयति १

स्वामिकृतटीका

विभूतेर्वैभवंप्रोच्यकृपयापरयाहरिः दिदृक्षोरर्जुनस्याथविश्वरूपमदर्शयत् पूर्व्वाध्यायान्तेविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदिति विश्वात्मकंपारमेश्वररूपमु

भाषाअनुवाद

श्रीभगवानकृष्णचन्द्रनेअतिकृपाकरकेअपनीविभूतिकाविभवअर्जुनसेकहा सो सुनिकैदर्शनेच्छुअर्जुनको विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदित्यादिश्लोकसे भगवाननेविश्वात्मकपरमेश्वरस्वरूपप्रसंगवशतेदेखाया तोअर्जुनभगवदुक्तपूर्ब्बवचनोंकी प्रशंसाकरतेहुये अबएकादशध्यायकेआरम्भमेचारिश्लोकसेकहतेहैं किअशोच्यानन्वशोचस्त्वमित्यादि दूसरेअध्यायकेग्यारहें श्लोकसेलेकर छठयेंअध्यायतक मेरेशोकनिवृत्तिकेअर्थ परमात्मनिष्ठअतिगोपनीयआत्मअनात्मबिचारकेजोवचनआपनेकहा उनसेहमहन्तार्थयेशब्दगणमानेयोग्यऐसीजोमेरीभ्रम सोमष्टहोगई क्योंकि आत्माकोकर्त्तृत्वआदिकुछनहींहै यहआपनेकहा सोठीकहीहै १

CC-0. In Public Domain. Digitized by eGangotri

भवाप्ययौहिभूतानांश्रुतौविस्तरशोमया त्वत्तःकमलपत्राक्षमाहात्म्यमपिचाव्ययं २

शाङ्करभाष्यं

किञ्च भवेति भवउत्पत्तिरप्ययःप्रलयोभूतानांतौभवाप्ययौश्रुतौविस्तरशोमयान संक्षेपतस्त्वत्तत्वःत्सकाशात्कमलपत्राक्षकमलस्यपत्रंकमलपत्रंतद्वत्अक्षिणीयस्य तव सत्वंकमलपत्राक्षःहेकमलपत्राक्ष महात्म्यमपिचाव्ययमक्षयंश्रुतमित्यनुवर्त्तते २

आनन्दगिरिकृतटीका।

अविवेकबुद्धिरज्ञानविपर्य्यासात्मिकासप्तमादारभ्यतत्पदार्थनिर्णयार्थमपि भगवदुक्तंवचोमयाश्रुतमित्याहकिञ्चेति तौभूतानामुत्पत्तिप्रलयौत्वत्तःश्रुतावित्याभ्यां सम्बध्यते महात्मनस्तवभावोमाहात्म्यंपारमार्थिकंसोपाधिकंवा सर्व्वात्मत्वादिरूपं श्रुतमितिपरिणम्यानुवृत्तिंद्योतयितुं अपिचेत्युक्तं २

स्वामिकृतटीका।

पक्षिप्तं तद्दिदृक्षुःपूर्व्वोक्तमभिनन्दन्नर्जुनउवाच मदनुग्रहायेतिचतुर्भिः ममानुग्रहायशोकनिवृत्तयेपरमंपरमात्मनिष्ठंगुह्यंगोप्यमपिअध्यात्मसंज्ञितमात्मानात्मविवेकविषयंयत्त्वयोक्तंवचः अशोच्यानन्वशोचस्त्वमित्यादिषष्ठाध्यायपर्यन्तंयद्वाक्यंतेनममायंमोहोऽहंहन्ताएतेहन्यन्तइत्यादिलक्षणभ्रमोविगतो विनष्टः आत्मनः कर्तृत्वाद्यभावोक्तेः १ किञ्च भवेति भूतानांभवाप्ययौसृष्टिप्रलयौत्वत्तःसकाशात्तेभवत इतिश्रुतोमया अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथेत्यादौविस्तरशःपुनःपुनःकमलस्य पत्रेइवसुप्रसन्नेविशालेअक्षिणीयस्यतव हेकममपत्राक्ष माहात्म्यमपिचाव्ययंअक्षयंश्रुतं विश्वसृष्ट्यादिकर्त्तृत्वेऽपिसर्व्वनियन्तृत्वेपिशुभाशुभकर्म्मकारयितृत्वेपि बन्धमोक्षादिविचित्रफलदातृत्वेपिअविकारावैषम्यासङ्गौदासीन्यादिलक्षणमपरिमितं महत्वञ्चश्रुतं अव्यक्तंव्यक्तिमापन्नंमन्यन्तेमामबुद्धयइतिमयाततमिदंसर्व्वमिति न च मांतानिकर्म्माणीतिसमोहंसर्वभूतेष्वित्यादिनाच अतस्त्वत्परतन्त्राणामपि जीवानामहंकर्त्तेत्यादिमदीयेमोहोविगतइतिभावः २

भाषा अनुवाद

और भूतोंकीसृष्टितथाप्रलयभीआपहीसेहोती यहभीमैनेविस्तारसे सुना औहेकमलपत्राक्ष श्रीकृष्ण आपकाअव्ययकहे अक्षय माहात्म्यभीआपसे सुना तो अबजीव सकलआपकेअधीनहैंयहजानाऔरअहंकर्त्ताभोक्ताइत्यादिमेरामोह अबसम्पूर्णदूरहोगया २ औरजोआपनेसप्तमअध्यायमेकहाकिभूतसृष्टितथाप्रलय

CC-0. In Public Domain. Digitized by eGangotri

एवमेतद्यथात्थत्वमात्मानंपरमेश्वरं द्रष्टुमिच्छामितेरूपमैश्वरंपुरुषोत्तम ३
मन्यसेयदितच्छक्यंमयाद्रष्टुमितिप्रभो योगेश्वरततोमेत्वंदर्शयात्मानमव्ययं ४

शाङ्करभाष्यं

एवमितिएवमेतन्नान्यथायथायेनप्रकारेणात्थकथयसित्वमात्मानंपरमेश्वरं तथापिद्रष्टुमिच्छामितेतवज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिःसंपन्नमैश्वरंवैष्णवंरूपंपुरुषोत्तम ३ मन्यसइति मन्यसेचिन्तयसियदिमयार्जुनेनतत्शक्यंद्रष्टुमितिप्रभोस्वामिन् योगेश्वरयोगिनोयोगास्तेषामीश्वरोयोगेश्वरःहेयोगेश्वरयस्मादहमतीवार्थीद्रष्टुंततः तस्मान्मेमम मदर्थंदर्शयत्वमात्मानमव्ययं ४ एवञ्चोदितोऽर्जुनेन भगवानुवाच पश्यमइति पश्यमेममपार्थरूपाणिशतशोऽथसहस्रशःअनेकशइत्यर्थः तानिचनानाविधानि अनेकप्रकाराणिदिविभवानिदिव्यान्यप्राकृतानिचनानावर्णाकृतीनिचनानानीलपी

आनन्दगिरिकृतटीका।

त्वदुक्तेर्थेऽविश्वासाभावात् नतस्मिन्दिदृक्षा किन्तुकृतार्थीबुभूषयाइत्याह एवमेतदिति येनप्रकारेणसोपाधिकेननिरुपाधिकेनचेत्यर्थः यदिममाप्तत्वंनिश्चित्यमद्वाक्यंतेमानं तर्हिकिमिति मदुक्तंदिदृक्षतेकृतार्थीबुभूषयेत्युक्तंमत्वाह तथापीति चतुर्भुजादिरूपनिदृक्षार्थमाह ऐश्वरमिति तद्व्याचष्टे ज्ञानेत्यादिना ३

स्वामिकृतटीका।

किञ्च एवमेतदिति भवाप्ययौहिभूतानामित्यादिमयाश्रुतंयथाचेदानीमात्मानं त्वमात्थविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदित्येवंकथयसि हेपरमेश्वर एतदेवमेवअवाप्तविश्वासोममनास्ति तथापिहेपुरुषोत्तमतवैश्वर्यंज्ञानैश्वर्यशक्तिवीर्यादिभिः सम्पन्नंत्वद्रूपंकौतूहलादहंद्रष्टुमिच्छामि ३ नचाहंद्रष्टुमिच्छामीत्येतावतैवत्वयातद्रूपं

भाषाअनुवाद

आदिकामोंकाकारणमैं हूं औरदशमअध्यायकेअन्तमेंकहा किविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदिति औअबभीजोरूपआपअपनाकहतेहोसोअैसाहीहैइसमेंहमैकुछसन्देहनहींहैतौभीहेपुरुषोत्तमज्ञानअैश्वर्यबलवीर्यऔतेजसेसम्पन्नकहे युक्तुमारेरूपकोअतिआश्चर्यसेमैंदेखनेकीइच्छा करता हूं ३ औरमेरीइच्छा देखनेकीहै इसहेतुआपकोअपनारूपदेखावनाउचितहै यहकुछबातनहींहै परन्तुहेयोगेश्वर जोवहआपकाईश्वरस्वरूपहमारेदेखनेयोग्यहोय औरहमदेखनेसकैं तोहेप्रभो वहीअव्ययस्वरूपआपाहमैंकृपाकरि दिखावोयहअर्जुननेकहा४

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः नानाविधानि दिव्यानि नानावर्णाकृतीनि च ५

शाङ्करभाष्यं।

तादिप्रकारावर्णाविलक्षणास्तथाऽऽकृतयोऽवयवसंस्थानविशेषा येषांरूपाणांतानिना नावर्णाकृतीनिच ५ पश्यादित्यानिति पश्यआदित्यान्द्वादशवसूनष्टौरुद्रानेकादशाश्विनौद्वौमरुतःसप्तसप्तगणान्एतान्तथाच बहून्यन्यान्यपिअदृष्टपूर्वाणिमनुष्यलोकेत्वयात्वत्तोऽन्येनवा केनचित् पश्याश्चर्याणिरूपाण्यद्भुतानि भारत ६

आनन्दगिरिकृतटीका

द्रष्टुमयोग्येकुतोदिदृक्षेत्याशंक्याह मन्यसइति प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनेभ्यःइतिप्रभुः लक्षणयायोगशब्दार्थमाह योगिनइति ततइत्यादिव्याचष्टे यस्मादिति ४ अर्जुनमतिभक्तंसखायंप्रार्थितप्रतिश्रवणेनाश्वासयितुमाह एवमिति ५

दिव्यानिरूपाणिपश्येत्युक्तंतान्येवलेशतोऽनुक्रामति पश्यादित्यानिति तान्मरुतस्तथापश्येति सम्बन्धः नानाविधानीत्युक्तंतदेवस्फुटयति बहूनीति अदृष्टपूर्व्वा

स्वामिकृतटीका।

दर्शयितव्यंकिं तर्हि मन्यसइति योगिनएवयोगास्तेषामीश्वरमयार्जुनेनतद्रूपंद्रष्टुंशक्यमिति यदिमन्यसेततस्तर्हितद्रूपंपरमात्मानमव्ययंनित्यंममदर्शय ४ एवंप्रार्थितःसन्नत्यद्भुतंरूपंदर्शयिष्यन्सावधानोभवेत्येवमर्जुनमभिमुखीकरोति श्रीभगवानुवाच पश्येति चतुर्भिः रूपस्यैकत्वेऽपिनानाविधत्वाद्रूपाणीति बहुवचनंअपरिमितानि अनेकप्रकाराणिदिव्यान्यलौकिकानिममरूपाणिपश्य वर्णाःशुक्लकृष्णादयः आकृतयःअवयवविशेषाः नानाअनेकावर्णाआकृतयश्चयेषां तानिनानावर्णाकृतीनि ५

तान्येवाह पश्येति आदित्यादीन्ममदेहेपश्यमरुतएकोनपञ्चाशद्देवताविशेषान्अदृष्टपूर्व्वाणित्वयाचान्येनवापूर्व्वमदृष्टानिरूपाणि ६ किञ्च इहैकस्थमिति तत्रतव

भाषाअनुवाद

जबऐसीप्रार्थनाअर्जुननेकिया तबभगवानश्रीकृष्णचन्द्रनेअपनेरूपदेखावनेकामनोरथकरके अर्जुन कोसावधानहोउ यहकहिकरि चारिश्लोकसेकहते हैं कि हेपार्थअर्जुन अपरिमितनानाप्रकारकेअलौकिकमेरेरूपदेखो औरवर्णकहेशुक्लकृष्णआदिआकृति कहेकरचरणअङ्गसवयथायोगमेरादिव्यरूप नानावर्णनानाआकृति तुमदेखोजोदेखाचाहते हो ५

CC-0. In Public Domain. Digitized by eGangotri

पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा बहून्यदृष्टपूर्वाणिपश्याश्चर्याणिभारत ६
इहैकस्थंजगत् कृत्स्नंपश्याद्यसचराचरं ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ७
नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा दिव्यंददामितेचक्षुःपश्यमेयोगमैश्वरम् ८

शाङ्करभाष्यं ।

नकेवलमेतावदेव इहैकस्थमिति इहैकस्थंएकस्मिन्स्थितंजगत् कृत्स्नंसमस्तं पश्याद्येदानींसचराचरंसहचरेणाचरेणवर्त्तते ममदेहेगुडाकेश यच्चान्यज्जयपराजयादियच्छंकसे यद्वाजयेमयदिवानोजयेयुरिति यदशोचःतदपिद्रष्टुंयदीच्छसि ७

आनन्दगिरिकृतटीका

णिपूर्व्वमदृष्टानि नानावर्णाकृतीनीत्युक्तंव्यनक्ति आश्चर्य्याणीति ६ नकेवलमादित्यवस्वाद्येवमद्भुतंत्वयाद्रष्टुंशक्यं किन्तुसमस्तंजगदपिमद्देहस्थंद्रष्टुमर्हसीत्याह नेत्यादिना सप्तमीद्वयंमिथःसम्बध्यते समासान्तर्गतापिसप्तमीतत्रैवानीता यदीच्छसि तर्हीहैवपश्येति सम्बन्धः ७ मन्यसेयदीत्युक्तमनुवदति किंत्विति सप्तप्रश्नमनर्वाच्छ

स्वामिकृतटीका

परिभ्रमतावर्षकोटिभिरपिद्रष्टुमशक्यंकृत्स्नमपिचराचरसहितंजगदिहास्मिन्मदेहेऽवयवरूपेणैकस्थितमद्याधुनैव पश्यय्यच्चान्यज्जगदाश्रयभूतंकारणस्वरूपंजगत्सावस्थाविशेषादिकंजयपराजयादिकञ्चयच्चयदप्यन्यद्द्रष्टुमिच्छसितत्सर्व्वंपश्य ७

भाषाअनुवाद

अबसोईआपकहतेहैं किहेभारत सबआदित्यऔरवसुगणरुद्रगणतथाअश्विनीकुमारऔमरुतगण येसबदेवतोंकोमेरीदेहमेदेखो औरहेअर्जुन जोमेरारूप नतुमने नऔरकिसीनेकभीदेखाहै ऐसाअद्भुतमेरारूपदेखो ६ औरइसब्रह्माण्डकेबीच हरएकस्थानोंमेभ्रमणकरतेहुये जोसूर्यचन्द्रग्रहनक्षत्रादिसमस्तचराचर जिनकोकोटिवर्षमेभी कोईनहीदेखिसकैहै सोसबस्थावरजङ्गमसमेतसम्पूर्णजगत इसमेरीशरीरमे अवयवकहेअङ्गरूपदेखो औरहेगुडाकेशअर्जुन जगतकाआश्रय औ संसारकीअवस्था तथाजयपराजयआदिजोकुछऔरदेखाचाहोसोसबमेरेरूपमेदेखो ७ औरजोअर्जुननेकहा किवहरूपमेरेदेखनेजोग्यहोय तोदेखावोइसपरकहतेहैं किहेअर्जुन इनअपनेचर्मचक्षुकहेचमड़ेकीआंखोंसे हमारेउसरूपको नदेखसकोगे इससेहमतुमकोअलौकिकदिव्यज्ञानचक्षुदेतेहैं सोमेराईश्वरस्वरूपअघटनघनासमर्थकादर्शनभलीप्रकारसेकरो ८

CC-0. In Public Domain. Digitized by eGangotri

सञ्जय उवाच एवमुक्त्वाततोराजन् महायोगेश्वरोहरिः दर्शयामासपार्थाय परमंरूपमैश्वरं ९

शाङ्करभाष्यं

किन्तुनतुमामिति नतुमांशक्ष्यसेनस्वकीयेनचचक्षुषामांविश्वरूपधरंशक्ष्यसेद्रष्टमनेन प्राकृतेनस्वचक्षुषास्वकीयेनचक्षुषायेनतुशक्ष्यसेद्रष्टुंदिव्येनतद्दिव्यंददामितेतुभ्यंच क्षुस्तेनपश्यमेममयोगमैश्वरंईश्वरस्यममैश्वरंयोगंयोगशक्तयतिशयमित्यर्थः ८ एवंतं यथोक्तप्रकारेणोक्त्वाततोनन्तरंराजन्धृतराष्ट्रमहांश्चासौयोगेश्वरश्चमहायोगेश्वरो हरिर्नारायणःदर्शयामासदर्शितवान्प्रार्थायपृथासुतायपरमंरूपंविश्वरूपमैश्वरं ९ अनेकेति अनेकवक्त्रनयनंअनेकानिवक्त्राणिनयनानिचयस्मिन्रूपेतदनेकवक्त्रन

आनन्दगिरिकृतटीका

नंमांस्वचक्षुषानशक्योविद्रष्टुमित्याह नत्विति कथंतर्हित्वांद्रष्टुंशक्नुयामित्याशंक्याह येनेति दिव्यस्यचक्षुषोवक्ष्यमाणयोगशक्तयतिशयदर्शनेविनियोगंदर्शयति तेनेति ८ इमंवृत्तान्तंधृतराष्ट्रायसञ्जयोनिवेदितवानित्याह सञ्जयइति तदीयंविश्वरूपाख्यंरूपंनप्राकृतेनचक्षुषानिरीक्षितुंशक्यमंकिन्तुदिव्येनइत्यादियथोक्तप्रकारःअनन्तरंदिव्यचक्षुषःप्रदानादितिशेषः हरत्यविद्यांसकार्य्यांइति हरिः यदीश्वरस्यमायोपहितस्यपरमंसृष्टंरूपंतद्दर्शयाम्बभूवेत्याह परममिति ९ तदेवरूपंविशिन

स्वामिकृतटीका।

यदुक्तमर्जुनेनमन्यसेयदितच्छक्यमिति तत्राह नतुमामिति अनेनैवतुस्वीयेनच र्मचक्षुषामांद्रष्टुंनशक्ष्यसेशक्तोनभविष्यसिअतोदिव्यमलौकिकंज्ञानात्मकंचक्षुस्तुभ्यंद दामिममैश्वरमसाधारणंयोगंयुक्तिमघटनघटनासामर्थ्यंपश्य ८ एवमुक्त्वाभगवान र्जुनायस्वरूपंदर्शितवांस्तत्स्वरूपंदृष्ट्वार्जुनः श्रीकृष्णंविज्ञापितवानितीममर्थंषड्भिः श्लोकैर्धृतराष्ट्रंप्रतिसञ्जयउवाच एवमुक्तेति हेराजन्धृतराष्ट्रमहांश्चासौयोगेश्वर श्चहरिः परममैश्वरंरूपंदर्शितवान् ९ कथंभूतंतदित्यत्राह अनेकवक्त्रनयनमिति

भाषाअनुवाद

इसप्रकारसेकहिकरभगवाननेअर्जुनकोअपनाविराटरूपदेखाया तोवहरूपदे खिअर्जुननेश्रीकृष्णकोजैसाजानाऔदेखासोईकःश्लोकसेराजाधृतराष्ट्रकेप्रति सञ्ज यकहतेहैं किहेराजन्धृतराष्ट्र महात्माश्रीकृष्णयोगेश्वरनेअर्जुनसे येसववातेंक रकेअपनाऐश्वर्यविशिष्टपरमरूपअर्जुन कोदर्शनकराया ९ अबकिसप्रकारका

CC-0. In Public Domain. Digitized by eGangotri

अनेकवक्त्रनयन मनेकाद्भुतदर्शनं अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् १०
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयंदेवमनन्तंविश्वतोमुखं ११
दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता यदिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः १२

शाङ्करभाष्यम्।

यनंअनेकाद्भुतदर्शनंअनेकान्यद्भुतानिदर्शनीयविस्मापकानियस्मिन्रूपेतदनेकाद्भुतदर्शनंरूपंतथानेकदिव्याभरणंअनेकानिदिव्याभरणानियस्मिंस्तदनेकदिव्याभरणंतथादिव्यानेकोद्यतायुधं दिव्यानिअनेकानिउद्यतानिआयुधानियस्मिंस्तद्दिव्यानेकोद्यतायुधंदर्शयामासेति पूर्वेणसम्बन्धः१० किञ्च दिव्येति दिव्यमाल्याम्बरधरंदिव्यानिमाल्यानिपुष्पाणिअम्बराणिवस्त्राणिचधियन्तेयेनेश्वरेणतंदिव्यमाल्याम्बरधरंदिव्यगन्धानुलेपनंदिव्यागन्धाअनुलेपनंसर्वाश्चर्यमयंसर्वाश्चर्य्यप्रायंदेवमनन्तंनास्यान्तोस्तीति अनन्तस्तंविश्वतोमुखंसर्वभूतात्मत्वात्तंदर्शयामासार्जुनोददर्शेतिवाअध्याहियते ११

आनन्दगिरिकृतटीका

ष्टि अनेकेति दिव्याभरणादीनिहारकेयूरादीनिभूषणान्युद्यतानिउच्छ्रितानि १०
उक्तरूपवन्तं भगवन्तंप्रकारान्तरेणविशिनष्टि किञ्चेति अध्याहारोपिपदसंघटनासम्भवात् ११

स्वामिकृतटीका

अनेकानिवक्त्राणिनयनानिचयस्मिंस्तत् अनेकानामद्भुतानांदर्शनंयस्मिंस्तत् अनेकानिदिव्याभरणानियस्मिंस्तत् दिव्यान्यनेकान्युद्यतान्यायुधानियस्मिंस्तत् १० किञ्चदिव्येति दिव्यानिमाल्यान्यम्बराणिचधारयतीतितत् तथादिव्योगन्धोयस्यताद्दशमनुलेपनंयस्यतत् सर्वाश्चर्यमयमनेकाश्चर्यप्रायंदेवंद्योतनात्मकंअनन्तमपरिच्छि

भाषाअनुवाद

वहरूपहैसोकहतेहैं किअनेकहैं वक्त्रकहेमुखऔनेत्रतथाअनेकअनेकहैं अद्भुतवस्तुवोंकादर्शनजिसमेऔरअनेकदिव्यआभरणऔदिव्यअनेकआयुधधारणहैं जिसमेऐसारूपभगबाननेअर्जुनकोदेखाया १० औरदिव्यमाल्यकहेपुष्पऔदिव्यअम्बरकहेवस्त्रतथादिव्यगन्धलेपनहैं जिसरूपमेऔरनानाआश्चर्ययुक्ततथाअनन्तअपरिच्छिन्नऔसर्ब्बहैं मुखजिसमेसोरूपदेखाया ११ औरउसरूपकीनिरुपमप्रभाप्रकाशकरतेहैं किआकाशमेजोएककालसहस्रसूर्यकेउदयकीप्रभाहोउठैतोकदाचितउनमहात्माकीकान्तिकेकोईअंशकीउपमाहोयतोहोयनहींतोउसरूपकीउपमाकोसंसारमेकोईनहींहै १२

CC-0. In Public Domain. Digitized by eGangotri

तत्रैकस्थंजगत्कृत्स्नं प्रविभक्तमनेकधा अपश्यद्देवदेवस्य शरीरेपाण्डवस्तदा १३

शाङ्करभाष्यं

यापुनर्भगवतोविश्वरूपस्यभास्तस्याउपमोच्यते दिवीति दिव्यन्तरिक्षेतृतीयस्यांवादिविसूर्य्याणांसहस्रंसूर्य्यसहस्रंतस्ययुगपदुत्थितस्ययुगपदुत्थिताभाःसायदिसदृशीस्यात् तस्यमहात्मनोविश्वरूपस्यभासोयदिवास्यात् ततोपिविश्वरूपस्यैवभाःअतिरिच्यत इत्यभिप्रायः १२ किञ्च तत्रैकस्थमिति तत्रतस्मिन्विश्वरूपेएकस्मिन्स्थितमेकस्थंजगत्कृत्स्नंप्रविभक्तमनेकधा देवपितृमनुष्यादिभेदैरपश्यत्दृष्टवान् देवदेवस्यहरेःशरीरेपाण्डवोर्जुनस्तदा १३ ततइति ततस्तंदृष्ट्वासविस्मयेनावि

आनन्दगिरिकृतटीका

ननुप्रकृतस्यभगवतोरूपस्यदीप्तिरस्तिनवानचेत् काष्ठादिसाध्यंयद्यस्तिकीदृशीसेत्याशंक्याह यापुनरिति सायदिस्यात्तद्भासःसदृशीसेतियोजना असम्भावितार्थप्रगमार्थोयदिशब्दःस्याच्छब्दोनिश्चयार्थः साकथंसदृशीसम्भवति नतुभवत्येवेति विवक्षित्वाह यदिवेति १२ नकेवलमुक्तमेवार्जुनोदृष्टवान् किन्तुतत्रैवविश्वरूपेसर्व्वंजगदेकस्मिन्नेवस्थितमनुभूतवानित्याह किञ्चेति तदाविश्वरूपस्यभगवद्रूपस्यदर्शनंदर्शयामीत्यर्थः१३

विश्वरूपधरस्यभगवतस्तस्मिन्नेकीभूतजगतश्चोक्तविशेषणस्यदर्शनानन्तरंकिमकरोदित्यपेक्षायामाह ततइति आश्चर्य्यबुद्धिर्विस्मयःरोमाणंहृष्टत्वंपुलकितत्वंप्रक

स्वामिकृतटीका।

न्वंविश्वतःसर्व्वतोमुखानियस्यांस्तत् ११ विश्वरूपदीप्तेर्निरूपमत्वमाह दिविसूर्येति दिविआकाशेसूर्यसहस्रस्ययुगपदुत्थितस्ययदियुगपदुत्थिताभाःप्रभाभवेत्तर्हिसामहात्मनोविश्वरूपस्यभासःप्रभायाःकथञ्चित् सदृशीस्यात् अन्योपमानास्त्यवेत्यर्थःतथाभूतंरूपंदर्शयामासेति पूर्व्वेणैवान्वयः १२ ततःकिंदृष्टमित्यपेक्षायामाह तत्रैतिअनेकधाप्रविभक्तंनानाविभागेनावस्थितंकृत्स्नंजगदेवदेवस्यशरीरेतदवयवत्वेनैकत्रव्यवस्थितंतदापाण्डवोऽजनोऽपश्यत् १३ एवंदृष्ट्वाकिंकृतवानित्यत्राह ततइति ततोदर्शनानन्तरंविस्मयेन विष्टोव्याप्तःसन् हृष्टान्युत्पुलकितानिरोमाणियस्यसधनञ्जयस्तमेवदेवंशिरसाप्रणम्यकृताञ्जलिःसंपूटोकृतहस्तोभूत्वाअभाषतउक्तवान् १४

भाषा अनुवाद

तिसकेवादिव्याभयासोकहतेहैं किउससमय अर्जुनकोनानाप्रकारशरीरकेअनेकभागमेंस्थितसमस्तजगतश्रीकृष्णएकअपनीशरीरमेंएकवारगीदेखाया १३

CC-0. In Public Domain. Digitized by eGangotri

ततःसविस्मयाविष्टो हृष्टरोमाधनञ्जयः प्रणम्यशिरसादेवंकृताञ्जलिरभाषत १४
अर्जुनउवाच पश्यामिदेवांस्तवदेवदेहे सर्वांस्तथाभूतविशेषसंघान् ब्रह्माणमीशं
कमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान् १५

शाङ्करभाष्यं ।

ष्टोविस्मयाविष्टोहृष्टानिरोमाण्यस्यसोयंहृष्टरोमाचाभवद्धनञ्जयःप्रणम्यप्रकर्षेणनम
नंकृत्वाप्रहीभूतःसन्शिरसादेवंविश्वरूपधरंकृताञ्जलिर्नमस्कारार्थंसंपुटीकृतहस्तः
सन्नभाषतोक्तवान् १४ कथंयत्वयादर्शितंविश्वरूपंतदहंपश्यामीति स्वानुभवमा
विष्कुर्वन्अर्जुनउवाच पश्यामीति पश्याम्युपलभेहेदेवतवदेहेदेवान्सर्वांस्तथाभूत
विशेषसंघान्भूतविशेषाणांस्थावरजङ्गमानांनानासंस्थानविशेषाणांसंघाःभूतविशेषसं
घास्तान्किञ्चब्रह्माणंचतुर्मुखमीशितारंप्रजानांकमलासनस्थंपृथिवीपद्ममध्येमेरुक

आनन्दगिरिकृतटीका ।

र्षोभक्तिस्नेहयोरतिशयः १४ कथंभगवन्तंप्रत्यर्जुनोऽभाषिष्यवादिति पृच्छति कथ
मिति तत् प्रश्नमपेक्षितंपूरयन्नवतारयति यत्त्वयेति भूतविशेषसंघातेषुदेवताना
मन्तर्भावेपिपृथक्करणमुत्कृष्टाब्रह्मणःसर्वदेवतात्मत्वेपितेभ्योभेदकथनंतादुत्पादक
त्वादिति मत्वाह किञ्चेति ऋषीणामुरगाणाञ्चकिञ्चिद्वैषम्यात् पृथक्त्वंदिव्या
नीत्युभयेषांविशेषणं १५ यत्रभगवद्देहेसर्वमिदंदृष्टंतमेवविशिनष्टि अनेकेति आदि

स्वामिकृतटीका

भाषणमेवाह पश्यामीति सप्तदशभिः हेदेवतवदेहेदेवानादित्यादीन् पश्या
मितथासर्वान् भूतविशेषाणांजरायुजाण्डजादीनांसंघांश्चतथादिव्यानृषीन्उरगांश्चत

भाषाअनुवाद

तबतोअर्जुनबहआश्चर्यरूपभगवानकारूपदेखिअतिकौतुकयुक्तहोयआनन्दसेपुल
कितभयेऔरमस्तकभुंकायप्रणामकरिहाथजोड़ियहवचनबोलतेभये १४ अबस
ञ्जय सबहश्लोकसे अर्जुनकेकहेवचनकहतेहैं किहेकृष्णआपकीशरीरमेआदित्यओ
तावत्भूतसमूहअर्थात् जरायुजमनुष्यपशुऔरअण्डजपक्षीसर्पआदिऔस्वेदजजुआं
मत्कुणप्रभृति तथाउद्भिजलतावृक्षआदियेसबदेखताहौंऔरहेदेवदेव तासकल
औनाभिकमलमेब्रह्मावैठेतथाईशमहादेवऔरदिव्यऋषिवशिष्टआदिऔउरगत
क्षकआदिकोंकोदेखताहूं पद्मासनस्थब्रह्माकिसप्रकार सोकहतेहैं किपृथिवीरूप
नाभिसेउठाजोकमलस्वरूपसुमेरुगिरितिसपरवैठेदेखोंहौं १५ औरअनेकउदर

CC-0. In Public Domain. Digitized by eGangotri

अनेकवाह्वदरवक्त्रनेत्रंपश्यामित्वासर्वतोऽनन्तरूपं नान्तंनमध्यंनपुनस्तवादिंपश्या
मिविश्वेश्वरविश्वरूप १६ किरीटिनंगदिनंचक्रिणञ्चतेजोराशिंसर्व्वतोदीप्ति
मन्तं पश्यामित्वांदुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् १७

शाङ्करभाष्यं

र्णिकासनस्थमित्यर्थः ऋषींश्चवशिष्ठादीन्सर्व्वानुरगांश्चवासुकिप्रभृतीन्दिव्यान्दिवि
भवान् १५ किञ्च अनेकेति अनेकवाह्वदरवक्त्रनेत्रंअनेकेवाहवउदराणिवक्त्राणिने
त्राणिचयस्यतवसत्वमनेकवाह्वदरवक्त्रनेत्रस्तमनेकवाह्वदरवक्त्रनेत्रं पश्यामित्वात्वां
सर्वतःसर्व्वत्र अनन्तरूपमनन्तानिरूपाणिअस्येत्यनन्तरूपस्तंअनन्तरूपंनान्तमन्तोऽवा
सानंनमध्यंमध्यंनामद्वयोःकोव्योरन्तरंनपुनस्तवादिंतवदेवस्यनअन्तंपश्यामिनमध्यं
पश्यामिनपुनरादिंपश्यामिहेविश्वेश्वरहेविश्वरूप १६ किञ्च किरीटिनमितिकिरी
टिनंकिरीटोनामशिरोभूषणविशेषःतद्यस्यास्तीतिसकिरीटीतंकिरीटिनं तथागदि
नंगदायस्यविद्यतइतिगदी तंगदिनंतथाचक्रिणं चक्रमस्यास्तीतिचक्रीतंचक्रिणं
चतेजोराशिंतेजःपुञ्जंसर्व्वतोदीप्तिमन्तंसर्व्वतोदीप्तिर्य्यस्यास्तीति सर्व्वतोदीप्तिमांस्तं

आनन्दगिरिकृतटीका

शब्देनमूलमुच्यते नान्तंनमध्यमित्यत्रापिपश्यामीत्यस्यप्रत्येकंसम्बन्धंसूचयति नान्तं
पश्यामीति १६ विश्वरूपवन्तंभगवन्तमेवप्रकारान्तरेणप्रपञ्चयति किञ्चेति परि
च्छिन्नत्वंव्यावर्त्तयति सर्व्वतइति दुर्निरीक्ष्यंपश्यामीत्यधिकारिभेदादविरुद्धं पुर
तोवापृष्ठतोवापार्श्वतोवानास्यदर्शनं किन्तुसर्व्वत्रेत्याह समन्ततइति दीप्तिमन्तंदृष्टा

स्वामिकृतटीका।

क्त्रकादीन्तथातेषांदेवादीनामीशंस्वामिनंब्रह्माणञ्चकथंभूतंकमलासनस्थंदृष्टोपद्म
कर्णिकायांमेरौस्थितमित्यर्थः यद्वात्वन्नाभिपद्मासनस्थमिति १५ किञ्चअनेकेति
अनेकानिवाह्वादीनियस्यतादृशंत्वांपश्यामिअनन्तानिरूपाणियस्यतंत्वांसर्व्वतः पश्या
मि तवतु अन्तंमध्यमादिञ्चनपश्यामिसर्व्वगतत्वात् १६ किञ्च किरीटिनमिति

भाषा अनुवाद

औरअनेकवाञ्छअनेकउदरअनेकमुखअनेकनेत्ररूपतुमकोसर्व्वतमैदेखताछंपर
न्तुहेविश्वरूपतुमाराआदिमध्यअन्तनहींदेखताछं १६ औरमुकुटगदाचक्रयुक्तत
थातेजपुञ्जसर्वतप्रकाशमानअतिदुर्निरीक्ष्यचहूंओरप्रदीप्तअनलअर्ककेसमानतुम
कोमैदेखताहूं १७ जिसहेतुतुमाराऐश्वर्यऐसाअचिन्त्यहै इससेतुमअक्षरजोपरब्रह्म

CC-0. In Public Domain. Digitized by eGangotri

त्वमक्षरंपरमंवेदिव्यं त्वमस्यविश्वस्यपरंनिधानं त्वमव्ययःशाश्वतधर्म्मगोप्ता सनातनस्त्वंपुरुषोमतोमे १८

शाङ्करभाष्यं।

सर्व्वतोदीप्तिमन्तंपश्यामित्वांदुर्न्निरीक्ष्यंदुःखेननिरीक्ष्योदुर्न्निरीक्ष्यस्तं समन्ततःसर्व्वत्र दीप्तानलार्कद्युतिं अनलश्चार्कश्चानलार्कौदीप्तौअनलार्कौदीपानलार्कौतयोर्दीप्तानलार्कयोर्द्युतिरिवद्युतिस्तेजोयस्यतवसत्वंदीपानलार्कद्युतिस्तंत्वांदीपानलार्कद्युतिंअप्रमेयंनप्रमेयमप्रमेयमशक्यपरिच्छेदमित्यर्थः १७ इतएवते योगशक्तिदर्शनादनुमिनमि त्वमिति त्वमक्षरंनक्षरतीति परमंपरंब्रह्मवेदितव्यंज्ञातव्यंमुमुक्षुभिःत्वमस्यविश्वोस्यसमस्तस्यजगतःपरंप्रकृष्टंनिधानंनिधीयतेअस्मिन्नितिनिधानंपरमाश्रयइत्यर्थः किञ्च त्वमव्ययोनचतवव्ययोविद्यतइति अव्ययःशाश्वतधर्मगोपाशश्वद्भवःशाश्वतोनित्यो

आनन्दगिरिकृतटीका।

न्तेनस्पष्टयति दीप्तेति १७ सप्रपञ्चेभगवद्रूपेप्रकृते प्रकरणविरुद्धत्वमक्षरमित्यादिनिरुपाधिकवचनमित्याशंक्याह इतएवेति योगशक्तिरैश्वर्यातिशयःनक्षरतीति निःप्रपञ्चत्वमुच्यते परमपुरुषार्थत्वात् परमार्थत्वाच्चज्ञातव्यत्वं यस्मिन् द्यौःपृथिवीत्यादौप्रपञ्चायतनस्यैवयतोनिकृष्टस्यज्ञातव्यत्वश्रवणात् कुतोब्रह्मणोज्ञातव्यत्वंतत्राह त्वमस्येति निःप्रपञ्चस्यब्रह्मणोज्ञेयत्वेहेत्वन्तरमाह किञ्चेति अविनाशित्वात्तवैवज्ञातव्यतातिरिक्तस्यनाशित्वेनहेयत्वादित्यर्थःज्ञानकर्म्मात्मनोधर्मस्यनित्यत्वंवेदप्रमाणकत्वं धर्म्मस्यापनयनार्थायसम्भवामीत्युक्तत्वाद्गोपारक्षिता १८

स्वामिकृतटीका

मुकुटवन्तंगदावन्तंचक्रवन्तंतेजःपुञ्जरूपंतथादुनिरीक्ष्यं द्रष्टुमशक्यंतत्रहेतुःदीपयोरनलार्कयोर्द्युतिरिवद्युतिर्यस्यतंअतएवाप्रमेयं एवंभूतइतिनिश्चेतुमशक्यंत्वांसमन्ततःपश्यामि १७ यस्मादेवंतवातर्क्यमैश्वर्य्यं तस्मात्त्वमिति त्वमेवअक्षरंपरमंपरब्रह्मकथभूतंवेदितव्यंमुमुक्षुभिर्ज्ञातव्यंत्वमेवास्यविश्वस्यपरंनिधानं निधीयतेऽस्मिन्नितिनिधानंप्रकृष्टाश्रयःअतएवत्वमव्ययोनित्यः शाश्वतस्यनित्यस्यधर्मस्यगोपापालकःसनातनश्चिरन्तनःपुरुषोमतोमेसम्मतोसि १८

भाषाअनुवाद

मुमुक्षुलोगोंकेजाननेयोग्य औरतुमइसविश्वकेनिधानकहेपरमआश्रयहौ इससेतुमनाशरहितऔनित्य तथानित्यधर्मकेप्रतिपालक औअनादिपुरुषमेरेमतमेहौ १८

CC-0. In Public Domain. Digitized by eGangotri

अनादिमध्यान्तमनन्तवीर्य मनन्तबाहुं शशिसूर्यनेत्रं पश्यामित्वांदीप्तहुताशवक्त्रं स्वतेजसाविश्वमिदंतपन्तं १९ द्यावापृथिव्योरिदमन्तरंहि व्याप्तं त्वयैकेन दिशश्चसर्वाः दृष्ट्वाद्भुतंरूपमिदंतवोग्रं लोकत्रयंप्रव्यथितंमहात्मन् २०

शाङ्करभाष्यं

धर्मस्तस्यगोप्तासनातनश्चिरन्तनस्त्वं पुरुषःपरोमतोभिप्रेतोमेमम १८

किञ्च अनादीति अनादिमध्यान्तमादिश्चमध्यश्चअन्तश्चनविद्यतेयस्यसोयमनादिमध्यान्तस्तंत्वामनादिमध्यान्तमनन्तवीर्यं नतवीर्यस्यान्तोस्तीत्यनन्तवीर्यस्तंत्वामनन्तवीर्यंतथाअनन्तबाहुमनन्तावाहवोयस्यतवसत्वमनन्तबाहुस्तंत्वां अनन्तबाहुं शशिसूर्यनेत्रं शशिसूर्यौनेत्रे यस्यतवसःत्वंशशिसूर्यनेत्रः तंत्वांशशिसूर्यनेत्रं चन्द्रादित्यनयनंपश्यामित्वांदीप्तहुताशवक्त्रं दीप्तश्चासौहुताशश्चतद्वत्वक्त्रं यस्यतवस त्वं दीप्तहुताशवक्त्रस्तं त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वं समस्तमिदंतपन्तं सन्तापयन्तं १९ द्यावापृथिव्योरिति द्यावापृथिव्योरिदमन्तरंहिअन्तरिक्षं व्याप्तं त्वयैकेनबिश्वरूपधरेणदिशश्चसर्वाव्याप्ताःदृष्टाउपलभ्यअद्भुतंबिस्मापकं रूपमिदं तवउग्रं क्रूरंलोकत्रयं लोकानांत्रयं लोकत्रयं प्रव्यथितंभीतंप्रचलितंवा हेमहात्मन् अक्षुद्रस्वभाव २० अथाधुना पुरायद्वाजयेम यदिवानोजयेयुरिति अर्जुनस्य संशयः

आनन्दगिरिकृतटीका

भगवतोरूपंविश्वरूपाख्यंरूपमेवपुनर्विवृणोति किञ्चेति हुतमश्नातीति हुताशोवह्निः १९ प्रकृतभगवद्रूपस्य व्याप्तिंव्यनक्ति द्यावापृथिव्योरितीति तस्यैव भयङ्करत्वमाचष्टे दृष्टेति २० अमीहीत्यादिसमनन्तरग्रन्थस्यतात्पर्यमाह अथेति

स्वामिकृतटीका।

किञ्च अनादीति अनादिमध्यान्तंउत्पत्तिस्थितिलयरहितंअनन्तंवीर्यं प्रभावोयस्यतंअनन्तबाहुंबहवोयस्यतंशशिसूर्यौनेत्रेयस्यतादृशंत्वांपश्यामि तथादीप्तोहुताशोऽ

भाषाअनुवाद

औरअनादिमध्यान्तकहे उत्पत्तिस्थितिलयरहित औअनन्तप्रभावतथाअनन्तबाहु औचन्द्रसूर्यहैंनेत्रजिसकेऐसेतुमको हमदेखतेहैं औरअग्निजिसकेमुखमे जाज्वल्यमानहै ऐसेआप अपनेतेजसेइसविश्वकोसन्तप्तकरतेहुये तुमकोमैंदेखौहौं १९ औरहेमहात्मन्स्वर्गऔपृथिवीतथाअन्तरिक्ष औरसकलदिशाएकआपहीसेव्याप्तहैं सोयहउग्ररूपआपकादेखिकरके त्रैलोक्यभय खाता है २०

CC-0. In Public Domain. Digitized by eGangotri

अमीहित्वांसुरसंघाविशन्ति केचिद्भीताःप्राञ्जलयोगृणन्ति स्वस्तीत्युक्त्वामह र्षिसिद्धसंघा वीक्षन्तेत्वांस्तुतिभिःपुष्कलाभिः २१

शाङ्करभाष्यं ।

आसीत्तन्निर्णयाय पाण्डवजयमैकान्तिकंदर्शयासीतिप्रवृत्तोभगवान् तं पश्यन्नाह अमीहीति किञ्चअमीहियुध्यमानायोधारत्वांसुरसंघा येऽत्र भूभारावतारायावतीर्णवस्वादिदेवसंघामनुष्यसंस्थानास्त्वांविशन्तिप्रविशन्तोदृश्यन्ते तत्रकेचिद्भीताः प्राञ्जलयःसन्तोगृणन्तिस्तुवन्तित्वामन्येपलायनेष्वसक्ताःसन्तोयुद्धेप्रत्युपस्थिते उत्पातादिनिमित्तान्युपलक्ष्य स्वस्त्यस्तुजगतइत्युक्त्वामहर्षिसिद्धसंघाःमहर्षीणाञ्चसिद्धानाञ्चसंघाःस्तुवन्तित्वां स्तुतिभिःपुष्कलाभिःसपूर्णाभिः २१ किञ्चान्यत् रुद्रेति रुद्रा

आनन्दगिरिकृतटीका

तंभगवन्तं पाण्डवजयमैकान्तिकंदर्शयन्तंपश्यन्नर्जुनोब्रवीतीत्याह तंपश्यन्निति विश्वरूपस्यैव प्रपञ्चनार्षमनन्तरग्रन्थजातमितिदर्शयति किञ्चेति असुरसंघाइति पदं स्थित्वा भूभारभूतादुर्योधनादयस्त्वांविशन्तीत्यपिचवक्तव्यं उभयोरपिसेनयोरवस्थितेषु योद्धुकामेष्ववान्तरविशेषमाह अत्रेति समरभूमौसमागतान्द्रष्टुकामानां नारदप्रभृतीनांविश्वविनाशमाशङ्कमानानां तंपरिजिहीर्षतांस्तुघदेषु भगवद्विषयेषुप्रवृत्तिप्रकारंदर्शयति युद्धइति २१

स्वामिकृतटीका ।

ग्निर्वक्त्रेषुयस्यतंस्वतेजसाइदंविश्वंतपन्तंसन्तापयन्तंपश्यामि १९ किञ्च द्यावाक्षथिव्योरिति द्यावाक्षथिव्योरिदमन्तरमन्तरोक्तंत्वयैवैकेनव्याप्तंदिशश्चसर्वाव्याप्ताःअद्भुतमदृष्टपूर्वंत्वदीयमिदमुग्रंघोरंरूपंदृष्ट्वालोकत्रयं प्रव्यथितमतिभीतं पश्यामीति पूर्वस्यैवानुषङ्गः २० किञ्च अमीहीति अमीसुरसङ्घाभीताःसन्तस्त्वांविशन्तिशरणंप्रविशन्तितेषांमध्येकेचिदतिभीतादूरतएवस्थित्वाकृतसम्पुटकरयुगलाःसन्तोगृणन्तिजयजयरक्षरक्षेति प्रार्थयन्ते स्पष्टमन्यत् २१ किञ्च रुद्रेति रुद्राश्चआदित्याश्चवसवश्चयेचसाध्यानामदेवाःविश्वेदेवाःअश्विनौदेवौमरुतोमरुद्गणाश्चउष्माणं पिबन्ती

भाषाअनुवाद ।

औरयेसम्पूर्णदेवतामयप्राय तुमारेशरणागतहैं औरकोईअतिभीतहोय दूर खडे करजोडे जयजयरक्षरक्षपुकारपुकारप्रार्थनाकरतेहैं औरमहर्षितथासिद्धसंघ तुमकोदेखतेस्वस्तिवचनउंचारतेहुये संपूर्णस्तुतिसेस्तुतिकरतेहैं २१ औररु

CC-0. In Public Domain. Digitized by eGangotri

रुद्रादित्यावसवोयेचसाध्या विश्वेऽश्विनौमरुतश्चोष्मपाश्च गन्धर्वयक्षासुरसिद्ध संघा वीक्षन्तेत्वांविस्मिताश्चैवसर्वे २२

शाङ्करभाष्यं

दित्याबसवोये चसाध्यारुद्रादयोगणाःविश्वेश्विनौविश्वे देवाःअश्विनौचदेवौमरुतश्च वायवउष्मपाश्चपितरोगन्धर्वयक्षासुरसिद्धसंघाः गन्धर्वाहाहाहूहूप्रभृतयोयक्षाः कुबेरप्रभृतयःअसुराविरोचनप्रभृतयःसिद्धाः कपिलादयस्तेषांसंघाःगन्धर्वयक्षासुरसिद्धसंघास्तेवीक्षन्तेपश्यन्ति त्वात्वांविस्मिताःविस्मयमापन्नाःसन्ततएवसर्वे २२

यस्मात् रूपमिति रूपंमहदतिप्रमाणंतेतवऊरुवक्त्रनेत्रं बहूनिवक्त्राणिमुखानि नेत्राणिचचूंषिचयस्मिंस्तद्रूपंवऊरुवक्त्रनेत्रंहेमहाबाहोवऊरुबाहूरुपादंबहवोबाहवः ऊरवःपादाश्चयस्मिन्रूपेतद्ऊरुबाहूरुपादंकिञ्चबहूदरंबहूनिउदरणियस्मिन्निति तत्बहूदरंबऊदंष्ट्राकरालंबक्त्रीभिःदंष्ट्राभिःकरालंविकृतंतद्ऊदंष्ट्राकरालंदृष्ट्वा रूपमीदृशं लोकाःलौकिकाःप्राणिनःप्रव्यथिताःप्रचलिता भयेन तथाहं २३

आनन्दगिरिकृतटीका

दृश्यमानस्यभगवद्रूपस्यविस्मयकरत्वेहेत्वन्तरमाह किञ्चेति तएवोक्तारुद्रादयः सर्वे विस्मयमापन्नास्त्वांपश्यन्तीतिसम्बन्धः २२ लोकत्रयं प्रव्यथितमित्युक्तमुपसंहरति यस्मादिति ईदृशंयस्मात्तेरूपंतस्मात्त्वांदृष्ट्वेतियोजना भयेनलौकिकवदहमपिव्यथितोव्यथांपीडांदेहेन्द्रियप्रचलनंप्राप्तोस्मीत्याह तथेति २३ अर्जुनस्यविश्वरूप

स्वामिकृतटीका

ष्मपाःपितरःउष्ममंभःगाहिपितरइतिश्रुतेःस्मृतिश्चयाबदुष्णंभवेदन्नंतावदश्नन्ति वाग्यताः तावदश्नन्तिपितरोयावन्नोक्ताहविर्गुणाः गन्धर्वाश्चय क्षाश्चअसुराश्चविरोचनादयःसिद्धसंज्ञाःसिद्धानांसंघाश्चसर्वएवविस्मिताःसन्तस्त्वांवीक्षन्तइत्यन्वयः२२

भाषा अनुवाद ।

द्रगणआदित्यगणवसुगणऔसाध्यगणदेवगणतथाविश्वेदेवाअश्विनीकुमारऔमरुतगणपितृगणउष्णद्रव्यपानकरनेवालेपितृगण धर्मशास्त्रऔश्रुतिमेंऐसेकहाहै कि पितृगणतवतकमौनभोजनकरते जवतकअन्नउष्णहैऔरयावतपितृउद्देशकरिदियेऊयेअन्नकागुणवर्णनरूपमधुवातादि वैदिकमन्त्रपाठसमाप्तनहींहोयीतावतपितरअन्नखातेहैंऔरगन्धर्वगणयक्षगणऔरविरोचनप्रभृतिअसुरगणऔसिद्धगण सकलविस्मययुक्तहोके तुमकोखडेदेखते हैं २२

CC-0. In Public Domain. Digitized by eGangotri

रूपंमहत्तेवक्त्रवक्त्रनेत्रं महाबाहोबहुबाहूरुपादं बहूदरंबहुदंष्ट्राकरालं दृष्ट्वा लोकाःप्रव्यथितास्तथाहं २३ नभस्स्पृशंदीप्तमनेकवर्णं व्यात्ताननंदीप्तविशालनेत्रं दृष्ट्वाहित्वांप्रव्यथितान्तरात्मा धृतिंनविन्दामिशमञ्चविष्णो २४

शाङ्करभाष्यं।

तत्रेदंकारणंनभःस्पृशमिति नभःस्पृशंद्यस्पर्शमित्यर्थःदीप्तंप्रज्वलितंअनेकवर्णं अनेकवर्णाभयङ्करानानासंस्थानायस्मिंस्त्वयितंत्वामनेकवर्णंव्यात्ताननंव्यात्तानि विवृता निआननानि मुखानियस्मिन्त्वयितंत्वांव्यात्ताननंदीप्तविशालनेत्रं दीप्तानिप्रज्वलितानिविशालानिविस्तीर्णानिनेत्राणियस्मिंस्त्वयितंत्वांदीप्तविशालनेत्रंदृष्ट्वाहित्वां प्रव्यथितान्तरात्मा प्रव्यथितःप्रभीतोऽन्तरात्मामनोयस्यममसोहं प्रव्यथितान्तरात्मासन् धृतिं धैर्यंनविन्दामिनलभे शमञ्चोपशमं मनस्तुष्टिं हेविष्णो २४

आनन्दगिरिकृतटीका

दर्शनेनव्यथितत्वेहेतुमाह तत्रेति २४ दृश्यमानेपिभगवद्रूपे परितोषाद्यभावे

स्वामिकृतटीका।

किञ्च रूपमिति हेमहाबाहोमहदत्यूर्जितंतवरूपंदृष्ट्वालोकाःसर्वेप्रव्यथिता अतिभीताः तथाहञ्चप्रव्यथितोऽस्मि कीदृशरूपंदृष्टवहूनिवक्त्राणिनेत्राणिचयस्मिंस्तत् बहवोबाहवऊरवःपादाश्चयस्मिंस्तत्बहून्युदराणियस्मिंस्तत्बहीभिर्दंष्ट्राभिःकरालंविकृतंरौद्रमित्यर्थः २३ नकेवलंभीतोऽहमेतावदेव अपितु नभइति नभः स्पृशतीतिनभस्पृक्तंअन्तरीक्षव्यापिनमित्यर्थः दीप्ततेजोयुक्तंअनेकावर्णायस्यतं व्यात्तानिविवृतान्याननानियस्यतं दीप्तानिविशालानिनेत्राणियस्यतं एवंभूतंहित्वादृष्ट्वा प्रव्यथितोऽन्तरात्मामनोयस्य सोऽहंधृतिंधैर्यमुपशमञ्चनलभे २४

भाषाअनुवाद।

औरहेमहाबाहो यहमहान्तुमारारूप जिसमेंबहुतमुखनेत्रबाहुउरुपादउदरहैं औरजोबहुतेरेदांतोंसेअतिकरालकहेभयानकहैं इनकोदेखकेसकललोकव्यथितहैं औरमैंभीपीडितहौं २३ औरमैंहींकेवलडराहूं यहनहींऐसाआकाशकोपरसकरनेवालाअर्थात्शून्यव्यापीतेजयुक्तनानावर्णविशिष्टविस्तारकोप्राप्तऔजलजलातेहैंविशालकहेबडेनेत्रजिसके ऐसेतुमकोअवलोकनकरिहे विष्णो हमाराअन्तरात्माव्यथायुक्तहै औरमैंइसरूपकोदेखतेऊयेशान्तितथाधीरज नहींधरसकताहूं २४ औरहेदेवेश तुमारामुखदेखि डरकेमारेहमैंदिशाभूलिगईं

CC-0. In Public Domain. Digitized by eGangotri

दंष्ट्राकरालानिचतेमुखानि दृष्ट्वैवकालानलसन्निभानि दिशोनजानेनलभेच शर्म्म प्रसीददेवेशजगन्निवास २५ अमीचत्वांधृतराष्ट्रस्यपुत्राः सर्वेसहैवावनिपालसंघैः भीष्मोद्रोणःसूतपुत्रस्तथासौ सहास्मदीयैरपियोधमुख्यैः २६

शाङ्करभाष्यं

कस्मात् दंष्ट्राकरालानीति दंष्ट्राभिःकरालानिविकृतानि तेतवमुखानिदृष्ट्वैवोपलभ्य कालानलसन्निभानिप्रलयकालेलोकानांदाहकोऽग्निःकालानलस्तन्निभानि कालानलसदृशानिदृष्ट्वेत्येतद्दृशःपूर्वापरविवेकेन नजाने दिङ्मूढोस्म्यतो नलभेनचोपलभेचशर्म्मसुखमतःप्रसीदप्रसन्नोभव देवेशजगन्निवास २५ येभ्योममपराजयशङ्काप्रागेवासीत्साचाप्रगतायतःअमीचेति अमीचत्वांधृतराष्ट्रस्य दुर्योधनप्रतयस्त्वरमाणाविशन्तीति व्यवहितेनसंबन्धः सर्वेसहैवसंहताअवनिपालसंघैः अवनिंपृथ्वीं पालयन्तीत्यवनिपालास्तेषांसंघैःकिञ्चभीष्मोद्रोणःसूतपुत्रःकर्णस्तथासौसहास्मदीयैरपि धृष्टद्युम्नप्रभृतिभिर्योधमुख्यैःयोधानांमुख्यैःप्रधानैःसह २६

आनन्दगिरिकृतटीका

कारणान्तरंप्रश्नपूर्वकमाह कस्मादिति दृष्ट्वैवेत्येवकारेणप्राप्तिर्व्यावर्त्तते २५

अस्माकंजयं परेषांपराजयञ्चदिदृक्षन्तंपश्यामीत्याह येभ्यइति तत्रहेतुत्वेनस्रोकमवतारयति यतइति २६ नकेवलंदुर्योधनादीनामेवपराजयःकिन्तु भीष्मादी

स्वामिकृतटीका।

किञ्च दंष्ट्रेति हेदेवेशतवमुखानिदृष्ट्वाभयावेशेनदिशोनजानामि शर्म्मचसुखंन लभे भोजगन्निवासप्रसनोभव कीदृशानिमुखानिदृष्ट्वादंष्ट्राभिःकरालानि कालानलःप्रलयाग्निस्तत्सदृशानि २५ यच्चान्यद्द्रष्टुमिच्छसीत्यनेनास्मिन्संग्रामेभाविजयप

भाषा अनुवाद

औरसुखपावतेनहींहेजगतनिवासअबप्रसनहोउ कैसामुखदेखिडरभयासोकहते किबडेकरालदांतोसेभयानक जोप्रलयाग्निकेसमान है २५ औरजोकहाकि अन्यत्जोभावीपराजयहैसोभी इसमेरीशरीरमेदेखो सोईदेखिअबअर्जुनपांचस्लोकसेकहतेहैं किजयद्रथप्रभृतिराजगणसमेतएधृतराष्ट्रकेपुत्रदुर्योधनादि तुमारेमुखमेप्रवेशकरतेहैं औरभीष्मद्रोणऔसूतपुत्रकर्णएभीतुमारेमुखमेप्रवेशकरतेहैं औरयहीसबनहींप्रवेशकरतेहैं बलुप्रतियोधाअर्थात्हमारेपक्षकेभी शिखण्डी धृष्टद्युम्नप्रभृतिकोंकेसमेत वेप्रवेशकरतेहैं २६ औरएदुर्योधनादिक धावतेऊयेतुमा

CC-0. In Public Domain. Digitized by eGangotri

वक्त्राणितेत्वरमाणाविशन्ति दंष्ट्राकरालानिभयानकानि केचिद्विलग्नादशना न्तरेषु संदृश्यन्तेचूर्णितैरुत्तमाङ्गैः २७ यथानदीनांवहवोऽम्बुवेगाः समुद्रमेवा भिमुखाद्रवन्ति तथातवामीनरलोकवीरा विशन्तिवक्त्राण्यभितोज्वलन्ति २८

शाङ्करभाष्यं

किञ्च वक्त्राणीति वक्त्राणिमुखानितेतवत्वरमाणास्त्वरायुक्ताःसन्तोविशन्तिकिं विशिष्टानिदंष्ट्राकरालानिमुखानिभयानकानिभयङ्कराणि किञ्चकेचिन्मुखानि प्र विष्टानांमध्येविलग्नादशनान्तरेषुमांससमिवभक्षितंसंदृश्यन्ते उपलभ्यन्ते चूर्णितैश्चू र्णीकृतैरुत्तमाङ्गैःशिरोभिः २७ कथंप्रविशन्तिमुखानीत्याह यथा नदीनामिति यथानदीनांस्रवन्तीनांवहवोऽनेकेऽम्बूनांवेगाअम्बुवेगास्त्वराविशेषाः समुद्रमेवाभि मुखाःप्रतिमुखाःद्रवन्ति प्रविशन्ति तथातद्वत्तव अमी भीष्मादयोनरलोकवीरामनु ष्यलोकपालाविशन्ति वक्त्राण्यभितोज्वलन्ति प्रकाशमानानि २८

आनन्दगिरिकृतटीका ।

नामपीत्याह किञ्चेति भगवद्रूपस्योक्तत्वेहेत्वन्तरमाह किञ्चेति प्रविष्टानांमध्ये के चिदिति सम्बन्धः २७ उभयोरपिसेनयोरवस्थितानांराज्ञां भगवन्मुखप्रवेशनं निदर्शनेन विशदयति कथमित्यादिना २८

स्वाकिकृतटीका

राजयादिकंममदेहेपशेतियद्भगवतोक्तं तदिदानींपश्यन्नाह अनेकेति पञ्चभिःअ मीधृतराष्ट्रस्यपुत्रादुर्योधनादयःसर्वेऽवनिपालानांजयद्रथादीनांराज्ञांसंघैःसमूहैः स हैव तवबक्त्राणिविशंतीत्युत्तरेणान्वयः तथाभीष्मश्चद्रोणश्चासौसूतपुत्रश्चकर्णःनकेव लंतएवविशन्ति अपितुप्रतियोद्धारोऽस्मदीयायेयोधमुख्याःशिखण्डिधृष्टद्युम्नादयस्तैः सह २६ दंष्ट्राभिःविकृतानिकरालानिभयङ्कराणिवक्त्राणिविशन्तितेषांमध्येकेचि च्चूर्णितैरुत्तमाङ्गैःशिरोभिरुपलक्षितादन्तसन्धिषुसंश्लिष्टाःसंदृश्यन्ते २७प्रवेशनेदृष्टा

भाषाअनुवाद

रेविकटदन्तकरालमुखमेप्रवेशकरतेहैं औरतिनकेबीचकोईकोईयोद्धामस्तकचूर्ण ज्येतुमारेदांतोकेमध्यसन्धिमेलिपटेसेदेखपडतेहैं २७ अबउनकेप्रवेशकेविषय मेदृष्टान्तकहतेहैं किजैसेअनेकअनेकमार्गसेनदियोंकेधाराप्रवाह समुद्रके अभि मुखधावतेभयेजायकरसमुद्रमेप्रवेशकरतेहैं तैसेहीएनरलोककेवीरसकल जाज्व ल्यमान तुमारेमुखमे पैठतेजातेहैं २८ बेबशरूपप्रवेशमेनदीकादृष्टान्तकहिकर

CC-0. In Public Domain. Digitized by eGangotri

यथाप्रदीप्तज्वलनंपतङ्गा विशन्तिनाशायसमृद्धवेगाः तथैवनाशायविशन्तिलो कास्तवापिवक्त्राणिसमृद्धवेगाः २९

शाङ्करभाष्य

ते किमर्थंप्रविशन्तिकथञ्चेत्याह यथेति यथाप्रदीप्तं ज्वलनंअग्निंपतङ्गाःपक्षिणो विशन्तिनाशायविनाशायसमृद्धवेगाःसमृद्धःऊह्यतोवेगोगतिर्येषांतेसमृद्धवेगाः तथैव नाशायविशन्तःलोकाःप्राणिनस्तवापिवक्त्राणिसमृद्धवेगाः २९ त्वंपुनःलेलिह्यसेआ स्वादयसि ग्रसमानोऽन्तःप्रवेशयन्समन्तात् समन्ततोलोकान्समग्रान्समस्तान्वद नैर्ज्वलद्भिर्दीप्यमानैस्तेजोभिरापूर्य्यसंव्याप्यजगत् समग्रंसहाग्रेणसमस्तमित्येतत् किञ्चभासोदीप्तयस्तवोग्राःक्रूराःप्रतपन्तिप्रतापंकुर्वन्ति हेविष्णोव्यापनशील ३०

यतएवमुग्रस्वभावोऽतःआख्याहीति आख्याहिकथय मेमह्यंकोभवानेवमुग्ररूपः

आनन्दगिरिकृतटीका

प्रवेशप्रयोजनं तत्प्रकारविशेषञ्चोदाहरणान्तरेणस्फोरयति तेकिमर्थमित्या दिना २९ योद्धुकामानांराज्ञां भगवन्मुखप्रवेशप्रकारंप्रदर्शयतस्यादृशायांभगवत स्तद्भासाञ्चप्रवृत्तिप्रकारंप्रत्याययति त्वंपुनरिति भगवत्प्रवृत्तिमेवप्रत्याय तदीयभा सां प्रवृत्तिं प्रकटयति किञ्चेति ३० भगवद्रूपस्यार्जुनेनदृष्टपूर्व्वत्वात्तस्यतस्मिन्न

स्वामिकृतटीका

न्तमाह यथेति नदीनामनेकमार्गप्रवृत्तानांवहवोऽम्बूनांवारीणांवेगाः प्रवाहाःसमुद्रा भिमुखाःसंतोयथासमुद्रमेवद्रवन्तिविशन्ति तथाअमीयेनरलोकवीरास्तेऽभितोज्व लन्ति सर्व्वतःप्रदीप्यमानानितववक्त्राणिप्रविशन्ति २८ अवशत्वेनप्रवेशे नदीवेग दृष्टान्तउक्तोबुद्धिपूर्व्वकप्रवेशेदृष्टान्तमाह यथेति प्रदीप्तंज्वलन्तमग्निंपतङ्गाअलभा बुद्धिपूर्व्वकंसमृद्धवेगायेषांतेयथानाशायमरणायैवविशन्ति तथैवलोकाएतेजनाअपि भवन्मुखानिप्रविशन्ति २९ ततःकिमतआह लेलिह्यसेइति ग्रसमानोपिसन्सम ग्रान्लोकान्सर्व्वानेतान्वीरान्सर्वतोलेलिह्यसेअतिशयेनभक्षयसि कैःज्वल द्भिर्वदनैःकिञ्चहेविष्णोतवभासोदीप्तयस्तेजोभिर्विस्फुरणैःसमग्रंजगद्व्याप्यतीव्राः

भाषाअनुवाद

अबबुद्धिपूर्व्वकप्रवेशकरनेमेदृष्टान्तकहतेहैं किजैसेबडेवेगऔउत्साहसेपतङ्गजोपां खी तेनाशकेनिमित्तदीप्तअग्निखामेजायगिरतेऔमरतेहैं तैसेहीअतिवेगसेयेसबवी रमनुष्य नाशकेअर्थ तुमारेमुखमे आयकर प्रवेशकरते हैं २९

CC-0. In Public Domain. Digitized by eGangotri

लेलिह्यसेग्रसमानःसमन्ता ल्लोकान्समग्रान्वदनैर्ज्वलद्भिः तेजोभिरापूर्य्यजगत् समग्रं भासस्तवोग्राःप्रतपन्तिविष्णो ३० आख्याहिमेकोभवानुग्ररूपो नमोऽस्तुते देववरप्रसीद विज्ञातुमिच्छामिभवन्तमाद्यं नहिप्रजानामितवप्रवृत्तिं ३१

शाङ्करभाष्यं

अतिक्रूराकारोनमोस्तुतेतुभ्यंहेदेववर देवानांप्रधान प्रसीदप्रसादंकुरु विज्ञातुं विशेषेणज्ञातुमिच्छामिभवन्तमाद्यमादौभवमाद्यं नहि यस्मात् प्रजानामितबल्वदीयांप्रवृत्तिंचेष्टां ३१ कालोस्मीतिकालोस्मिलोकक्षयकृत् लोकानांक्षयंकरोतीति लोकक्षयकृत् प्रवृद्धोवृद्धिंगतोयदर्थंप्रवृद्धस्तच्छ्रुणुलोकान्समाहर्त्तुं इहअस्मिन्काले प्रवृत्तःऋतेपिविनापित्वात्वांनभविष्यन्तिभीष्मद्रोणकर्णप्रभृतयःसर्व्येयेष्वस्त्वा शङ्का

आनन्दगिरिकृतटीका।

जिज्ञासेत्याशंक्याह यतइति उपदेशंशुश्रूषमाणेनोपदेशकर्तुःप्रह्वीभवनंकर्त्तव्यमिति सूचयति नमोस्त्विति क्रौर्यत्यागंसमर्थयते प्रसादमिति त्वमेवमांजानीषेमिर्थमित्थमिदानीमर्थयसेमदीयांचेष्टांदृष्ट्वात्वयैवप्रतिपद्यस्वेत्याशंक्याह न हीति ३१

यदर्थाचस्वप्रवृत्तिःतत्सर्व्वंभगवानुक्तवानित्याह भगवानिति कालःक्रियाशक्त्युपहितःपरमेश्वरःअस्मिन्नितिवर्त्तमानयुङ्नोपलक्षितत्वंकालस्यविवक्षितं लोकसंहारार्थंत्वत्प्रवृत्तावपिनासावर्थवतीप्रतिपक्षाणांभीष्मादीनांमत्प्रवृत्तिंविनापिसंहर्त्तुं

स्वामिकृतटीका।

सत्यःप्रतपन्तिसन्तापयन्ति ३० यतएवंतस्मात् आख्याहीति भगवानुग्ररूपःकइत्याख्याहिकथय तुभ्यंनमोऽस्तुहेदेववरप्रसीदप्रसन्नोभवभवन्तमाद्यं पुरुषंविशेषेणज्ञातुमिच्छामि यतस्तवप्रवृत्तिंचेष्टांकिमर्थमेवंप्रवृत्तोऽसीतिनजानामि एवंभूतस्य तवप्रवृत्तिंवार्त्तामपि नजानामीतिवा ३१ एवंप्रार्थितःसन्श्रीभगवानुवाच

भाषा अनुवाद

औरप्रवेशकेअनन्तरफेरिक्याहोतासोकहतेहैं कितुमभीअतिभयानकजिह्वालहलहावतेहुयेमानोत्रैलोक्यलीलवेकोरसनाप्रसारीहै अपनेतेजसेसमग्रजगतकोसन्तप्तकरतेभयेउनसबवारोंकोग्रासकहेभक्षणकरनेकीइच्छाकरतेहौ ३० हेमहाराजजिससेतुमाराअैसाउग्ररूपहै इससेआपकोहौकहो औरहमतुमकोप्रणामकरतेहैं हेदेवश्रेष्ठतुममेरेपरप्रसन्नहोउ औआदिपुरुषजोतुमसोमैंतुमकोजानाचाहताहूं औरएवंभूतजोतुमतुमारीप्रवृत्तिकहेवार्त्ताकुछभीहमनहींजानसकतेहैं ३१

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच कालोस्मिलोकक्षयकृत्प्रवृद्धो लोकान्समाहर्त्तुमिहप्रवृत्तः ऋते त्वांनभविष्यन्तिसर्व्वे येऽवस्थिताःप्रत्यनीकेषुयोधाः ३२ तस्मात्त्वमुत्तिष्ठय शोलभस्व जित्वाशत्रुंभुङ्क्ष्वराज्यंसमृद्धं मयैवैतेनिहताःपूर्वमेव निमित्तमात्रंभव सव्यसाचिन् ३३

शाङ्करभाष्यं

येवस्थिताःप्रत्यनीकेष्वनीकमनीकंप्रतिप्रत्यनीकेषुप्रतिपक्षभूतेषु अनीकेषुयोधाएव योद्वारः ३२ यस्मादेवं तस्मात्त्वमिति तस्मात्वमुत्तिष्ठभीष्मद्रोणप्रभृतयोऽतिरथाअजेयादेवैरप्यर्जुनेनजिताइतियशोलभस्व केवलंपुण्यैर्हितत्प्राप्यतें जित्वा शत्रून्दुर्य्योधनप्रभृतीन् भुंक्ष्वराज्यंसमृद्धंअसपत्नमकण्टकं मयाएवैतेंनिहतानि श्चयेनहताःप्राणैर्व्वियोजिताः पूर्व्वमेवनिमित्तमात्रंभवत्वं हेसव्यसाचिन् सव्येनवा मेनहस्तेन शराणांक्षेपात् सव्यसाचीत्युच्यतेऽर्जुनः ३३

आनन्दगिरिकृतटीका।

मशक्यत्वादित्याशंक्याह ऋतेपीति ३२ तवौदासीन्येपिप्रतिकूलानीकस्था

स्वामिकृतटीका।

कालइति त्रिभिः लोकानांक्षयकर्त्ताप्रवृद्धोऽत्युत्कटःकालोऽस्मिलोकान्प्राणिनःसंहर्त्तुमिहलोकेप्रवृत्तोऽस्मि अतऋतेत्वांहन्तारंविनानभविष्यन्तिजीविष्यन्तिकेते प्रत्यनीकेषुअनीकानिअनीकानिप्रतिभीष्मद्रोणादीनांसर्व्वासुसेनासुयेयोद्वारोऽवस्थितास्तेसर्व्वेऽपि ३२ तस्मादिति यस्मादेवंतस्मात्त्वंयुद्धायोत्तिष्ठदेवैरपिदुर्जयाभीष्मा

भाषाअनुवाद

इसप्रकारअर्जुनसेप्रार्थनाकियेगये श्रीभगवानतोनिश्लोकसेकहतेहैं किमैसकल लोककीक्षयकरनेवालाकालरूपहौंऔरप्राणियोंकोसंहारकरनेकीइच्छाकरि इस लोकमेंप्रवृत्तभयाहौं सोएकतुमकोछोडिऔरकोईहममेंनवंचैगे अर्थात् प्रतिसेना मेंजोभीष्मद्रोणआदियोद्वाहैं वेसबमरैंगे ३२ जिसहेतुऐसाहोनहारहै इस सेतुमयुद्धकेअर्थउठो औरदेवतोंसेभीअजयजोभीष्मद्रोणआदिवीर सोअर्जुनसेप

राजितभयेइसयशकोलाभकरो औरशत्रुवोंकाविनाशकरिकेसंपूर्णराज्यभोगकरो औरयेजोतुमारेशत्रुतिनकोयुद्धकेपूर्वहींकालरूपमैनेयद्यपिहतकरिराखाहै तौ भी हेसव्यसाचिन्अर्जुन तुमनिमित्तमात्रहोउ सव्यसाचीउसकोकहतेहैं जोवांये हाथसेयुद्धादिकार्यकरिशकेहै ३३ औरजोपूर्वमेअर्जुननेशंकाकियाकिहमइन

CC-0. In Public Domain. Digitized by eGangotri

द्रोणञ्चभीष्मञ्चजयद्रथञ्च कर्णंतथान्यानपियोधवीरान् मयाहतांस्त्वंजहिमाव्यथिष्ठा युध्यस्वजेतासिरणे सपत्नान् ३४

शाङ्करभाष्यं

द्रोणञ्चेति द्रोणञ्चयेषुयेषुयोधेषु अर्जुनस्याशङ्कासीत् तांस्तान् सर्व्वान् व्यपदिशतिभगवान् मयाहतानीतितत्द्रोणभीष्मयोस्तावत्प्रसिद्धमाशङ्काकारणंद्रोणोधनुर्व्वेदाचार्य्योदिव्यास्त्रसंपन्नःआत्मनश्चविशेषतोगुरुर्गरिष्ठोभीष्मःस्वच्छन्दमृत्युर्दिव्यास्त्रसंपन्नश्चपरशुरामेणद्वन्द्वयुद्धमगमन्नचपराजितः तथाजयद्रथोपियस्यपितातपश्चरति ममपुत्रस्यशिरोभूमौपातयिष्यतियस्तस्यापिशिरःपतिष्यतीति कर्णोपिवासवदत्तयाशक्तात्वमोघयासम्पन्नः सूर्यपुत्रःकानीनोयतोऽतस्तन्नास्त्रैवनिर्हेणःमयाहतांस्त्वंजहिनिमित्तमात्रेणमाव्यथिष्ठास्तेभ्योमयंमाकार्षीः युद्ध्यस्वजेतासिदुर्योधनप्रभृतीन् रणेयुद्धेसपत्नान् शत्रून् ३४

आनन्दगिरिकृतटीका

मत्प्रातिकूल्यादेवनभविष्यन्तीत्येवंयस्मान्निश्चितंतस्मात्त्वदौदासीन्यमकिञ्चित्करमित्याह यस्मादिति उत्तिष्ठयुद्धायउन्मुखीभवेत्यर्थः यशोलाभमभिनयति भीष्मेति किंतेनापुमर्थेनेत्याशंक्याह पुण्यैरिति राज्यभोगेपेक्षितेकिमनपेक्षितेनेत्याशंक्याह जित्वेति भीष्मादिष्वतिरथेषुकुतोजयाशङ्काइत्याशंक्याह मयैवैतइति तर्हिमृतमारणार्थंनमेप्रवृत्तिस्तत्राह निमित्तेति सव्यसाचिपदंविभजते वामेनेति ३३ मयैवेत्यादिनोक्तंप्रपञ्चयतिद्रोणञ्चेति किमिति कतिचिदेवान्द्रोणादयो

स्वामिकृतटीका।

दयोऽर्जुनेन निर्जिताइत्येवंभूतंयशोलभस्वप्राप्नुहिअयत्नतश्चशत्रून्जित्वासमृद्धंराज्यंभुंक्ष्वएतेचतवशत्रवस्वदीययुद्धात्पूर्व्वमेवमयैवकालात्मनानिहतप्रायास्तथापित्वंनिमित्तमात्रंभवहेसव्यसाचिन्सव्येनवामेनहस्तेनसाचितुंशरान्सन्धातुंशीलंयस्येतिव्युत्पत्त्यावामेनापिवाणक्षेपात्सव्यसाचीत्युच्यते ३३ नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुरिति यात्राशङ्कासापिनकार्य्येत्याह द्रोणमिति ये

भाषाअनुवाद

कोजीतैगे यायेहमको यहहमनहींजानतेहैं उसकावारणकरतेऊयेकहतेहैं कि जिनसेतुमकोशङ्काभईथी वेमुझसे हतभयेजोद्रोण भीष्मजयद्रथकर्ण तथाऔर औरजोवीर उनसबकोतुमजयकरो औरउनसेनडरो तुमअवश्यहीजीतोगे३४

CC-0. In Public Domain. Digitized by eGangotri

सञ्जयउवाच एतच्छ्रुत्वावचनंकेशवस्य कृताञ्जलिर्वेपमानःकिरीटी नमस्कृ
त्वभूयएवाहकृष्णं सगद्गदंभीतभीतःप्रणम्य ३५

शाङ्करभाष्यम्।

एतच्छ्रुत्वेति एतत्श्रुत्वावचनंकेशवस्यपूर्वोक्तंकृताञ्जलिःसन्वेपमानः कम्पमा
नःकिरीटीनमस्कृत्वभूयःपुनरेवाहोक्तवान्कृष्णं सगद्गदंसहगद्गदयावाचामन्दशब्दे
नभयाविष्टस्यदुःखाभिघातात् स्नेहाविष्टस्यचहर्षोद्भवात्अश्रुपूर्णनेत्वत्वेसति श्लेष्मणा
कण्ठावरोधःततश्चवाचोऽपाटवंमन्दशब्दत्वं यत्सगद्गस्तेनसहवर्त्ततइतिसगद्गदंव
चनमाहेति वचनंक्रियाविशेषणमेतत्भीतभीतःपुनर्भयाविष्टचेताःसन्प्रणम्यप्रह्वीभू
त्वाहेतिव्यवहितेनसम्बन्धः अत्रावसरेसञ्जयवचनंसाभिप्रायंकथंद्रोणादिष्वर्जुने
ननिहतेष्वजेयेषुचतुर्षुनिराश्रयोदुर्योधनोनिहतएवेतिमत्वाधृताराष्ट्रोजयंप्रतिनिरा
शःसन्सन्धिंकरिष्यतीति ततःशान्तिरुभयेषांभविष्यतीतितदपिनाशौषीत्धृतराष्ट्रो
भवितव्यवशात् ३५ स्थानइति स्थानेयुक्तंकिंतवप्रकीर्त्तनात्वन्माहात्म्यकीर्त्तने

आनन्दगिरिकृतटीका।

गण्यन्तेतवायं येष्वेति द्रोणादिषुकुतःशङ्केत्याशंक्यद्वयोःशङ्कानिमित्तत्वमाह त
वेत्यादिना जयद्रथेपिशङ्कानिमित्तत्वमाह तथेति दिव्यास्त्रसंपन्नइतिसम्बन्धः
तत्रशङ्कायांकारणान्तरमाह यस्येति कर्णेपितत्कारणत्वंकथयति कर्णोपीति पूर्ववदे
वसम्बन्धः हैवन्तरमाह वासवेति साक्षात्मोघापुरुषमेकमत्यन्तसमर्थंघातयित्वैव
निर्हते जन्मनापितस्यशङ्कनीयत्वमाह सूर्येति कुन्तीहिकन्यावस्थायांमन्त्रप्रभावंज्ञा
तुमादित्यमाजुहाव ततस्तस्यामेवावस्थायामयमुद्भूवतदाह कानीनइति एतदेवाभि
प्रेत्यकर्णग्रहणमित्याह यतइति उक्तेष्वन्येषुचनत्वयाशङ्कितव्यमित्याह मयेति ३४

स्वामिकृतटीका

भ्यस्त्वंशङ्कसेतान्द्रोणादीन्मयैवहतांस्त्वजहिघातय माव्यथिष्ठाभयंमाकार्षीःसप
त्नान्शत्रून्रणेयुद्धे निश्चितंजेतासि जेष्यसि ३४ ततोयद्वृत्तंतदेवधृतराष्ट्रंप्रति
सञ्जयउवाच एतदिति एतत्पूर्वोक्तश्लोकत्रयात्मकंकेशवस्यवचनंश्रुत्वावेपमानःक

भाषाअनुवाद

तिसकेवादिजोभया सोसंजयधृतराष्टसेकहतेहैं किएसोकृष्णकेवचनश्रवणकरि
कम्पमानकलेवरकिरीटीअर्जुनहर्षऔभयकेमारेगद्गदकण्ठ अतिडरे से हाथ
जोडि कृष्णकोप्रणामकरके आगेकहैंगेजो सोवातैंकहतेभये ३५ अबइसश्लोक

CC-0. In Public Domain. Digitized by eGangotri

अर्जुनउवाच स्थानेहृषीकेशतवप्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यतेच रक्षांसि भीतानिदिशोद्रवन्ति सर्वेनमस्यन्तिचसिद्धसंघाः ३६

शाङ्करभाष्यं।

नश्रुतेन हृषीकेशयज्जगत्प्रहृष्यतिप्रहर्षमुपैतितत्स्थानेयुक्तमित्यर्थः अथवाविषय विशेषणं स्थानइति युक्तोहर्षादिविषयोभगवान्यतईश्वरःसर्वात्मासर्वभूतसुहृद्वे ति तथाअनुरज्यतेंअनुरागञ्चोपैति तद्विषयइतिव्याख्येयं किञ्चरक्षांसिभीतानि भयाविष्टानि दिशोद्रवन्तिगच्छन्ति तद्विस्थानेविषयेसर्व्वेनमस्यन्तिनमस्कुर्व्वन्तिच सिद्धसंघाः सिद्धानांसमुदायाःकपिलादीनांतद्विस्थाने ३६ भगवतोहर्षादिविष यत्वेहेतुं दर्शयति कस्माच्चेति कस्माच्चेद्धेतोस्तेतुभ्यंननमेरन्ननमस्कुर्युःहेमहात्मन्ग

आनन्दगिरिकृतटीका।

पराजयाभावात्करिष्यतिसन्धिमिति बुध्वासञ्जयोराज्ञेदृत्तान्तमुक्तवानित्याह सञ्जयइति पूर्वोक्तवचनंकालोस्मीत्यादिविश्वरूपदर्शनदशायामर्जुनस्यभगवतासम्बा दवचनं किमिति सञ्जयोराज्ञे व्यजिज्ञापयदित्याशंक्यतदुक्तेस्तात्पर्य्यमाह अत्रेति तमेवाभिप्रायंप्रश्नद्वाराविशदयति कथमित्यादिना तर्हिसञ्जयवचनंश्रुत्वा किमिति राजासन्धिंनकारयामासेति तत्राह तदपीति ३५

स्वामिकृतटीका

म्यमानःकिरीटीअर्जुनःकृताञ्जलिःसंपुटीकृतहस्तःकृष्णंनमस्कृत्यपुनरप्याह उक्तवान् कथमाह भयहर्षाद्यावेशवशात्गद्गदेनकण्ठकम्पेनसहवर्त्ततइतिसगद्गदंयथा स्यात्तथा किञ्चभीतादपिभीतःसन्प्रणम्यअवनतोभूत्वा आह ३५ स्थानेइत्येका दशभिरर्जुनोक्तिःस्थानेइत्यव्ययंयुक्तमित्यस्मिन्नर्थेहेहृषीकेश यतएवंत्वमद्भुतप्रभावो भक्तवत्सलश्चातस्तवप्रकीर्त्त्यामाहात्मसंकीर्त्तनेन नकेवलमहमेवप्रहृष्यामीति किन्तु जगत्सर्व्वंप्रहृष्यतिप्रकर्षेणहर्षं प्राप्नोतिएतत्स्थाने युक्तमित्यर्थः तथाजगदनुरज्य

भाषाअनुवाद

सेअर्जुनकहतेहैं किहेहृषीकेश जिसहेतुतुमअैसेअद्भुतप्रभावसेयुक्त औभक्तवत्सल हौ इससेतुमारामाहात्म्यसंकीर्त्तनकरनेसेकेवलहमनेजोहर्षपायासोनहीं किन्तु ब्रह्माण्डभरअतिहर्षितऔप्रीतियुक्तहैयहउचितहैऔरइसब्रह्माण्डमेजो सब स ज्जनप्रसन्नऔराक्षससकलडरकेमारेदशदिशामेभागेफिरतेहैं औरयोगतपमन्त्र आदिकेद्वारा सिद्धगणतुमकोप्रणामकरतेहैं यहकुछआश्चर्य्यनहींहै ३६

CC-0. In Public Domain. Digitized by eGangotri

कस्माच्चतेननमेरन्महात्मन् गरीयसेब्रह्मणोऽप्यादिकर्त्रे अनन्तदेवेशजगन्निवास त्वमक्षरंसदसत्तत्परंयत् ३७

शाङ्करभाष्यं

रीयसेगुरुतराय यतोब्रह्मणोहिरण्यगर्भस्याप्यादिकर्त्ताकारणमतस्तस्माआदिकर्त्रे कथमेवतेननमस्कुर्युःअतोहर्षादीनांनमस्कारस्यचस्थानंत्वमर्होविषयइत्यर्थःहेअनन्त हेदेवेशहेजगन्निवास त्वमक्षरंतत्परंयद्वेदान्तेषुश्रूयतेकिंतत्सदसत्यत्विद्यमानंत त्सत्असच्चयत्नास्तीतिबुद्धिस्ते उपधानभूतेसदसतीयस्याक्षरस्ययद्वारेण सदसदि त्युपचर्यतेपरमार्थतस्तु सदसतःपरंतत्यदक्षरंवेदविदोवदन्तितत्त्वमेवनान्यदित्यभि

आनन्दगिरिकृतटीका

किंतदर्जुनोभगवन्तंप्रतिसगद्दंवचनमुक्तवानितितदाह अर्जुनइति विषयवि शेषणत्वमेवव्यनक्ति युक्तइति भगवतोहर्षादिविषयतेत्ययुक्तमित्यत्रहेतुमाह यतइति तवप्रकीर्त्त्याहर्षवदनुरागञ्चगच्छतिजगदित्याह तथेति तच्चेत्यनुरागगमनंरक्षःसु जगदेकदेशभूतेषुप्रतिपक्षेषुकुतोजगतोभगवतिहर्षानुरागावित्याशंक्याह किञ्चेति इतश्चजगतोभगवति हर्षादियुक्तमित्याह सर्व्वइति ३६ उक्तेर्थेहेत्वर्थत्वेनोत्तर श्लोकमवतारयति भगवतइति महात्म्यत्वमक्षुद्रचेतस्त्वंगुरुतरत्वान्नमस्कारादियो ग्यत्वमाह गुरुतरायेति तत्रैवहेत्वन्तरमाह यतइति महात्मत्वादिहेतूनामुक्तानां

स्वामिकृतटीका।

तेचअनुरागमुपैतिइतियत्तथारक्षांसिभीतानिसन्तिदिशःप्रतिद्रवन्तिपलायन्तेइति यत्सर्व्वेयोगतपोमन्त्रादिसिद्धानांसङ्घानमस्यन्तिप्रणमन्तीतियत् एतच्चस्थानेयुक्तमे वनचित्रमित्यर्थः ३६ तत्रहेतुमाह कस्मादिति हेमहात्मन्हेअनन्तहेदेवेशहेज गन्निवास कस्माद्धेतोस्तेतुभ्यंननमेरन्ननस्कारंकर्युःकथंभूतायब्रह्मणोऽपिगरीयसे गुरूतरायआदिकर्त्रे चब्रह्मणोऽपिजनकायकिञ्चसद्व्यक्तंअसदव्यक्तञ्चताभ्यांपरं

भाषा अनुवाद

औरसवकेहर्ष औप्रणामकरनेमेअवहेतुकहतेहैं किहेमहात्मन्हेअनन्तहे जगन्निवासश्रीकृष्ण क्योंनयेसवप्रणामकरैंगे किजोतुमब्रह्माकेभीआदिकर्त्ताकहेज नकऔरगुरूहौ औरसत्कहेव्यक्तप्रगटजोजगत्औअसत्जोअव्यक्तप्रकृतिमाया इ नदोनोसे परअर्थात्मूलकारणरूप अक्षरकहेअविनाशीजोब्रह्म सोभीतुमहौ तौ नवधाभक्तिकेद्वारा जोसवतुमकोप्रणामकरतेहैं सोउचितहैं ३७

CC-0. In Public Domain. Digitized by eGangotri

त्वमादिदेवःपुरुषःपुराणस्त्वमस्यविश्वस्यपरंनिधानं वेत्तासिवेद्यञ्च परञ्चधा
मत्वयाततंविश्वमनन्तरूप ३८

शाङ्करभाष्यं ।

प्रायः३७ पुनरपिस्तौति त्वमिति त्वमादिदेवोजगतःस्रष्टृत्वात् पुरुषःपुरिशयनात्
पुराणश्चिरन्तनस्त्वमेवास्यविश्वस्यपरंप्रकृष्टंनिधानं निधीयतेऽस्मिन्जगत्सर्वंमहाप्र
लयादावितिकिञ्चवेत्तासिसर्वस्यैववेद्यजातस्ययच्चवेद्यं वेदनार्हंतच्चासिपरञ्चधामप
रमंपदंवैष्णवंत्वयाततंव्याप्तंविश्वंसमस्तंहेअनन्तरूपअन्तोनविद्यते तवरूपाणां ३८

आनन्दगिरिकृतटीका

फलमाह अतइति तत्रैवहेत्वन्तराणिसूचयति हेअनन्तेति अनवच्छिन्नत्वंसर्वदेव
नियन्तृत्वंसर्वजगदाश्रयत्वञ्चतवनमस्कारादियोग्यत्वेकारणमित्यर्थः तत्रैवहेत्वन्त
रमाह त्वमिति तत्रमानमाह यदिति कथमेकस्यैवसदसद्रूपत्वंतत्राह तेइति कथंसतो
सतश्चाक्षरंप्रत्युपाधित्वंतदाह यद्वारेणेति तत्परंयदितेतद्याचष्टे परमार्थतस्त्विति
अनन्तत्वादिनाभगवतोनमस्कारादियोग्यत्वमुक्तं ३७ सम्प्रति जगत्स्रष्टृत्वादिना
पितद्योग्यत्वमस्तीति स्तुतिद्वारादर्शयति पुनरपीति जगतःस्रष्टापुरुषोहिरण्य
गर्भइतिपक्षंप्रत्याह पुराणइति स्रष्टृत्वंनिमित्तमेवेति तटस्थेश्वरवादिनस्तान्प्र
त्युक्तं त्वमेवेति महाप्रलयादावित्यादिपदमवान्तरप्रलयार्थंईश्वरस्योभयथाकार
णत्वंसर्वज्ञत्वेनसाधयति किञ्चेति वेद्यवेदितृभावेनअद्वैतानुपपत्तिमाशंक्याह य
च्चेति मुक्त्यालम्बनस्यब्रह्मणोर्थान्तरत्वंआशङ्क्यत्वोक्तं परञ्चेति यत्परमंपदंतदपिच
त्वमेवेति सम्बन्धः तस्यपूर्णत्वमाह त्वयेति व्याप्यव्यापकत्वेनभेदंशङ्कित्वाकल्पि

स्वामिकृतटीका

मूलकारणंयदक्षरंब्रह्मतच्चत्वमेव एतैर्नवभिर्हेतुभिस्त्वां सर्वेनमस्यन्तीतिनचित्रमि
त्यर्थः ३७ किञ्च त्वमादिदेवइति त्वमादिदेवोदेवानामादिःयतःपुराणोऽना
दिःपुरुस्त्वमतएव त्वमस्यविश्वस्यपरंनिधानंलयस्थानंतथाविश्वस्यवेत्तासिज्ञाताचत्वंयच्च

भाषाअनुवाद

और संपूर्णदेवतोंकेआदिभूतजोअनादिपुरुषतुम सोइसविश्वकेपरनिधानकहे
लयस्थानऔविश्वकेज्ञाताऔजोकुछजाननेकेयोग्यवस्तु हैं सोतुमहौ औरपरमधा
मजोविष्णुपदसोभीतुमहौं इससेहेअनन्तरूपकृष्ण तुमइसविश्वमेव्याप्तहौ इनसात
हेतुवोंकेद्वाराभी तुमहीनमस्कारयोग्यहौ ३८ जिसहेतु तुमसर्वदेवरूपहौ इससे

CC-0. In Public Domain. Digitized by eGangotri

वायुर्यमोऽग्निर्वरुणःशशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च नमोनमस्तेऽस्तु सहस्रकृत्वः पुनश्चभूयोऽपिनमोनमस्ते ३९ नमःपुरस्तादथ पृष्ठतस्ते नमोऽस्तुते

शाङ्करभाष्यं।

किञ्च वायुरिति वायुस्त्वं यमश्चाग्निर्वरुणोऽपांपतिःशशाङ्कश्चन्द्रमाःप्रजापतिस्त्वं कश्यपादिःप्रपितामहश्चपितामहस्यापिपितात्प्रपितामहोब्रह्मणोपिपितादित्यर्थःनमो नमस्तेतुभ्यमस्तुसहस्रकृत्वः पुनश्चभूयोपिनमोनमस्तेवक्तुश्चोनमस्कारक्रियाभ्यासा दृत्तिगणनंकृत्यसुचोच्यतें पुनश्चभूयोपीति अङ्गाभक्त्यतिशयादपरितोषमात्मनोदर्श यति ३९ तथानमःपुरस्तादिति नमःपुरस्तात्पूर्वस्यांदिशितुभ्यमथपृष्ठतोपिच नमोस्तुते सर्वतएवसर्व्वासुदिक्षुसर्ववस्थिताय हेसर्वअनन्तवीर्य्यामितविक्रमःअनन्तं वीर्यमस्यअमितोविक्रमोयस्य वीर्य्यंसामर्थ्यंविक्रमःपराक्रमःवीर्यवानपिकश्चित् शस्त्रा

आनन्दगिरिकृतटीका।

तत्वात्तस्यमैवमित्याह अनन्तेति ३८ तस्यसर्वात्मत्वेहेत्वन्तरमाह किञ्चेति कश्यपादिरित्यादिशब्देनविराट्दक्षादयोगृह्यन्ते पितामहोब्रह्मातस्यापि तासूत्वात्मान्तर्यामोवेत्याह ब्रह्मणोपीति सर्व्वदेवतास्त्वमेवेत्युक्तेफलितमाह नम इति सहस्रकृत्वइति कृत्यसुचोविवक्षितमर्थमाह वक्तुश्चइति पुनरुक्तितात्पर्यमा ह पुनश्चेति अङ्गाभक्त्योरतिशयात्कृतेपिनमस्कारेपरितोषाभावोबुद्धेरात्मनोलंप्र त्ययराहित्यंतद्दर्शनार्थं पुनरुक्तिरित्यर्थः ३९ विद्यान्तरेणभगवन्तंस्तुत्यानम

स्वामिकृतटीका

वेद्यंवस्तुजातंपरञ्चधामवैष्णवंपदंतदपित्वमेवासि अतएव हेअनन्तरूपत्वयैवेदंवि श्वंततंव्याप्तं एतैश्चसप्तभिर्हेतुभिस्त्वमेव नमस्कार्य्यइत्यर्थः ३८ इतश्चसर्वैस्त्वमे वनमस्कार्य्यःसर्वदेवात्मकत्वादिति स्तुवन्स्वयमपिनमस्करोति वायुरिति वाय्वा दिरूपस्त्वमितिसर्वदेवात्मकत्वोपलक्षणार्थमुक्तं प्रजापतिःपितामहस्तस्यापिजन कत्वात्प्रपितामहस्त्वंअतस्तेतुभ्यंसहस्रकृत्वः सहस्रशोनमोऽस्तु पुनःसहस्रकृत्वोन मोऽस्तुभूयोऽपिपुनरपिसहस्रकृत्वोनमोनमइति ३९ भक्तिश्रद्धाद्यादरातिशयेनन

भाषाअनुवाद

तुमसबकेनमस्कारयोग्यहौ औमेवचनोंसे अर्जुन भगवानकोस्तुतिकरिके अबआपप्र णामकरतेहैं किवायुयमअग्निवरुणचन्द्रप्रजापतिब्रह्मा औप्रपितामहब्रह्माकेभी जनक तुमको मेरेसहस्रसहस्रप्रणामहैं फेरिफेरिभीसहस्रसहस्रप्रणामहैं ३९

CC-0. In Public Domain. Digitized by eGangotri

सर्वतएवसर्व अनन्तवीर्यामितविक्रमस्त्वं सर्वंसमाप्नोषिततोऽसिसर्वः ४०

शाङ्करभाष्यं।

दिविषयेनपराक्रमतेमन्दपराक्रमोवा त्वंतुअनन्तवीर्योऽमितविक्रमश्चेत्यनन्तवीर्यामितविक्रमःसर्वंसमस्तंजगत् प्राप्नोषिसम्यगेकेनात्मनाव्याप्नोषि अतस्त्वमादसिभवसिसर्वंस्वयाविनाभूतं न किञ्चिदस्तीत्यर्थः ४० यतोहं त्वन्माहात्म्यापरिज्ञानादपराधाद्धेतोःसखेति सखासमानवयाइतिमत्वाज्ञात्वा विपरीतवुद्ध्याप्रसभमभिभूयप्रसह्ययदुक्तं हेकृष्णहेयादवहेसखेतिच अजानताअज्ञानिनामूढ़ेनकिमजानतेत्याहमहिमानंमाहात्म्यंतदेवमीश्वरस्यविश्वरूपंतवेदंमहिमानमजानतेतिवैयधिकरण्येन

आनन्दगिरिकृतटीका

स्कुर्वन्नभिमुखीकरोति तथेति यस्यांदिशिसवितोदेति साप्पूर्वादिगुच्यते तस्यांव्यवस्थितंसर्वंत्वमेव तस्मात्तेतुभ्यंनमोस्त्वित्याह नमइति अथशब्दःसमुच्चये पश्चाद्पिस्थितंसर्वंत्वमेव तस्मैतेतुभ्यंनमोस्त्वित्याह अथेति किंवऋजनायावन्त्योदिशस्तत्रसर्वत्रयद्वर्त्तते तदशेषंत्वमेवतस्मैतुभ्यंप्रह्वीभावःस्यादित्याह नमोस्त्विति फलितंसर्वात्मत्वंसूचयति हेसर्वेति वीर्यविक्रमयोर्नपौनरुक्त्यमित्याह वीर्यमित्यादिना वीर्यवतोविक्रमाव्यभिचारादर्थपौनरुक्त्यमाशंक्याह वीर्यवानिति भगवतिलोकतोविशेषमाह त्वंत्विति उक्तंसर्वात्मत्वंप्रपञ्चयति सर्वमिति सप्रपञ्चत्वंवारयति त्वयेति ४०

स्वामिकृतटीका।

मस्कारेषुतृप्तिमनधिगच्छन्पुनरपिवऋजुशःप्रणमति नमइति हेसर्वसर्वात्मन्सर्वासुदिक्षुतुभ्यंनमोस्तु सर्वात्मत्वमुपपादयन्नाह अनन्तंवीर्यंसामर्थ्यंयस्यतथाऽमितोविक्रमःपराक्रमोयस्यसएवंभूतस्त्वं सर्वंविश्वंसम्यगन्तर्बहिश्चसमाप्नोषि व्याप्नोषिसुवर्णमिवकणककुण्डलादिस्वकार्यंव्याप्यवर्त्तसे ततःसर्वस्वरूपोऽसि ४०

भाषाअनुवाद

भक्तिऔरश्रद्धातथाआदरकीअधिकाईसे भगवतकोनमस्कारकरनेसे तृप्तिनपाके पुनर्वारऔरभीप्रणामकरतेहैं किहेसर्वात्मन् तुमारेसन्मुखऔरपृष्ठभागमेप्रणामकरताहूं औरतुमारेसबओरभी मेरीनमस्कारपऋजुंचैऔरभगवानकीसर्वात्मकतासिद्धकरनेकीआकांक्षापरकहतेहैं किजिसकीअनन्तसामर्थ्यऔरअपरिमितपराक्रम एवंभूतजोतुमविश्वकेभीतरवाहरसम्यक्व्याप्तहौ जैसेसुवर्णनानारूपसेभूषणोंमेव्याप्तहै औमृत्तिकाघटआदिपात्रोंमेव्याप्तहै तैसेविश्वमेआपव्यापरहे हौ ४०

CC-0. In Public Domain. Digitized by eGangotri

सखेतिमत्वाप्रसभंयदुक्तं हेकृष्णहेयादवहेसखेति अजानतामहिमानंतवेदंमया प्रमादात्प्रणयेनवापि ४१ यच्चावहासार्थमसत्कृतोसि विहारशय्यासनभोज

शाङ्करभाष्यं

सम्बन्धस्तवेदमिति पाठोयद्यस्ति तदासामानाधिकरण्यमेव मयाप्रमादात्विक्षिप्त चित्ततयाप्रणयेनवापि प्रणयोनामस्नेहस्तन्निमित्तोविश्रम्भस्तेनापि कारणेनयदुक्त वानस्मि ४१ यच्चेति यच्चअवहासार्थंपरिहासप्रयोजनाय असत्कृतः परिभूतो सिभवसि क्वचिद्विहारशय्यासनभोजनेषु विहरणंविहारःपादव्यायामःशयनंशय्या आसनंआस्थापिकाभोजनमदनमित्येतेषुविहारशय्यासनभोजनेषुएकः परोक्षःसन् असत्कृतोसि परिभूतोसि अथवा हेअच्युत तत्समक्षंतच्छब्दःक्रियाविशेषणार्थः अत्यर्थंवाअसत्कृतोसितत्सर्व्वमपराधजातं क्षामयेक्षमांकारये त्वमहमप्रमेयंप्रमाणातीतंयतस्त्वं ४२ पितासीति पितासिजनयितासि लोकस्यप्राणिजातस्यचरा

आनन्दगिरिकृतटीका

अज्ञाननिमित्तमपराधंक्षमयति यत इति इदंशब्दार्थमाह विश्वरूपमिति नहीदमित्थंमहिमानमित्यस्यचसामानाधिकरण्यंलिङ्गव्यत्ययादित्याह तवेति पा ठान्तरसम्भावनायां सामानाधिकरण्योपपत्तिमाह तवेत्यादिना यदुक्तवानस्मि तद हंक्षामयेत्वामितिसम्बन्धः ४१ यदयुक्तमुक्तं तत्क्षन्तव्यमित्येवन किन्तुयत्य रीहासार्थंक्रीडादिषु त्वयितिरस्करणंकृतंतदपिसोढव्यमित्याह यच्चेति विहरणं क्रीड़ाव्यायामोवा शयनंतल्पादिकंआसनंआस्थापिकासिंहासनादेरुपलक्षणमेतेषु विषयभूतेष्विति यावत् एकशब्दोरहसिस्थितमेकाकिनंकथयतीत्याह परोक्षः स

स्वामिकृतटीका।

इदानींभगवन्तंक्षमापयति सखेतिद्वाभ्यां त्वांप्राकृतःसखेत्येवंमत्वाप्रसभंहठा त्तिरस्कारेणयदुक्तं तत्क्षामयेत्वामित्युत्तरेणान्वयःकिंतत्हेकृष्णहेयादवहेसखेति चसन्धिरार्षः प्रसभोक्तौहेतुः तवमहिमानमिदञ्चविश्वरूपमजानतामया प्रमादात् प्रणयेनस्नेहेनवा यदुक्तमिति ४१ किञ्च यच्चेति हेअच्युत यच्चपरिहासार्थंक्री

भाषा अनुवाद

अबदोश्लोककेद्वारा भगवानसेअर्जुनअपनोअपराधक्षमाकरावतेहैं किहेकृष्णहेया दवहेसखे ऐसेवचनोंसेआपकोअपनासखामानि जोहठसेमैनेतुमारीयहमहिमान जानिके अथवाभूलसे याप्रणयकहेअतिप्रीतिसे कहा सोमेरोअनजानकीअसावधा नकौ अपराधचूकक्षमाकरो ४१ औरहेअच्युत विहारशयनभोजनक्रीडाआ

CC-0. In Public Domain. Digitized by eGangotri

नेषु एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामयेत्वामहमप्रमेयम् ४२

शाङ्करभाष्यं ।

चरस्यस्थावरजङ्गमस्य नकेवलंत्वमस्यजगतःपितापूज्यश्चपूजार्होयतोगुरुर्गरीयान् गुरुतरःकस्मात्गुरुतरस्त्वमित्याह नचत्वत्समस्त्वत्तुल्योऽन्योस्ति नहीश्वराद्वरंसम्भवत्यनेकेश्वरत्वव्यवहारानुपपत्तेःत्वत्समएवतावदन्योनसम्भवति कुतएवान्योऽभ्यधिकःस्यात् कस्माल्लोकत्रयेपिसर्व्वस्मिन्नप्रतिमप्रभाव प्रतिमीयतेययासाप्रतिमा नविद्यतेप्रतिमायस्यतवप्रभावस्य सत्वमप्रतिमप्रभावः हेअप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थः ४३ यतएवं तस्मादिति तस्मात्प्रणम्यनमस्कृत्यप्रणिधायप्रकर्षेण

आनन्दगिरिकृतटीका

न्निति प्रत्यक्षंपरोक्षंवातदसत्करणंपरिभवनंयथास्यात्तथा यन्मयात्वमसत्कृतोसि तत्सर्व्वमितियोजनामङ्गीकृत्याह तच्छब्दइति क्षमाकारयितव्येत्यत्रापरिमितत्वं हेतुमाह अप्रमेयमिति वाचनिकंमदीयमपराधजातं त्वयाक्षन्तव्यमित्युक्तं इदानीं मदीयोऽपराधोनत्वयागृहीतव्यो गृहीतोपिसोढ़व्यइत्याह यत इति ४२

गुणाधिक्यात्पूजार्हत्वंधर्म्मात्मज्ञानसंप्रदायप्रवर्तकत्वेनशिक्षयितृत्वात्गुरुत्वं गुरूणामपिसूत्रादीनांगुरुत्वाद्गरीयस्त्वं तदेवप्रश्नद्वारासाधयति कस्मादिति ईश्वरान्तरंतुल्यंभविष्यतीत्याशंक्याह नहीति ईश्वरभेदेप्रत्येकंस्वातन्त्र्यात्तदैकमत्त्येहेत्वभावान्नानामतित्वे चैकस्यसिसृक्षायामन्यस्यसंजिहीर्षासम्भवाद्व्यवहारलोपादयुक्तमीश्वरनानात्वमित्यर्थः अभ्यधिकासत्त्वंकैमुतिकन्यायेनदर्शयति त्वत्समइति सतत्र हेतुमवतार्य्य व्याकरोति अप्रतिमेत्यादिना ४३ निरतिशयप्रभावत्वंहेतुंकृत्वाप्रति

स्वामिकृतटीका ।

ड़ादिषुतिरस्कृतोऽसि एकःकेवलःसखीन्विना रहसिस्थितइत्यर्थः अथवातत्समक्षं तेषांपरिहसतांसखीनांसमक्षंपुरतोऽपि तत्सर्व्वमपराधजातं त्वामप्रमेयंअचिन्त्यप्रभावं क्षामयेक्षमांकारयामि ४२ अचिन्त्यप्रभावत्वमेवाह पितेति न विद्यतेप्रतिमाउपमायस्यसो प्रतिमस्तथाविधः प्रभावोयस्यतव प्रहेअप्रतिमप्रभावत्वमस्यचराजरस्यलोकस्यपिताजनकोसि अतएवपूज्यश्चगुरुश्चगुरोरपिगरीयांश्चगरुत

भाषाअनुवाद ।

दिमे अथवा सखागणरहितनिर्जनस्थानमे जहांहमऔरतुमकोछोड औरकोईनथा ऐसीजगहमे अथवा परिहासकरनेवालेमित्रोंकेवीचमे जोहमनेहंसनेकेलियेतिरस्कारआपकाकियाहै सोसबअचिन्त्यप्रभावरूपआपसेहमक्षमाकरवावतेहै ४२

CC-0. In Public Domain. Digitized by eGangotri

पितासिलोकस्यचराचरस्य त्वमस्यपूज्यश्चगुरुर्गरीयान् नत्वत्समोस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ४३

शाङ्करभाष्यं

नीचैर्भूत्वा कायंशरीरंप्रसादयेप्रसादंकारये त्वामहमीशमीशितारमीड्यं स्तुत्यं त्वं पुनःपुत्रस्यापराधंपितायथाक्षमतेसर्व्वंसखाइवसख्युरपराधंयथावा प्रियः प्रियाया अपराधंक्षमते एवमर्हसि हेदेवसोढुं प्रसहितुंक्षन्तुमिर्थः ४४ अदृष्टपूर्व्वंनकदाचिदपिदृष्टपूर्व्वमिदंविश्वरूपंतवमयान्यैर्वा तदहंदृष्ट्वाहृषितोस्मिभयेनचप्रव्यथितंमनोमेऽतस्तदेवमेममदर्शय हेदेवरूपंयन्मत्सुखंप्रसीददेवेशजगन्निवास जगतोनिवासोजगन्निवासः हेजगन्निवास ४५ किञ्च किरीटिनमिति किरीटिनंकिरीटवन्तं

आनन्दगिरिकृतटीका

प्रसादयेप्रणामपूर्व्वकंत्वामित्याह यतइति प्रसादनानन्तरंभगवताकर्त्तव्यंप्रार्थयते त्वं पुनरिति प्रियइवप्रियायाइतीवकारोनुषज्यते प्रियायार्हसीतिछान्दसःसन्धिः क्षन्तु मदपराधजातमितिशेषः ४४ हेतूकिंपूर्व्वकंविश्वरूपोपसंहारंप्रार्थयते अदृष्टेति हृषितोहृष्टस्तुष्टइतियावत् भयेनतद्धेतुविकृतदर्शनेनेत्यर्थः४५ तदेवदर्शयेत्युक्तंकिं

स्वामिकृतटीका

रःअतोलोकत्रयेपित्वत्समएवतावदन्योनास्तिपरमेश्वरादन्यस्याभावात्त्वत्तोऽधिकः पुनःकुतःस्यात् ४३ यस्मादेवं तस्मादिति तस्मात्त्वामीशंजगतईड्यं स्तुत्यंप्रसादयामि कथंकायंप्रणिधायदण्डवन्निपात्यप्रणम्यप्रकर्षेणनत्वा अतस्त्वं ममापराधंसोढुं क्षन्तुमर्हसि कस्यकइवपुत्रस्यापराधंक्षमयापितायथासहतेसख्युर्मित्रस्यापराधंसखानिरुपाधिबन्धुर्यथासहते प्रियश्चप्रियस्यापराधंतत्प्रियार्थं यथातद्वत् ४४ एवंक्षमयित्वाप्रार्थयते अदृष्टेतिद्वाभ्यां हेदेवपूर्वमदृष्टंतवरूपंदृष्ट्वाहृषितोहृष्टोऽस्मितथाभयंनचमेमनःप्रव्यथितंप्रचलितंतस्मात्ममव्यथानिवृत्तयेतदेवरूपंदर्शय हेदेवेश हे जगन्निवास प्रसन्नोभव ४५ तदेवरूपंविशेषयन्नाह किरीटिनमिति किरीटवन्तं

भाषा अनुवाद।

अबभगवत्का अचिन्त्यप्रभावकहतेहैं किहेअप्रतिमप्रभाव नहींहैप्रतिमा कहेउपमा ऐसानिरुपमप्रभावहैजिसका सोतुमदृसचराचरात्मकलोकके पिता कहे उत्पत्तिकरनेवाले औपूजनीय तथागुरुकेभीगुरुहो इसहेतुपरमेश्वरजो तुम तुमारेसमानका त्रिलोकीमेकोई नहीं तोअधिकफेरिऔरकहांसेहोसकै है ४३

CC-0. In Public Domain. Digitized by eGangotri

तस्मात्प्रणम्यप्रणिधायकायं प्रसादयेत्वामहमीशमीड्यं पितेवपुत्रस्यसखेवसख्युः प्रियःप्रियायार्हसिदेवसोढुं ४४ अदृष्टपूर्वं हृषितोऽस्मिदृष्ट्वा भयेनचप्रव्यथितं मनोमे तदेवमेदर्शयदेवरूपं प्रसीददेवेशजगन्निवास ४५

शाङ्करभाष्यं

तथागदिनंगदावन्तं चक्रहस्तमिच्छामित्वांप्रार्थयेत्वांद्रष्टुमहंतथैवपूर्ववदित्यर्थः यत एवंतस्मात्तेनैवरूपेणचतुर्भुजेनसहस्रबाहोवार्तमानिकेनविश्वरूपेणभव विश्वमूर्तेउपसंहृत्यविश्वरूपंतेनैवरूपेणचतुर्भुजेनसहस्रबाहोवार्तमानिकेनविश्वरूपेणभवेत्यर्थः ४६

आनन्दगिरिकृतटीका ।

तदित्यपेक्षायामाह किरीटिनमितीति चक्रंहस्तेयस्यतमितिव्युत्पत्तिंगृहीत्वाह चक्रेति मदीयेच्छाफलपर्यन्ताकर्त्तव्येत्याह यतइति चतुर्भुजत्वेकथंसहस्रबाहुत्वंतत्राह वर्त्तमानिकेनेति सतिविश्वरूपेकथंपूर्वरूपभाक्त्वंतत्राह उपसंहृत्येति ४६

स्वामिकृतटीका

गदावन्तंचक्रहस्तञ्चत्वांद्रष्टुमिच्छामियथापूर्वंदृष्टोऽस्मितथैव अतःहेसहस्रबाहो हे विश्वमूर्त्तेइदंविश्वरूपंउपसंहृत्यतेनैवकिरीटादियुक्तेनचतुर्भुजेनरूपेणभवआविर्भव तदनेनश्रीकृष्णमर्जुनःपूर्वमपिकिरीटादियुक्तमेवपश्यतीति गम्यतेयत्तुपूर्वमुक्तंविश्वरूपप्रदर्शनेकिरीटिनंगदिनंचक्रिणञ्चपश्यामीति तदुक्तकिरीटाद्यभिप्रायेणयद्वाएतावन्तंकालंयंत्वांकिरीटिनंगदिनंचक्रिणञ्चसुप्रसन्नमपश्यंतमेवेदानींतेजोराशिंदुर्निरीक्ष्यंपश्यामीत्येवमलवचनस्यव्यक्तिरित्यविरोधः ४६ एवंप्रार्थितःसंस्तमाश्वासयन्श्री

भाषाअनुवाद ।

इससेहेईसस्वामिन् स्तुतिकेयोग्यईश्वरजोआप तिनकोमैशरीरसेदण्डकेसमान अष्टाङ्गप्रणामकरिप्रसन्नकरवताहूं किजैसेपुत्रकीअपराध क्षपाकरिकेपितासहिलेताऔरमित्रकीअपराधमित्रममेनहींधरतातथापत्नीकीअपराधपतिभीप्रीतिसेसह्य करताहैतैसेहीहेदेवपिताऔमित्रतथास्वामीरूपआपभी मेरीअनजानवालकसमानप्रीतिपात्रसेवककीअपराधक्षमाकीजिये ४४ इसप्रकारसेक्षमाकरायअब अर्जुनदोश्लोककेद्वाराभगवानसेप्रार्थनाकरतेहैं किहेदेवश्रीकृष्णअदृष्टपूर्वयहआपकारूपदेखिकेमैअतिप्रसन्नभयाहौं परन्तुभयकेमारेमेरामनथिरनहींहैं इससेहेदेवेशजगतकेनिवासअबमेरेपरप्रसन्नहोउऔरवहीपूर्वरूपदेखावोयहप्रार्थनाकरताहूं ४५ अबसोईपूर्वरूपकहतेहैं किहेसहस्रबाहोहे विश्वमूर्त्तेसोईकिरीट

CC-0. In Public Domain. Digitized by eGangotri

किरीटिनंगदिनंचक्रहस्त मिच्छामित्वांद्रष्टुमहंतथैव तेनैवरूपेणचतुर्भुजेन स हस्रवाहोभवविश्वमूर्त्ते ४६ श्रीभगवानुवाच मयाप्रसन्नेनतवार्जुनेदं रूपं परं दर्शितमात्मयोगं तेजोमयंविश्वमनन्तमाद्यं यन्मेत्वदन्येन नदृष्टपूर्वं ४७

शाङ्करभाष्यं

अर्जुनंभीतमुपलभ्यउपसंहृत्यविश्वरूपं प्रियवचनेनाश्वासयन्श्रीभगवान्मयेति मय प्रसन्नेनप्रसादोनामत्वय्यनुग्रहबुद्धिस्तद्वताप्रसन्नेनमयातवहेअर्जुन इदंपररूपं दर्शितमात्मयोगात्आत्मनऐश्वर्यस्यसामर्थ्यात्तेजोमयं तेजप्रायंविश्वसमस्तमनन्तंअन्तरहितंआदौभवमाद्यंयदूपं मेममत्वदन्येनत्वत्तोऽन्येनकेनचिन्नदृष्टपूर्वं ४७

आत्मनोममरूपदर्शनेनकृतार्थएवत्वंसंवृत्तइतितत:स्तौति नवेदेति नवेदयज्ञाध्ययनैर्नदानैश्चतुर्णामपिवेदानामध्ययनैर्यथावत्यज्ञाध्ययनैरेव यज्ञाध्ययनस्यसिद्धत्वात्पृथक्यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपलक्षणार्थं तथानदानैःतुलापुरुषादिभिर्नच क्रियाभिरग्निहोत्रादिभिः औतादिभिर्नापितपोभिरुग्रैश्चान्द्रायणादिभिरुग्रैर्घोरैः एवंरूपोयथादर्शितंविश्वरूपंयस्य सोहमेवंरूपःशक्योनशक्यः अहंनृलोकेमनुष्यलो

आनन्दगिरिकृतटीका

अर्जुनेनस्थानेहृषीकेशेत्यादिनाकस्यभगवतोवचनमवतारयति अर्जुनमिति भगवत्प्रसादैकोपायलभ्यंतद्दर्शनमित्याशयेनाह मयेति ४७

स्वामिकृतटीका

भगवानुवाच मयेतित्रिभिः हेअर्जुनकिमिति त्वंचित्तनंरूपं दर्शितंआत्मनोममयोगात्योगमायासामर्थ्यात्परत्वमेवाह तेजोमयंविश्वात्मकमनन्तमाद्यञ्चयन्ममरूपं त्वदन्येन त्वादृशाद्भक्तादन्येन पूर्वंनदृष्टं ४७

भाषाअनुवाद

मुकुटदियेगदाऔचक्रहाथमेलिये आपकोदेखनेकीइच्छाकरताहूं इससेअबआप इसविश्वरूपकोसंहारकरिकेवैसहीचतुर्भुजरूपस्वरूपधारणकरो ४६ भगवान श्रीकृष्णजबऐसेप्रार्थनाकिये गयेतबअर्जुनकोसमझातेभये तीनिश्लोकसेयह कहनेलगे किहेअर्जुनतुमभयकिसलियेकरतेहो मैतोअतिप्रसन्नहोयअपनी योगमायाकीसामर्थ्यसेयहअपनाअपूर्वउत्तमरूपतुमकोकृपाकरिकेदेखाया औरइसतेजमयविश्वात्मकआदिअन्तरहितमेरेरूपको तुमारेसमानभक्तकेविना किसीऔर भक्तने कभीभी नहींदेखाहै ४७

CC-0. In Public Domain. Digitized by eGangotri

नवेदयज्ञाध्ययनैर्नदानै र्नचक्रियाभिर्नतपोभिरुग्रैः एवंरूपःशक्योऽहंनृलो
केद्रष्टुंत्वदन्येनकुरुप्रवीर ४८ मातेव्यथामाचविमूढभावो दृष्ट्वारूपंघोरमीदृ
ङ्ममेदं व्यपेतभीःप्रीतमनाःपुनस्त्वंतदेवमेरूपमिदंप्रपश्य ४९

शाङ्करभाष्यं।

केद्रष्टुंत्वदन्येनकुरुप्रवीर ४८ मातेव्यथेति मातेव्यथामाभूत्तेभयं माचविमूढभावो
विमूढचित्तता दृष्ट्वोपलभ्यरूपंघोरमीदृक्यथावद्दृष्टंममेदंव्यपेतभीर्विगतभयःप्री
तमनाश्चसन्पुनर्भूयस्त्वंतदेवचतुर्भुजंरूपंशङ्खचक्रगदाधरंतवेष्टंरूपमिदंप्रपश्य४९

आनन्दगिरिकृतटीका

तच्छब्देनप्रकृतंदर्शनंपरामृश्यते वेदाध्ययनात्पृथक्यज्ञाध्ययनग्रहणंपुनरुक्तंर
युक्तमित्याशंक्याह नवेदेति नचवेदाध्ययनग्रहणादेव यज्ञविज्ञानमपिगृहीतमध्यय
नस्यार्थावबोधान्तत्वादिति वाच्यंतस्याक्षरग्रहणान्ततयाद्वैःसाधितत्वादिति भावः
श्लोकपूरणार्थमसंहितकरणं त्वत्तोन्येनमदनुग्रहविहीनेनेति शेषः ४८

स्वामीकृतटीका

एतद्दर्शनमतिदुर्लभंलब्ध्वात्वंकृतार्थोऽसीत्याह नवेदेति वेदाध्ययनव्यतिरेकेण
यज्ञाध्ययनस्याभावात्यज्ञशब्देनयज्ञविद्याःकल्पसूत्राद्यालक्ष्यन्ते वेदानांयज्ञविद्याना
ञ्चाध्ययनैरित्यर्थः नचदानैःनचक्रियाभिरग्निहोत्रादिभिर्नचोग्रैस्तपोभिश्चान्द्रायरा
दिभिरेवंरूपोऽहंत्वत्तोऽन्येनमनुष्यलोकेद्रष्टुंशक्यःअपितुत्वमेवकेवलंमत्प्रसादेन द
ष्ट्वाकृतार्थोऽसि ४८ एवमपिचेत्तवेदंघोरंरूपंदृष्ट्वाव्यथाभवतितर्हितदेवरूपंद

भाषा अनुवाद

औरयहअति दुर्लभदर्शनपायके तुमअबकृतार्थभयेहौ सोईकहतेहैं किनवे
दअध्ययनसे नयज्ञअध्ययनकहेयज्ञविद्याजोकल्पसूत्रआदिकर्मकाण्डके अर्थसंग्रह
कियेग्रन्थ तिनसेअर्थात्नयज्ञविद्याध्यायनसेऔरनदानसे नअग्निहोत्रआदिक्रि
येांसे नचान्द्रायणआदिउग्रकहेकठिनतपस्योंकेद्वारा यहमेरारूप नरलोकमेंदेख
नेकेशक्यहै सोहेकुरुप्रवीरअर्जुन तुमकोछोडिऔरकोईनहींनृलोकमे इसरूपको
देखशकाहै सोतुममेरेअनुग्रहसे इसमेरेरूपकादर्शनकरि अपनेको कृतार्थभये
जानो ४८ जोऐसाघोरभयानकरूपदेखि तुमकोक्लेशहोताहै तोजिसमे तु
मै मेरारूपदेखिव्यथाऔमूढतानहोय इससेअबतुमविगतभय प्रसन्नचित्तहोय
फेरि हमारासोईवहपूर्वरूप जोदेखाचाहतेहौ सोदेखौ यहभगवाननेकहा४९

CC-0. In Public Domain. Digitized by eGangotri

सञ्जयउवाच इत्यर्जुनंवासुदेवस्तथोक्त्वा स्वकंरूपंदर्शयामासभूयः आश्वासया मासचभीतमेनं भूत्वापुनःसौम्यवपुर्महात्मा ५० अर्जुनउवाच दृष्ट्वेदंमानुषंरूपं तवसौम्यंजनार्दन इदानीमस्मिसंवृत्तः सचेताःप्रकृतिंगतः ५१

शाङ्करभाष्यं

इत्यर्जुनमिति इत्येवमर्जुनंप्रतिवासुदेवस्तथाभूतंवचनंउक्त्वास्वकंवसुदेवगृहे जातंरूपंदर्शयामासदर्शितवान् भूयःपुनराश्वासयामासचाश्वासितवान् भीतमेनंभू त्वापुनःसौम्यवपुःप्रसन्नदेहोमहात्मा ५० दृष्ट्वेदमिति दृष्ट्वेदंमानुषंरूपंमत्सु खंप्रसन्नंभवसौम्यं जनार्दनेत्यर्हतेर्गतिकर्म्मणोऽसुराणां देवप्रतिपक्षजनानां प्राणवि योगजनरकाद्यर्थप्रयोजनंसर्व्वंजनैर्याच्यत इतिवागमयित्वाजनार्दनः अभ्युदय निःश्रेयसपुरुषार्थायइदानीमधुनास्मिसंवृत्तःसंजातःसचेताः किंप्रसन्नचित्तःप्रकृतिं स्वभावंगतश्चास्मि ५१

आनन्दगिरिकृतटीका।

विश्वरूपदर्शनमेवंस्तुत्वायद्यस्माद्दृश्यमानाद्विभेषि तर्हितदुपसंहरामीत्याह मातेव्य थेति वक्ष्यतिथमनुभूतत्वमभिप्रेत्य तदेवेत्युक्तं इदमिति ४९

प्रत्यक्षयोग्यत्वंतदिदंवृत्तंराज्ञेहतोनिवेदितवानित्याह सञ्जयइति तथाभूतंवच नंसयाप्रसन्नेनेत्यादिचतुर्भुजंरूपंकिंतस्यरूपस्यपरिचितपुर्वस्यप्रदर्शनेनप्रसन्नदेहत्वे नचार्जुनंप्रत्याश्वासनंभगवतोयुक्तमित्यत्रहेतुमाह महात्मेति ५० एवंभगवदाश्वा सितःसन्नर्जुनस्तंप्रत्युक्तवानित्याह अर्जुनइति ५१

स्वामिकृतटीका।

र्शयामीत्याह मा तेइति ईदृक्ईदृशंघोरंमदीयंरूपंदृष्ट्वातेव्यथामास्तुविमूढ़भावोवि मूढत्वञ्चमास्तुविगतभयःप्रीतमनाश्चसन्पुनस्त्वं तदेवेदंममरूपं प्रकर्षेणपश्य ४९

एवमुक्त्वाप्राक्तनमेवरूपंदर्शितवानिति सञ्जयउवाच इतीति वासुदेवोऽर्जुनमि त्युक्त्वा यथापूर्व्वमासीत्तथैव किरीटगदादियुक्तं चतुर्भुजं स्वीयंरूपं पुनर्दर्शयामास

भाषाअनुवाद

ऐसेवचनकहिकर भगवाननेअर्जुनकोवहीपूर्व्वरूपअपनादेखाया यह सञ्जयधृत राष्ट्रसेकहतेहैं किमहात्मावासुदेवश्रीकृष्णजीनेअर्जुनकोसोईचतुर्भुजकिरीटधारी अपनाशान्तस्वरूपफेरिदेखाया औरडरेभयेअर्जुनकोआश्वासदिया ५० तिस केअनन्तरनिर्भयहोयअर्जुननेकहा किहेजनार्दन तुमारायहशान्तमनुष्यस्वरूपदे खि मैअबप्रसन्नचित्तऔसावधानभयाहौं अबमेरेजीसेभयदूरभई ५१

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम देवाअप्यस्यरूपस्यनित्यंदर्शनकांक्षिणः ५२ नाहंवेदैर्नतपसानदानेननचेज्यया शक्यएवंविधोद्रष्टुंदृष्टवानसियन्मम ५३ भक्त्यात्वनन्ययाशक्योअहमेवंविधोर्जुन ज्ञातुंद्रष्टुञ्चतत्त्वेनप्रवेष्टुं

शाङ्करभाष्यं

सुदुर्दर्शमितिसुदुर्दर्शंसुष्ठुदुःखेनदर्शनमस्येतिसुदुर्दर्शमिदंरूपंदृष्टवानसि यन्ममदेवादयोऽप्यस्यममरूपस्यनित्यंसर्व्वदादर्शनाकांक्षिणोदर्शनेप्रवेपिनत्वमिवदृष्टवन्तोनद्रक्ष्यन्तिचेत्यभिप्रायः५२ कस्मात् नाहमिति नाहंवेदैःऋग्जुःसामाथर्व्ववेदैश्चतुर्भिरपिन तपसोग्रेणचान्द्रायणादिना नदानेनगोभूहिरण्यादिनानचेज्ययायज्ञेनपूजयावाशक्य एवंविधोयथादर्शितप्रकारोद्रष्टुमन्यैरशक्योदृष्टवानसि मांयथात्वं ५३ कथंपुनः शक्यइत्युच्यते भक्तेति भक्त्यातुकिंविशिष्टयेत्याह अनन्ययाअप्रथग्भूतयाभगवतोऽन्यन्नप्रथक्नकदाचिदपिभवति सत्वनन्याभक्तिः सर्व्वैरपिकरणैर्वासुदेवादन्यन्नलभ्य

आनन्दगिरिकृतटीका

उपास्यत्वायविश्वरूपंस्तोतुंभगवदुक्तिंउत्थापयति भगवानिति त्वद्व्यतिरिक्तानामिदंरूपंद्रष्टुमशक्यमित्येतद्विशदयति देवादयइति ५२ दर्शनोपायाभावात् दुर्दर्शत्वमिति तर्हिदर्शनायोग्यत्वात् द्रष्टुमशक्यत्वमित्याशंक्याह दृष्टवानिति ५३

स्वामिकृतटीका

एनमर्जुनंभीतमेवं प्रसन्नवपुर्भूत्वापुनरप्याश्वासितवान्महात्मा विश्वरूपः कृपालुरितिवा ५० ततोनिर्भयःसन्नर्जुनउवाच दृष्ट्वेदमिति सचेताःप्रसन्नचित्तइदानींसंवृत्तोजातोऽस्मि प्रकृतिंस्वास्थ्यञ्चप्राप्तोऽस्मि शेषंस्पष्टं ५१ स्वकृतस्यानुग्रहस्यातिदुर्लभत्वंदर्शयन्श्रीभगवानुवाच सुदुर्दर्शमिति यन्ममविश्वरूपंदृष्टवानसि इदंसुदुर्दर्शमत्यन्तंद्रष्टुमशक्यंअतो देवाअप्यस्यरूपस्यनित्यंसर्व्वदादर्शनमिच्छन्तिकेवलं नपुनरिदंपश्यन्ति ५२ तत्रहेतुमाह नाहमिति स्पष्टार्थं ५३ तर्हिकेनो

भाषा अनुवाद

तिसकेवादिभगवानअपनीकृपाकीदुर्लभता देखावतेहैं किजोयहहमाराविश्वरूपस्वरूपतुमनेदेखा इसकादर्शनअतिदुर्लभहै देखोदेवतागणभीइसरूपकेदर्शनकीइच्छासर्वदाकरतेहैं परन्तुइसकादर्शननहींपावतेहैं ५२ उसअपनेरूपकेदुर्लभदर्शनमे कारणकहतेहैं कितुमनेजोरूपमेरादेखा वहवेदअध्ययनऔतपस्यायादानयज्ञकेद्वारा किसीकीदेखनेकीसामर्थ्यनहीहै ५३ तोफेरिकौनउपाय से आप

CC-0. In Public Domain. Digitized by eGangotri

ञ्चपरन्तप ५४ मत्कर्म्मकृन्मत्परमो मद्भक्तःसङ्गवर्जितः निर्वैरः सर्वभूतेषु

शाङ्करभाष्यं ।

तेयया सानन्याभक्तिस्तयाशक्योहमेवंविधोविश्वरूपप्रकारो हेअर्জ্জুনज्ञातुं शास्त्रतो नकेवलंज्ञातुं शास्त्रतोद्रष्टुञ्च साक्षात्कर्त्तुं तत्वेनतत्त्वतःप्रवेष्टुञ्चमोक्षञ्चगन्तुं परन्तप ५४ अधुनासर्वस्यगीताशास्त्रस्यसारभूतोऽर्थोनिःश्रेयसार्थोनुष्ठेयत्वेनसमुच्चित्योच्यते मत्कर्मकृदिति मत्कर्म्मकृन्मदर्थं कर्म्ममत्कर्म्मतत्करोतीति मत्कर्म्मकृत् मत्परमःकरोतिभृत्यःस्वामिकर्म्म नत्वात्मनः परमाप्रेत्यगन्तव्यागतिरिति स्वामिनं प्रतिपद्यते अयन्तुमत्कर्मकृन्मामेवपरमांगतिंप्रतिपद्यतइतिमत्परमोऽहंपरमःपरागतिर्यस्य सोयंमत्परमःतथामद्भक्तःमामेवसर्वप्रकारैःसर्व्वात्मनासर्वोत्साहेन भजतइतिमद्भक्तःसङ्गवर्जितःधनमित्रपुत्रकलत्रबन्धुवर्गेषुसङ्गवर्जितःसङ्गःप्रीतिः स्नेहवर्जितोनिर्वैरोनिर्गतवैरःअतःसर्वभूतेषुशत्रुभावरहितःआत्मनोऽत्यन्तापकारप्रवृत्तेष्वपियईदृशोमद्भक्तः स मामेत्यहमेव तस्यपरागतिर्नान्या कदाचिद्भवतीति ५५

इतिएकादशोध्यायः ११

आनन्दगिरिकृतटीका

केनोपायेनतर्हिद्रष्टुं शक्योभगवानिति पृच्छति कथमिति शास्त्रीयज्ञानद्वारा तद्दर्शनंसफलंसिद्ध्यतीत्याह उच्यतइति नभक्तिमात्रंतत्रहेतुरिति तुशब्दार्थंस्फुटयति किमित्यादिना अनन्यभक्तिमेवव्यनक्ति सर्वैरिति ५४

भक्त्यात्विति विशेषणादन्येषामहेतुत्वमाशंक्याह अधुनेति समुच्चित्यसंक्षिप्य पुञ्जीकृत्येति यावत् मत्कर्म्मकृदित्युक्तेमत्परमत्वंआर्थिकं इतिपुनरुक्तिरित्याशंक्याह

स्वामिकृतटीका ।

पायेनद्रष्टुं शक्यसेतत्राह भक्त्यात्विति अनन्ययामदेकनिष्ठयाभक्त्यातुएवंभूतोविश्वरूपोऽहंतत्वेनपरमार्थतोज्ञातुं शक्यःशास्त्रतोद्रष्टुं प्रत्यक्षतःप्रवेष्टुञ्च तादात्मेन शक्योनान्यैरुपायैः ५४ अतःसर्वशास्त्रार्थसारंपरमरहस्यंदृष्टिवत्याह मत्कर्म्म कृदिति

भाषाअनुवाद

दर्शनदेशकतेहौ जोयहकहोतोकहतेहैं किहेअर्जुन अनन्यकहेमदेकचित्तभक्तिहीकेद्वारा ऐसेविश्वरूपसेहमप्रगटहोशकतेहैं औरवहभक्तभीहमैजानिशकैहै औरहेपरन्तपअर्जुन शास्त्रसेप्रत्यक्षऔतदात्मरूपप्रवेशअर्थात् उसरूपमेलीनहमकराय शकतेहैं औरकोईभीउपाय नहींहै यहतुमनिश्चयसेजानो ५४

CC-0. In Public Domain. Digitized by eGangotri

यःसमामेतिपाण्डव ५५ इति श्रीमद्भगवद्गीतासूपनिषत्सु श्रीकृष्णार्जुनसम्वादे विश्वरूपदर्शनो नामैकादशोध्यायः ११

आनन्दगिरिकृतटीका।

करोतीति भगवानेवपरमागतिरिति निश्चयवतस्तवैवनिष्ठासिध्यतीत्याह तथेति नतवैवसर्वप्रकारैर्भजनंधनादिस्नेहाकृष्टत्वादित्याशंक्याह सङ्गेति द्वेषपूर्वकानिष्टाचरणंवैरंअनपकारिष्वतद्भावेपिभवत्येवापकारिष्विति शङ्कित्वाह आत्मनइति एतच्च सर्वं संक्षिप्यानुष्ठानार्थमुक्तमेवमनुतिष्ठतोभगवत्प्राप्तिरवश्यम्भाविनीत्युपसंहरति अयमिति तदेवंभगवतोविश्वरूपस्यसर्वात्मनःसर्वज्ञस्यसर्वेश्वरस्यमत्कर्मकृदित्यादिन्यायेन क्रममुक्तिफलमभिध्यानमभिवदता तत्पदवाच्योऽर्थो व्यवस्थापितः ५५

इति आनन्दगिरिकृतटीकायांएकादशोध्यायः ११

स्वामिकृतटीका

मदर्थंकर्मकरोतीति मत्कर्मकृत् अहमेवपरमःपुरुषार्थोयस्यसःममैवभक्तआश्रितःपुत्रादिषुसङ्गवर्जितःनिर्वैरस्वसर्वभूतेषुएवम्भूतोयःसमांप्राप्नोतिनान्यःइति देवैरपिसुदुर्दर्शं तपोयज्ञादिकोटिभिः भक्ताय भगवानेवंविश्वरूपमदर्शयत् ५५

इति श्रीधरस्वामिकृतटीकायां एकादशोध्यायः ११

भाषाअनुवाद

अबशास्त्रकेअर्थकासारांशपरमरहस्यकहतेहैं किहेपाण्डव मत्कर्मकृतकहे मेरीप्रीतिकेअर्थजोकर्म करै है और मत्परमकहेमहीं हौ परम प्रयोजन जिसको औमद्भक्त कहेमेरेआश्रित यथापुत्रस्त्रीधनमें आशक्तिहीन और भूतकहेप्राणिमात्रमे बैररहितजोहैं सोई हमकोप्राप्तहोतेहैं ५५

इति श्रीजगन्नाथशुक्लविरचितायां मनभावनीटीकायां एकादशोऽध्यायः ११

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता ।

द्वादशअध्यायः ।

शाङ्करभाष्यं ।

द्वितीयप्रभृतिष्वध्यायेषु विभूत्यन्तेषु परमात्मनोब्रह्मणोऽक्षरस्यविध्वस्तसर्व्वविशेषणस्योपासनमुक्तं सर्व्वयोगैश्वर्य्यसर्व्वज्ञानशक्तिमत्त्वोपाधेरीश्वरस्यतवचोपासनंतवतवोक्तंविश्वरूपाध्यायेतुऐश्वरमाद्यंसमस्तजगदात्मरूपं विश्वरूपं त्वदीयंदर्शितमुपासनार्थमेवत्वया तच्चदर्शयित्वोक्तवानसिमत्कर्म्मकृदित्याद्यतोऽहमनयोरुभयोःपक्षयोर्व्विशिष्टतरवुभुत्सयात्वांपृच्छामीतिअर्जुनउवाच एवमिति एवंसततयुक्तानैरन्तर्य्येणभगवत्कर्म्मादौयथोक्तैर्यैसमाहिताःसन्तःप्रवृत्ताइत्यर्थः येभक्ताःअनन्यशरणाःसन्तस्त्वांयथादर्शितम्विश्वरूपम्पर्य्युपासतेध्यायन्ति येचाप्यक्षरमिति येचान्येपित्यक्तसर्व्वैषणाःसन्नारब्धसर्व्वकर्म्माणोयथाविशेषितंब्रह्माक्षरं निरस्तसर्व्वोपाधित्वाद्व्यक्तमकरणगोचरंयद्विलोकेकरणगोचरन्तद्व्यक्तमुच्यतें अज्ञेर्धातोस्तत्कर्म्मकत्वादिदंत्वक्षरंतद्विपरीतंशिष्टैश्चोच्यमानैर्व्विशेषणैर्व्विशिष्टंतद्येचापिपर्य्युपासतेतेषामुभयेषांमध्येकेयोगवित्तमाःकेअतिशयेनयोगविदइत्यर्थः १

आनन्दगिरिकृतटीका ।

अथोच्यानित्यादिषुविभूत्यध्यायावसानेषु अध्यायेषु निरुपाधिकस्यब्रह्मणोज्ञेयत्वेनानुसन्धानमुक्तमितिवृत्तंकीर्त्तयति द्वितीयेति अतिक्रान्तेषु तत्तदध्यायेषु सोपाधिकस्यब्रह्मणोध्येयत्वेनप्रतिपादनंकृतमित्याह सर्व्वेति सर्व्वस्यापिप्रपञ्चस्ययोगोघटनाज्जन्मस्थितिभङ्गप्रवेशनियमनाख्यातवैश्वर्य्यसामर्थ्यं तेनसर्व्वज्ञेयप्रतिबन्धविधुरयाज्ञानशक्त्याविशिष्टस्यसत्त्वाद्युपहितस्यभगवतोध्यानंतत्तत्प्रसङ्गमापाद्यमन्दमध्यमयोरनुग्रहार्थमुक्तमित्यर्थःएकादशेवृत्तमनुद्रवति विश्वरूपेति अध्यायान्तेभगवदुपदेशमनुवदति तच्चेति अतीतानन्तरश्लोकेनोक्तमर्थम्स्मारयन्नशक्तिमत्कर्म्मकृदितियथाधिकारंतारतम्योपेतानिसाधनानिनियन्तुमध्यायान्तरमवतारयन्नादौप्रश्नमुत्थापयति अतइति सोपाधिकध्यानस्यनिरुपाधिकज्ञानस्यचोक्तत्वादित्यर्थःएवंशब्दार्थमुक्त्वातमनूद्यसततयुक्ताइतिभागंविभजते एवमिति येभक्ताइत्यनूद्यव्याचष्टे अनन्येति मन्दमध्यमाधिकारिणःसगुणशरणानुक्त्वा निर्गुणनिष्ठानुत्तमाधिकारिणोनिर्द्दिशति येचेति यथाविशेषितमनिर्देश्यंसर्व्वगमचिन्त्यं कूटस्थमित्यादिवक्ष्यमाणविशेषणविशिष्टमित्यर्थः नक्षरत्यश्नुतेवेत्यक्षरं अव्यक्तमित्येतद्व्याचष्टे निरस्तेति करणागोचरत्वंव्यतिरेकद्वारास्फोरयतिय द्वीति यथाविशेषितमित्युक्तंस्पष्टयति शिष्टैश्चेति पू

CC-0. In Public Domain. Digitized by eGangotri

अर्जुनउवाच एवंसततयुक्तायेभक्तास्त्वांपर्य्युपासते येचाप्यक्षरमव्यक्तंतेषांके योगवित्तमाः १ श्रीभगवानुवाच मय्यावेश्यमनोयेमांनित्ययुक्ताउपासते श्रद्धया

शाङ्करभाष्यं ।

श्रीभगवानुवाच येत्वक्षरोपासकाः सम्यग्दर्शिनोनिष्टत्तैषणास्तेतावत्तिष्ठन्तु तान्प्रतियदुक्तव्यंतदुपरिष्टाद्व्यक्तमःयेत्वितरे मयीति मयिविश्वरूपे परमेश्वरेआवेश्यसमाधायमनःयेभक्ताःसन्तोमांसर्वयोगेश्वराणामधीश्वरंसर्वज्ञंविमुक्तरागादिक्लेशतिमिरदृष्टिंनित्ययुक्ताअतीतानन्तराध्यायान्तोक्तश्लोकार्थन्यायेनसततयुक्ताःसन्त उपासतेश्रद्धयापरयाप्रकृष्टयाउपेताःमेममतःअभिप्रेतायुक्ततमाइति नैरन्तर्य्येण हितेमच्चित्ततयाऽहोरात्रमतिवाहयन्ति अतोयुक्तं तान्प्रतियुक्ततमाइतिवक्तुं २

आनन्दगिरिकृतटीका

बर्ह्यगतक्रियापदस्यानुषङ्गंसूचयति तदिति सर्व्वेतावदेतेयोगंसमाधिंविन्दन्तीति योगविदः केपुनरतिशयेनैषांमध्येयोगविदोयोगिनइतिपृच्छति केअतिशयेनेति १

स्वामिकृतटीका ।

निर्गुणोपासनस्यैवंसगुणोपासनस्यचश्रेयःकतरदित्येतन्निर्णेतुंद्वादशोद्यमः पूर्व्वाध्यायान्तेमत्कर्मकृन्मत्परोमद्भक्तइत्येवंभक्तिनिष्ठस्यश्रेष्ठत्वमुक्तंकौन्तेयप्रतिजानीहीत्यादिनाचतत्रतत्रतस्यैवश्रेष्ठत्वंनिर्णीतंतथातेषांज्ञानीनित्ययुक्त एकभक्तिर्विशिष्यतइत्यादिनासर्वंज्ञानप्लवेनैवदुर्जिनंसंतरिष्यसीत्यादिनाचज्ञाननिष्ठस्यश्रेष्ठमुक्तं एवमुभयोःश्रैष्ठेविशेषजिज्ञासयाभगवन्तमर्जुनउवाच एवमिति एवंसर्वकर्मार्पणादिनासततयुक्तास्तन्निष्ठाःसन्तोयेभक्तास्त्वांविश्वरूपंसर्वज्ञंसर्वशक्तिंपर्युपासते ध्यायन्ति येचाप्यक्षरंब्रह्माव्यक्तंनिर्विशेषमुपासतें तेषामुभयेषांमध्येकेऽतिशयेनयोगवि

भाषाअनुवाद

एकादशअध्यायकेअन्तिमश्लोकसेऔनवमअध्यायकेएकतिसश्लोकादिसेभीसगुणभगवद्भक्तहीकोश्रेष्ठकहाऔरतेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यतेइत्यादिसप्तमअध्यायकेसत्रहेंश्लोकसे औरसर्वंज्ञानप्लवेनैवदुर्जिनंसन्तरिष्यसिइत्यादिचतुर्थअध्यायकेछत्तिसश्लोकादिसेभीज्ञानीहीकोश्रेष्ठकहासोसगुणनिर्गुण उपासनामेकौनउपसनाश्रेयहै अर्थात्जोभक्तसर्वज्ञविश्वरूपसर्वशक्तिमानरूप तुमकोध्यानकरताहै सोकि जोअव्यक्तऔनिर्विशेषअविनाशीब्रह्मकीउपासनाकरताहै सोइनदोनोकेमध्यमेकौनभक्तअतिशययोगवित् अर्थात्श्रेष्ठहै यहअर्जुनभगवानसे पूछतेभये १

CC-0. In Public Domain. Digitized by eGangotri

परयोपेतास्तेमेयुक्ततमामताः २ येत्वक्षरमनिर्देश्यमव्यक्तंपर्य्युपासते सर्वत्रग

शाङ्करभाष्यं।

किमितरेयुक्ततमानभवन्तिनकिन्तुतान्प्रतियइक्तव्यन्तत्शृणुयेतुअक्षरमनिर्देश्य मव्यक्तत्वादशब्दगोचरमिति ननिर्देष्टुंशक्यतेअतोऽनिर्देश्यमव्यक्तं नकेनापि प्रमा णेनव्यज्यतइत्यव्यक्तं पर्युपासतेपरिसमन्तादुपासतेउपासनंनामयथाशास्त्रमुपास्या र्थस्यविषयीकरणेनसामीप्यमुपगम्यतैलधारावत्समानप्रत्ययप्रवाहेनदीर्घकालं यदा सनन्तदुपासनमाचक्षतेअक्षरस्यविशेषणमाह सर्वत्रगंव्योमवद्व्याप्यचिन्त्यंचाव्यक्तत्वा दचिन्त्यं यद्विकरणगोचरंतन्मनसापिचिन्त्यंतद्विपरीतत्वादचिन्त्यमक्षरंकूटस्थंदृश्य

आनन्दगिरिकृतटीका

किमनयोर्योगयोर्मध्येसुशक्योयोगोवाष्टच्छति किम्वासाक्षान्मोक्षहेतुरिति वि कल्यक्रमेणोत्तरंभगवानुक्तवानित्याह श्रीभगवानिति यदिद्वितीयस्तथाविधयोग स्यवक्ष्यमाणत्वात् प्रष्टव्यतेत्याह येत्वक्षरेति यद्याद्यस्तत्राह येत्विति सर्वयोगेश्वरा णांस्वैषांयोगमधितिष्ठतांयोगिनामित्यर्थः विमुक्तात्यक्तारागाद्याख्यात्क्लेशनिमित्त भूतातिमिरशब्दितादाद्यज्ञानकृतादृष्टिरविद्यामिथ्याधीर्यस्यतमितिविग्रहेण वि मुक्तेति नित्ययुक्तत्वंसाधयति अतीतेति तत्रोक्तोयोगोमत्कर्मकृदित्यादितस्मिन्नि श्चयेनापनयोगमनन्तस्यनियमेनानुष्ठानंतेनेत्यर्थः उपासते मयिस्मृतिंसदाकुर्वन्ती त्यर्थःउक्तोपासकानांयुक्ततमत्वंव्यनक्तिनैरन्तर्येणेति तदेवस्फुटयति अहोरात्रमिति अक्षिचरात्रौचातिमात्रमतिशयेनमामेवविषयान्तरविमुखाश्चिन्तयन्तीत्यर्थः २

स्वामिकृतटीका।

दोऽतिश्रेष्ठाइत्यर्थः १ तत्रप्रथमाःश्रेष्ठाइत्युत्तरं श्रीभगवानुवाच मयीति मयिपर मेश्वरेसर्वज्ञत्वादिगुणविशिष्टेमनआवेश्य एकाग्रंकृत्वानित्ययुक्तामदर्थकर्मानुष्ठाना दिनामन्निष्ठाःसन्तःश्रेष्ठयाश्रद्धयायुक्तायेमामाराधयन्तितेयुक्ततमामामभिमताः २

भाषाअनुवाद।

तिनदोनोकेबीचमेंसगुणउपासनासुखसाध्यहै इसहेतुसेभगवानसगुणउपासक भक्तकोश्रेष्ठकहतेउन्येउत्तरदेतेहैं किसर्वज्ञत्वआदिगुणविशिष्टपरमेश्वरस्वरूप मेरेमेंमनकोएकाग्रकरिकेश्रद्धापूर्वकमत्प्रीत्यर्थकर्मअनुष्ठानकरनेसेमेरेमेंनिष्ठकहे युक्तहोयजोहमारीआराधनाकरताहै सोईहमारेमतसेयुक्ततमकहेअतिश्रेष्ठहै सोतुमतत्प्रीत्यर्थकर्मकरो २ औरअक्षरब्रह्मका लक्षणऔस्वरूपकहतेहैंकिब्रह्म

CC-0. In Public Domain. Digitized by eGangotri

मचिन्त्यञ्चकूटस्थमचलंध्रुवं ३ सन्नियम्येन्द्रियग्रामंसर्व्वत्रसमबुद्धयः तेप्राप्नुवन्ति

शाङ्करभाष्यं

मानगुणमन्तर्दोषंवस्तुकूटरूपंकूटसाच्यमित्यादौकूटशब्दःप्रसिद्धोलोके तथा चाविद्याद्यनेकसंसारबीजमन्तर्दोषंमायाम्प्रकृत्यादिशब्दवाच्यतयामायान्तुप्रकृतिंविद्यान्मायिनन्तुमहेश्वरंममायादुरत्ययेत्यादौप्रसिद्धंयत्तत्कूटंतस्मिन्कूटेस्थितं तदध्यक्षतयाअथवारासिरिवस्थितंकूटस्थमतएवाचलंयस्मादचलंतस्मात्ध्रुवंनित्यमित्यर्थः ३

आनन्दगिरिकृतटीका

वक्ष्यामस्तदुपरिष्टादित्युक्तंप्रश्नपूर्व्वकंप्रकटयति किमित्यादिना पूर्व्वेभ्यःफलतो विशेषार्थस्तूशब्दः अव्यक्तत्वमनिर्देश्यत्वेहेतुरित्याह अव्यक्तत्वादिति यतोऽव्यक्तमतोऽनिर्देश्यमिति योजना निरुपाधिकेचरेकथमुपासनेति पृच्छतिउपासनमिति शास्त्रतोऽक्षरंज्ञात्वातदुपेत्यात्मत्वेनोपगम्योपासतेतथैवतिष्ठन्तिपूर्णञ्चैकतानमक्षरमात्मानमेवसदाभावयन्तोत्येतदिहविवक्षितमित्याह यथेति अव्यक्तत्वमेवाचिन्त्यत्वेपिहेतुरित्याह यद्वीतिकूटस्थशब्दस्योरार्थत्वं दृढप्रयोगतःसाधयति कूटरूपमितिआदिपदमनृतार्थं प्रकृतेकिन्तदनृतंकूटशब्दितमित्याह तथाचेतिउक्तनीत्याकूटशब्दस्यानृतार्थत्वेयदनेकस्यसंसारस्यबीजन्निरूप्यमाणंनानाविधदोषोपेतंतद्वीदं तर्ह्यव्याकृतंमायान्तुप्रकृतिंममायेत्यादौमायाशब्दिततयाप्रसिद्धमविद्यादितदिह कूटशब्दितमित्यर्थः तत्रावस्थानंकेनरूपेणेत्याशङ्कायामाह तदध्यक्षतयेति कूटस्थशब्दस्यनिःक्रियत्वमर्थान्तरमाह अथवेतिपूर्व्वमुपजीव्यानन्तरविशेषणद्वयप्रवृत्तिमाह अतएवेति ३

स्वामिकृतटीका।

तर्हीतरेकिंनश्रेष्ठाइत्यताह येत्विति द्वाभ्यां येत्वक्षरंपर्युपासतेध्यायन्ति तेऽपिमामेवप्राप्नुवन्तीतिद्वयोरन्वयः अक्षरस्यलक्षणमनिर्देश्यमित्यादि अनिर्देश्यशब्देननिर्देष्टुमशक्यंयतोऽव्यक्तंरूपादिहीनंसर्व्वत्रगंसर्व्वव्यापिअव्यक्तत्वादेवाचिन्त्यं कूटस्थं कूटेमायाप्रपञ्चेऽधिष्ठानत्वेनावस्थितंअचलंस्पन्दनरहितंअतएवध्रुवंनित्यं वृद्ध्यादिरहितंसृष्टमन्यत् ३ ननुतेपित्वामेवप्राप्नुवन्ति तर्हीतरेषां युक्ततमत्वं कुत

भाषा अनुवाद

अनिर्देश्यअर्थात्यहहै ऐसाहै इसकहनेके अयोग्यहै क्योंकिअव्यक्तकहेरूपादिरहितहै औसर्वव्यापी तथानिराकारहेतुसेअचिन्त्यऔकूटस्थअर्थात्कूटजोमायाप्रपञ्चब्रह्माण्ड तिसकाअधिष्ठानकहेआश्रयरूपस्थितहैऔरअचलकहेव्यापाररहित तथाध्रुवकहेअचलनित्यहानिवृद्धिशून्यहै तीनचारिकेश्लोककाअर्थएकसाथहै ३

CC-0. In Public Domain. Digitized by eGangotri

मामेवसर्वभूतहितेरताः ४ क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसाम् अव्यक्ता

शाङ्करभाष्यं

संनियम्येति संनियम्यसम्यक्नियम्यसंहृत्यइन्द्रियग्राममिन्द्रियसमुदायंसर्वत्रसर्वस्मिन्कालेसमबुद्धयःसमातुल्याबुद्धिर्येषामिष्टानिष्टप्राप्तौतेसमबुद्धयःतेयेएवम्बिधाःते प्राप्नुवन्तिमामेवसर्वभूतहितेरताः नतेषांवक्तव्यंकिञ्चित् मांतेप्राप्नुवन्तिइति ज्ञानीत्वात्मैवमेमतमित्युक्तत्वात् नहिभगवत्स्वरूपाणांसतांयुक्ततमायुक्ततमत्वंवा वाच्यं ४

किन्तुक्लेशोधिकतरोयद्यपिमत्कर्मादिपराणांक्लेशोधिकतरस्त्वच्चरात्मनांपरमार्थदर्शिनांनेहाभिमानापरित्यागनिमित्तःअव्यक्तासक्तचेतसामव्यक्तेआसक्तंचित्तं येषां तेअव्यक्तासक्तचेतसस्तेषांअव्यक्तासक्तचेतसां अव्यक्तहियस्माद्यागतिरच्चरात्मिका दुःखंदेहवद्भिर्देहाभिमानवद्भिरवाप्यते अतःक्लेशोधिकतरः ५

आनन्दगिरिकृतटीका

कथमक्षरमुपासतेतदुपासनेवाकिंस्यादितितदाह सन्नियम्येति तुल्याहर्षविषादरागद्वेषादिरहितासम्यक् ज्ञानेनाज्ञानस्यापनीतत्वात्परम्परापेक्षयोरसम्भवम्बिबक्षित्वाह तेयइति सर्वेभ्योभूतेभ्योहितमेवचिन्तयन्तस्तदेवाचरन्तिज्ञानवतां यथा ज्ञानम्भगवत्प्राप्तेरर्थसिद्धत्वादनुवादमात्रमित्याह नत्विति ज्ञानिनोभगवत्प्राप्तिःसिद्धैवेत्यत्रप्रमाणमाह ज्ञानीत्विति ज्ञानवताम्भगवत्प्राप्तौतएवयुक्ततमावक्तव्याःकथं सगुणब्रह्मोपासकान्युक्ततमानुक्तवानसीत्याशंक्याह नहीति ४ सगुणोपासकेष्वपिकथमित्याह किन्विति अक्षरोपासनस्यदुष्करत्वादुपासनान्तरस्यसुकरत्वादित्यभिप्रेत्याह क्लेशइति अधिकएवेतरेभ्यइत्यतदर्थिभ्यःकामिभ्यइतिशेषःतेषांक्लेशस्या

स्वामिकृतटीका।

इत्यपेक्षायांक्लेशाक्लेशकृतंविशेषमाह क्लेशइतित्रिभिः अव्यक्तेनिर्विशेषेचरेआसक्तं चेतोयेषांतेषांक्लेशोधिकतरः हियस्माद्व्यक्तविषयागतिर्निष्ठादेहाभिमानिभिर्दुःखंयथाभवतिएवमवाप्यतेदेहाभिमानिनांनित्यंप्रत्यक्प्रवणत्वस्यदुर्घटत्वादितिभावः५

भाषा अनुवाद

जोनिर्गुणकेउपासकोंकोक्लेशअधिकहैतोफेरिक्यानिर्गुणकेउपासकश्रेष्ठनहींहैं इसशंकापरदोश्लोकसेकहतेहैं किजोसमदर्शीजन इन्द्रियगणकोअपनेवशीभूतकरके अक्षरकहेअविनाशीब्रह्मकाध्यानकरतेहैं सोसकलभूतोंकेहितकारीनिर्गुणउपासकमनुष्यभी हमकोप्राप्तहोतेहैं ४ जोनिर्गुणोपासकभी तुमकोप्राप्तहोतेहैं

CC-0. In Public Domain. Digitized by eGangotri

हिगतिर्दुःखंदेहवद्भिरवाप्यते ५ येतुसर्व्वाणिकर्माणिमयिसंन्यस्यमत्पराः अनन्येनैवयोगेनमांध्यायन्तउपासते ६ तेषामहंसमुद्धर्त्तामृत्युसंसारसागरात् भवामि

शाङ्करभाष्यं।

अक्षरोपासकानांयद्वर्त्तनंतदुपरिष्टाद्व्याख्यामः येत्विति येतुसर्व्वाणिकर्माणिमयीश्वरे संन्यस्यमत्पराअहंपरोयेषांते मत्पराः सन्तःअनन्येनैवअविद्यमानमन्यदालम्बनंविश्वरूपंदेवमात्मानंमुक्त्वायस्यसोनन्यस्तेनानन्येनैवकेवलेनयोगेन समाधिनामांध्यायन्तश्चित्तयन्तउपासते ६ तेषांकिं तेषामिति तेषांमदुपासनैकपराणांअहमीश्वरः

आनन्दगिरिकृतटीका।

धिकत्वे हेतुं मत्प्राविशिनष्टि देहेति अव्यक्तमत्यन्तसूक्ष्मं निर्विशेषमक्षरंतस्मिन्नासक्तमभिनिविष्टञ्चेतोयेषान्तेषामितियावत् अक्षरोपासकानांक्लेशाधिकतरत्वे भगवानेवहेतुमाह अव्यक्तेति दुःखंदुःखेनक्लेशेनेतियावत्अतोदेहाभिमानत्यागादित्यर्थः ५ तेकथंवर्त्ततेतत्राह अक्षरेति यद्यक्षरोपासकामामेवाप्नुवन्तीति विशिष्यन्ते तत्किं सगुणोपासकास्त्वांनाप्नुवन्ति नतेषामपिक्रमेणमत्प्राप्तेरित्याह येत्विति तुशब्दः शङ्कानिवृत्त्यर्थः ६ तेषाम्भगवद्भायिनांकिंफलतीति शङ्कामनुभाष्य फलमाह तेषा

स्वामिकृतटीका

मज्जक्तानान्तुमत्प्रसादादनायासेनैवसिद्धिर्भवतीत्याह येत्विति द्वाभ्यां येमयि परमेश्वरेसर्व्वाणिकर्माणिसन्यस्यसमर्प्य मत्पराभूत्वा मांध्यायन्तोऽनन्येननविद्यतेऽन्योभजनीयोयस्मिन्स्तेनैवैकान्तभक्तियोगेनोपासतइत्यर्थः ६ एवंमय्यावेशितं

भाषाअनुवाद

तोसगुणोपासकयुक्तकहेश्रेष्ठजोआपनेकहा सोकैसेसंभवहै इसशंकाको निवारण करतेउये तीनिश्लोकसेक्लेशहेतुकविशेषकहतेहैं किअव्यक्तनिर्विशेषअक्षरब्रह्ममे जिसकाचित्तआसक्तभया उसकोअधिकक्लेशहोयहैक्योंकिअव्यक्तब्रह्मविषयक जो निष्ठा सोदेहाभिमानीमनुष्यकोअतिदुखसेप्राप्तहोतीहैं कारणयह किस्थूलशरीरमेआत्मबुद्धिविशिष्टमनुष्योंकेमनकोअन्तर्मुखवृत्तिकाप्रत्यक्चैतन्यमेंनिमग्नहोना सर्वथादुष्करहै ५ परन्तुमेरेभक्तमेरीउपासे अनायाससेसिद्धहोतेहैं यह दोश्लोककेद्वारा कहतेहैं किजोमनुष्य परमेश्वरस्वरूपमेरेकोसकलकर्मअर्पणपूर्वकमत्परायणकहे अनन्यभावसेमेरेमेतत्परहोतेहैं तेमेराध्यानउपासनाकरतेहैं अनन्यभावकहे नहींहै अन्यवस्तुमेभावप्रीति जिसमे ६ इसप्रकारसेजिनोनेमेरे

CC-0. In Public Domain. Digitized by eGangotri

नचिरात्पार्थमय्यावेशितचेतसां ७ मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय निवसिष्यसिमय्येवअतऊर्द्ध्वंनसंशयः ८ अथचित्तंसमाधातुं न शक्नोषिमयिस्थिरंअभ्या

शाङ्करभाष्यं

समुद्धर्त्ताकुतइत्याह मृत्युसंसारसागरात् मृत्युयुक्तःसंसारोमृत्युसंसारःसएवसागरवत् सागरोदुरुत्तरत्वात् तस्मान्मृत्युसंसारसागरादहंतेषांसमुद्धर्त्ताभवामिनचिरात् किंतर्हित्वित्रमेव हेपार्थमय्यावेशितचेतसांमयिविश्वरूपेआवेशितंसमाहितंचेतो येषांते मय्यावेशितचेतसस्तेषां ७ यतएवंतस्मात् मय्येवेति मय्येवविश्वरूपईश्वरेमनःसङ्कल्पविल्पात्मकमाधत्स्वस्थापयमय्येव्यवसायंकुर्वतींबुद्धिंआधत्स्वनिवेशय ततस्तेनकिंस्यादितिश्रुणुनिवसिष्यसिनिवत्स्यसिनिश्चयेनमदात्मनामयिनिवासंकरिष्यस्येवअतःशरीरपातादूर्द्ध्वंनसंशयः संशयोनकर्त्तव्यः ८ अथेति अथएवं

आनन्दगिरिकृतटीका।

मित्यादिना समुद्धर्त्तासम्यगूर्द्ध्वंनेता ज्ञानावष्टम्भदानेनेत्यर्थःमृत्युरज्ञानंमरणाद्यनर्थहेतुत्वात्तेनकार्य्यतयायुक्तःसंसारः ७ भगवदुपासनाविशिष्टफलेत्येवंयतःसिद्धमतोभगवन्निष्ठायांप्रयतितव्यमित्याह यतइति असंहिताकरणंश्लोकपूरणार्थं मनोबुद्धीभगवत्यस्थापनेप्रश्नपूर्व्वकंफलमाह ततइति भगवन्निष्ठस्यतत्प्राप्तौ प्रतिबन्धाभावं सूचयति संशयोनेति ८ तत्प्रदर्शनपूर्वकंभगवत्प्राप्तावुपायान्तरमाह अथेत्या

स्वामिकृतटीका।

चेतोयैस्तेषांमृत्युयुक्तात् संसारसागरादहंसम्यगुद्धर्त्ताअचिरेणभवामि ७ यस्मादेवंतस्मान्मय्येवेति मय्येवसंकल्पविकल्पात्मकंमनआधत्स्व स्थीरीकुरुबुद्धिमपिव्यवसायात्मिकांमय्येवनिवेशय एवंकुर्वन्मत्प्रसादेनलब्धज्ञानः सन्ततऊर्द्धंदेहान्तेमय्येवनिवसिष्यसिनिवत्स्यसिमदात्मनावासंकरिष्यसिनात्र संशयः तथाचश्रुतिः देहान्तेदेवपरंब्रह्मतारकंव्याचष्टे इति ८ अथाशक्तंप्रति सुगमोपायमाह

भाषाअनुवाद

मेचित्तलगायाहै उनका हेपार्थतत्कालइसमृत्युसंसारसागरसेउद्धारकरनेवालामैहौंअर्थात् एकाग्रचित्तभक्तजनोंको मैंसंसारदुखसेउद्धारकर्त्ताहूं ७ इससेसंकल्पविकल्पात्मकमनकोमेरेमेंथिरकरोऔरव्यवसायात्मिकाबुद्धिकोमीमेरेमेलगावोतोदेहकेअन्तमेमेरीकृपासे तत्त्वज्ञानकोप्राप्तहोयपरमात्मारूपमेरेमेंस्थितिकहेवासकरोगे इसमेकुछसंशयनहींहै सोईश्रुति कहतीहै किसगुणउपासककोदेहान्तहोनेपर वहउपास्यदेवपरब्रह्ममंत्रउपदेशकरिकेअपरोक्षकहैसाक्षातकरदेयहै ८

CC-0. In Public Domain. Digitized by eGangotri

सयोगेनततो मामिच्छाप्तुं धनंजय ९ अभ्यासेऽप्यसमर्थोसि मत्कर्मपरमोभव
मदर्थमपिकर्माणि कुर्वन्सिद्धिमवाप्स्यसि १० अथैतदप्यशक्तोऽसि कर्त्तुं

शाङ्करभाष्यं

यथावोचाम तथामयिचित्तं समाधातुं स्थापयितुं स्थिरमचलंकर्त्तुं नशक्नोषिचेत्ततःप
श्चादभ्यासयोगेनचित्तस्यैकस्मिन्नालम्बनेसर्व्वत :समाहृत्यपुनःपुन: स्थापनमभ्यासस्तत्
पूर्व्वकोयोग:समाधानलक्षणस्तेनाभ्यासयोगेनमांविश्वरूपमिच्छप्रार्थयस्वआप्तुं प्रा
प्तुं हेधनञ्जय ९ अभ्यासेपीति अभ्यासेप्यसमर्थोसिअशक्तोसितर्हिमत्कर्म्मपरमोभव
मदर्थंकर्म्ममत्कर्म्मतत्परमोभवमत्कर्म्मप्रधानइत्यर्थ:अभ्यासेनविनामदर्थमपि कर्म्माणि
केवलंकुर्व्वन्सिद्धिं सत्त्वशुद्धिं योगंज्ञानप्राप्तिद्वारेणावाप्स्यसि १० अथैतदिति

आनन्दगिरिकृतटीका

दिना ९ एकमालम्बनंस्थूलंप्रतिमादिसमाधानं तपोध्यन्तरेविश्वरूपे चित्तैका
ग्र्यंहैतामिनिवेशादभ्यासाधीनेयोगेपिसामर्थ्याभावेपुनरुपायान्तरमाह अभ्यासेपी
ति अभ्यासयोगेनविनाभगवदर्थंकर्म्माणिकुर्व्वाणस्यकिंस्यादित्याशंक्याह अभ्यासेनेति
सिद्धिःब्रह्मभाव:अपिरिह अवधिसूचनार्थः १० भगवत्कर्मपरत्वमप्यशक्यमिति

स्वामिकृतटीका

अथेति स्थिरंयथाभवत्येवंमयिचित्तंधारयितुं यदिशक्तोनभवसितर्हिविक्षिप्तं चित्तंपुनः
पुनःप्रत्याहृत्य मदनुस्मरणलक्षणोयोऽभ्यासयोगस्तेनमांप्राप्तुमिच्छ प्रयत्नंकुरु ९
यदिपुनर्नैवंतदाह अभ्यासइति यदिपुनरभ्यासेऽप्यशक्तोसि तर्हिमत्प्रीत्यर्थानि
यानिकर्माणिएकादश्युपवासवृतपूजापरिचर्य्यानामसंकीर्त्तनादीनितदनुष्ठानमेव
परमंयस्यतादृशोभव एवंभूतानिकर्माण्यपिमदर्थंकुर्वन् मोक्षंप्राप्स्यसि १०
अत्यन्तंभगवद्धर्मपरिनिष्ठायामप्यशक्तस्यपक्षान्तरमाह अथेति यद्येतदपिकर्त्तुं

भाषा अनुवाद

औरसगुणउपासनामेअशक्तपुरुषको सुगमउपायकहतेहैं किजोचित्तकोमेरेमे
थिरकरनेनशकै तोहेधनञ्जयअर्जुनविषयमेविक्षिप्तचित्तकोविषयोंसे पुनःपुनःफेरि
करमेरेस्मरणकीअभ्याससे हमैप्राप्तहोनेकीयत्नकरै ९ औरजोअभ्यास करनेमे
समर्थनहोउ तोमत्प्रीत्यर्थएकादशीउपवासव्रतपूजाआदिनामकाकीर्त्तनआदिकर्म
तोधर्म्महैं उनमेतत्परहोउ क्योंकिमत्प्रीत्यर्थकर्मकरनेसेभी मुक्तिकोप्राप्तहोउगे१०
औरइसभगवद्धर्ममेभीअसमर्थपुरुषको दूसरीउपायकहतेहैं किजोमत्प्रीत्यर्थ

CC-0. In Public Domain. Digitized by eGangotri

मद्योगमाश्रितः सर्व्वकर्मफलत्यागंततःकुरुयतात्मवान् ११ श्रेयोहिज्ञानमभ्यासाद् ज्ञानाद्ध्यानंविशिष्यते ध्यानात्कर्म्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् १२

शाङ्करभाष्यं ।

अथपुनरेतदपियदुक्तं मत्कर्मपरमत्वंतत्कर्त्तुमशक्तोसिमद्योगमाश्रितोमयिक्रियमाणानिकर्माणिसंन्यस्ययत्करणंतेषामनुष्ठानंमद्योगस्तमाश्रितःसन्सर्वकर्मफलत्यागं सर्वेषांकर्मणांफलसंन्यासंसर्वकर्मफलत्यागंततोऽनन्तरंकुरुयतात्मवान्सन्नित्यर्थः ११

इदानीं सर्व्वकर्म्मफलत्यागंस्तौति श्रेयोहि प्रशस्ततरंज्ञानंकस्मादविवेकपूर्व्वकाद्ध्यासात्तस्मादपिज्ञानात्ज्ञानपूर्व्वकंध्यानंविशिष्यते ज्ञानवतोध्यानादपि कर्म्मफलत्यागोविशिष्यतइतिअनुषज्यते एवंकर्म्मफलत्यागात्पूर्व्वंविशेषणवतःशान्तिरुपशमः

आनन्दगिरिकृतटीका

शङ्कते अथेति बहिर्विषयाकृष्टचेतस्त्वादित्यर्थः तर्हिभगवत्प्राप्त्युपायत्वेनसंयतचित्तोभूत्वा कर्मफलसंन्यासंकुर्वित्याह मद्योगमिति ११

स्वामिकृतटीका ।

नशक्नोषितर्हिमद्योगंमदेकशरणंत्वमाश्रितःसन्सर्वेषां दृष्टादृष्टार्थानामावश्यकानाञ्चाग्निहोत्रादिकर्मणांफलानियतचित्तोभूत्वापरित्यज एतदुक्तंभवतिमया तावदीश्वराज्ञयायथाशक्तिकर्माणिकर्त्तव्यानिफलंतावदृष्टमदृष्टम्वापरमेश्वराधीनमित्येवंमय्यिभावमारोप्यफलाशक्तिंपरित्यज्यवर्त्तमानोमत्प्रसादेनकृतार्थो भविष्यसीतितात्पर्य्यं ११ तमिमंफलत्यागंस्तौति श्रेयइति सम्यग्ज्ञानरहिताद्भ्यासाद्युक्तिसहितोपदे

भाषाअनुवाद

कर्मभीनकरिशकै तोएकमेरीशरणहोय औचित्तवशीभूतकरिकेयावत्कर्मफलकापरित्यागकरै इसकातात्पर्ययहहैं किअन्तर्यामीरूपईश्वरकीप्रेरणासेहमैकर्मकर्तव्यहैं औरइनकर्मोकादृष्टअदृष्टफलपरमेश्वरकेआधीनहै ऐसाभावमेरेमेआरोपकरिकै फलकीइच्छात्यागपूर्वककर्मकरनेसेमेरीकृपासे कृतार्थहोउगे ११

औरउक्तफलत्यागकीप्रसंसाकरतेहैं किसगुणकीउपासनामेसम्यकज्ञानरहितजोअभ्यास तिसमेंयुक्तिसहितउपदेशपूर्वकयहसगुणउपासनाकाअङ्गभूतजोपरोक्षज्ञान सोश्रेष्ठहैऔंरउसज्ञानसेभीध्यानअधिकहैऔरतिससेभीकर्मफलकात्यागश्रेष्ठहै क्योंकिकर्मऔकर्मफलमेंआसक्ति निवृत्त होनेपरमेरीअनुग्रहसेशीघ्र संसारकी शान्ति होतीहै १२

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

सच्चेतुकस्यसंसारस्यानन्तरमेवस्यान्नतु कालान्तरमपेक्षते अशक्तस्यकर्मणिप्रवृत्तस्य पूर्व्वोपदिष्टोपायानुष्ठानाशक्तौसर्व्वकर्मणांफलत्यागःश्रेयःसाधनमुपदिष्टं नप्रथममेवातश्चश्रेयोहि ज्ञानमभ्यासादुत्तरोत्तरविशिष्टत्वोपदेशेन सर्व्वकर्मफलत्यागः स्तूयते सम्पन्नसाधनानुष्ठानाशक्तावनुष्ठेयत्वेनश्रुतत्वात् केनसाधर्म्म्येणस्तुतिःयदासर्व्वप्रमुच्यन्तइतिसर्वकामप्रहाणादमृतत्वमुक्तंतत्प्रसिद्धंकामाश्चसर्व्वेश्रौतस्मार्त्तसर्वकर्मणां फलानितत्त्यागेच विदुषोध्याननिष्ठस्यानन्तरैवशान्तिरितिसर्वकामत्यागसामान्य मश्नुतेसर्वकर्मफलत्यागस्यास्तीति तत्सामान्यात्सर्व्वकर्मफलत्यागस्तुतिरियंप्रबोध नार्थायथागस्तेरनब्राह्मणेनसमुद्रःपीतईदानीन्तनाःअपिब्राह्मणाब्राह्मणत्वसामान्या त्स्तूयन्तेएवंकर्मफलत्यागात्कर्मयोगस्यश्रेयःसाधनत्वमभिहितं अत्रचात्मेश्वरभेद माश्रित्यविश्वरूपईश्वरेचेतःसमाधानलक्षणोयोगउक्तईश्वरार्थंकर्मानुष्ठानादिचार्थे तदप्यशक्तोसीत्यज्ञानकार्यसूचनान्नाभेददर्शिनोज्ञेरोपासकस्यकर्मयोगउपपद्यतेइति दर्शयति तथाकर्मयोगिनोज्ञेरोपासनानुपपत्तिंदर्शयतिभगवान् तेप्राप्नुवन्तिमामेवे त्यज्ञेरोपासकानांकैवल्यप्राप्तौस्वातन्त्र्यमुक्तेतरेषांपारतन्त्र्यमीश्वराधीनतांदर्शितवां स्तेषामहंसमुद्धर्त्तेति यदिह्मीश्वरस्यात्मभूतास्तेमताअभेददर्शित्वादज्ञेरूपाएवते इति समुद्धरणकर्म्मवचनन्तात्प्रत्यपेक्षलंस्याद्यस्माच्चार्জ্জुनस्यात्यन्तमेवहितैषीभगवां स्तस्य सम्यग्दर्शनान्वितंकर्मयोगंभेददृष्टिमन्तमेवोपदिशति नचात्मानमीश्वरंप्रमा णतोवुद्धाकस्यचिद्गुणभावंजिगमिषतिकश्चित्विरोधात्तस्मादज्ञेरोपासकानां सम्य ग्दर्शननिष्ठानांसंन्यासिनांत्यक्तसर्वैषणानां अद्वेष्टासर्व्वभूतानामित्यादिधर्मप्रशंसा च्चादमृतत्वकारणंवक्ष्यामीति प्रवर्त्तते १२

आनन्दगिरिकृतटीका।

उत्तरश्लोकतात्पर्य्यमाह इदानीमिति ज्ञानंशब्दयुक्तिभ्यामात्मनिश्चयः अभ्या सोज्ञानार्थश्रवणाभ्यासोनिश्चयपूर्वकोध्यानाभ्यासोवातस्यविशिष्यमाणत्वे साक्षात्का रोहेतुत्यागस्यविशिष्टत्वेहेतुमाह एवमिति प्रीणातुभगवानितितस्मिन्कर्मसंन्यास पूर्वकमित्यर्थः पूर्वविशेषणवतोनियतचित्तस्यपुंसोयथोक्तत्यागादित्यर्थः अनन्तरमेवेत्य क्तंव्यनक्ति नत्विति नतुकर्मफलत्यागस्यसद्यःशान्तिकरत्वे सम्यग्धीरेव तथेतिश्रुति स्मृतिप्रसिद्धिर्विरुध्येत तत्राह अशक्तस्येतिदीर्घेणकालेनादरनैरन्तर्य्यानुष्ठिताद्द्वारा नाद्वासाक्षात्कारद्वारासंसारदुःखोपशान्तेस्तथाविधाद्ध्यानात्तत्त्यागस्यविशिष्टत्वोक्ते

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

स्तदीयस्तुतिरत्रेष्टेत्याह अतश्चेति तत्रहेतुमाह सम्पन्नेति सम्पन्नानिप्राप्तानिसाधना न्यक्षरोपासनादीनितेषांमध्ये पूर्वपूर्वस्यानुष्ठानाशक्तावुत्तरोत्तरस्यअनुष्ठेयत्वे नोप देशात्त्यागेचोपदेशपर्य्यवसानादित्यर्थः त्यागेविशिष्टत्ववचनस्यकेनसाधर्म्येणतंप्रति स्तुतित्वमितिपृच्छति केनेतिउत्तरमाह यदेति अमृतत्वमुक्तंअथमर्त्योमतोभवतीति शेषादितिशेषः कामप्रहाणस्यामृतत्वार्थत्वमथाकामयमानइत्यादावपिसिद्धमित्याह तदिति कामत्यागस्यामृतत्वहेतुत्वेपिकथंकर्मफलत्यागस्यतद्धेतुत्वमित्याशंक्याह का म्येतिकर्मफलत्यागादेवशान्तिश्चेत्तज्ज्ञाननिष्ठोपेक्षितेत्याशंक्याह तत्त्यागेचेतितथा पिकथमन्यस्य कर्मफलत्यागस्तुतिरित्याशंक्याह इतिसर्व्वेति विद्यावत्त्यागवद्वि द्वत्त्यागस्यापित्यागत्वाविशेषाद्विशिष्टत्वोक्तिर्युक्तेतिस्तुतिमुपसंहरति इति तत्सा मान्यादिति किमर्थास्तुतिरित्याशंक्यत्यागेरुचिमुत्पाद्यप्रवर्त्तयितुमित्याह प्ररोचना र्थेति तामस्तुतिंदृष्टान्तेनस्पष्टयति यथेति फलत्यागःश्रेयोहेतुश्चेत्कर्मत्यागादपिफ लत्यागसिद्धेरलंकर्मानुष्ठानेनेत्याशंक्याह एवंकर्मेति फलाभिलाषंत्यक्त्वाकर्मानुष्ठा नस्यार्पितस्येश्वरेश्रेयोहेतुतयाविवक्षितत्वान्नानुष्ठानानर्थक्यमित्यर्थः सम्प्रत्यद्वेष्टेत्या द्यवतारयितुंदृष्टंकीर्त्तयति अत्रचेति तयोश्चेदात्यन्तिकोऽभेदोनतर्हिईश्वरेमनःस माधानरूपोयोगोऽत्यन्ताभेदेध्यातृध्येयत्वाभावात् नचात्यन्ताभेदेकर्मानुष्ठानंतत्फ लत्यागोवाअपरस्यतद्योगादित्यर्थः भगवदुक्तिसामर्थ्यादपिकर्मयोगादिनाभेददृष्टि मतोभवतीत्याह अथेति अक्षरोपासकस्यकर्मयोगवत् कर्मयोगिनोऽक्षरोपासनानु पपत्तिरपिदर्शितेत्याह तथेति अक्षरोपासकःसम्यग्धीनिष्ठायथाज्ञानंभगवन्तमे वाप्नुवन्तिनतथाकर्मिणःसाक्षात्तदाप्त्राअपितेतथाचकर्मिणोनाक्षरोपासनासिद्धिरि त्यर्थः इतश्चाक्षरोपासनंकर्मानुष्ठानंनचैवान्ययुक्तमित्याह अक्षरेति नन्वक्षरोपा सकवदन्येषामपिईश्वरात्मताविशेषात् कुतस्तदधीनत्वंतत्राह यदीति कर्मयोगस्या क्षरोपास्तेश्चयुगपदेकत्रायोगेहेत्वन्तरमाह यस्माच्चेति कुरुकर्मैवेत्यादाविति शे षः किञ्चाक्षरोपासकोवाक्यादीश्वरमात्मानञ्चेति नासौक्रियायांगुणत्वेनकर्तृत्वम नुभवति गुणत्वेश्वरत्वयोरेकत्रव्याघातादतोपिनाक्षरोपासनंकर्मानुष्ठानञ्चैकत्रयु क्तमित्याह नचेति अक्षरोपास्तिकर्मयोगयोरेकत्रायोगेफलितमाह तस्मादिति अज्ञानांकर्मिणांवक्ष्यमाणधर्मजातस्य साकल्येनायोगादक्षरनिष्ठानामेवेदमुच्यते अविरुद्धांशस्यतुसर्व्वार्थत्वमिष्टमेवेत्यर्थः १२

अद्वेष्टासर्वभूतानांमैत्रःकरुणएवच निर्ममोनिरहङ्कारःसमदुःखसुखःक्षमी१३

शाङ्करभाष्यं

अद्वेष्टेतिअद्वेष्टा सर्वभूतानांनद्वेष्टात्मनिदुःखहेतुमपिनकिञ्चिद्वेष्टिसर्व्वाणिभूतान्यात्मत्वेनहियस्मात्पश्यति मित्रभावोमैत्रोमित्रतयावावर्त्ततेइतिमैत्रःकरुणएवचकरुणाकृपादुःखितेषुदयातद्वान्करुणःसर्व्वभूताभयप्रदःसंन्यासीत्यर्थः निर्ममोममेतिप्रत्ययवर्ज्जितोनिरहङ्कारोनिर्गताहंप्रत्ययःसमदुःखेति समदुःखसुखःसमेदुःखसुखेद्वेषरागयोरप्रवर्त्तकेयस्यसमदुःखसुखक्षमीक्षमावानाक्रुष्टोभिहतोवाऽविक्रियएवास्ते १३ सन्तुष्टइति सन्तुष्टःसततंनित्यंदेहस्थितिकारणस्यलाभेचउत्पन्नालंप्रत्ययःतथागुणवल्लाभेविपर्य्ययेचसन्तुष्टः सततंयोगीसमाहितचित्तःयतात्मासंयतस्वभावोदृढ़निश्चयोदृढ़ःस्थिरोनिश्चयोऽध्यवसायोयस्यात्मतत्त्वविषये सदृढनिश्च

आनन्दगिरिकृतटीका

सर्वेषांभूतानांमध्येयोदुःखहेतुः तंविद्वानपिद्वेष्येवेत्याशंक्याह आत्मनइति तत्र हेतुः सर्व्वाणीति सर्वभूतानामित्युभयतःसम्बध्यते ममप्रत्ययवर्जितोदेहेपीतिशेषःत्र तस्याध्यायकृताहङ्कारः निष्क्रान्तत्वमाह निर्गतेति १३

स्वामिकृतटीका

शपूर्वकंज्ञानंश्रेष्ठंतस्मादपितत्पूर्वकंध्यानंविशिष्टं ततस्तुतंपश्यतेनिष्फलंध्यायमानइति श्रुतेःतस्मादुक्तलक्षणःकर्मफलत्यागःश्रेष्ठःतस्मादेवंभूतत्यागात्कर्मसुतत्फलेषुचाशक्तिनिवृत्तौ मत्प्रसादेन समनन्तरमेव संसारशान्तिर्भवति १२

एवंभूतस्यभक्तस्यक्षिप्रमेवपरमेश्वरप्रसादहेतून्धर्म्मानाह अद्वेष्टेत्यष्टभिः सर्वभूतानांयथायथमद्वेष्टामैत्रःकरुणश्चउत्तमेषु द्वेषशून्यःसमेषुमित्रतयावर्त्तते इतिमैत्रःहीनेषुकृपालुरित्यर्थः निर्ममोनिरहङ्कारश्च कृपालुत्वादेवान्यैःसमेसुखदुःखेयस्यसःक्षमीक्षमाशीलः १३ सन्तुष्टइति सततलाभेऽलाभेचसन्तुष्टःसुप्रसन्नचित्तःयोगी

भाषाअनुवाद

अबपूर्वउक्तभक्तकेऊपरशीघ्रभगवतकीकृपाहोनेकाहेतुरूपसकलधर्म आठश्लोकमेंकहतेहैं किसाधारणसे सबजीवोंकेसाथनिर्वैरऔरसबकामित्रतथादयावान अर्थात् समानसेमैत्री औहीनपरकृपाऔरममताविहीनअहङ्कारशून्य औकृपालुतासेऔरकासुखदुखदेखि अपनेसुखदुखकेसमानजोजानैहै ऐसापुरुषअपनेसुखदुखमेंसमबुद्धि औक्षमाशीलमनुष्यपरमेरी शीघ्रप्रसन्नता होतीहै १३

CC-0. In Public Domain. Digitized by eGangotri

सन्तुष्टःसततंयोगीयतात्माद्दढनिश्चयः मय्यर्पितमनोबुद्धिर्योमद्भक्तःसमेप्रियः १४
यस्मान्नोद्विजतेलोकोलोकान्नोद्विजतेचयः हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रियः१५

शाङ्करभाष्यं ।

योमय्यर्पितमनोबुद्धिः संकल्पात्मकमनोऽध्यवसायलक्षणाबुद्धिस्तेमय्येवार्पितेस्यापि तेमनोबुद्धीयस्य संन्यासिनः समय्यर्पितमनोबुद्धिर्य ईदृशोमद्भक्तः समेप्रियः १४

प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियइतिसप्तमेध्यायेस्फुटितं तदिहप्रपंच्यते यस्मादिति यस्मात्संन्यासिनोनोद्विजतेनोद्वेगंगच्छति नसन्तप्यतेनसंक्षुभ्यतेलोकेलोकात्नोद्विजतेचयःहर्षामर्षभयोद्वेगैःहर्षश्चामर्षश्चभयञ्चोद्वेगश्चतैः हर्षामर्षभयोद्वेगैर्मुक्तोहर्षःप्रियलाभेऽन्तःकरणस्योत्कर्षोरोमाञ्चनाश्रुपातादिलिङ्गः तथाऽमर्षोऽभिलषितप्रतिघातेऽसहिष्णुता भयन्त्रासः उद्वेगउद्विग्नता तैर्मुक्तोयः सचमेप्रियः १५

आनन्दगिरिकृतटीका ।

अक्षरोपासकस्याज्ञानतोविशेषणान्तराण्याह सन्तुष्टइति सततमिति सर्वत्र सम्बध्यते कार्यकारणसंघातः स्वभावशब्दार्थःस्थिरत्वंकुतर्कादिनानभिभवनीयत्वंमद्भक्तोमज्जनपरोज्ञानवानिति यावत् १४

ज्ञानवतोभगवत्प्रियत्वेप्रमाणमाह प्रियोहीति किमर्थंतर्हिपुनरुच्यते तत्राह तदिति उद्वेगादिराहित्यमपिज्ञानवतोविशेषणमित्याह यस्मादिति नकेवलमुद्वेगंप्रत्यपादानत्वमेवसंन्यासिनोनानुपपन्नं किन्तुतत्कर्तृत्वमपीत्याह तथेति अस

स्वामिकृतटीका ।

अप्रमत्तःयतात्मासंयतस्वभावःदृढोमद्विषयेनिश्चयोयस्यमय्यर्पितेनमनोबुद्धीयेनएवं भूतोयोमद्भक्तःसमेप्रियः १४ किञ्च यस्मादिति यस्मात्सकाशात्लोकोजनो

भाषाअनुवाद

औरहांनिलाभमे प्रसन्नचित्त तथाअप्रमत्तवशीभूतस्वभाव औसतविषयमे दृढ़ निश्चय औरमेरेमे अर्पणकियाहै मनबुद्धिजिसनेऐसाजोमेराभक्त सोहमैअतिप्रियहै १४ औरजिसपुरुषसे लोगभयकेद्वारा उद्वेगकहेचित्तक्षोभनहीपावते औरजिसकोलोगोंसेऊद्वेगनहींहोताहै औरजोइष्टहोनेसेप्रसन्न औअनिष्टहोनेसेअप्रसन्न तथाआमर्षकहे दूसरेकीलाभ नदेखिशकना यहजिसकेनहींहै औरभयऊद्वेगसेरहित जोमेराभक्त सोमोंहिप्रियहै १५

CC-0. In Public Domain. Digitized by eGangotri

अनपेक्षःशुचिर्दक्षउदासीनोगतव्यथः सर्वारम्भपरित्यागीयोमद्भक्तःसमेप्रियः १६

शाङ्करभाष्यं

अनपेक्षइति देहेन्द्रियविषयसम्बन्धादिष्वपेक्षायस्यनास्ति सर्वविषयेष्वनपेक्षो निस्पृहःशुचिर्बाह्याभ्यन्तरेणचशौचेनसम्पन्नोदक्षःप्रत्युपपन्नेषु कार्येषुसद्योयथावत् प्रतिपत्तुंसमर्थः उदासीनइति उदासीनोनकस्यचिन्मित्रादेःपक्षंभजते यःसउदासीनोयतिर्गतव्यथोगतभयःसर्वारम्भपरित्यागी आरभ्यन्तइत्यारम्भा इहामुत्रफलभोगार्थानिकामहेतूनिकर्माणिसर्वारम्भास्तान्परित्यक्तुंशीलमस्येति सर्वारम्भपरित्यागी योमद्भक्तःसमेप्रियः १६ किञ्चयोनहृष्यतीष्टप्राप्तौनशोचति प्रियवियोगेनचाप्राप्तंकांक्षति शुभाशुभेपुण्यपापेकर्मणीपरित्यक्तुंशीलमस्येति शुभाशुभपरित्यागी भक्तिमान् यः समेप्रियः १७ समइति समःशत्रौमित्रेचतथामानापमानयोः

आनन्दगिरिकृतटीका

हिष्णुतापरकीयप्रकर्षस्येतिशेषः त्रासस्तस्करादिदर्शनाधीनः उद्विग्नत्वमचेतनाचेतनाधीनस्यलोकादिति यावत् १५

निरपेक्षत्वादिकमपिज्ञानिनोविशेषणमित्याह अनपेक्षइति आदिपदमपेक्षणीयसर्वसंग्रहार्थं प्रतिपत्तव्येषु प्रतिपत्तिंकर्त्तव्येषु कर्त्तुञ्चेत्यर्थः परैस्ताड़ितस्यापिगताव्यथाभयमस्येति व्युत्पत्तिमाश्रित्याह गतेति १६ नचत्वमीत्यनेनपौनरुक्त्यं

स्वामिकृतटीका

नोद्विजते भयशङ्कयाक्षोभं नप्राप्नोतियश्चलोकान्नोद्विजतेयश्चस्वाभाविकैर्हर्षादिभिर्मुक्तः तत्रहर्षःस्वस्येष्टलाभेउत्साहः अमर्षःपरस्यलाभेऽसहनंभयंत्रासःउद्वेगोभयादिनिमित्तश्चित्तक्षोभः एतैर्विमुक्तोयोमद्भक्तःसमेप्रियः १५

किञ्च अनपेक्षइति अनपेक्षोयदृच्छयोपस्थितेऽर्थेनिस्पृहःशुचिर्बाह्याभ्यन्तरशौचसम्पन्नःदक्षोऽनलसःउदासीनःपक्षपातरहितःगतव्यथआधिशून्यः सर्वानृष्टाद्दष्टार्थानारम्भानुद्यमान्परित्यक्तुंशीलंयस्यसः एवंभूतःसन्योमद्भक्तःसमेप्रियः १६

भाषाअनुवाद

औरजिसकोअनायासप्राप्तधनकीभी इच्छानहीं औरभीतरबाहरशुचिकहेपवित्र औदक्षकहेआलस्यरहिततथापक्षपातवर्जितऔगतव्यथकहेआधिव्याधिशून्यऔसर्वआरम्भकहेउद्यमकात्यागीऐसाभक्तमेराप्रियहै आधिमनकीचिन्ता औरव्याधिरोगकोकहतेहैं १६ औरजोप्रियवस्तुपायकेसन्तुष्टऔअप्रियपायकेअसन्तुष्टनहोय

CC-0. In Public Domain. Digitized by eGangotri

योनहृष्यतिनद्वेष्टिनशोचतिनकांक्षति शुभाशुभपरित्यागीभक्तिमान्यःसमेप्रियः १७
समःशत्रौचमित्रेचतथामानापमानयोः शीतोष्णसुखदुःखेषुसमःसङ्गविवर्जितः १८

शाङ्करभाष्यं।

पूजापरिभवयोः शीतोष्णसुखदुःखेषु समःसर्व्वत्रचसङ्गवर्जितः १८

किञ्चतुल्यनिन्देतितुल्यनिन्दास्तुतिः निन्दाचस्तुतिश्चनिन्दास्तुतीतुल्येयस्यसतुल्यनिन्दास्तुतिर्मौनीमौनवान्संयतवाक्सन्तुष्टोयेनकेनचित् शरीरस्थितिमात्रेणतथाचोक्तं येनकेनचिदाच्छन्नोयेनकेनचिदाश्रितःयत्रक्वचनशायीस्यात्तन्देवाब्राह्मणं विदुरिति किञ्चअनिकेतोनिकेतआश्रयोनिवासोनियतोनविद्यतेयस्य सोयमनिकेतःस्थिरमतिर्भक्तिमान्मेप्रियः १९

आनन्दगिरिकृतटीका

प्रत्युत्पन्नायामपिव्यथायामपकर्त्तृष्वनपकर्त्तृत्वं क्षमित्यत्वमित्यस्युपगमाद्वेषहर्षादिराहित्यमपिज्ञानिनोलक्षणमित्याह किञ्चेति सर्व्वारम्भपरित्यागीत्यनेन विहितकाम्यत्यागस्योक्तत्वाद्विहिताद्न्यत्रमासङ्कोचीति विशिनष्टि शुभाशुभइति वैषम्यबुद्ध्यभावादपिज्ञानिनोविशेषणमित्याह समइति १७ समइति अद्वेष्टेत्यादिनाद्वेषादिविशेषाभावउक्तः सम्प्रतिसर्व्वत्रैवाविकृतचित्तत्वमुच्यतेसर्व्वत्रचेतनेस्त्रियादावचेतनेचचन्दनादावित्यर्थः १८ वाग्यतत्वादिविशेषणमपि ज्ञाननिष्ठस्यास्तीत्याह किञ्चेति

स्वामिकृतटीका

किञ्चयइति प्रियंप्राप्ययोनहृष्यति अप्रियंप्राप्ययोनद्वेष्टिइष्टार्थनाशेसतियोनशोचति अप्राप्तमर्थंयोनकांक्षति शुभाशुभेपुण्यपापेपरित्यक्तुंशीलंयस्यसःएवंभूतोभूत्वायोमद्भक्तिमान् समेप्रियः १७ किञ्च समइति शत्रौमित्रेचसमएकरूपःमानापमानयोरपितथासमएवहर्षविषादशून्यइत्यर्थः शीतोष्णयोःसुखदुःखयोश्चसमःसङ्गविवर्जितः क्वचिदप्यनासक्तः १८ किञ्च तुल्यानिन्दास्तुतिश्चयस्य सःमौनी

भाषा अनुवाद।

औरइष्टकेनाशहोनेपरभीशोचतानहीं औरकिसीअप्राप्तवस्तुकीआकांक्षाजिसकेनहींहै औरशुभअशुभकहेपुण्यपापकाभीत्यागीकहेत्यागकाअधिकारीहै ऐसाभक्तियुक्तमनुष्यहमेप्रियहै १७ औरशत्रुमित्रदोनोंकेप्रतिसमानकहेप्रीतिविरोधरहित औरमानअपमानमेभी हर्षविषादरहितहै औरशीतउष्णसुखदुखमेएकरूपहै तथासङ्गवर्जितकहे विषयोंमेआसक्तिरहितजोहै १८ औरनिन्दास्तुति

CC-0. In Public Domain. Digitized by eGangotri

तुल्यनिन्दास्तुतिर्मौनीसन्तुष्टोयेनकेनचित् अनिकेतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः १९
येतुधर्म्मामृतमिदंयथोक्तंपर्य्युपासतें श्रद्दधानामत्परमाभक्तास्तेऽतीवमेप्रियाः २०

शाङ्करभाष्यं।

अद्वेष्टासर्व्वभूतानामित्यादिनाक्षरस्योपासकानांनिवृत्तसर्व्वैषणानांसंन्यासिनां परमार्थज्ञाननिष्ठानान्धर्म्मजातंप्रक्रान्तमुपसंह्रियतइति येत्विति येतुसंन्यासिनोधर्म्मामृतन्धर्म्मादनपेतंधर्य्यञ्चतदमृतञ्चतदमृतत्वहेतुत्वादिदं यथोक्तमद्वेष्टासर्व्वभूतानामित्यादिना पर्युपासतेंअनुतिष्ठन्तिश्रद्दधानाःसन्तोमत्परमायथोक्तोहमक्षरात्मा परमोनिरतिशयोगतिर्येषान्तेमत्परमाभक्तास्च उत्तमाम्परमार्थज्ञानलक्षणांभक्तिमाश्रितास्तेऽतीवमेप्रियाः प्रियोहिज्ञानिनोत्यर्थमितियत्सूचितं तद्व्याख्यायेहोपसंहृतं भक्तास्तेतीवमेप्रियाइति यस्माद्धर्म्मामृतमिदंयथोक्तमनुतिष्ठन्भगवतोविष्णोःपरमेश्वरस्यातीवमेप्रियोभवति तस्मादिदंधर्म्मामृतंमुमुक्षुणायत्नतोनुष्ठेयंविष्णोःप्रियंपरन्धामजिगमिषुणेतिवाक्यार्थः २० इतिश्रीशाङ्करभाष्येद्वादशोध्यायः १२

आनन्दगिरिकृतटीका

निन्दादोषसङ्कीर्त्तनंस्तुतिर्गुणगणनंदेहस्थितिमात्रफलेनान्नादिनाक्षानिनः सन्तुष्टत्वेस्मृतिंप्रमाणयति तथाचेति नियतनिवासरहित्यमपिज्ञानवतोविशेषणमित्याह किञ्चेति नकुड्यानोदकेसङ्गोनचैलेनत्विपुष्करे नासनेवसनेनान्नेयस्यवैमोक्षवित्तु स इतिस्मृतिमुक्तंर्थंप्रमाणयति नेत्यादिना १९

पुनःपुनर्भक्तेर्ग्रहणमपवर्गमार्गस्यपरमार्थज्ञानस्योपायार्थं अद्वेष्टेत्यादिधर्म्मजातंज्ञानवतोलक्षणमुक्तं तदुपपादितमनूद्योपसंहारश्लोकमवतारयति अद्वेष्टेत्यादिना चतुर्थपादस्यतात्पर्यमाह प्रियोहीति यद्यपियथोक्तंधर्म्मजातंज्ञानवतोलक्षणं तथापिजिज्ञासूनांज्ञानोपायत्वेनयत्नादनुष्ठेयमितिवाक्यार्थमुपसंहरति यस्मा

स्वामिकृतटीका।

संयतवाक्येनकेनचित्यथालब्धेनसन्तुष्टःअनिकेतोनियतवासशून्यःस्थिरमतिः व्यवस्थितचित्तः एवंभूतोमद्भक्तिमान्यःसनरोममप्रियः १९

भाषाअनुवाद।

जिसकोतुल्यहै औजोभौनीकहेविरुद्धवचन तथावकवादरहितहो जोकुछयथालाभसेसन्तुष्टहै अनिकेतकहेनिवासस्थानशून्य तथास्थिरमतिअर्थात्वशीभूतचित्तहै ऐसेगुणयुक्तनरमेरेपरमप्रियहैं १९

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

दिति तदेवंसोपाधिकाभिध्यानपरिपाकान्निरुपाधिकमनुसन्दधानस्याद्वेष्टासर्व्वभूतानामित्यादि धर्मविशिष्टस्यमुख्यस्याधिकारिणःश्रवणाद्यावर्त्तयतस्तत्वसाक्षात्कारसम्भवात्ततोमुक्त्युपपत्तेस्तद्धेतु वाक्यार्थधीविषयोन्वययोग्यस्तत्पदार्थोनुसन्धेयइतिसिद्धं २० इति आनन्दगिरिकृतटीकायां द्वादशोध्यायः १२

स्वामिकृतटीका।

उक्तंधर्मजातंसफलमुपसंहरति येत्विति यथोक्तमुक्तप्रकारंधर्ममेवामृतंअमृतत्वसाधनत्वात्धर्म्यामृतमितिकेचित्पठन्ति येतदुपासते अनुतिष्ठन्तिश्रद्धांकुर्व्वन्तोमत्परमाश्चसन्तोमद्भक्तास्तेऽतीवमेप्रियाइति दुःखमव्यक्तवर्त्मैतद्वहुविघ्नमतोवुधः सुखंकृष्णपदाम्भोजंमुक्तिसत्पथवान्भजेत् २० इतिद्वादशोध्यायः १२

भाषा अनुवाद

यहीसवपूर्वोक्तधर्म अमृतकहेमुक्तिरूपहैं इनकोयथोक्तरूपसे जोश्रद्धायुक्त उपासनाकरतेहैं औरमत्परताकहेमैहींहैंपरमपरायणजिनको अैसेमेरेभक्त मुझे अतिशयप्रियहैं २०

इतिजगन्नाथसुकुलविरचितभाषाटीकायांद्वादशोऽध्यायः १२



CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता।

त्रयोदशोऽध्याय

शाङ्करभाष्यं

सप्तमेऽध्यायेसूचितेद्वेप्रकृतीईश्वरस्यत्रिगुणात्मिकाष्टधाभिन्नापरा संसारहेतुत्वा त्परात्वान्याजीवभूताक्षेत्रज्ञलक्षणाईश्वरात्मिका याभ्यांप्रकृतिभ्यांईश्वरोजगदुत्पत्ति स्थितिलयहेतुत्वंप्रतिपद्यते तत्क्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेण तद्वतईश्व रस्यतत्त्वनिर्द्धारणार्थंक्षेत्राध्यायआरभ्यते अतीतानन्तराध्यायेचअद्वेष्टा सर्व्वभूताना मित्यादिना यावदध्यायपरिसमाप्तिस्तावत्तत्त्वज्ञानिनांसंन्यासिनांनिष्ठायथातेवर्त्त न्तेइत्येतदुक्तं केनपुनरेतत्त्वज्ञानेनयुक्ताःयथोक्तधर्माचरणात् भगवतःप्रियाःभवन्ती त्येवमर्थञ्चायमध्यायआरभ्यते प्रकृतिश्च त्रिगुणात्मिका सर्व्वकार्य्यकरणविषयाका रेणपरिणता पुरुषस्यभोगापवर्गार्थकर्त्तव्यतयादेहेन्द्रियाद्याकारेण संहियतें सोयं संघातइदंशरीरं तदेतत्भगवानुवाच इदमिति इदंइतिसर्व्वनाम्नोक्तंविग्रिनष्टि शरी रमिति हेकौन्तेय हतलाणात्क्षयात्क्षरणात्क्षेत्रवद्वास्मिन्कर्म फलनिर्व्वृतेःक्षेत्र मितीतिशब्दः एवंशब्दपदार्थकः क्षेत्रमित्येवमभिधीयतेकथ्यते एतत्शरीरंक्षेत्रंयो वेत्तिविजानाति आपादतलमस्तकंज्ञानेनविषयीकरोति स्वाभाविकेनऔपदेशिकेन वा वेदनेनविषयीकरोति विभागशस्तंवेदितारंप्राज्ञःकथयन्ति क्षेत्रज्ञइतीतिशब्दःएवंशब्दपदार्थकएवपूर्व्ववत् क्षेत्रज्ञइत्येवमाज्ञः केतद्विदस्तौक्षेत्रक्षेत्रज्ञौ ये विदन्ति तेतद्विदः १

आनन्दगिरिकृतटीका

प्रथममध्यमयोःषट्कयोरुक्तंतत्पदार्थावुक्तौअन्तिमस्तुषट्कोवाक्यार्थनिष्ठः सम्य ग्धीप्रधानोधुनारभ्यते तत्रक्षेत्राध्यायमन्तिमषट्काद्यमवतितारयिषुर्व्यवहितंवृत्तं कीर्त्तयति सप्तमइति प्रकृतिद्वयस्यस्वातन्त्र्यंप्रवारयति ईश्वरस्येति भूमिरित्यादिनो क्तासत्त्वादिरूपाप्रकृतिरपरेत्यत्रहेतुमाह संसारेति इतस्त्वन्यामित्यादिनोक्तांप्रकृ ति मनुक्रामति परात्वेति परत्वेहेतुंसूचयति ईश्वरात्मिकेति किमर्थमीश्व रस्य प्रकृतिद्वयमित्याशंक्य कारणत्वार्थमित्याह याभ्यामिति वृत्तमनूद्यवर्त्तिष्यमा णाध्यायारम्भप्रकारमाह तत्रेति व्यवहितेनसम्बन्धमुक्त्वाऽव्यवहितेन तंविवक्षुर व्यवहितमनुवदति अतीतेति निष्ठोक्तेति सम्बन्धः निष्ठामेवव्याचष्टे यथेति वर्त्त न्तेधर्मजातमनुतिष्ठन्तितयापूर्व्वोक्तेनप्रकारेणसर्व्वमुक्तमिति योजना अव्यवहित मेवमनूद्य तेनोत्तरस्यसम्बन्धंसङ्गिरते केनेति तत्त्वज्ञानोक्तेरुक्तार्थेनसमुच्चयार्थश्च

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच इदंशरीरंकौन्तेय क्षेत्रमित्यभिधीयते एतद्योवेत्तितंप्राहुः क्षेत्रज्ञइति तद्विदः १

आनन्दगिरिकृतटीका।

कारः जीवानांसुखदुःखादिभेदभाजांप्रतिक्षेत्रभिन्नानांनाक्षरेणैक्यमित्याशंक्यसंसारस्यआत्मधर्मत्वंनिराकृत्य संघातनिष्ठत्वंवक्तुं संघातोत्पत्तिप्रकारमाह प्रकृतिश्चेति भोगश्चापवर्गश्चार्थौतयोरेवकर्त्तव्यतयेति यावत् नन्वनन्तरश्लोकेशरीरनिर्देशात्तस्योत्पत्तिर्वक्तव्या किमितिसंघातस्योच्यतेतत्राह सोयमिति उक्तेर्थेभगवद्वचनमवतारयति तद्देतदिति तत्तद्दृष्टृत्वेनसंघातदृश्यादन्यमात्मानंनिर्दिशति इदमिति उक्तंप्रत्यक्षदृश्यविशिष्टं किञ्चिदितिशेषः शरीरस्यात्मनोन्यत्वंक्षेत्रनामनिरुक्त्या ब्रूते क्षयेति क्षयोनाशःक्षरणमपक्षयः यथाक्षेत्रे बीजमुप्तंफलति तद्वदित्याह क्षेत्रवद्देति क्षेत्रपदादुपरिस्थितमिति पदंक्षेत्रशब्दविषयमन्यथा वैयर्थ्यादित्याह इतिशब्दइति क्षेत्रमित्येवमनेनक्षेत्रशब्देनेत्यर्थः दृश्यंदेहमुक्त्वाततोतिरिक्तंद्रष्टारमाह एतदिति स्वाभाविकंमनुष्योहमिति ज्ञानंऔपदेशिकं देहोनात्मादृश्यत्वादित्यादिविभागशास्त्रतोतिरिक्तत्वेनेत्यर्थः क्षेत्रमित्यत्रेतिशब्दवदत्रापीतिशब्दस्यक्षेत्रज्ञशब्दविषयत्वमाह इतिशब्दइति क्षेत्रज्ञइत्येवंक्षेत्रज्ञशब्देनतंप्राहुरितिसम्बन्धंप्रवक्तुन्प्रश्नपूर्वकमाह केइत्यादिना १ दृश्यानादुःखादीनांभेदकानां

भाषाअनुवाद

अबइसतेरहेंअध्यायमे तत्त्वज्ञानवर्णनकियाजाताहै किहेपार्थमृत्युयुक्तसंसारसागरसे सगुणउपासकअपनेभक्तोंको मैउद्धारकरताहूं इत्यादिद्वादशअध्यायकेसप्तमश्लोकमे भगवतअङ्गीकृतजोसंसारोद्धरण सोब्रह्मज्ञानकेविनाअसम्भवहै इसहेतुतत्त्वज्ञानउपदेशकरणार्थ भगवानयहप्रकृतिपुरुषविवेकअध्यायका आरम्भकरतेहैं जोप्रकृतिपुरुषविवेकसप्तमअध्यायकेपञ्चमश्लोकमे पराअपराप्रकृतिद्वयरूपकहाहै जिसप्रकृतिकेद्वारा अविवेकवशतेंयहचेतनका अंशजीवभावकोप्राप्तहोय संसारीहोताहैं औरजिसप्रकृतिद्वयसेजीवोंकेउपभोगार्थ परमेश्वरसृष्टिआदिमे प्रवृत्तहोतेहैं सोईक्षेत्रपदवाच्यपरस्परभिन्नस्वरूपद्वयप्रकृतिको स्वरूपसेनिरूपणकरनेकेलिये भगवानश्रीकृष्णकहतेहैं किहेकौन्तेय क्षेत्रऔक्षेत्रज्ञदोनोकेविचारकारीलोग इसभोगायतनभोगसाधनशरीरकोक्षेत्रकहतेहैं क्योंकियहशरीरसंसारवृक्षकेअंकुरहोनेकीभूमिहै औरजोशरीरकोजानताअर्थात्हमहइ

CC-0. In Public Domain. Digitized by eGangotri

क्षेत्रज्ञञ्चापिमांविद्धिसर्व्वक्षेत्रेषुभारत क्षेत्रक्षेत्रज्ञयोर्ज्ञानंयत्तज्ज्ञानंमतंमम २

शाङ्करभाष्यं।

एवंक्षेत्रक्षेत्रज्ञावुक्तौकिमेतावन्मात्रेणज्ञानेनज्ञातव्याविति नेत्युच्यते क्षेत्रज्ञमिति क्षेत्रज्ञंयथोक्तलक्षणञ्चापिमांपरमेश्वरमसंसारिणंविद्धिजानीहि योसौसर्व्वक्षेत्रेषुक्षेत्रेष्वेकःक्षेत्रज्ञोब्रह्मादिस्तम्बपर्य्यन्तानेकक्षेत्रोपाधिप्रविभक्तस्तंनिरस्तसर्व्वोपाधिवेदंसदसदादिशब्दप्रत्ययागोचरंविद्धीत्यभिप्रायः हेभारत यस्मात्क्षेत्रक्षेत्रज्ञेश्वरयाथात्म्यव्यतिरेकेणनज्ञानगोचरमन्यदवशिष्टमस्ति तस्मात्क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोःयत्ज्ञानंक्षेत्रक्षेत्रज्ञौयेनज्ञानेनविषयीक्रियेतेतत्ज्ञानंसम्यक्ज्ञान

स्वामिकृतटीका

भक्तानामहमुद्धर्त्ता संसारादित्यवादियत् त्रयोदशेऽथतत्सिद्धौतत्त्वज्ञानमुदीर्य्यते तेषामहंसमुद्धर्त्तामृत्युसंसारसागरात् भवामिनचिरात्पार्थेतिपूर्व्वंप्रतिज्ञातं नचात्मज्ञानंविनासंसारोऽरणंसम्भवतीतितत्त्वज्ञानोपदेशार्थं प्रकृतिपुरुषविवेकाध्यायआरभ्यते तत्रयत्सप्तमाध्यायेअपरापराचेतिप्रकृइयमुक्तं ययोरविवेकाज्जीवभावमापन्नस्यचिदंशस्यायंसंसारःयाभ्याञ्चजीवोपभोगार्थमीश्वरस्यसृष्यादिषुप्रवृत्तिस्तदेवप्रकृतिद्वयंक्षेत्रक्षेत्रज्ञपदवाच्यं परस्परविभक्तंतत्त्वतोनिरूपयिष्यन्श्रीभगवानुवाच इदमिति इदंभोगायतनंशरीरंक्षेत्रमित्यभिधीयते संसारस्यप्ररोहभूमित्वात् एतद्योवेत्ति अहंममेतिमन्यते तंक्षेत्रज्ञंप्राज्ञः क्षपीवलवत्तत्फलभोक्तृत्वात्तद्विदःक्षेत्रक्षेत्रज्ञोर्विवेकज्ञाः १

भाषा अनुवाद

मेरा यहविचारताहै उसकोक्षेत्रौक्षेत्रज्ञविवेकीजन क्षेत्रज्ञ कहतेहैं जिसहेतुक्षेत्रज्ञकिसान केसमान इसदेहरूपक्षेत्रका फलभोगकरताहै १

क्षेत्रज्ञका व्यावहारिक स्वरूपकहा अबपारमार्थिकअसंसारिस्वरूपकहतेहैं किहेभारतअर्जुन सोईक्षेत्रज्ञसंसारीजोजीव तिसैयावत्क्षेत्रकाआधाररूपहमकोजानो क्योंकिसामवेदकेतत्त्वमसिमहावाक्यकालक्ष्यअर्थचिदंशकरकेमेरेहीरूपकाप्रतिपादनकियाहै औरक्षेत्रतथाक्षेत्रज्ञ इनदोनोकाजोपृथकरूपज्ञान सोईमेरेमतसेमुक्तिकाहेतुहै औरसबज्ञान प्रतिबन्धकेकारणहैं तथाहि सोईकर्मजोबन्धकाहेतुनहो औरसोईविद्याजोमुक्तिकीहेतुहोय बाकीकर्मसबपरिश्रमकेहेतु औरविद्यासकलशिल्पनैपुण्यमात्र अर्थात् कारीगरीकीचातुरीहैं यहजानो २

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

मिति मतमभिप्रेतमित्यभिप्रायोममेश्वरस्य विष्णोः ननु सर्व्वक्षेत्रेष्वेक एव ईश्वरोनान्यस्तद्व्यतिरिक्तो भोक्ताविद्यते चेत्ततईश्वरस्य संसारित्वं प्राप्तं ईश्वरव्यतिरेकेण वा संसारिणोन्यस्याभावात् संसाराभावप्रसङ्गस्तच्चोभयमनिष्टंबन्धमोक्षतद्धेतुशास्त्रानर्थक्यप्रसङ्गात् प्रत्यक्षादिप्रमाणविरोधाच्च प्रत्यक्षेणतावत्सुखदुःखतद्धेतुलक्षणः संसारउपलभ्यतेजगद्वैचित्र्योपलब्धेश्चधर्माधर्मनिमित्तःसंसारोनुमीयतेसर्व्वमेतदनुपपन्नमात्मैश्वरैकत्वेनज्ञानाज्ञानयोरन्यत्वेनोपपत्तेः दूरमेतेविपरीतेविषूचीअविद्यायाचविद्येतिज्ञानाज्ञानेतथाचतयोर्विद्याविषययोःफल

आनन्दगिरिकृतटीका

यावद्देहभाविनामनात्मधर्मत्वसिद्धयेद्रष्टारंदेहादन्यमुक्त्वासांख्यानामिवतावन्मात्रेण मुक्तिनिष्टत्तयेतस्यसर्व्वदेहेष्वैक्योक्तिपूर्व्वकं स्वेनपरमार्थेनाक्षरेणैक्यंदृष्टमनूद्यप्रश्नद्वारादर्शयति एवमित्यादिना यथोक्तलक्षणंदृश्याद्देहान्निकृष्टंद्रष्टारमित्यर्थः चापीति निपातौजीवस्याक्षरत्वज्ञानस्यदेहादन्यत्वज्ञानेनसमुच्चयार्थौभिन्नक्रमौनत्वेवं सांख्यवद्दृश्यादन्यदेवविद्धि किन्तुमाञ्चापिविद्धीति सम्बध्यते यःसर्व्वक्षेत्रेषुएकःक्षेत्रज्ञःतंमामेवविद्धीति सम्बन्धंसूचयति सर्वेति तत्तत्क्षेत्रोपाधिकभेदभाजःतत्तत्क्षेत्रबुद्धीगोचरस्यकथंतद्विपरीतब्रह्मत्वधीरित्याशंक्याह ब्रह्मादितिउत्तरार्द्धंविभजतेयस्मादिति तदेवविशिनष्टि क्षेत्रेति नचभेदविषयत्वान्नसम्यग्ज्ञानंतदितियुक्तंतस्यविवेकज्ञानस्यवाक्यार्थज्ञानद्वारामोक्षौपयिकत्वेनसम्यक्त्वसिद्धिरिति भावःजीवेश्वरयोरेकत्वमुक्तमाक्षिपति नन्विति जीवेश्वरयोरेकत्वेजीवस्येश्वरेवातस्यजीवेऽवान्तर्भावोनाद्योजीवस्यपरस्मादन्यस्याभावेसंसारस्यनिरालम्बनत्वानुपपत्त्यापरस्यैवतदाश्रयत्वप्रसङ्गादित्यर्थः अनश्नन्नन्योअभिचाकशीति श्रुतेर्नतस्यसंसारितेत्याशंक्यद्वितीयंदूषयति ईश्वरेति जीवेचेदीश्वरोऽन्तर्भवति तदापिततोन्यसंसार्यभावात्तस्यचसंसारानिष्टः संसारोजगत्यस्तंगच्छेदित्यर्थः प्रसङ्गद्वयस्येष्टत्वंनिराचष्टे तच्चेतिसंसाराभावेतयोरन्यःपिप्पलंस्वाद्वत्तीत्यादिवन्मोक्षशास्त्रस्यतद्धेतुकर्मविषयकर्मकाण्डस्यचानर्थक्यमीश्वराश्रितेचसंसारेतदभोक्तृत्वश्रुतेश्चसंसारेतदभोक्तृत्वश्रुतेः ज्ञानकाण्डस्यमोक्षतद्धेतुज्ञानार्थस्यानर्थक्यमतोनप्रसङ्गयोरिष्टतेत्यर्थः संसाराभावप्रसङ्गस्यानिष्टत्वेहेत्वन्तरमाहप्रत्यक्षादीतितत्रप्रत्यक्षविरोधंप्रत्यक्षेणेतिआदिशब्दोपात्तमनुमानविरोधमाह

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

भेदोपिविरुद्धोनिर्दिष्टःश्रेयश्चप्रेयश्चेतिविद्याविषयःश्रेयःप्रेयस्त्वविद्याकार्य्यमिति तथा चव्यासःद्वाविमावथपन्थानावित्यादि इमौद्वावेवपन्थानावित्यादिचेहचद्वे निष्ठे उक्ते अविद्याचसहकार्य्येण विद्ययाहातव्येतिश्रुतिस्मृतिन्यायेभ्योऽवगम्यतेश्रुतयस्तावदिह चेदवेदीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिस्तमेवंविद्वानमृतइहभवतिनान्यः पन्थाविद्यतेऽयनायआनन्दंब्रह्मणोविद्वान्नबिभेतिकुतश्चन अविद्युषस्त्वथतस्यभयंभव त्यविद्यायामन्तरेवर्त्तमानाब्रह्मवेदब्रह्मैवभवति अन्योसावन्योहमस्मीतिनसवेदय थापशुरेवंसदेवानामात्मविद्यःसइदंसर्व्वंभवतियदाचर्म्मवदित्याद्याः सहस्रशः स्मृ तयश्च अज्ञानेनाहृतंज्ञानंतेनमुह्यन्तिजन्तवः इहैवतैर्जितःस्वर्गोयेषांसाम्येस्थितंम नः समंपश्यन्हिसर्व्वत्रइत्याद्याः न्यायतश्चसर्पान्कुशाग्राणि तथोदपानंज्ञात्व मनुष्याःपरिवर्जयन्ति अज्ञानतस्तत्रयान्तीति केचित्ज्ञानेफलंपश्य यथाबिभि

आनन्दगिरिकृतटीका ।

जगदिति विमतंविचित्रहेतुकंविचित्रकार्य्यत्वात्प्रसादादिवदित्यर्थःप्रत्यक्षानुमानाग मविरोधादयुक्तमैक्यमित्युपसंहरति सर्व्वमिति ऐक्येपिसंसारित्वमविद्यातोऽसंसारि त्वमिति विभागान्नानुपपत्तिरित्युत्तरमाह नेत्यादिना तयोःस्वरूपतोविलक्षणत्वेश्रु तिमाह दूरमिति अविद्यायाचविद्येतिप्रसिद्धेएतेविद्याविद्येदूरंविपरीतेअत्यन्तविरु द्धे इत्यर्थःविषूचीनागतीभिन्नफलेइत्यर्थः स्वरूपतोविरोधवत्फलतोपि सोस्तीत्याह तथेतिफलभेदोक्तिनेवव्यनक्तिविद्येतितयोर्द्विधाविलक्षणत्वेवेदव्यासस्यापिसम्मतिमा हतथाचेति उक्तेर्थेभगवतोपिसंमतिमुदाहरति इहचेति द्वयोरपिनिष्ठयोस्तुल्यमुपा देयत्वमितिशङ्कांशातयतिअविद्याचेति अविद्यासकार्य्याहातव्येत्यत्रश्रुतिमुदाहरति श्रुतयस्तावदितिइहेतिजीवदवस्थोच्यतेचेच्छ्रुत्योविद्योदयदौर्लभ्यद्योतीअवेदीदहंव च्चेतिविदितवानित्यर्थः अयंविद्यानन्तरमेवसत्यमवितथंपुनरावृत्तिवर्जितंकैवल्यंस्या दित्याह अथेति अविद्याविषयेपिश्रुतिमाह नचेदिति जन्ममरणादिरूपासंसृतिर्वि नष्टिःतस्यामहत्वंसम्यग्ज्ञानंविनानिवर्त्तयितुमशक्यत्वं विद्याविषयेश्रुत्यन्तरमाह त मेवमितिपरमात्मानंप्रत्यक्षेनयःसाक्षात्कृतवान्सदेहेजीवन्नेवमुक्तोभवतीत्यर्थः वि द्यांविनापिहेत्वन्तरतोमुक्तिमाशंक्याह नेतिभयहेतुमविद्यान्निराकुर्वन्तज्जंभयम पिनिरस्यतिविद्वान्इतिअत्रवाक्यान्तरमाह विद्वानितिअविद्याविषयेवाक्यान्तरमाह अविदुषइति प्रतीच्येकरसेस्वल्पमपिभेदंमन्यमानस्यभेदहठानन्तरमेवसंसारध्रौव्य

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ष्टंतथाचदेहादिष्वनात्मस्वात्मबुद्धिरविद्वान्रागद्वेषादियुक्तोधर्म्माधर्मानुष्ठानकृत्जा
यतेम्रियतेचेत्यवगम्यते वेदादिव्यतिरिक्तात्मदर्शिनोरागद्वेषादिप्रहाणपेक्षयाधर्म्माध
र्म्मप्रवृत्युपशमान्मुच्यन्तइतिनकेनचित्प्रत्याख्यातुंशक्यं न्यायतस्तत्रैवंसतिक्षेत्रज्ञे
श्वरस्यैवसतोऽविद्याकृतोपाधिभेदतः संसारित्वमिवभवति यथादेहाद्यात्मत्वमात्म
नःसर्व्वजन्तूनांहिप्रसिद्धोदेहादिष्वनात्मस्वात्मभावोनिश्चितोऽविद्याकृतोयथास्थाणौपु
रुषनिश्चयोनचैतावतापुरुषधर्मःस्थाणौभवतिस्थाणुधर्म्मोवापुरुषस्य तथानचैतन्यंधर्म
देहस्यदेहधर्मोवाचैतन्यस्यएवंसुखदुःखमोहात्मकत्वादिरात्मनोयुक्तोविद्याकृतत्वा
विशेषाज्जरास्त्यवन्नात्मतुल्यत्वादितिचेत्स्थाणुपुरुषौक्षेत्रेयावेवसन्तौक्षात्वाऽन्योन्यस्मि
न्नध्यस्तावविद्यायादेहात्मनोस्तुक्षेत्रक्षात्रोरेवेतराध्यासइतिनसमोदृष्टान्तोतोदेहधर्मा
क्षेत्रेयोपिक्षातुरात्मनोभवतीति चेन्नात्मचैतन्यादिप्रसङ्गाद्यदिहिक्षेत्रस्यदेहादेःक्षेत्र
स्यधर्माःसुखदुःखमोहैच्छादयोपिकेनचक्षातुरात्मनोभवन्ति अविद्याध्यारोपिताज

आनन्दगिरिकृतटीका

मित्यर्थः तत्रैवश्रुत्यन्तरमाह अविद्यायामिति तन्मध्येतत्परवशतयास्थितास्तुतमजा
नन्तोदेहाद्यभिमानवन्तोमूढाःसंसरन्तीत्यर्थः विद्याविषयेश्रुत्यन्तरमाह ब्रह्मेति
अविद्याविषयेश्रुत्यन्तरमाह अन्योसाविति भेददृष्टिमनूद्यतंनिदानमविद्येत्याह नेति
सचमनुष्याणांपशुवद्देवादीनांप्रेष्यतांप्राप्नोतीत्याहयथेतिविद्याविषयेवाक्यान्तरमाह
आत्मविदिति इदंसर्वंप्रत्यग्भूतंतूर्णंब्रह्मेत्यर्थःज्ञानादेवतुकैवल्यमित्यत्रश्रुत्यन्तरमाह
यदेतिनखल्वाकाशंचर्मवन्मानवोवेष्टयितुमीष्टेतथायमात्मानंप्रत्यक्षो नानुभूयनमुच्यते
इत्यर्थःआदिशब्देनानुक्ताविद्याविद्याफलभेदार्थाः श्रुतयोगृह्यन्ते तासामभूयस्त्वेन
प्रामाण्यंसूचयति सहस्रशइति विद्याविद्याविषयेस्मृतिरुदाहरति स्मृतयश्चेति तत्रा
विद्याविषयंवाक्यमाह अज्ञानेनेतिविद्याविषयंवाक्यद्वयंदर्शयतिइहेत्यादिना विद्या
फलमनर्थध्वस्तिरविद्याफलमनर्थाप्तिरित्येतदन्वयव्यतिरेकाख्यन्यायादपिसिध्यतीत्या
ह न्यायतश्चेति तत्रैवपुराणसंमतिमाह सर्पानिति उदपानंकूपंयथात्मज्ञानेविशिष्टं
फलंस्यात्तथापश्येतियोजना न्यायतश्चेत्यन्वयव्यतिरेकाख्यंन्यायमुक्तंविवृणोति तथाचे
ति तत्रादावन्वयमाचष्टे देहादिष्विति अनाद्यनिर्व्वाच्याविद्याहृतश्चिदात्मादेहादा
वनात्मन्यात्मबुद्धिमादधाति तदुक्तोरागादिनाप्रेर्य्यतेतत्प्रयुक्तश्चकर्मानुतिष्ठति तत्क
र्त्तृचयथाकर्मनूतनंदेहमादत्ते पुरातनंत्यजतीत्येवमविद्यावत्वेसंसारित्वंसिद्धमित्यर्थः

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

रामरणादयस्तुनभवन्तीतिविशेषहेतुर्वक्तव्योनभवन्तीत्यस्त्यनुमानमविद्याध्यारोपित त्वाज्जरादिवदितिहेयत्वादुपादेयत्वाच्चेत्यादितत्रैवंसतिकर्त्तृत्वभोक्तृत्वलक्षणःसंसा रोज्ञेयस्योज्ञातर्य्यविद्ययाध्यारोपितइतिनतेनज्ञातुःकिञ्चित्दूष्यतियथावालैरध्यारो पितेनाकाशस्यतलमलवत्त्वादिनाएवञ्चसतिसर्वक्षेत्रेष्वपिसतोभगवतः क्षेत्रज्ञस्ये श्वरस्यसंसारित्वंगन्धमात्रमपिनशंक्यं नहिक्वचिदपिलोकेऽविद्याध्यस्तेनधर्मेणकस्य चिदुपकारोऽपकारोवादृष्टोयत्तूक्तं नसमोदृष्टान्तइतितदसत् कथमविद्याध्यासमात्रं हिदृष्टान्तदार्ष्टान्तिकयोःसाधर्म्यंविवक्षितंतन्नव्यभिचरति यत्तुज्ञातरिव्यभिचरती तिमन्यसेतस्याप्यनैकान्तिकत्वंदर्शितं जरादिभिरविद्यावत्त्वात् क्षेत्रज्ञस्यसंसारित्व मितिचेन्न अविद्यायास्तामसत्वात्तामसोहि प्रत्ययआवरणात्मकत्वादविद्याविपरी तग्राहकः संशयोपस्थापकोवाअग्रहणात्मकोवाविवेकप्रकाशभावेतदभात्तामसेचाव रणात्मकेतिमिरादिदोषेसतिअग्रणादेरविद्यात्रयस्योपलब्धेःअत्राहैवंतर्हिज्ञातृध

आनन्दगिरिकृतटीका

व्यतिरेकमिदानींदर्शयति देहादीति श्रुतियुक्तिभ्यांभेदेज्ञातेरागादिध्वस्त्याकर्मोप रमादशेषसंसारासिद्धिरित्यविद्याराहित्येबन्धध्वस्तिरित्यर्थः उक्तान्वयादेरन्यथा सिद्धिंशिथिलयतिइतिनेतिउक्तमन्वयादिवादिनाकेनचिदपिन्यायतोनशक्यंप्रत्याख्या तुंतदन्यथासिद्धिसाधकाभावादिर्थःअन्वयादेरनन्यथासिद्धत्वेचोद्यमपिप्राचीनं प्रति नीतमित्याह तत्रेति ज्ञानाज्ञानयोरुक्तन्यायेनस्वरूपभेदेकार्य्यभेदेचस्वारस्येनपराप रयोरैक्येपिबुद्ध्याद्युपाधिभेदादाविद्यकमात्मनः संसारित्वंआभासरूपंप्रातिभासिकं सिद्ध्यतीत्यर्थःआत्मनोब्रह्मतास्वतश्चेदहमित्यात्मभावेनब्रह्मतापिभावादित्याशंक्याह यथेति देहाद्यतिरिक्तस्यात्मनोवैदिकपक्षेस्वतस्तेपितस्मिन्नहमितिभात्येव तदतिरि क्तत्वंनभातिकिंत्वविद्यातोदेहाद्यात्मत्वमेवविपरीतंभासते तथात्मनोब्रह्मत्वेस्वाभावि केपितस्मिन्ब्रह्मत्वंनभात्यविद्यातोऽब्रह्मत्वमेवतस्यभातीत्यर्थः आत्मनोदेहाद्यात्मत्वमा विद्यकंभातीत्युक्तंअनुभवेनस्पष्टयति सर्वेति अतस्मिंस्तद्बुद्धिरविद्याकृतेत्यत्रदृष्टान्तमा हयथेतिपुरस्थितेवस्तुनिवस्तुतःस्थाणावविद्ययापुमानितिनिश्चयोजायतेतथादेहादाव नात्मन्यात्मधीरविद्यातोनिश्चितेत्यर्थः देहात्मनोरैक्यज्ञानेदेहधर्मस्यजरादेरात्मन्यात्म धर्मस्यचचैतन्यस्यदेहेपिनियमःस्यादित्याशंक्याहन चेति स्थाणौपुरुषत्वंभ्रान्त्याभाती

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

मोऽविद्या नकरणे चक्षुषितैमिरकत्वादिदोषोपलब्धेर्यक्तुमन्यसेज्ञाटधर्मोविद्यातद्वचाविद्याधर्मवत्त्वं क्षेत्रज्ञस्यतुसंसारित्वं तत्रयदुक्तमीश्वरएव क्षेत्रज्ञोनसंसारीत्येतदयुक्तमिति तन्न यथाकरणेचक्षुषिविपरीतग्राहकादिदोषस्यदर्शनान्नविपरीतादिग्रहणंतन्निमित्तम्वातैमिरकत्वादिदोषोग्रहीतुश्चक्षुषःसंस्कारेणतिमिरेऽपनीते ग्रहीतुरदर्शनान्नग्रहीतुर्ज्ञेयायथातथा सर्व्वत्रैवाग्रहणविपरीतसंशयप्रत्ययास्तन्निमित्ताःकरणस्येवकस्यचित्भवितुमर्हतिनज्ञातुः क्षेत्रज्ञस्यसंवेद्यत्वाच्चतेषांप्रदीपप्रकाशवन्नज्ञाटधर्मत्वंसंवेद्यत्वादेवस्वात्मव्यतिरिक्तसंवेद्यत्वंसर्व्वकरणावियोगेचकैवल्ये सर्व्ववादिभिरविद्यादिदोषवत्त्वानभ्युपगमादात्मनोयदिक्षेत्रज्ञस्याग्न्युष्णवत् स्वोधर्मस्तेनकदाचिदपितेनवियोगःस्यादविक्रियस्यचव्योमवत्सर्व्वगतस्यामर्त्तस्यात्मनःकेनचित्संयोगवियोगानुपपत्तेःसिद्धं क्षेत्रज्ञस्य नित्यमेवेश्वरत्वमनादित्वान्निर्गुणत्वादित्यादीश्वरवचनाच्च नन्वेवंसति संसारसंसारित्वाभावेशास्त्रानर्थक्यादिदोषःस्यादिति नसर्व्वैरभ्युपगतत्वात्सर्व्वैर्ह्यात्मवादिभिरभ्युपगतोदोषोनैकेनपरिहर्त्तव्योभवति

आनन्दगिरिकृतटीका।

त्येतावतापुरुषधर्मःशिरःपाण्यादिर्नस्थाणोर्भवतितद्धर्मोवा कटज्वादिर्नपुंसोदृश्यतेमिथ्याध्यस्ततादात्म्यग्राह्यतोधर्माव्यतिकरादितिदृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह तथेति जरादेरनात्मधर्मत्वेपिसुखादेरात्मधर्मत्वमितिकेचित्तान्प्रत्याह सुखेति कामसङ्कल्पादिश्रुतेरनात्मधर्मत्वज्ञानादित्यर्थः किञ्च विमतोनात्मधर्मोऽविद्याकृतत्वाज्जरादिवन्न चहेत्वसिद्धिरतस्मिंस्तद्बुद्धिविषयत्वेन स्थाणौपुरुषत्ववदविद्याकृतत्वस्योक्तत्वादितिमत्वाह अविद्येति स्थाणौपुरुषत्ववदाविद्यत्वंदेहादेरयुक्तंदृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादिति शङ्कते नेति तदेवप्रपञ्चयति स्थाण्वित्यादिना ज्ञेयस्यज्ञेयान्तरेऽध्यासादत्रचोभयोर्ज्ञेयत्वव्यापकव्याप्त्याव्याप्याध्यासस्यापि व्याप्तिरित्यर्थः देहात्मबुद्धेर्भ्रमत्वाभावेफलितमाह अतदिति उपाधिधर्माणांसुखादीनांउपहितेजीवेवस्तुत्वमयुक्तमतिप्रसङ्गादितिपरिहरति नेत्यादिना अतिप्रसङ्गमेवप्रकटयति यदीति सुखादिनामात्मधर्मत्वंचेदुपाधिधर्मत्वादचैतन्यंजरादिकञ्चात्मनोदुर्वारंस्यादित्यर्थः सुखादिरात्मधर्मोनेतिपक्षेपिनास्तिविशेषहेतुरित्याशंक्याह हेयेति तदेवानुमानंस्मारयति अविद्येति विमतंनात्मधर्मःआगमापायित्वात्प्रसक्तवदित्यनुमानान्तरमाह हेयत्वादिति आदिशब्दाद्दृश्यत्वजडत्वादिगृह्यते सुखा

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

कथमभ्युपगतइति मुक्तात्मनःसंसारसंसारित्वव्यवहाराभावःसर्वैरेवात्मवादिभिरिष्यतेनच तेषांशास्त्रानर्थक्यादिदोषप्राप्तिरभ्युपगता तथानःक्षेत्रज्ञानामीश्वरैकत्वेसतिशास्त्रानर्थक्यंभवतु अविद्याविषयेचार्थवत्त्वं यथाद्वैतिनांसर्वेषांबन्धावस्थायामेवशास्त्राद्यर्थवत्त्वंनमुक्तावस्थायामेवंअद्वैतवादिनामपिननुआत्मनोबन्धमुक्तावस्थेपरमार्थतएववस्तुभूतेद्वैतिनांनःसर्वेषामतोहेयोपादेयतत्साधनसद्भावेशास्त्राद्यर्थवत्त्वंस्यादद्वैतिनांपुनर्द्वैतस्यापरमार्थत्वादविद्याकृतत्वात्बन्धावस्थायाश्चआत्मनोपरमार्थत्वेनिर्विषयत्वात्शास्त्राद्यानर्थक्यमितिचेन्नात्मनोवस्थाभेदानुपपत्तेः यदितावदात्मनोबन्धमुक्तावस्थौयुगपत्स्यातांक्रमेणवायुगपत्तावद्विरोधान्नसम्भवतः स्थितिगतीइवैकस्मिन् क्रमभावित्वेचनिर्निमित्तत्वेनिर्मोक्षप्रसङ्गोऽन्यनिमित्तत्वेचस्वतोभावादपरमार्थत्वप्रसङ्गस्तथाचसत्यभ्युपगमहानिः किञ्चबन्धमुक्तावस्थयोःपौर्वापर्य्यनिरूपणायांबन्धावस्थापूर्वंप्रकल्प्यअनादिमत्यन्तवतीचतच्चप्रमाणविरुद्धं तथामोक्षावस्थासादिमत्यनन्तवतीचतावत्प्रमाणविरुद्धैवाभ्युपगम्यते नचावस्थावतोवस्थान्तरंगच्छतोनित्यत्वमुपपादयितुंशक्यमथानित्यत्वदोषपरिहारायबन्धमुक्तावस्थाभेदोनकल्प

आनन्दगिरिकृतटीका

दीनांजरादिवदात्मधर्मत्वाभावेतस्यवस्तुतोऽसंसारित्वेफलितमाह तत्रेति आरोपितेनाधिष्ठानस्यवस्तुतोऽस्पर्शेदृष्टान्तमाह यथेति परामिन्नस्यात्मनःसंसारित्वमध्यस्तमितिस्थितेयत्परस्यसंसारित्वापादनंतदयुक्तमित्याह एवञ्चेति आत्मनिसंसारस्यारोपितत्वात्तदभिन्नेपरस्मिन्नाशङ्क्यैवतस्यायुक्तेत्येतदुपपादयति नहीति स्थाणौपुरुषनिश्चयवदात्मनोदेहाद्यात्मत्वनिश्चयस्याध्यस्ततेत्ययुक्तं दृष्टान्तस्यज्ञेयमात्रविषयत्वादितरस्यज्ञेयज्ञातृविषयत्वादित्युक्तमनुवदति यत्त्विति वैषम्यंदूषयति तदसदिति तर्हिकेनसममितिपृच्छति कथमिति असदृष्टसाधर्म्यंदर्शयति अविद्येति तस्योभयत्रानुगतिमाह तन्नेति ज्ञेयान्तरेज्ञेयस्यारोपनियमात्ज्ञातरिनारोपःस्यादित्याशंक्याह यत्त्विति नायंनियमोज्ञातरिजराद्यारोपस्योक्तत्वादित्याह तस्यापीति ज्ञेयस्यैवज्ञेयान्तरेऽध्यासनियमस्येतियावत् अतोज्ञातरिनारोपव्यभिचारशङ्केत्यर्थः आत्मन्यविद्याध्यासेतत्राविद्यायाःस्वाभाविकत्वात्तदधीनत्वंसंसारित्वमपितथास्यादितिशङ्कते अविद्यावत्त्वादिति काविद्याविपरीतग्रहादिर्वाअनाद्यनिर्वाच्याज्ञानंवानाद्योविपरीतग्रहादेस्तमःशब्दितानिर्वाच्याज्ञानकार्यत्वात्तन्निष्ठस्यात्मधर्मत्वायो

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

तेऽतोद्वैतिनामपिशास्त्रानर्थक्यदोषोपरिहार्य्यएवेति समानत्वान्नाद्वैतवादिना परिहर्त्तव्योदोषःनचशास्त्रानर्थक्यंयथाप्रसिद्धाविद्वत्पुरुषविषयत्वात् शास्त्रस्यअविदुषांहि फलहेत्वोरनात्मरात्मनोदर्शनंनविदुषांविदुषांहिफलहेतुभ्यामात्मनोन्यत्वदर्शनेसति तयोरहमित्यात्मदर्शनानुपपत्तेःनह्यत्यन्तमूढउन्मत्तादिरपिजलाग्नयोःछायाप्रकाशयोर्वैकात्म्यंपश्यन्ति किमुतविवेकीतस्मान्नविधिप्रतिषेधशास्त्रवत् फलहेतुभ्यामात्मनोऽन्यत्वदर्शिनोभवति नहिदेवदत्तस्यमिदंकुर्व्विति कस्मिंश्चित् कर्म्मणिनियुक्तोविष्णुमित्रे.हंनियुक्तइति तत्रस्योनियोगंशृण्वन्नपिप्रतिपद्यतेनियोगविषयविवेकाग्रहणात्तूपपद्यते प्रतिपत्तिस्तयाफलहेत्वोरपि ननुप्राक्तसम्बन्धापेक्षयायुक्तैवा प्रतिपत्तिःशास्त्रार्थविषयफलहेतुभ्यामन्यात्मत्वदर्शनेपिसतिइष्टफलहेतोःप्रवर्त्तितोस्म्यनिष्टफलहेतोश्चनिवर्त्तितेस्मीति यथापितृपुत्रादीनामितरेतरात्मान्यत्वदर्शने

आनन्दगिरिकृतटीका

गादित्याह नेत्यादिना तदेवप्रपञ्चयति तामसोहीति आवरणात्मकत्वंवस्तुनिसव्यक्प्रकाशप्रतिबन्धकत्वंविपरीतग्रहणादेरविद्याकार्यत्वंविद्यायोहत्वेनसाधयति विवेकेति नचकारणाविद्यानाद्यनिर्व्वाच्यात्मधर्मःस्यादितियुक्तमनिर्वाच्यत्वादेवतस्यास्तद्धर्मत्वस्यदुर्वचत्वादितिभावः किञ्चविपरीतग्रहादेरन्वयव्यतिरेकाभ्यांदोषजन्यत्वावगमादपिनात्मधर्मतेत्याह तामसेवेति तमःशब्दिताज्ञानोत्थेवस्तुप्रकाशप्रतिबन्धकस्तिमिरकाद्यादिदोषस्तस्मिन्सत्यज्ञानंमिथ्याधीः संशयश्चेतिव्ययस्योपलम्भादसति तस्मिन्नप्रतीतेरन्वयव्यतिरेकाभ्यां विपरीतज्ञानादेर्दोषाधीनत्वाधिगमान्नकेवलात्मधर्मतेत्यर्थः दोषस्यनिमित्तत्वात्भावकार्यस्योपादाननियमादनिर्व्वाच्याविद्यायाश्चासम्मतेरात्मैवविपर्ययादेरुपादानमितिचोदयति अत्राहेति विपरीतग्रहादेर्दोषोत्थत्वंसम्यग्व्यर्थः अग्रहादित्रितयमविपर्ययादेः सत्योपादानत्वेसत्यत्वप्रसङ्गान्नात्मातदुपादानंकिन्तुदोषश्चक्षुरादिधर्म्मकत्वग्रहणादिरपिदोषत्वात् करणधर्म्मत्वंकरणमविद्योत्थमन्तःकरणं नचतद्धेतुरविद्यासिद्धेतिवाच्यमज्ञोहमित्यनुभवात् स्वापेचपरामर्शात्तदवगमात् कार्यलिङ्गकानुमानादागमाच्चतंप्रसिद्धेरिति परिहरति नेत्यादिना संग्रहीतुञ्चोद्यपरिहारयोश्चोद्यंविवृणोति यत्त्विति अविद्यावत्वेपिज्ञातुरसंसारित्वादुद्वातदंष्ट्रोरगवदविद्याकिंकरिष्यतीत्याशंक्याह तदेवेति मिथ्याज्ञानादित्वमेवात्मनःसंसारित्वमिति स्थितेफलितमाह तत्रेति नकरणैवच

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

सत्यप्यन्योन्यनियोगप्रतिषेधार्थप्रतिपत्तिर्नव्यतिरिक्तात्मदर्शनप्रतिपत्तेः प्रागेवफल हेतोरात्माभिमानस्यसिद्धत्वात् प्रतिपन्ननियोगप्रतिषेधार्थोहिफलहेतुभ्यामात्मनो न्यत्वंप्रतिपद्यतेनपूर्व्वंतस्माद्विधिप्रतिषेधशास्त्रमविद्वद्विषयमितिसिद्धं ननुस्वर्गकामो यजेतकलञ्जन्नभक्षयेदित्यादावात्मव्यतिरेकदर्शिनामप्रवृत्तौकेवलदेहाद्यात्मदृष्टी नाञ्चातःकर्त्तुरभावाच्छास्त्रानर्थक्यमितिचेन्न यथाप्रसिद्धितएवप्रवृत्तिनिवृत्त्युपप त्तेः ईश्वरक्षेत्रज्ञैकत्वदर्शीब्रह्मवित्तावन्नप्रवर्त्तते तथानैरात्म्यवाद्यपिनास्तिपर लोकइतिनप्रवर्त्तते यथाप्रसिद्धस्तुविधिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्यानुमिता त्मास्तित्वआत्मविशेषानभिज्ञः कर्मफलसञ्जाततृष्णःश्रद्दधानतयाचप्रवर्त्तइति स र्व्वेषांनःप्रत्यक्षमतोनशास्त्रानर्थक्यं विवेकिनामप्रवृत्तिदर्शनात्तदनुगामिनामप्रवृत्तौ

आनन्दगिरिकृतटीका।

क्षुषीत्यादिनोक्तमेवपरिहारंप्रपञ्चयति तन्नेत्यादिना तिमिरादिदोषस्तत्कृतोवि परीतग्रहादिश्चनग्रहीतुरात्मनोस्तीत्यत्रहेतुमाह चक्षुषइति तद्गतेनाञ्चनादि संस्कारेणतिमिरादौपराकृतेदेवदत्तस्य ग्रहीतुदोषाद्यनुवलम्भान्नतस्यतद्धर्मत्वमतो विमतंतत्त्वतोनात्मधर्म्मोदोषत्वात्तत्कार्यत्वाद्वासम्मतवदित्यर्थः किञ्च विपरीतग्रहा दिस्तत्त्वतोनात्मधर्मोवेदत्वात् सम्प्रतिपन्नवदित्याह सम्वेदत्वाच्चेति किञ्चयद्वेद्यंत त्स्वातिरिक्तवेद्यंयथादीपादिइति व्याप्तेर्व्विपरीतग्रहादीनामपिवेद्यत्वादतिरिक्त वेद्यत्वेसम्वेदितानसंवेद्यधर्मवान्वेदितृत्वाद्ययथादेवदत्तोनस्वसंवेद्यरूपादिमानित्य नुमानान्तरमाह संवेद्यत्वादेवेति किञ्च विपरीतग्रहादयस्तत्त्वतोनात्मधर्माव्यभि चारित्वात्कृशत्वादिवदित्याह सर्व्वेति उक्तमेवविवृण्वन्नात्मनोविपरीतग्रहादिस्वा भाविकोवागन्तुकोवेति विकल्प्याद्यंदूषयति आत्मनइति अतोनिर्मोक्षोऽविद्या तज्जद्धस्तेरसद्भावादिति भावः आगन्तुकोपिस्वतश्चेदमुक्तिःपरतश्चेत्तत्राह अवि क्रियस्येति विभुत्वादविक्रियत्वादमूर्त्त्यत्वाच्चात्मव्योमवन्नकेनचित्संयोगविभागाव नुभवति नहिविक्रियाभावेव्योम्निवस्तुतःसंयोगविभागावसङ्गत्वाच्चात्मनस्तदसंयोगा न्नपरतोपिएतस्मिन्विपरीतग्रहादित्यर्थः तस्यात्मधर्मत्वाभावेफलितमाह सिद्धमि ति आत्मनोनिर्द्धर्मकत्वेभगवदनुमतिमाह अनादित्वादिति ईश्वरत्वेसत्यात्मनोऽ संसारित्वेविधिशास्त्रस्याध्यक्षादेश्चानर्थक्यात्तात्विकमेवतस्यसंसारित्वमिति शङ्कते नन्विति विद्यावस्थायामविद्यावस्थायाम्वाशास्त्रा नर्थक्यमिति विकल्प्याद्यंप्रत्याह

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

शास्त्रानर्थक्यमिति चेन्नकस्यचिदेवविवेकोपपत्तेरनेकेषुहिप्राणीषुकस्यचिदेवविवेकी स्याद्यथैवेदानीन्नचेत्विवेकिनमनुवर्त्तन्तेमूढारागादिदोषतन्त्वत्वात् प्रवृत्तेरभिचरणादौचप्रवृत्तिदर्शनात्स्वाभाव्याच्चप्रवृत्तेःस्वभावस्तु प्रवर्त्ततइति उक्तंतस्मादविद्यामात्रंसंसारोयथादृष्टविषयएव नत्वेवन्नस्य केवलस्याविद्यातत्कार्य्यञ्च नचेन्मिथ्यान्नानंपरमार्थवस्तुदूषयितुंसमर्थं नह्यूषरदेशंस्नेहेनपङ्कीकर्त्तुंशक्नोति मरीच्युदकन्तथाविद्याच्चैवन्नस्यनकिञ्चित्कर्त्तुंशक्नोत्यतश्चैदमुक्तं चैवन्नञ्चापिमांविद्धिअन्ना

आनन्दगिरिकृतटीका

नसर्व्वैरिति विदुषोमुक्तस्यसंसारतदाधारत्वयोरभावस्यसर्व्वादिसम्मतत्वात्तच्छास्त्रानर्थक्यादिचोद्यंमयैवनप्रतिविधेयमित्यर्थः संग्रहवाक्यंविवृणोति सर्व्वैरिति अभिप्रायज्ञानात्प्रश्नेस्वाभिप्रायामाह कथमित्यादिना तर्हिमुक्तान्प्रतिविधिशास्त्रस्याध्यक्षादेश्चानर्थक्यमित्याशंक्याह नचेति नहिव्यवहारातीतेषुतेषुगुणदोषाशङ्क्येत्यर्थः द्वैतिनांमतेमुक्तात्मस्विवास्मत्पक्षेपित्वैवन्नस्येश्वरत्वेतंप्रतिचशास्त्रादेरानर्थक्यंविद्यावस्थायामाश्रितमितिफलितमाह तथेतिद्वितीयंदूषयति अविद्येति तदेवदृष्टान्तेनविवृणोति यथेति एवमद्वैतिनामपिविद्योदयात्प्रागर्थवत्वंशास्त्रादेरितिशेषः द्वैतिभिरद्वैतिनान्नशास्त्यमिति शङ्कते नन्विति अवस्थयोर्वस्तुत्वेतन्मतेशास्त्रादेरर्थवत्त्वेफलितमाह अतइति सिद्धान्तेतुनावस्थयोर्वस्तुतेतिवैषम्यमाह अद्वैतिनामिति व्यावहारिकंद्वैतंतत्तन्मतेपिस्वीकृतमित्याशङ्क्याह अविद्येति कल्पितद्वैतेनव्यवहारान्नतस्यवस्तुतेत्यर्थः वन्ध्यावस्थायाःवस्तुत्वभावेदोषान्तरमाह वन्ध्येति आत्मनोवस्तुत्वेतावस्थाभेदोद्वैतिनामपिनास्तीतिपरिहरति नेति अनुपपत्तिंदर्शयितुंविकल्पयति यदीति तत्राद्यंदूषयति युगपदिति द्वितीयेपिक्रमभाविन्योरवस्थयोर्निर्निमित्तत्वंसनिमित्तत्वंवेतिविकल्प्याद्येसदाप्रसङ्गाद्बन्धमोक्षयोरव्यवस्थादित्याह क्रमेति कल्पान्तरन्निरस्यति अन्येति बन्धमोक्षावस्थेनपरमार्थेअस्वाभाविकत्वात्स्फटिकलौहित्यवदितिस्थिते फलितमाह तथाचेति अवस्थयोर्वस्तुतत्त्वोपगमादित्यर्थः इतश्चावस्थयोर्नवस्तुत्वमित्याह किञ्चेति अवस्थयोर्वस्तुत्वमिच्छतातयोर्योगपद्यायोगाद्वाच्यक्रमेवबन्धस्यपूर्व्वत्वं मुक्तेश्चपाश्चात्यमितिस्थिते बन्धस्यादिमत्त्वंदोषमाह वन्धेति तस्याश्चाकृताभ्यागमकृतविनाशनिष्टत्तयेऽनादित्वमेष्टव्यमन्तवत्त्वञ्च मुक्तमर्थमाश्रेयं तच्चयदनादिभावरूपंतन्नित्यं यथात्मेति व्याप्तिविरुद्धमित्यर्थः मोक्ष

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

नेनावृतंज्ञानमितिच अथकिमिदंसंसारिणामिवाहमेवंममैवेदमिति पण्डितानाम पिशृण्विदंतत्पाण्डित्यंयत्क्षेत्रएवात्मदर्शनंयदिपुनः क्षेत्रज्ञमविक्रियंपश्येयुस्त तोनभोगंकर्म्मवाकांक्षेयुर्ममस्यादितिविक्रियैवभोगकर्म्मणी अथैवंसतिफलार्थित्वा दविद्वान्प्रवर्त्ततेविदुषःपुनरविक्रियात्मदर्शिनः फलार्थित्वाभावात्प्रवृत्त्यनुपपत्तौ कार्य्यकारणसंघातव्यापारोपरमेनिवृत्तिरुपचर्य्यते इदञ्चान्यत् पाण्डित्यंकस्यचि दस्तु क्षेत्रज्ञईश्वरएवक्षेत्रञ्चान्यत् क्षेत्रज्ञस्यविषयःअहन्तुसंसारीसुखीदुःखीमू

आनन्दगिरिकृतटीका

स्यपाश्चात्यकृतंदोषमाह तथेति साहिज्ञानादिसाध्यत्वादादिसाध्यत्वादादिमतीपुन रावृत्त्यनङ्गीकारादनन्ताच तच्चयत्सादिभावंरूपंतदन्तवद्यथापटादीतिव्याप्त्यन्तर विरुद्धमित्यर्थः किञ्चक्रमभावनीभ्यामवस्थाभ्यामात्मासम्बध्यते नवाप्रथमेपूर्व्वावस्थ यासहैवोत्तरावस्थांगच्छतिचेदुत्तरावस्थामपिपूर्व्वावस्थावस्थानादनिर्मोक्षः यदिपू र्व्वावस्थांत्यक्त्वोत्तरावस्थांगच्छति तदापूर्व्वत्यागोत्तराप्त्योरात्मनः सातिशयत्वान्नि त्यत्वानुपपत्तिरित्याह नचेति आत्मनोवस्थाद्वयसम्बन्धोनास्तीतिद्वितीयमनूद्यदूषय ति अथेत्यादिना तर्हिपक्षद्वयेपिदोषावशेषान्नाद्वैतमतानुरागेहेतुरित्याशंक्याबि द्याविषयेचेत्युक्तंविवृणोति नचेति तदेवस्फुटयति अविदुषांहीति फलंभोक्तृत्वंकर्त्तृ त्वेहेतुःयद्वाफलंदेहविशेषोहेतुरदृष्टं तयोरनात्मनोभोक्ताहंकर्त्ताहंमनुष्योहमित्या दावात्मदर्शनमधिकारकं तेनाविद्वद्विषयंविधिनिषेधशास्त्रमित्यर्थः विदुषामपिम नुष्योहमित्यादिव्यवहारात्तद्विषयंशास्त्रंकिंनस्यादित्याशंक्याह नेति भोक्तृत्वकर्त्तृ त्वाभ्यांब्रह्मण्यादिमतोदेहधर्माधर्माभ्याञ्चात्मनोन्यत्वंपश्यतो नविधिनिषेधाधिकारि त्वमुक्तफलादावात्मात्मीयाभिमानासम्भवादित्यर्थः आत्मनोदेहादेरन्यत्वदर्शिनो नदेहादावात्माधीरित्वेतदुपपादयति नहीति विदुषोनविधिनिषेधाधिकारितेत्युक्त मुपसंहरति तस्मादिति शास्त्रस्याविद्वद्विषयत्वमिवविद्वद्विषयत्वमपिमन्तव्यमुभयो रपिशास्त्रश्रवणाविशेषादित्याशंक्याह नहीति तत्रस्थोयस्मिन्देशेदेवदत्तःस्थितस्त त्रैववर्त्तमानःसन्नित्यर्थः ननुदेवदत्तेनियुक्तेविष्णुमित्रोपिकदाचिन्नियुक्तोस्मीति प्र तिपद्यतेसत्यं नियोगविषयानियोज्यादात्मनोविवेकाग्रहणान्नियोज्यत्वभ्रान्तेरित्या ह नियोगेति अविवेकिनोनियोज्यधीर्भवतीतिदृष्टान्तमुक्त्वाफलेहेतौचात्मदृष्टिवि शिष्टस्याविदुषः सम्भवत्येवविधिनिषेधाधिकारित्वमेवंदार्ष्टान्तिकमाह तथेति विधि

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

ढोजातोमृतोवियुक्तःक्षीणेष्टद्वेऽहंममैवेत्येवमादयः सर्वेआत्मन्यध्यारोप्यन्तेसंसारोपरमश्चममकर्त्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेनध्यानेनचेश्वरंक्षेत्रज्ञंसाक्षात्कृत्वातत्स्वरूपावस्थानेनेतियश्चैवंवुध्यतेयश्चबोधयतिनासौक्षेत्रज्ञइत्येवंमन्वानोयः सपण्डितापसदः संसारमोक्षयोःशास्त्रस्यचार्थवत्त्वंकरोमीत्यात्महा स्वयंमूढोऽन्यांश्चव्यामोहयतिशास्त्रार्थसंप्रदायरहितत्वात् श्रुतहानिमश्रुतकल्पनाञ्चकुर्व्वंस्तस्मादसंप्रदायवित्सर्व्वशास्त्रविदपिभूर्खवदेवोपेक्षणीयःतत्तूक्तमस्थिरस्यक्षेत्रज्ञैकत्वेसंसारित्वंप्राप्नोति क्षेत्रज्ञानाञ्चेश्वरैकत्वेसंसारिणोऽभावात्संसाराभावप्रसङ्गइत्येतौदोषौप्रयुक्तौ

आनन्दगिरिकृतटीका

निषेधशास्त्रमविद्वद्विषयमिति वदताशास्त्रानर्थक्यंसमाहितंप्रतिशास्त्रस्यविद्वद्विषयत्वेणैवार्थवत्वं शक्यसमर्थनमितिशङ्कते नन्विति प्रकृतिरविद्याततोजातोयोदेहादावभिमानात्मास्वन्योविद्योदयात्प्रागनुभूतस्तदपेक्षयाविधिनाप्रवर्त्तितोनिषेधेननिवर्त्तितोस्मीति विधिनिषेधविषयासत्यामपिविद्यायांधीर्युक्तैवेत्यर्थः विदुषोपिपूर्व्वमविद्याकंसम्बन्धमपेक्ष्यविधिनिषेधविषयान्भियमुक्तामेवव्यक्ताकरोतिदृष्टेति नन्वविदुषोमिथ्याभिमानवन्नविदुषःसोनुवर्त्ततेतथाचाविद्यासम्बन्धापेक्षयाविदुषोयथोक्ताधीरिति तत्राह यथेति पितापुत्रौभ्रातेत्यादिनांमिथोन्यत्वदृष्टावप्यन्योन्यनियोगार्थस्यनिषेधार्थस्यचधीर्दृष्टा पितरमधिकृत्यविधौनिषेधेवातस्यतदनुष्ठानाशक्तौपुत्रस्यतद्विषयाधीरिष्टाअथातः सम्प्रतियदाप्रैष्यन्मन्यतेऽथपुत्रमाह त्वंब्रह्मत्वं यज्ञःत्वंलोकइत्यादि सम्प्रतिप्रत्तप्राप्त्युत्थाशेषानुष्ठानस्य पुत्रकार्य्यताप्रतिपादनात् पुत्रञ्चाधिकृत्यविधिनिषेधप्रवृत्तौ तस्यतदशक्तौ पितुस्तथाधीरुपगता तथाभ्रातादिष्वपिद्रष्टव्यंएवंविदुषोहेतुफलाभ्यामन्यत्वदर्शनेपि प्राक्कालीनाविद्याकदेहादिसम्बन्धादविरुद्धाविधिनिषेधार्थाधीरित्यर्थः पुत्रादीनांमिथ्याभिमानान्मिथोनियोगधीर्युक्ता तत्त्वदर्शिनस्तुतदभावान्नदेहादिसम्बन्धाधीनानियोगधीरिति परिहरति नेत्यादिना किञ्चसर्व्वापेक्षायज्ञादिश्रुतेरश्ववदिति सर्व्वापेक्षाधिकरणेसम्यग्ज्ञानस्यदृष्टसाध्यत्वोक्तेर्व्विधिनिषेधार्थानुष्ठानंसम्यग्ज्ञानात् पूर्व्वमिति कुतोविदुषस्तदनुष्ठानमित्याह प्रतिपन्नेति सत्यदृष्टेःसम्यग्धीदृष्टेरसति चाशुद्धबुद्धेस्तदभावादन्वयव्यतिरेकाभ्यांविविदिषावाक्याच्चविधिनिषेधानुष्ठानात्पूर्व्वंनसम्यग्धीरित्याह नपूर्व्वमिति विधिनिषेधयोर्व्विद्वद्विषयत्वायोगेफलितमाह तस्मादिति शास्त्रस्याविद्वद्विषयत्वेनोक्तम

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

विद्याविद्ययोर्वैलक्षण्याभ्युपगमादिति कथमविद्यापरिकल्पितदोषेणतद्विषयंवस्तुपारमार्थिकंनदुष्यतीति तथाचदृष्टान्तोदर्शितमरीच्यम्भसोषरदेशोनपङ्कीक्रियतइति संसारिणोभावात् संसाराभावप्रसङ्गदोषोपि संसारसंसारिणोरविद्याकल्पितत्वोपपत्तेराप्रत्युक्तोनन्वविद्यात्वमेव ज्ञेवस्यसंसारित्वदोषमुक्त्वत्कृतञ्चदुःखित्वादिप्रत्यक्षमुपलभ्यते नज्ञेयस्यज्ञेवधर्मत्वात्ज्ञातुःज्ञेवस्यतत्कृतदोषानुपपत्तेः यावत्किञ्चित् ज्ञेवस्यदोषजातमविद्यमानमासञ्जयति तस्यज्ञेयत्वोपपत्तेःज्ञेवधर्मत्वमेवनज्ञेवधर्मत्वंनचतेनज्ञेनदुष्यतिज्ञेयेनतुज्ञातुःसंसर्गानुपपत्तेःयदिहि

आनन्दगिरिकृतटीका।

र्थवत्वमाक्षेपसमाधिभ्यांप्रपञ्चयितुमाक्षिपति नन्विति चकारादूर्ध्वमप्रवृत्तिरिति सम्बध्यते आत्मनोदेहाद्यतिरेकंपश्यतांदेहाद्यभिमानरूपाधिकारहेत्वभावाद्विधितो यागादावप्रवृत्तिर्निषेधाच्चाभक्ष्यभक्षणादेर्ननिवृत्तिरतस्तेषांप्रवृत्तिनिवृत्त्योरभावेदेहादावात्मत्वमनुभवतामपि नतेयुक्ते तेषांपारलौकिकभोक्तृप्रतिपत्त्यभावादित्यर्थः विदुषामविदुषाञ्चप्रवृत्तिनिवृत्तिप्रभावेफलितमाह अतइति आत्मनोदेहाद्यतिरिक्तंपरोक्षमपरोक्षञ्चदेहाद्यात्मत्वंपश्यतःशास्त्रानुरोधादेवप्रवृत्तिनिवृत्युपपत्तेर्नशास्त्रानर्थक्यमित्युत्तरमाह नेत्यादिना प्रसिद्धिरत्रशास्त्राभिमता एतदेवविवृण्वन्ब्रह्मविदोवानैरात्म्यवादिनोवा परोक्षज्ञानवतोवाप्रवृत्तिनिवृत्तावित्रवक्ष्यतीतिविकल्प्याद्यंदूषयति ईश्वरेति ननिवर्त्ततेचेत्यपिद्रष्टव्यं द्वितीयंनिरस्यति तथेति पूर्वंबद्ध्वापिसम्बन्धः तृतीयमङ्गीकरोति यथेति विधिनिषेधाधीनांप्रसिद्धिमनुरुन्धानःसन्नितियावत् चकारान्निवर्त्तते चेत्यनुकृष्यते ब्रह्मविदंनैरात्म्यवादिनञ्चत्यक्त्वादेहाद्यतिरिक्तमात्मानंपरोक्षमपरोक्षञ्चदेहाद्यात्मत्वंपश्यतोविधिनिषेधाधिकारित्वेसिद्धेफलमाह अतइति विधान्तरेणशास्त्रार्थानर्थक्यञ्चोदयति विवेकिनामिति दृष्टाहितेषांविधिनिषेधयोरप्रवृत्तिर्नहिदेहादिभ्योनिःकृष्टमात्मानंद्रष्टवतांतयोरधिकारस्तेनतान्प्रतिशास्त्रंनार्थवन्नचदेहाद्यात्मत्वदृशस्तत्राधिक्रियन्ते तेषांयद्यदाचरतीतिन्यायेनविवेकिनोनगच्छतांविध्यादावप्रवृत्तेरतोधिकार्य्यभावाद्विध्यादि शास्त्रस्यतदनुसारिशिष्टाचारस्यचानर्थक्यमित्यर्थः किंसर्वेषांविवेकित्वादधिकार्य्यभावादानर्थक्यं शास्त्रस्योच्यते किम्वाकस्यचिद्देवविवेकित्वेपितदनवर्त्तित्वादन्येषामप्रवृत्तेरानर्थक्यंचोद्यते तत्रप्रथमंप्रत्याह नकस्यचिदिति

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

संसर्गःस्यात् ज्ञेयत्वमेवनोपपद्यत यद्यात्मनोधर्म्मोऽविद्यावत्वंदुःखित्वादिचकथम्भोः प्रत्यक्षमुपलभ्यते कथम्वाक्षेत्रज्ञधर्मःज्ञेयञ्चसर्व्वंक्षेत्रंज्ञातैवक्षेत्रज्ञइत्यवधारितेऽविद्यादुःखित्वादेःक्षेत्रज्ञविशेषणत्वंक्षेत्रज्ञधर्मत्वंतस्यचप्रत्यक्षोपलभ्यत्वमितिविरुद्धमुच्यतेऽविद्यामात्रावष्टम्भात्केवलंअत्राह साविद्याकस्येतियस्यदृश्यतेतत्रैवकस्यदृश्यतइत्यत्रोच्यते अविद्याकस्यदृश्यतइतिप्रश्नोनिरर्थकः कथंदृश्यतेचेदविद्यातद्वन्तमपिपश्यसिनचतद्वत्युपलभ्यमानेसाकस्येति प्रश्नोयुक्तोनहिगोमत्युपलभ्य .ानेगावः

आनन्दगिरिकृतटीका

मनुष्याणां सहस्रेष्विति न्यायेनोक्तमेवस्फुटयति अनेकेष्विति तत्रानुभवानुरोधेन दृष्टान्तमाह यथेति द्वितीयंदूषयति नचेति किञ्चविवेकिनामप्रवृत्तिरित्याशङ्कांनिरसितुंसेनादौतदप्रवृत्तावपिइतरप्रवृत्तेरित्याह अभिचरणादौचेति अविवेकिनांरागादिद्वाराप्रवृत्तास्पदंसर्व्वंसंग्रहीतुमादिपदं इतश्चविवेकिनांप्रवृत्त्यभावेपिनाज्ञस्याप्रवृत्तिरित्याह स्वाभाव्याच्चेति प्रवृत्तेःस्वभावाख्याज्ञानकार्यत्वेभगवद्वाक्यमनुकूलयति स्वभावस्त्विति प्रवृत्तेरज्ञानजन्यत्वेविधिनिषेधाधीनप्रवृत्तिनिवृत्त्यात्मकबन्धस्याविद्यामात्रत्वादविद्वद्विषयत्वंशास्त्रस्यसिद्धमिति फलितमाह तस्मादिति दृष्टमेवानुसरन्नविद्वान्यथादृष्टस्तद्विषयस्तदाश्रयःसंसारस्तथाचप्रवृत्तिनिवृत्त्यात्मकसंसारस्याविद्वद्विषयत्वात्तद्धेतुविधिशास्त्रस्यापितद्विषयत्वमित्यर्थः नन्वविद्याक्षेत्रज्ञमाश्रयन्तीस्वकार्य्यंसंसारमपितस्मिन्नाधत्ते ते नास्यैवशास्त्राधिकारित्वंनेत्याह नेति अविद्यादेःशुद्धेक्षेत्रज्ञेवस्तुतोऽसम्बन्धेपितत्तस्मिन्नारोपितंतमेवदुःखीकरोतीत्यत्राह नचेति तदेवदृष्टान्तेनदर्शयति नहीति क्षेत्रज्ञस्यवस्तुतोऽविद्यासम्बन्धेभगवद्वचोपिद्योतकमित्याह अतइति क्षेत्रज्ञेश्वरयोरैक्ये किमित्यसावात्मानमहमितिवध्यमानोपिस्वस्येश्वरत्वमीश्वरोस्मीतिनवध्यतेतत्राह अज्ञानेनेति आत्मनोवस्तुतःसंसारासंस्पर्शेविद्वदनुभवविरोधःस्यादिति चोदयति अथेति एवमित्यभिजात्यादिवैशिष्ट्यमुक्तंइदमाक्षेत्रकलत्रादिपण्डितानामपिप्रतीतंसंसारित्वमितिशेषः किंपाण्डित्यंदेहादावात्मदर्शनं किम्वाकूटस्थात्मदृष्टिराहोसंसारित्वादिधीरितिविकल्प्याद्यंनिराकुर्व्वन्नाह शृण्विति तच्चवस्तुतोसंसारित्वाविरोधिप्रातिभासिकन्तुसंसारित्वमिष्टमितिशेषः द्वितीयंदूषयति यदीति नहिकूटस्थात्मविषयंसंसारित्वंप्रतीयते येनवस्तुतोसंसारित्वंविरुध्यते कूटस्थात्मधीविरुद्धायाःसंसारित्वबुद्धेरनवकाशित्वादित्यर्थः आ

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

कस्येतिप्रश्नो युक्तोऽर्थवान्भवेत् ननुविषमोदृष्टान्तोगवांतद्वतश्चप्रत्यक्षत्वात् सम्बन्धो पिप्रत्यक्षइतिप्रश्नो निरर्थकः नतथाविद्यातद्वांश्चप्रत्यक्षौयतःप्रश्नोनिरर्थकः स्यादप्र त्यक्षेणाविद्यावताविद्यासम्बन्धेज्ञातेकिन्तवस्यादविद्यायाअनर्थ हेतुत्वात् परिहर्त्त व्यास्याद्यस्याविद्यासतां परिहर्त्तव्येति ननुममैवाविद्याजानासितर्ह्यविद्यान्तद्वन्त ञ्चात्मानंजानासिनतुप्रत्यक्षेणानुमानेनचेज्जानासिकथं संम्बन्धग्रहणंनहितवज्ञातु र्ज्ञेयभूतयाविद्ययातत्कालेसम्बन्धंग्रहीतुं शक्यतेअविद्यायाविषयत्वेनैवज्ञातुरुपयुक्त त्वान्नचज्ञातुरविद्यायश्चसम्बन्धस्ययोगृहीता ज्ञानञ्चान्यत्तद्विषयंसम्भवत्यनवस्था

आनन्दगिरिकृतटीका

त्मानमक्रियंपश्यतोपिकुतोभोगकर्मणीनस्यातामित्याशंक्याह विक्रियेति सविक्रिया त्मबुद्धेर्भोगकर्माकाङ्क्षयोरभावेकस्यशास्त्रेप्रवृत्तिरित्याशंक्याह अथेति फलार्थित्वा भावाद्विदुषोनकर्मणिप्रवृत्तिरित्येवंस्थितेसत्यनन्तरमविद्वान्फलार्थित्वात्तदुपायेकर्म णिप्रवर्त्तते शास्त्रेधिकारीत्यर्थः विदुषोवैधप्रवृत्त्यभावेपिनिषेधादीनांनधृत्तेरपिदु र्व्वचत्वात्तस्यनिवृत्तिनिष्ठत्वासिद्धिरित्याशंक्याह विदुषइति तृतीयमुत्थापयति इद ञ्चेति सिद्धान्तादविशेषमाशंक्यक्षेत्रस्यक्षेत्रज्ञात्वस्तुतोभिन्नत्वेन तद्विषयत्वाङ्गीका रान्मैवमित्याह क्षेत्रञ्चेति अहंधीवेत्यस्यात्मनोवस्तुतःसंसारित्वस्वीकाराच्च सिद्धा न्ताद्भेदोस्तीत्याह अहन्त्विति संसारित्वमेवस्फोरयति सुखीति संसारित्वस्यवस्तुत्वे तदनिवृत्त्यापुमर्थासिद्धिरित्याशंक्याह संसारेति कथंतदुपरमस्यहेतुंविनाकर्त्तव्यत्व मित्याशंक्याह क्षेत्रेति क्षेत्रंज्ञात्वाततोनिकृष्टस्य क्षेत्रज्ञस्यज्ञानं कथंसंसारोपरति मुत्पादयेदित्याशंक्याह ध्यानेनेति संसारित्वमात्मनोबुध्यमानस्यतद्रहितादीश्वराद न्यत्वंवक्तव्यमितिवक्तुमितिशब्दः तदैवान्यत्वमुपपादयति यश्चेति ममसंसारिणोऽ संसारीश्वरत्वंकर्त्तव्यमित्येवंयोबुध्यते योवातथाविधंज्ञानं तवकर्त्तव्यमित्युपदिशति सक्षेत्रज्ञादीश्वरादन्योज्ञेयोन्यथोपदेशानर्थक्यादित्यर्थः आत्मासंसारीपरस्मादात्मनो न्यस्तस्यध्यानाधीनाज्ञानेनेश्वरत्वंकर्त्तव्यमित्येतत्ज्ञानंपाण्डित्यमिति मतंदूषयति ए वमिति अयमात्माब्रह्मेत्यात्मनोब्रह्मत्वश्रुतिविरोधादित्यर्थः ननुसंसारस्यवस्तुत्वाङ्गी कारात्तत्प्रतीत्यवस्थायांकर्मकाण्डस्यार्थवत्त्वं संसारित्वनिरासेनात्मनोब्रह्मत्वेध्याना दिनासाधिते मोक्षावस्थायांज्ञानकाण्डस्यार्थवत्त्वं तत्कथंयथोक्तज्ञानवान्पण्डिताप सदत्वेनाक्षिप्यते तत्राह संसारेति करोमीति मन्यमानोयःयसपण्डितापसदइति

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

प्राप्तेर्यदिज्ञतापिज्ञेयसम्बन्धोज्ञायेतान्यज्ञाताकल्पः स्यात्तस्याप्यन्यदृत्यनवस्थापरिहार्या यदिपुनरविद्याज्ञेयान्यद्वाज्ञेयंज्ञेयमेव तथाज्ञातापिज्ञातैवनज्ञेयम्भवति यदाचैवमविद्यादुःखित्वाद्यैर्नज्ञातुःक्षेत्रज्ञस्यकिञ्चित्दुष्यतिनन्वयमेवदोषोयत्दोषवत्तत्क्षेत्रविज्ञातृत्वंनविज्ञानस्वरूपस्यैवाविक्रियस्यविज्ञातृत्वोपचारात्ययोष्णतामावेणाग्नेस्तद्विक्रियोपचारस्तद्वद्यात्मभगवताक्रियाकारकफलात्मत्वाभावआत्मनिस्वतएवदर्शितःअविद्याध्यारोपितैरेवक्रियाकारकाद्यात्मन्युपचर्यते तथातत्तत्वयएनं

आनन्दगिरिकृतटीका

पूर्वेणसम्बन्धः कर्मकाण्डंहिकल्पितं संसारित्वमधिकृत्यसाध्यसाधनसम्बन्धबोधपरार्थवदिष्टंज्ञानकाण्डमपितथाविधंसंसारित्वंपराकृत्याखण्डैकरसेप्रत्यग्ब्रह्मणि पर्यवस्यदर्थवद्भवेदित्यर्थः किञ्चात्मनःशास्त्रसिद्धंब्रह्मत्वंत्यक्त्वा ब्रह्मत्वंकल्पयन्नात्महाभूत्वालोकद्वयबहिर्भूतःस्यादित्याह आत्महेति ननुक्षेत्रज्ञश्चापिमांविद्धीत्यनेनसर्वक्षेत्रान्तर्यामीपरोजीवादन्योनिरूप्यते नजीवस्येश्वरत्वमत्रप्रतिपाद्यते तत्कथमित्थमाक्षिप्यते तत्राह स्वयमिति किञ्चतत्त्वमसीतिवत्प्रसिद्धक्षेत्रज्ञानुवादेनाप्रसिद्धंतस्येश्वरत्वमिहोपदेश्यतःश्रुतं तस्यहानिमश्रुतस्यचजीवेश्वरयोस्तात्त्विकमेक्यकल्पनांकुर्वन्कथंव्यामूढोनस्यादित्याह श्रुतेति ननुकेचन व्याख्यातारोयथोक्तंपाण्डित्यंपुरस्कृत्यक्षेत्रज्ञश्चापीत्यादिश्लोकंव्याख्यातवन्तः तत्कथमुक्तंपाण्डित्यमास्थातुर्व्यामूढत्वंतत्राह तस्मादिति क्षेत्रज्ञश्चापीत्यत्रक्षेत्रज्ञेश्वरयोरैक्यंस्वाभीष्टंस्थापयितुंप्रत्युक्तमेवचोद्यमनुद्रवति यत्तूक्तमिति तात्त्विकमेकत्वमतात्त्विकं संसारित्वमित्यङ्गीकृत्योक्तमेवसमाधिंस्मारयति एताविति ईश्वरस्यसंसारित्वंसंसार्यभावेनसंसाराभावश्चेत्युक्तौदोषौविद्याविद्ययोर्वैलक्षण्येपिकथंप्रत्युक्तावितिपृच्छति कथमिति कल्पितसंसारेण कल्पनाधिष्ठानमद्वयंवस्तुवस्तुतोनसम्बन्धमितिपरिहरति अविद्येति तद्विषयंकल्पनास्यैमधिष्ठानमितियावत्कल्पितेनाधिष्ठानस्यवस्तुतोऽसंस्पर्शेदृष्टान्तंस्मारयति तथाचेति ईश्वरस्यसंसारित्वाप्रसङ्गंप्रकटीकृत्यप्रसङ्गान्तरनिरासमनुसारयति संसारिणइति नतावदविद्यासंसारंसंसारिणञ्चकल्पयन्तीस्वतन्त्रातत्त्वव्याघातात् पारतन्त्र्येप्रमाण्यान्तरामावात्क्षेत्रज्ञस्यतद्वत्त्वेसंसारित्वमिति शङ्कते नन्विति नचाविद्यावत्त्वमविद्याकृतमनवस्थानादिति भावः यत्त्वूत्खातदंष्ट्रोरगवदविद्याकिंकरिष्यतीति तत्राह तत्कृतत्वेति अविद्यातज्ज्ञयोर्ज्ञेयत्वान्नात्मधर्मतेत्युत्तरमाह नेत्या

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

वेत्तिहन्तारंप्रकृतेः क्रियमाणानिगुणैःकर्म्माणिसर्व्वशःनादत्ते कस्यचित्पापमित्यादिप्रकरणेषुदर्शितस्तथैवच व्याख्यातमस्माभिरुत्तरेषुचप्रकरणेषु दर्शयिष्यामोहन्त तर्ह्यात्मनिक्रियाकारकफलात्मतायाःस्वतोऽभावेऽविद्ययाचाध्यारोपितत्वे कर्म्माण्यविद्वत्कर्त्तव्यान्येवनविदुषामितिप्राप्तं सत्यमेवं प्राप्तमेतदेवचनहिदेहभृताशक्यमिति यत्र दर्शयिष्यामःसर्व्वशास्त्रार्थोपसंहारप्रकरणेचसमासेनैवकौन्तेयनिष्ठाज्ञानस्यचापरेत्वनविशेषतोदर्शयिष्यामः अलमिहवोऽप्रपञ्चेनेत्युपसंहियते २

आनन्दगिरिकृतटीका

दिना तदेवप्रपञ्चयति यावदिति ज्ञेयस्यचेत्यधर्म्मत्वेपिचेत्यद्वाराज्ञेयज्ञस्य तत्कृतदोषवत्तेत्याशंक्याह नचेति ज्ञेयस्यापि ज्ञेयत्वान्नतेन चितोवस्तुतः स्पर्शोस्तीत्युपपादयति यदीति धर्म्मधर्म्मित्वेनासंसर्गेपिज्ञेयत्वेकात्मतिरित्याशंक्याह यदीति आत्मधर्म्मस्यात्मनाज्ञेयत्वेस्वस्यापिज्ञेयत्वापत्त्या कर्तृकर्मविरोधःस्यादित्यर्थः किञ्चविमतंनज्ञेयज्ञाश्रितं तद्दोषत्वाद्रूपादिवदित्याह कथम्चेति किञ्चमहाभूतानीत्यादिनाज्ञेयमानस्यज्ञेयान्तर्भावान्नाविद्यादेर्ज्ञातृधर्मतेत्याह ज्ञेयंचेति किञ्चैतद्योवेत्तीत्युक्तत्वात् ज्ञेयज्ञस्यज्ञातृत्वनिर्णयान्नतज्ज्ञेयंकिञ्चित्प्रविशतीत्याह ज्ञातैवेति ज्ञेयज्ञेयज्ञयोरेवं स्वाभाव्ये सिद्धे सिद्धंज्ञेयधर्म्मत्वमविद्यादेरिति फलितमाह इत्यवधारितइति विरोधाच्चनज्ञेयज्ञधर्म्मत्वंअविद्यादेरित्याह ज्ञेयज्ञेति विरुद्धवादित्वे मूलंदर्शयति अविद्येति मालपदस्यव्यावर्त्यमानंयुक्ताख्यमवष्टम्भान्तरमिति वक्तुंकेवलपदं ययाविद्ययाविरुद्धमपिनिर्वोढुंशक्यते तस्याःस्वातन्त्र्याभावाच्चितोन्यस्याविद्यकत्वेन तदाश्रयत्वात्तस्याविद्यास्वभावतयातदाश्रयत्वव्याघातात्तदाश्रयजिज्ञासयाष्टच्छति अतोहेति आश्रयमालंष्टच्छतेतद्विशेषोवाप्रथमेप्रश्नस्यानवकाशित्वंमत्वाह यस्येति अविद्याद्दश्यादृश्याद्दश्यत्वे पारतन्त्र्यात्किञ्चिन्निष्ठत्वेनैवतद्दृष्टेर्नाश्रयमालंदृष्टव्यमदृश्यंवा अप्रकाशत्वादसिद्धिरेवस्यादित्यर्थः द्वितीयमालम्बते कस्येति अविद्यायादृश्यमानत्वादाश्रयविशेषस्यात्मनोपिस्वानुभवसिद्धत्वात्प्रश्नस्यनिरवकाशतेत्युत्तरमाह अत्रेति प्रश्नानर्थक्यंप्रश्नद्वारास्फोरयति कथमित्यादिना तथापि कथंप्रश्नासिद्धिस्तत्राह नचेति तदेवदृष्टान्तेनस्पष्टयति नहीतिदृष्टान्तदार्ष्टान्तिकयोर्वैषम्यञ्चोदयति नन्विति अज्ञानाश्रयस्यपरोक्षत्वेपिप्रश्नैरर्थक्यमित्याह अप्रत्यक्षेणेति अविद्यावतोऽप्रत्यक्षत्वेपितेनाविद्यासम्बन्धेसिद्धे प्रष्टुस्तवप्रश्नानर्थक्यसमाधिर्नकश्चिदित्यर्थः अबुद्धपराभिसन्धिःशङ्कते अविद्यायाइति

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

अविद्यावतस्तत्परिहारान्नान्येनप्रयतितव्यमित्याह यस्येति ममैवाविद्यावत्वात्तत्परिहारेमयाप्रयतितव्यमितिशङ्कते नन्विति तर्हिप्रश्नानर्थक्यमितिसिद्धान्तीस्वाभिसन्धिमाह जानासीति आत्मानमविद्यावन्तंजानन्नपितद्विषयाध्यक्षाभावात्पृच्छामीति शङ्कते जानामीति अविद्यावतोऽप्रत्यक्षत्वंवदतातस्याहमविद्यावानविद्याकार्य्यवत्वाव्यतिरेकेणमुक्तात्मवदित्यनुमेयत्वमिष्टमित्युपेत्यदूषयति अनुमानेनेति आत्मनोविद्यासम्बन्धग्रहेकानुपपत्तिरित्याशंक्यज्ञातैवात्मा स्वस्याविद्यासम्बन्धंबुध्यतेऽन्योवाज्ञतेतिविकल्पाद्यंदूषयति नहीति तत्कालेस्वस्याविद्यांप्रतिज्ञातृत्वावस्थायामितियावत् अविद्याविषयत्वेनगृहीतत्वात्तत्ज्ञातृत्वे नैवोपयुक्तस्यात्मनस्तस्याःस्वात्मनिकुत्रसम्बन्धत्वज्ञातृत्वमेकस्यकर्मकर्त्तृत्वविरोधादित्याह अविद्ययेति द्वितीयंनिरस्यति नचेतियोगृहीतासनसम्भवतीतिसम्बन्धःतद्विषयमितिज्ञातुरविद्यायाश्चसम्बन्धस्तच्छब्दार्थः अनवस्थामेवप्रपञ्चयति यदीति आत्मनः स्वपरज्ञेयत्वायोगात्तस्मिन्नविद्यासम्बन्धस्याप्रामाणिकत्वान्नित्यानुभवगम्यत्वेस्थितेफलितमाह यदिपुनरिति यदाचैवंतदैतदध्याहार्यं ज्ञातुरात्मनोनकिञ्चित्दूष्यतीत्येतदमृष्यमाणःशङ्कते नन्विति किंज्ञातृत्वंज्ञानक्रियाकर्त्तृत्वं ज्ञानस्वरूपत्वंवानाद्यस्तदनभ्युपगमात्तत्प्रयुक्तदोषाभावात्द्वितीयेज्ञातृत्वस्यौपचारिकत्वान्नतत्कृतोदोषोस्तीत्याहनेत्यादिना असत्यामपिक्रियायांक्रियोपचारंदृष्टान्तेनस्फुटयति यथेति आत्मनिवस्तुतोविक्रियाभावेभगवदनुमतिंदर्शयति यथात्रेति गीताशास्त्रंसप्तम्यर्थःस्वतएवात्मनिक्रियाद्यात्मत्वाभावोभगवताशास्त्रेयथोक्तस्तथैवव्याख्यातमस्माभिरिति सम्बन्धः कथंतर्हिक्रियादिरात्मनिभातितत्राह अविद्येति यथावस्तुतोनास्त्यात्मनिक्रियादिरुपचारात्तुभातितयातत्रतत्रातीतप्रकरणेषु आहोभगवताकृतोयत्नइत्याह तथेति नकेवलमतीतेष्वेवप्रकरणेषु वास्तवक्रियाद्यभावादात्मन्याध्यासिकीतत्धीरुक्ताकिन्तुवक्ष्यमाणप्रकरणेष्वपितथैवभगवदभिप्रायदर्शनंभविष्यतीत्याह उत्तरेषु चेति आत्मनिवास्तवक्रियाद्यभावेऽध्यासाच्चतत्सिद्धौकर्म्मकाण्डस्याविद्वदधिकारित्वप्राप्तौ विद्वान्ययेतज्ञाताकर्मारभेतेत्यादिशास्त्रविरोधःस्यादिति शङ्कते हन्तेति शास्त्रस्यदेहव्यतिरेकविज्ञानाभिप्रायत्वादर्शनायाद्यतोतात्मधीविधुरस्यैवकर्मकाण्डाधिकारितेत्यङ्गीकरोति सत्यमिति कथमज्ञस्यैवकर्माधिकारित्वमुपपन्नमित्याशंक्याह एतदेवचेति ज्ञानिनोज्ञाननिष्ठायामेवाधिकारोनिष्ठान्तरेत्वज्ञस्यैवेत्युपसंहारप्रकरणेविशेषतोभविष्यतीत्याह सर्व्वेति तदेवानुक्रामति समासेनेति जीवब्रह्मणोरैक्याभ्युपगमेनकिञ्चदवद्यमिदमित्युपसंहरति अलमिति २

CC-0. In Public Domain. Digitized by eGangotri

तत्क्षेत्रंयच्चयादृक्चयद्विकारियतश्चयत् सचयोयत्प्रभावश्चतत्समासेनमेशृणु ३

शाङ्करभाष्यं

इदंशरीरमित्यादिश्लोकोपदिष्टस्यक्षेत्राध्यायार्थस्यसंग्रहश्लोकेयमुपन्यस्यते तत्क्षेत्रंयच्चेत्यादिव्याचिख्यासितस्यह्यर्थस्यसंग्रहोपन्यासोन्याय्यइतियन्निर्दिष्टमिदंशरीरंइति तत् क्षेत्रमिति तच्छब्देनपराम्रृशति यच्चेदं निर्दिष्टं क्षेत्रं तद्यादृक्यादृशं स्वकीयैर्धर्म्मैश्चशब्दःसमुच्चयार्थोयद्विकारियोविकारोयस्य तद्यद्विकारियतोयस्माच्च यत्कार्य्यमुत्पद्यतेइतिवाक्यशेषः सचयःक्षेत्रज्ञोनिर्दिष्टःसयत्प्रभावःयेप्रभावाउपाधिकृताःशक्तयोयस्यसयत्प्रभाश्चतत्क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं यथाविशेषितंतत्समासेनसंक्षेपेणममवाक्यतःशृणु श्रुत्वावधारयेत्यर्थः ३ तत्क्षेत्रक्षेत्रज्ञयोर्याथात्म्यंयदि

आनन्दगिरिकृतटीका।

एवंश्लोकद्वयंव्याख्यायश्लोकान्तरमवतारयति इदमिति कुतसंग्रहोक्तिरुपयुज्यते तत्राह व्याचिख्यासितस्येति प्रतिपत्तिसौकर्य्यार्थंसंग्रहोक्तिरर्थवतीत्यर्थः वक्ष्यमाणेर्थे

स्वामिकृतटीका

तदेवंसंसारिणःस्वरूपमुक्तमिदानींतस्यैवपारमार्थिकमसंसारिस्वरूपमाह क्षेत्रज्ञमिति तज्ज्ञक्षेत्रज्ञंसंसारिणंजीवंवस्तुतःसर्व्वक्षेत्रेष्वनुगतंमामेवविद्धि तत्त्वमसीतिश्रुत्युपलक्षितेनभद्रूपस्योक्तत्वात्आदरार्थमेतत्ज्ञानंस्तौति क्षेत्रक्षेत्रज्ञयोर्यद्वैलक्षण्येनज्ञानंतदेवमोक्षहेतुत्वात्ज्ञानंममतं अन्यत्तुतथापाण्डित्यंबन्धहेतुत्वादित्यर्थः तदुक्तं तत्कर्मयन्नबन्धाय साविद्यायाचमुक्तये आयासायापरंकर्मविद्यान्याशिल्पनैपुण्यमिति २

भाषा अनुवाद

यद्यपियहांचौविसप्रकारकीप्रकृतिकोक्षेत्रकहतेहैं तौभीदेहरूपपरिणामकक्षेत्ररूपान्तरप्राप्तिकोप्राप्तभईवहीप्रकृतिमेंअहंरूपअविवेकहेतुसेसोईप्रकृतिके विवेंकके अर्थइसशरीरकोक्षेत्रमात्रकहा उसीकेविस्तारकीइच्छासेप्रतिज्ञाकरतेहैंकि मेराकियाज्ञआजोउक्तस्वरूपजडदृश्यआदिस्वभावऔरयादृशइच्छादिधर्म्मयुक्तऔर जैसेइन्द्रियादिविकारमेंयुक्त औरजैसेप्रकृतिपुरुषकेसंयोगसेजन्मेऔर जिसप्रकार स्थावरजङ्गमभेदसेनानारूपहोयसोईजोक्षेत्रस्वरूपसेजोहैऔरअचिन्त्यैश्वर्य्यके द्वाराजोजोप्रभावसेसम्पन्नहोयहैसोसबसंक्षेपसेहमसेश्रवणकरोयह भगवानअर्जुनसेकहा ३ किसकेकहेविस्तारबचनकायहसंक्षेपहैइसपरकहतेकिजोष्टवशि

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

च्चितंस्तौति श्रोतृबुद्धिप्ररोचनार्थंऋषिभिरितिऋषिभिर्वशिष्ठादिभिर्बहुधाबहुप्रकारंगीतंकथितंछन्दोभिःछन्दांसिऋगादीनितैर्मन्त्रच्छन्दोभिर्विविधैर्नानाप्रकारैःपृथक्विवेकतोगीतं किञ्चब्रह्मसूत्रपदैश्चएवब्रह्मणःसूचकानिवाक्यानिब्रह्मसूत्राणितैःपदैतेगम्यतेज्ञायतेब्रह्मेतितानिब्रह्मसूत्रपदेनसूच्यन्तेतैरेवच क्षेत्रक्षेत्रज्ञयोर्याथात्म्यंगीतमितिअनुवर्त्ततेआत्मेत्येवोपासीतेत्यादिभिर्हिब्रह्मसूत्रपदैरात्माज्ञायतेहेतुमद्भिर्युक्तियुक्तैर्विनिश्चितैर्नसंशयरूपैर्निश्चितप्रत्ययोत्पादकैरित्यर्थः ४

आनन्दगिरिकृतटीका

श्रोतुर्मनःसमाधानार्थंसूचितोवाक्यार्थोपायविवरणप्रतिज्ञामभिप्रेत्याह यन्निर्दिष्टमिति इदंशरीरमिति यन्निर्दिष्टंतच्छरीरंतच्छब्देनपरामृशति प्रकृतार्थत्वात्तस्येति योजना तत्क्षेत्रंज्ञातव्यमित्यध्याहारःयच्चेतियेनरूपेणरूपवदिति तदेवक्षेत्रंविशेष्यतेतस्यक्षेत्रस्यस्वकीयाद्भर्माज्जन्मादयस्तैर्विशिष्टस्यज्ञेयत्वेहेयत्वंफलति चशब्दश्चकस्येतरेतरसमुच्चयार्थत्वमाह चशब्दइति विकारित्वेनापिहेयत्वंसूचयति यद्विकारीति यत्कार्य्यंतत्सर्वंयस्मादुत्पद्यतेतत्कारणत्वाद्ज्ञातव्यमित्याह यतइति क्षेत्रमिवक्षेत्रंज्ञातव्यंदर्शयतिसचेतिज्ञातव्यमिति सम्बन्धःचक्षुराद्युपाधिकृतदृष्टयादिशक्तिवशात्तस्यज्ञानवत्वंसूचयति यत्प्रभावइति तेनोक्तेनप्रभावेणतस्यज्ञातव्यतेति शेषःकथंयथाविशेषितंक्षेत्रंक्षेत्रज्ञोवाशक्योज्ञातुमित्याशंक्यभगवद्वाक्यादित्याह तदितिश्लोकान्तरस्यतात्पर्य्यमाह तदित्यादिनाविवक्षितंजिज्ञासितमित्यर्थः स्तुतिफलमाहश्रोतेतिनकेवलमाप्तोक्तेरेवक्षेत्रादियाथात्म्यंसम्भावितं किन्तुवेदवाक्यादपीत्याहछन्दोभिश्चेति ऋगादीनांचतुर्णामपिवेदानांनानाप्रकारत्वंशाखाभेदाद्दृष्टं नकेवलंश्रुतिस्मृतिसिद्धमुक्तंयाथात्म्यंकिन्तुयौक्तिकञ्चेत्याह किञ्चेतिकानितानिसूत्राणीत्याश

स्वामिकृतटीका

तत्रयद्यपिचतुर्विंशतिभेदभिन्नाप्रकृतिःक्षेत्रमित्यभिप्रेतंतथापिदेहरूपेणैव परिणतायामेवतस्यामहंभावेनाविवेकःस्फुटइतितद्विवेकार्थमिदंशरीरंक्षेत्रमित्युक्तंतदेवप्रपञ्चयिष्यन्प्रतिजानीतेतदितियदुक्तंमयातत्क्षेत्रंयत्स्वरूपतोजडत्वादिस्वभावंयादृक्यादृग्यच्चेच्छादिधर्मकंयद्विकारैर्युक्तंयतश्चप्रकृतिपुरुषसंयोगाद्भवतियदितियैःप्रकारैःस्थावरजङ्गमादिभेदैर्भिन्नमित्यर्थः सचक्षेत्रज्ञोयत्स्वरूपतोयत्प्रभावश्चअचिन्त्यैश्वर्य्ययोगेनयैःप्रभावैःसम्पन्नस्तत्सर्वंसंक्षेपतोमत्तःशृणु३

ऋषिभिर्बहुधागीतंछन्दोभिर्विविधैःपृथक् ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः ४

आनन्दगिरिकृतटीका

क्याह आत्मेत्येवेति आदिपदेनब्रह्मविदाप्नोतिपरमथयोन्यादेवतामित्यादीनिविद्या विद्यासूत्राण्युक्तानिआत्मेति क्षेत्रज्ञोपादानंतच्चक्षेत्रोपलक्षणंअथातोब्रह्मजिज्ञासेत्या दीन्यपिसूत्राण्यत्रगृहीतान्यन्यथाच्छन्दोभिरित्यादिनापौनरुक्त्यादितिमत्वाविशिन ष्टि हेतुमद्भिरिति ४ क्षेत्रादियथात्मश्रुत्याप्रलोभितायकिन्तदितिजिज्ञासवेयथो

स्वामिकृतटीका।

कैःविस्तरेणोक्तस्यायंसंक्षेपइत्यपेक्षायामाह ऋषिभिरिति ऋषिभिर्वशिष्ठादिभि र्योगशास्त्रेषुध्यानधारणादिविशयत्वेनवैराजादिस्वरूपेणबहुधागीतंनिरूपितं वि विधैर्विचित्रैर्नित्यनैमित्तिककाम्यकर्मादिविषयैःछन्दोभिर्वेदैर्नानापूजनीयदेवतारू पेणगीतंब्रह्मणःसूत्रःपदैश्चब्रह्मसूत्र्यतेसूच्यतेएभिरितिब्रह्मसूत्राणियतोवा इमानि भूतानिजायन्तइत्यादीनितटस्थलक्षणपराणिउपनिषद्वाक्यानितथाब्रह्मपद्यतेसाक्षा त्ज्ञायतेएभिरितिस्वरूपलक्षणपराणिसत्यंज्ञानमनन्तंब्रह्मेत्यादीनितैश्चबहुवागी

भाषाअनुवाद

दिकोंनेयोगशास्त्रमेध्यानधारणादिकाविषयपरमेश्वरकाविराटरूपनानाप्रकार से निरूपणकियाहै औरजोवशिष्टादिकोंनेनित्यनैमित्तिककाम्यकर्म्मआदिविविधप्रका रसेवेदकेद्वाराभिन्न भिन्नअनेकपूजनीयदेवतारूपसे प्रगटकियाहैऔरब्रह्मसूत्रअ र्थात्जिससे ब्रह्मकानिरूपणहोताहैतात्पर्य्ययहकिजिससेसमस्तभूतजन्मतेहैंइत्य दितटस्थलक्षणरूपउपनिषदवाक्यजोब्रह्मसूत्रऔरजिसकेद्वाराब्रह्मकासाक्षात्का रज्ञानकियाजाताहै एतावतास्वरूपलक्षणअर्थात्सोईब्रह्मसत्यऐसाज्ञानऔआ नन्दरूपईत्यादिश्रुतियोंनेहेतुयुक्तपदकहाअर्थात्हेसौम्यइससृष्टिकेपूर्व्वयहजगत्स तमात्रथाअसतसे सतकैसे जन्मैजोइसहृदयआकाशमे आनन्दरूपआत्मानहोता तोअपानऔप्राणवायुकोचेष्टाकोकरता इससे यहआत्माहीप्राणियोंकोआनन्दय क्तकरैहै इनसवश्रुतिविशिष्टब्रह्मसूत्रादिकोंसे कहाहैसोईसंक्षेपसे सुनोअथवा नित्यनैमित्तिक प्रायश्चित्तउपासनारूपसाधनचतुष्टयसे सम्पन्नहोनेकेवादिब्रह्म जिज्ञासाकरै इत्यादिवेदव्यासप्रणीतकोब्रह्मसूत्र कहते हैं परमेश्वरकेईक्षितृत्व हेतुसे प्रकृतिको जगत्काकारणनहींकहिसकतेऔरसवश्रुतियोंमेआत्माकोआन न्दमयत्वकहाहै इससे येआनन्दमयहैं इत्यादियुक्तियोंसे निश्चितहै अर्थजिनसू त्रोंका सोईकहा हेतुमद्भिर्विनिश्चितैः ४

CC-0. In Public Domain. Digitized by eGangotri

महाभूतान्यहङ्कारोबुद्धिरव्यक्तमेवच इन्द्रियाणिदशैकञ्चपञ्चचेन्द्रियगोचराः ५

शाङ्करभाष्यं

स्तुत्याभिमुखीभूतायार्जुनायाह भगवान् महाभूतानिमहान्तिचतानिभूतानिसर्वविकारव्यापकत्वाद्भूतानिचसूक्ष्माणि नस्थूलानित्विन्द्रियगोचरशब्देनाभिधायिष्यन्तेऽहङ्कारोमहाभूतकारणमहंप्रत्ययलक्षणोऽहङ्कारणंबुद्धिरध्यवसायलक्षणा तत्कारणमव्यक्तमेवचनव्यक्तमव्यक्तमव्याकृतमीश्वरशक्तिःमममायादुरत्ययेत्युक्तंएवशब्दःप्रकृत्यवधारणार्थःएतावत्येवाष्टधाभिन्नाप्रकृतिः चशब्दोभेदसमुच्चयार्थः इन्द्रियाणिदशश्रोत्रादीनिपञ्चबुद्ध्युत्पादकत्वात्बुद्धीन्द्रियाणिवाक्पाण्यादीनिपञ्चकर्मनिर्वर्त्तकत्वात्कर्मेन्द्रियाणितानिदशैकञ्चकिंतत्मनएकादशंसङ्कल्पाद्यात्मकं पञ्चचेन्द्रियगोचराःशब्दादयोविषयास्तान्येतानिसंख्यातञ्चतुर्विंशतितत्त्वानि आचक्षते ५

आनन्दगिरिकृतटीका ।

हेशंचेवंनिर्दिशति स्तुत्येति महत्त्वेहेतुमाह सर्वेति भूतशब्देनस्थूलानामपिविशेषाभावाद्ग्रहैकाहानिरित्याशंक्याह स्थूलानिति अहङ्कारोहंप्रत्ययलक्षणइति सम्बन्धः भूतानांप्रातीतिकत्वेनाभिमानमात्रात्मत्वंमत्वाहंकारंविशिनष्टि महाभूतेति

स्वामिकृतटीका ।

तं किञ्चहेतुमद्भिः सदेवसौम्येदमग्रआसीत्कथमसतःसज्जायेतइति कोह्येवान्यात्कःप्राण्यात्यदेषआकाशआनन्दनस्यात्एषह्येवानन्दयातीत्यादियुक्तिमद्भिःअन्यात्अप्रानचेष्टांकःकुर्य्यात्प्राण्यात्प्राणव्यापारंवाकःकुर्य्यादिति श्रुतिपदयोरर्थः विनिश्चितैरुपक्रमोपसंहारैकवाक्यतयाअसन्दिग्धार्थप्रतिपादकैरित्यर्थः तदेवमेतैर्बिस्तरेणोक्तं दुःसंग्रहंसंक्षेपतस्तुभ्यं कथयिष्यामितत्शृणुइत्यर्थः यद्वाअथातोब्रह्मजिज्ञासेत्यादीनिब्रह्मसूत्राणिगृह्यन्ते तान्येवब्रह्मपद्यतेनिश्चीयतेएभिरिति पदानितैर्हेतुमद्भिरीक्षतेर्नाशब्दं आनन्दमयोभ्यासादित्यादियुक्तिमद्भिर्विनिश्चितार्थैःशेषंसमानं ४

भाषाअनुबाद

औरक्षेत्रस्वरूपदोश्लोकसेकहतेहैं किमहाभूतकहे क्षितिजलअग्नितायुआकाश औरइनकाकारणरूपअहङ्कारऔरविज्ञानात्मकाबुद्धिअर्थात्महत्तत्त्वऔरअव्यक्तकहेमूलप्रकृति औरपांचज्ञानइन्द्रीतथाएकसङ्कल्पविकल्पात्मकमन औरपांचइन्द्रियगोचरकहेशब्दआदितन्मात्रा विशेषरूपसेइन्द्रियग्राह्यविषयअर्थात्शब्दस्पर्शरूपरसगन्धजोपांचद्रव्यगुणहैंयेईक्षेत्रस्वरूप चौबिसतत्त्वकहेहैं ५

CC-0. In Public Domain. Digitized by eGangotri

इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः एतत्क्षेत्रंसमासेनसविकारमुदाहृतं ६

शाङ्करभाष्यं।

अथेदानींआत्मगुणादृतियामाचष्टतेवैशेषिकास्तेपिक्षेत्रधर्माएवनतुक्षेत्रस्येत्याह भगवान् इच्छाद्वेषइति इच्छायज्जातीयंसुखहेतुमर्थमुपलब्धवान्पूर्वंपुनस्तज्जातीयमुपलभ्यमानस्तमादातुमिच्छति सुखहेतुत्वेरिति सेयमिच्छान्तःकरणधर्मोज्ञेयत्वात्क्षेत्रंतथाद्वेषीयजातीयमर्थंदुःखहेतुत्वेनानुभूतवान्पूर्वं पुनस्तज्जातीयमुपलभ्यमानस्तंद्वेष्टिसोयंद्वेषोज्ञेयत्वात्क्षेत्रमेवतथासुखमनुकूलंप्रसन्नंसत्त्वात्मकं ज्ञेयत्वात्क्षेत्रमेवदुःखंप्रतिकूलात्मकंज्ञेयत्वात्तदपिक्षेत्रंसंघातोदेहेन्द्रियाणांसंहतिस्तस्यामभिव्यक्तान्तःकरणवृत्तिःतप्तइव लौहपिण्डेग्निरात्मचैतन्याभासःसविद्याचेतनासा

आनन्दगिरिकृतटीका

महतःपरमित्यादौप्रसिद्धंमहच्छब्दार्थमहङ्कारहेतुमाह अहङ्कारेति ईश्वरशक्तिरित्युक्तेचैतन्यमपिशङ्कतेतदर्थमाह समेति अवधारणरूपमर्थमेवस्फुटयति एतावत्येवेति पञ्चतन्मात्राण्यहङ्कारोमहदव्याकृतमित्यष्टधाभिन्नत्वंमूलप्रकृत्यासह तन्मात्रादिभेदानांसमुच्चयश्चकारार्थः दशेन्द्रियाण्येवविभज्यव्युत्पादयति श्रोत्रेत्यादिना तदेवप्रश्नद्वारास्फुटयति किन्तदिति शब्दादिविषयशब्देनस्थूलानिभूतानिगृह्यन्ते उक्तेषुतन्मात्रात्तरीयसम्मतिमाह तानीति ५ मूलप्रकृतिरविकृतिर्महदाद्याः

स्वामिकृतटीका

तत्क्षेत्रस्वरूपमाह महाभूतानीतिद्वाभ्यां महाभूतानिभूम्यादीनिपञ्चअहङ्कारस्तत्कारणभूतःबुद्धिर्ज्ञानात्मकंमहत्तत्त्वंअव्यक्तंमूलप्रकृतिः इन्द्रियाणिदशवाङ्मानिज्ञानकर्मेन्द्रियाणिएकञ्चमनःइन्द्रियगोचराश्चपञ्चतन्मात्ररूपाएवशब्दादयआकाशादिविशेषगुणतयाव्यक्ताःसन्तइन्द्रियविषयाःपञ्चतदेवंचतुर्विंशतितत्त्वान्युक्तानि५

भाषा अनुवाद

औरइच्छाद्वेषसुखदुखऔसंघातकहे शरीर औचेतनाकहे ज्ञानात्मकअन्तःकरणकीवृत्तिजोबुद्धि औधैर्य येसबक्षेत्रहैं इससेयेआत्माकेधर्मनहींहैं अन्तःकरणहींकेधर्महैं तोशरीरधर्महींइनकोकहाचाहिये सोश्रुतिमेकहाहै किकामनासङ्कल्पसंशयश्रद्धाअश्रद्धाधैर्यअधैर्यलज्जाबुद्धिभयेसबअन्तःकरणकेव्यापारहैं इसवचनसे इसीअध्यायकेतीसरेश्लोकमेंजोकहाक्षेत्रधर्म सोदेखायाहै औरइन्द्रियआदिविकारसहितक्षेत्रमैनेसंक्षेपरूप तुमसेकहा ६ अबउक्तक्षेत्रसेपृथक्

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

चक्षेत्रंक्षेयत्वात् धृतिर्ययावसादंप्राप्तानिदेहेन्द्रियाणिधियन्तेसाक्षेयत्वात्क्षेत्रंस र्वान्तःकरणधर्मोपलक्षणार्थमिच्छादिग्रहणंयतउक्तंतदुपसंहरति एतत्क्षेत्रंसमा सेनसविकारंसहविकारेणमहदादिनोदाहृतमुक्तंयस्यक्षेत्रभेदजातस्यसंहतिरि दंशरीरं क्षेत्रंइत्युक्तंतत्क्षेत्रंव्याख्यातं महाभूतादिभेदभिन्नं धृत्यन्तं ६

आनन्दगिरिकृतटीका

प्रकृतिविकृतयःसप्तपोडशकश्चविकारइतिपठन्ति अव्यक्ताहङ्कारादीनान्वैगुण्याभि मानादिधर्मकत्वंप्रसिद्धमिति शब्दादीनामेवग्रहणेकर्मेन्द्रियाणां विषयानुक्तेर्वैरूप्य प्रसङ्गात्क्षेत्रैर्निरूपणस्यचप्रकृतत्वात्स्वरूपनिर्देशेनैवतत्क्षेत्रंयच्चयाट्क्चेतिव्या ख्यातमिदानीमिच्छादीनामात्मविकारत्वनिवृत्तयेक्षेत्रविकारत्वनिरूपणेनयद्विका रीत्येतन्निरूपयन्ग्रन्थान्तरनिवृत्तिपरत्वेनश्लोकमवतारयति अथेति पर्वश्लोकविरो धाद्येयंवैशेषिकमतमितिमत्वोक्तंभगवानिति उपलब्धजातीयस्योपलभ्यमानस्यादाने च्छायांहेतुमाह सुखेति इतिशब्दोहेत्वर्थःसुखहेतुत्वात्तस्मिन्निच्छेत्यर्थः इच्छांसुखत द्धेतुविषयत्वेनव्याख्यायात्मधर्मत्वंतस्याव्युदस्यति सेयमिति तथापिकथंक्षेत्रान्तर्भूत त्वंतत्राह क्षेयत्वादिति इच्छावत्द्वेषोपिधर्मोबुद्धेरित्याह तथेति कोसौद्वेषोयस्य बुद्धिधर्मत्वं तत्राह यज्जातीयमिति तस्यापीच्छावत्क्षेत्रान्तर्भावमाह सोयमिति इच्छाद्वेषवद्बुद्धिधर्मःसुखमपीत्याह तथेति तस्यापिस्वरूपोक्त्याक्षेत्रान्तःपातित्वमाह अनुकूलामिति दुःखस्यापिस्वरूपोक्त्याक्षेत्रमध्यवर्त्तित्वमाह दुःखमिति देहेन्द्रिया त्मवादौव्युदसितुंक्षेत्रान्तर्भूतमेवसंघातंविभजते देहेति विज्ञानवादंप्रत्याह तस्मिन् ति तप्तलौहपिण्डेवह्नेरभिव्यक्तिवदुक्तसंहतौबुद्धिवृत्तिरभिव्यज्यते तत्रचाग्निरभि व्यक्तोलोहपिण्डमेवाग्निबुद्ध्याग्राहयति तथात्मचैतन्यंबुद्धिवृत्तावभिव्यक्तंतामेवात्मतया बोधयत्यतस्तदाभासानुविद्धासैवचेतनेत्युच्यते साचमुख्यचेतनंप्रतिक्षेयत्वादतद्रूपत्वा त्क्षेत्रमेवेत्यर्थः धृतिस्वरूपोक्त्याक्षेत्रत्वंतस्यादर्शयति धृतिरित्यादिना नन्वन्येपिस ङ्कल्पादयोयेमनोधर्म्माःसन्ति तेकिमित्यत्रक्षेत्रत्वेननोच्यन्तेतत्राह सर्वेति तस्योप लक्षणार्थत्वेहेतुमाह यतइति इच्छादिवदस्मिन्नवसरेसङ्कल्पादीनामपिदर्शितत्वंसि द्धवत्कृत्यप्रकरणविभागार्थंयतोभगवदुक्तंक्षेत्रमुपसंहरत्यतोयुक्तमिच्छादिग्रहस्यसर्वा नुक्तबुद्धिधर्मोपलक्षणार्थत्वमित्यर्थः विरक्तस्यज्ञानाधिकारायवैराग्यार्थंक्षेत्रंव्याख्यात मित्यनुवदति यस्येति क्षेत्रभेदजातस्यव्यष्टिदेहविभागस्यसर्वस्येत्यर्थः संहतिःसम ष्टिःशरीरं ६ ननु उक्तंक्षेत्रंक्षेत्रज्ञोवक्तव्यस्तंहित्वा किमित्यन्यदुच्यतेतत्राह

CC-0. In Public Domain. Digitized by eGangotri

अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवं आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः७

शाङ्करभाष्यं।

क्षेत्रज्ञोवक्ष्यमाणविशेषणोयस्यक्षेत्रज्ञस्यपरिज्ञानादमृतत्वंभवति तंज्ञेयंतत्प्रवक्ष्यामीत्यादिनासविशेषणंस्वयमेववक्ष्यति भगवानधुनातुतत्ज्ञानसाधनगुणममानित्वादिलक्षणंयस्मिन्सति तत्ज्ञेयविज्ञानयोग्योधिकृतोभवति यत्परःसंन्यासोज्ञाननिष्ठउच्यतेतममानित्वादिगुणंज्ञानसाधनत्वात्ज्ञानशब्दवाच्यंविदधाति भगवान् अमानित्वमिति अमानित्वंमानिनोभावोमानित्वमात्मनःश्लाघनन्तद्भावोऽमानित्वं अदम्भित्वंस्वधर्मप्रकटीकरणंदम्भित्वंतद्भावोदम्भित्वमहिंसाअहिंसनंप्राणिनामपीडनं क्षान्तिःपरापराधप्राप्तावविक्रियार्जवम्ऋजुभावोऽवक्रतयाचार्योपासनं मोक्षसाधनोपदेष्टुराचार्यस्यशुश्रूषादिप्रयोगेनसेवनं शौचंकायमलानांमृज्जलाभ्यांप्रक्षालनमन्तश्चमनसःप्रतिपक्षभावनयारागादिमलानामपनयनंशौचंस्थैर्यंस्थिरभावोमोक्षमार्गएवकृतव्यवसायित्वमात्मविनिग्रहआत्मनउपकारकत्वात्मशब्दवाच्यस्यकार्यकारणसंघातस्यविनिग्रहःस्वभावेनसर्वतःप्रवृत्तस्यसन्मार्गएवनिरोधआत्मविनिग्रहः ७

स्वामीकृतटीका

इच्छेति इच्छादयःप्रसिद्धाःसंघातःशरीरंचेतनाज्ञानात्मिकामनोवृत्तिःधृतिर्धैर्यएतेचेच्छादयोदृश्यत्वान्नात्मधर्माः अपितुमनोधर्माःअतःक्षेत्रान्तःपातिनएवोपलक्षणञ्चैतत्सङ्कल्पादीनां तथाचश्रुतिः कामःसङ्कल्पोविचिकित्साश्रद्धाअश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेति अनेनयादृगितिप्रतिज्ञाताःक्षेत्रधर्मादर्शिताः एतत् क्षेत्रंसविकारमिन्द्रियादिविकारसहितं संक्षेपेणतुभ्यंमयोक्तमिति क्षेत्रोपसंहारः ६ इदानीममानित्वमित्यादिपञ्चभिरुक्तलक्षणात् क्षेत्रादतिरिक्तयाज्ञेयं शुद्धंक्षेत्रंविस्तरेणवर्णयिष्यन्तत्त्वज्ञानसाधनान्याह अमानित्वमिति अमानित्वंस्वगुणश्लाघाराहित्यं अदम्भित्वंदम्भराहित्यंअहिंसापरपीडावर्जनंक्षान्तिः

भाषाअनुवाद।

जोज्ञेयक्षेत्र तिसकोबिस्तारसेवर्णनकीइच्छाकरि क्षेत्रकेज्ञानहोनेकेसाधन पांचश्लोकसेकहतेहैं किअमानित्वअदम्भित्वअहिंसाकहे मानकपटपरपीडारहित्यऔक्षान्तिकहेक्षमा औआर्जवजोसीधापन औआचार्योपासनजोगुरुसेवनऔर शौचकहे बाहरअन्तरशुद्धि औभावशुद्धसेअन्तःशुद्धिजानो औरस्थैर्यकहेसत्मार्गमेंप्रवृत्त औउसीएकमेंतत्परता तथाआत्मविनिग्रहकहे शरीरसंयमकरना ७

CC-0. In Public Domain. Digitized by eGangotri

इन्द्रियार्थेषुवैराग्यमनहङ्कारएवच जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ८

आनन्दगिरिकृतटीका

क्षेत्रज्ञइति अनादिमदित्यादिना वक्ष्यमाणविशेषणक्षेत्रज्ञंस्वयमेव भगवान्विवक्षि तविशेषणसहितंज्ञेयंयत्तदित्यादिनावक्ष्यतीतिसम्बन्धः किमितिक्षेत्रज्ञोवक्ष्यतेतत्राह यस्येति ज्ञेयंयत्तदित्यतःप्राक्तनग्रन्थस्यतात्पर्यमाह अधुनेति अमानित्वादिलक्षणंवि दधातीत्युत्तरत्रसम्बन्धः ज्ञानसाधनसमुदायबोधनंकुतोपयुज्यतेतत्राह यस्मिन्निति योग्यमधिकृतमेवविशिनष्टि यत्पुरइति एतत्ज्ञानमितिवचनात्कथमिदंज्ञानसा धनमित्याशंक्याह तमिति तद्विधानस्यवक्तृद्वारादार्ढ्यं सूचयति भगवानिति अमानि त्वादिनिष्ठस्यान्तर्धियोज्ञानमिति नियमार्थमाह अमानित्वमिति मानस्तिरोहितो विवेकःसचात्मन्युत्कर्षारोपहेतुसोस्येतिमानी नमान्यमानीतस्यभावोमानित्वमिति व्याकरोति अमानित्वमित्यादिना प्रतियोगिमुखेनादम्भित्वंविशिनष्टि अदम्भित्वमि ति वाङ्मनोदेहैरपीडनंप्राणिनामहिंसनं तदेवाहिंसेत्याह अहिंसेति परापराध स्यचित्तविकारकारणस्य प्राप्तावेवाविकृतचित्तत्वेनापकारसहिष्णुत्वंक्षान्तिरित्याह क्षान्तिरिति अवक्रत्वमकौटिल्यं यथाहृदयव्यवहारःसदैकरूपप्रवृत्तिनिमित्तत्वंचे त्यर्थः उपनीयतुयःशिष्यमित्यादिनोक्तमाचार्यंव्यवच्छिनत्ति मोक्षेति शुश्रूषादिद्वा दिपदंनमस्कारादिविषयं बाह्यमाभ्यन्तरञ्चद्विःप्रकारंशौचंक्रमेणविभजते शौच मित्यादिना मनसोरागादिमलानामिति सम्बन्धः तदपनयोपायमुपदिशति प्रति पक्षेति रागादिप्रतिकूलस्यभावनाविषयेषु दोषदृष्ट्याप्रवृत्तिस्तयेतियावत् स्थिर भावमेवविशिनष्टि मोक्षेति आत्मनोनित्यसिद्धस्यानाधेयातिशयस्यकुतोविनिग्रह स्तत्राह आत्मनइति ७

स्वामिकृतटीका।

सहिष्णुत्वं आर्जवमवक्रताआचार्योपासनंसद्गुरुसेवनंशौचंबाह्यमाभ्यन्तरञ्चतत्रबा ह्यंमृज्जलादिनाआभ्यन्तरञ्चरागादिमलक्षालनं तथाचस्मृतिः शौचञ्चद्विविधंप्रो क्तंबाह्यमाभ्यन्तरंतथा मृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथान्तरमिति स्थैर्यं सन्मार्ग प्रवृत्तस्यतदेकनिष्ठताआत्मविनिग्रहःशरीरसंयमःएतज्ज्ञानमितिप्रोक्तमिति पञ्च

भाषाअनुवाद

और इन्द्रियार्थजोरूपआदिविषय तिनमेवैराग्यऔरअनहङ्कारता तथाजन्ममृत्यु जराव्याधिदुखदोषइनकोबारबारदेखनाचहियेविषयभोगसेनिवृत्तिहो ८

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्य

किञ्चइन्द्रियेति इन्द्रियार्थेषुशब्दादिषुदृष्टादृष्टेषुभोगेषुविरागभावोवैराग्यमनहङ्कारोऽहङ्काराभावएवच जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं जन्मचमृत्युश्चजराच व्याधयश्चदुःखानिचतेषुजन्मादिदुःखान्तेषुप्रत्येकंदोषानुदर्शनंआलोचनंजन्मनिगर्भवासयोनिद्वारानिःसरणंदोषस्तस्यानुदर्शनंआलोचनंतथामृतौदोषानुदर्शनंतथाजरायांप्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनं आलोचनंपरिभूतताचेति तथाव्याधिषुशिरोरोगादिषु दोषानुदर्शनं तथादुःखेष्वध्यात्माधिभूताधिदैवनिमित्तेष्वथवादुःखान्येवदोषोदुःखदोषस्तस्यजन्मादिषु पूर्ववदनुदर्शनंदुःखंजन्मदुःखंजरादुःखंमृत्युदुःखंव्याधयोदुःखनिमित्तत्वाज्जन्मादयोदुःखंदुखानिनपुनः स्वरूपेणैवदुःखमित्येवंजरादिषुदुःखदोषानुदर्शनात्देहेन्द्रियविषयभोगेषु वैराग्यमुपजायते ततःप्रत्यगात्मनिप्रवृत्तिःकरणानामात्मदर्शनायएवंज्ञानहेतुत्वात्ज्ञानमुच्यतेजन्मादिदुःखदोषानुदर्शनं ८

आनन्दगिरिकृतटीका ।

नकेवलममानित्वादीन्येवज्ञानस्यान्तरङ्गसाधनानिकिन्तुवैराग्यादीन्यपितथाविधानिसन्तीत्याह किञ्चेति दृष्टादृष्टेष्वनेकार्थेषुरागेतत्प्रतिबन्धंज्ञानंनोत्पद्यतेइतिमत्वाव्याकरोति इन्द्रियेति आविर्भूतोगर्वोहङ्कारस्तदभावोपिज्ञानहेतुरित्याह अनहङ्कारइति इन्द्रियार्थेषुवैराग्यमुक्तमुपपादयति जन्मेतिप्रत्येकंदोषानुदर्शनमित्युक्तंतत्रजन्मनिदोषानुदर्शनंविशदयति जन्मनीतियथाजन्मनिदोषानुसन्धानन्तथामृत्यौदोषस्यसर्वमर्मनिकृन्तनादेरालोचनंकार्य्यमित्याह तथेति जन्मनिमृत्यौचदोषानुसन्धानवज्जरादिष्वपिदोषानुसन्धानंकर्त्तव्यमित्याह तथेति व्याधिषुदोषस्यासह्यतारूपस्यानुसन्धानंदुःखेषुत्रिविधेष्वपिदोषानुसन्धानंप्रसिद्धंव्याख्यानान्तरमाह अथवेतियथाजन्मादिषुदुःखान्तेषुदोषदर्शनमुक्तं तथातेष्वेवदुःखस्यदोषस्यदर्शनंस्फुटयतिदुःखमित्यादिना कथंजन्मादीनांवाह्येन्द्रियग्राह्याणांदुःखत्वंतत्राह दुःखेति जन्मादिषुदोषानुदर्शनकृतंफलमाह एवमिति वैराग्येसत्यात्मदृष्ट्यर्थंकरणानांतदाभिमुख्येनप्रवृत्तिरिति वैराग्यफलमाह ततइति जन्मादिदुःखदोषानुदर्शनंज्ञानहेतुष्वकिमित्युपसंख्यातमित्याशंक्यवैराग्यद्वाधोहेतुत्वादित्याह एवमिति ८ ज्ञानस्यान्तरङ्ग

स्वामिकृतटीका ।

मेनान्वयः ७ किञ्च इन्द्रियार्थेष्विति जन्मादिषुदुःखदोषयोरनुदर्शनंपुनःपुनरालोचनंदुःखरूपस्यदोषस्यानुदर्शनमितिबास्यष्टमन्यत् ८ किञ्च असक्तिरिति

CC-0. In Public Domain. Digitized by eGangotri

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु नित्यञ्चसमचित्तत्वमिष्टानिष्टोपपत्तिषु ९

शाङ्करभाष्यं

किञ्च असक्तिरिति असक्तिः सक्तिः सङ्गनिमित्तेषुविषयेषुप्रीतिमात्रं तदभावोऽस क्तिरनभिष्वङ्गोऽभिष्वङ्गाभावोऽभिष्वङ्गोनामशक्तिविशेषएवानन्यात्मभावनालक्षणोय थाअन्यस्मिन्सुखिनिदुःखिनिचाहमेवसुखीदुःखीचजीवतिमृतेचाहमेवजीवामि म रिष्यामिचेतिक्रेत्याह पुत्रदारगृहादिषु पुत्रेषुदारेषु आदिग्रहणादन्येष्वप्यत्यन्तेष्षु दासवर्गादिषुतच्चोभयंज्ञानार्थत्वात्ज्ञानमुच्यते नित्यञ्चसमचित्त्वंतुल्यचित्तता क्व इष्टानिष्टोपपत्तिषुइष्टानामनिष्टानांचोपपत्तयःसंप्राप्तयस्ताखिष्टानिष्टोपपत्तिषु नि त्यमेवतुल्यचित्ततादृष्टोपपत्तिषुनहृष्यतिनकुप्यतिचानिष्टोपपत्तिषुतच्चैतन्नित्यंसमचि त्तत्वंज्ञानं ९ किञ्च मयिचेति मयिचेश्वरेऽनन्ययोगेनाव्यक्तसमाधिना नान्योभ गवतोवासुदेवात्परोऽस्यतःसएवनोगतिरित्येवंनिश्चिताऽव्यभिचारिणी बुद्धिरनन्य योगस्तेनभजनंभक्तिर्नव्यभिचरणशीलाअव्यभिचारिणीसाचज्ञानंविविक्तदेशसेवित्वं विविक्तःस्वभावतःसंस्कारेणवाशुच्यादिभिःसर्पव्याघ्रादिभिश्चरहितःअरण्यनदीपुलि नदेवगृहादिभिर्विविक्तोदेशस्तंसेवितुंशीलंमस्येति विविक्तदेशसेवी तद्भावोविविक्तदे

आनन्दगिरिटीका

मेवहेत्वन्तरमाह किञ्चेति नन्वशक्तिरेवाभिष्वङ्गाभावस्तथाचपुनरुक्तिरित्याशंक्या भिष्वङ्गोक्तिद्वारानिरस्यति अभिष्वङ्गोनामेति अन्यस्मिन्नेवपुत्रादावन्यत्वधियातद्गते सुखादावात्मनितद्भावनाख्यंशक्तिविशेषमेवोदाहरति उक्तविशेषणयोराकांक्षाद्वारा विषयमाह क्वेत्यादिना उक्तविशेषणयोर्ज्ञानशब्दस्योपपत्तिमाह तच्चेति सदाहर्षवि षादशून्यमनस्तमप्यज्ञानहेतुरित्याह नित्यञ्चेति तदेवविभजते इष्टेति तस्यज्ञानहे तुत्वन्निगमयति तच्चैतदिति ९

स्वामिकृतटीका।

पुत्रदारादिषु असक्तिः प्रीतित्यागः अनभिष्वङ्गः पुत्रादीनांसुखेदुःखेवाअहमेवसुखीदुः खीचेत्यध्यासातिरेकाभावः इष्टानिष्टयोरुपपत्तिषुप्राप्तिषुनित्यंसर्वदासमचित्तत्वं ९

भाषाअनुवाद।

औरपुत्रदाराधनआदिमे असक्तिकहेप्रीतित्याग औरपुत्रादिमेसुखदुखदेखि जो मैसुखीअथवादुखीहूं ऐसामानिलेनाअभिष्वङ्गहैतिसकात्याग औरइष्टअनिष्ट दो नोकीप्राप्तिमे सर्वदासमचित्तकहेचित्तकीएकरूपता अर्थात्सावधानचित्तरहै ९

CC-0. In Public Domain. Digitized by eGangotri

मयिचानन्ययोगेनभक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि १०
अध्यात्मज्ञाननित्यत्वंतत्त्वज्ञानार्थदर्शनं एतज्ज्ञानमितिप्रोक्तमज्ञानंयदतोऽन्यथा ११

शाङ्करभाष्यं

शसेवित्वंविविक्तेषुहिदेशेषुचित्तंप्रसीदतियतस्ततआत्मादिशुभावनाविविक्ते उपजायतेऽतोविविक्तदेशसेवित्वेज्ञानमुच्यतेअरतिररमणंजनसंसदितज्ज्ञानानांप्राक्तनानांसंस्कारशून्यानामविनीतानांकलहोन्मुखितचित्तानांसंसत्समवायोजनसंसन्नसंस्कारवतांविनीतानांसंसक्तस्याज्ञानोपकारकत्वात्अतःप्राकृतजनसंसद्यरतिर्ज्ञानार्थत्वात्ज्ञानं १० किञ्चअध्यात्मेतिअध्यात्मज्ञाननित्यत्वमात्मादिविषयंज्ञानमध्यात्मज्ञानं तस्मिन्नित्यभावोनित्यत्वममानित्वादीनांज्ञानसाधनानांभावानांपरिपाकनिमित्ततत्त्वज्ञानंतस्यार्थोमोक्षःसंसारोपरमस्तस्यालोचनंतत्त्वज्ञानार्थदर्शनं तत्त्वज्ञानफलालोचनेहितत्साधनानुष्ठानेप्रवृत्तिःस्यादितिएतदमानित्वादितत्त्वज्ञानार्थदर्शनान्तमुक्तज्ञानमितिप्रोक्तं ज्ञानार्थत्वात्अज्ञानपदेतस्मात्यथोक्तादन्यथाविपर्ययेणमानित्वंदम्भित्वंहिंसाक्षान्तिरनार्जवमित्याद्यज्ञानंविज्ञेयं परिहरणायसंसारप्रवृत्तिकारणत्वादिति ११ यथोक्तेनज्ञानेनज्ञातव्यंकिमित्याकांक्षायमाह ज्ञेयंयत्तदित्यादि ननु

आनन्दगिरिकृतटीका

साधनान्तरमाह किञ्चेति अनन्ययोगमेवसंक्षिप्त्याव्यनक्ति नेत्यादिनाउक्तधीद्वाराजातायाभक्तेर्भगवतिस्थैर्यंदर्शयति नेति तत्रापिज्ञानशब्दस्तद्धेतुत्वादित्याह साचेतिदेशस्यविविक्तत्वंद्विविधमुदाहरति विविक्तइति तदेवस्पष्टयति अरण्येति उक्तदेशसेवित्वंकथंज्ञानेहेतुस्तत्राह विविक्तेष्विति आत्मादीत्यादिशब्देनपरमात्मा वाक्यार्थ

भाषाअनुवाद

औरपरमेश्वरस्वरूपमेंरमे अनन्ययोगअर्थात्सर्वत्रआत्मदृष्टिसे अव्यभिचारिणीएकान्तभक्ति औरविविक्तकहेशुद्धअथवाचित्तप्रसन्नकारीजोनिर्जनदेश वहांकी बास औसंसारीव्यवहारीदुष्टमनुष्योंकीसभामेंअरुचि १० औरआत्माको अधिकारकरिके वर्त्तमानजोज्ञानतिसमेंनित्यभावअर्थात् तत्त्वमसिमहावाक्यके तत्पदऔत्वंपदकेअर्थपरविश्वास औरतत्त्वज्ञानकाफलजोमुक्तितिसीकोश्रेष्ठरूपसे आलोचनकरनाइससेअमानित्वंअदंभित्वआदिजोबीसकहेगये सोईज्ञानकेसाधनस्वरूपहैं यहवशिष्ठादिकोनेकहाहै औरइनबीसोंकेविपरीतजोमानदम्भहिंसाआदिबीसहैं तेईज्ञानकेविरोधीहै औअज्ञानकेस्वरूपजानो इससेवेसदावर्जनीयहैं ११

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

यमानियमाश्चामानित्वादयोनतैर्ज्ञेयाः तेनह्यमानित्वादिकस्यचिद्स्तुनःपरिच्छेद कंदृष्टंसर्व्वत्रैवयद्विषयंज्ञानंतदेवतस्यज्ञेयस्यपरिच्छेदकंदृश्यतेनह्यन्यविषयेणज्ञाने नान्यदुपलभ्यते यथाघटविषयेणज्ञानेनाग्निर्नैदोषःज्ञाननिमित्तत्वात् ज्ञानमुच्यते इतिह्यवोचाम ज्ञानसहकारिकारणत्वाच्च ज्ञेयमिति ज्ञेयंज्ञातव्यंयत्तत्प्रवक्ष्यामिप्र कर्षेणयथावद्वक्ष्यामि किंफलंतदितिप्रबोधनेनश्रोतुरभिमुखीकरणायाह यत्ज्ञेयं ज्ञात्वाअश्नतेमोक्षमश्नुतेनपुनर्म्रियतइत्यर्थः अनादिमत्आदिरस्यास्तीत्यादिमत्नआ दिमदनादिमत्किंतत्परंनिरतिशयंब्रह्मज्ञेयमिति प्रकृतमत्रकेचित्अनादिमत्प रमितिपदंछिन्दन्ति बहुव्रीहिणोक्तेर्थेमतुपआनर्थक्यमनिष्टंस्यादित्यर्थविशेषश्च द

आनन्दगिरिकृतटीका।

श्रोतव्यं नन्वरतिविषयत्वेनाविषयत्वेनाविशेषतोजनसंसन्मात्रं किमितिनगृह्यतेत बाह तस्यइति सन्तःसङ्गस्तुभेषजमित्युपलम्भादिर्थः १० साधनान्तरमाह किञ्चेति आत्मादीत्यादिशब्दोऽनात्मार्थस्तद्विषयंज्ञानंविवेकस्तन्नित्यत्वंतत्रैवनिष्ठावत्वं विवेक निष्ठोहिवाक्यार्थज्ञानसमर्थोभवति तेषांभावनापरिपाकोजामयत्नेनसाधिताजांप्रक र्षपर्य्यन्तत्वं तन्निमित्तंतत्वज्ञानमैक्यसाक्षात्कारस्तत्फलालोचनं किमर्थमित्याशं क्याह तत्वेति प्रवृत्तिःस्यादित्यतस्तत्त्वज्ञानार्थदर्शनमर्थवदितिशेषः ज्ञानस्यान्तरङ्ग हेतुमुक्तमुपसंहरति एतदिति किमितितस्यविज्ञेयत्वमित्याशंक्याह परिहरणायेति तत्रहेतुः संसारेति तस्यप्रवृत्तिरुत्पत्तिस्तद्धेतुत्वान्मानित्वादित्याज्यंज्ञातेचत्याज्यत्वं तेनतस्यज्ञेयतेत्यर्थःइतिशब्दःसाधनाधिकारसमाप्त्यर्थः ११ उत्तरग्रन्थमवतारयति

स्वामिकृतटीका

किञ्चमयीति मयिपरमेश्वरेऽनन्ययोगेनसर्व्वात्मदृष्ट्याव्यभिचारिणीएकान्ताभ क्तिः विविक्तःशुद्धश्चित्तप्रसादकरस्तंदेशंसेवितुंशीलंयस्यतस्यभावस्तत्वंप्राकृतानांजना नांसंसदिसभायामरतीरत्यभावः १० किञ्चअध्यात्मेति आत्मानमधिकृत्यवर्त्तमानं ज्ञानंतस्मिन्नित्यत्वंनित्यभावःतत्त्वम्पदार्थशुद्धिनिष्ठत्वमित्यर्थः तत्वज्ञानस्यार्थःप्रयोजनं मोक्षस्तस्यदर्शनंमोक्षस्यसर्वोत्कृष्टत्वालोचनमित्यर्थः एतदमानित्वमदम्भित्वमित्या दिविंशतिसंख्याकंयदुक्तमेतज्ज्ञानमिति प्रोक्तंवशिष्टादिभिर्ज्ञानसाधनत्वात् अतोऽ न्यथाअस्माद्विपरीतंमानित्वादिमत्तदज्ञानमिति ज्ञानविरोधित्वादतःसर्व्वथात्याज्य मित्यर्थः ११ एभिःसाधनैर्यज्ज्ञेयंतदाह ज्ञेयमितिषडभिः यज्ज्ञेयंतत्प्रवक्ष्यामि

CC-0. In Public Domain. Digitized by eGangotri

ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते १२

शाङ्करभाष्यं

र्शयन्त्यहंवासुदेवाख्यापराशक्तिर्यस्यतन्मत्परमिति सत्यमेवमपुनरुक्तं स्यादर्थश्चेत्स म्भवतिनत्वर्थःसम्भवति ब्रह्मणःसर्व्वविशेषप्रतिषेधेनैवविजिज्ञापयिषितत्वान्नसत्तन्ना सदुच्यतइति विशिष्टशक्तिमत्त्वप्रदर्शनं विशेषप्रतिषेधश्चेति विप्रतिषिद्धिः तास्मा म्भतुपोवहुव्रीहिणासमानार्थत्वेपिप्रयोगःश्लोकपूरणार्थः अमृतत्वफलंज्ञेयंमयोच्य तइतिप्ररोचनेनाभिमुखीकृत्याह नसत्तत्ज्ञेयमुच्यतइति नाप्यसत्तदुच्यते ननुमह तापरिकरवन्धेनकण्ठरवेणोद्घोष्यज्ञेयंप्रवक्ष्यामीत्यननुरूपमुक्तं नसत्तन्नासदुच्य तेइतिनअनुरूपमेवोक्तं कथंसर्वासुउपनिषत्सुज्ञेयंब्रह्म नेति नेत्यस्थूलमनणुइत्या दिविशेषप्रतिषेधेनैवनिर्द्दिश्यते नेदंतदितिवाचोगोचरत्वान्ननुतदस्तियद्वस्त्वस्तिश ब्देनोच्यतेअथास्तिशब्देननोच्यतेयत्नास्तितत्ज्ञेयं विप्रतिषिद्धञ्चज्ञेयंतदस्तिश ब्देननोच्यतइतिच नतावन्नास्तिनास्तिवुध्यविषयत्वान्ननुसर्व्वावुद्धयोस्तिनास्तिवुद्ध्य नुगताएव तत्रैवंसतिज्ञेयमप्यस्तिवुद्ध्यनुगतप्रत्ययविषयंवास्यान्नास्तिवुद्ध्यनुगतप्रत्य यविषयंवास्यान्नातीन्द्रियत्वेनोभयबुद्ध्यनुगतप्रत्ययविषयत्वात् यद्धीन्द्रियगम्यंवस्तुघ टादिकंतदस्तिवुद्ध्यनुगतप्रत्ययविषयंवास्यान्नास्तिवुद्ध्यनुगतप्रत्ययविषयंवा इदन्तुज्ञे यमतीन्द्रियत्वेनशब्दैकप्रमाणगम्यत्वान्नघटादिबप्रभववुद्ध्यनुगतप्रत्ययविषयमित्यतो नसत्वन्नासदित्युच्यते यत्तूक्तंविरुद्धमुच्यते ज्ञेयंयन्नसत्तन्नासदुच्यते इतिनविरुद्धम न्यदेव तद्विदितादथोअविदितादधीतिश्रुतेः श्रुतिरपिविरुद्धार्थेतिचेत्यथायज्ञाय शालामारभ्यकोहितद्वेदयद्यमुष्मिन्लोकेस्तिवानवेतीत्येवमितिचेत् नविदिताविदि ताध्यासनत्वश्रुतेरवश्यविज्ञेयार्थप्रतिपादनपरत्वात् यद्यमुष्मिन्नित्यादितुविधिशेषो र्थवादउपपत्तेश्च सदादिशब्दैःब्रह्मनोच्यतइति सर्व्वोहिशब्दोर्थप्रकाशनायप्रयुक्तः

भाषाअनुवाद

औरइससवसाधानसेजिसकोजाननाहोताहैतिसकोछश्लोकसेकहतेहैंकिजोजान वेजोगहैसोईमैहूंयहकहूंगापरन्तुअभीश्रोताकेआदरसिद्धहोनेकेलियेवहीज्ञान काफलदेखावतेहैं किमैजोज्ञानकीवातकहूंगा सोजानिकेलोगमुक्तिपावतेहैं और सोज्ञेयपदार्थक्याहैइसपरकहतेहैं किवहअनादिऔपरकहेनिरतिशयब्रह्मरूपय हीज्ञेयब्रह्म नसत्नअसतअर्थात्सतअसत्शब्दसे नहींकहाजाता तात्पर्ययहकि सतकहेजोविधिमुखसेप्रमाणकाविषय औअसस्कहेजोनिषेधकाविषय सोईसत् असत्कहावताहै यहतोब्रह्मअविषयहेतुसेउनदोनोसेभी भिन्न हींहै १२

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

श्रूयमाणश्चशब्दोऽभिजातिक्रियागुणसम्बन्धद्वारेणसङ्केतग्रहणं सव्यपेक्षोऽर्थंप्रत्याययति नान्ययाऽनिष्टत्वात्ततद्यथागौरश्वइतिवाजातितः पचतीतिवाक्रियातः शुक्लःकृष्णइतिवागुणतोधनीगोमानितिच सम्बन्धतोनतुब्रह्मजातिभेदतो नसदादिशब्दवाच्यं नापिगुणवत्त्वेनगुणशब्देनोच्यते निर्गुणत्वान्नापिक्रियाशब्दवाच्यं निःक्रियत्वान्निष्कलंनिष्क्रियंशान्तमितिश्रुतेः नचसम्बन्धैकत्वादद्वयत्वादविषयत्वादात्मत्वाच्च नकेनचिच्छब्देनोच्यतइति युक्तं यतोवाचोनिवर्त्तन्त इत्यादिश्रुतिभिश्च १२

आनन्दगिरिकृतटीका

यथोक्तेति अमानित्वादीनांज्ञानत्वमाक्षिपति नन्विति वस्तुपरिच्छेदकत्वाज्ज्ञानत्वमशंक्याह नहीति परिच्छेदकत्वाज्ज्ञानत्वं ज्ञानत्वात्परिच्छेदकत्वमित्यन्योन्याश्रयमित्यभिप्रेत्याह सर्वज्ञेति स्वार्थस्यैवज्ञानंपरिच्छेदकमित्येतद्व्यतिरेकद्वाराविशदयति नहीति व्यतिरेकदृष्टान्तमाह ययेति अमानित्वादीनांज्ञानत्वमाक्षिप्तंप्रतिक्षिपति नैषदोषइति तत्रहेतुत्वेनोक्तंस्मारयति ज्ञानेति तेनज्ञानशब्दे हेत्वन्तरमाह ज्ञानेति अमानित्वादीनांज्ञानत्वमुक्त्वाज्ञातव्यभवतारयति ज्ञेयमिति प्रश्नद्वारात्ज्ञेयप्रवचनस्यफलमुक्त्वाप्ररोचनंकृत्वातेनश्रोतुराभिमुख्यमापादयितुं प्ररोचनफलोक्तिपरमनन्तरवाक्यमित्याह किमित्यादिना तदेवविशिनष्टि अनादिमदिति आदिमत्वराहित्यमव्याकृतस्यापि ततोविशेषंदर्शयति किन्तर्हीति भोक्तुरपिभोग्यात्परत्वमित्यतोविशिनष्टि ब्रह्मेतिअनादीत्येकंपदंमत्परमिति पदच्छेदान्नपुनरुक्तिरितिमतान्तरमध्यापयतिअन्येति एकपदत्वसम्भवेकिमिति पदद्वयमित्याशंक्याह बहुव्रीहिणेति आदिरस्यनास्तीतियोबहुव्रीहिणोक्तोऽर्थस्तस्मिन्नादिमत्वनिषेधेनास्तिमत्वोपोर्थवत्वमितिमत्वुपानर्थक्यमनिष्टंस्यादितिमत्वाग्रहंकृच्छन्दन्तीतिपूर्वेणसम्बन्धः आदिरस्यनास्तीत्यनादीत्युक्तंमत्परमित्युच्यमानेकोऽर्थःस्यादित्याशंक्याह अर्थेति उक्तव्याख्यानस्यायुक्तत्वान्नायंपुनरुक्तिसमाधिरित्याह सत्यमितिअर्थासम्भवंसमर्थयते ब्रह्मणइतितथापिविशिष्टशक्तिमत्वंकिंनस्यादित्याशंक्याह विशिष्टेतितथापिमत्वुपोबहुव्रीहिणातुल्यार्थस्यकथमानर्थक्यंतत्राह तस्मादिति अनादिमत्परंब्रह्मेत्यत्रपक्षान्तरंप्रतिक्षिपस्वपक्षःसमर्थितःसंप्रतिब्रह्मणोब्रह्मत्वादेवकार्यंकारणात्मकत्वप्राप्तावुक्तानुवादद्वारानसदित्याद्यवतारयति असतत्वेतिसत्कार्यमभिव्यक्तनामरूपत्वादसत्कारणंतद्विपर्ययादितिभावःज्ञेयप्रवचनमनिर्ब्बाच्यविषयत्वात्प्रक्रमप्रतिकूलमित्याक्षिपति नन्वितिनि

आनन्दगिरिकृतटीका

र्विशेषस्यवस्तुनोज्ञेयत्वात्तद्विषयंप्रवचनंप्रक्रमानुकूलमित्युत्तरमाह नेत्यादिना अ
निर्व्वाच्यत्वेनसत्तन्नासदित्युच्यमानेकथमिदमनुरूपमितिपृच्छति कथमिति ब्रह्मा
त्मप्रकाशस्यसिद्धत्वात्तदर्थं विधिमुखेनोपदेशायोगादध्यस्तात्तद्धर्मनिवृत्तयेनिषेधद्वा
रोपदेशस्यवेदान्तेषुप्रसिद्धेरारोपितविशेषनिषेधरूपमिदंप्रवचनमुचितमितिपरिह
रति सर्व्वास्विति ज्ञेयस्यब्रह्मणोविधिमुखोपदेशायोगेहेतुमाह वाचइति ब्रह्मणो
स्तिशब्दावाच्यत्वे नरविषाणवन्नास्तित्वमित्यनिष्टमाशङ्कते नन्विति एवमुत्सर्गेपि
ब्रह्मणिकिमायातमित्याशंक्याह अथेति ज्ञेयस्यास्तिशब्दावाच्यत्वेव्याघातश्चेत्याह वि
प्रतिषिद्धञ्चेति अस्तिशब्दावाच्यत्वादवस्तुब्रह्मेत्यत्राप्रयोजकत्वमाह नतावदिति ना
स्तिबुद्धिविषयत्वमेवावस्तुत्वेनिमित्तमतस्तदभावाद्ब्रह्मणोनावस्तुतेत्येतदेव व्यक्तीक
र्त्तुं चोदयति नन्विति सर्व्वासान्वियामस्तिधीत्वेननास्तिधीत्वेनवानुगतत्वेन्यतरधीगो
चरत्वाभावेब्रह्मणोनिर्व्वाच्यंदुर्व्वारमितिफलितमाह तदेति ब्रह्मणोघटादिवैलक्ष
ण्यादुभयबुद्ध्यविषयत्वेपिनानिर्व्वाच्यतेत्याह नेत्यादिना घटादेरिन्द्रियग्राह्यस्योभय
बुद्धिविषयत्वेपिब्रह्मणस्तद्ग्राह्यस्यनोभयधीविषयत्वं तथापिनानिर्व्वाच्यत्वं सच्चिदेक
तानस्यशब्दप्रमाणादविषयत्वेनदृष्टत्वादित्युक्तमेवप्रपञ्चयति यद्वीति परोक्तंविरोध
मनुवदिति यच्चिति श्रुत्यवष्टम्भेननिराचष्टेनविरुद्धमिति सापिविरुद्धार्थस्यानुमानं
बोधकत्वास्याविरोधापेक्षत्वादिति शङ्कते श्रुतिरिति तस्याविरुद्धार्थत्वेनाप्रामाण्येद
ष्टान्तमाह यथेति प्राचीनबर्हिंकरोतीतिपारलौकिकफलयज्ञानुष्ठानार्थंशालानिर्मा
णंप्रस्तुत्यकोहितद्देत्याद्यापरलोकसत्वे सन्दिहानायश्रुतिरप्रमाणमेवं
विदितादविदितान्यत्वश्रुतिरपीत्यर्थः नेयंश्रुतिविरुद्धार्थत्वेनामानतयाहातव्याब्रह्मण्य
द्वितीयेप्रत्युक्तप्रतिपादनेनमानत्वादित्युत्तरमाह नविदितेति यत्तुविरुद्धार्थत्वे को
हीत्युदाहृतंतदसदर्थवादस्यविधिशेषस्यस्वार्थेतात्पर्य्यादित्याह यदीति यत्तजात्यादिम
त्वंतत्तवाच्यत्वं यथागवादौनब्रह्मणि जात्यादिमत्त्वमतस्तस्यावाच्यत्वान्निषेधेनैवबोध्य
त्वमित्याह उपपत्तेश्चेति नोच्यतइति निषेधेनैवतस्योपदेशइतिशेषः जात्यादिमतोर्थ
स्यैववाच्यत्वंततश्चसङ्गतिग्रहादिति प्रपञ्चयतिसर्व्वोहीति अश्रुतस्यजात्यादिद्वारेणा
ज्ञातसङ्गतेर्व्वाशब्दस्यनबोधकत्वमदृष्टेरित्याह नान्यथेति जात्यादेःसच्छब्दविषय
त्वमुदाहरति तत्यथेत्यादिना ब्रह्मणस्त्वगोत्रमवर्णमित्यादिश्रुतेः जात्यादिमत्वाभा
वान्नशब्दवाच्यतेत्याह नन्विति केवलोनिर्गुणश्चेतिश्रुतेर्गुणद्वाराब्रह्मणोनवाच्यते
त्याहनत्विति केवलोनिर्गुणमितिनिःक्रियत्वेमानमाह निष्कलमिति ब्रह्मणोद्वितीय

CC-0. In Public Domain. Digitized by eGangotri

सर्वतःपाणिपादन्तत्सर्वतोऽक्षिशिरोमुखं सर्वतश्रुतिःमल्लोकेसर्वमाटत्यतिष्ठति१३

शाङ्करभाष्यं।

सच्छब्दप्रत्ययाविषयत्वादसत्त्वाशङ्कायांज्ञेयस्यसर्वप्राणिकरणोपाधिद्वारेणतद स्तित्वंप्रतिपादयंस्तदाशङ्कानिवृत्त्यर्थमाह सर्वतइति सर्वतःपाणिपादन्तत्सर्वतोक्षि णयःपादाश्चास्येतिसर्वतःपाणिपादन्तत्ज्ञेयंसर्वप्राणिकरणोपाधिभिःक्षेत्रज्ञास्तित्वं विभाव्यतेतत्क्षेत्रज्ञश्चक्षेत्रोपाधितउच्यतेक्षेत्रञ्चपाणिपादादिभिरनेकधाभिन्नंक्षे त्रोपाधिभेदकृतंविशेषजातंमिथ्यैवक्षेत्रज्ञस्येतितदपनयनेनज्ञेयत्वमुक्तं नसत्तन्ना सदुच्यतेइति उपाधिकृतंमिथ्यारूपमप्यस्तित्वाधिगमायज्ञेयधर्म्मवत्परिकल्पोच्यते सर्वतःपाणिपादमित्यादितथाहिसम्प्रदायविदांवचनमध्यारोपापवादाभ्यांनिःप्रपञ्चंप्र पञ्चयतेइतिसर्वत्रसर्वदेहावयवत्वेनगम्यमानाःपाणिपादादयोज्ञेयशक्तिसद्भावनिमि

आनन्दगिरिकृतटीका।

त्वस्याशेषोपनिषत्सुसिद्धत्वादिशिष्टस्यसम्बन्धस्य तस्मिन्नसिद्धेर्नतद्वारापितस्यवाच्य तेत्याह नचेति ब्रह्मण्यभिधावृत्तिप्रशब्दाप्रवृत्तौहेत्वन्तराण्याह अद्वयत्वादिति ब्र ह्मणोवाच्यत्वे श्रुतिमपिसम्वादयति यतइति १२

स्वामिकृतटीका।

श्रोतुरादरसिद्धयेज्ञानफलंदर्शयति यज्ज्ञेयमाणंज्ञात्वाऽमृतंमोक्षंप्राप्नोति किंतत् अनादिमत् आदिमन्नभवतीत्यनादिमत्परंनिरतिशयंब्रह्मअनादीत्येतावतैववक्तु वी हिणाअनादिमत्त्वेसिद्धेऽपिपुनर्म्मतुप्प्रत्ययच्छान्दसः यद्वाअनादीतिमत्परञ्चेतिपद द्वयंममविष्णोःपरंनिर्विशेषरूपंब्रह्मेत्यर्थःतदेवाह नसदित्यादिविधिसुखेनप्रमाणस्य विषयःसच्छब्देनोच्यते निषेधविषयस्त्वसच्छब्देनोच्यते इदन्तुतदुभयविलक्षणम विषयत्वादित्यर्थः १२

भाषा अनुवाद।

औरजोऐसाकहो किब्रह्मसत्असत्मेभिन्नहैतोयहचराचरात्मकब्रह्माण्डब्र ह्महैंइत्यादिश्रुतिसेविरुद्धहोयहैयहशङ्काकरि इसब्रह्मकीनानाप्रकारशक्ति औ ज्ञानक्रियाबलक्रियाआदिस्वभावसिद्ध नानामतमेश्रुतियोंसेकहाजायहैं इसतरह ब्रह्मकीसर्वात्मतादिखाय पांचश्लोकसेकहतेहैं किसर्वत्रहस्तपादचक्षुमस्तकमुख हैंजिसके सोसर्वत्रहीश्रवणइन्द्रियसेयुक्तहोयसबलोककोव्याप्तकरकेस्थितहैं अर्था त्यावत्प्राणीयोंमेवर्त्तमान करचरणआदिउपाधियोंसे व्यवहारकरैहै १३

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम् ।

त्तस्वकार्यादृतिज्ञेयसङ्गवेलिङ्गानिज्ञेयस्ये युपचारतउच्यन्ते तयाव्याख्येयमन्यत्सर्व तःपाणिपादंतत् ज्ञेयंसर्वतोक्षिशिरोमुखंसर्वतोक्षीणिशिरांसिमुखानिचयस्यतत्स र्वतोक्षिशिरोमुखं सर्वतःश्रुतिमत् सर्वत्रश्रुतिमच्छ्रुतिःश्रवणेन्द्रियंतत्यस्यतत्श्रु तिमल्लोकेप्राणिनिकायेसर्वमावृत्यसंव्याप्य तिष्ठति स्थितिंलभते १३

आनन्दगिरिकृतटीका ।

सर्वविशेषरहितस्यावाङ्मनसगोचरस्यअदृष्टेःदृष्टेश्चविपरीतस्यप्राप्ते ब्रह्मण: शून्यत्वेप्रत्यक्षेनेन्द्रियप्रवृत्त्यादिहेतुत्वेनकल्पितद्वैतसत्तास्फूर्त्तिप्रदत्वेनेश्वरत्वेनच सत्वंदर्शयन्नादौ देहादीनांप्रवृत्तिमतां रथादिचेतनानांप्रेक्षापूर्वकप्रवृत्तिमत्वात् चेत नाधिष्ठितत्वमनुमिमानस्तत्प्रत्यक्चेतनंब्रह्मेत्याह सच्छब्देति तदस्तित्वमितिसच्छ ब्दोज्ञेयब्रह्मार्थःतदाशङ्केतिसच्छब्देनासत्वमुच्यते ननुसर्वदेहेषुपाणिपादमस्येति कथंप्राणीनाञ्चपादानाञ्चदेहस्यत्वेनात्मधर्मत्वंतत्राह सर्वेति करणप्रवृत्तीरथादि प्रवृत्तिवत्प्रेक्षापूर्वकप्रवृत्तिमत्वाच्चेतिनाधिष्ठातृपूर्विकेत्यर्थः उक्तप्रवृत्तश्चाचेतनास्ति त्वसिद्धावपिकथंज्ञेयब्रह्मास्तित्वमित्याशंक्यचेतनस्यैवज्ञेयोपाधिना ज्ञेयत्वाच्चेतना स्तित्वंतदस्तित्वमेवेत्याह ज्ञेयब्रह्मेति तस्यज्ञेयोपाधित्वेपिकथं पाणिपादादिशिरो मुखादिमत्वमित्याशंक्याह ज्ञेयञ्चेति अतश्चोपाधितस्तस्मिन्विशेषोक्तिरितिशेषः कथंतर्हिनसत्तन्नासदितिनिर्विशेषत्वोक्तिरित्याशंक्याह ज्ञेयेति पाणिपादादिमत्व मौपाधिकंमिथ्याचेत्ज्ञेयप्रवचनाधिकारेकथंतदुक्तिरित्याशंक्याह उपाधीति मिथ्या रूपमपिज्ञेयवस्तुज्ञानोपयोगीत्यत्रदृष्टसंमतिमानयतितथाहीति पाणिपादादीनाम न्यगतानामात्मधर्मत्वेनारोप्यव्यपदेशेकोहेतुरितिचेततत्राह सर्वत्रेति ज्ञेयस्यब्र ह्मणःशक्तिसन्निधिमात्रेण प्रवर्त्तनसामर्थ्यंतत्सत्वंनिमित्तीकृत्यस्वकार्य्यवन्तोभवन्ति पाण्यादयइति कृत्वेतियोजना सर्वतोक्षित्यादावुक्तमतिदिशति तथेति तत्ज्ञेयंय थासर्वतःपाणिपादमितिव्याख्यातंतथेत्युक्तमेवस्पष्टयति सर्वतइति सर्वतोक्षित्यादे रत्रार्थमाह सर्वतोक्षीति अक्षिश्रवणवत्वमवशिष्टज्ञानेन्द्रियवत्वस्यपाणिपादमु खवत्वञ्चावशिष्टकर्मेन्द्रियवत्वस्य मनोबुद्ध्यादिमत्वस्यचोपलक्षणएकस्यसर्वत्रपाण्या दिमत्वंसाधयति सर्वमिति १३

स्वामिकृतटीका ।

नन्वेवंब्रह्मणःसदसद्विलक्षणत्वेसति सर्वंखल्विदंब्रह्मैवेदंसर्वमित्यादि श्रुतिर्वि रुध्येतेत्याशंक्य परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेत्यादिश्रुतिप्र

CC-0. In Public Domain. Digitized by eGangotri

सर्वेन्द्रियगुणाभासंसर्वेन्द्रियविवर्जितं असक्तंसर्वभृच्चैवनिर्गुंणंगुणभोक्तृ च १४

शाङ्करभाष्यं

उपाधिभूतपाणिपादादीन्द्रियाध्यारोपणानुज्ञेयस्य तद्वत्ताशंकामाभूदित्येवमर्थःश्लोकारम्भः सर्वेन्द्रियेति सर्वेन्द्रियगुणाभासं सर्वाणिचतानीन्द्रियाणिश्रोत्रादीनिबुद्धीन्द्रियकर्मेन्द्रियाख्यान्यन्तःकरणेचबुद्धिमनसीज्ञेयोपाधित्वस्यतुल्यत्वात् सर्वेन्द्रियग्रहणेनगृह्येते अपिचान्तःकरणोपाधिद्वारेणैवश्रोत्रादीनामपिउपाधित्वमित्यतोऽन्तःकरणबहिःकरणोपाधिभूतैः सर्वेन्द्रियगुणैरध्यवसायसङ्कल्पश्रवणवचनादिभिरवभासतइति सर्वेन्द्रियगुणाभासंसर्वेन्द्रियव्यापारैर्व्याप्तमिवतज्ज्ञेयमित्यर्थःध्यायतीवलेलायतीवेतीतिश्रुतेः कस्मात्पुनःकारणान्नव्याप्तमेवेतिगृह्यतइत्यतआह सर्वेन्द्रियविवर्जितंसर्वकरणरहितमित्यर्थःअतोनकरणव्यापारैर्व्याप्तंतज्ज्ञेयंस्वयंमन्योऽपाणिपादोजवनोगृहीतापश्यत्यचक्षुःसशृणोत्यकर्णइत्यादि सर्वेन्द्रियोपाधिगुणानुगुण्यभजनशक्तिमत्तत्ज्ञेयमित्येवंप्रदर्शनार्थं नतुसाक्षादेवजवनादिक्रियामत्त्वप्रदर्शनार्थः अन्धोमणिमविन्दित्यादिमन्त्रार्थवत्तस्यमन्त्रस्यार्थोयस्मात्सर्वकरणवर्जितंज्ञेयंतस्मादसक्तंसर्वसंश्लेषवर्जितंयद्यप्येवंतथापिसर्वभृच्चएवसदास्वदंहि

स्वामिकृतटीका

सिद्ध्याऽचिन्त्यशक्त्यासर्वात्मत्वंतस्यदर्शयन्नाह सर्वतइति पञ्चभिः सर्वतःसर्वत्रपाणयःपादाश्चयस्यतत् सर्वतोऽक्षीणिशिरांसिमुखानिचयस्यतत् सर्वतःश्रुतिमत्श्रवणेन्द्रियैर्युक्तंसत्लोकेसर्वमावृत्यव्याप्यतिष्ठति सर्वप्राणिप्रवृत्तिभिःपाण्यादिभिरुपाधिभिः सर्वव्यवहारास्पदत्वेन तिष्ठतीत्यर्थः १३

भाषा अनुवाद

औरचक्षुआदिइन्द्रियोंकेगुणस्वरूप अर्थात् रूपादिविषयमे तिसतिसआकारसेवहीप्रकाशमानहै अथवा इन्द्रियऔरगुणकहेइन्द्रियोंकेविषयरूपादिसमस्तमेसोईप्रकाशकरताहै इससेसर्वइन्द्रीगुणआभासस्वरूपहै औरसम्पूर्णइन्द्रीयोंसेरहितहै सोईश्रुतिकहतीहैं किसोईजोब्रह्म सोहस्तरहितहोकेभीग्रहणकरतेऔपादबिनाभीवेगवानतथाचक्षुहीनद्रष्टा औकर्णविहीनश्रोता औरइनविषयसकलकोवेंजानतेहैं परउनकोकोईभीनहींजानताहै वहीपरमात्माको वेदसबआदिपुरुषऔपूर्ण तथासर्वव्यापीकहतेहैं औरवेअसक्तकहेसत्तादिगुणरहित औगुणकेभोक्ताअर्थात् सत्तादिगुणसमूहकेप्रतिपालकहैं यहभगवान अर्जुनसेकहा १४

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

सर्व्वंसर्व्वत्रसत्वुद्ध्यनुगमान्नहि मृगतृष्णिकादयोपिनिरास्पदाभवन्त्यतःसर्व्वभृत्सर्व्वविभर्त्तृइति स्यादिदञ्चान्यत् ज्ञेयस्यसत्त्वाधिगमद्वारंमिर्गुणसत्त्वरजस्तमांसिगुणास्तैर्वर्जितंतत्ज्ञेयं तथापिगुणभोक्तृचगुणानांसत्त्वरजस्तमसांशब्दादिद्वारेणसुखदुःखमोहाकारपरिणतानांभोक्तृचोपलब्धृतत्ज्ञेयमित्यर्थः १४

आनन्दगिरिकृतटीका ।

आरोपादृतेसाक्षादेवज्ञेयस्यपाण्यादिमत्वमाशंक्याह उपाधीति इन्द्रियविशेषणीभूतसर्व्वशब्दात्ज्ञेयोपाधित्वन्यायविशेषाच्चात्रबुद्ध्यादेरपिग्रहणमित्याह अन्तःकरणेचेति श्रोत्रादीनांज्ञेयोपाधित्वस्यमनोबुद्धिद्वारत्वादपि तयोरिहग्रहणमित्याह अपिचेति तयोरपीहोपादानेफलितमाह इत्यतइति अक्षरार्थमुक्त्वावाक्यार्थमाह सर्व्वेति उपाधिद्वाराकल्पितव्यापारवत्वेमानमाह ध्यायतीति कल्पितमेवास्यव्यापारवत्वंनवास्तवमित्यत्रभगवतोपिसम्मतिमाकांक्षाद्वारादर्शयति कस्मादित्यादिना सर्वकरणरहित्येफलितमाह अतइति साक्षादेवज्ञेयस्यवेगवद्विहरणादिक्रियावत्तायां मान्त्रवर्णिकत्वात्कुतोस्यकरणव्यापारैरव्यापारैरव्याप्तत्वमित्याशङ्कानुवादपूर्व्वकं मन्त्रस्यप्रकृतानुगुणत्वमाह यस्त्विति करणगुणानुगुण्यभजनमन्तरेणसाक्षादेव जवनादिक्रियावत्वप्रदर्शनपरत्वे मन्त्रस्यमुख्यार्थत्वंस्यादित्याशंक्य तदसम्भवान्नैवमित्याह अन्यइति अर्थवादस्यश्रुतेर्थैतात्पर्य्याभावान्नप्रकृतप्रतिकूलेनेत्यर्थः सर्वकरणरहित्यंतद्व्यापाररहित्यस्योपलक्षणमित्यङ्गीकृत्योक्तमेवहेतुंकृत्वावस्तुतःसर्व्ववर्जितत्वमाह यस्मादिति वस्तुतःसर्व्वसङ्गाभावेपिसर्व्वाधिष्ठानत्वमाह यद्यपीति स्वसत्तामात्रेणाधिष्ठानतयासर्व्वं पुष्णातीत्येतदुपपादयति सदिति विभक्तंसति कल्पितंप्रत्येकंसदनुविद्धधीवोध्यत्वात् प्रत्येकञ्चन्द्रभेदानुविद्धधीवोध्यञ्चन्द्रभेदवदित्यर्थः सर्वंसदास्पदमित्यप्युक्तं मृगतृष्णिकादीनां तदभावादित्याशंक्याह नहीति तेषामपिकल्पितत्वेननिरधिष्ठानत्वायोगान्निरूप्यमाणे तदधिष्ठानंसदेवेति सर्वस्यसति कल्पितत्वमविरुद्धमित्यर्थः सर्वाधिष्ठानत्वेनज्ञेयस्यब्रह्मणोऽस्तित्वमुपसंहरति अतइति इतश्चज्ञेयंब्रह्मास्तीत्याह स्यादिदञ्चेति नहि तस्योपलब्धृत्वमसत्त्वमसत्त्वेसिध्यतीत्यर्थः १४

स्वामिकृतटीका

किञ्च सर्वेन्द्रियेति सर्वेषांचक्षुरादीनामिन्द्रियाणांगुणेषुरूपाद्याकारिषुवृत्तिषु

CC-0. In Public Domain. Digitized by eGangotri

बहिरन्तश्च भूतानामचरं चरमेव च सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् १५

शाङ्करभाष्यं।

किञ्च बहिरन्तरिति बहिस्त्वक्पर्यन्तं देहमात्मत्वेनाविद्याकल्पितमपेक्ष्यतमेवाव धिं कृत्वा बहिरुच्यते तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृत्वान्तरुच्यते बहिरन्तश्चेत्युक्तेमध्येऽभावे प्राप्ते इदमुच्यते अचरमेव च यच्चराचरं देहाभासमपि तदेवज्ञेयं यथा रज्जुसर्पाभासं यद्यचरञ्चरमेव च व्यवहारविषयं सर्वं ज्ञेयं किमर्थमिदमिति सर्वैर्न ज्ञेयमित्युच्यते सत्यं सर्वाभासं तथापि व्योमवत्सूक्ष्ममतः सूक्ष्मत्वात्स्वेनरूपेण तत्ज्ञेयमप्यविज्ञेयमविदुषां त्वात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमित्यादिप्रमाणतोहि सम्विज्ञातं अविज्ञातत या दूरस्थं वर्षसहस्रकोट्यापि अविदुषामप्राप्यत्वादन्तिके च तदात्मत्वात् विदुषां १५

आनन्दगिरिकृतटीका

इतोपि ज्ञेयं ब्रह्मास्तीत्याह किञ्चेति बहिरिति व्याख्येयमादाय व्याचष्टे त्वगिति भूतेभ्यो बहिर्वाह्यविषयाद्यात्मकमित्यर्थः कथमनात्मन एवात्मत्वं कल्पनयेत्याह आत्मत्वेनेति अन्तःशब्दार्थमाह तथेति भूतानाञ्चराचराणामन्तर्मध्ये प्रत्यगभूतमित्यर्थः वि

स्वामीकृतटीका

तत्तदाकारेणाभासत इति तथा सर्वेन्द्रियाणि गुणांश्च तत्तद्विषयानाभासयतीति वा सर्वैरिन्द्रियैर्विवर्जितञ्च तथा च श्रुतिः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्ण इत्यादि असक्तः सङ्गशून्यः तथापि सर्वं बिभर्तीति सर्वभृत्सर्वस्याधारभूतं तदेव निर्गुणं सत्त्वादिगुणरहितं गुणभोक्तृ च गुणानां सत्त्वादीनां भोक्तृ पालकं १४

भाषाअनुवाद।

और जैसे सुवर्णके कार्य कड़ा कंगन कुण्डल आदि आभूषणोंमें सोना उपादानकारणरूपसे भीतर बाहर वर्त्तमान है और जैसे जलतरंगमें भी जल छोड़ि और नहीं है तथा आकाश जैसे सकल वस्तुके बहिरन्तर वर्त्तमान है तैसेही ब्रह्मके कार्यस्वरूप चराचरादि भूतसमूहमें अन्तर बाहिर भी सोई ब्रह्म ही वर्त्तमान हैं क्योंकि तावत कार्यके कारण सोई ब्रह्म हैं परन्तु ऐसे होकर भी रूपादि विहीन हेतु से यह इतना ऐसे सृष्टरूप जानवेयोग्य नहीं है और यही ब्रह्म अज्ञानियों को लक्षयोजनके समान दूर है क्योंकि विकारसहित जो प्रकृति तिससे पर है और ज्ञानियों को अपरोक्षरूपसे नियनिकट है सूक्ष्मताके कारण अज्ञानियों को अविज्ञेय और वेदशास्त्रमार्गसे चलनेवाले ज्ञानियों को विज्ञेय है अर्थात् जानवेयोग्य है आकाशके समान इसको भी जानो १५

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

किञ्च अविभक्तमिति अविभक्तञ्च प्रतिदेहं व्योमवत् तदेकं भूतेषु सर्वप्राणिषु विभक्तमिव च स्थितं देहेष्वेव विभाव्यमानत्वात् भूतभर्त्तृ च भूतानि विभर्त्तीति तत् ज्ञेयं भूतभर्त्तृ च स्थितिकाले प्रलयकाले ग्रसिष्णु ग्रसनशीलं उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं यथा रज्वादिः सर्पादेर्मिथ्याकल्पितस्य १६ किञ्च सर्वत्र विद्यमानं सन्नोपलभ्यते चेत् ज्ञेयन्तमस्त

आनन्दगिरिकृतटीका ।

तीयं पादमवतार्य व्याचष्टे वहिरित्यादिना यन्मध्ये भूतात्मकं नानाविधदेहात्मना भासमानं तदपि ज्ञेयान्तर्भूतं न त्वसदित्यर्थः कथञ्चराचरात्मनो भूतजातस्य ज्ञेयत्वं तत्राह यथेति अधिष्ठाने रज्वां कल्पितसर्पादेरन्तर्भाववद्देहाभासस्यापि ज्ञेयान्तर्भावान्नासत्वं मध्ये ज्ञेयस्य शङ्कितव्यमित्यर्थः सर्वात्मकञ्चेत् ज्ञेयं सर्व्वैरिदमिति किमिति न गृह्येतेति शङ्कते यदीति इदमिति ग्राह्यत्वयोग्यत्वाभावान्नेत्याह उच्यत इति सर्व्ववस्त्वात्मनाभासतस्तदयोग्यत्वं कथमित्याशंक्याह सत्यमिति सूक्ष्मत्वेपि किं स्यादित्याशंक्याह अत इति सूक्ष्मत्वमतीन्द्रियत्वं तस्याविज्ञेयत्वे कुतस्तज्ज्ञानान्मुक्तिस्तत्राह अविदुषामिति विशेषणफलमाह विदुषान्त्विति विदुषां हि तेषामात्मत्वेन ज्ञातञ्चेत् कथं दूरस्थत्वमित्याशंक्याह अविज्ञाततयेति कथं तर्हि तस्य प्रत्यक्त्वन्तत्राह अन्तिके चेति विद्वदविद्वद्भेदापेक्षया दूरात् सुदूरे तदिहान्तिके चेति श्रुतिः तदर्थोत्र प्रसंगादनूदित इत्यर्थः १५

ज्ञेयस्यास्तित्वे हेत्वन्तरमाह किञ्चेति तद्धि प्रतिदेहं न भोवदेकं तद्भेदे मानाभावात् भिन्नत्वे च घटवदनात्मत्वापातादतो द्वितीयं सर्वत्र प्रत्यग्भूतं ज्ञेयं नास्तीत्यतिसाहसमित्याह अविभक्तञ्चेति कतं तर्हि देहभेदधीरित्याशंक्य कल्पनयेत्याह भूतेष्विति तत्र हेतुः देहेष्विति कार्याणां स्थितिहेतुत्वाच्च ज्ञेयमस्तीत्याह भूतेति नि

स्वामिकृतटीका

किञ्च वहिरिति भूतानां चराचराणां स्वकार्य्याणां वहिश्चान्तश्च तदेव सुवर्णमिव कटककुण्डलादीनां जलतरङ्गानामन्तर्ब्बहिर्जलमिव अचरं स्थावरं चरञ्च जङ्गमं भूतजातं तदेव कारणात्मकत्वात् कार्य्यस्य एवमपि सूक्ष्मत्वात् रूपादिहीनत्वात्तदविज्ञेयं इदं तदिति स्पष्टज्ञानार्हं न भवति एतदविदुषां योजनलक्षान्तरितमिव दूरस्थञ्च सविकारायाः प्रकृतेः परत्वात् विदुषां पुनः प्रत्यगात्मत्वादन्तिके च तत् नित्यसन्निहितं तथा च मन्त्रः तदेजति तन्नैजति तद्दूरे तदन्तिके तदन्तस्य सर्व्वस्य तदु सर्व्वस्यास्य वाह्यत इति एजति चलति नैजति न चलति तत् उ अन्तिके इति च्छेदः १५ किञ्च अविभक्त

CC-0. In Public Domain. Digitized by eGangotri

अविभक्तञ्चभूतेषुविभक्तमिवचस्थितं भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच १६

शाङ्करभाष्यं।

र्हिनकिंतार्हज्योतिषामपीति ज्योतिषामादित्यादीनामपितत्ज्ञेयंज्योतिरात्मचैत न्यज्योतिषेदानिंहिआदित्यादीनिज्योतींषिदीप्यन्तेयेनसूर्य्यस्तपतितेजसेद्धस्तस्यभास सर्वमिदंविभातीत्यादिश्रुतिभ्यःस्मृतेश्च इहैवयदादित्यगतंतेजइत्यादेस्तमसोऽज्ञाना त्परमस्पृष्टमुच्यते ज्ञानमिति ज्ञानादेर्दुःसम्पादनबुद्ध्याप्राप्तावसादस्योत्तंभनार्थ माहज्ञानममानित्वादिज्ञेयंज्ञेयंयत्तत्प्रवक्ष्यामीत्यादिनोक्तंज्ञानगम्यंज्ञेयमेवज्ञातं सत्ज्ञानफलमिति ज्ञानगम्यमुच्यतेज्ञायमानन्तज्ज्ञेयंतदेतत्त्रयमपिहृदिबुद्धौसर्वस्य प्राणिजातस्यविष्ठितंविशेषेणस्थितं१७ तत्रैवहिएवंविभाव्यतेयथोक्तार्थोपसंहारार्थो

आनन्दगिरिकृतटीका

मित्तोपादानंतयातेषांप्रलयेप्रभवेचकारणत्वाच्चतदस्तीत्याह प्रलयेति तर्हिकार्य्यका रणत्वस्यवस्तुत्वान्नाद्वैतमित्याशंक्याह यथेति १६ इतोपिज्ञेयस्यास्तित्वमित्याह किञ्चेति हेत्वन्तरमेवस्फोरयितुंशङ्कयति सर्वत्रेति नतत्तमोमन्तव्यमित्याह ने ति तर्हिकिन्तस्यरूपमितिपृच्छति किंतर्हीति तत्रोत्तरंज्योतिषामिति सूर्या दीनांबुद्ध्यादीनाञ्चप्रकाशकत्वात्अस्तिज्ञेयंब्रह्मेत्याह ज्योतिषामिति तदेवोपपा दयति आत्मेति तत्रश्रुतिंइयंप्रमाणयति येनेति उक्तेऽर्थेवाक्यशेषमपिदर्शयति स्मृते श्चेति ज्ञेयस्यात्मनःतमस्त्वेपितमअस्पृष्टत्वमाशंक्योक्तं तमसइति उत्तरार्द्धस्यतात् पर्यमाह ज्ञानादेरिति उक्तज्ञानसमुद्दीपनंप्रकटीकरणमितियावत् ज्ञानममानि

स्वामिकृतटीका

किञ्च अविभक्तमिति भूतेषुस्थावरजङ्गमात्मकेष्वविभक्तंकारणात्मनाऽभिन्नंका र्य्यात्मनाविभक्तंभिन्नमिवस्थितंच समुद्रात्जातंफेनादिसमुद्रादन्यन्नभवति तत्स्व रूपमेवोक्तं ज्ञेयंभूतानांभर्तृचपोषकंस्थितिकाले प्रलयकालेच ग्रसिष्णुग्रसनशी लं सृष्टिकालेच प्रभविष्णु नानाकार्य्यात्मनाप्रभवनलीलं १६

भाषाअनुवाद

औरइसअध्यायकेबारहवें श्लोकसेकहाजोज्ञेयपदवाच्यब्रह्मभूताख्य सोस्थावरज ङ्गमसमूहमे अविभक्तअर्थात्कारणरूपसेअभिन्न औरकार्यरूपसेसमुद्र फेनकेसमा नभिन्नवर्त्तमानहै और समस्तभूतोंकेभर्त्ता अर्थात्स्थितिकालमेंप्रतिपालक औप्र लयमेंसंहारक तथासृष्टिकालमे स्वयंआप नानाकार्यरूपसे प्रगटहोतेहैं १६

CC-0. In Public Domain. Digitized by eGangotri

ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यते ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यविष्ठितं १७

शाङ्करभाष्यं।

यंश्लोकमारभ्यतेइतिज्ञेवमितिइत्येवंज्ञेवंमहाभूतादिश्लोकान्तंतथाज्ञानममानित्वादितत्त्वज्ञानार्थदर्शनपर्य्यन्तंज्ञेयज्ञेयंयत्तदित्यादितमसःपरमुच्यतइत्येवमन्तमुक्तं समासतः संक्षेपत एतावान्सर्वोहिवेदार्थोगीतार्थश्चोपसंहृत्योक्तोस्मिन्सम्यक्दर्शनेकोधिक्रियतइत्युच्यते मद्भक्तोमयीश्वरेसर्वज्ञे परमगुरौवासुदेवेसमर्पितसर्वात्मभावेंयत्पश्यति शृणोति स्पृशतिवा सर्वमेवभगवान्वासुदेवइत्येवंग्रहाविष्टबुद्धिर्मद्भक्तःसन् एतत्यथोक्तंसम्यक्दर्शनंविज्ञायमद्भावायममभावोमद्भावः परमात्मभावस्तस्मैपरमात्मभावायोपपद्यते युज्यते घटते मोक्षंगच्छति १८ तत्रसप्तमेईश्वरस्यहृद

आनन्दगिरिकृतटीका।

त्वादिकरणव्युत्पत्तेरतिशेषः ज्ञानगम्यंज्ञेयमितिपुनरुक्तिंशङ्कित्वोक्तं ज्ञेयमितिउक्तलयस्यबुद्धिस्थतयाप्राकट्यंप्रकटयति तदेतदिति १७

स्वामिकृतटीका।

किञ्च ज्योतिषामपीति ज्योतिषांसूर्य्यादीनामपि तत्ज्योतिःप्रकाशकंयेनसूर्य्यस्तपतितेजसेद्धःनतत्रसूर्य्योभाति नचन्द्रतारकं नेमाविद्युतोभान्तिकुतोऽयमग्निस्तमेवभान्तमनुभातिसर्वं तस्यभासासर्वमिदंविभातीत्यादिश्रुतेः अतएवतमसोऽज्ञानात्परंतेनासंस्पृष्टमुच्यते आदित्यवर्णंतमसःपरस्तादित्यादिश्रुतेः ज्ञानञ्चादेवबुद्धिवृत्तावभिव्यक्तं तदेवरूपाद्याकारेणज्ञेयञ्चज्ञानगम्यञ्चतदेवअमानित्वादिलक्षणेनपूर्वोक्तज्ञानसाधनेनप्राप्यमित्यर्थः ज्ञानगम्यंविशिनष्टि सर्वस्यप्राणिमात्रस्यहृदिविशेषेणाप्रच्युतस्वरूपेणनियन्तृतयास्थितं धिष्ठितमितिपाठेअधिष्ठायस्थितमित्यर्थः १७

भाषा अनुवाद

औरसोब्रह्म जोतिरूपजोसूर्यचन्द्रतारागणविद्युतऔअग्नि इनसबकाजोतिकहेप्रकाशकहैं जिससेयेसबप्रकाशमानहैं औरयेसबजिसब्रह्मकोनहींप्रकाशकरिसकतेहैं ऐसेब्रह्मसेयहसमस्तजगतप्रकाशितहै यहश्रुतिकहतीहैं इसीसे तमजोअज्ञानतिससेपरहै अर्थात्अज्ञानका लेशभीवहांनहींहै आदित्यवर्णस्तमसःपरस्तात् इसश्रुतिनेकहाहै औरसोईब्रह्मबुद्धिवृत्तिमे ज्ञानरूपप्रगटहै औरसोईरूपादिआकाररूपसे ज्ञेयकहेज्ञानयोग्यहै औरज्ञानगम्यअर्थात् पूर्वोक्तअमानित्वआदिलक्षण ज्ञानकेसाधनोंसेप्राप्यहै क्योंकि प्राणीमात्रकेहृदयमे नियन्ता अन्तर्यामी चेतनरूपसे स्थितहै इसकोज्ञानदृष्टिसेदेखो १७

CC-0. In Public Domain. Digitized by eGangotri

इतिक्षेत्रंतथाज्ञानंज्ञेयञ्चोक्तंसमासतः मद्भक्तएतद्विज्ञायमद्भावायोपपद्यते १८

शाङ्करभाष्यं

प्रकृतीउपन्यस्तेपरापरेक्षेत्रक्षेत्रज्ञलक्षणेएतद्योनीनि भूतानीतिचोक्तं क्षेत्रक्षेत्रज्ञप्रकृतिद्वयजोनित्वकथंभूतानामित्ययमर्थोऽधुनोच्यते प्रकृतिमिति प्रकृतिंपुरुषञ्चैवेश्वरस्यप्रकृती तौप्रकृतिपुरुषावुभावप्यनादी नविद्यतेआदिर्ययोस्तावनादी

आनन्दगिरिकृतटीका।

तत्रानुभवमनुकूलयति तत्रैवेति तमर्थशुद्ध्यर्थंसविकारंक्षेत्रंपदवाक्यार्थविवेकसाधनज्ञानानित्वादितत्पदार्थञ्चशुद्धंतज्ज्ञावोक्त्यर्थमुक्तातेषांफलमुपसंहरति यथोक्तेति पूर्वार्द्धंविभजते इत्येवमिति वक्ष्यान्तरेसति किमितित्रितयमेवसंक्षिप्योपहृतंतत्राह एतावानिति उत्तरार्द्धमाकांक्षाद्वारावतारयति अस्मिन्निति ईश्वरेसमर्पितसर्वात्मभावमेवाभिनयति यत्पश्यतीति विज्ञाय लब्धेत्यर्थः १८

प्रकृतिमित्यादि वक्ष्यमाणमनन्तरपूर्वग्रन्थसम्बन्धीत्याशंक्यव्यवहितेनसम्बन्धार्थंव्यवहितमनुवदति तत्रेति तयोश्चप्रकृत्योरपिप्रकृत्योरुक्तभूतकारणत्वमित्याह एतदिति भूतानामिवप्रकृत्योरपिप्रकृत्यन्तरापेक्षाभूतयोनितेतिशङ्कते क्षेत्रेति तत्राकृताभ्यागमादिवारणाय वन्ध्यस्यनिदानज्ञानार्थमात्मनोविक्रियावत्त्वादोषनिरासार्थञ्चप्रकृतिपुरुषयोरनादित्वं क्षेत्रत्वेनोक्तांप्रकृतिं प्रकृतिविकारभावत्वञ्च दर्शयति अयमर्थइति सचयोयत्स्वभावश्चेत्युद्दिष्टंव्याचष्टे प्रकृतिमिति ईश्वरस्यापराप्रकृतिशब्देनोक्ता परातु प्रकृतिर्जीवाख्यापुरुषशब्देन विवक्षितेति व्याकरोति

स्वामिकृतटीका।

उक्तंक्षेत्रादिकमधिकारिफलसहितमुपसंहरति इतीति इत्येवंक्षेत्रंमहाभूतादिधृत्यन्तंतथाज्ञानञ्चअमानित्वादितत्त्वज्ञानार्थदर्शनान्तं ज्ञेयञ्चअनादिमत्परंब्रह्मेत्यादि विष्ठितमित्यन्तं वशिष्ठादिभिर्विस्तरेणोक्तं सर्वमपिमयासंक्षेपेणोक्तं एतज्ज्ञपूर्वाध्यायोक्तलक्षणोमद्भक्तायब्रह्मत्वायोपपद्यते योग्योभवति १८

भाषाअनुवाद।

अबअधिकारी औफलसहित कहाजोक्षेत्रादि उसकातात्पर्यकहतेहैं किइस अध्यायकेपंचयेश्लोकसेलेकर औरसत्रहेंतक गेयस्वरूप जोवसिष्ठादिऋषियोंनेविस्तारसेकहाहै सोसबमैंनेंसंक्षेपसेकहा सोमेरेभक्त यहजानिकरिके ब्रह्मताकीप्राप्तिहोनेकेयोग्यहोतेहैं अर्थात्मेरेभावकोपावतेहैं अर्जुनसोतुमजानो १८

CC-0. In Public Domain. Digitized by eGangotri

प्रकृतिंपुरुषञ्चैवविद्ध्यनादीउभावपि विकारांश्चगुणांश्चैवविद्धिप्रकृतिसम्भवान् १९

शाङ्करभाष्यं

नित्यत्वादीश्वरस्यतत्प्रकृत्योरपि युक्तंनित्यत्वेनभवितुंप्रकृतिद्वयत्वमेवहि ईश्वरस्येश्वरत्वंयाभ्यांप्रकृतिभ्यांईश्वरोजगदुत्पत्तिस्थितिप्रलयहेतुस्तेद्वेअनादीसत्यौसंसारस्यकारणंनआदीअनादीइति तत्पुरुषसमासंकेचिद्वर्णयन्ति तेनहिकेवलेश्वरस्यकारणत्वंसिध्यति यदिपुनःप्रकृतिपुरुषावेवनित्यौस्यातांतत्कृतमेवजगन्नेश्वरस्यजगतःकर्तृत्वंतदसत्प्राक्प्रकृतिपुरुषयोरुत्पत्तेरीप्सितव्याभावात् ईश्वरस्यानीश्वरत्वप्रसङ्गात् ससंसारस्यनिर्निमित्तत्वेनित्यमुक्तत्वप्रसङ्गात् शास्त्रानर्थक्यप्रसङ्गात् बन्धमोक्षाभावप्रसङ्गाच्च नित्यत्वेपुनरीश्वरप्रकृत्योःसर्वमेतदुपपन्नंभवेत्कथंविकारांश्चगुणांश्चैववक्ष्यमाणान्बुद्ध्यादिदेहेन्द्रियान्तान्गुणांश्चसुखदुःखमोहप्रत्ययाकारपरिणतान् विद्धिजानीहि प्रकृतिसम्भवान्प्रकृतिरीश्वरस्यविकारकारणंशक्तिःगुणात्मिकामया सासम्भवोयेषांविकाराणांगुणानाञ्चतान्विकारान्गुणांश्चविद्धिजानीहि प्रकृतिसंभवान् प्रकृतिपरिणामान् १९ केपुनस्तेविकारागुणाश्चप्रकृतिसम्भवाः कार्यमिति कार्यकारणकर्तृत्वेकार्यंशरीरं कारणानितत्स्थानित्रयोदशदेहस्यारम्भकाणि भूतानि विषयाश्च प्रकृतिसम्भवाविकाराःपूर्वोक्तादेहकार्य्यग्रहणेनगृह्यन्ते गुणाश्च प्रकृतिस

भाषाअनुवाद

च्चेवस्वरूपओजोजडअदृश्यआदिऔस्वभावओजैसाइच्छादिधर्मविशिष्टसोसवपूर्व हींविस्काररूपसेकहचुके अबपूर्व अङ्गीकृतयहोच्चेवजैसेइन्द्रियआदिविकारसेयुक्त औरजैसेप्रकृतिपुरुषसंयोगसेप्रगटहोयहै औजिसप्रकारस्थावरजंगम आदिभेदसेभिन्नभिन्नस्वरूपहोयहै औरसोईच्चेवज्ञजोस्वरूपओजैसेप्रभावविशिष्टहैंसोसवप्रकृतिपुरुषकोसंसारहेतुत्वकहनेकेद्वारापांचश्लोकसेविस्काररूपकहतेहैं किसोईप्रकृति औपुरुषदोनोअनादिहैं जोइनकाकारणऔरढूंढोगेतोअनवस्थादोषपडेगाअर्थात्उसाकारणतिसकोकारणअैसेठिकानानलगैगाइससेसोइप्रकृतिपुरुषकोअनादिजानोतोईश्वरशक्तिप्रकृतिभीअनादिहै औईश्वरकाअंशभूतपुरुषभीअनादिहै औरदेहइन्द्रियआदिविकारतथागुणरूपपरिणामकोप्राप्तजोसुखदुखमोहआदिसोसवप्रकृतिसेहोतेहैंयहजानो परमेश्वरऔतदीयशक्तियोंकोअनादित्वभाष्यकारश्रीशङ्कराचार्यनेविस्तारसेकहा इससेइहांग्रन्थबढ़नेकेडरसेमैंनेनहीं कहादेहइन्द्रीसुखदुखसवप्रकृतिहीकेकार्यहैं १९ भगवानश्रीकृष्णजीसकलविकारप्र

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

म्भवाः सुखदुःखमोहात्मकाः कारणाश्रयत्वात् कारणग्रहणेनगृह्यन्ते तेषां कार्यकारणानांकर्त्तृत्वमुत्पादकत्वं यत्तत् कार्यकारणकर्त्तृत्वं तस्मिन् कार्यकारणकर्त्तृत्वे हेतुः कारणमारम्भकत्वेनप्रकृतिरुच्यते एवं कार्यकारणकर्त्तत्वेनसंसारस्यकारणंप्रकृति कार्यकारणयोः कर्त्तृत्व इत्यस्मिन्नपिपाठेकार्यंयद्यस्यविपरिणामन्तत्तस्यकार्यंविकारः

आनन्दगिरिकृतटीका

ईश्वरस्येति तयोरनादित्वं व्युत्पादयति नेत्यादिना तत्रयुक्तिमाह नित्यत्वादीश्वरस्येति ईश्वरस्योक्तप्रकृतिद्वयवत्वं कथमित्याशंक्याह प्रकृतीति तस्यजगज्जन्मादौस्वातन्त्र्यमेवईश्वरत्वं नप्रकृतिद्वयवत्वमित्याशंक्याह याभ्यामिति प्रकृत्योरनादित्वंकुत्रोपयुक्तमित्याशंक्याह तेइति मतान्तरमाह नेत्यादिना तयोर्मूलकारणत्वाभावेकस्यतदेष्टव्यमित्याशंक्याह तेनहीति प्रकृत्योरेवमूलकारणत्वेश्रुतिस्मृतिसिद्धमीश्वरस्यतथात्वंन स्यादित्याह यदीति प्रकृतिद्वयस्यकार्यत्वपक्षं प्रत्याह तदासदिति किञ्चप्रकृतिद्वयमनपेक्ष्यईश्वरस्यसंसारहेतुत्वेस्वातन्त्र्यान्मुक्तानामपिततःसंसाराप्तेरनिषेधान्मोक्षशास्त्रप्रामाण्यान्नतस्यैवसंसारहेतुतेत्याह संसारस्येति निर्निमित्तत्वं प्रकृतिद्वद्वयापेक्षामृतेपरस्यैवनिमित्तत्वमितियावत् किञ्चवार्यत्वेप्रकृत्योस्तदुदयात्पूर्वं बन्धाभावेतद्विश्लेषान्मनोमोक्षस्याभावात् कदाचिदुभयाभावेपुनस्तदप्रसङ्गान्नप्रकृतिद्वयस्यकार्यतेत्याह बन्धेति प्रकृत्योर्मूलकारणत्वेनानुपपत्तिरित्याह नित्यत्वइति स्वपक्षे दोषाभावंप्रश्नपूर्वकंप्रपञ्चयति कथमित्यादिना सम्भवःसत्ताप्रापकोहेतुः प्रकृतेरनादित्वेविकाराणांगुणानाञ्चतत् कार्यत्वादात्मनोनिर्विकारत्वंनिर्गुणत्वञ्चसिध्यतीतिभावः १९ विकाराणांगुणानांप्रकृतेश्चस्वरूपमाकांक्षाद्वारानिर्णेतुमुत्तरश्लोक

स्वामिकृटीका।

तदेवं तत्क्षेत्रंयच्चयादृक्चेत्येतावत्प्रपञ्चितमिदानीन्तु यद्विकारियतश्चयत्सचयो यत्प्रभावश्चेत्येतत्पूर्वप्रतिज्ञातमेप्रकृतिपुरुषयोः संसारहेतुत्वकथनेनप्रपञ्चयतिप्रकृतिमितिपञ्चभिःतत्रप्रकृतिपुरुषयोरादिमत्त्वेतयोरपिप्रकृत्यन्तरेणभाव्यमित्यनवस्थापत्तिःस्यादतस्तावुभावनादीविद्धि अनादेरीश्वरस्यशक्तित्वात्प्रकृतेरनादित्वं पुरुषोपितदंशत्वादनादिरेव अत्रचपरमेश्वरस्यतच्छक्तीनाञ्चानादित्वं श्रीमच्छङ्करभगवद्भाष्यकृद्भिरतिप्रबन्धेनोपपादितमितिग्रन्थबाहुल्यान्नास्माभिःप्रपंच्यते विकारांश्च देहेन्द्रियादीन्गुणांश्चगुणपरिणामान्सुखदुःखमोहादीन्प्रकृतेःसंभूतान्विद्धि १९

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

विकारिकारणंतयोर्विकारविकारिणोःकार्य्यकारणयोःकर्त्तृत्वइति तान्येवकार्यकारणान्युच्यन्तेअथवाषोडशविकाराःकार्यंसप्तप्रकृतिविकृतयःकारणान्तान्येव कार्य्यकारणानिउच्यन्ते तेषांकर्त्तृत्वेहेतुःप्रकृतिरुच्यतेआरम्भकत्वेनैवपुरुषश्चसंसारस्यकारणंयथास्यात्तदुच्यते पुरुषःजीवःक्षेत्रज्ञःभोक्ताइतिपर्यायः सुखदुःखानां भोग्यानांभोक्तृत्वउपलब्धृत्वेहेतुरुच्यते कथंपुनरनेनकार्यकारणकर्त्तृत्वेनसुखदुःखभोक्तृत्वेनचप्रकृतिपुरुषयोःसंसारकारणत्वमुच्यतइति अत्रोच्यतेकार्य्यकारणसुखदुःखरूपेणहेतुफलात्मनाप्रकृतेःपरिणामाभावेपुरुषस्यचैतन्यस्यासतितदुपलब्धृत्वेकृतः संसारःस्यात्यदापुनःकार्यैःकारणहेतुफलात्मनापरिणततयातयाप्रकृत्याभोग्ययापुरुषस्यतद्विपरीतस्यभोक्तृत्वेनाविद्यारूपःसंयोगःस्यात्तदासंसारःस्यादित्यतोयत्प्रकृतिपुरुषयोःकार्य्यकारणकर्तृत्वेनसुखदुःखभोक्तृत्वेनचसंसारकारणत्वमुक्तं तत्युक्तमुक्तंकःपुनरयंसंसारोनाम सुखदुःखसंभोगःसंसारःपुरुषस्यच सुखदुःखानांसम्भोक्तृत्वंसंसारित्वमिति २० यत्पुरुषस्यसुखदुःखानांभोक्तृत्वंसंसारित्वमित्युक्तं तस्यतत्

आनन्दगिरिकृतटीका

पूर्वार्द्धंपातयति केपुनरिति पुरुषस्यानादित्वेकृतबन्धहेतुत्वमाह पुरुषइति पूर्वार्द्धं व्याचष्टे कार्य्यमित्यादिना ज्ञानेन्द्रियपञ्चकंकर्मेन्द्रियपञ्चकं मनोबुद्धिरहङ्कारश्चेति त्रयोदशकरणानि तथापिभूतानांविषयाणाञ्चाग्रहणात्कथन्तेषांप्रकृतिकार्यतेत्याशंक्याह देहेतितथापिगुणानामिहाग्रहणान्नप्रकृतिकार्य्यत्वंतत्राह गुणाश्चेतिउक्तरीत्यानिःप्रसमर्थमाह एवमितिपाठान्तरमनूद्यव्याख्यापूर्वकमर्थाभेदायाह कार्येत्यादिना व्याख्यान्तरमाह अथवेतिएकादशेन्द्रियाणिपञ्चविषयाइतिषोडशसंख्याकविकारोत्रकार्य्यशब्दार्थःमहानहंकारोभूततन्मात्राणीतिप्रकृतिविकृतयःसप्तकारणं तेषां आरम्भकत्वेनकर्त्तृत्वेनहेतुराश्रयोमूलप्रवृत्तिरित्यर्थः उत्तरार्द्धस्यतात्पर्यमाह पुरुषश्चेति तस्यपरमात्मत्वंव्यवच्छिनत्ति जीवइति तस्यप्राणधारणनिमित्तस्यतदर्थञ्चेतनमाह क्षेत्रज्ञइति तस्यानौपाधिकत्वंवारयति भोक्तेति तयोःसंसारकारणत्वमुपपादयितुंशंकयति कथमिति अन्वयव्यतिरेकाभ्यांतयोस्तथात्वमित्याह अतेति तत्रव्यतिरेकंदर्शयति कार्येति नहिनित्यमुक्तस्यात्मनःस्वतःसंसारोस्तीत्यर्थः इदानीमन्वयमाह यदेति अन्वयादिफलमुपसंहरति अतइति आत्मनोविक्रियस्यसंसरणंनोचितमित्याक्षिपति कःपुनरिति सुखदुःखान्यतरसाक्षात्कारोभोगःसचाक्रियस्यैवदृष्टः,

CC-0. In Public Domain. Digitized by eGangotri

कार्य्यकारणकर्त्तृत्वे हेतुःप्रकृतिरुच्यते पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्यते २०

आनन्दगिरिकृतटीका

संसार.तथाविधंभोक्तृत्वमस्यसंसारित्वमित्युत्तरमाह सुखेति श्लोकव्याख्यासमाप्तावितिशब्दः २० श्लोकान्तरंप्रश्नोत्तरत्वेनावतारयति यदिति निमित्तंवक्तुमादौसंसारित्वमस्याविद्याध्यासादित्याह पुरुषइति यस्मात्प्रकृतिमात्मत्वेनगतस्तस्माद्भुक्तइतियोजना गुणविषयंभोगमभिनयति सुखीति अविद्यायाभोगहेतुत्वात्किंकारणा

स्वामिकृतटीका।

विकाराणांप्रकृतिसम्भवत्वंदर्शयन्पुरुषस्यसंसारहेतुत्वंदर्शयति कार्येति कार्यं शरीरंकारणानिसुखदुःखसाधनानीन्द्रियाणितेषांकर्त्तृत्वतदाकारपरिणामेप्रकृतिर्हेतुरुच्यतेकपिलादिभिः पुरुषोजीवस्तु तत्कृतसुखदुःखानांभोक्तृत्वेहेतुरुच्यते अयंभावःयद्यप्यचेतनायाःप्रकृतेःस्वतःकर्त्तृत्वंनसंभवति तथापुरुषस्याप्यविकारिणोभोक्तृत्वंनसम्भवति तथापिकर्त्तृत्वंनामक्रियानिर्व्वर्त्तकत्वंतच्चाचेतनस्यापि चेतनाद्दृष्टवशात्चैतन्याधिष्ठितत्वात्सम्भवति यथावह्नेरूर्द्ध्वज्वलनंवायोस्तिर्य्यग्गमनं वत्साद्दृष्टवशात्स्तन्यप्रयसःक्षरणमित्यादि अतःपुरुषसन्निधानात्प्रकृतेःकर्त्तृत्वमुच्यते भोक्तृत्वञ्चसुखदुःखसंवेदनं तच्चचेतनधर्म्मएवेतिप्रकृतिसन्निधानात् पुरुषस्यभोक्तृत्वमुच्यतइति २० तथाप्यविकारिणोजन्मरहितस्यचभोक्तृत्वंकथमित्यत्राह पुरुषइति

भाषा अनुवाद

सेऊत्पन्न है यहदेखायअबपुरुषकोसंसारहोनेकाहेतुइसश्लोकसेदेखावतेहैं किकार्य्यजोशरीरऔरकारणजोसुखदुखकेसाधनस्वरूपकहेकरनेवालीइन्द्रीसब औरइन्द्रियोंकोकर्त्तृत्वकहेसोसोरूपहोजानाइनसबकीकारणप्रकृतिहै यहकपिलआदिऋषियोंनेकहा औरपुरुषजोजीवसोशरीरइन्द्रीआदिकृतसुखदुखसबकाकारणस्वरूपकहाहै तात्पर्ययहकियद्यपिअचेतनप्रकृतिआपसेकुछनहींकरसकतीऔरविकारीपुरुषकोभीभोक्तृत्वकहेभोगकरनायहअसंभवहैतौभीकर्त्तृत्वशब्दकाअर्थयहहैकिक्रियाकरनाअचेतनप्रकृतिकोभीचैतन्यरूपजीवकेअदृष्टवशतेसम्भवैहै जैसेअचेतनहोकेभीअग्निज्वालाकाऊर्धगमनऔवायुकातिर्छागमनऔरवत्सोंको जैसे दूधरक्षणकरैहै तैसेहीपुरुषकीसान्निध्यकहेअबलंबसेप्रकृतिकोकर्त्तृत्वहै औरभोक्तृत्वजोसुखदुखकाज्ञान सोचेतनकाधर्महैइससेप्रकृतिसंनिधानकहेमायाकीनिकटताकोप्राप्तहोय पुरुषकोभीभोक्तृत्वकहाहै२० जोकहोकिअविकारीऔजन्मरहित

CC-0. In Public Domain. Digitized by eGangotri

पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजान्गुणान् कारणंगुणसङ्गोस्यसदसद्योनिजन्मसु २१

शाङ्करभाष्यं

किंनिमित्तमित्युच्यतेपुरुषइति पुरुषोभोक्ताप्रकृतिस्थःप्रकृतावविद्यालक्षणायांकार्यं कारणरूपेणपरिणतायांस्थितःप्रकृतिस्थःप्रकृतिमात्मत्वेनगतइत्येवंहियस्मात्तस्माद्भुंक्तउपलभतइत्यर्थःप्रकृतिजान्प्रकृतितोजातान्सुखदुःखमोहाकाराभिव्यक्तान्गुणान् सुखीदुःखीमूढःपण्डितोऽहमित्येवंसत्यामप्यविद्यायांसुखदुःखमोहेषुगुणेषु भुज्यमानेषुयःसङ्गआत्मभावःसंसारस्य सप्रधानंकारणंजन्मनःसयथाकामोभवति तत्क्रतुभवतीत्यादिश्रुतेःतदेतदाहकारणहेतुर्गुणसंगःगुणेषुसंगोस्यभोक्तुःसदसद्योनिजन्मसु सतश्चासतश्च योनयःसदसद्योनयस्तासुसदसद्योनिषुजन्मानितानिसदसद्योनिजन्मानितेषुसदसद्योनिजन्मसुविषयभूतेषुकारणगुणसंगोथवासदसद्योनिजन्मस्थस्यसंसारस्यकारणंगुणसंगइतिसंसारपदमध्याहार्यंसद्योनयोदेवादियोनयःअसद्योनयःपश्वादियोनयःसामर्थ्यात्सदसद्योनयोमनुष्ययोनयोऽपिविरुद्धाद्रष्टव्याःएतदुक्तंभवतिप्रकृतिस्थत्वाच्चाविद्यागुणेषुचसङ्गःकामःसंसारस्यकारणमिति तच्चपरिवर्जनायोच्यतेअस्यचनिवृत्तिकारणंज्ञानवैराग्ये ससन्न्यासेगीताशास्त्रेप्रसिद्धं तच्चज्ञानंपुरस्तादुपन्यस्तं क्षेत्रक्षेत्रज्ञविषयंयत्तज्ज्ञात्वाऽमृतमश्नुतइत्युक्तञ्चान्यापोहेनातद्धर्माध्यारोपेणच २१

आनन्दगिरिकृतटीका

न्येषणयेत्याशंक्याह सत्यामपीति संगस्यजन्महेतुत्वेमानमाह सयथेति उक्तेर्थेहितीयार्द्धमवतार्य व्याचष्टे तदेतदित्यादिना साध्याहारंयोजनान्तरमाह अथवेति सदसद्योनीर्विविच्यव्याचष्टे सद्योनयइति योनिद्वयनिर्देशान्मध्यवर्त्तिन्योमनुष्ययोनयोपिध्वनिताइत्याह सामर्थ्यादिति संगस्यसंसारकारणत्वेनाविद्याया

भाषाअनुवाद

जोआत्मा तिसकोभोक्तृत्वकहेभोगनाकैसेसंभवहैकिजिसहेतुसोईपुरुषप्रकृतिस्थ अर्थात्प्रकृतिकाकार्यजोशरीर तिसमेतदात्मरूपहोवासकरैहै इससेउसशरीरसेप्रगटजोसुखदुखआदि तिनकोभूलसेभोगकरैहै जैसेमनुष्यकोईवस्तुयाद्रव्यपाय अपनीकरमानि फेरिउसकेजानेसेदुखीहोताहै कहोयहांदुखकाकारणअभिमान छोडऔरक्याहै औरसतजोदेवमनुष्यजोनि औरअसत्जोपशुपक्षीआदिजोनि तिनमेंजोइसपुरुषकाजीवरूपजन्म सोगुणकहेशुभअशुभकर्मकारीइन्द्रीगण तिनकेसंसर्गसेहोय है संगहीऊंचीनीचीदेहधारणमे कारणरूपहै यह जानो २१

CC-0. In Public Domain. Digitized by eGangotri

उपद्रष्टानुमन्ताचभर्त्ताभोक्तामहेश्वरः परमात्मेतिचाप्युक्तोदेहेऽस्मिन्पुरुषःपरः२२

आनन्दगिरिकृतटीका ।

स्तत्कारणत्वमेकस्मादेवहेतोस्तदुपपत्तेरित्याशंक्याह एतदिति अविद्योपादानसंगो निमित्तमित्युभयोरपिकारणत्वंसिध्यतीत्यर्थः द्विविधहेतूक्तेर्विवक्षितंफलमाह त त्रेति संसर्गस्याज्ञानस्यस्ततोनिवृत्तेस्तन्निवर्त्तकंवाचग्रहित्याशंक्याह अस्येति वैराग्ये सतिसंन्यासस्तत्पूर्वकञ्चज्ञानंसासंगाज्ज्ञाननिवर्त्तकमित्यर्थः उक्तेज्ञानेमानमाह गी तेति अध्यायादौचोक्तंज्ञानमुदाहृतमित्याह तत्रेति तदेवज्ञानंयज्ज्ञात्वेत्यादिना नसत्तन्नासदित्यन्तेनान्यनिषेधेनसर्व्वतःपाणिपादमित्यादिनाचातद्धर्म्माध्यासेनोक्त मित्याह यज्ज्ञात्वेति २१ प्रकृतस्यैवमोक्षहेतोर्ज्ञानस्यसाक्षान्निर्देशायोत्तर

स्वामिकृतटीका ।

स्थस्यात्प्रकृतिस्थस्तत्कार्यदेहेहेतादात्म्येनस्थितःपुरुषःअतस्तज्जनितान् सुखदुःखा दीन्भुङ्क्ते अस्यचपुरुषस्यसतीषुह्येवादियोनिषुअसतीषुतिर्यगादियोनिषुयानिज न्मानि तेषुगुणसङ्गोगुणैःशुभाशुभकर्म्मकारिभिरिन्द्रियैःसङ्गःकारणमित्यर्थः २१

भाषा अनुवाद

उक्तरीतिसे प्रकृतिजो माया तिसकेअविवेकवशतेजीवको अहंकर्त्ता अहं भोक्ता इत्यादिकल्पितमानसंसारहै परविचाररूपसेतो इसजीवकोसंसारनहींहै इ सीआशयपरअबपुरुषकास्वरूपकहतेहैं किइसप्रकृतिकाकार्यरूपजोशरीर तिसमे वर्त्तमानहोकेभीजीव प्रकृतिसेभिन्नकहेप्रकृतिकेगुणोंसेयुक्तनहीं उनसेअलगहै क्योंकिईश्वरअंशजीवउपद्रष्टाअर्थात्भिन्नरूपसेसमीपमेरहकरदेखनेवाला साक्षी मात्रहै औरअनुमन्ताअर्थात्समीपसम्बन्धसेअनुग्राहककहेअनुमोदनकर्त्ता मान नेवालाहै सोईश्रुतिकहतीहैं किएकस्वयंप्रकाशरूपजोपरमात्मा सोभूतमात्रमेंनि गूढभावसेस्थितहै औरसर्व्वव्यापीतावतप्राणीकाअन्तर्य्यामीहै औरसकल कर्म्मका नियन्ताऔभूतमात्रकाअधिष्ठानरूपऔ द्रष्टाऔससस्तभूतोंकाचैतन्यकारीऔअद्वि तीय तथागुणोंसेअतीतकहेअलगहैऔरयहपुरुषईश्वरसम्बन्धरूपसे भर्त्ताकहेपो षनकारीप्रतिपालकहै औरमहेश्वरकहेब्रह्मादिकोंकाभीअधिपतिअर्थात्स्वामीहै सोईश्रुतिहै कियहपुरुषसबकाईश्वरऔरसर्व्वभूतकाअधिपति तथाभूतमात्रका प्र तिपालक है २२

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

तस्यैवपुनःसाक्षान्निर्देशःक्रियते उपद्रष्टेति उपद्रष्टासमीपस्थःसन्द्रष्टा स्वयम व्याप्तोयथाऋत्विग्यजमानेषु यज्ञकर्म्मव्याप्तेषुतटस्थोन्योऽव्याप्तोयज्ञविद्याकुश लःऋत्विग्यजमानव्यापारगुणदोषाणामीक्षिता तद्वत्कार्यकारव्यापारेषु अव्या प्तोऽन्योविलक्षणस्तेषांकार्यकारणानांसव्यापाराणां सामीप्येनद्रष्टृत्वादुपद्रष्टा अ थवादेहचक्षुर्म्मनोबुद्ध्यात्मानोद्रष्टारस्तेषांवाक्ष्योद्रष्टा देहस्तआरभ्यान्तरतमश्चप्रत्य क्समीपेआत्माद्रष्टा यतःपरोन्तरोनास्तिद्रष्टा सोतिशयसामीप्येनद्रष्टृत्वादुपद्रष्टा स्यात् यज्ञोपद्रष्टृत्वाद्वासर्व्वविषयीकरणादुपद्रष्टाअनुमन्ताच अनुमोदनमनुमन नंकुर्व्वत्सुतत्क्रियासुपरितोषस्तत्कर्त्तानुमन्ताचाथवाअनुमन्ताकार्यकारणप्रवृत्ति षुस्वयमप्रवृत्तोपिप्रवृत्तइवतदनुकूलोविभाव्यतेतेनानुमन्ताथवाप्रवृत्तान् स्वव्यापारेषु तत्साक्षिभूतःकदाचिदपिननिवारयतीत्यनुमन्ताभर्त्ताभरणंनामदेहेन्द्रियमनोबुद्धी नांसंहतानांचैतन्यात्मपरार्थेननिमित्तभूतेनचैतन्याभासानांयत् स्वरूपावधारणं तच्चै तन्यात्मकृतमेवेतिभर्त्तात्मेत्युच्यते भोक्तात्युष्णवन्नित्यचैतन्यस्वरूपेणबुद्धेःसुखदुःखमो हात्मकाःप्रत्ययाः सर्व्वविषयविषयाश्चैतन्यात्मग्रस्ताइवजायमानाविभक्ताविभाव्यन्त इतिभोक्तात्मोच्यते महेश्वरःसर्व्वात्मत्वाच्चस्वतन्त्रत्वाच्चमहान्ईश्वरश्चेति महेश्वरःप रमात्मादेहादीनां बुध्यन्तानांप्रत्यगात्मत्वेनकल्पितानामविद्ययापरमउपद्रष्टृत्वादि लक्षणआत्मेति परमात्मासोऽतःपरमात्मेत्यनेनशब्देनचाप्युक्तःकथितः श्रुतौक्वासौअ स्मिन्देहेपुरुषःपरोव्यक्तादुत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतइतियोवक्ष्यमाणः क्षे त्रज्ञश्चापिमांविद्धिइत्युपन्यस्तोव्याख्यायोपसंहृतश्चतमेतंयथोक्तलक्षणमात्मानं २२

आनन्दगिरिकृतटीका

श्लोकमुत्थापयति तस्येति कार्यकारणानांव्यापारवतांसमीपेस्थितःसन्निधिमात्रेण तेषांसाक्षीत्येवमर्थत्वेनउपद्रष्टेतिपदंव्याचष्टे समीपस्थइति लौकिकस्यैवद्रष्टुरस्यापि स्वव्यापाराविष्टतयानिःक्रियत्वविरोधमाशंक्याह स्वयमिति स्वव्यापाराद्दतेसन्निधि रेवद्रष्टृत्वंदृष्टान्तेनस्पष्टयति यथेति उपद्रष्टेत्यस्यार्थान्तरमाह अथवेति वक्तॄनांद्रष्टृत्वे पिकस्योपद्रष्टृत्वंतत्राह तेषामिति उपोपसर्गस्यसामीप्यार्थत्वेनप्रत्यगर्थत्वात्तत्रैवसा मीप्यावसानात् प्रत्यगात्माचद्रष्टाचेत्युपद्रष्टासर्व्वसाक्षीप्रत्यगात्मेत्यर्थः उक्तमेवव्यनक्ति य तइतियथायजमानस्यऋत्विजाञ्चयज्ञकर्म्मणिगुणम्वादोषम्वासर्व्वयज्ञाभिज्ञःसन्नुपद्र ष्टाविषयीकरोति तथायमात्माचिन्मात्रस्वभावःसर्व्वंगोचरयतीत्युपद्रष्टेति पक्षान्तर

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

यएवमिति यएवंयथोक्तप्रकारेणवेत्तिपुरुषंसाक्षादात्मभावेनायमहमिति प्रकृतिञ्च यथोक्तामविद्यालक्षणांगुणैःस्वविकारैः सहनिवर्त्तितामाभासमापादितांविद्ययासर्व थासर्वप्रकारेणवर्त्तमानोपिसभूयःपुनःपतितेऽस्मिन् विद्वच्छरीरेदेहान्तरायनाभि जायतेनोत्पद्यतेदेहान्तरंनगृह्णातीत्यर्थः अपिशब्दात्किमुवक्तव्यंसदृत्तस्योनजायतइ त्यभिप्रायः ननुयद्यपिज्ञानोत्पत्त्यनन्तरंपुनर्जन्माभावउक्तस्तथापिप्राक् ज्ञानोत्पत्तेः कृतानांकर्म्मणामुत्तरकालभाविनाञ्चयानिचातिक्रान्तान्यनेकजन्मकृतानि तेषांफल मदत्वानाशोनयुक्तइतिस्युस्त्रीणिजन्मानिकृतविप्रनाशी हिनयुक्तइति यथाफलेप्रद

आनन्दगिरिकृतटीका

माह यज्ञेति अनुमन्ताचेत्येतत्व्याकरोति अनुमन्तेति येस्वयंकुर्व्वन्तोव्यापारवन्तोभ वन्ति तेषुकुर्व्वत्सुसत्सुयास्तेषांक्रियास्तासुप्रार्थ्यस्वस्यपरितोषोऽनुमननन्तञ्चानुमोद नंतस्यसन्निधिमात्रेणकर्त्तायः सोऽनुमन्तेत्यर्थः व्याख्यान्तरमाह अथवेति तदेव स्फुटयति कार्य्येति अर्थान्तरमाह अथवेत्यादिना भर्त्तेति पदमादायभरणंकिं नामेति पृच्छति भर्त्तेति तद्रूपंनिरूपयन्नात्मनोभर्तृत्वंसाधयति देहेति भोक्तेयु क्तेक्रियावत्त्वेप्राप्तेभोगश्चिदवसानतेतिन्यायेविभजते अग्नीति विशेषणान्तरमादा यव्याचष्टे महेश्वरइति परमात्मत्वमुपपादयति देहादीनामिति अविद्याकल्पि तानामिति सम्बन्धः परमत्वंप्रकृष्टत्वंसःपूर्व्वोक्तविशेषणवानितियावत् परमात्मश ब्दस्यप्रकृतात्मविषयत्वेश्रुतिमनुकूलयति अतइति तस्यतटस्थंप्रमङ्गरात्प्रत्याचष्टे क्रेति कस्मात्परत्वन्तदाह अव्यक्तादिति तत्रैववाक्यशेषानुकूल्यमाह उक्तमइति सोऽस्मिन्देहेपरःपुरुषइतिसम्बन्धः शोधितार्थयोरैक्यज्ञानंप्रागुक्तंकृतोत्यास्तौति क्षेत्रज्ञञ्चेति २२

स्वामिकृतटीका।

तदनेनप्रकारेणप्रकृत्यविवेकादेवपुरुषस्यसंसारोनतुस्वरूपतइत्याशयेनतस्यस्व रूपमाह उपद्रष्टेति अस्मिन्प्रकृतिकार्य्येदेहेवर्त्तमानोऽपिपुरुषःपरोभिन्नएवनतइ त्यर्थः तत्रहेतवःयस्मादुपद्रष्टाष्टथग्भूतएवसमीपेस्थित्वाद्रष्टासाक्षीत्यर्थःत थाअनुमन्ताअनुमोदितैवसन्निधिमात्रेणानुग्राहकःसाक्षीचेताःकेवलोनिर्गुणश्चेत्या दिश्रुतेःतथाऐश्वरेणरूपेणभर्त्ताविधायकःभोक्तापालकइतिच महांश्चासावीश्वरश्चे ति ब्रह्मादीनामपिपतिरितिचपरमात्माअन्तर्यामीचेत्युक्तःश्रुत्या तथाचश्रुतिःएषस र्व्वेश्वरएषभूताधिपतिरेषलोकपालइत्यादि २२

CC-0. In Public Domain. Digitized by eGangotri

यएवंवेत्तिपुरुषंप्रकृतिञ्चगुणैःसह सर्व्वथावर्त्तमानोऽपिनसभूयोऽभिजायते २३

शाङ्करभाष्यं

त्तानामारब्धजन्मनांकर्मणांनचकर्मणां विशेषोऽवगम्यतेतस्मात्त्रिप्रकाराण्यपिकर्माणित्रीणिजन्मान्यारभेरन्संहतानिवासर्व्वाण्येकंजन्मारभेरन्अन्यथाकृतविनाशेसति सर्व्वत्रानाश्वासप्रसङ्गःशास्त्रानर्थक्यञ्चस्यादित्यतइदमयुक्तमुक्तंनसभूयोभिजायतइति नक्षीयन्तेचास्यकर्माणिब्रह्मविद्ब्रह्मैवभवतितस्यतावदेवचिरमिषीकातृणवत्सर्व्वकर्माणिप्रदूयन्तेइत्यादिश्रुतिशतेभ्यऊक्तोविदुषःसर्व्वकर्मदाहः इहापिचोक्तोयथैधांसीत्यादिनासर्व्वकर्मदाहोवक्ष्यतिचोपपत्तेश्चाविद्याकामक्लेशवीजनिमित्तानिहिकर्माणिफलारम्भकानिजन्मान्तराङ्कुरमारभन्तेइहापिचसाहङ्काराभिसन्धीनिकर्माणिफलारम्भकाणिनेतराणीति तत्रतत्रभगवतोक्तवीजान्यग्न्युपदग्धानिनरोहन्तियथापुनःज्ञानदग्धैस्तथाक्लेशैर्नात्मासम्पद्यतेपुनरिति अस्तुतावत्ज्ञानोत्पत्तेरुत्तरकालकृतानांकर्मणांज्ञानेनदाहोज्ञानसहभावित्वात्नत्विहजन्मनिज्ञानोत्पत्तेःप्राक्कृतानांज्ञानेनदाहोनत्वतीतानामनेकजन्मान्तरकृतानांदाहोयुक्तः नसर्व्वकर्म्माणीतिविशेषणात्ज्ञानोत्तरकालभाविनामेवसर्व्वकर्म्मणामिति चेन्नसंकोचत्वेकारणानुपपत्तेः यत्तूक्तं यथावर्त्तमानशरीरजन्मारम्भकाणिकर्म्माणिनक्षीयन्तेफलदानायप्रवृत्तान्येव सत्यपिज्ञानेतथाअनारब्धफलानामपिकर्मणांक्षयोनयुक्तइतितदसत्कथंतेषांमुक्तेषुवत् प्रवृत्तफलत्वात्यथापूर्व्वंलक्ष्यवेधायमुक्तइषुर्धनुषोलक्ष्यवेधोत्तरकालमपिआरब्धवेगक्षयात्पतनेनैवनिवर्त्ततेएवंशरीरारम्भकंकर्म्मशरीरस्थितिप्रयोजनेनिवृत्तेप्यासंस्कारवेगक्षयात्पूर्ववद्वर्त्ततएवयथासएवेषुःप्रवृत्तिनिमित्तानारब्धवेगस्त्वमुक्तोधनुषि प्रयुक्तोप्युपसंह्रियते तथानारब्धफलानिकर्म्माणिस्वाश्रयस्थान्येवज्ञानेननिर्वीजीक्रियन्तइति पतितेस्मिन्विद्वच्छरीरेनसभूयोभिजायतइति युक्तमेवोक्तमितिसिद्धं २३

भाषाअनुवाद

अैसीजोप्रकृतिऔपुरुष तिनकेविवेककेज्ञानवानमनुष्योंकीप्रशंसाकरतेहैं किजोलोगअैसेउपद्रष्टारूपपुरुषकोजानतेहैं तथाप्रकृतिकोऔप्रकृतिकेगुणरूपपरिणामकोप्राप्तकहेरूपान्तरकोप्राप्त सुखदुखसहितकोजानिसकैहैं तेईमनुष्यसंसारमेरहते सम्पूर्णविधिकोउल्लंघनकरकेभी पुनर्जन्मग्रहणनहींकरतेमुक्तहीहोतेहैं यहजानो २३ अैसीजोप्रकृतितिससेभिन्नजोआत्मातिसकेज्ञानहोनेकेविषयमेअनेक

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

यथोक्तेनप्रकारेणजीवेश्वरादिसर्वकल्पनाधिष्ठानत्वेनेत्यर्थःसाक्षादपरोक्षत्वेवेति यावत् यथोक्तामनाद्यनिर्व्वाच्यांसर्व्वानर्थोपाधिभूतामित्यर्थः विद्ययाप्रागुक्तैकत्वगोचरयाप्रकृतिमविद्यारूपांसकार्य्यामभावमापादितांयोवेत्तीति सम्बन्धः सर्व्वप्रकारेणविहितेननिषेधेनचेत्यर्थःपुनर्नकारोऽन्वयार्थः निपातसूचितंन्यायमाह अपीति नसभूयोभिजायतइत्युक्तमाक्षिपति नन्विति ज्ञानोत्पत्तेरनन्तरंजन्माभावस्योक्तत्वात्पुनर्देहारम्भमुपेत्यनाक्षेपःस्यादित्याशंक्याह यद्यपीति तथापिस्युस्त्रीणिजन्मानीतिसम्बन्धः वर्त्तमानेदेहेज्ञानात्पूर्व्वोत्तरकालीनानांकर्मणांफलमदत्वानाशायोगाज्जन्मद्वयमावश्यकमतीताऽनेकदेहेष्वपिकृतकर्मणामभुक्तांक्षीयतेकर्मेतिस्मृतेः अदत्वाफलमनाशादस्तिहतीयमपिजन्मेत्याह प्रागिति फलदानमन्तरेणापिकर्मनाशेदोषमाह कृतेति नयुक्तइतिकृत्वाफलमदत्वाकर्मनाशोनेतिशेषःविमतानिकर्माणिफलमदत्वा नक्षीयन्तेवैदिककर्मत्वादारब्धकर्मवदितिमत्वाह यथेति नाशोनज्ञानादितिशेषः नन्वनारब्धकर्मणांज्ञानान्नाशेयुक्तोऽप्रवृत्तफलवत्त्वायारब्धकर्मणान्तुप्रवृत्तफलवत्त्वेन बलवत्त्वान्नज्ञानात्तन्निवृत्तिर्नेत्याह नचेति अज्ञानोत्पत्त्वेनज्ञानविरोधित्वाविशेषात् प्रवृत्ताप्रवृत्तफलत्वमनुपयुक्तमिति भावः कर्मणांफलमदत्वानाशाभावेफलितमाह तस्मादिति ननुकर्मणांवस्तुत्वात्तत्फलेषुजन्मसुकुतस्त्रित्वमारब्धकर्मणांत्रिःप्रकारत्वादिचेन्नानारब्धत्वेनैकप्रकारत्वसम्भवात्तत्राह संहतानीति नास्ति ज्ञानस्यैकान्तिकफलत्वमितिशेषः उक्तकर्मणांजन्मनारम्भकत्वेप्रागुक्तं दोषमनुभाष्यतस्यातिप्रसङ्गकत्वमाह अन्यथेति सर्वत्रेत्यारब्धकर्मस्वपीतियावत् फलजनकत्वानिश्चयोऽनाश्वासःकर्मणांजन्मनारम्भकत्वेकर्मकाण्डनर्थक्यंदोषान्तरमाह शास्त्रेतिअनारब्धकर्मणांसत्यपिज्ञानेजन्मान्तरारम्भकत्वधौव्येफलितमाह इत्यतइति श्रुत्यवष्टम्भेनपरिहरति नेत्यादिना ज्ञानादनारब्धकर्मदाहेभगवतोपिसम्मतिमाह दृष्टान्तेति ज्ञानाधीनसर्वकर्मदाहेसर्वधर्मान्परित्यज्येति वाक्यशेषोपिप्रमाणीभवतीत्याह वक्ष्यति चेति ज्ञानादनारब्धाशेषकर्मक्षयेयुक्तिरपिवक्तुंशक्येत्याह उपपत्तेश्चेति तामेवविवृणोतिअविद्येतिअज्ञस्याविद्यात्मितारागद्वेषाभिनिवेशाख्यक्लेशात्मकानिसर्व्वानर्थबीजानितानिनिमित्तीकृत्य यानिधर्माधर्मकर्माणि तानिजन्मान्तरारम्भकानि यानिविदुषोविद्यादग्धक्लेशबीजस्यप्रतीतिमात्रशरीराणिकर्माणि नतानिशरीरारम्भकाणि दग्धपटवदर्थक्रियासामर्थ्याभावादित्यर्थः प्रतीतिमात्रदेहानांकर्माभासानांनफलारम्भकतेत्यस्मि

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

अत्रात्मदर्शनेऽुपायविकल्पाद्मेधानाद्ययुच्यन्ते ध्यानेनेति ध्यानेनध्यानंनामशब्दादिभ्योविषयेभ्यःश्रोत्रादीनिकरणानिमनस्युपसंहृत्यमनश्चप्रत्यक्चेतयितर्येकाग्रतयायच्चिन्तनंतद्ध्यानंतथाध्यायतोव कःध्यायतीवपृथिवीध्यायन्तीवपर्वताः इत्युपमोपादानात्तैलधारावत्सन्ततोविच्छिन्नप्रत्ययोध्यानन्तेनध्यानेनात्मनिबुद्धौ पश्यन्त्यात्मानंप्रत्यक्चेतनमात्मनाध्यानसंस्कृतेनान्तःकरणेनकेचित्योगिनः अन्येसांख्येन

आनन्दगिरिकृतटीका

न्नर्थेभगवतोपिसम्मतिमाह दृष्ट्वापीति तत्त्वज्ञानादूर्ध्वंप्रातीतिकक्लेशानांकर्मद्वारादेहारम्भकत्वेबाध्यान्तरमपिप्रमाणयति वीजानीति ज्ञानानन्तरभाविकर्मणांज्ञानेनदाहमङ्गीकरोति अस्तिति विरोधिग्रस्तानामेवोत्पत्तेरिति हेतुमाह ज्ञानेति अस्मिन्जन्मनिजन्मान्तरेवाज्ञानात्पूर्वभाविकर्मणां नततोदाहोविरोधिनंविनाप्रवृत्तेरित्याह नत्विति श्रुतिस्मृतिविरोधान्नैवमितिपरिहरति नेत्यादिना सर्वशब्दश्रुतेःसङ्कोचंशङ्कते ज्ञानेति प्रकरणादिसंकोचकाभावान्नैवमित्याह नेतिआक्षेपदशायासुक्तमनुमानमनुवदतियत्विति आभासत्वादिदमसाधकमिति दूषयति तदसदिति व्याप्त्यादिमत्वेकथमाभासत्वमितिपृच्छति कथमिति प्रवृत्तफलत्वोपाधिनाहेतोर्व्याप्तिभङ्गादाभासत्वधीरित्याह तेषामिति तदेवप्रपञ्चयति यथेत्यादिनाधनुषःसकाशादिषुर्मुक्तोवलवत्प्रतिवन्धकाभावेमध्येनपततितथाप्रवलप्रतिवन्धकंविनाप्रवृत्तफलानांकर्मणांभोगादृतेनज्ञयोनचतत्त्वज्ञानंतादृक्प्रतिवन्धकंउत्पत्तावेवपूर्वप्रवृत्तेनकर्मणाप्रतिवन्धप्रशक्तित्वादित्यर्थः यत्तज्ञानेनादाह्यत्वंतत्प्रवृत्तफलत्वमित्यन्वयेप्रियत्वाप्रवृत्तफलत्वंतत्त्वज्ञानदाह्यत्वमिति नव्यतिरेकसिद्धिरित्याशंक्याह सएवेति प्रवृत्तौनिमित्तभूतोनारब्धोवेगोऽनेनेतिविग्रहःसाध्यस्यानिसाभासान्तःकरणनिष्ठानीतियावत्विमतानितत्त्वधीनिमित्तनिवृत्तानितत्कृतकारणनिवृत्तत्वाद्रज्जुसर्पादिवदिति व्यतिरेकसिद्धिरितिभावः विदुषोवर्त्तमानदेहपातेदेहान्तरेहेत्वभावात्तत्त्वधीरैकान्तिकफलेत्युपसंहरति पतितइति२३ ज्ञेयंयत्तदित्यादिनातत्पदार्थस्त्वंपदार्थश्चानन्तर

स्वामिकृतटीका

एवंप्रकृतिपुरुषविवेकज्ञानिनंस्तौति यएवमिति एवमुपद्रष्टृत्वादिरूपेणपुरुषंयोवेत्तिप्रकृतिञ्चगुणैःसुखदुःखादिपरिणामैःसहितांयोवेत्तिसपुरुषःसर्वथाविधिमभिलङ्घ्यप्रवर्तमानोऽपिपुनर्नाभिजायतें मुच्यते एवेत्यर्थः २३ एवम्भूतविविक्तात्मज्ञानसा

CC-0. In Public Domain. Digitized by eGangotri

ध्यानेनात्मनिपश्यन्तिकेचिदात्मानमात्मना अन्ये सांख्येनयोगेनकर्मयोगेनचापरे २४

शाङ्करभाष्यं।

योगेन सांख्यंनामेदमेसत्वरजस्तमांसिगुणामयादृश्याग्रहन्तेभ्योन्यस्तद्व्यापारस्यसाक्षिभूतोनित्योगुणविलक्षणआत्मेति चिन्तनमेषसांख्योयोगस्तेनपश्यन्त्यात्मानमात्मनेतिवर्त्तन्तेकर्मयोगेनकर्मैवयोगईश्वरार्पणबुद्ध्यानुष्ठीयमानं घटनरूपत्वंयोगार्थात् योग उच्यतें गुणतस्तेनसत्त्वशुद्धिज्ञानोत्पत्तिद्वारेणचापरे २४

आनन्दगिरिकृतटीका।

मेवशोधितौतयोरैक्यञ्चतेनज्ञञ्चापि मामिङ्गीत्युक्तमिदानींतद्दृष्टिहेतून् यथाधिकारंकथयति अत्रेति ध्यानाख्यसाधनंकिंरूपमितिपृच्छति ध्यानंनामेति तद्रूपंवदन्नुत्तरमाह शब्दादिभ्यइति एकाग्रतयोपसंहृत्येतिसम्बन्धः यच्चिन्तनंप्रत्यक्चेतयितरिइति पूर्वेणान्वयः किंतच्चिन्तनमित्युक्तेदृष्टान्तद्वाराश्रुत्यवष्टम्भेनध्यानं प्रपञ्चयति तथेति विवक्षितध्यानानुरोधेनेतियावत् आत्मानंपश्यन्तिपरमात्मतयेतिशेषःकेचिदित्युत्तमाधिकारिणोगृह्यन्ते मध्यामाधिकारिणोनिर्दिश्यति अन्यइति सांख्यशब्दितंसाधनंकिञ्चासेत्युक्ते विचारजन्यंज्ञानन्तदेवज्ञानहेतुतयोयोगतुल्यत्वाद्योगशुद्धिहेतोरनेनगौण्याद्दत्तप्रायोगशब्दितंकर्मेत्याह सांख्यमिति अधमानधिकारिणःसंगिरतेकर्मेति चित्तैकाग्र्ययोगःतादर्थ्यंकर्मणःशुद्धिहेतोरस्ति तेनगौण्याद्दत्तप्रा योगशब्दितंकर्मेत्याह गुणतइति अपरेपश्यान्त्यात्मानमात्मनेति पूर्ववदनुषङ्गमङ्गीकृत्याह तेनेति २४ अधमतमानधिकारिणोमोक्षमार्गेप्रवृत्तिंप्रतिलम्भयति अन्येत्विति

स्वामिकृतटीका।

धनविकल्पानाह ध्यानेनेतिद्वाभ्यांध्यानेनात्माकारप्रत्ययावृत्त्याआत्मनिदेहएवआत्मनामनसाएवमात्मानंकेचित्पश्यन्ति अन्येतुसांख्येनप्रकृतिपुरुषवैलक्षण्यालोचनेनयो

भाषाअनुवाद

अनेककल्पनारूपसाधनदोश्लोकसेकहतेहैंकिकोईतोध्यानकरेआत्माकाराकारितज्ञानरूपधारावाहिकअन्तःकरणकीवृत्तिसेइसीशरीरमेमनकेद्वाराआत्माकादर्शनकरतेहैं औरकोईसांख्यअर्थात्प्रकृतिपुरुषकाभेदआलोकनकेद्वारादेखतेहैं कोईयमनियमआसनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपअष्टांगयोगकेक्रमसेजानतेहैं औरकितनेएकनिःकामकर्मरूपभक्तियोगअनुष्ठानकरकेशुद्धसतोगुणहोयतत्वज्ञानकेद्वाराआत्माकोदेखतेरहतेहैं यद्यपिध्यानादियथायोग्यक्रमसेएकहीहैं तौभीतौनतौननिष्ठाकेभेदसेभिन्ननानामतकहाहै २४ औरअबअतिमन्दअधि

CC-0. In Public Domain. Digitized by eGangotri

अन्येत्वेवमजानन्तःश्रुत्वान्येभ्यउपासते तेपिचातितरन्त्येवमृत्युं श्रुतिपरायणाः २५

शाङ्करभाष्यं।

अन्येत्विति अन्येत्वेतेषुविकल्पेषु अन्यतरेणाप्येवंयथोक्तमात्मानमजानन्तोऽन्येभ्य आचार्येभ्यःश्रुत्वाइदमेवचिन्तयेतेत्युक्त उपासतेश्रद्दधानाःसन्तश्चिन्तयन्ति तेपिचा तितरन्त्येवातिक्रामन्त्येवमृत्युं मृत्युयुक्तंसंसारमित्येतत्श्रुतिपरायणाः श्रुतिःश्रवणं परमयनंगमनंमोक्षमार्गप्रवृत्तौपरंसाधनंयेषांतेश्रुतिपरायणाः केवलपरोपदेशप्र माणाःस्वयंविवेकरहिताइत्यभिप्रायः किमुवक्तव्यंप्रमाणंप्रति स्वतन्त्राविवेकिनोमृत्यु मतितरन्तीत्यभिप्रायः२५ अथक्षेत्रक्षेश्वरैकत्वविषयंज्ञानंमोक्षसाधनं यत्तज्ज्ञात्वामृत तमश्नुतइत्युक्तंतत्कस्माद्धेतोरितितद्धेतुदर्शनार्थंश्लोकआरभ्यतेयावदिति यावत्यत् किञ्चित्सञ्जायतेसमुत्पद्यतेसत्त्वंवस्तुकिमविशेषेणेत्याह स्थावरंजङ्गमंस्थावरंजङ्गम ञ्चैवक्षेत्रक्षेत्रज्ञसंयोगात्तज्जायतेइत्येवंविद्धिजानीहिहेभरतर्षभकःपुनरयंक्षेत्रक्षेत्र ज्ञयोःसंयोगोऽभिप्रेतोनतावत्रज्वेवघटस्यावयवसंश्लेषद्वारकःसम्बन्धविशेषःसंयोगः

आनन्दगिरिकृतटीका।

आचार्याधीनांश्रुतिमेवाभिनयति इदमिति उपासनमेवविवृणोति श्रद्दधानाइति प रोपदेशात्प्रवृत्तानामपिप्रवृत्तेःसाफल्यमाह तेपीति तेषांमुख्याधिकारित्वंव्यावर्तय तिश्रुतीति तेपीत्यादिनासूचितमर्थमाह किमिति २५ त्रैक्यधीर्मुक्तिहेतुरितिप्रागु

स्वामिकृतटीका

गेनाष्टाङ्गेनापरेचकर्मयोगेनपश्यन्तीति सर्वत्रानुषङ्गःएतेषाञ्चध्यानादीनांयथायो गंक्रमसमुच्चयेसत्यपितत्तन्निष्ठाभेदाभिप्रायेण विकल्पोक्तिः २४

अतिमन्दाधिकारिणांनिस्तारोपायमाह अन्येत्विति अन्येतुसांख्ययोगादिम र्गेणएवसुपद्रष्टृत्वादिलक्षणमात्मानं साक्षात्कर्तुमजानन्तोऽन्येभ्यआचार्येभ्यउपदे शतःश्रुत्वाउपासतेध्यायन्ति तेपिचश्रद्दधाउपदेशश्रवणपरायणाःसन्तोमृत्युं संसारं शनैरतितरन्त्येव २५ तत्र कर्मयोगस्यतृतीयचतुर्थपञ्चमेषुप्रपञ्चितत्वात्ध्यानयो

भाषा अनुवाद

कारियोंकोउपायकहतेहैं किसांख्ययोगआदिमार्गसेजैसेउपद्रष्टारूपआत्माकोसा क्षात्कारकरनेमेअर्थात्देखनेमेजोअक्षहैं परन्तुऔरकिसीआचार्यकाउपदेशश्रवण करिके ध्यानमात्रकरतेहैं तेउश्रद्धापूर्वकउपदेशश्रवणमेतत्परहोकरमृत्युयुक्तसं सारसेअवश्यमुक्तहोतेहैं यहजानो २५ अबतृतीयचतुर्थपञ्चमअध्यायमे कर्मयोग

CC-0. In Public Domain. Digitized by eGangotri

यावत्संजायतेकिञ्चित्सत्त्वंस्थावरजङ्गमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धिभरतर्षभ २६

शाङ्करभाष्यं।

क्षेत्रेणक्षेत्रज्ञस्यसम्भवति आकाशवन्निरयवत्वान्नापिसमवायलक्षणःतन्तुपटयोरिव क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभावानभ्युपगमादित्युच्यते क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वरूपयोरितरेतरतद्धर्माध्यासलक्षणःसंयोगःक्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनोरज्जुशुक्तिकादीनांतद्विवेकज्ञानाभावाद्ध्यारोपितसर्परजतादिसंयोगवत्सोयमध्यासस्वरूपःक्षेत्रक्षेत्रज्ञसंयोगोमिथ्याज्ञानलक्षणोयथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकंप्राक्दर्शितरूपात्क्षेत्रात्मुञ्जादिवेषीकां यथोक्तलक्षणंक्षेत्रज्ञंप्रविभज्यनसत्तन्नासदुच्यतेइत्यनेननिरस्तसर्वोपाधिविशेषंक्षेयंब्रह्मस्वरूपेणयःपश्यतिक्षेत्रज्ञमायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवदसदेवसदिवावभासतेइतिएवंनिश्चितविज्ञानोयस्तस्ययथोक्तसम्यक्दर्शनविरोधाद्वगच्छति मिथ्याज्ञानंतस्यजन्महेतोरप्रगमात्यएवंवेत्तिपुरुषंप्रकृतिञ्चगुणैःसहइत्यनेनविद्वान्भूयोनाभिजायतइतियदुक्तं तदुपपन्नमुक्तंनसभूयोऽभिजायतइति सम्यक्दर्शनफलमविद्यायानिवर्त्तकंसम्यग्दर्शनंफलमविद्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभाव उक्तः जन्मकारणञ्चाविद्यानिमित्तकःक्षेत्रक्षेत्रज्ञसंयोगउक्तः २६

आनन्दगिरिकृतटीका।

कृमनद्यप्रश्नपूर्वकंजिज्ञासितहेतुपरत्वेनश्लोकमवतारयति क्षेत्रेति सर्वस्यप्राणिजातस्यक्षेत्रक्षेत्रज्ञसम्बन्धाधीनायस्मादुत्पत्तिस्तस्मात्क्षेत्रज्ञात्मकपरमात्मातिरेकेण प्राणिनिकायस्याभावादैक्यज्ञानादेवमुक्तिरित्याह कस्मादिति क्षेत्रक्षेत्रज्ञसम्बन्धमुक्तमाक्षिपति कःपुनरिति क्षेत्रज्ञस्यक्षेत्रेणसम्बन्धःसंयोगोवासमवायोवेति विकल्पादिं दूषयति नतावदिति द्वितीयंनिरस्यति नापीति वास्तवसम्बन्धाभावेपितयोरध्यासस्वरूपःसोस्तीति परिहरति उच्यतइति भिन्नस्वभावत्वेहेतुमाह विषमेति इतरेतरव

भाषाअनुवाद

विस्तारसेकहा औछठयेंअठयेंअध्यायमेंध्यानयोगकाविस्तारकहा औसांख्यकेद्वाराभिन्नक्रियाजोआत्मा सोईध्यानआदिकाविषयहै इसहेतुसांख्यहीकोअध्यायसमाप्तिपर्यन्तविस्तारकरिकेभगवानकहतेहैं किहेभरतर्षभअर्जुन जोकुछस्थावरजङ्गमआदिवस्तुउत्पन्नहै सोसबक्षेत्रक्षेत्रज्ञदोनोकेयोगसेहै अर्थात्अविवेककृतजोआत्माकाअध्यासहै तिसहेतुसेउत्पन्नमात्रहै यहनिश्चयसेजानो २६

CC-0. In Public Domain. Digitized by eGangotri

समंसर्वेषुभूतेषुतिष्ठन्तंपरमेश्वरं विनश्यत्स्वविनश्यन्तं यःपश्यतिसपश्यति २७

शाङ्करभाष्यं।

अतस्तस्याअविद्यायानिवर्त्तकंसम्यग्दर्शनमुक्तमपिपुनःशब्दान्तरेणोच्यते समंसर्वेष्वित्यादिसममिति समंनिर्विशेषंतिष्ठन्तं स्थितिंकुर्वन्तं कःसर्वेषुभूतेषुब्रह्मादिस्थाव

आनन्दगिरिकृतटीका

क्षेत्रेक्षेत्रज्ञेवातद्धर्मस्यक्षेत्रानधिकरणस्यक्षेत्रज्ञगतस्य चैतन्यस्यक्षेत्रज्ञानाधारस्यचक्षेत्रनिष्ठस्यजाड्यादेरारोपरूपोयोगस्तयोरित्याह इतरेति तन्निमित्तमाह क्षेत्रेति अविवेकादारोपितसंयोगेदृष्टान्तमाह रज्विति उक्तंसम्बन्धंनिगमयति सोयमिति तस्यनिवृत्तियोग्यत्वंसूचयति मिथ्येति कथंतर्हिमिथ्याज्ञानस्यनिवृत्तिरित्याशंक्याह यथेति योयंविज्ञानमयःप्राणेष्वित्यादि त्वंपदार्थविषयंशास्त्रमनुसृत्य विवेकज्ञानमापाद्यमहाभूतादिकृत्यन्तात्क्षेत्राद्विलक्षणंप्रागुक्तं क्षेत्रंमुञ्जेषीकान्यायेनविविच्यसर्वोपाधिविनिर्मुक्तब्रह्मस्वरूपेणज्ञेयंयोनुभवतितस्यमिथ्याज्ञानमपगच्छतीति सम्बन्धः कथमस्यनिर्विशेषत्वं क्षेत्रस्यसविशेषत्वहेतोःसत्त्वादित्याशंक्याह क्षेत्रज्ञेति वस्तुदृष्टान्तोक्तेर्वस्तुविधत्वंक्षेत्रस्यद्योत्यते उक्तज्ञानान्मिथ्याज्ञानापगमेहेतुमाह यथोक्तेति तथापिकथंपुरुषार्थसिद्धिःकालान्तरेतुल्यजातीयमिथ्याज्ञानोदयसम्भवादित्याशंक्याह तस्येति सम्यग्ज्ञानाद्ज्ञानकार्यनिवृत्त्यामुक्तिरितिस्थितेफलितमाह यएवमिति उत्तरग्रन्थमवतारयितुंव्यवहितंदृष्टं कोर्त्तयति नेत्यादिनाअविद्यानाद्यनिर्वाच्यमज्ञानंमिथ्याज्ञानंतत्संस्कारश्चादिशब्दार्थःव्यवहितमनूद्याव्यवहितमनुवदति जन्मेति २६ व्यवधानाव्यवधानाभ्यांसर्वानर्थमूलत्वादज्ञानस्य

स्वामिकृतटीका।

गस्यचषष्ठाष्टमयोःप्रपञ्चितत्वात्ध्यानादेश्चसांख्यविविक्तात्मविषयत्वात्सांख्यमेवप्रपञ्चयन्नाह यावदिति यावद्ध्यायसमाप्ति यावत्यत्किञ्चित्वस्तुमावंसमुत्पद्यते तत्सर्वंक्षेत्रक्षेत्रज्ञयोर्योगादिविवेकज्ञात्तादात्म्याध्यासाद्भवतीति जानीहि २६

भाषाअनुवाद।

अविवेकसेसंसारकीउत्पत्तिकहिकर अबसंसारकीनिवृत्तिकेअर्थप्रकृतिसेभिन्नस्वरूपजोआत्मा उसकाशोभनदर्शनकहतेहैं किस्थावरजंगमात्मकसर्वभूतमे निर्विशेषकहेसमानसत्रूपसमभावसेस्थायीपरमात्माकोजोमनुष्यदेखतेहैं औरभूतोंके विनाशमे आत्माकोअविनाशीरूपदेखतेहैं तेईशोभनदेखतेहैं औरकोईनहीं २७

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

रान्तेषुप्राणिषुकम्परमेश्वरंदेहेन्द्रियमनोबुद्ध्यव्यक्तात्मनोऽपेक्ष्यपरंपरमञ्चासावीश्वरश्चईशनशीलश्चेतिपरमेश्वरस्तं सर्वेषुभूतेषुसमन्तिष्ठन्तंतानिविशिनष्टि विनश्यत्स्विति तञ्चपरमेश्वरमविनश्यन्तंइतिभूतानांपरमेश्वरस्यचात्यन्तवैलक्षण्यप्रदर्शनार्थः कथंसर्वेषांहिभावविकाराणांजनिलक्षणोभावविकारोमूलंजन्मोत्तरभाविनोऽन्ये सर्वेभावविकाराविनाशान्ताविनाशात्परोनकश्चिदस्तिभावविकारःभावाभावात् सति हिधर्म्मिणिधर्माभवन्त्यतोन्यभावविकारानुवादेनपूर्वभाविनःसर्वेभावविकाराःप्रतिषिद्धाभवन्तिसहकार्यैःतस्मात्सर्वभूतैर्वैलक्षण्यमत्यंतमेवपरमेश्वरस्यसिद्धं निर्विशेषत्वमेकत्वञ्च कथञ्चयएवंयथोक्तंपरमेश्वरंपश्यतिसपश्यति ननुसर्वोपिलोकःपश्यति किंविशेषेणेति सत्यंपश्यति किन्तुविपरीतंपश्यत्यतोविशिनष्टिसएवपश्यतीतियथातिमिरदृष्टिरनेकंचन्द्रंपश्यतितमपेक्ष्यैकचन्द्रदर्शीविशिष्यतेसएवपश्यतीति तथैवेहाप्येकमविभक्तंयथोक्तमात्मानंपश्यति सविभक्तानेकात्मविपरीतदर्शित्वेविशिष्यते सएवपश्यतीतीतरेपश्यन्तोपिनपश्यन्तिविपरीतदर्शित्वादनेकचन्द्रदर्शिवदित्यर्थः॥२७

आनन्दगिरिकृतटीका

तन्निवर्त्तकंसम्यग्ज्ञानंवक्तव्यमित्याह अतइति तस्याशक्यदुक्तत्वात्तदुक्तार्थप्रवृत्तिर्दृष्टेत्याशंक्यातिसूक्ष्मार्थस्यशब्दभेदेनपुनःपुनर्वचनमधिकारिभेदानुग्रहायेतिमत्वाह उक्तमिति सर्वत्रपरस्यैकत्वात्नोत्कर्षापकर्षवत्त्वमित्याह समामिति परमत्वमीश्वरत्वञ्चोपपादयति देहेति आत्माजीवस्तमित्यादिनान्वयोक्तिः आश्रयनाशादाश्रितस्यापिनाशमाशंक्याह तञ्चेति अविनश्यन्तमितिविशिनष्टि इतिसम्बन्धः ऊभयत्रविशेषणद्वयस्यतात्पर्यमाह भूतानामिति नाशानाशाभ्यांवैलक्षण्येपिकथमत्यन्तवैलक्षण्यं सविशेषत्वभिन्नत्वयोस्तुल्यत्वादितिशङ्कतेकथमिति भूतानांत्वविशेषत्वादिभावेपिपरस्यतदभावादत्यन्तवैलक्षण्यमितिवक्तुं जन्मनोभावविकारेसादित्वमाह सर्वेषामिति तत्रहेतुमाह जन्मेति नहिजन्मान्तरेणोत्तरेविकारायुज्यन्ते जन्मवतस्तदुपलम्भादित्यर्थः विनाशानन्तरभाविनोपि विकारस्यकस्यचिदुपपत्तेर्न तस्यान्यविकारत्वमित्याशंक्याह विनाशादिति तस्यान्यविकारत्वेसिद्धेफलितमाह अतइति तेषांजन्मादीनांकार्याणिकादाचित्कसत्त्वानितदधिकरणानितैः सहेति यावत् परमेश्वरस्यभूतेभ्योऽत्यन्तवैलक्षण्यमुक्तमुपसंहरतितस्मादितिनिर्विशेषत्वंसर्वभावविकारविरहित्वं कूटस्थत्वमेकत्वमद्वितीयत्वं यःपश्यतीत्यादिव्याचष्टे यएवमिति उक्तविशेषणमीश्वरं

CC-0. In Public Domain. Digitized by eGangotri

समंपश्यन्हिसर्वत्रसमवस्थितमीश्वरं नहिनस्त्यात्मनात्मानंततोयातिपरांगतिं २८

शाङ्करभाष्यं

यथोक्तस्यसम्यग्दर्शनस्यफलवचनेनस्तुतिकर्त्तव्येतिश्लोकआरभ्यतेसमंपश्यन्हीतिस मंपश्यन्नुपलभमानोहितस्मात्सर्वत्रसर्वभूतेषुसमवस्थितंतुल्यतयावस्थितमीश्वरंअती तानन्तरश्लोकोक्तलक्षणमित्यर्थःसमंपश्यन्किन्नहिनस्तिहिंसांनकरोति आत्मनास्वे नैवस्वमात्मानंततस्तस्मात्अहिंसनात्यातिपरांप्रकृष्टांगतिंमोक्षाख्यां ननुनैव कश्चित् प्राणीस्वयंस्वमात्मानंहिनस्ति कथमुच्यतेऽप्राप्तंनहिनस्तीति यथानष्टंहिव्यामग्निश्चै तव्योनान्तरिक्षइत्यादिनैषदोषःअज्ञानामात्मतिरस्करणोपपत्तेः सर्वोह्यज्ञोत्यन्तप्र सिद्धंसाक्षादपरोक्षादात्मानंतिरस्कृत्यानात्मानमात्मत्वेनपरिगृह्य तमधिधर्माधर्मैः

आनन्दगिरिकृतटीका

पश्यन्नेवपश्यतीत्युक्तमाक्षिपति नन्विति ईश्वरपराङ्मुखस्यानात्मनिष्ठस्यतद्दर्शित्वेऽपि विपरीतदर्शित्वादीश्वरप्रवणस्यैवसम्यग्दर्शित्वमितिविवक्षित्वाविशेषणमितिपरिह रति सत्यमिति उक्तमेवदृष्टान्तेनविवृणोति यथेत्यादिना यःपश्यतीत्यादेरर्थमुपसं हरति इतरइति परवस्तुनिष्ठेभ्योव्यतिरिक्ताइत्यर्थः २७ प्रकृतसम्यक्ज्ञानेनकि

स्वामिकृतटीका ।

अविवेककृतंसंसारोद्भवमुक्त्वातन्निवृत्तये विविक्तात्मविषयंसम्यग्दर्शनमाह सम मिति स्थावरजङ्गमात्मकेषुभूतेषु निर्विशेषसद्रूपेणसमंयथाभवत्येवंतिष्ठन्तंपरमा त्मानंयःपश्यतिअतएवतेषुविनश्यत्स्वप्यविनश्यन्तंयःपश्यति सएवसम्यक्पश्यति नान्यइत्यर्थः२७कुतइत्यताहसमंपश्यन्निति सर्वत्रभूतभावेसमंसम्यन्नसप्रच्युतस्वरू

भाषाअनुवाद

औरउसशोभनदर्शनहोनेकाकारणक्याहै इसपरकहतेहैं किसोईशोभनदेख नेवालामनुष्ययावत्भूतमात्रमेसम्यकप्रकारसेअक्षरस्वरूपअवस्थितपरमात्माका द र्शनकरिके आपअपनेकोनष्टनहींकर्त्ताअर्थात्सच्चिदानन्दआत्मास्वरूपको अविद्या अज्ञानसेआवरणकरिकेनाशनहींकरताहै तिससेश्रेष्ठगतिमुक्तिरूपकोप्राप्तहोता हैऔरजोइसपूर्वोक्तरूपसेनहींदेखताहैसोशरीरहीकोआत्माकरिकेदेखनेवाला शरीरकेसहितअपनेकोअवश्यहीनष्टकर्त्ताहैसोईश्रुतिकहतीहैं किजोउक्तप्रकार सेआत्महाहोताहै सोईमरणकेअनन्तरप्रकाशशून्यअन्धकारसे आवृतजोस्थानत हांकोजाताहै २८ जोकहोकिशुभअशुभकर्मकेकर्तृत्वहेतुसेवैषम्यदेखपडतीहै

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ज्ञात्वोपात्तमात्मानंहत्वान्यमात्मानमुपादत्तेनसेवन्तञ्चैवंहत्वानसेवन्तमपिहत्वान्यमित्येवंनवमुपात्तमुपात्तमात्मानंहन्तीत्यात्महा सर्वोऽज्ञोयस्तु परमार्थात्माऽसावपि सर्वदाऽविद्ययाहतइवविद्यमानफलाभावादितिसर्वेआत्महनाएवाविद्वांसो यस्त्वितरोयथोक्तात्मदर्शीसतुउभयथात्मनात्मानंनहिनस्तितोयातिपराङ्गतिंयथोक्तंफलंतस्य भवतीत्यर्थः २८

सर्वभूतस्थमीशंसमम्पश्यन्नहिनस्त्यात्मनात्मानमित्युक्तंतदनुपपन्नंस्वगुणकर्मवैलक्षण्येभेदभिन्नेष्वात्मसुइत्येतदाशंक्याह प्रकृत्यैवेतिप्रकृत्याप्रकृतिर्भगवतोमायाविगुणात्मि

आनन्दगिरिकृतटीका।

मित्यपेक्षायांतत्फलोक्त्यातस्यैवस्तुत्यातद्वेतौपुरुषंप्रवर्त्तयितुंश्लोकान्तरमित्याह यथोक्तस्येति यस्मादित्यस्यतत:शब्देनसम्बन्धः सर्वभूतेषु तुल्यतयास्थितं पूर्वोक्तलक्षणमीश्वरंनिर्विशेषं पश्यन्नात्मानमात्मनायस्मान्नहिनस्तितस्मान्मोक्षाख्यांपरांगतिं यातिइतियोजना तत्रप्रलयेणज्ञानाद्ज्ञानध्वस्त्याध्वस्त्यनर्थस्योक्ताज्ञानसिध्याज्ञानाबर्णयोर्नाशे सर्वोत्कृष्टांगतिंपरमपुरुषार्थंपरमानन्दमनुभवतिविद्वानिति चतुर्थपदार्थः नहिनस्त्यात्मनात्मानमितियथाश्रुतमादायचोदयति नन्विति नष्टयिष्यामिति प्राप्तिद्वारानिषेधवन्नान्तरिक्षेणदिवीति प्राप्यभावाच्चयन्निषेधोमुख्योनेष्यतेतथेहापिप्राप्तिंविनानिषेधोनयुक्तिमानित्याह यथेति अज्ञानादात्मनैवात्महिंसासम्भवाद्विदुषांतज्ज्ञावोक्तिर्युक्तेति समाधत्ते नैषदोषइति संग्रहवाक्यंविवृणोति सर्वोहीति अनात्मशब्दोदेहादिविषयः अविदुषामारोपितात्महन्तृत्वंनिगमयति इत्यात्महेति तथापिपारमार्थिकस्यात्मनोहननाभावान्नतेषांसर्वेषांआत्महन्तृत्वमित्याशंक्याह यस्त्विति उक्तरीत्यासर्वेषामविदुषामात्महन्तृत्वंसिद्धंइत्युपसंहरति सर्वइति आत्मनैवात्महननमविदुषांदृष्टं तदिहविद्वद्विषयेशक्यंनिषेद्धुमित्याह यस्त्वितरइति उभयथापीत्यारोपानारोप्याभ्यामित्यर्थः ज्ञानादनर्थभ्रमभंशे पूर्वोक्तपरमानन्दप्राप्तापरिहृतत्वंयुक्तमित्याह ततइति २८

स्वामिकृतटीका

पेक्षावस्थितंपरमात्मानंपश्यन्हियस्मादात्मनास्वेनैवात्मानंनहिनस्ति अविद्यासञ्चितानन्दरूपमात्मनंतिरस्कृत्यनविनाशयति ततश्चपरांगतिंमोक्षंप्राप्नोति यस्त्वेवंनपश्यति सहिदेहात्मदर्शी देहेनसहात्मानंहिनस्ति तथाचश्रुतिःअसूर्य्यानामतेलोकाअन्धेनतमसावृताः तांस्तेप्रेत्याभिगच्छन्ति येकेचित्महनोजनाइति २८

CC-0. In Public Domain. Digitized by eGangotri

प्रकृत्यैवचकर्माणिक्रियमाणानिसर्वशः यःपश्यतितथात्मानमकर्त्तारंसपश्यति २९

शाङ्करभाष्यं ।

कामायान्तुप्रकृतिंविद्यादितिमन्त्ववर्णान्तयाप्रकृत्यैवचनान्नेवमहदादिकार्य्यकारणाकारपरिणततया तान्येवकर्माणिवाङ्मनःकायारभ्याणिक्रियमाणानिनिवर्त्तमानानि सर्वशःसर्वप्रकारैर्य्यः पश्यत्युपलभ्यते तथात्मानंचैवाऽमकर्त्तारंसर्व्वोपाधिविवर्जितंपश्यति सपरमार्थदर्शीत्यभिप्रायः निर्गुणस्याकर्त्तुर्निर्विशेषस्याकाशस्येवभेदेप्रमाणानुपपत्तिरित्यर्थः २९ पुनरपितदेवसम्यग्दर्शनंशब्दान्तरेणप्रपञ्चयते यदेति

आनन्दगिरिकृतटीका

श्लोकान्तरंशङ्कोत्तरत्वेनावतारयितुमनुवदति सर्वेति प्रतिदेहं धर्माधर्मादिमत्त्वेनात्मनोभेदमानान्नसम्यक्दर्शनमितिशङ्कते तदिति स्वगुणैःसुखदुःखादिभिःस्वकर्मभिश्चधर्माधर्माख्यैर्वैलक्षण्यात्प्रतिदेहं भेदेतद्विशिष्टेष्वात्मसुकथंसाम्येनदर्शनमित्येतदाशंक्यपरिहरतीत्याह एतदिति प्रकृतिशब्दस्यस्वभाववाचित्वंव्यावर्त्तयति प्रकृतिरिति मायाशब्दस्यसम्बित्पर्य्यायत्वंप्रत्याह त्रिगुणेति उक्तपरस्यशक्तिर्मायेत्यत्रश्रुतिसंमतिमाह मायान्विति अन्येनकेनचित्क्रियमाणानिनभवन्तिकर्माणीत्येवकारार्थमाह नान्येनेति किन्तदन्यन्निषेध्यमित्युक्ते सांख्याभिप्रेताप्रधानाख्याप्रकृतिरित्याह महदादीति सर्वप्रकारत्वंकार्य्यत्वनिष्ठत्वादिना प्रकारवाऽऽख्यमात्मानमुक्तविशेषणं सः पश्यतीति पूर्वेणसम्बन्धः सपश्यतीत्ययुक्तं पुनरुक्तेरित्याशंक्याह सपरमार्थेति आत्मानंप्रतिदेहंभिन्नत्वे तेषुसमदर्शनमयुक्तमित्युक्तस्य कःसमाधिरित्याशंक्याह निर्गुणस्येति २९ प्रकृतेर्विकाराणाञ्चसांख्यवत्पुरु

स्वामिकृतटीका

ननु शुभाशुभकर्मकर्तृत्वे नवैषम्ये दृश्यमानेकथमात्मनः समत्वमित्याशंक्याह प्रकृत्यैवेति प्रकृत्यैवदेहेन्द्रियाकारेणपरिणतया सर्वशःसर्वैःप्रकारैःक्रियमाणानिक

भाषाअनुवाद ।

फेरिआत्माकासमत्वकैसेहैं इसपरकहतेहैं किजोदेहइन्द्रियआकारमेरूपान्तरकोअर्थात्भिन्नरूपकोप्राप्तप्रकृतिकेद्वारानानाप्रकारक्रियमाणकर्महोतेहैं ऐसेजोमनुष्यदेखैहै औअपनेकोअकर्त्तादेखैहै अर्थात्स्थूलशरीरमेअहंबुद्धिसेआत्माकर्त्ताहोताहै औरस्वरूपसेउसकोकर्त्तृत्वनहींहै ऐसे जोमनुष्यदेखैहै सोसम्यकदेखैहै सोईकहाहै कियःपश्यतिसपश्यति इति २९ अवप्रकृतिकेसकलकार्यभूतऔति

CC-0. In Public Domain. Digitized by eGangotri

यथाभूतपृथग्भावमेकस्थमनुपश्यति अतएवचविस्तारंब्रह्मसम्पद्यतेतदा ३०

शाङ्करभाष्यं

यदायस्मिन्कालेभूतपृथक्भावं भूतानांपृथग्भावं पृथक्त्वमेकस्थमेकस्मिन्नात्मनि स्थितमेकस्थमनुपश्यतिशास्त्राचार्योपदेशतोमत्वात्मानंप्रत्यक्षत्वेनपश्यत्यात्मैवेदंसर्व्वमितिअतएवचतस्मादेवचविस्तारमुत्पत्तिमनुपश्यतिआत्मनःप्राणआत्मनआशाआत्मनःस्वरआत्मनआकाशआत्मनस्तेजआत्मनःआपआत्मनआविर्भावतिरोभावौ आत्मनोभूरात्मनोऽन्नमित्येवमादिप्रकारैर्व्विस्तारंयदापश्यतितदाब्रह्मसंपद्यतेब्रह्मैवभवति तदातस्मिन्कालेइत्यर्थः ३० एकस्यात्मनःसर्वदेहात्मत्वेतद्दोषसम्बन्धेप्राप्तभिदमुच्यते

आनन्दगिरिकृतटीका

षादन्यत्वप्रसक्तौप्रत्याह पुनरपीति उपदेशजनितंप्रत्यक्षदर्शनमनुवदति आत्मैवेति भूतानांविकाराणांनानात्वंप्रकृत्यासहात्ममात्रतयाप्रलीनंपश्यतिनहिभूतपृथक्त्वंसत्यांप्रकृतौकेवलेपरस्मिन्विलापयितुंशक्यतइत्यर्थः परिपूर्णादात्मनएव प्रकृत्यादेर्व्विशेषान्तस्यस्वरूपलाभमुपलभ्यतन्मात्रतांपश्यतीत्याह अतएवेति उक्तमेवविस्तारं श्रुत्यवष्टम्भेनस्पष्टयति आत्मनइति ब्रह्मसंपत्तिर्नामपूर्णत्वेनाभिव्यक्तिरपूर्णत्वहेतोः सर्व्वस्यात्मसात्कृतत्वादित्याह ब्रह्मैवेति ज्ञानसमानकालेमुक्तिरिति सूचयति तदेति३०

स्वामिकृतटीका ।

र्शिणयःपश्यति तथात्मानञ्चाकर्त्तारंदेहाभिमानेनैवात्मनः कर्त्तृत्वंनस्वतइत्येवंयः पश्यति सएवसम्यक्पश्यति नान्यइत्यर्थः २९ इदानींभूतानामपि प्रकृतितावन्मात्रत्वेनाभेदाद्भूतभेदकृतमप्यात्मनोभेदमपश्यन्ब्रह्मत्वमुपैतीत्याह यदेति यदाभूतानां स्थावरजङ्गमानांपृथग्भावंभेदंएकस्थंएकस्यामेवेश्वरशक्तिरूपायांप्रकृतौप्रलयेस्थितमनुपश्यति आलोचयति अतएवतस्याएवप्रकृतेःसकाशाद्भूतानांविस्तारं सृष्टिसमयेअनुपश्यति तदाप्रकृति तावन्मात्रत्वेनभूतानामप्यभेदंपश्यन्परिपूर्णंब्रह्म संपद्यतेब्रह्मैवभवतीत्यर्थः ३० तथापिसंसारावस्थायांदेहसम्बन्धनिमित्तः कर्म्मभिस्तफ

भाषा अनुवाद

नकीकारणस्वरूप प्रकृतिमात्रइसभेदकेअभावहेतुसेजोमनुष्यभूतगतभेदजनितआत्माकाभेदनहींदेखेंहैं ऐसेमनुष्योंकोब्रह्मभावप्राप्तिकहतेहैं किजवस्थावरजङ्गमभूतकापृथकभावकहे भेदकोऐसेदेखतेहैं किएकयहीपरमेश्वरकीशक्तिरूपप्रकृतिसेसृष्टिस्थितिप्रलयकालमेभूतोंकी उत्पत्तिपालननाशनिरन्तरदेखतेहैं औरतत्तत्कालमेप्रकृतिस्वरूपमात्रदेखतेभूतोंकेअभेददर्शीलोगपरिपूर्णस्वरूपब्रह्महीहैं३०

CC-0. In Public Domain. Digitized by eGangotri

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोपिकौन्तेयनकरोतिनलिप्यते३१

शाङ्करभाष्यं ।

अनादीति अनादित्वादनादेर्भावोऽनादित्वमादिःकारणंयद्यस्यनास्तितदनादियद्ध्या दिमत्तत्स्वेनात्मनाव्येत्ययन्त्वनादित्वान्निरवयवइतिकृत्वानव्येति तथानिर्गुणत्वात् सगुणोहिगुणव्ययाद्व्यत्ययन्तुनिर्गुणत्वाच्चनव्येतीति परमात्मायमव्ययोनास्यव्ययोवि द्यतइत्यव्ययोयतएवमतःशरीरस्थोपिशरीरेष्वात्मनउपलब्धिर्भवतीशरीरस्थउच्य तेतथापिनकरोतितदकरणादेवतत्फलेननलिप्यतेयोहिकर्तासकर्मफलेनलिप्यतेअय न्त्वकर्तातोआत्मानफलेनलिप्यतइत्यर्थःकःपुनर्देहेषुकरोतिलिप्यतेचयदितावदन्यःपर मात्मनोदेहीकरोतिलिप्यतेचततइदमनुपपन्नमुक्तंक्षेत्रज्ञेश्वरैकत्वं क्षेत्रज्ञञ्चापिमा म्बिद्धीत्यद्यथनास्तीश्वरादन्योदेहीकःकरोतिलिप्यतेचेतिवाच्यंपरोवानास्तीतिसर्व्व थादुर्व्विज्ञेयंदुर्व्वोध्यञ्चेतिभगवत्प्रोक्तमौपनिषदंदर्शनंपरित्यक्तंवैशेषिकैः सांख्यार्ह तबौद्धैश्चतत्रायंपरिहारोभगवतास्वेनैवोक्तःस्वभावस्तुप्रवर्ततइत्यविद्यामात्रं स्वभा वोहिकरोतिलिप्यतइतिव्यवहारोभवतिनतुपरमार्थतएकस्मिन्परमात्मनितदस्त्यत एकस्मिन्परमार्थसांख्यदर्शनेस्थितानांज्ञाननिष्ठानांपरमहंसपरिव्राजकाणांतिरस्कृ ताविद्याव्यवहाराणांकर्माधिकारोनास्तीतितत्रतत्रदर्शितंभगवता३१ किमिवनकरोति

आनन्दगिरिकृतटीका

परिपूर्णत्वेनसर्व्वात्मत्वेप्राप्तमात्मनोदेहादिगतेनकर्तृत्वादिनातद्वत्त्वंदृष्टंहि पवित्रस्या पि पञ्चगव्यादेरपवित्रसंसर्गात्तद्दोषेणदुष्टत्वमित्याशङ्कामनूद्योत्तरत्वेन श्लोकमव तारयति एकस्येति अनादित्वमेवसाधयतिआदिरितितथापिकिंस्यादित्याशंक्यकार्य त्वकृतव्ययाभावःसिध्यतीत्याह यद्वीतितथापिगुणापकर्षद्वारकोव्ययोभविष्यतिनेत्याह

भाषाअनुवाद

औरजोकहोकिपूर्वोक्तरूपआत्माकेभेदकाअभावहोनेसेभीसंसारावस्थामेदेह संबन्धसेजोकर्म्मऔर उन्हीकर्मोंकाफलरूपजोसुखदुखआदितिनकेद्वारावैषम्यभाव तोनहींदूरहोसकैहै इससेवैसेआत्माकासम्यकदर्शनकैसेसंभवहोय इसशङ्कापर कहतेहैं किजिसकीउत्पत्तिहोती उसकाअवश्यआदिहै औरजोगुणयुक्तवस्तुहै उसीकोगुणनाशहोनेसे रूपान्तरप्राप्तिरूपविकारभीहोताहै किन्तु जिसहेतुय हजीवपरमात्माऔअनादितथानिर्गुणहेतुसेअव्ययअर्थात् अधिकारीहै इससेहे कौन्तेय शरीरमेरहिकेभीकोईकर्म्मनहींकर्ता औरकर्म्मफलमेभी लिप्तनहींहोता अर्थात् इसकोकोईकर्म्मनहींलगते हैं ३१

CC-0. In Public Domain. Digitized by eGangotri

यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यतें सर्वत्रावस्थितोदेहेतथात्मानोपलिप्यते ३२

आनन्दगिरिकृतटीका

तथेति निरवयवत्वादेवअवयवद्वारकस्यनिर्गुणत्वाद्गुणद्वारकस्यच व्ययस्याभावेपि स्वभावतोव्ययःस्यादित्याशंक्याह परमात्मेति परमात्मनःस्वतःपरतोवाव्ययाभावेफलितमाह यतइति स्वमहिम्निप्रतिष्ठस्यकथंशरीरस्थत्वंतत्राह शरीरेष्विति सर्वगतत्वेनसर्वात्मत्वेनचदेहादौस्थितोपिस्वतोदेहाद्यात्मनावानकरोति कूटस्थत्वाद्देहादेश्चकल्पितत्वादित्यर्थः कर्तृत्वाभावेपिभोक्तृत्वंस्यादित्याशंक्याह तदकरणादिति तदेवोपपादयति योहीति परस्यकर्तृत्वादेरभावेकस्यतदिष्टमितिइच्छति कःपुनरितिपरस्मादन्यस्यकस्यचिज्जीवस्यकर्तृत्वादीत्याशङ्कामनुवदति यदीतितस्मिन्पक्षेप्रक्रमभङ्गःस्यादितिदूषयति ततइति ईश्वरातिरिक्तजीवानङ्गीकारान्नोपक्रमविरोधोस्तीतिशङ्कते अथेतितर्हिप्रतीतकर्तृत्वादेरधिकरणंवक्तव्यमितिपूर्ववाद्याह कइति परस्यैवकर्तृत्वाद्याधारत्वान्नास्तिवक्तव्यमित्याशंक्याह परोवेतिनास्तीतिवाच्यमितिपूर्वेणसम्बन्धःनहिकर्तृत्वादिमाङ्क्षेपरस्मात्स्मदादिवदीश्वरत्वमितिभावः परस्यान्यस्यवाकर्तृत्वादावविशिष्टेशरीरस्थोपीत्यादिस्मृतिमूलमपिज्ञातुं वक्तुञ्चाशक्यत्वात् त्याज्यमेवेतिपरीक्षकसंमत्योपसंहरतिसर्वथेति परस्यवस्तुनोकर्तुरभोक्तुश्चाविद्ययातदारोपादेयमेवभगवन्मतमितिपरिहरति तत्रेति तमेवपरिहारंप्रपञ्चयति अविद्येतिव्यावहारिकेकर्तृत्वादावविशिष्टेपारमार्थिकमेवकिंनेष्यतेतत्राह नत्विति वास्तवकर्तृत्वाद्यभावेलिङ्गमुपन्यस्यति अतइति ३१ सूक्ष्मभावादप्रतिहतस्वभावत्वादित्यर्थः नसम्बध्यते

स्वामिकृतटीका

लैश्चसुखदुःखादिभिर्वैषम्यंदुःपरिहारमितिकुतःसमदर्शनंतत्राह अनादित्वादिति यदुत्पत्तिमत्तद्देवहिसादियुक्तंतस्यगुणनाशेव्ययोभवति अयंन्तुपरमात्मात्रानादिर्निर्गुणश्चअतोऽव्ययःअविकारोत्यर्थःतस्मात्शरीरेस्थितोपिनकिञ्चित् करोतिनचकर्मफलैर्लिप्यते ३१ तत्रहेतुंसदृष्टान्तमाह यथेति यथासर्वगतपङ्कादि

भाषाअनुवाद

अबआत्माकेकर्मनकरनेऔकर्मफलमेलिप्तनहोनेमे दृष्टान्तदेतेउयेहेतुकहतेहैं किजैसेसूक्ष्मताकेहेतुसेसर्वगतआकाशपङ्कआदिमेरहतेभीअसंगहेतुसेपङ्कआदिउसकोनहींलगतेअर्थात्पङ्कसेवहलिप्तनहींहोताहै तैसेहीयावतउत्तम मध्यम औअधमशरीरोंमेरहिकेभीआत्मालिप्तनहींहोताहै अर्थात्शरीरसंबंधीपुण्यपापआदिसेयुक्तनहींहोताहै ३२ असंगहेतुसेपरमात्माकोनिर्लेपताआकाशकेदृष्टान्त

CC-0. In Public Domain. Digitized by eGangotri

यथाप्रकाशयत्येकःकृत्स्नंलोकमिमंरविः क्षेत्रंक्षेत्रीयथाकृत्स्नंप्रकाशयतिभारत ३३

शाङ्करभाष्यं

नलिप्यतइत्यत्रदृष्टान्तमाह यथासर्व्वगतमिति यथासर्व्वगतंसर्व्वव्याप्यपिसत्सौक्ष्म्यात् सूक्ष्मभावादाकाशंनोपलिप्यतेनसम्बध्यतेसर्व्वत्रअवस्थितोदेहेतथात्मानोपलिप्यते३२ किञ्चयथाप्रकाशयतीति यथाप्रकाशयत्यवभासयत्येकःकृत्स्नं लोकमिमं रविः सवितादित्यःतथातद्वन्महाभूतादिधृत्यन्तंक्षेत्रमेकःसन्प्रकाशयति कःक्षेत्रीपरमात्मेत्यर्थः रविदृष्टान्तोत्रात्मनउभयार्थोपिभवति रविवत्सर्वक्षेत्रेष्वेकःआत्माअलेपकश्चेति ३३ समस्ताध्यायार्थोपसंहरार्थोयंश्लोकःक्षेत्रक्षेत्रज्ञयोरिति क्षेत्रक्षेत्रज्ञयोर्यथाव्याख्यातयोरेवंयथाप्रदर्शितप्रकारेणअन्तरमितरेतरवैलक्षण्यविशेषंज्ञानचक्षुषाशास्त्राचार्य्योपदेशजनितमात्मप्रत्यायिकंज्ञानंचक्षुस्तेनज्ञानचक्षुषाभूतप्रकृतिमोक्षञ्चभूतानांप्रकृतिरविद्यालक्षणाव्यक्ताख्यातस्याभूतप्रकृतेर्मोक्षणमभावगमनञ्चयेविदुर्विजानन्तियान्ति गच्छन्तितेपरंपरमार्थतत्वंब्रह्म नपुनर्देहमाददति इत्यर्थः ३४ इति श्रीभगवद्गीताभाष्येत्रयोदशोऽध्यायः १३

आनन्दगिरिकृतटीका

पङ्क्तादिभिरितिशेषः ३२ नकरोति नलिप्यतेचेत्यत्रदृष्टत्वेनदृश्यधर्म्मशून्यत्वं हेतुमाह किञ्चेति दृष्टान्तेनविवक्षितमर्थन्दर्शयति रवीति उभयविधधर्म्मार्थमेवस्फुटयति रविवदिति ३३ अध्यायार्थं सफलमुपसंहरतिसमस्तेति विशेषकौटस्थ्यपरि

स्वामिकृतटीका।

ष्वपिस्थितमाकाशंसौक्ष्म्यादसङ्गत्वात्पङ्क्तादिभिर्नोपलिप्यतेतथासर्वत्र उत्तमेमध्यमेअधमेवादेहेस्थितोऽप्यात्मानोपलिप्यतेदैहिकैर्दोषगुणैर्नयुज्यतइत्यर्थः ३२ असङ्गत्वालेपोनास्तीत्याकाशदृष्टान्तेनदर्शितंप्रकाशकत्वाच्चप्रकाश्यधर्म्मैर्नयुज्यतइतिरविदृष्टान्तेनाह यथाप्रकाशयतीति स्पष्टोऽर्थः ३३ अध्यायार्थमुपसंहरति क्षेत्रक्षेत्रज्ञयो

भाषाअनुवाद

सेदिखाया अवप्रकाशकहोकेभीजोप्रकाश्यवस्तुवोंकेधर्म्मसेआत्मायुक्तनहींहै यहसूर्यकेदृष्टान्तसेकहतेहैं किहेभारतअर्जुन एकयहीसूर्यजैसेसमस्तलोककोप्रकाशकरतेहैं परन्तुप्रकाश्यवस्तुकेगुणदोषसेलिप्तनहींहोतेऐसेहीक्षेत्रीजोआत्मासोक्षेत्रकहेशरीरआदिसबकोप्रकाशकरतेभीदेहादिकेगुणदोषसेलिप्तनहींहोताहै यहतुमहमारीबातसत्यकरकेमानोहेभारत ३३ अबअध्यायकेअर्थकाउपसंहारकरते

CC-0. In Public Domain. Digitized by eGangotri

च्चे वच्चे वच्चयोरेवमन्तरंज्ञानचक्षुषा भूतप्रकृतिमोक्षञ्चयेविदुर्यान्तितेपरम् ३४

इतिश्रीमहाभारतेभीष्मपर्व्वणिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादे प्रकृतिपुरुषविवेकयोगोनाम त्रयोदशोऽध्यायः १३

आनन्दगिरिकृतटीका

णमादिलक्षणन्तदेवममानित्वादिनिष्ठतयाक्षेत्रक्षेत्रज्ञयाथात्म्यविज्ञानवतःसर्व्वानर्थनिवृत्तेरापरिपूर्णपरमानन्दाविर्भावलक्षणपुरुषार्थसिद्धिरितिसिद्धं ३४

इति आनन्दगिरिकृतटीकायांत्रयोदशोऽध्यायः १३

स्वामिकृतटीका

रिति एवमुक्तप्रकारेणक्षेत्रक्षेत्रज्ञयोरन्तरंभेदंविवेकज्ञानलक्षणेनचक्षुषा येविदुःतथाचेयमुक्ताभूतानांप्रकृतिस्तस्याःसकाशात्मोक्षंमोक्षोपायंध्यानादिकञ्चयेविदुस्तेपरंपदंयान्ति विविक्तौयेनतत्त्वेनमिथौप्रकृतिपूरुषौ तंवन्देपरमानन्दंनन्दनन्दनमीश्वरं २४ इति श्रीधरस्वामिकृतटीकायांत्रयोदशोऽध्यायः १३

भाषा अनुवाद।

हैं किइसप्रकारसेउक्तजोक्षेत्रऔक्षेत्रज्ञ तिनकाभेद जोमनुष्यविवेकज्ञानरूपचक्षुकेद्वारादेखतेहैं औरयहीपूर्वकहीजुईजोप्रकृति तिससेमोक्ष अर्थात्मुक्तिका उपायरूपध्यानधारणआदि जोजानतेहैं तेईपरमपदकोजातेहैं २४ अध्यासवशतेअर्थात्निकटतथासंगहेतुसे एकभावकोप्राप्तजोप्रकृतिऔपुरुष तिनदोनोकोजिसने स्वरूपभेदसेपृथकरूपप्रतिपन्नकिया अर्थात्निश्चयकरजाना सोईपरमानन्दस्वरूपनन्दनन्दनश्रीकृष्णभगवानको मैजगन्नाथसुकुलनामाप्रणामकरता हूं

इति जगन्नाथसुकुलविरचितमनभावनीभाषाटीकायां त्रयोदशोऽध्यायः १२

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता ।

चतुर्दशोध्यायः

श्रीभगवानुवाच परंभूयःप्रवक्ष्यामि ज्ञानानांज्ञानमुत्तमं यद्ज्ञात्वामुनयःसर्वे परांसिद्धिमितोगताः १

शाङ्करभाष्यं

सर्वमुत्पाद्यमानंक्षेत्रंक्षेत्रसंयोगादुत्पद्यतइति उक्तंतत्कथमिति तत्प्रदर्शनार्थंपरंभूयइत्यादिरध्यायआरभ्यते अथवाईश्वरपरतन्त्रयोःक्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वंनतुसांख्यानामिवस्वतन्त्रयोरित्येवमर्थंप्रकृतिस्थत्वंगुणेषुचसङ्गःसंसारकारणमित्युक्तं कस्मिन्गुणेकथंसंगः केवागुणाःकथंवा वध्नन्तीतिगुणेभ्यश्चमोक्षणंकथंस्यात् मुक्तस्यचलक्षणंवक्तव्यमित्येवमर्थञ्चश्रीभगवानुवाच परमिति परंज्ञानमितिव्यवहितेनसम्बन्धःभूयःपुनःप्रोक्तेषुसर्वेषुअध्यायेषुअसकृदुक्तमपिप्रवक्ष्यामितच्चपरंपरवस्तुविषयत्वात् किंतत्ज्ञानंसर्वेषांज्ञानानामुत्तमंउत्तमफलत्वात्ज्ञानानामितिनामानित्वादीनां किंतर्हियज्ज्ञादिज्ञेयवस्तुविषयाणांइतितानिनमोक्षायेदन्तुमोक्षायेतिपरोत्तमशब्दाभ्यांस्तौति श्रोतृबुद्धिरुच्चुत्पादनार्थंयत्ज्ञात्वायत्ज्ञानंज्ञात्वाप्राप्यमुनयःसंन्यासिनोमननशीलाःसर्वेपरांसिद्धिंमोक्षाख्यांइतोऽस्माद्देहबन्धनादूर्द्ध्वंगताःप्राप्ताः१

भाषाअनुवाद

तेरहेंअध्यायके इक्कीसयेंश्लोकसेजोकहाकिप्रकृतिऔपुरुषकेसंयोगसेसंसारकीउत्पत्तिहोतीहै निरीश्वरवादीसांख्यमतकेअवलम्बियोंकीऐसीनिश्चयकेअनुसार संसारकोस्वाधीनतानहीहै किन्तुईश्वरकीइच्छाकेक्रमहीसेसोहोताहै यहकहतेहुयेभगवानश्रीकृष्णप्रकृतिपुरुषकीस्वाधीनताकेनिवारणपूर्वक सत्त्वआदिगुणोंकेसंगसेसंसारकीविचित्रताहोतीहै औरतेरहेंअध्यायके एकइसयेंश्लोकमेंकहाजोसत्त्वादिगुणसेसंसारकीविचित्रतासोअबचौदहेंअध्यायमेंविस्तारसेभगवानकहतेहैं किऔरजोकहैंगेउसकीप्रशंसादोश्लोकसेकहतेहैं किपरमजोपरमार्थनिष्ठजिसकेद्वाराजानाजाय ऐसाजोज्ञानउपदेशसोफेरितुमसेकहूंगा सोज्ञानकिसप्रकारकाहै इसअपेक्षापर कहतेहैं कियहज्ञानमोक्षकाहेतुहै इससे तपऔकर्मआदिविषयक सकलज्ञानोंकेबीचयहउत्तमहै जिसकोजानिकेमुनिलोगस्थूलसूक्ष्मशरीरबन्धनसेछूटि श्रेष्ठसिद्धिरूपमुक्तिकोप्राप्तभयेहैं इससेज्ञानीयोंका यहउत्तमज्ञानहै यहजानो १

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

क्षेत्रक्षेत्रज्ञसंयोगस्यसर्वोत्पत्तिनिमित्तत्वमज्ञातंज्ञापयितुमध्यायान्तरमवतारयन्नध्याययोरुत्थाप्योथ्यायकत्वरूपांसंगतिमाह सर्वमिति विधान्तरेणाध्यायारम्भं सूचयति अथवेति तदेववक्तुमुक्तमनुवदति ईश्वरेति प्रकृतिस्थत्वंपुरुषस्य प्रकृत्यासहैक्याध्यासः तस्यैवगुणेषुसंगोभिनिवेशः षडविधामाकांक्षांनिक्षिप्य तदुत्तरत्वेनाध्यायारम्भेपूर्ववदेवपूर्वाध्यायसम्बन्धसिद्धिरित्याह कस्मिन्नितिपूर्वोक्तेनार्थेनास्याध्यायस्य समुच्चयार्थश्चकारः परमित्यस्यभाविकालार्थत्वंव्यावर्त्तयितुंसंगतिमाह परमितिभूय शब्दस्याधिक्यार्थत्वमिहनास्तीत्याह पुनरिति पुनःशब्दार्थमेवविवृणोति पूर्वेष्विति पुनरुक्तिस्तर्होत्याशंक्यसूक्ष्मत्वेनदुर्बोधत्वात्पुनर्वचनमर्थवदित्याह तत्रेति विशेष्यंप्रत्यवद्वारानिर्दिशति किन्तदिति निर्द्धारणार्थंषष्ठीमादायतस्यप्रकर्षंदर्शयतिसर्वेषामिति परमुत्तममितिपुनरुक्तिमाशंक्यविषयफलभेदान्नैवमित्याह उत्तमेति ज्ञानंज्ञेयमित्यादौज्ञानशब्देनामानित्वादीनामुक्तत्वात्तन्मध्येचज्ञानस्यज्ञानिनामितिसाध्यत्वेनोक्तमत्वान्नतस्यवक्ष्यतेत्याशंक्याह ज्ञानिनामिति ज्ञानिनामितिनामानित्वादीनां ग्रहणमितिशेषः इतिशब्दादूर्द्धंपूर्ववदेवशेषोद्रष्टव्यः यथोक्तज्ञानापेक्षयाकृतस्तज्ज्ञानस्यप्रकर्षस्तलाह तानीति स्तुतिफलमाह श्रोतवुद्धीति ज्ञानंज्ञात्वाज्ञानस्यज्ञेयत्वोपगमादनवस्थेत्याशंक्याह प्राप्येतिमुनिशब्दस्यचतुर्थाश्रमविषयत्वेतन्मात्रादेवज्ञानयोगात्कृतस्तेषांमुक्तिरित्याशंक्याह मननेति सिद्धेर्ज्ञानत्वंपरामितिविशेषणाद्यावर्त्यमुक्तित्वमाह मोक्षाख्यामिति देहाख्यस्यबन्धनस्याधच्चत्वमाह अस्मादिति १

स्वामिकृतटीका

पुंप्रकृत्योःस्वतन्त्रत्वंवारयन्गुणसङ्गतःप्राह संसारवैचित्र्यं विस्तरेणचतुर्दशे यावत्संजायतेकिञ्चित्सत्वंस्थावरजङ्गमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्द्वितीयुक्तं सचक्षेत्रक्षेत्रज्ञयोसंयोगोनिरीश्वरसांख्यानामिव नस्वातन्त्र्येणकिन्त्वीश्वरेच्छयैवेतिकथनपूर्वकंकारणंगुणसंगोऽस्यसदसद्योनिजन्मस्वित्यनेनोक्तंसत्वादिगुणकृतंसंसारवैचित्र्यं प्रपञ्चयिष्यन्नेवंभूतंवक्ष्यमाणमर्थंस्तौति परंभूयइति द्वाभ्यां परंपरमात्मानिष्ठंज्ञायतेऽनेनेतिज्ञानमुपरेशंभूयोऽपितुभ्यंप्रकर्षेणवक्ष्यामि कथंभूतंज्ञानिनांतपःकर्मादिविषयाणांमध्येउत्तमंमोक्षहेतुत्वात् तदेवाह यज्ज्ञात्वामुनयोमनशीलाःसर्वे इतोदेहबन्धनात् परांसिद्धिंमोक्षंप्राप्ताः १ किञ्च इदमिति इदंवक्ष्यमाणंज्ञानमुपाश्रि

CC-0. In Public Domain. Digitized by eGangotri

इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः सर्गेपिनोपजायन्तेप्रलयेनव्यथन्तिच २

शाङ्करभाष्यम्।

तस्याश्चसिद्धेरैकान्तिकत्वं दर्शयति इदमिति इदं ज्ञानंयथोक्तमुपाश्रित्यज्ञानसाधनमनुष्ठायेत्येतन्ममपरमेश्वरस्यसाधर्म्यंमत्स्वरूपतामागताः प्राप्ताइत्यर्थोनतुसमानधर्मतांसाधर्म्यंचब्रह्मेश्वरयोर्भेदानभ्युपगमात्गीताशास्त्रेफलवादश्चायंस्तुत्यर्थमुच्यते सर्गेपिसृष्टिकालेपिनोपजायन्तेनोत्पद्यन्ते प्रलयेब्रह्मणोपिविनाशकालेनव्यथन्तिचव्यथांनापद्यन्तेनच्यवन्तीत्यर्थः २ चब्रह्मब्रह्मसंयोगइदृशोभूतकारणमित्याह ममेति ममस्वभूतामदीयामायात्रिगुणात्मिकाप्रकृतियोनिःसर्व्वभूतानांसर्व्वकार्येव्योम [illegible]भरणाश्चस्वविकाराणांमहद्ब्रह्मेति योनिरेवविशिष्यते तस्मिन्महतिब्रह्मणि गर्भंहिरण्यगर्भस्यजन्मनोबीजंसर्व्वभूतजन्मकारणंबीजंदधामिनिक्षिपामिचब्रह्मचब्रह्मप्रकृतिरयशक्तिमानीश्वरोहमविद्याकामकर्म्मोपाधिस्वरूपानुविधायिनंचब्रह्मंचब्रह्मेणसंयोजयामीत्यर्थः सम्भवउत्पत्तिःसर्व्वभूतानांहिरण्यगर्भोत्पत्तिद्वारेण ततस्तस्मात्योनेर्मूलकारणाद्गर्भाधानात्भवति ३ सर्व्वयोनिष्विति देवपितृमनुष्य

आनन्दगिरिकृतटीका

ज्ञानफलस्यकर्म्मफलवैलक्षण्यमाह तस्याश्चेति कथंज्ञानाश्रयणंतद्धेतुश्रवणादिसम्पत्तिद्वारेत्याह ज्ञानेति साधर्म्येगोगवयोरिवविद्वदीश्वरयोरपिभेदःस्यादित्याशंक्याह मत्स्वरूपतामिति साधर्म्येऽस्यमुख्यत्वेभेदश्रौव्याद्गीताशास्त्रविरोधःस्यादित्याह नत्विति ज्ञानस्तुतयेतत्फलस्यविवक्षितत्वाच्चनात्रसारूप्यमिष्टमित्याह फलेतिसारूप्येधीफलंहित्वाध्यानफलमप्रस्तुतंप्रसज्येतेत्यर्थःईश्वरात्मतांगतानामेवअवान्तरसर्गादौजन्माद्यभावेपिमहासर्गादौतद्भविष्यतीत्याशंक्याह सर्गेपीति २ ज्ञानस्तुत्यातदभि

स्वामिकृतटीका

त्यज्ञानसाधनमनुष्ठायममसाधर्म्यंमद्रूपत्वंप्राप्ताःसन्तःसर्गेऽपि ब्रह्मादिषूत्पद्यमानेष्वपिनोत्पद्यन्ते तथाप्रलयेऽपिनव्यथन्तिप्रलयदुःखंनानुभवन्तिपुनर्नावर्त्तन्तइत्यर्थः२

भाषाअनुवाद

औरयहीज्ञानअर्थात्ज्ञानकासाधनजोअवतुमसेकहूंगातिसकाअनुष्ठान करिकेकहेआश्रयलेके सारूप्यमुक्तिकोप्राप्तसकलमुनिजन सर्गकहेब्रह्मादिककीउत्पत्तिहोनेसे भीउतपन्ननहींहोतेहैं औरप्रलयकालमेभीप्रलयकेदुखकोनहीं भोगतेहैं अर्थात्पुनरागमनसेरहितहोजाते हैं २ उसीज्ञानसाधनकीप्रशंसाकरिश्रोता

CC-0. In Public Domain. Digitized by eGangotri

ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहं सम्भवःसर्व्वभूतानांततोभवति भारत ३

आनन्दगिरिकृतटीका

मुखायाव्यवहितचेतसेविवक्षितमर्थमाह त्वं नेति स्वरूपत्वेनस्वभूतत्वंवारयति मदीयेति ईश्वरींचिच्छक्तिंव्यावर्त्तयतित्रिगुणात्मिकेति सांख्यीयप्रकृतिरपिमदीयेतिव्यावर्त्तितायोनिशब्देनसर्व्वाणिभवनयोग्यानिकार्य्याणिप्रत्युपादानत्वभिप्रेतमित्याहसर्व्वभूतानामिति प्रकृतेर्ब्रह्मत्वंसाधयति सर्व्वेति सर्वकार्यव्याप्तिमादाययोनावेवब्रह्मशब्दः नलिङ्गवैषम्यान्महद्ब्रह्मेत्यर्थान्तरंकिञ्चिदित्याशंक्याह योनिरिति तस्मिन्नित्यादिव्याचष्टेतस्मिन्नितिईक्षणस्यचेत्यत्र ब्रह्मसंयोगस्यभूतकारणत्वमितिवक्तुमुपक्रम्यकिमिदमन्यदादर्शितमित्याशंक्याह त्वं नेतिगर्भशब्देनोक्तसंयोगस्यफलंदर्शयति सम्भवइति आदिकर्त्तासभूतानांइति स्मृत्वाहिरण्यगर्भकार्यत्वावगमाद्भूतानांकथंयथोक्तगर्भाधाननिमित्तत्वमित्याशंक्याह हिरण्यगर्भेति ३ ननुकथमुक्तकारणानुरोधेनहिरण्यगर्भोङ्ग

स्वामिकृतटीका ।

तदेवं प्रशंसयाश्रोतारमभिमुखीकृत्य परमेश्वराधीनयोःप्रकृतिपुरुषयोःसर्व्वभूतोत्पत्तिंप्रतिहेतुत्वंनतुस्वतन्त्रयोरितीमंविवक्षितमर्थंकथयति ममेति देशतःकालतश्चापरिच्छिन्नत्वान्महत्पूर्त्तिहितत्वात्स्वकार्य्याणांवृद्धिहेतुत्वाद्ब्रह्मप्रकृतिरित्यर्थः तन्महद्ब्रह्ममममपरमेश्वरस्ययोनिर्गर्भाधानस्थानं तस्मिन्नहंगर्भंजगद्विस्तारहेतुंचिदाभासंदधामिनिःक्षिपामि प्रलयेमयिलीनंसन्तमविद्याकामकर्मानुशयवन्तं त्वं नेत्रंस्व

भाषा अनुवाद

अर्जुनकोश्रवणकीअभिलाषबढ़ाय परमेश्वरकेआधीनजोप्रकृतिऔपुरुषयेदोनोसकलभूतमात्रकीउत्पत्तिकेकारणहैं परन्तुस्वाधीनप्रकृतिपुरुषकोकारणत्वनहींहै यहीतात्पर्यश्रवकहतेहैं कि प्रकृतिदेशकालसेअपरिच्छिन्नअर्थात्सबसेभिन्नमहतकहेअनन्तसमस्तकार्यकीहेतुरूपब्रह्महै सोयहीमहतब्रह्मनामजोप्रकृति सोपरमेश्वरस्वरूपहमारीजोनि है अर्थात्गर्भधारणकास्थानहै सोइसीप्रकृतिमेमैगर्भकहेजगतकेविस्तारकाहेतुचिदाभास कहेचेतनअंशबीजरूपकोस्थापनकरताहूं औप्रलयकालमेहमारेहीमेलीनहोयहै औरअविद्यासेउत्पन्नजोकाम्यकर्म तिनकेसंस्कारसेयुक्तत्वं नेत्रआत्माकोसृष्टिकालमेभोग्यजोत्वं नेतकहेनानाप्रकारदेहतिनमेसम्यकप्रकारसेयोगकरताहूंऔरवहीगर्भआधानसेब्रह्माआदिसमस्तभूतकीउत्पत्तिहोतीहै हेभारत अर्जुन श्रवणकरो ३ केवलसृष्टिकालहीमेप्रकृतिपुरुष के

CC-0. In Public Domain. Digitized by eGangotri

सर्व्वयोनिषुकौन्तेयमूर्त्तयःसम्भवन्तियाः तासांब्रह्ममहद्योनिरहंबीजप्रदःपिता ४

शाङ्करभाष्यं

पशुमृगादिसर्व्वयोनिषुकौन्तेयमूर्तयोदेहसंस्थानलक्षणामूर्च्छिताङ्गावयवामूर्त्तयःस म्भान्तियास्तासांमूर्त्तीनांब्रह्ममहत्सर्व्वावस्थंयोनिःकारणमहमीशोबीजप्रदोगर्भा धानस्यकर्त्तापिता ४ केगुणाःकथंवध्नन्तीत्युच्यते सत्वमिति सत्वंरजस्तमइत्येवना मानोगुणाइति पारिभाषिकाःशब्दानरूपादिवत्द्रव्याश्रिताः नचगुणगुणिनोरन्यत्व मलक्षितंतस्माद्गुणाइवनित्यपरतन्त्राः चैतन्यंप्रत्यविद्यात्मकत्वात्चैतन्यंनिवध्न न्तीवतमास्यदीक्षत्यात्मानंप्रतिलभतइतिनिवध्नन्तीत्युच्यते तेचप्रकृतिसम्भवाभग वन्मायासम्भवानिवध्नन्तीवहेमहाबाहोमहान्तौसमर्थतरौबाजानुप्रलम्बौबाहू यस्य समहाबाहुः हेमहाबाहो देहेशरीरेदेहिनंदेहवन्तं अव्ययमव्ययत्वञ्चोक्तमनादि त्वादिश्लोके ५ ननुनदेहीलिप्यते इत्युक्तं तत्कथमिहनिवध्नन्तीत्यत्रयाउच्यते प

आनन्दगिरिकृतटीका ।

वमभ्युपेत्यभूतानामुत्पत्तिरुच्यते देवादिजातिविशेषेषुदेहविशेषाणांकारणान्तरसम्भ वात्तत्राह सर्व्वयोनिष्विति तत्तत्कर्म्मान्तरप्रतिभासेकुतोस्यकर्तृत्वमित्याशंक्यनतद्भू तेष्वस्यैवावस्थानादित्याह सर्व्वावस्थमिति ४ एवंचैतन्यस्यैतन्यसंयोगाज्जगदुत्पत्तिंद र्शयतात्रह्मैवाविद्ययासंसरतीत्युक्तं इदानीमध्यायादावुक्तमाकांक्षाद्वयं पूर्व्वमनूद्यान न्तरश्लोकेनोत्तरमाह केगुणाइतिसत्त्वादिषुकथंगुणशब्दप्रवृत्तिरित्याशंक्यपरतन्त्र

स्वामिकृतटीका ।

ष्टिसमयेभोग्येनचैतन्येनसंयोजयामीत्यर्थः ततोगर्भाधानात्सर्व्वभूतानांब्रह्मादीनांस म्भवउत्पत्तिर्भवतीति ३ नकेवलंसृष्ट्युपक्रमएवमदधिष्ठानेनाभ्यांप्रकृतिपुरुषाभ्याम यंभूयोत्पत्तिप्रकारोऽपितुसर्व्वदैवेत्याह सर्वेति सर्व्वासुयोनिषुमनुष्याद्यासुयामूर्त्तयः स्थावरजङ्गमात्मिकाउत्पद्यन्तेतासांमूर्त्तीनांमहद्ब्रह्मप्रकृतिर्योनिर्मातृस्थानीया अहञ्चबीजप्रदःपितागर्भाधानकर्त्तापिता ४ तदेवंपरमेश्वराधीनाभ्यां प्रकृतिपुरु

भाषा अनुवाद

द्वाराभूतोंकाजन्महोताहै ऐसानजानो परन्तुसदासर्वदाप्रकृतिपुरुषसेप्राणीप्रगट ऊ आकरतेयहकतेहैं किहेकौन्तेयअर्जुन जितनेमनुष्यआदियोनिस्थावरजंगमस्व रूपउतपन्नहोतेहैं उनकीनिरन्तरबढावनेवालीप्रकृतियोनिहै अर्थात्मातारूप है औबीजप्रदातापितारूपगर्भाधानकर्त्तापुरुषरूपमैहौं ४ परमेश्वराधीनप्रकृ

CC-0. In Public Domain. Digitized by eGangotri

सत्वं रजस्तम इतिगुणाः प्रकृतिसम्भवाः निबध्नन्तिमहाबाहोदेहेदेहिनमव्ययं ५

शाङ्करभाष्यं

रिहतंअस्माभिरिवशब्देननिबध्नन्तीवेति तत्रसत्त्वमिति तत्रसत्त्वादीनांसत्वस्यैवताव ल्लक्षणमुच्यते निर्मलत्वात्स्फटिकइवमणिः३ काशकमनामयंनिरुपद्रवंसत्वं तन्निव ध्नातिकथंसुखसङ्गेनसुख्यहमितिविषयभूतस्यसुखस्यविषयिन्यात्मनिसंश्लेषापादनंहृषै वसुखेनसंजननमिति सैषाअविद्यानहिविषयधर्म्मोविषयिनोभवतिइच्छादिचक्षत्यन्तं च्चेतस्यैवविषयस्यधर्म्मइत्युक्तंभगवताअतोऽविद्ययैवस्वकीयधर्म्मभू तया विषयविषय

आनन्दगिरिकृतटीका

त्वादित्याह गुणाइतिरूपादिष्विवगुणशब्दः सत्त्वादिषुद्रव्याश्रितत्वंनिमित्तीकृत्यकिं नस्यादित्याशंक्याह पारिभाषिकइति प्रकृत्यात्मकानांतेषांसर्व्वाश्रयत्वान्नैवमित्याह नरूपादिवदितिगुणानांप्रकृतेश्चपृथगुक्तेरन्यत्वे कुतस्तेषां प्रकृत्यात्मत्वमित्याशंक्याह नचगुणेति अत्यन्तभेदेगवाश्ववत्तद्भावासम्भवादित्यर्थः भेदाभेदेचतद्भावासम्भवाद्विशे षात्कुतस्तेषुगुणपरिभाषेत्यशंक्याह तस्मादिति च्चेतन्नित्यप्रतिनित्यपारतन्त्र्यहेतुना हअविद्येति केगुणाइत्यस्योत्तरमुक्तं कथंबध्नन्तीत्यस्योत्तरमाह च्चेतन्नमिति तदेवोप पादयतितमास्रदीक्षत्येति सम्भवत्यस्मादितिसम्भवः प्रकृतिः सम्भवोयेषांतेतथेतिप्राक्त तानांगुणानांप्रकृत्यात्मकत्वमाह तेचेतिसांख्यांयप्रकृतिंप्रधानाख्यांव्यावर्त्तयतिभग वदिति इवकारानुवन्धेननितरांबध्नन्तिस्वविकारवत्तयोपदर्शयन्तीतिक्रियापदंव्या ख्यायमहाबाहुशब्दंव्याचष्टे महान्तौबितिदेहवन्तंदेहमात्मानंमन्यमानंदेहस्वामि नमित्यर्थः कूटस्थस्यकथंबध्यमानत्वमित्याशंक्यकुर्याज्मेरावणधियमितिन्यायेनमाहा त्मभिदमित्याह अव्ययमिति स्वतोधर्मतोवाव्ययोराहित्यापेक्षायामाह अव्ययत्वञ्चेति५

भाषाअनुवाद

तिपुरुषकेद्वाराप्राणियोंकीउत्पत्तिनिरूपणकरिकेअबप्रकृतिकेसंयोगसे पुरुषकी संसारअवस्थादूसश्लोकसेलेकरचारिश्लोकपर्यन्तक्रमसेविस्तारकरिकहतेहैं किहेम हाबाहोअर्जुन सत्वरजऔतमयेतीनगुणोकीसमानअस्थारखनेवालीजोप्रकृति ति ससेजिसकीउत्पत्ति है उसमेगुणों केधर्म्मआवहींगेदेखोप्रकृतिसेगुणों केअनुसार भिन्नभिन्नप्रगटहोप्रकृतिके कार्यरूपशरीरमेअहंबुद्धियुक्तस्थितदेहीस्वरूपचिदंश आत्माजोसचभुचअव्ययनिर्विकाररूपहै उसकोभीगुणअच्छीतरहवद्धकरतेहैं अ र्थात् अपने कार्यसुखदुखमोहआदि से युक्त करदेतेहैं ५ तिनगुणोंकेबीचमेंसतो

CC-0. In Public Domain. Digitized by eGangotri

तत्रसत्त्वंनिर्मलत्वात्प्रकाशकमनामयं सुखसङ्गेनबध्नातिज्ञानसङ्गेनचानघ ६

शाङ्करभाष्यं

विवेकलक्षणयाऽस्यात्मभूते सुखेसंजयतीवासक्तमिवकरोत्यसुखिनंसुखिनमिवतथाज्ञा
नसंज्ञेनचदेहिनंज्ञानमिति सुखसाहचर्यात् क्षेत्रस्यैवान्तःकरणस्यधर्मोनात्मनःआ
त्मधर्मत्वेसङ्गानुपपत्तेर्बन्धानुपपत्तेश्चसुखवज्ज्ञानादौसङ्गोमन्तव्यःअनघअव्यसन ६

आनन्दगिरिकृतटीका ।

लिप्यतेनसपापेनेत्यनेनविरुद्धमिदंनिबध्नन्तीतिवचनमिति शङ्कतेनन्वितिद्व
कारानुवन्धेनक्रियापदंव्यचक्षाणैरस्माभिरस्यचोद्यस्यपरिहृतत्वान्नैवमित्याह प
रिहृतमिति किंलक्षणोगुणःकेनबध्नातीत्यपेक्षायामाह तत्रेति निर्द्धारणार्थतयासप्त
मींव्याचष्टे तत्रसत्त्वादीनामिति पुनस्तत्रेत्यनुवादमात्रं निर्मलत्वंस्वच्छत्वमावरणाभ
मत्वंतस्मात्प्रकाशश्चैतन्याभिव्यञ्जकंनिरुपद्रवमितिनिर्मलंसत् सुखस्याभिव्यञ्जक
मित्यर्थः केनद्वारेणतदात्मानंनिबध्नातीतिपृच्छति कथमिति सुखसङ्गेनबध्नातीत्यु
त्तरन्तदेवविवृणोति सुख्यहमित्यादिना सुखसुखस्याभिव्यञ्जकसत्त्वपरिणामोत्तरवि
षयभूतंसुखमुच्यते संश्लेषापादनमेवविशदयति स्पर्शेवेति किमितिस्पर्शेवेतिविशेषणं

स्वामिकृतटीका

षाभ्यांसर्वभूतोत्पत्तिंनिरूप्येदानींप्रकृतिसंगेनपुरुषस्यसंसारंप्रपञ्चयति सत्त्वमित्या
दिचतुर्भिः सत्वंरजस्तमइत्येवंसंज्ञकास्त्रयोगुणाप्रकृतिसम्भवाःप्रकृतेःसम्भवउद्भवोये
षांतेतथोक्ताःगुणसाम्यंप्रकृतिस्तस्याःसकाशात्पृथक्त्वेनाभिव्यक्ताःसन्तः प्रकृतिका
र्य्यंदेहेतादात्म्येनस्थितंदेहिनंचिदंशंवस्तुतोऽव्ययंनिर्विकारमेवसन्तंनिबध्नन्तिस्वका
र्य्यैःसुखदुःखमोहादिभिःसंयोजयन्तीत्यर्थः ५

भाषा अनुवाद ।

गुणकास्वरूपऔरउसकेबन्धकत्वकीप्रकारकहतेहैं किसतोगुणनिर्मलताकेहेतुसे
फटिककेसमानप्रकाशककहेदीप्तियुक्तऔरअनामयअर्थात्निरुपद्रवशान्तस्वरूपहैं
इसीसेहेअनघनिःपापअर्जुन शान्तस्वरूपसतोगुणअपनेकार्यरूपसुखमेजोआशक्ति
केद्वारावन्धकरताहै औरप्रकाशकहै इसहेतुसे अपनेकार्यरूपज्ञानमेजोआशक्ति
उसमेभीवद्धकरताहै अर्थात्हमसुखीहमज्ञानीइत्यादिमनकेसकलकर्मकोतिसके
अभिमानीक्षेत्रज्ञरूपआत्माकेसाथसम्पूर्णरूपसेयोगकरदेताहै अनघपदसेजानाया
किगीताकाअधिकारीपुण्यात्मापुरुषहै ६

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

रजोरागात्मकंइति रजोरागात्मकंरञ्जनाद्रागोगैरिकादिवद्रागात्मकं विद्धिजानी हितृष्णासङ्गसमुद्भवंतृष्णाप्राप्ताभिलाषःआसङ्गःप्राप्तेविषयेमनसः प्रीतिलक्षणंसंश्लेषःतृष्णासंगसमुद्भवंतृष्णासंगयोःसमुद्भवंतृष्णासंगसमुद्भवंतन्निबध्नातितद्रजःकौन्तेय कर्मसङ्गेनदृष्टादृष्टार्थेषुकर्मसुसंजननंतत्परताकर्मसङ्गस्तेननिबध्नातिरजोदेहिनं ७

तमस्त्विति तमस्तूतोयोगुणोऽज्ञानजमज्ञानाज्जातमज्ञानजंविद्धिमोहनं मोह

आनन्दगिरिकृतटीका

सङ्गस्यवस्तुत्वसम्भवादित्याशंक्याह सैषेति नन्विच्छासङ्गोभिनिवेशश्चेत्येकोर्थस्तत्रेच्छादेरात्मधर्म्मत्वात्किमविद्ययेत्याशंक्यमनोधर्म्मत्वादिच्छादेर्नात्मधर्मतेत्याह नहीति इच्छादेरनात्मधर्मत्वे किंप्रमाणमित्याशंक्याह इच्छादिचेति तस्यात्मधर्मत्वासम्भवे फलितमाह अतइति संजयतीवसत्त्वमितिशेषः इवकारप्रयोगेहेतुमाह अविद्ययेति तस्यावस्तुतोनात्मसम्बन्धस्तथापिसम्बन्धप्रतिभासादस्वातन्त्र्याच्च आत्मधर्मत्वमापाद्यइष्टमाचष्टे स्वकीयेति कृतिमदन्तःकरणस्यविषयत्वादात्मनःसाधकत्वेनतद्विषयत्वेपितद्विवेकरूपाविद्येतितत्स्वरूपमाह विषयेति यथोक्ताविद्यामाहात्म्यमिदंयद स्वरूपेतद्धर्मेचशक्तिसम्पादनमित्याह अस्येति तदेवस्फुटयति असक्तमिवेतिप्रकारान्तरेणसत्त्वस्यनिबध्नत्वमाह तथेति ज्ञायतेऽनेनेति सत्वपरिणामोज्ञानंतेनज्ञान्यहमिति विपरीताभिमानेनसत्त्वमात्मानंनिबध्नातीत्याह ज्ञानमित्यादिना विपक्षेदोषमाह आत्मेति स्वाभाविकत्वेनप्राप्तत्वात्तत्रस्वतःसंयोगात्तद्द्वारावन्धेचतन्निवृत्त्यनुपपत्तेर्नात्मधर्मत्वमित्यर्थः ज्ञानैश्वर्य्यादावपिच्छेदधर्मेसङ्गस्यपूर्ववदाविद्यकत्वंसूचयति सुखइवेति पापादिदोषहीनस्यैवात्रशास्त्रेधिकारइति द्योतयति अनघेति ६

रजस्त्वर्हिकिंलक्षणंकथंवापुरुषंनिबध्नातीत्याशंक्याह रजइति रज्यतेसंसज्यतेऽनेनपुरुषोदृश्यैरिति रागोऽसावात्माऽस्येति रागात्मकंरजोजानीहीत्याहरञ्जनादि

स्वामिकृतटीका।

तत्रसत्त्वस्यलक्षणंबन्धकत्वप्रकारञ्चाह तत्रेति तत्रतेषांगुणानांमध्ये सत्त्वंनिर्मलत्वात्स्वच्छत्वात् स्फटिकमणिरिवप्रकाशकंभास्वरंअनामयञ्चनिरुपद्रवंशान्तमित्यर्थः अतःशान्तत्वात्स्वकार्येणसुखेनयःसङ्गस्तेनबध्नाति प्रकाशकत्वाच्चस्वकार्येणज्ञानेनयःसङ्गस्तेनचबध्नातिहेअनघअपापअहंसुखीज्ञानीचेतिमनोधर्म्मास्तदभिमानिनि क्षेत्रज्ञेसंयोजयतीत्यर्थः ६ रजसोलक्षणंबन्धकत्वञ्चाह रजइति रजःसंज्ञकंगुणंरागात्म

CC-0. In Public Domain. Digitized by eGangotri

रजोरागात्मकंविद्धितृष्णासङ्गसमुद्भवं तन्निबध्नातिकौन्तेयकर्मसङ्गेनदेहिनं ७

शाङ्करभाष्यं

करमविवेककरंसर्वदेहिनांसर्वेषांदेहवतांप्रमादालस्यनिद्राभिःप्रमादश्चालस्यञ्चनिद्राचप्रमादालस्यनिद्रास्ताभिस्तमोनिबध्नाति भारत ८ पुनर्गुणानांव्यापारःसंक्षे

आनन्दगिरिकृतटीका

ति समुद्भवत्यस्मादिति समुद्भवःतृष्णाचासङ्गश्चतृष्णासङ्गौतयोःसमुद्भवःतमिति विग्रहंगृहीत्वाकार्यद्वारारजोविबन्धुस्तृष्णासङ्गयोरर्थभेदमाह तृष्णेत्यादिनारजसोलक्षणमुक्त्वानिबन्धत्वप्रकारमाहतद्रजइतिकर्मसङ्गंविभजते दृष्टेति अकर्त्तारमेवपुरुषं करोमिइत्यभिमानेनप्रवर्त्तयतीत्यर्थ ७ तमस्तर्हिकिंलक्षणंकथंवापुरुषंनिबध्नाति तत्राह तमस्त्वितिगुणानांप्रकृतिसाम्यवस्थत्वाविशेषेपितमसोऽज्ञानजत्वविशेषणंतद्विपरीतस्वभावाप्रवृत्तेरितिमत्वाह अज्ञानादिति मुह्यति हिताहितेनविविच्यतेत्यनेनेतिमोहनम्विवेकप्रतिबन्धकमिति कार्यद्वारातमोनिर्दिशति मोहनमित्यादिना लक्षणमुक्त्वातमसोबन्धनकरत्वंदर्शयति प्रमादेति कार्यान्तरासक्ततयाचिकीर्षितस्य कर्त्तव्यस्याकरणंप्रमादःनिरीहतयोत्साहप्रतिबन्धस्त्वालस्यंस्वापोनिद्रातामिरात्मानमविकारमेवतमोपिविकारयतीत्यर्थः ८ उक्तानांमध्येकस्मिन्कार्येकस्यगुणस्योत्क

स्वामिकृतटीका।

कमनुरञ्जनरूपंविद्धिअतएवतृष्णासङ्गसमुद्भवंतृष्णाअप्राप्ताभिलाषः सङ्गःप्राप्तेऽर्थेप्रीतिर्विशेषेणासक्तिस्तयोस्तृष्णासङ्गयोःसमुद्भवोयस्मात्तद्रजोदेहिनं दृष्टादृष्टार्थेषुकर्मसुसंगेनासक्त्यानितरांबध्नाति तृष्णासङ्गाभ्यांहिकर्मस्वासक्तिर्भवति इत्यर्थः ७

तमसोलक्षणंबन्धकत्वञ्चाह तमदृति तमस्त्वज्ञानाज्जातंआवरणशक्तिप्रधानात्प्रकृत्यंशादुद्भूतंविद्धीत्यर्थःअतःसर्वेषांदेहिनांमोहनंभ्रान्तिजनकंअतएव प्रमादेनालस्येननिद्रयाचतत्तमोदेहिनंनिबध्नाति अत्रप्रमादोऽनवधानंआलस्यमनुद्यमःनिद्राचित्तस्यावसादःलयः ८ सत्वादीनामेवस्वस्वकार्यकरणेसामर्थ्यातिशयमाह सत्त्व

भाषाअनुवाद

अबरजोगुणकास्वरूपऔरबन्धकत्वकहतेहैं किहेकौन्तेयअर्जुन रजोगुणको रागात्मककहेअनुरागस्वरूपजानो इसमेंतृष्णाजोअप्राप्तवस्तुमेंअभिलाषऔसंगकहेप्राप्तविषयमेंजोसम्पूर्णआशक्तिइनदोनोकारजोगुणसेउद्भवहोताहै सोईरजोगुणदेहीजीवकोदृष्टऔअदृष्टअर्थकर्मोंकीआशक्तिमेंनिश्चयबन्धकरैहैं क्योंकितृष्णाऔसंगकेद्वारासमस्तकर्मसेआशक्तिहोतीहै ७ अबतमोगुणकास्वरूपऔबन्धकत्वकहतेहैं

CC-0. In Public Domain. Digitized by eGangotri

तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनां प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारत ८
सत्त्वंसुखेसञ्जयति रजःकर्मणिभारत ज्ञानमावृत्यतुतमःप्रमादेसञ्जयत्युत ९

शाङ्करभाष्यं।

एतउच्यते सत्वमिति सत्वंसुखे संजयतिसंश्लेषयतिरजःकर्मणिहेभारत संजयती तिवर्त्ततेज्ञानंसत्वकृतंविवेकमावृत्याच्छाद्यतुतमःस्वेनावरणात्मनाप्रमादेसंजयत्युतप्र मादोनामप्राप्तकर्त्तव्याकरणं ९ उक्तकार्यंकदाकुर्वन्तिगुणइत्युच्यते रजइति रज स्तमश्चोभावप्यभिभूयसत्वंभवत्युद्भवति वर्द्धतेयदातदालब्धात्मकंसत्वंस्वकार्यंज्ञानसु खाद्यारभतेहेभारत तत्रयारजोगूणःसत्वंतमश्चैवोभावप्यभिभूयवर्द्धतेयदातदाकर्म

आनन्दगिरिकृतटीका।

र्षस्त्वत्राह पुनरिति सुखसाध्येविषयेसमुत्कृष्यतेसत्त्वमित्याह सत्वमिति सञ्जयती त्यस्यार्थमाह संश्लेषयतीति कर्मणिसाध्येरजःसमुत्कृष्यतइत्याह रजइति प्रमादेप्रा धान्यस्तमसोदर्शयति ज्ञानमिति ९ इतरेतराविरोधेनवा सत्वादयोगुणायुगपदुत्

स्वामिकृतटीका

मिति सत्वंसुखेसञ्जयतिसंश्लेषयतिदुःखशोकादिकारणेसत्यपिसुखाभिमुखमेवदेहि नंकरोतीत्यर्थः एवंसुखादिकारणेसत्यपिरजःकर्मण्येवसञ्जयति तमस्तुमहत्संगेनो त्पद्यमानमपिज्ञानमानमपिज्ञानमावृत्याच्छाद्य प्रमादे सञ्चयतिमहद्भिरुपदिश्यमा नस्यार्थस्यानवधानेयोजयति उतअपिआलस्यादावपिसंयोजयतीत्यर्थः ९ तत्रहेतुमा

भाषाअनुवाद।

कितमोगुणअज्ञानसेप्रगटहै अर्थात्आवरणशक्तिप्रधानप्रकृतिकेअंशसेप्रगटजा नोइससेहेभारतअर्जुन यावत्जीवकामोहकारीअर्थात्भ्रमउत्पन्नकरैहै तो क्यौन यहतमोगुण प्रमादआलस्यऔनिद्राआदि दोष जीवको करैगा ८

सत्वआदितीनोगुणोंकेस्वकार्यकरनेमेसामर्थकोआधिक्यकहतेहैं कि हेभारत अर्जुनसतोगुणसुखमेयुक्तकरताहै अर्थात्यद्यपिविषयसुख ईर्षाअशूयाजोगसे प्र गटसुखदुखशोकआदिकाकारणस्वरूपहै तौभीजीवकोसुखहीकीओरउन्मुख कर ताहै औररजोगुणसुखआदिकाकारणहोकेभीसर्वकर्मोमेयुक्तकरताहै औरतमोगु णमहात्मोकेसंगसेउत्पन्नज्ञानकोआवरणकरिकेअसावधानकरदेयहै अर्थात्महा त्मोंकेउत्तमउपदेशकोनहीसमझनेदेयहै औरआलस्यआदिमे अच्छीतरहयुक्तक रदेताहै ९ अबसत्वादितीनोगुणोंकेप्रवृत्तहोनेकीरीति कहतेहै किरजोगुणत

CC-0. In Public Domain. Digitized by eGangotri

रजस्तमश्चाभिभूय सत्वं भवतिभारत रजःसत्वं तमश्चैव तमःसत्त्वंरजस्तथा १०
सर्व्वद्वारेषुदेहेऽस्मिन्प्रकाशउपजायते ज्ञानंयदातदाविद्याद्विवृद्धंसत्त्वमित्युत ११

शाङ्करभाष्यं।

तृष्णादिस्वकार्यमारभतेतमआख्योगुणःसत्त्वंरजश्चोभावप्यभिभूयतथैवबर्द्धते यदा तदाज्ञानावरणादिस्वकार्यमारभते १० यदायोगुणःसमुद्भूतोभवतितदातस्यकिं लिङ्गंउच्यते सर्व्वद्वारेषुइतिसर्वद्वारेष्वात्मनउपलब्धिद्वाराणिश्रोत्रादीनिसर्व्वाणिक रणानितेषुद्वारेषुअन्तःकरणस्यवृद्धेर्वृत्तिःप्रकाशोदेहेस्मिन्प्रकाशशब्दवाच्यःसर्व्वद्वा

आनन्दगिरिकृतटीका।

क्षयन्तेविरोधेनवाक्रमेणवेतिसन्देहात्पृच्छति उक्तमिति सत्वोत्कर्षार्थिनामितरा भिभवार्थंक्रमपक्षमाश्रित्योत्तरमाह उच्यतेइति सत्वाभिवृद्धिमेवविवृणोति तदेति रजस्तमसोस्तिरोधानदशायामिति यावत्रजसोवृद्धिप्रकारान्तत्कार्यञ्चकथयति तथेति तमसोपिवृद्धिन्तत्कार्यञ्चनिर्दिशति तमइति १०

स्वामिकृतटीका।

ह रजइति रजश्चमश्चेतिगुणद्वयमभिभूयतिरस्कृत्यसत्वंभवति अदृष्टवशादुद्भवति अतःस्वकार्यसुखादौसञ्जयतीत्यर्थः एवंरजोऽपिसत्वंतमश्चेतिगुणद्वयमभिभूयोद्भव ति अतःस्वकार्येतृष्णासंगादौसञ्जयतिएवंतमोऽपिसत्वंरजश्चोभावपिगुणावभिभूयो द्भवति अतः स्वकार्यप्रमादालस्यादौसञ्जयतीतर्थः १० इदानींसत्वादीनांविवृद्धानां

भाषाअनुवाद

मोगुणकोतिरस्कारकहेपराभवकरिकेसतोगुणप्रगटहोयहैअर्थात्जीवकेअदृष्टवश तेसत्वजन्मैहै औरअपनेकार्यसुखआदिमेजीवकोयुक्तकरैहै ऐसेहीसत्वओतमो गुणकापराभवकरिरजोगुणजन्मैहै औरअपनेकार्यतृष्णाआदिमेयुक्त करताहै तैसेहीसत्वरजकोपराभवकरिकेतमोगुणप्रगटहोयहै औरअपनेकार्यप्रमादआल स्यमेयुक्तकरिदेताहै १० अवविशेषसेवढ़ेहुये सत्वआदितीनोंगुणोंकेलक्षण कहेचिह्न तीनश्लोकसेकहतेहैं कि इसभोगायतनकहेभोगभाण्डशरीरमे श्रोत्र आदिसमस्तद्वारमे जिससमय शब्दआदिज्ञानस्वरूप उत्पन्नहोताहैं उससमयप्र काशरूपचिह्नकेद्वारा सतोगुनकोविशेषबढ़ाजानोऔसुखआदिचिह्नसेभी सत्वकी वृद्धिजानोतात्पर्य्ययह किईन्द्रियोंकेद्वाराजोज्ञानहोतासोसतोगुणहीसेहोयहै ११

CC-0. In Public Domain. Digitized by eGangotri

लोभःप्रवृत्तिरारम्भःकर्मणामशमःस्पृहा रजस्येतानिजायन्तेविवृद्धेभरतर्षभ १२

शाङ्करभाष्यं

रेषुउपजायतेतदेवज्ञानंयदैबंप्रकाशोज्ञानाख्यउपजायतेतदाज्ञानप्रकाशेन लिङ्गेन विद्याद्विवृद्धंउद्भूतंसत्वमित्युतापि ११ रजसउद्भूतस्येदंचिह्नं लोभइति लोभपरद्रव्यादिष्विच्छाप्रवृत्तिःप्रवर्त्तनंसामान्यचेष्टाआरंभःउद्यमःकस्यकर्मणामशमः अनुपशमःहर्षःरागादिप्रवृत्तिः स्पृहासर्व्वसामान्यवस्तुविषयातृष्णारजसिगुणेविवृद्धेएतानिलिङ्गानिजायन्ते हेभरतर्षभ १२

आनन्दगिरिकृतटीका

उत्तरश्लोकत्रयस्याकांक्षांदर्शयति यदेति सत्वोद्भवलिङ्गदर्शनार्थमनन्तरंश्लोकमुत्थापयति उच्यतइति सर्व्वद्वारेष्वित्यादिसप्तमीनिमित्तेनेतव्या उतशब्दोपिशब्दपर्यायोत्थतिशयार्थः ११ अतिशयेनोद्भूतस्यरजसोलिङ्गमाह रजसइति उपक्रमपर्य्यायस्यारम्भस्यविषयंपृच्छति कस्येति कान्यानिनिषिद्धानिचलौकिकानि कर्म्माणि विषयत्वेननिर्दिशति कर्म्मणामिति अनुपशमोवाह्यान्तःकरणानामितिशेषः लोभाद्युपलक्षाद्रजोवृद्धिर्बोधव्येति भावः १२

स्वामिकृतटीका

लिंगान्याह सर्वद्वारेष्वितित्रिभिः अस्मिन्नात्मनोभोगायतनेदेहे सर्व्वेष्वपिद्वारेषुश्रोत्रादिषुयदाशब्दादिज्ञानात्मकःप्रकाशउपजायते उत्पद्यते तदानेनप्रकाशलिङ्गेन सत्वंविवृद्धंविद्यात्जानीयात् उतशब्दात्सुखादिलिंगेनापिजानीयादित्युक्तं ११

किञ्च लोभइति लोभोधनाद्यागमेवज्रुधाजायमानेऽप्रियःपुनःपुनर्वर्द्धमानोभिलाषःप्रवृत्तिर्नित्यं कुर्वद्रूपता कर्म्मणामारम्भोमहागृहादिनिर्म्माणोद्यमः अशमःइदं

भाषा अनुवाद

औरहेभरतर्षभअर्जुनलोभकहेवज्रुतधनरहतें औरपैदाहोतेभीधनकीवारवार वृद्धि करनेकी लाषलाषअभिलाष औप्रवृत्तिकहेसदाहींव्यापारमेमनदियेरहना औआरम्भअर्थात्कर्मोकाआरम्भ घरवगीचाअभूषणादिबनानेमेउद्यम औरअशमकहेमैयहकर्मकरिकेफेरिवहकर्मकरूंगा यहजोसंकल्पमेमनकाअसन्तोष औस्पृहाकहे उत्तम अधम वस्तुदेखनेहीमे जिसतरहहोतिसतरहलेनेकीईच्छा येसबचिह्नरजोगुणकेबढनेमेहोतेहैं अर्थात्इनलक्षणोसे रजोगुणकीवृद्धिजानो हे भरतर्षभअर्जुन यहकृष्णनेकहा १२

CC-0. In Public Domain. Digitized by eGangotri

अप्रकाशोऽप्रवृत्तिश्चप्रमादोमोहएवच तमस्येतानिजायन्तेविवृद्धेकुरुनन्दन १३
यदासत्त्वेप्रवृद्धेतुप्रलयंयातिदेहभृत् तदोत्तमविदांलोकानमलान्प्रतिपद्यते १४

शाङ्करभाष्यं ।

अप्रकाशइति अप्रकाशोऽविवेकोत्यन्तमप्रवृत्तिश्चाप्रवृत्तप्रभावःतत्कार्यंप्रमादो मोहएवचअविवेकोमूढतेत्यर्थः तमस्यिगुणेविवृद्धेएतानिलिङ्गानिजायन्तेहेकुरुनन्द न १३ मरणद्वारेणापियत्फलंप्राप्यतेतदपिसंगरागहेतुकं सर्व्वगौणमेवेति दर्शयन्नाह यदेति यदासत्त्वेप्रवृद्धे उद्भूतेतुप्रलयंमरणंयातिप्रतिपद्यते देहभृदा त्मा तदाउत्तमविदाम्महदादितत्त्वविदामित्येतल्लोकानमलान्मलरहितान् प्रति पद्यतेप्राप्नोतीत्येतत् १४ रजसिगुणेविवृद्धे प्रलयंमरणंगत्वाप्राप्य कर्मसंगिषु

आनन्दगिरिकृतटीका ।

उद्भूतस्यतमसोलिंगमाह अप्रकाशइति सर्व्वथैवज्ञानकर्मणोरभावोविशेषणा भ्यामुक्तस्तत्कार्यमिति तच्छब्दोदर्शितोविवेकार्थः प्रमादोव्याख्यातःमोहोवेदितव्य स्यान्यथावेदनं तस्यैवमौख्यान्तरमाह अविवेकइति अविवेकातिशयादिनाप्रवृद्ध न्तमोज्ञेयमितिभावः १३ सात्त्विकादीनांभावानांपारलौकिकंफलविभाग

स्वामिकृतटीका ।

कृत्वेदंकरिष्यामीत्यादिसङ्कल्पविकल्पानुपरमः स्पृहाउच्चावचेषुइष्टमात्रेषुवस्तुषु इ तस्ततोनिघृक्षारजसिविवृद्धेसति एतानिलिंगानिजायन्ते एभिर्लिङ्गैरजोगुणस्य विवृद्धिं जानीयादित्यर्थः १२ किञ्च अप्रकाशइति अप्रकाशोविवेकभंशः अप्रवृत्तिर नुद्यमः प्रमादःकर्त्तव्यार्थानुसन्धानराहित्यंमोहोमिथ्याभिनिवेशःतमसिप्रवृद्धेसत्येता निलिङ्गानिजायन्तेएतैस्तमसोवृद्धिं जानीयादित्यर्थः १३ मरणसमयेविवृद्धानांसत्वा

भाषाअनुवाद

और अप्रकाशकहेविचारकाभी और अप्रवृत्तिकहेनिरुद्यम और प्रमादकहे हरकामहरवातमे वेखबर और मोहकहे मिथ्याअभिनिवेशअर्थात्दुर्चितई याभूटे कारखानेमेमनदेना येसबचिह्नतमोगुणसेहोतेहैं और इनलक्षणोंसेतमोगुणकी वृद्धिजानो १३ अबमरणकालमे विशेषसेबर्द्धमानसत्वआदिगुणोंकाफलविशे ष दोश्लोकसेकहतेहैं किजोसतोगुणकीवृद्धिकेसमयमे देहधारीजीवशरीरछोडैं तोहिरण्यगर्भआदिकीउपासनाकरनेवालेमनुष्योंके प्रकाशमयसुखउपभोगकरने केजोस्थानहैं उनस्थानविशेषोंकोप्राप्तहोतेहैं १४ और रजोगुणकीवृद्धिकेस

CC-0. In Public Domain. Digitized by eGangotri

रजसिप्रलयंगत्वाकर्मसङ्गिषुजायते तथाप्रलीनस्तमसिमूढ़योनिषुजायते १५

शाङ्करभाष्यं

स्वकर्माशक्तियुक्तेषुमनुष्येषुजायते तथा तद्देवप्रलीनोम्रतस्तमसिविष्टब्धे मूढ़योनिषु पश्वादियोनिषुजायते १५ अतीतश्लोकार्थस्यैवसंक्षेपउच्यते कर्मणःसुकृतस्य सात्विकस्येत्यर्थः आहुःशिष्टाःसात्विकमेवनिर्म्मलंफलमिति रजसस्तुफलंदुःखंराजसस्यकर्मणइत्यर्थःकर्माधिकारात्फलमपिदुःखमेवकारणानुरूप्याद्राजसमेव तथाज्ञानन्तमसस्तामसस्यकर्मणोऽधर्मस्यपूर्ववत् १६ किञ्चगुणेभ्योभवति सत्वादिति सत्वा

आनन्दगिरिकृतटीका

सुदाहरति भरणेति सङ्गःसक्तोरागःतृष्णातद्वलादनुष्ठानद्वारालभ्यमानमित्यर्थः गौणं सत्त्वादिगुणप्रयुक्तमितियावत् तत्रसत्त्वगुणवृद्धिकृतफलविशेषमाह यदेति मलरहितान्रजस्तमसोरन्यतरस्योद्भवोमलं तेनरहितानागमसिद्वान्ब्रह्मलोकादीनित्यर्थः १४ रजःसमुद्रेके म्रतस्यफलविशेषंदर्शयति रजसीति जायतें शरीरंगृह्णातीत्यर्थः यथासत्त्वेरंजसिचप्रवृद्धे म्रतोब्रह्मलोकादिषुमनुष्यलोकेच जायते देवादिषुमनुष्येषुचजायते तथैवेत्याह तद्वदिति १५

भावानांफलमुक्त्वासात्विकादीनांकर्मणांफलमाह अतीतेति सुकृतस्यशोभनस्यकृतस्य पुण्यस्येत्यर्थःसात्विकस्याशुद्धिरहितस्येतियावत्सात्विकंसत्वेननिर्वृत्तंनिर्मलंरजस्तमःसमुद्भवान्मलान्निष्क्रान्तं रजःशब्दस्यराजसेकर्मणिकृतोवृत्तिस्तत्वाह कर्मेतिदुःखमेवदुःखबन्धलंगुणमेवेत्यर्थः कथमित्यंव्याख्यायतेतत्राह कारणेति पापमित्यस्यपुण्यस्य रजोनिमित्तस्यकारणत्वात्तदनुरोधात्फलमपिरजोनिमित्तंयथोक्तंयुक्तमित्यर्थः अ

स्वामिकृतटीका।

दीनांफलविशेषमाह यदेति द्वाभ्यां सत्वेवृद्धेसतियदाजोवोम्रत्युं प्राप्नोति तदाउत्तमान्हिरण्यगर्भादीन्विदन्तिउपासतइत्युत्तमविदस्तेषांयेअमलाःप्रकाशमयालोकाः सुखोपभोगस्थानविशेषास्तान्प्रतिपद्यतेप्राप्नोति १४ किञ्च रजसीति रजसिवृद्धेसतिम्रत्युं प्राप्यकर्मासक्तेषुमनुष्येषुजायते तथातमसिवृद्धेसतिप्रलीनोम्रतोमूढ़योनिषुपश्वादिषुजायते १५ इदानींसत्वादीनांस्वानुरूपकर्मद्वारेणविचि

भाषाअनुवाद

सयमे मृत्युप्राप्तहोनेसे कर्ममेआसक्तजोमनुष्यलोकतिसमेजीवोंकाजन्महोताहै औ रतमोगुणकेवृद्धिकालमे देहछूटनेसे पशुपक्षीआदिमूढ़जोनिमे जन्मपावते हैं १५

CC-0. In Public Domain. Digitized by eGangotri

कर्मणःसुकृतस्याहुःसात्विकंनिर्मलंफलं रजसस्तुफलंदुःखमज्ञानंतमसःफलं १६
सत्वात्संजायतेज्ञानंरजसोलोभएवच प्रमादमोहौतमसोभवतोऽज्ञानमेवच १७

शाङ्करभाष्यं।

तूलब्धात्मकात्सञ्जायतेसमुत्पद्यतेज्ञानंरजसोलोभएवच प्रमादमोहौचोभौतमसो भवतोऽज्ञानमेवभवति १७ किञ्च ऊर्ध्वमिति ऊर्ध्वंगच्छन्तिदेवलोकादिषु उत्पद्य

आनन्दगिरिकृतटीका

ज्ञानमविवेकप्रायंदुःखंतामसाधर्मफलमित्याह तथेति १६ विहितप्रतिषिद्धज्ञानकर्मा णिसत्वादीनांलक्षणानिसंक्षिप्यदर्शयति किञ्चेति ज्ञानंसर्वकरणद्वारकंअज्ञानंविवे काभावः १७ सात्विकादिज्ञानकर्मफलान्युक्तान्यनुक्तसंग्रहार्थंसामान्ये नोपसंहरति

स्वामिकृतटीका

स्वफलहेतुत्वमाह कर्मणइति सुकृतस्यसात्विकस्यकर्मणःसात्विकंसत्वप्रधानं निर्मलं प्रकाशवज्ज्वलंसुखंफलमाहुःकपिलादयः रजसइति राजसस्यकर्मणइत्यर्थःकर्मफलक थनस्यप्रकृतत्वात्तस्यदुःखंफलमाहुःतमसइति तामसस्यकर्मणइत्यर्थःतस्याज्ञानंमूढ त्वंफलमाहुःसात्विकादिकर्मलक्षणञ्चनियतंसङ्गरहितमित्यादिनाष्टादशेध्याये व क्ष्यति १६ तत्रैवहेतुमाह सत्वादिति सत्वात्ज्ञानंसंजायते अतःसात्विकस्यकर्मणः प्रकाशवज्ज्वलंसुखंफलंभवति रजसोलोभोजायतेतस्यचदुःखहेतुत्वात्तत्पूर्वकस्य क र्मणोदुःखफलंभवति तमसस्तुप्रमादमोहाज्ज्ञानानिभवन्ति अतस्तामसस्यकर्मणोऽज्ञान मात्रप्रायःफलंभवतीतियुक्तमेवेत्यर्थः १७ इदानींसत्वादिवृत्तिशीलानांफलभेदमा

भाषाअनुवाद

अबसत्वआदिगुणत्रयकेअनुरूपकर्मोकेद्वाराविचित्रफलप्राप्तिमेगुणोंकोहेतुक हतेहैं किकपिलआदिऋषिसुकृतकहेसात्विककर्मकाफलसत्वप्रधानप्रकाशमय सु खफलकहतेहैं औरराजसकर्मकाफलदुखकतेहैं औरतामसकर्मकाफल अज्ञान अर्थात्मूढताकहतेहैं किन्तुसात्विकादिकर्मकास्वरूप भगवानश्रीकृष्णअटारहे अध्यायकेतेईसयेंश्लोकसेकहैंगे १६ अबपूर्वे क्तसत्वादिगुणकेफलस्वरूप सुखआ दिकाहेतुकहतेहैं किसतोगुणसेज्ञानउत्पन्नहोताहैं इससेसात्विककर्मकाप्रकाश जोसुखसोईहोताहै औ रजोगुणसेलोभजन्मै है इससेलोभपूर्वकसर्वकर्मकादुख हीफलहोताहै औतमोगुणसेप्रमादमोहतथाअज्ञानप्रगटैहै इससेअज्ञानजडताय हीफलहोनाउचितहै १७ अबसतोगुणआदिआचरणशीलोंके फलभेदकहतेहैं

CC-0. In Public Domain. Digitized by eGangotri

ऊर्द्ध्वं गच्छन्तिसत्त्वस्थामध्येतिष्ठन्तिराजसाः जघन्यगुणवृत्तिस्थाअधोगच्छन्तितामसाः १८

शाङ्करभाष्यं ।

न्तेसत्वस्थाःसत्वगुणवृत्तिस्थामध्येतिष्ठन्तिमनुष्येषुउत्पद्यन्तेराजसाःजघन्यगुणवृत्ति स्थाजघन्यश्चासौगुणश्चजघन्यगुणस्तमस्तस्यवृत्तिंनिद्रालस्यादितस्मिन्स्थिताजघन्यगुण वृत्तिस्थामूढाअधोगच्छन्तिपश्वादिषुउत्पद्यन्तेतामसाः १८ पुरुषस्यप्रकृतिस्थत्वस्व रूपेणमिथ्याज्ञानेनयुक्तस्यभोग्येषु गुणेषुसुखदुःखमोहात्मकेषुसुखीदुःखीमूढोहम स्मीत्येवंरूपोयःसङ्गस्तत्कारणंपुरुषस्यसदसद्योनिजन्मप्राप्तिलक्षणस्यसंसारस्येति समासेनपूर्व्वाध्यायेयदुक्तंतदिहसत्वंरजस्तमइतिगुणाःप्रकृतिसम्भवाइत्यतआरभ्यगु णत्वरूपंगुणवृत्तत्वंस्ववृत्तेनचगुणानांबन्धकत्वंगुणवृत्तिवइस्यचपुरुषस्ययागतिरित्ये तत्सर्व्वंमिथ्याज्ञानमज्ञानमूलंचबन्धकारणंबिस्तरेणोक्त्वाऽधुनासम्यक्दर्शनात् मो क्षोवक्तव्यइत्याह भगवान्नान्यमितिनान्यं कार्यकारणविषयाकारपरिणतेभ्यो गु णे भ्यःकर्त्तारमन्यं यदाद्रष्टाविद्वान्सन्नानुपश्यतिगुणाएवसर्व्वावस्थाःसर्व्वकर्मणांकर्त्तार

आनन्दगिरिकृतटीका

किञ्चेति वक्ष्यमाणफलद्वारापिसत्वादिषुज्ञानमित्यर्थःसत्वगुणस्यवृत्तंशोभनंज्ञानंक र्मवा तत्तिष्ठन्तीति तथाराजसारजोगुणनिमित्तेज्ञानेकर्मणिवानिरताः १८

स्वामिकृतटीका ।

ह ऊर्द्धमितिसत्वस्थाःसत्ववृत्तिप्रधानाऊर्द्धंगच्छन्तिसत्वोत्कर्षादुत्तरोत्तरतारतम्यादु त्तरोत्तरशतगुणानन्दान्मनुष्यगन्धर्वपितृदेवादिलोकान्सत्यलोकपर्यन्तान्प्राप्नुवन्तो त्यर्थः राजसास्तृष्णाद्याकुलामध्येतिष्ठन्तिमनुष्यलोकएवोत्पद्यन्तेजघन्योनिकृष्टस्त मोगुणस्तस्यवृत्तिःप्रमादमोहादिःतत्रस्थिताअधोगच्छन्तितमसोवृत्तितारतम्यात्तामि स्रादिषुनिरयेषूत्पद्यन्ते १८ तदेवंप्रकृतिगुणसङ्गकृतंसंसारप्रपञ्चमुक्त्वा इदानीं

भाषाअनुवाद

किसत्वस्थकहे सतोगुणप्रधानपुरुषोंकोऊर्द्धलोकप्राप्तहोते अर्थात्सत्वकेप्रतापसेपु ण्यकी आधिक्यहोतीहै उत्तरोत्तरसौगुनआनन्दस्वरूपहोतेऊये मनुष्यलोकग न्धर्व्वलोकपितृलोकदेवलोकसत्यलोकपर्य्यन्तप्राप्तहोतेहैं और रजोगुणप्रधानमनु ष्य लोभग्रस्तमध्यलोकमेरहतेहैं अर्थात्मनुष्यलोकमेजन्मैहैं और जघन्यकहेनि कृष्टजोतमगुणीमनुष्य प्रमादमोहसेभरेपूरे उनकीअधोगतीहोतीहै अर्थात्तमो गुणउनकोकृपाकरअत्यतमनरकमेपहुंचायदेताहै १८ पूर्व्वोक्तप्रकारप्रकृति

CC-0. In Public Domain. Digitized by eGangotri

नान्यंगुणेभ्यःकर्त्तारंयदाद्रष्टानुपश्यति गुणेभ्यश्चपरंवेत्तिमद्भावंसोऽधिगच्छति १९

शाङ्करभाष्य

इत्येवंपश्यतिगुणेभ्यश्चपरंगुणव्यापारसाक्षीभूतञ्चेति मद्भावंममभावंवासुदेवत्ववासु देवःसर्वमित्येवंपश्यन्सद्रष्टाधिगच्छति १९ कथमधिगच्छतीत्युच्यते गुणेति गुणाने तान्यथोक्तानतीत्यजीवन्नेवातिक्रम्यमायोपाधिभूतांस्त्रीन्देही देहसमुद्भवान्देही त्पत्तिवीजभूतान् जन्ममृत्युजरादुःखैः जन्मचमृत्युश्चजराचदुःखानिच तैर्जीवन्नेव मुक्तःसन्विद्वानमृतमश्नुते एवंमद्भावमधिगच्छतीत्यर्थः २० जीवन्नेवगुणानतीत्या

आनन्दगिरिकृतटीका

कस्मिन्गुणे कथमित्यादि प्रश्नान्प्रत्याख्याय गुणेभ्योमोक्षणंकथमितिप्रत्याख्या नार्थंवृत्तानुवादपूर्वकंमिथ्याज्ञाननिवर्त्तकंसम्यग्ज्ञानंप्रस्तौति पुरुषस्येत्यादिनापुरुष स्ययागतिः साचेतिशेषः मोक्षोगुणेभ्योविश्लेषपूर्वकोब्रह्मभावः सम्यग्ज्ञानोक्तिप रंश्लोकंव्याख्यातुंप्रतीकमादत्ते नान्यमिति सत्त्वादिकार्यविषयस्यगुणशब्दस्यविवक्षि तमर्थमाह कर्त्रेति विद्यानन्तर्यमनुशब्दार्थअक्षरार्थमुक्त्वा पूर्वार्द्धस्यार्थिकमर्थमाहगु णाएवेति सर्व्वावस्थास्तत्कार्यकरणाकारपरिणताइतियावत् सर्व्वकर्म्मणांकायिकवा चिकमानसानांविहितप्रतिषिद्धानामित्यर्थः परंव्यतिरिक्तंव्यतिरेकमेवस्फोरयति गुणेति निर्गुणंब्रह्मात्मानमित्यर्थः मद्भावंब्रह्मतामसौप्राप्नोति ब्रह्मभावस्याभिव्य ज्यतइत्यर्थः १९ अनर्थव्रातरूपमपोह्य विद्वान्ब्रह्मत्वंप्राप्नोत्येतत् प्रश्नद्वारावि वृणोति कथमित्यादिना यथोक्तानोत्येतदेवव्याचष्टे मायेति मायैवोपाधिस्तद्भूतान्

स्वामिकृतटीका

तद्व्यतिरेकेणमोक्षंदर्शयति नान्यमिति यदातुद्रष्टाविवेकीभूत्वाबुद्ध्याद्याकारपरिण तेभ्योगुणेभ्योऽन्यंकर्त्तारंनानुपश्यति अपितुगुणाएवकर्म्माणिकुर्व्वन्तीति पश्यतिगुणे भ्यश्चपरंव्यतिरिक्तंतत्साक्षिणमात्मानंवेत्तिसतुमद्भावंब्रह्मत्वमधिगच्छतिप्राप्नोति १९

भाषा अनुवाद

केगुणसंगसेसंसारकोवाऊल्यकहिके अवप्रकृतिसेपुरुषकाविवेककरनेहींसे मोक्ष होतीहै यहदेखावतेहैं किजिसकालमेद्रष्टाजीवविवेकीहोके बुद्धिआदिरूपकोप्रा प्तसत्वआदिगणोंकोछोड़ दूसरेकिसीको कर्त्तानहींदेखता बल्किगुणहीं सबकर्म्म करतेहैं यहीदेखताहै औरसत्वआदिगणोंसेपरकहेभिन्नस्वरूप सोईगुणादिकों कामाक्षीआपअपनेकोजानै तबसोजीव मद्भावकोप्राप्तहोय अर्थात्ब्रह्मपदपावै १९

CC-0. In Public Domain. Digitized by eGangotri

गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवान् जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते २० अर्जुनउवाच कैर्लिङ्गैस्त्रीन्गुणानेतानतीतोभवतिप्रभो किमाचारःकथं चैतांस्त्रीन्गुणानतिवर्त्तते २१

शाङ्करभाष्यं

स्तमश्नुतइतिप्रश्नबीजंप्रतिलभ्य अर्जुनउवाच कैरिति कैर्लिङ्गैश्चिह्नैस्त्रीनेतान्व्याख्यातान्गुणानतीतोतिक्रान्तोभवतिप्रभो किमाचारःकोस्याचारइति किमाचारःकथंकेनचप्रकारेणएतांस्त्रीन्गुणान्अतिवर्त्ततें २१ गुणातीतस्यलक्षणं गुणातीतत्वो

आनन्दगिरिकृतटीका

तदात्मनःसत्त्वादीननर्थरूपानित्यर्थः संमुद्भवन्तीति समुद्भवादेहस्यसमुद्भवादेहसमुद्भवाःतानिति व्युत्पत्तिं गृहीत्वाव्याचष्टे देहोत्पत्तीति योविद्वान्अविद्यामयान्गुणान्जीवन्नेवातिक्रम्यस्थितस्तमेवविशिनष्टि जन्मेति पुरस्ताद्विस्तरेणोक्तस्यप्रसङ्गाद्वसंक्षिप्तस्यसम्यक्ज्ञानस्यफलमुपसंहरति एवमिति २०

स्वामिकृतटीका

ततश्चगुणकृतसर्वानर्थनिवृत्या कृतार्थोभवतीत्याह गुणानिति देहाद्याकारःसमुद्भवःपरिणामोयेषांतेदेहसमुद्भवास्तानेतान्त्रीनपि गुणानतीत्यातिक्रम्यतत्कृतैर्जन्मादिभिर्विमुक्तः सन्नमृतंपरमानन्दं प्राप्नोति २०

भाषाअनुवाद

तिसकेअनन्तर सत्वआदिगुणकृतसम्पूर्णअनर्थनिवृत्तहोनेहींसे जोकृतार्थहोताहै सोईकहतेहैं किसप्रकारसे जिसकादेहादिरूपमेउद्भव अर्थात्देहरूपपरिणामकोप्राप्तहैं सोईदेहसमुद्भवकहावैहै इससेदेहीजोजीवात्मा सोदेहरूपपरिणामकोप्राप्तयेईसत्वादितीनगुणोंकेअतिक्रमणकरनेसेपरहै अर्थात्गुणकृतजन्ममरणजरादुखआदिसेअच्छीप्रकारमुक्तहो अमृतजोपरमआनन्द सोलाभकरताहै२० जीवगुणत्रयसेअतिक्रान्तकहेअलगहोनेसेमुक्तिपावताहै यहभगवानकृष्णकेमुखसेश्रवणकरि गुणातीतमनुष्यकेलक्षणऔउनमनुष्योंकाआचरणऔगुणोंकेअतिक्रमकीउपाय सम्यकप्रकारसेजाननेकीइच्छाकरि अर्जुनभगवानसेकहतेहैं किहेप्रभोदेहीजोजीवसोकिसप्रकारआपसेउत्पन्नलक्षणकेद्वारागुणातीतहो यहलक्षणपूछा औरकिमचारकहेउसकेआचरणकैसेअर्थात्किसप्रकारकेव्यवहारमेवर्त्तमानरहताहै औरकिसउपायसे इनगुणोंकोअतिक्रमणकरिकेस्थिरहोय सोसबकृपाकरि कहियेजोमेरीसन्देहजाय २१ स्थितप्रज्ञस्यकाभाषा यहदूसरे अध्यायके.

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच प्रकाशञ्चप्रवृत्तिञ्चमोहमेवचपाण्डव नद्वेष्टिसंप्रवृत्तानिन निवृत्तानिकांक्षति २२

शाङ्करभाष्यं

पायश्चार्जुनेनपृष्टोऽस्मिन्श्लोकेप्रश्नद्वयार्थंप्रतिवचनंभगवान्यत्तावत्कैर्लिङ्गैर्युक्तोगुणातीतोभवति तच्छृणु प्रकाशमिति प्रकाशञ्चसत्त्वकार्यंप्रवृत्तिञ्चरजःकार्यं मोहमेवच तमःकार्यमित्येतानिनद्वेष्टिसंप्रवृत्तानि सम्यग्विषयभावेनोद्भूतानिममतामसःप्रत्ययो

आनन्दगिरिकृतटीका।

सम्यग्धीफलंगुणातिक्रमणपूर्वकमस्ततत्वमुक्तंश्रुत्वामुक्तस्यलक्षणंवक्तव्यमितिप्रकृतंविवक्षितत्वात्प्रश्नमुत्थापयति जीवन्नेवेति येव्याख्याताःसत्वादयोगुणास्तत्परिणामभूतानध्यासानतिक्रान्तःसन्कैर्लिङ्गैर्ज्ञातोभवतिइतितानिवक्तव्यानिसिद्ध्यर्थंपूर्वमनुष्ठेयानिपश्चादयत्नलभ्यानिलिङ्गानिकानितानीति पृच्छति कैरिति यथेष्टचेष्टाव्यावृत्त्यर्थंप्रश्नान्तरंकिमाचारइति ज्ञानस्यगुणात्ययोपायस्योक्तत्वादुपायप्रकारजिज्ञासयाप्रश्नान्तरंकथमिति २१प्रश्नस्वरूपमनूद्यतदुत्तरंदर्शयतिगुणातीतस्येति पृष्ठोभगवानिति

स्वामिकृतटीका।

गुणानेतानतीत्यास्तमश्नुतइत्येतच्छ्रुत्वा गुणातीतस्यलक्षणंतदाचारञ्चगुणात्ययोपायञ्चसम्यग्बुभुत्सुरर्जुनउवाच कैरिति हेप्रभो कैर्लिङ्गैःकीदृशैरात्मचिह्नैर्गुणातीतोदेहीभवतीतिलक्षणःप्रश्नः कआचारोऽस्येतिकिमाचारःकथंवर्त्ततइत्यर्थः कथञ्च केनोपायेनैतांस्त्रीनपिगुणानतीत्य वर्त्ततेतत्कथयेत्यर्थः २१

भाषाअनुवाद

चौविसपचीसश्लोकआदिसेयहीबातअर्जुननेपूछाभीथा औरउसकाउत्तरभीभगवा देचुकेहैं तौभीफेरिविशेषरूपसेजाननेकीइच्छासे अर्जुनपूछतेहैं यहविचारकरि भगवान दूसरेप्रकारसे उनकालक्षणआदि इसश्लोकसेलेकरछश्लोकसेकहते हैं औरउनकेबीचयहएकश्लोकके द्वारा उनकेलक्षणजनावतेहैं किसत्वआदिगुणोंकोउपलक्ष्यकरिकेकहाजोप्रकाशअर्थात् सर्व्वद्वारेषुदेहेऽस्मिन्यहइसअध्यायके एकादशश्लोकसेकहाजोसतोगुणकाकार्यऔरप्रवृत्ति जोरजोगुणकाकार्यतथामोहादिजोतमोगुणकाकार्ययेसमस्तकार्ययथाक्रमसेआपसेप्रवृत्तहोनेपर दुखविचारिकेजोपुरुषद्वेषहेतुसेऔनिवृत्तिहोनेसे सुखजानिइच्छानकरे सोईगुणातीतमनुष्यहै यहजानो २२ उक्तरूपअनायासबोधसेगम्यजोगुणातीतकेलक्षणसोकहि

CC-0. In Public Domain. Digitized by eGangotri

उदासीनवदासीनोगुणैर्योनविचाल्यते गुणावर्त्तन्तइत्येवंयोऽवतिष्ठतिनेङ्गते २३

शाङ्करभाष्यम्।

ज्ञातस्तेनाहंमूढस्तथाराजसीप्रवृत्तिर्मोत्पन्नादुःखात्मिकातेनाहंरजसाप्रवर्त्तितःप्रचलितःस्वरूपात्कष्टंममवर्त्तते योयंयत्स्वरूपावस्थनात्भ्रंशस्तथासात्त्विकोगुणःप्रकाशात्मांविवेकित्वमापादयन्सुखेनचसंजनयन्मांवभातीति तानि द्वेष्टाऽसम्यग्दर्शित्वेनतदेवंगुणातीतोनद्वेष्टिसंप्रवृत्तानियथाचसात्विकादिपुरुषःसात्विकादिकार्य्याण्यात्मानंप्रतिप्रकाश्यनिवृत्तानिकांक्षतिनतथागुणातीतोनिवृत्तानिकांक्षतीत्यर्थः २२

एतन्नपरप्रत्यक्षंलिङ्गं किंतर्हिस्वात्मप्रत्यक्षत्वादात्मविषयमेवएतत्लक्षणं नहि

आनन्दगिरिकृतटीका

सम्बन्धःकिंवृत्तस्यविधाप्रयोगदर्शनात्प्रश्नद्वयार्थमित्युपलक्षणं प्रश्नत्रयार्थमितिद्रष्टव्यं उत्तरमवतार्य्यानन्तरश्लोकतात्पर्यमाह यत्तावदिति तानिसम्यग्दर्शीनद्वेष्टि इत्युक्तमेवस्पष्टयितुं निषेध्यमसम्यग्दर्शिनोद्वेषंतेषुप्रकटयति ममेत्यादिना सम्यग्दर्शिनःसंप्रवृत्तेषु प्रकाशादिषु द्वेषाभावमुपसंहरति तदेवमिति ननिवृत्तानि इत्यादिव्याचष्टे यथाचेति तेषामनात्मीयत्वंसम्यक्पश्यन्नात्मानुकूलप्रतिकूलतारोऽपणेननोद्विजतें तेभ्यश्चनस्पृहतीत्यर्थः २२ स्वानुभवसिद्धं गुणातीतस्यलक्षणमुक्तमित्याह ए

स्वामिकृतटीका

स्थितप्रज्ञस्य का भाषा इत्यादिना द्वितीयाध्याये दृष्टमेव दत्तोत्तरमपि पुनर्विशेषबुभुत्सया पृच्छतीति ज्ञात्वा प्रकारान्तरेण तस्य लक्षणादिकं श्रीभगवानुवाच प्रकाशञ्चेत्यादि सप्तभिस्तत्रैकेन लक्षणमाह प्रकाशमिति प्रकाशञ्च सर्व्वद्वारेषुदेहेऽस्मिन्निति पूर्व्वोक्तं सत्त्वकार्यं प्रवृत्तिञ्च रजःकार्यं मोहञ्च तमःकार्यंउपलक्षणार्थमेतत्सत्त्वादीनांसर्व्वाण्यपि कार्य्याणि यथायथं संप्रवृत्तानि स्वतःप्रवृत्तानिसन्तिदुःखबुध्यायोनद्वेष्टिनिवृत्तानिचसन्तिसुखबुद्ध्यायोनकांक्षति गुणातीतःसउच्यतइति चतुर्थेनान्वयः २२ तदेवंसुसम्बद्धंगुणातीतस्य लक्षण

भाषा अनुवाद।

गुणातीतका आचरणकैसाहै इसदूसरेप्रश्नकाउत्तरतीनश्लोकसेकहतेहैंकि उदासीनकेसमान साक्षीरूपस्थितहोसत्वआदिगुणकेकार्यसुखदुखआदिसे जोमनुष्य अविचलितहै अर्थात् अपनेद्रष्टास्वरूपसेचुतनहोयवलुसत्त्वादिगुणअपनेअपनेकामभेवर्तमानहैं इनसेहमसेकुछभीसम्बन्धनहींहै ऐसेविवेकज्ञानसे जोपुरुषचुपचापमौनहोयस्थितरहै औइसबातसेविचलितनहोय सो गुणातीतपुरुषहै २३

CC-0. In Public Domain. Digitized by eGangotri

समदुःखसुखःस्वस्थःसमलोष्टाश्मकाञ्चनःतुल्यप्रियाप्रियोधीरस्तुल्यनिन्दात्मसंस्तुतिः २४

शाङ्करभाष्यं

स्वात्मविषयंद्वेषंआकांक्षांचापरःपश्यति अथेदानींगुणातीतःकिमाचारइतिप्रश्नस्य प्रतिवचनमाह उदासीनेति उदासीनवद्यथोदासीनोनकस्यचित्पक्षंभजते नतथायं गुणातीतत्वोपायमार्गेऽवस्थितआसीनआत्मविद्गुणैर्यःसमासीनःविचाल्यते विवेक दर्शनावस्थातःतदेतत्स्फुटीकरोति गुणाः कार्य्यकारणविषयाकारपरिणताअन्योन्य स्मिन्वर्त्तन्तइति योवतिष्ठति छन्दोभंगभयात्परस्मैपदप्रयोगःयोनुतिष्ठतीति पाठा न्तरंनेंगतेनचलति स्वरूपावस्थएवभवतीत्यर्थः २३ किञ्च समदुःखेति समदुःख

आनन्दगिरिकृतटीका

तन्नेति परप्रत्यक्षत्वाभावंप्रपञ्चयति नहीति आश्रयोविषयः कैर्लिङ्गैरित्यादि परि हृत्य द्वितीयंप्रश्नं परिहरति अथेति दृष्टान्तंव्याचष्टेयथेति उपेक्षकस्यपक्षपातत्वा योगादित्यर्थः आत्मविदात्मनःकौटस्थ्यज्ञानेनासीनोनिवृत्तकर्त्तृत्वाभिमानोअप्रयत मानोभवतीति दार्ष्टान्तिकमाह तथेति गुणातीतत्वोपायमार्गोज्ञानमेवशब्दादिभि र्विषयैरस्यकूटस्थत्वज्ञानात्प्रच्यवनमाशंक्याह गुणैरिति उपनताजांविषयाणां रागद्वेषद्वाराप्रवर्त्तकत्वमित्येतत्प्रपञ्चयति तंदेतदिति योवतिष्ठतिसगुणातोतद्व्युत्तरत्रसम्बन्धः आपूर्व्वस्यतिष्ठतेरात्मनेपदेप्रयोक्तव्येकथंपरस्मैपदमित्याशंक्याह छ न्दोभंगेति पाठान्तरेतुबाधितानुवृत्तिभावमनुष्ठानंकरणाकारपरिणतानां गुणानां विषयाकारपरिणतेषुतेषु प्रवृत्तिर्नमेतिपश्यन्अचलतयाकूटस्थदृष्टिमात्मनोनज हातीत्याह नेङ्गतइति २३ गुणातीतस्यलिंगान्तरमाह किञ्चेतितयोःसमत्वंरागद्वे

स्वामिकृतटीका

सुखार्द्वितीयप्रश्नस्यकिमाचारइत्यस्योत्तरमाह उदासीनइतित्रिभिःउदानीनवत्सा क्षितयाआसीनःसन्गुणैर्गुणकार्यैःसुखदुःखादिभिर्नयोविचाल्यते स्वरूपान्नप्रच्या व्यते अपितुगुणाएवस्वकार्येषुवर्त्तन्त एतैर्ममसम्बन्धएवनास्तीति विवेकज्ञानेनयस्तू ष्णीमवतिष्ठति परस्मैपदमार्षं नेङ्गते न चलति २३ अपिच समेति समेदुःखसुखे

भाषा अनुवाद ।

औरजोमनुष्य सुखदुखमेसमान औरमाटीपात्यरसोनाआदिमी जिसकेनिकट समानहै औरसुखदुखकेहेतुस्वरूपअप्रियविषयमे जिसकीबुद्धितुल्यहै औरधीर धीमानजोहै तथाअपनीस्तुतिऔनिन्दामेभीतुल्यबुद्धिहै २४ औरजोमनुष्य मान

CC-0. In Public Domain. Digitized by eGangotri

मानापमानयोस्तुल्यस्तुल्योमित्रारिपक्षयोःसर्वारम्भपरित्यागीगुणातीतःसउच्यते २५

शाङ्करभाष्यं

सुखःसमेदुःखसुखेयस्यससमदुःखसुखःस्वस्थःस्वात्मनिस्थितःप्रसन्नःअविक्रियः सम लोष्टाश्मकाञ्चनःलोष्टञ्चअश्मचकाञ्चनञ्चसमानियस्यससमलोष्टाश्मकाञ्चनःतुल्य प्रियाप्रियःप्रियञ्चाप्रियञ्चप्रियाप्रियेसमेयस्यसोयंतुल्यप्रियाप्रियोधीरोधीमान्तुल्यनि न्दात्मसंस्तुतिःनिन्दाचआत्मसंस्तुतिश्चतुल्येनिन्दात्मसंस्तुतीयस्यतेःसतुल्यनिन्दात्मसं स्तुति. २४ किञ्चमानापमानयोरिति मानापमानयोस्तुल्यःसमोनिर्विकारः तुल्यो मित्रारिपक्षयोःयद्यपुदासीनाभवन्तिकेचित्स्वामिप्रायेणतथापिपराभिप्रायेण मि त्रारिपक्षयोरिवभवन्तीति अयन्तुतुल्योमित्रारिपक्षयोरित्याह सर्वारम्भपरित्यागी दृष्टार्थानिकर्म्माण्यारभते इत्यारम्भा सर्व्वानारम्भान्परित्यक्तुंशीलंअस्येति सर्वार म्भपरित्यागीदेहधारणमात्रनिमित्तव्यतिरेकेणसर्वकर्म्मपरित्यागीत्यर्थःगुणातीतःसउ च्यते २५ उदासीनवदित्यादिगुणातीतःसऊच्यते इत्येतदन्तमुक्तं यावद्यत्नसाध्यं

आनन्दगिरिकृतटीका

षानुत्पादकतयास्वकीयत्वाभिमानानास्पदत्वं प्रसन्नत्वंस्वास्थ्यादपच्युतिरविक्रियत्वं विद्वद्दृष्ट्याप्रियाप्रिययोरसंभवेपिलोकदृष्टिमाश्रित्याह प्रियञ्चेति प्रियाप्रियग्रहणेन गृहीतानांकाञ्चनादीनांब्राह्मणपरिव्राजकवत्पृथक्ग्रहणं निन्दादोषोक्तिरात्मनो गुणकीर्तनं २४ इतश्चगुणातीतःशक्योज्ञातुमित्याह किञ्चेति मानःसत्कारस्तिर स्कारोऽपमानः परदृष्ट्यायौसखिशत्रुतयोःपक्षयोर्निर्विशेषेणकस्यचित्पक्षेतिष्ठती त्याह तुल्यइति विदुषोमित्रादिबुद्ध्यभावात्तुल्यमित्रारिपक्षयोरित्ययुक्तमित्याशंक्याह यद्यपीति सर्व्वकर्म्मत्यागेदेहधारणमपिनिमित्ताभावान्नस्यादित्याशंक्याह देहेति उ क्तविशेषणोगुणातीतोज्ञातव्यइत्याह गुणेति २५ यदुक्तमुपेक्षकत्वादि तद्विद्योद

स्वामिकृतटीका।

यस्ययतःस्वस्थःस्वरूपएवस्थितःअतएवसमानिलोष्टाश्मकाञ्चनानियस्य तुल्येप्रिया प्रियेसुखदुःखहेतुभूते यस्य धीरोधीमान्तुल्यानिन्दाचआत्मनःस्तुतिश्चयस्य २४

भाषाअनुवाद

अपमानमेएकभाव औमित्रशत्रुपक्षमेसमबुद्धि तथाजोदृष्टअदृष्टसंपूर्ण अर्थकेऊद्यम कोत्यागकरनेमेसमर्थहै ऐसेआचरणयुक्तपुरुषकोगुणातीतकहतेहैं यहजानो ५

माञ्चयोऽव्यभिचारेणभक्तियोगेनसेवते सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते २६

शाङ्करभाष्यं

तावत्संन्यासिनानुष्ठेयंगुणातीतत्वसाधनंमुमुक्षोःस्थिरीभूतन्तुस्वसंवेद्यंसद्गुणातीतस्यतेर्लक्षणंभवतीति अधुनाकथञ्चैतान्गुणान् अतिवर्त्ततइतिप्रश्नस्य प्रतिवचनमाह माञ्चेति माञ्चेश्वरंनारायणंसर्व्वभूतहृदयास्थितंयोयतिःकर्म्मीवाअव्यभिचारेण कदाचित्योव्यभिचरतिनभक्तियोगः भजनंभक्तिःसैवयोगस्तेनविवेकज्ञानात्मकेन भक्तियोगेनज्ञानसमुद्भवेनसेवते सगुणान्समतीत्यएतान्यथोक्तान्ब्रह्मभूयाय भवनंभूयःब्रह्मभूयायब्रह्मभवनायमोक्षायकल्पतेसमर्थोभवतीत्यर्थः २६ कुतएतदि

आनन्दगिरिकृतटीका ।

यात्पूर्व्वंयत्नसाध्यंविद्याधिकारिणाज्ञानसाधनत्वेनानुष्ठेयमुत्पन्नायान्तुविद्यायांजीवन्मुक्तस्योक्तधर्म्मजातंस्थिरीभूतंस्वानुभवसिद्धंलक्षणत्वेनतिष्ठतीत्युक्तेधर्म्मजातेर्विभागं दर्शयति उदासीनवदित्यादिनाप्रश्नद्वयमेवंपरिहृत्यतृतीयंप्रश्नंपरिहरति अधुनेति मच्छब्दस्यसंसारिविषयत्वंव्यावर्त्तयति ईश्वरमिति तत्रैवनारायणशब्दान्मूर्त्तिभेदो व्यावर्त्यते तस्यताटस्थ्येव्यवच्छिन्नत्तिसर्व्वेति मुख्यामुख्याधिकारिभेदेनविकल्पःभक्तियोगस्ययाद्दृच्छिकत्वंव्यवच्छेत्तुमव्यभिचारेणेत्युक्तंतद्व्याचष्टेनेति भजनंपरमप्रेमसएवयुज्यतेऽनेनेतियोगःतेनसेवतेपराक्चित्ततांविनासदानुसन्दधातीत्यर्थःसभगवदनुग्रहकृतसम्यग्धीसम्पन्नोविद्वान्जीवन्नेवेत्यर्थः २६ विद्वान्ब्रह्मैवेत्यत्रहेतुंवक्ष्यति

स्वामिकृतटीका

अपिच मानेति मानेअपमानेचतुल्यःमित्रपक्षेअरिपक्षेचतुल्यःसर्व्वान् दृष्टादृष्टार्थानारम्भानुद्यमान्परित्यक्तुंशीलंयस्य सएवंभूताचारयुक्तोगुणातीतउच्यते २५

कथञ्चैतांस्त्रीन्गुणानतिवर्त्ततइत्यस्यप्रश्नस्योत्तरमाह माञ्चेति चशब्दोवधारणार्थःमामेवपरमेश्वरमव्यभिचारेणएकान्तेनभक्तियोगेनयःसेवतेसएतान्गुणान् समतीत्य सम्यगतिक्रम्यब्रह्मभूयायब्रह्मभावायमोक्षायकल्पते समर्थोभवति २६

भाषा अनुवाद

किसप्रकारसत्वादिगुणोंकोअतिक्रमकरिकेवर्त्तमानरहैं इसप्रश्नकाउत्तरकरते हैं किपरमेश्वरस्वरूपहमारीहीसेवाअव्यभिचारिणीऐकान्तिकभक्तिकेद्वारा जो मनुष्यकरताहै सोईमनुष्य गुणत्रयकोअच्छीतरहसे अतिक्रमकरिके मुक्तिप्राप्ति केयोग्यहोताहै २६ अबपूर्वोक्तभगवद्भक्तकेमोक्षप्राप्तिकेविषयमेंहेतुकहते हैं

CC-0. In Public Domain. Digitized by eGangotri

ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच शाश्वतस्यचधर्म्मस्यसुखस्यैकान्तिकस्यच २७

इतिश्रीमद्भगवद्गीतायां गुणत्रयविभागयोगोनाम चतुर्दशोऽध्यायः १४

साङ्करभाष्यं

त्युच्यतेब्रह्मणः परमात्मनःहियस्मात्प्रतिष्ठासंप्रतितिष्ठत्यस्मिन्नितिप्रतिष्ठाहंप्रत्यगात्मा कीदृशस्यब्रह्मणः अमृतस्याविनाशिनअव्ययस्याविकारिणः शाश्वतस्यचनित्यस्यधर्म्मस्य ज्ञानयोगधर्म्मप्राप्यस्यसुखस्यानन्दरूपस्यैकान्तिकस्याव्यभिचारिणः अमृतादिस्वभावस्यपरमानन्दरूपस्यपरमात्मनः प्रत्यगात्माप्रतिष्ठासम्यक्ज्ञानेनपरमात्मतया निश्चीयतेइतितदेतद्ब्रह्मभूयायकल्पतेउक्तंयथाचेश्वरशक्त्याभक्तानुग्रहादिप्रयोजनायब्रह्मप्रतिष्ठतेप्रवर्त्ततेसाशक्तिःब्रह्मैवाहं शक्तिशक्तिमतोरनन्यत्वादित्यभिप्रायोऽथवाब्रह्मशब्दवाच्यत्वात् सविकल्पकंब्रह्मतस्यब्रह्मणोनिर्विकल्पकोहमेव नान्यःप्रतिष्ठाश्रयः किंविशिष्टस्यामरणधर्म्मकस्याव्ययस्यव्ययरहितस्य किञ्चशाश्वतस्यचनित्यस्यधर्मस्यज्ञाननिष्ठालक्षणस्यसुखस्यतज्जनितस्यैकान्तनियतस्यच प्रतिष्ठाहंमितिवर्त्ततेइ २७ इति श्रीशाङ्करभाष्ये चतुर्दशोऽध्यायः १४

आनन्दगिरिकृतटीका

कुतइति तत्रोत्तरमाह उच्यतइति ब्रह्मशब्दस्यासतिबाधके मुख्यार्थग्रहणमभिप्रेत्याह परमात्मनइति तंप्रति प्रत्यगात्मनोयत्प्रतिष्ठात्वं तदुपपादयति प्रतितिष्ठतीति यद्ब्रह्मप्रत्यगात्मनिप्रतितिष्ठतीति तत्किं विशेषणमित्यपेक्षायामुक्तममृतस्येत्यादितत्रामृतशब्देनाव्ययशब्दस्यपुनरुक्तिंपरिहरतिअविकारिणइति नित्यत्वमपक्षयराहित्यंतेनपूर्वाभ्यामपौनरुक्त्यं प्रतिपिङ्गार्थस्यधर्मशब्दस्यब्रह्मण्यनुपपत्तिमाशंक्याह ज्ञानेति अथेन्द्रियसम्बन्धोत्थंसुखंव्यावर्त्तयितुमैकान्तिकस्येत्युक्तं अक्षरार्थमुक्त्वावाक्या

भाषाअनुवाद

किंजिसहेतुब्रह्मकीप्रतिष्ठा जोप्रतिमा सोमैंहूं अर्थात्घनीभूतप्रकाशमात्रजैसे सूर्यमण्डलतद्रूप हमघनीभूतब्रह्महैं औरनित्यमुक्तअव्ययऔरअमृतजोमुक्ति तिसकेभीप्रतिमा हमहैं औशुद्धसत्वमुक्तिकेसाधनस्वरूप सनातनधर्मकेभीप्रतिमामूर्त्ति हमहैं औपरमानंदसुखकेभीमूर्त्तिहमैजानो इससेमेरेसेवककों सद्भावरूपब्रह्मत्वप्राप्तिकीअवश्यसम्भावनाहै जिसकेआश्रयहेतुसेअसतजोसतकेसमानप्रतीयमानयहसंसार तिससेहमारेभक्तअनायासहीतरतेहैं यहीचौदहवें अध्यायमेंभगवानने कहाहै २७ इति जगन्नाथसुकुलविरचितभाषाटीकायां चतुर्दशोऽध्यायः १४

CC-0. In Public Domain. Digitized by eGangotri

नन्दगिरिकृतटीकाऽऽ।

र्थमाह अमृतादिति प्रतिष्ठायस्मादिति पूर्वेणसम्बन्धः तस्मात्प्रत्यगात्मापरमात्मत यानिश्चीयते सम्यक्ज्ञानेनेति योजना अस्यश्लोकस्यपूर्वश्लोकेनैकवाक्यतामाह तदे तदिति विवक्षितंवाक्यार्थंप्रपञ्चयति ययेति आसक्तिःब्रह्मैवेति कथंसामानाधिकर ण्यंतत्राह शक्तीतिव्यख्यानान्तरमाह अथवेति विशेषणानिपूर्ववदपौनरुक्तानिनेत व्यानि तदनेनाध्यासेनचैवच्चेवच्चसंयोगस्यसंसारकारणत्वंपञ्चप्रश्ननिरूपणद्वारेण चसम्यग्ज्ञानस्य सकलसंसारनिवर्तकत्वमित्येतदुपपादयता मुमुक्षोर्यत्नसाध्यं गुणैरचाल्यत्वादिमुक्तस्यायत्नसिद्धं लक्षणमितिनिर्द्धारितः २७

इति आनन्दगिरिकृतटीकायां चतुर्दशोऽध्यायः १४

स्वामिकृतटीका

तत्रहेतुमाह ब्रह्मणोहीति हियस्माद्ब्रह्मणोहंप्रतिष्ठाप्रतिमाघनीभूतंब्रह्मैवा हं यथाघनीभूतप्रकाशएवसूर्यमण्डलंतद्वदित्यर्थः तथाअव्ययस्यनित्यस्य अमृतस्य च मोक्षस्यनित्यमुक्तत्वात् तथातत्साधनस्यशाश्वतस्यधर्मस्यचशुद्धसत्वात्मकत्वात् तथाऐ कान्तिकस्यअखण्डितस्यसुखस्यचप्रतिष्ठाहंपरमानन्दरूपत्वात् अतोमत्सेविनोम द्भावस्यावश्यम्भावित्वाद्युक्तमेवोक्तंब्रह्मभूयायकल्पतइति कृष्णाधीनगुणासङ्गप्रस ञ्चितभावाम्बुधिं सुखंतरति मद्भक्तइत्यभाषिचतुर्दशे २७

इति श्रीधरस्वामिकृतटीकायां चतुर्दशोऽध्यायः १४

CC-0. In Public Domain. Digitized by eGangotri

पञ्चदशोध्यायः

श्रीभगवानुवाच ऊर्द्धमूलमधःशाखमश्वत्थंप्राऽहरव्ययं छन्दांसियस्यपर्णानि यस्तंवेदसवेदवित् १

भाषाअनुवाद

वैराग्यकेविना ज्ञानऔभक्तिदुर्लभहै इसलियेपंद्रहें अध्यायमे भगवान वैराग्यसहितज्ञानकाउपदेश अर्जुनकोदियाहै औरपूर्वचौदहें अध्यायकेअन्तमे जोकहा किमांचयोऽव्यभिचारेणभक्तियोगेनसेवते इत्यादिछविशयेंश्लोकादिसे किएकान्तभक्तिसेपरमेश्वरकाभजनकारीमनुष्यभगवतकीकृपासे ज्ञानलाभकेद्वारा मुक्तहोताहै सोविषयेंसे विरागरहितपुरुषको एकान्तभक्तिअथवाज्ञानहोतानहीं इसीहेतुसेवैराग्यकथनपूर्वकज्ञानउपदेशकरनेकेमनोरथसेप्रथमडेढश्लोककरिकेसंसारस्वरूपकोवृक्षरूपरूपकअलङ्कारसे वर्णनकरतेऊये भगवानश्रीकृष्ण अर्जुनसे कहतेहैं किऊर्धमूलकहेउत्तमअर्थात् क्षरअक्षरसेभीउत्कृष्ट जोपुरुषोत्तमपरमेश्वर सोसंसारके मूलकारणहैं इसीसेसंसार उर्धमूलहै औरअधःशाखकहेपरमेश्वरकीअपेक्षा अधःअर्थात्कार्यरूपउपाधियुक्त हिरण्यगर्भआदि जोसंसारकीशाखास्वरूप सोईसंसारको अधःशाखकहा औरयहसंसार विनश्वरहेतुसे परदिनप्रभातलौंरहैगा ऐसोविश्वासकेयोग्यनहींहै इससेअश्वत्थकहा औरअठयें अध्यायके उनीशवेंश्लोककी उक्तअभिप्रायसे यह संसार प्रलयके अनन्तर पुनःपुनःउत्पन्नहोताहै तोहोनाजाना इसहेरफेरलगेरहनेसे धारावाहिक वृत्तिरूप इससंसारका विछेदनहोंहै अर्थात्सदाहीवनारहता इससेअव्ययऔअनादिभीहै औरऐसेहीश्रुतियोंमेभीकहाहै औरछन्दकहेवेदसकल इससंसारवृक्षके पत्रहैं अर्थात् धर्मअधर्मका प्रतिपादनकरिके छायाकेतुल्यहैं औरकर्मफलकेहेतुसंसारवृक्षके आश्रितजीवसमूहहै यहकहतेऊये वेदपत्रसमानहैं जोमनुष्यऐसेकरके संसारवृक्षअश्वत्थरूपकोजानतेहैं सोईवेदकेअर्थवित्हैं तात्पर्ययह किप्रपंचरूपसंसारवृक्षकेमूल परमेश्वरऔरपरमेश्वरके अंशस्वरूपजोब्रह्मादिक सोसबशाखासमानहैं सोईवृक्षविनश्वरऔप्रवाहरूपसे नित्यभीहै औरवेदविहितकर्मोकेद्वारा संसारवृक्षकीसेवाकरनाभीकहाहै इतनाहीवेदोंका निश्चितअर्थहै इससेईसवृक्षके ज्ञानीको वेदवित्कहनाचाहिये १

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

यस्मात्मदधीनंकर्म्मिणांकर्मफलंज्ञानिनाञ्चज्ञानयोगधर्मप्राप्यंसुखञ्चज्ञानफलम तोभक्तियोगेनमांयेसेवन्ते मत्प्रसादात्ज्ञानप्राप्तिक्रमेणगुणातीतामोक्षंगच्छन्तिकि मुवक्तव्यमात्मनस्तत्वंसम्यक्विजानन्तइत्यतोभगवानर्जुनेनापृष्टमप्यात्मनस्तत्त्वं विवक्षु रुवाच ऊर्द्धमूलमित्यादि तत्रतावद्वृक्षरूपककल्पनयावैराग्यहेतोःसंसारस्वरूपं व र्णयति विरक्तस्यहिसंसारात्भगवत्तत्वज्ञानेधिकारोनान्यस्येति ऊर्द्धमूलमिति ऊर्द्धं मूलंकालतःसूक्ष्मत्वात्कारणत्वात्नित्यत्वान्महत्वाच्चोर्द्धमुच्यते ब्रह्माव्यक्तमायाश मित्तन्मूलमस्येति सोयंसंसारवृक्षऊर्द्धमूलःश्रुतेश्च ऊर्द्धमूलोऽवाक्शाखइति पुराणे चाव्यक्तमूलप्रभवस्तस्यैवानुग्रहोत्थितः बुद्धिस्कन्धमयश्चैवइन्द्रियान्तरकोटरः महा भूतप्रशाखश्चविषयैःपत्रवांस्तथा धर्माधर्मसुपुष्पश्चसुखदुःखफलोदयःआजीव्यःसर्वभू तानांब्रह्मवृक्षःसनातनः एतद्ब्रह्मवनञ्चैवब्रह्माचरतिनित्यशः एतत्छित्वाचभित्वा चज्ञानेनपरमासिना ततश्चात्मरतिंप्राप्ययस्मान्नावर्त्ततेपुनःइत्यादि तमूर्द्धमूलं संसारंमायामयंवृक्षमधःशाखंमहदहङ्कारतन्मात्रादयः शाखाइवास्याधोभवन्तीति सोहमधःशाखस्तमधःशाखंनश्वोपिस्थास्यते इत्यश्वत्थस्तंक्षणप्रध्वंसिनमश्वत्थंप्राहुःक थयन्तिश्रुतिवादाइत्यव्ययंसंसारंमायामयंअनादिकालप्रवृत्तत्वात्सोयंसंसारवृक्षोव्य यःअनाद्यनन्तदेहादिसन्तानाश्रयोहिसुप्रसिद्धस्तमव्ययंतस्यैवसंसारवृक्षस्येदमन्य द्विशेषणान्तरं छन्दांसियस्यपर्णानिछन्दांसिछादनादस्यवृक्षस्यऋग्यजुःसामलक्षणानिय स्यसंसारवृक्षस्यपर्णानि यथावृक्षस्यरक्षणार्थानिपर्णानितथावेदाःसंसारवृक्षपरिर क्षणार्था धर्मतद्धेतुफलप्रकाशनार्थत्वात्यथाव्याख्यातंसंसारवृक्षंसमूलंयस्तंवेद स वेदविद्वेदार्थविदित्यर्थः १

आनन्दगिरिकृतटीका

ज्ञानेनगुणात्ययेदर्शितेनाशित्वेनैषांविज्ञानेनात्ययादनाशित्वे तेनापितद्योग्यत्वान्न ज्ञानंगुणात्ययहेतुरित्याशङ्कांनिरस्यसाक्षादेवश्रवणादिहेतुं संन्यासंविधित्सुःब्रह्मत्व स्यपरमपुरुषार्थताञ्चविवक्षुरध्यायान्तरमारभ्यतेयस्मादिति कर्म्मिणोज्ञानिनश्चशा स्त्रेधिकृताः तत्रकर्म्मिणांकर्म्मानुकूलंफलमीश्वरायत्तंफलमतउपपत्तेरितिन्यायात्ज्ञा निनामपितत्फलमीश्वरायत्तमेव ततोह्यस्यबन्धविपर्ययावित्युक्तत्वात् यस्मादेवंतस्मा द्येभक्त्याख्येनयोगेनमामेवसेवन्ते तेमत्प्रसादद्वाराज्ञानंप्राप्यतेनगुणातीतामुक्ताम वन्तीति स्थितमित्यर्थः येत्वात्मनस्तत्वमेवसन्देहाद्यपोहेनजानन्ति तेयज्ञानेनगुणा

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

तोताःसन्तोमुक्तिंगच्छन्तीति किमवक्तव्यमित्यर्थः सिद्धमर्थमाह किमुवक्तव्यमिति आत्मतत्वाज्ञानंयतःसंसारहेतुः ज्ञानंमोक्षानुकूलमतोर्जुनेनकिन्तदित्यपृष्टमपितत्वं भगवानुक्तवान्प्रश्नाभावेपितस्यतद्व्युत्पादनाभिमानादित्याह अतइतितत्वेतिवक्ष्यते किमितिसंसारोवर्ण्यतेतत्राह तत्रेति अध्यायादिःसप्तम्यर्थः वैराग्यमपिकिमिति मृग्यतेतत्राह विरक्तस्येतिइतिवैराग्यायसंसारवर्णनमितिशेषः नाशसम्भावनायैवृक्षरूपकंबन्धहेतोर्दर्शयति उर्द्धमूलमिति कथंकालतःसूक्ष्मत्वंतदाह कारणत्वादिति तदेवकथंकार्य्यापेक्षया नियतपूर्व्वभावित्वादनादित्वादित्याह नित्यत्वादिति सर्व्वव्यापित्वाद्वोत्कर्षंसम्भावयति महत्वाद्वेति उर्द्धमुच्छ्रितमुत्कृष्टमितियावत् तस्यकूटस्थस्यकथंमूलत्वमित्याशंक्याह अव्यक्तेति स्मृतिमूलत्वेन श्रुतिमुदाहरति श्रुतेश्चेतिअर्वाचीनोनिकृष्टाःशाखाइव महदाद्यायस्य सतथा प्रकृतेसंसारवृक्षेपुराणस्मृतिमाह पुराणेचेति अव्यक्तमव्याकृतंतदेवमूलंतस्मात् प्रभवनंप्रभवोयस्य सतथा तस्यैवमूलस्याव्यक्तस्यानुग्रहादतिदृढत्वादुत्थितः सम्बर्द्धितः तस्यलौकिकवृक्षसाधर्म्यमाह बुद्धीत्यादिना वृक्षस्यहिशाखाःस्कन्धादुद्भवन्ति संसारस्यचबुद्धेःसकाशान्नानापरिणामाजायन्ते तेनबुद्धिरेवस्कन्धस्तन्मयस्तत्प्रचुरोयंसंसारतरुःइन्द्रियाणामन्तराणिछिद्राणिकोटराणियस्यसतथा महान्तिभूतानि पृथिव्यादीन्याकाशान्तानिविशाखस्तम्बोयस्य तथाआजोव्यत्वमुपजीव्यत्वंब्रह्मणाधिष्ठितोवृक्षोब्रह्मवृक्षस्तथापिज्ञानंविनाच्छेत्तमशक्यतयासनातनःचिरन्तनःएतद्ब्रह्मणःपरस्यात्मनोवर्णनंननीयं सम्भजनीयमत्रहि ब्रह्मप्रतिष्ठितंतस्यवृक्षस्यसंसाराख्यस्यतदेवब्रह्मसारभूतंअथवास्य ब्रह्मवृक्षस्यानवच्छिन्नस्यसंसारमण्डलस्यतदेतद्ब्रह्मवर्णनमिववर्णनंननीयंसम्भजनीयं नहिब्रह्मातिरिक्तंसंसारस्यास्तदमस्ति ब्रह्मैवाविद्यासंसरतीत्यभ्युपगमादित्यर्थः अहं ब्रह्मेतिदृढज्ञानेनोक्तं संसारवृक्षंच्छित्वाप्रतिबन्धकाभावादात्मनिष्ठोभूत्वा पुनरावृत्तिरहितंकैवल्यंप्राप्नोतीत्याह एतदिति अधःशाखमित्येतद्व्याचष्टे महदिति आदिशब्देनेन्द्रियादिसंग्रहः संसारवृक्षस्यातिचञ्चलत्वेप्रमाणमाह प्राङ्निरिति क्षणध्वंसिनोव्ययत्वंविरुद्धमित्याशंक्याह संसारेति तदेवोपपादयति अनादीति छादनंरक्षणंप्रावरणंवा कर्म्मकाण्डानिस्वर्गारोहावरोहफलानिनानाविधार्थवादयुक्तानि संसारवृक्षंरक्षन्ति तन्निष्ठंदोषञ्चाहृत्यन्ति तेनतानिच्छन्दांसिपर्णानीवभवन्तीत्यर्थः तदेवप्रपञ्चयति यथेति उक्तेर्थेहेतुमाह धर्मेति कर्मकाण्डानांवेदानामितिशेषः कर्मब्रह्माख्यसर्व्ववेदार्थस्य तत्रान्तर्भावमुपेत्य व्याचष्टे वेदार्थेति १

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्य

नाहिसंसारवृक्षादस्मात्समूलात्क्षेयोन्योऽणुमात्रोप्यवशिष्टोस्त्यतःसर्वज्ञःस योवेदसर्ववेदार्थविदिति यस्मात्संसारवृक्षेसमूलेसर्वं क्षेयंअन्तर्भवतीति तस्मात्समूलवृक्षज्ञानंस्तौति तस्यैवसंसारवृक्षस्यापरावयवव्यापारकल्पनोच्यते अधोमनुष्यादिभ्योयावत् स्थावरमूर्ध्वंयावद्ब्रह्मविश्वसृजोधर्मइत्येतदन्तंययाकर्मयथाश्रुतंज्ञानकर्मफलानितस्यवृक्षस्यशाखाइवशाखाःप्रसृताः प्रकृतागुणप्रवृद्धाःगुणैःसत्वरजस्तमोभिःप्रवृद्धाःस्थूलकृताउपादानभूतैर्विषयप्रवालाःविषयाःशब्दादयःप्रवालाइवदेहादिकर्मफलेभ्यःशाखाभ्यःअंकुरीभवन्तोबतेनाविषयप्रवालाःशाखाःसंसारवृक्षस्यपरममूलमुपादानंपूर्वमुक्तमथेदानींकर्मफलजनितरागद्वेषादिवासनामूलानीवधर्माधर्मप्रवृत्तिकारणान्यवान्तरभावीनितान्यधश्चदेहाद्यपेक्षयामूलान्यनुसन्ततानिअनुप्रविष्टानिकर्मानुबन्धीनि कर्मधर्माधर्मलक्षणमनुबन्धःपश्चाद्भावी येषामुद्भूतिमनुभवन्तीतितानिकर्मानुबन्धीनि मनुष्यलोकेविशेषतोऽत्रहिमनुष्याणांधर्माधिकारःप्रसिद्धः २

स्वामिकृतटीका

वैराग्येणविनाज्ञानंनचभक्तिरतःस्फुटं वैराग्योपस्करंज्ञानमीशःपञ्चदशेऽदिशत् पूर्वाध्यायान्ते माञ्चयोव्यभिचारेणभक्तियोगेनसेवतइत्यादिना परमेश्वरमेकान्तभक्त्याभजतस्तत्प्रसादलब्धज्ञानेनब्रह्मभावोभवतीत्युक्तंचैकान्तभक्तिर्ज्ञानंवाअविरक्तस्यसम्भवतीतिवैराग्यपूर्वकंज्ञानमुपदेष्टुकामः प्रथमंतावत्सार्द्धश्लोकाभ्यांसंसारस्वरूपंवृक्षंरूपकालङ्कारेणवर्णयन्श्रीभगवानुवाच ऊर्द्धमूलमिति ऊर्द्धमुक्तमःक्षराक्षराभ्यामुत्कृष्टःपुरुषोत्तमोमूलंयस्यतं अधइततोऽर्वाचीनाः कार्य्योपाधयोहिरण्यगर्भादयोगृह्यन्ते तेतुशाखाइवशाखायस्यतं विनश्वरत्वेनश्वःप्रभातपर्यन्तमपि नस्थास्यतीतिविश्वासानर्हत्वादश्वत्थंप्राहुः प्रवाहरूपेणाविच्छेदादव्ययञ्चप्राहुः ऊर्द्धमूलोऽवाक्शाखएषोऽश्वत्थःसनातनइत्याद्याःश्रुतयः छन्दांसिवेदायस्यपर्णानि धर्माधर्मप्रतिपादनद्वारेणछायास्थानीयैःकर्मफलैःसंसारवृक्षस्यसर्वजीवाश्रयणीयत्वप्रतिपादनात्पर्णस्थानीयावेदाःयस्तमेवम्भूतमश्वत्थंवेद सएववेदार्थवित् संसारप्रपञ्चवृक्षस्यमूलमीश्वरोब्रह्मादयस्तदंशाःशाखास्थानीयाः सचसंसारवृक्षोविनश्वरःप्रवाहरूपेणनित्यश्च वेदोक्तैःकर्मभिःसेव्यतामापादितश्चइत्येतावानेवहिवदार्थः अतएवंविद्वान्वेदविदितिस्तूयते १

CC-0. In Public Domain. Digitized by eGangotri

अधश्चोर्ध्वंप्रसृतास्तस्यशाखा गुणप्रवृद्धाविषयप्रवालाः अधश्चमूलान्यनुसन्ततानि कर्मानुबन्धीनिमनुष्यलोके २

आनन्दगिरिकृतटीका

समूलसंसारवृक्षज्ञानेतुफलंहित्वामूलमेवनिःक्षिप्यज्ञातुंशक्यमिति तत्ज्ञानार्थंप्रयतितव्यमितिमत्वातत्ज्ञानस्तुतिरत्रविवक्षितेत्याह नहीति अवयवसम्बन्धिन्यपराप्रागुक्तादतिरिक्ताकल्पनाइतियावत् आमनुष्यलोकादाविरिञ्चेरित्यधःशब्दार्थमाह मनुष्यादिष्वइति तस्मादेवारभ्यासत्यलोकादित्यूर्ध्वशब्दार्थमाह यावदिति शाखाशब्दार्थंदर्शयति ज्ञानेति तेषांहेत्वनुगुणत्वेनवृक्षविधत्वंसूचयति यद्वेतिप्रत्यक्षाणांशब्दादिविषयाणांप्रवालत्वंशाखासुपल्लवत्वंअङ्कुरत्वंस्फोरयति देहादीति उर्ध्वमूलमित्यत्रसंसारवृक्षस्यमूलमुक्तंकिमिदानीमधश्चमूलानीत्युच्यते तत्राह संसारेतिअनुप्रविष्टत्वंसर्वेषुलिङ्गेष्वनुगततयासन्ततत्वमविच्छिन्नत्वंरागादीनाञ्चकर्मफलजन्यत्वंप्रकटयति कर्मेति कर्मणांरागादीनांमिथोहेतुहेतुमत्वंतेषांतद्भावेनानवच्छिन्नत

भाषाअनुवाद

औरकार्यरूपउपाधिविशिष्ट हिरण्यगर्भआदिजोसकलजीव सोईशाखारूपपूर्वश्लोकमेकहाहै तिनकेमध्यमे जोअकर्मकारी अर्थात्कुत्सितकर्मकरतेहैं तेअधःअर्थात्पशुआदियोनिमेजातेहैं औरजोसत्कर्मकरते वेउर्ईकहे देवयोनिमे प्राप्तहोतेहैं येईसंसारवृक्षकेशाखारूपसत्त्वआदिगुणोंकीवृत्तिसे जलसेचनकेसमान यथायोगबढ़तेहैं औशाखाकेअग्रतुल्यइन्द्रियऔइन्द्रियोंकेविषयजोरूप रसआदि सोईप्रधानअर्थात्पलतुल्यहैं औरअधोभागउर्ध्वभागमेंऔसमस्तमूलमे परमेश्वरहीमुख्यमूलहैं औरतद्भोगवासनारूपअवान्तरवासनासब अवान्तर मूलहैं औरअवान्तरवासनाकेकार्यकहतेहैं किकर्ममात्रहीसकलवासनाकेअनुबन्धअर्थात् उत्तरभावीकहेहोनहार सोईवासनासमस्तमनुष्यलोकमे कर्मअनुबन्धीहोतीहै अर्थात्उर्ईअधोलोकमेभुक्तिजोनानाप्रकारकेभोग सोईसोईभोगवासनाकेद्वाराहीकर्मक्षयहोनेसेमनुष्यलोककोप्राप्तलोगोंकोसोईसोईवासनाअनुरूपसकलकर्मोमेंप्रवृत्ति होतीहै औरजिसहेतुमनुष्यलोकहीमेकर्मकाअधिकारहै औरकोईलोकमेनहीं है इससेमनुष्यलोकहीमे वासनारूपमूलकोकर्मकाअनुबन्धीकहाहै शोचहै किञ्चणभङ्गसकलसाधनमनुष्यदेहपायके नकुछकरशकैइसभूलकोभीमूलगयेकिसीकोदेख याकिसीकेउपदेशमेआंखअंधीऔकानबहरेहोरहे २ इससंसारमेवर्त्तमान

CC-0. In Public Domain. Digitized by eGangotri

नरूपमस्येह तथोपलभ्यते नान्तोनचादिर्नचसंप्रतिष्ठा अश्वत्थमेनंसुविरूढ मूल मसङ्गशस्त्रेणदृढ़ेनछित्त्वा १

शाङ्करभाष्य

यस्त्वयंवर्णितःसंसारवृक्षःनरूपेति नरूपमस्यइहयथावर्णितंतथा नैवोपलभ्यते स्वप्नमरीच्युदकमायागन्धर्वनगरसमत्वात्दृष्टनष्टस्वरूपोहि सदित्यतएवानन्तोनपर्यन्तोनिष्ठासमाप्तिर्वाविद्यतेतथानचादिरितआरभ्यायंप्रवृत्तइति नकेनचिज्ञायते न चसंप्रतिष्ठास्थितिर्मध्यमस्यनकेनचिदुपलभ्यते अश्वत्थमेनंयथोक्तंसुविरूढ़मूलंसुष्ठुवि

आनन्दगिरिकृतटीका

याप्रवृत्तिःविशेषतोमनुष्यलोकेभवतीत्यत्रहेतुमाह अत्रहीति कर्मव्युत्पत्त्याप्राणिनिका योलोकः मनुष्यश्चसौलोकश्चेत्यधिकृतोब्राह्मण्यादिविशिष्टोदेहोमनुष्यलोकः २

स्वामिकृतटीका।

किञ्चअधश्चेति हिरण्यगर्भादयः कार्योपाधयोजीवाः शाखास्थानीयत्वेनोक्ता स्तेषुचयेदुःकृतिनस्तेऽधःपश्वादियोनिषु प्रसृताविस्तारंगताः सुकृतिनश्चोर्द्धं देवादि योनिषुप्रसूतास्तस्यसंसारवृक्षस्यशाखाः किञ्चगुणैः सत्वादिवृत्तिभिर्जलसेचनैरिव यथायथंप्रवृद्धावृद्धिंप्राप्ताःकिञ्चविषयारूपादयःप्रबालाःपल्लवस्थानीया यासांशाखाग्र स्थानीयाभीरिन्द्रियवृत्तिभिःसंयुक्तत्वात् किञ्चअधश्च चगत्वादूर्द्धञ्चमूलानिअनुस न्ततानिविरूढ़ानिमुख्यंमूलमीश्वरएव इमानित्वन्तरालानिमूलानितत्तद्भोगवासना लक्षणानि तेषांकार्यमाह मनुष्यलोकेकर्मानुबन्धीनिइति कर्म्मएवअनुबन्धि उत्तर भाविनेषां तानिऊर्द्धाधोलोकेषूपभुक्ततत्तत्भोगवासनादिभिर्हिकर्म्मक्षये मनुष्यलो कप्राप्तानांतत्तदनुरूपेषुकर्म्मसुप्रवृत्तिर्भवति तस्मिन्नेवहिकर्माधिकारोनान्येषुलोके षु अतोमनुष्यलोकइत्युक्तं २ किञ्च नरूपमिति इहसंसारेस्थितैःप्राणिभिरन्यसं

भाषा अनुवाद

जोप्राणीहैं वेसंसारवृक्षकाऊर्द्ध मूलआदिभेदनहींजानतेहैं औरअत्यन्तबड़ेपनके हेतुसे इसकाअन्तभीनहींजानाजायहै तथाअनादिहेतुसेआदिभीनहींकोईजानि सकैहै औरस्थिति अर्थात्यहसंसारकिसतरहस्थितआकैसाहै सोभी खबर किसी कोनहींहै इससेयहसंसारवृक्षदृढ़छेदकहेइसकाकाटनाकठिनहै औ अनर्थका रीहै इसीहेतु इसमंसारकोदृढ़बैराग्यरूपशस्त्रसेछेदनकरके तत्वज्ञानकीयत्नक रनाचाहिये यहडेढ़श्लोकसेभगवानकहतेहैं कियहअश्वत्थरूपदृढ़मूलसंसारको अहंममतात्याग रूपदृढ़अस्त्रस्वरूपसम्यकविचारसेछेदनअर्थात्प्रथककरके ३

CC-0. In Public Domain. Digitized by eGangotri

ततःपदंतत्परिमार्गितव्यं यस्मिन्गतानिवर्त्तन्तिभूयः तमेवचाद्यंपुरुषंप्रपद्ये
यतःप्रवृत्तिःप्रसृतापुराणी ४ निर्मानमोहाजितसङ्गदोषा अध्यात्मनित्या

शाङ्करभाष्यं ।

रूढानिविरोहंगतानिमूलानियस्यतमेनंसुविरूढमूलमसङ्गशस्त्रेणअसंगः असंगता
पुत्रवित्तलोकैषणादिभ्योव्युत्थानन्तेनासङ्गशस्त्रेणदृढ़ेन परमात्माभिमुखनिश्चयदृढ़ी
कृतेनपुनःपुनर्विवेकाभ्यासाच्छनिशितेनच्छित्त्वासंसारवृक्षंसबीजमुद्धृत्य ३

आनन्दगिरिकृतटीका

पुनःपुनःरागादिनाप्रवृत्तत्वेनानादित्वान्नसंसारवृक्षःस्वयमुच्छिद्यते नचोच्छे
त्तुंशक्यतेकेनापीत्याशंक्याह यस्त्विति यथापूर्वंवर्णितंयथाचलोकेप्रसिद्धं तथास्यरू
पमिह शास्त्रेनुभीयते तथाचास्यज्ञानाप्तनोद्यत्वंयुक्तमित्याह यथेति तस्याप्रमितत्वे
हेतुमाह स्वप्नेतितस्यस्वप्नादिसमत्वेदृष्टनष्टस्वरूपत्वंहेतुंकरोति दृष्टेतिदृत्यमेयतेति
शेषः तमेवामेयत्वंहेतुंकृत्वावसानमपितस्यनभातीत्याह अतएवेति ज्ञानंविनाभ्रान्ति
वासनाकर्मणामन्योन्यनिमित्तत्वान्नावसानमस्तीत्यर्थः इदंप्रथमत्वमपिनास्यपरि
च्छेत्तुंशक्यमित्याह तथेति आद्यन्तवन्मध्यमपिनास्यप्रामाणिकमित्याह मध्यमिति
संसारवृक्षस्याश्वत्थशब्दितस्यक्षणभङ्गुरस्यस्वयमेवोच्छेदसम्भवात्तदुच्छेदार्थंनप्रयति
तव्यमित्याशंक्याह अश्वत्थमिति व्युत्थानंवैराग्यपूर्वकंपारिव्राज्यं दृढ़ीकृतत्वमेवविवे
कपूर्वकत्वेनस्फुटयति पुनःपुनरिति ३

स्वामिकृतटीका

सारवृक्षस्यतथाऊर्द्धमूलत्वादिप्रकारेणरूपंनोपलभ्यतेनचान्तोऽवसानमपर्यन्तत्वात्
नचादिरनादित्वात् नचसंप्रतिष्ठास्थितिःकथंतिष्ठतीति नोपलभ्यतेयस्मादेवम्भूतोऽ
यंसंसारवृक्षोदुरवच्छेदोऽनर्थकरश्चतस्मादेनंदृढ़ेनवैराग्येणशस्त्रेणच्छित्वा तत्व
ज्ञानेयतेतेत्याह अश्वत्थमेनमिति सार्द्धेन एनमश्वत्थंसुविरूढ़मूलमत्यन्तबद्धमूलंस
न्तं असङ्गोहंममतात्यागस्तेनशस्त्रेणदृढ़ेनसम्यग्विचारेणच्छित्वाष्टथक्कृत्य ३

भाषाअनुवाद

तदनन्तरसंसारकेमूलकारणस्वरूपतत्पदसे कहेजातेभयेजिसईश्वरपदकोअन्वे
षणकरनाउचितहै सोपदकैसाहै इसअपेक्षापरकहतेहैं किजहांजायकरफेरऔर
संसारआवर्त्तनकहेआवागमनहोतानहीं औरभगवत्यदृढ़ूढ़नेकीरीतिकहतेहैं
किजिससेइसपुरानेसंसारकीप्रवृत्तिभईहै उसीआदिपुरुषकेशरणागतहोतेहैं इ
सीतरह एकान्तभक्तिकेद्वाराढ़ूढ़ै: ४ सोईपरमेश्वरकीप्राप्तिकेविषयमेदूसरी

CC-0. In Public Domain. Digitized by eGangotri

विनिवृत्तकामाः द्वंद्वैर्विमुक्ताःसुखदुःखसंज्ञै र्गच्छन्त्यमूढाःपदमव्ययंतत् ५

शाङ्करभाष्यं।

ततइति ततःपश्चात्यत्पदंवैष्णवंतत्परिमार्गितव्यंपरिमार्गणमन्वेषणं ज्ञा तव्यमित्यर्थः यस्मिन्पदेगताःप्रविष्टानिवर्त्तन्तिनावर्त्तन्तेभूयःपुनःसंसाराय कथंप रिमार्गितव्यमित्याह तमेवचयःपदशब्देनोक्तआद्यमादौभवंआद्यंपुरुषंप्रपद्येइत्येवं परिमार्गितव्यंतच्छरणतयेत्यर्थः कोसौपुरुषइत्युच्यतेयतोयस्मात्पुरुषात्संसारमा यावृत्तप्रवृत्तिःप्रसृतानिःसृतैन्द्रजालिकादिवत्मायापुराणीचिरन्तनी ४ कथंभूता स्तत्पदंगच्छतीत्युच्यतेनिर्मानेति निर्मानमोहामानश्चमोहश्चमानमोहौतौनिर्गतौ येभ्यस्तेनिर्मानमोहाःमानमोहवर्जिताःजितसङ्गदोषाःसङ्गएवदोषःसङ्गदोषःजितस ङ्गदोषोयैस्तेजितसङ्गदोषा अध्यात्मनित्याःपरमात्मस्वरूपालोचनेनित्यास्तत्परानिवृ त्तकामाःविशेषतोनिर्लेपेननिवृत्ताःकामायेषांते विनिवृत्तकामायतयः सन्यासिनो द्वन्द्वैःप्रियाप्रियादिभिर्विमुक्तासुखदुःखसंज्ञैःपरित्यक्तागच्छन्त्यमूढामोहवर्जिताः प दमव्ययंतद्यथोक्तं ५ तदेवपदंपुनर्विशिष्यते नेति तद्धामेतिव्यवहितेनधाम्ना सम्ब

आनन्दगिरिकृतटीका

ऊढ्यकिंकर्त्तव्यंतदाह ततइति पश्चादनन्त्यादूर्ध्वंव्यवस्थितमित्यर्थः किन्तत्पदंयद न्विष्यज्ञातव्यंतदाह यस्मिन्निति येनसर्वंपूरणंपुरिषुवाशयानंपुरुषंप्रपद्येशरणंगतो स्मीत्यर्थः विवर्त्तवादानुरोधिनंदृष्टान्तमाह ऐन्द्रेति ४ परिमार्गणपूर्वकंवैष्णवं

स्वामिकृतटीका

ततइति ततस्तस्यमूलभूतंतत्पदंवस्तुपरिमार्गितव्यंअन्वेष्टव्यं कीदृशं यस्मिन् ग तायत्पदं प्राप्ताःसन्तोभूयोननिवर्त्तन्तिनावर्तन्तइत्यर्थः अन्वेषणप्रकारमेवाह तमे वेति यतएषापुराणीचिरन्तनी संसारप्रवृत्तिःप्रसृताविस्तृतातमेवचाद्यं पुरुषंप्रप द्येशरणंव्रजामिइत्येवमेकान्तभक्त्याअन्वेष्टव्यमित्यर्थः ४ तत्प्राप्तौसाधनान्तराणि

भाषाअनुवाद

उपायदेखावतेऊये कहतेहैं किजिनमनुष्योंकेमानअहंकारऔमिथ्यावस्तुमे रुचि नहींहै अर्थात्मानादिदूरहोगयेहैं औरजिनकेपुत्रस्त्रीधनआदिसेआशक्तिरूप दोषनिवृत्तभयेहैं औरजिनकोआत्मज्ञानमेभलीप्रकारसेनिष्ठाहै औरजिनकीवा सनाअच्छीतरहनिवृत्तहोगईहै औरसुखदुखकेहेतुरूपशीतउष्णहानिलाभआदि द्वन्द्वसेअच्छीतरहछूटगयेहैं ऐसेजोनिवृत्तअविद्य कहेज्ञानीजनहैं तेईअव्यय रू पकोप्राप्तहोतेहैं ५ अबउसीअव्ययपदकोविशेषरूपसेकहतेहैं किउसपद को

CC-0. In Public Domain. Digitized by eGangotri

नतद्भासयते सूर्यो नशशाङ्कोनपावकः यद्गत्वाननिवर्त्तन्ते तद्धामपरमंमम ६

शाङ्करभाष्यं

स्वःधामतेजोरूपंपदंनभासयतेसूर्यआदित्यःसर्वावभासनशक्तिमत्त्वेप्रसितथान शशाङ्कश्चन्द्रोनचपावकोनाग्निरपियद्धामवैष्णवंपदं गत्वाप्राप्यननिवर्त्तन्तेयच्चसूर्यादिभिर्नभासयतेतद्धामपदं परमंविष्णोर्ममपदं यत्गत्वा ननिवर्त्तन्त इत्यर्थः ६

ननुसर्व्वाहिगतिरागत्यन्तासंयोगाविप्रयोगान्ताःइति प्रसिद्धंहिकथमुच्यते तद्धामगतानांनास्तिनिवृत्तिरितिमैवं तवकारणंममैवेति ममैवपरमात्मनोनारायणस्यांशोभागोऽवयवएकदेशइत्यनर्थान्तरंजीवलोकेजीवानांलोकेसंसारेजीवभूतः भोक्ताकर्तेति प्रसिद्धःसनातनःपुरातनःयथाजलसूर्यकः सुर्यांशोजलनिमित्तापायेसूर्यमेवगत्वाननिवर्ततेतथाऽयमप्यंशः तेनैवात्मनासङ्गच्छत्येवमेवयथावाघटादुपाधिपरिच्छिन्नोघटाद्याकाशःआकाशांशः सन्घटादिनिमित्तापायेआकाशंप्राप्य ननिवर्तत

आनन्दगिरिकृतटीका

पदंगच्छतांसंज्ञान्तराभ्याकाङ्क्षापूर्व्वकंकथयति कथमित्यादिना मानोहङ्कारःमोहस्वविवेकःजितसङ्गदोषाःशत्रुमित्रसन्निधावपिद्वेषप्रीतिवर्जिताइत्यर्थः तत्परत्वंश्रवणादिनिष्ठत्वंसंन्यासिनोवैराग्यद्वारा त्यक्तसर्व्वकर्म्माणइत्यर्थः आदिशब्देनतद्धेतुग्रहः मोहवर्जितत्वमुक्तहेतुतःसंजातसम्यग्धीत्वं ५ तच्चेत्पदं वेद्यंकर्त्तुरव्यत्कर्म्मेति हैतापाप्यतोऽवेद्यंचेदप्रमत्तत्वात्प्रेप्सितत्वासिद्धिरित्याशंक्याह तदेवेति उक्तमनूद्याक्षिपति यद्गत्वेति ६ तत्प्रसिद्धिंप्रमाणयति संयोगाइति गमनस्यागमनान्तत्व

स्वामिकृतटीका

दर्शयन्नाह निर्मानेति तिर्गतौमानमोहौअहङ्कारमिथ्याभिनिवेशौयेभ्यस्तेजितःपुत्रादिसङ्गरूपोदोषोयैस्तेअध्यात्मेआत्मज्ञानेनित्याःपरिनिष्ठिताःविशेषेणनिवृतः कामोयेभ्यस्ते सुखदुःखहेतुत्वात्सुखदुःखसंज्ञानिशीतोष्णादीनिद्वन्द्वानि तैर्विमुक्ताअतएवामूढानिवृत्ताविद्याःसन्तस्तदव्ययंपदं गच्छन्ति ५ तदेवंगन्तव्यंपदं विशिनष्टि नतदिति तत्पदंसूर्यादयोनप्रकाशयन्तियत्प्राप्यननिवर्तन्तेयोगिनस्तद्धाम स्वरूपं परमंमम अनेनसूर्यादिप्रकाशाविषयत्वेनजड़त्वशीतोष्णादिदोषप्रसङ्गोनिरस्तः ६

भाषा अनुवाद

सूर्यचन्द्रअग्निभीप्रकाशनहींकरसकतेहैं औरयोगीजनजिसपदकोप्राप्तहो फेरि संसारमेआवर्त्तन कहेगमनागमननहींकरते हैं सोईधामकहेतेजरूप हमरास्वरूपहै जहांसूर्यादिकीभीगतिनहींतहांदुखद्वन्दजड़ताकाकौनप्रसङ्गहै ६ जोकहो

CC-0. In Public Domain. Digitized by eGangotri

ममैवांशोजीवलोकेजीवभूतःसनातनः मनःषष्ठानीन्द्रियाणिप्रकृतिस्थानिकर्षति ७

शाङ्करभाष्यं।

इत्येवमतउपपन्नमुक्तंयद्गत्वाननिवर्तन्तइति ननुनिरवयवस्यपरमात्मनः कुतोऽवयव एकदेशोंशइति सावयवत्वेचविनाशप्रसङ्गोऽवयवविभागान्नैषदोषोऽविद्याकृतोपाधि परिच्छिन्नएकदेशोंशइवकल्पितोदर्शितश्चायमर्थः क्षेत्राध्यायेविस्तरशःसचजीवोम दंशत्वेनकल्पितःकथंसंसरतीत्युक्तमिति चेदुच्यते मनःषष्ठानीन्द्रियाणिश्रोत्रादीनि प्रकृतिस्थानि स्वस्थानेकर्णशष्कुल्यादौ प्रकृतौस्थितानि कर्षत्याकर्षति ७

आनन्दगिरिकृतटीका।

प्रसिद्धेरप्युक्तंयद्गत्वेत्यादिइत्युपसंहरति कथमिति आक्षेपंपरिहरति दृष्टिवति भगव त्प्राप्तेर्निष्टयंतत्वाभावःसम्यग्यर्थः जीवस्यपरांशत्वेपिकथमुक्तदोषसमाधिरित्याशंक्य प्रतिबिम्बपक्षमादायदृष्टान्तेनप्रत्याचष्टे यथेति अवच्छेदपक्षमाश्रित्यदृष्टान्तान्तरेणो क्तदोषसमाधिंदर्शयति यथावेति आक्षेपसमाधिमुपसंहरति अतइति परस्य निरव यवत्वात्तदंशत्वंजीवस्यायुक्तमिति शङ्कते नन्विति तस्यनिरवयत्वंसाधयति सावयव त्वेचेति वस्तुतोनिरंशस्यापिपरस्यकल्पनयाजीवोंशोभविष्यतीतिपरिहरति नैष दोइति वस्तुतस्तुजीवस्यनांशत्वंपरमात्मतावन्मात्रतयादर्शितत्वादित्याह दर्शितश्चेति यदिपरस्यांशत्वेनकल्पितोजीवोवस्तुतस्तदात्मैवनतर्हितस्यसंसारित्वं उत्क्रान्तिर्वे तिशङ्कते कथमिति जीवस्यसंसरणमुत्क्रमणञ्चोपपादयितुमुपक्रमते उच्यतइति ७

स्वामिकृतटीका।

ननुचत्वदीयंधामप्राप्ताःसन्तोयदिननिवर्तन्ते तर्हिसतिमंपद्यनविदुःसति स

भाषाअनुवाद

कितुमारेधामकोप्राप्तहो फेरिसंसारनहींहोता सोसत्यहै सकलजीवसतस्वरूपस म्पन्नहोकेइतदृष्टिनहींकरतेहैं औरसुषुप्तिसमयमेंहमब्रह्मभावकोप्राप्तहोतेहैं ऐ सेश्रुतिविधानकरैहैं औप्रलयकालमेभी सबजीवतिसधामकोप्राप्तहोतेहैं तोफेरि संसारीऔरकिसकानामहै इसआशङ्कापरपाञ्चश्लोकमेंसंसारीस्वरूप देखावते हैं किहमाराअंशजीवअविद्यासेसुषुप्तितथाप्रलयकेसमयप्रकृतिमेंलीनहोकेरहतेहैं औरमनसमेतइन्द्रियइनछवोको मेरेहीअंशसनातनजीवभूतसंसारके उपभोगार्थ फेरभीमनुष्यलोकमेंखैंचेहैं यहांयहजाननाचाहियेकिइन्द्रियशब्दसेज्ञानकर्मइन्द्री औपञ्चप्राणलेतेहैं इसीसेसंसारीहोते हैं ७ औरसोईइन्द्रियोकोआका

GC-0. In Public Domain. Digitized by eGangotri

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ८

शाङ्करभाष्यं

कस्मिन्काले शरीरमिति यच्चापि यदाचाप्युत्क्रामतीश्वरो देहादिसंघातस्वामीजीवस्तदाकर्षतीति श्लोकस्य द्वितीयपादार्थवशात् प्रायश्येनसम्बध्यते यदाचपूर्वस्मात्शरीरात्शरीरान्तरमाप्नोतितदागृहीत्वैतानिमनःषष्ठानीन्द्रियाणिसंयातिसम्यक्यातिगच्छतिकिमिवेत्याह वायुःपवनोगन्धानिवाशयात्पुष्पादेः ८ कानिपुनस्तानीति

आनन्दगिरिकृतटीका

स्वस्थानेस्थितानामिन्द्रियाणांजीवेनाकर्षणस्यकालंपृच्छति कस्मिन्नितिजीवस्योत्क्रान्तिर्नेश्वरस्येत्याशंक्येश्वरशब्दार्थमाह देहादीति उत्क्रान्त्यनन्तरभावि नोगतिरित्येतदर्थवशादित्युक्तं अवशिष्टानिश्लोकाक्षराण्याचष्टे यदाचेति ८

स्वामिकृतटीक

पद्यामहइत्यादिश्रुतेःसुषुप्तिप्रलयसमयेतत्प्राप्तिःसर्वेषामस्तीतिकोनामसंसारीत्याशंक्यसंसारिणंदर्शयति ममैवेति पञ्चभिः ममैवांशोयमविद्ययाजीवभूतःसनातनःसर्वदासंसारित्वेनप्रसिद्धः असौसुषुप्तिप्रलययोःप्रकृतौलीनतयास्थितानिमनःषष्ठंयेषांतानीन्द्रियाणिपुनर्जीवलोके संसारोपभोगार्थमाकर्षति एतच्चकर्मेन्द्रियाणांप्राणस्यचोपलक्षणार्थमयम्भावःसत्यंसुषुप्तिप्रलययोरपिमदंशत्वात् सर्वस्यापिजीवमात्रस्यमयिलयादस्तेवमत्प्राप्तिस्तथाप्यविद्याद्वतस्यसानुशयस्यसप्रकृतिकेमयिलयोनतुशुद्धे तदुक्तंअव्यक्ताद्व्यक्तयःसर्वाःप्रभवन्तीत्यादिना अतःपुनःसंसारायनिर्गच्छन्नविद्वान्प्रकृतौलीनतयास्थितानिस्वोपाधिभूतानीन्द्रियाण्याकर्षति विदुषान्तुशुद्धस्वरूपप्राप्तेर्निवृत्तिरिति ७ तान्याकृष्यकिंकरोतीत्याह शरीरमिति यत्यदाशरीरान्तरंकर्मवशादवाप्नोतियतश्चशरीरादुत्क्रामतिईश्वरोदेहादीनांस्वामी तदापूर्वस्मात् शरीरादेतानिगृहीत्वातच्छरीरान्तरंसम्यग्याति शरीरेसत्यपिइन्द्रियग्र

भाषाअनुवाद

औरसोईइन्द्रियोंकोआकर्षणकरिके जीवल्याकरतेहैं जोयहशङ्काकरोतोसुनोकिजवईश्वरनाम देहआदिकास्वामीरूप व्यावहारिकजीवकर्मवशते दूशरीशरीरकोप्राप्तहोतेहैं अथवाजवशरीरकोछोड़िकेगमनकरतेहैं तवपूर्वशरीरसेइन्द्रियादिकोंको ग्रहणकरिकेगमनकरैंहैं इसमेदृष्टान्तयह किजैसेवायुफूलोंकेस्थानसे सुगन्धरूपसूक्ष्मअंशपरमाणुग्रहकरगमनकरैहैतैसेहीयहभीजानो ८

CC-0. In Public Domain. Digitized by eGangotri

ममैवांशोजीवलोकेजीवभूतःसनातनः मनःषष्ठानीन्द्रियाणिप्रकृतिस्थानिकर्षति ७

शाङ्करभाष्यं।

इत्येवमतउपपन्नमुक्तंयङ्गत्वाननिवर्तन्तइति ननुनिरवयवस्यपरमात्मनः कुतोऽवयव एकदेशोंशइति सावयवत्वेचविनाशप्रसङ्गोऽवयवविभागान्नैषदोषोऽविद्याकृतोपाधि परिच्छिन्नएकदेशोंशइवकल्पितोदर्शितश्चायमर्थः क्षेत्राध्यायेविस्तरशःसचजीवोम दंशत्वेनकल्पितःकथंसंसरतीत्युक्तमिति चेदुच्यते मनःषष्ठानीन्द्रियाणिश्रोत्रादीनि प्रकृतिस्थानि स्वस्थानेकर्णशष्कुल्यादौ प्रकृतौस्थितानि कर्षत्याकर्षति ७

आनन्दगिरिकृतटीका।

प्रसिद्धेरथुक्तंयङ्गत्वेत्यादिइत्युपसंहरति कथमिति आक्षेपंपरिहरति दृष्टिरिति भगव त्प्राप्तेर्निष्टयंतत्वाभावःसम्यग्यर्थः जीवस्यपरांशत्वेपिकथमुक्तदोषसमाधिरित्याशंक्य प्रतिबिम्बपक्षमादायदृष्टान्तेनप्रत्याचष्टे यथेति अवच्छेदपक्षमाश्रित्यदृष्टान्तान्तरेणो क्तदोषसमाधिंदर्शयति यथावेति आक्षेपसमाधिमुपसंहरति अतइति परस्य निरव यवत्वात्तदंशत्वंजीवस्यायुक्तमिति शङ्कते नन्विति तस्यनिरवयत्वंसाधयति सावयव त्वेचेति वस्तुतोनिरंशस्यापिपरस्यकल्पनयाजीवोंशोभविष्यतीतिपरिहरति नैष दोइति वस्तुतस्तुजीवस्यनांशत्वंपरमात्मतावन्मात्रतयादर्शितत्वादित्याह दर्शितश्चेति यदिपरस्यांशत्वेनकल्पितोजीवोवस्तुतस्तदात्मैवनतर्हितस्यसंसारित्वं उत्क्रान्तिर्वे तिशङ्कते कथमिति जीवस्यसंसरणमुत्क्रमणञ्चोपपादयितुमुपक्रमते उच्यतइति ७

स्वामिकृतटीका।

ननुचत्वदीयंधामप्राप्ताःसन्तोयदिननिवर्तन्ते तर्हिसतिसंपद्यनविदुःसति सं

भाषाअनुवाद

कितुमारेधामकोप्राप्तहो फेरिसंसारनहींहोता सोसत्यहै सकलजीवसतस्वरूपस म्पन्नहोकेइतदृष्टिनहीकरतेहैं औरसुषुप्तिसमयमेंहमब्रह्मभावकोप्राप्तहोतेहैं औ सेश्रुतिविधानकरैंहैं औप्रलयकालमेभी सबजीवतिसधामकोप्राप्तहोतेहैं तोफेरि संसारीऔरकिसकानामहै इसआशङ्कापरपाञ्चश्लोकमेंसंसारीस्वरूप देखावते हैं किहमाराअंशजीवअविद्यासेसुषुप्तितथाप्रलयकेसमयप्रकृतिमेंलीनहोकेरहतेहैं औरमनसमेतइन्द्रियइनछवोको मेरेहीअंशसनातनजीवभूतसंसारके उपभोगार्थ फेरभीमनुष्यलोकमे खैंचेहैं यहांयहजाननाचाहियेकिइन्द्रियशब्दसेज्ञानकर्मइन्द्री औपञ्चप्राणलेतेहैं इसीसेसंसारीहोते हैं ७ औरसोईइन्द्रियोकोआका

CC-0. In Public Domain. Digitized by eGangotri

शरीरंयदवाप्नोतियच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानिसंयातिवायुर्गन्धानिवाशयात् ८

शाङ्करभाष्यं

कस्मिन्काले शरीरमितियच्चापियदाचाप्युत्क्रामतेश्वरोदेहादिसंघातस्वामीजीवस्तदाकर्षतीति श्लोकस्यद्वितीयपादार्थवशात्प्राथम्येनसम्बध्यते यदाचपूर्वस्मात्शरीरात्शरीरान्तरमाप्नोतितदागृहीत्वैतानिमनःषष्ठानीन्द्रियाणिसंयातिसम्यक्यातिगच्छतिकिमिवेत्याह वायुःपवनोगन्धानिवाशयात्पुष्पादेः ८ कानिपुनस्तानीति

आनन्दगिरिकृतटीका

स्वस्थानेस्थितानामिन्द्रियाणांजीवेनाकर्षणस्यकालंपृच्छति कस्मिन्नितिजीवस्योत्क्रान्तिर्नेश्वरस्येत्याशंक्येश्वरशब्दार्थमाह देहादीति उत्क्रान्त्यनन्तरभावि नोगतिरित्येतदर्थवशादित्युक्तं अवशिष्टानिश्लोकाक्षराण्याचष्टे यदाचेति ८

स्वामिकृतटीक

पद्यामहइत्यादिश्रुतेःसुषुप्तिप्रलयसमयेतत्प्राप्तिःसर्वेषामस्तीतिकोनामसंसारीत्याशंक्यसंसारिणंदर्शयति ममैवेति पञ्चभिः ममैवांशोयमविद्ययाजीवभूतःसनातनःसर्वदासंसारित्वेनप्रसिद्धः असौसुषुप्तिप्रलययोःप्रकृतौलीनतयास्थितानिमनःषष्ठंयेषांतानीन्द्रियाणिपुनर्जीवलोके संसारोपभोगार्थमाकर्षति एतच्चकर्मेन्द्रियाणांप्राणस्यचोपलक्षणार्थमयम्भावःसत्यंसुषुप्तिप्रलययोरपिमदंशत्वात् सर्वस्यापिजीवमात्रस्यमयिलयादस्त्येवमत्प्राप्तिस्तथाप्यविद्याद्दतस्यसानुग्रयस्यसप्रकृतिकेमयिलयोनतुशुद्धे तदुक्तंअव्यक्ताद्व्यक्तयःसर्वाःप्रभवन्त्योत्यादिना अतःपुनःसंसारायनिर्गच्छन्नविद्वान्प्रकृतौलीनतयास्थितानिस्वोपाधिभूतानीन्द्रियाण्याकर्षति विदुषान्तुशुद्धस्वरूपप्राप्तेर्निवृत्तिरिति ७ तान्याकृष्यकिंकरोतीत्याह शरीरमिति यत्यदाशरीरान्तरंकर्मवशादवाप्नोतियतश्चशरीरादुत्क्रामतिईश्वरोदेहादीनांस्वामी तदापूर्वस्मात् शरीरादेतानिगृहीत्वातच्छरीरान्तरंसम्यग्याति शरीरेसत्यपिइन्द्रियग्र

भाषाअनुवाद

औरसोईइन्द्रियोंकोआकर्षणकरिके जीवल्याकरतेहैं जोयहशङ्काकरोतोसुनोकिजवईश्वरनाम देहआदिकास्वामीरूप व्यावहारिकजीवकर्मवशते दूसरीशरीरकोप्राप्तहोतेहैं अथवाजवशरीरकोछोड़िकेगमनकरतेहैं तवपूर्वशरीरसेइन्द्रियादिकोंको ग्रहणकरिकेगमनकरैहैं इसमेंदृष्टान्तयह किजैसेवायुफूलोंकेस्थानसे सुगन्धरूपसूक्ष्मअंशपरमाणुग्रहकरगमनकरैहैतैसेहीयहभीजानो ८

CC-0. In Public Domain. Digitized by eGangotri

श्रोत्रञ्चक्षुःस्पर्शनञ्चरसनंघ्राणमेवच अधिष्ठायमनश्चायंविषयानुपसेवते ९
उत्क्रामन्तंस्थितंवापिभुञ्जानंवागुणान्वितं विमूढानानुपश्यन्तिपश्यन्तिज्ञानचक्षुषः१०

शाङ्करभाष्य

श्रोत्रमिति श्रोत्रंचक्षुःस्पर्शनञ्चत्वगिन्द्रियंरसनंजिह्वाघ्राणमेवचमनश्चषष्ठंप्रत्येकंइन्द्रियेणसहाधिष्ठायदेहस्थोविषयान्शब्दादीनुपसेवते ९

एवंदेहगतंदेहात्उत्क्रामन्तमिति उत्क्रामन्तंपरित्यजन्तंदेहंपूर्व्वोपात्तंस्थितंवादेहेतिष्ठन्तं भुञ्जानंवाशब्दादींश्चोपलभमानंगुणान्वितंसुखदुःखमोहाख्यैःगुणैरन्वितमनुगतंसंयुक्तमित्यर्थःएवम्भूतमप्येनमत्यन्तंदर्शनगोचरप्राप्तंविमूढा दृष्टादृष्टविषयभोगवलाक्षृष्टचेतस्तयाऽनेकधामूढानानुपश्यन्त्यहोकष्टंवर्त्तन्तइत्यनुक्रोशतिच भगवान् येतुपुनःप्रमाणजनितज्ञानचक्षुषस्तएनंपश्यन्ति ज्ञानचक्षुषोविविक्तदृष्टयइत्यर्थः १० केचित्तुयतन्तःप्रयत्नंकुर्व्वन्तोयोगिनश्चसमाहितचित्ताएनंप्रकृतमात्मानं

आनन्दगिरिकृतटीका

मनःषष्ठानीन्द्रियाण्येवप्रश्नद्वाराविशेषतोदर्शयति कानीति ९

शरीरमित्यादिश्लोकेदेहादात्मनोतिरेकमुक्त्वाश्रोत्रंचक्षुरित्यादौ स्वाभिलषितेविषयेयथायथंकरणानांप्रवर्त्तकत्वात्तेभ्योतिरिक्तश्चात्मेत्युक्तंतर्हितमुत्क्रान्त्यादि कुर्व्व

स्वामिकृतटीका

हणेदृष्टान्तः आशयात्स्वस्थानात्कुसुमादेःसकाशात्गन्धान्गन्धवतः सूक्ष्मानंशान्गृहीत्वावायुर्यथागच्छतितद्वत् ८ तान्येवेन्द्रियाणिदर्शयन्यदर्थंगृहीत्वागच्छतितदाह श्रोत्रमिति श्रोत्रादीनिवाह्येन्द्रियाणिमनश्चान्तःकरणमधिष्ठायाश्चित्यशब्दादीन्विषयानयंजीवउपभुङ्क्ते ९ ननुकार्यकारणसंघातव्यतिरेके

भाषाअनुवाद

इन्द्रियोंकेसमाचारकहके अबजिसलियेउनइन्द्रियोंकोग्रहणकरिकै गमनकरतेहैं सोकहतेहैं कियेजीवश्रोत्रचक्षुस्पर्शविह्वाऔरघ्राणसे वाह्यइन्द्रियऔरअन्तःकरण कोआश्रयकरिके शब्दआदिविषयोंको उपभोगकरैं हैं ९

जोकहोकिऐसेआत्माकोकार्यकारणसमूहसे भिन्नरूपसवकोईक्योंनहीदेखते इसप्रकहतेहैं किदेहान्तरगामीअथवाउसीदेहमेस्थितयाविषयभोगीकिम्बाइन्द्रियादियुक्तजीवकोविशेषमूढबुद्धिसवनहीदेखतेहैं परन्तुज्ञानहोंजिसकेचक्षुहैं ऐसेविवेकीमनुष्यहीदेखतेहैं १० औरयहआत्मादुर्विज्ञेयहै क्योंकि विवेकियों केवीच

CC-0. In Public Domain. Digitized by eGangotri

यतन्तोयोगिनश्चैनंपश्यन्त्यात्मन्यवस्थितं यतन्तोऽप्यकृतात्मानोनैनंपश्यन्त्यचेतसः ११

शाङ्करभाष्यं

पश्यन्त्यय मस्मीति उपलभ्यन्तेआत्मनिस्वस्यांबुद्धाववस्थितंयतन्तोपिशास्त्रादिप्रमाणै रकृतात्मानोऽसंस्कृतात्मानःतपसेन्द्रियजयेनचदुश्चरितादनुपरताअशान्तदर्पाः प्र यत्नंकुर्वन्तोनैनंपश्यन्त्यचेतसोऽविवेकिनः ११ यत्पदंसर्व्वस्यावभासकम ग्न्यादित्यादिकंज्योतिर्नावभासयते यत्प्राप्यास्मुमुच्चवःपुनःसंसाराभिमुखाननि वर्त्तन्तेयस्यचपदस्योपाधिभेदमनुविधीयमानाजीवा घटाकाशादयइवाकाशस्यांशा स्तस्यपदस्यसत्यात्मत्वंसर्व्वव्यवहारास्पदत्वञ्च विवक्षुश्चतुर्भिःश्लोकैःविभूतिसंज्ञेयमा

आनन्दगिरिकृतटीका

न्तंस्वरूपत्वात्किमितिसर्व्वेनपश्यन्तीत्याशंक्याह एवमिति सन्निहिततमत्वेनदर्शन योग्यमपिविषयपरवशादात्मानंसर्व्वेनपश्यन्तीति भगवतोनुक्रोशंदर्शयति एवम्भूत मिति तर्हिकेषामात्मदर्शनंतदाह येतुपुनरिति१० ज्ञानचक्षुःशब्देनन्यायानुगृहीतं शास्त्रंज्ञानसाधनमुक्तंतत्किमिदानींशास्त्रमात्रेणन्यायानुगृहीतेनात्मानंपश्यन्ति ने त्याह केचिच्चेति प्रयत्नःश्रवणमननात्मकःशास्त्रादिप्रमाणैर्यतन्तोपीतिसम्बन्धः अ संस्कृतात्मत्वंप्रकटयति तपसेति दुश्चरितादविरतिफलंकथयति अशान्तेति अशु द्धबुद्धीनामविवेकिनांसदपिश्रवणादिनफलवदिति मत्वाह प्रयत्नमिति ११

स्वामिकृतटीका

णैवम्भूतमात्मानंसर्व्वेपिकिंनपश्यन्तितत्राह उत्क्रामन्तमिति उत्क्रामन्तंदेहाद्देहा न्तरंगच्छन्तंतस्मिन्नेवदेहेस्थितं वाविषयान्भुञ्जानंवा गुणान्वितमिन्द्रियादियुक्तंजी वं विमूढानालोकयन्ति ज्ञानमेवचक्षुर्येषांतेविवेकिनः पश्यन्ति १०

दुर्ज्ञेयश्चायंयतोविवेकिष्वपिकेचित्पश्यन्तिकेचिन्नपश्यन्तीत्याह यतन्तइति यत न्तोध्यानादिभिः प्रयतमानायोगिनःकेचिदेनमात्मानमात्मनिदेहेऽवस्थितंविविक्तंप श्यन्तिशास्त्राभ्यासादिभिर्यत्नंकुर्व्वाणा अकृतात्मानोऽविशुद्धचित्ताअतएवाचेतसो म न्दमतयएनंनपश्यन्ति ११ तदेवंनतद्भासयतेसूर्य्यइत्यादिनापारमेश्वरंपरंधामो

भाषाअनुवाद

भीकोईदेखते औरकोईनहींदेखसकतेहैं सोईकहतेहैं किध्यानआदिकेद्वारायत्न कारीयोगीजनअपनेशरीरमेंइसआत्माकोपृथक्रूपसेदेखतेहैं औरशास्त्रअभ्यास सेयत्नकरकेभीअकृतात्माअशुद्धचित्तमन्दमतिलोग इसआत्माकोनहींदेखतेहैं ११

CC-0. In Public Domain. Digitized by eGangotri

यदादित्यगतंतेजोजगद्भासयतेऽखिलं यच्चन्द्रमसियच्चाग्नौतत्तेजोविद्धिमामकं १२

शाङ्करभाष्यं

ह भगवान्यदेति यदादित्यगतमादित्याश्रयंकिल्तत्तेजोदीप्तिःप्रकाशोजगद्भासयते प्रकाशयत्यखिलंसमस्तं यच्चन्द्रमसियच्चशशभृतितत्तेजोऽवभासकंवर्त्ततेयच्चाग्नौऊ तवच्चेतत्तेजोष्टद्विविजानीहिमामकंमदीयं ममविष्णोस्तत्ज्योतिः अथवायदादित्यग तंतेजश्चैतन्यात्मकंज्योतिश्चन्द्रमसियच्चाग्नौतत्तेजोविद्धिमामकंमदीयंममविष्णोस्तत् ज्योतिरित्यादि ननुस्थावरेषुजङ्गमेषुचतत्समानं चैतन्यात्मकंज्योतिस्तवकथमिदं विशेषणंयदादित्यगतमित्यादिनैषदोषः सत्वाधिक्यादाधिक्योपपत्तेरादित्यादिषुहि सत्वमत्यन्तप्रकाशमत्यन्तभास्वरमतस्तवैवाविस्तरां ज्योतिरिति तद्विशिष्यते ननुत वैवतदधिकमिति यथाहिलोकेतुल्येपिमुखसंस्थानेनकाष्ठकुड्यादौमुखमाविर्भवति आदर्शादौतुस्वच्छेस्वच्छतरेतारतम्येनाविर्भवति तद्वत् १२

आनन्दगिरिकृतटीका

अनन्तरश्लोकचतुष्टयस्यटत्तानुवादद्वारातात्पर्य्यार्थमाह तत्पदमिति जीवात्म त्वेनचिद्रूपत्वमुक्त्वातदीयचैतन्येनादित्यादीनामवभासकत्वाच्चब्रह्मणश्चिद्रूपत्वमित्या ह यदादित्येति चिद्रूपस्यैवब्रह्मणःसर्व्वात्मकत्वप्रतिपादकत्वेनश्लोकंव्याचष्टे यदित्या दिना आदित्यादौतवतत्र स्थितंब्रह्मचैतन्यज्योतिःसर्व्वावभासकमित्यर्थःब्रह्मणःस

स्वामिकृतटीका।

क्तं तत्प्राप्तानाञ्चापुनरावृत्तिरुक्तातत्रसंसारिणोऽभावमात्रंनसंसारिस्वरूपं देहा दिव्यतिरिक्तंदर्शितं इदानींतदेवपारमेश्वरंरूपमनन्तशक्तित्वेन निरूपयति यदि त्यादिचतुर्भिः आदित्यादिषुस्थितंयदनेकप्रकारंतेजोविश्वंप्रकाशयति तत्सर्व्वंतेजो

भाषा अनुवाद।

इससे नतद्भासयतेसूर्य्यइत्यादि इसीअध्यायकेसप्तमआदिश्लोककेद्वारा परमेश्वर काजोपरमधाम सोकहागयाहै औतद्धामप्राप्तजीवोंकीअपुनरावृत्तिकहीगईहै औतद्विषयकसंसारीकेअभावआशङ्कापर देहसेभिन्नसंसारीस्वरूपकोभी देखाया है अबसोईपरमेश्वरसम्बन्धीरूपइहांसेलेकरचारश्लोसेअनन्तशक्तिक्रमसे निरूपण करतेहैं किसूर्यादिमेस्थित अनेकप्रकारतेज जोविश्वकोप्रकाशकरैहैं ऐसेहीचन्द्र मेस्थितजोतेज अखिलसंसारकोप्रकाशकरतेहैं तैसेहोअग्निस्थकहे अग्निमेटिका ऊआतेज ब्रह्माण्डदीप्तकरैहै सोसबतेज हमाराहीहै यहजानो१ २

CC-0. In Public Domain. Digitized by eGangotri

गामाविश्य चभूतानिधारयाम्यहमोजसा पुष्णामिचौषधीः सर्व्वाः सोमभूत्वारसात्मकः १३

शाङ्करभाष्यं

किञ्च गामिति गांपृथिवीमाविश्यप्रविश्यधारयामिभूतानिजगदहमोजसाव लेनयद्बलंकामरागविवर्जितमैश्वरंजगद्विधारणायपृथिव्यांप्रविष्टंयेनगुर्व्वीपृथिवीना धःपततिनविशीर्यते तथाचमन्त्रवर्णः येनद्यौरुग्रापृथिवीचदृढेतिसदाधारपृथिवीत्या दीश्रुतोगामाविश्यभूतानिचराचराणिधारयामीतियुक्तमुक्तं किञ्चपृथिव्यांजाता हिओषधीः सर्व्वाव्रीहियवाद्याःपुष्णामि पुष्टिमतीरसास्वादमतीश्चकरोमि सोमोभू त्वारसात्मकः सोमः सर्व्वरसात्मकोरसस्वभावःसर्व्वरसानामाकरःसोमःसहि सर्व्वाओ षधीःस्वात्मरसानुप्रवेशेनपुष्णाति १३ किञ्च अहमिति अहमेववैश्वानरउ दरस्थोभ्यन्तर्भूत्वायमग्निर्वैश्वानरोयोऽयमन्तःपुरुषेयेनेदमन्नंपच्यतेइत्यादिश्रुतेर्वैश्वा

आनन्दगिरिकृतटीका।

र्वत्वेनचिद्रूपत्वमत्रविवक्षितमितिव्याख्यान्तरमाह अथवेति चैतन्यज्योतिषःसर्वत्रा विशेषादादित्यादिगतविशेषणमयुक्तमितिशङ्कते नन्विति सर्वत्रसत्त्वेपिक्वचिदेवाभि व्यक्तिविशेषाद्विशेषणमिति परिहरति नैषदोषइति तदेवप्रपञ्चयति आदित्यादि ष्विति सर्वत्रचैतन्यज्योतिषस्तुल्यत्वेपि क्वचिदेवाभिव्यक्त्याविशेषणोपपत्तिंदृष्टान्तेन स्पष्टयति यथाहीति १२

इतश्च सर्व्वात्मत्वंप्रकृतपदस्ययुक्तमित्याह किञ्चेति ईश्वरोहिपृथिवीदेवतारू पेणपृथिवींप्रविश्यभूतशब्दितंजगदैश्वरेणैवबलेनविभर्ति ततोगुर्व्वपिपृथिवीविदीर्य नाधःपततीत्यत्रप्रमाणमाह तथाचेति परस्यैवहिरण्यगर्भात्मनावस्थानान्नमन्त्रवर्ण योरन्यपरतेति भावः देवतात्मनाद्यावापृथिव्योरुग्रत्वमुद्वरणत्वसामर्थ्यं तथापीश्वरा यत्वमेवस्वरूपधारणंतदपेक्षयादुर्बलत्वादितिद्रष्टव्यं ईश्वरस्यसर्व्वात्मत्वे हेत्वन्तर माह किञ्चेति रसात्मकसोमरूपतापत्तावपि कथमौषधीरीश्वरःसर्व्वाःपुष्णातीत्या शंक्याह सर्वेति १३ भगवतःसर्व्वात्मत्वेहेत्वन्तरमाह किञ्चेति अहमेवेत्य

स्वामिकृतटीका

मदीयमेवजानीहि १२ किञ्च गामिमिगांपृथ्वीमोजसावलेनाधिष्ठायाहमेवचराचरा णिभूतानिधारयामि अहमेवचरसमयःसोमोभूत्वाव्रीह्याद्यौषधीःसर्वाःसंवर्द्धयामि१३

भाषा अनुवाद

और पृथिवीको अपने बलके द्वारास्थितकरके मैंचराचरात्मकसकलभूतोंको धार णकर्ताहूं औरअमृतात्मकचन्द्रस्वरूपहो दृक्षआदिसम्पूर्णशस्यकोभीबढावताहूं १३

CC-0. In Public Domain. Digitized by eGangotri

अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधं १४

शाङ्करभाष्यं ।

नरःसन्प्राणिनांप्राणवतांदेहमाश्रितःप्रविष्टःप्राणापानसमायुक्तःप्राणापानाभ्यांसमायुक्तःसंयुक्तःपचामिपक्तिंकरोमि अन्नंचतुर्विधंचतुःप्रकारं अन्नमशनंभोज्यञ्च भक्ष्यञ्चोष्यंलेह्यञ्चभोक्तावैश्वानरोग्निर्भोज्यमन्नं सोमस्तदेतदुभयमग्नीसोमौसर्वमिति पश्यतोन्नदोषलेपोनभवति १४ किञ्च सर्वेति सर्वस्यप्राणिजातस्याहमात्मा

आनन्दगिरिकृतटीका

हंशब्देनपरोलक्ष्यतेभूत्वापचामीति सम्बन्धः परस्यैवजाठरात्मनास्थितौश्रुति प्रमाणयति अयमिति वाह्यंभौमग्निंव्यावर्त्तयति योयमिति देहान्तरारम्भकत्वंभूतंव्यवच्छिनत्ति येनेति जाठरात्मनापरःस्थितश्चेत्तस्यदेहाश्रितत्वंसिद्धमितिन पृथग्वक्तव्यमित्याशंक्यपुरुषविधंपुरुषेन्तःप्रतिष्ठितंवेदेतिश्रुतिमाश्रित्याह प्रविष्टइति परस्यजाठरात्मनोन्नपाकेसहकारिकारणमाह प्राणेति संयुक्तत्वंसंधुक्षितत्वं अन्नस्यचातुर्विध्यंप्रकटयति भोज्यमिति भोक्तरिवैश्वानरमिति दृष्टिर्भोज्येसोमदृष्टिरेवंभोक्तृभोज्यरूपंसर्वंजगदग्निसोमात्मनाभुक्तिकालेध्यायतोभोक्तुरन्नकृतोदोषोनेति प्रासंगिकंसफलंध्यानंदर्शयति भोक्तेति १४

स्वामिकृतटीका

किञ्च अहमिति वैश्वानरोजाठराग्निर्भूत्वाप्राणिनांदेहस्यान्तःप्रविश्यप्राणापानाभ्याञ्चतदुद्दीप्तकाभ्यांसहितःप्राणिभिर्भुक्तंभक्ष्यंभोज्यंलेह्यंचोष्यंचेति चतुर्विधमन्नंपचामि तत्रयद्दन्तैरवखड्यावखड्यभक्ष्यतेअपूपादितद्भक्ष्यंयत्तुकेवलंजिह्वयाविलोड्यनिगीर्यतेपायसादितद्भोज्यंयज्जिह्वायांनिःक्षिप्यरसास्वादेनक्रमशोनिगीर्यतेद्रवीभूतंगुड़ादितल्लेह्यंयत्तुदंष्ट्राभिर्निष्पीड्यरसांशंनिगीर्य्यावशिष्टंत्यजतेइक्षुदण्डादितच्चोष्यमितिचतुर्विधस्यभेदः १४ किञ्च सर्वस्येति सर्वस्यप्राणिजातस्यहृदिसम्यगन्तर्य्या

भाषाअनुवाद

औरमैंहींवैश्वानरनाम जठराग्निस्वरूपहोके प्राणियोंकीशरीरके मध्यमेप्रवेशकरके प्राणअपानवायुकेसाथहो जीवोंकाभुक्तजोभक्ष्यभोज्यलेह्यचोष्यचतुर्विधअन्न तिसकोपरिपाककरताहूं भक्ष्यवहहै जोदांतोंसेपीसकरखायाजाय दालभातचर्वनवगैरःऔरभोज्यजोजिह्वाकेदूसरेसेनिगलाजाय खीरहलुआआदि औरलेह्यवहहै द्रवरूपआस्वादनपूर्वकपानकियाजाय सहतदुग्धआदि औचोष्यकहे जोचूंसकरघूंटलियाजाय ऊखवगैरःयहचारप्रकारअन्नकीजानो १४

CC-0. In Public Domain. Digitized by eGangotri

सर्वस्यचाहंहृदिसन्निविष्टो मत्तःस्मृतिर्ज्ञानमपोहनञ्च वेदैश्चसर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेवचाहं १५

शाङ्करभाष्यं

सन्हृदिबुद्धौसन्निविष्ठोऽतोमत्तः आत्मनः सर्वप्राणिनांस्मृतिर्ज्ञानञ्चतदपोहनञ्चयेषांपुण्यकर्मिणाञ्चपुण्यकर्मानुरोधेन ज्ञानस्मृतीभवतस्तथापापकर्मिणांपापकर्मानुरूपेणस्मृतिज्ञानयोरपोहनञ्चअपोहनमपगमनञ्च वेदैश्चसर्वैरहमेवचपरमात्मावेद्योवेदितव्यः वेदान्तकृत्वेदान्तार्थसम्प्रदायकृदित्यर्थः वेदविद्वेदार्थविदेवचाहं १५

आनन्दगिरिकृतटीका

इतश्चसर्वात्मत्वेनसर्वव्यवहारास्पदत्वमीश्वरस्येत्याह किञ्चेति प्राणिजातंब्रह्मादिपुत्तिकान्तमात्मतयाबुद्धौसन्निविष्टत्वंतद्गुणदोषाणामशेषेणद्रष्टृत्वमतोबुद्धिमध्यस्थगुणदोषद्रष्टृत्वादिति यावत् मत्तःसर्वकर्माध्यक्षाज्जगद्यन्त्रसूत्रधारादित्यर्थः प्राणिनांस्मृतिज्ञानयोस्तदपायस्यचभगवदधीनत्वेभगवतोवैषम्यंस्यादित्यशंक्याह येषामिति स्मृतिर्जन्मान्तरादावनुभूतस्यपरामर्शःदेशकालस्वभावविप्रकृष्टस्यापिज्ञानमनुभवःधर्माधर्माभ्यांविचित्रकार्यंकुर्वतोनेश्वरस्यवैषम्यमिति भावः वेदवेद्यंपरंब्रह्मभगवतोन्यदिति शङ्कांवारयति वेदैरिति वेदात्मनांपौरुषेयत्वंपरिहरति वेदेति तदर्थसम्प्रदायप्रवर्त्तकत्वार्थं तदर्थयाथात्म्यज्ञानवत्वमाह वेदार्थेति १५

स्वामिकृतटीका

मिरूपेणप्रविष्टोऽहमतश्चमत्तएवहेतोःप्राणिमात्रस्यपूर्वानुभूतार्थविषयास्मृतिर्भवतिज्ञानञ्चविषयेन्द्रियसंयोगजंभवति अपोहनञ्चतयोःप्रमोषोभवतिवेदैश्चसर्वैस्तत्तदेवतारूपेणाहमेववेद्यःवेदान्तकृत् तत्सम्प्रदायप्रवर्त्तकोज्ञानदोगुरुरहमित्यर्थः वेदविदेवचवेदार्थविदप्यहमेव १५ इदानींतद्वाममपरमंममेति यदुक्तंस्वकीयसर्वोत्तमत्वं

भाषा अनुवाद

औरमैहीयावतप्राणीकेहृदयमे अन्तर्यामीरूपसेप्रवेशकरताहूं इसीसेसबप्राणीयोंकोपूर्वकृतअर्थविषयकास्मरणहोताहै औरइन्द्रियोंकेसंयोगसेजोरूपादिविषयोंकाज्ञानसोहमीसे होताहै औरअपोहनकहेस्मरण औविषयोंकाज्ञानइनदोनोकाअभावभीहमसेहीहोयहै और वेदोंमेकहेऊयेतौनतौनदेवतारूपमीहमहैं औरवेदान्तकृत्अर्थात् शिष्यप्रशिष्यरूपसे सम्प्रदायकेप्रवर्त्तककहेज्ञानदातागुरुस्वरूपभीमैहीं औवेदार्थवित्भीमैहींहूं १५ अबतद्वाममपरंममयहजोइसअध्याय

CC-0. In Public Domain. Digitized by eGangotri

द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच क्षरःसर्व्वाणिभूतानिकूटस्थोक्षरउच्यते १६

साङ्करभाष्यं

भगवतईश्वरस्यनारायणाख्यस्यविभूतिसंक्षेपउक्तोविशिष्टोपाधिकृतःयदादित्य गतंतेजइत्यादिनातथाधुनातस्यैवक्षराक्षरोपाधिप्रविभक्ततयानिरुपाधिकस्य केवल स्यस्वरूपनिर्दिधारयिषयोत्तरश्लोकाआरम्भन्तेतत्रसर्वमेवातीतानागतानन्तराध्यया र्थजातंत्रिधाराशीकृत्वाह द्वाविमाविति द्वौइमौपृथग्राशीकृतौपुरुषौइत्युच्येते लो केसंसारेक्षरश्चक्षरतीति क्षरःविनाश्येकोराशिरपरः पुरुषोऽक्षरस्तद्विपरीतोभ गवतोमायाशक्तिःक्षराख्यस्य पुरुषस्योत्पत्तिवीजमनेकसंसारिजन्तुकामकर्म्मादिसं स्काराश्रयोऽक्षरःपुरुषउच्यते कौतौपुरुषावित्याह स्वयमेवभगवान्क्षरंसर्व्वाणिभू तानिसमस्तंविकारजातमित्यर्थःकूटस्थःकूटोराशिरिवस्थितःअथवा कूटमायावञ्चना जिह्मंकूटिलतावेतिपर्य्यायाःअनेकमायावञ्चनादिप्रकारेणस्थितःकूटस्थः संसारवी जानन्तान्नक्षरतीत्यक्षरउच्यते १६ आभ्यांक्षराक्षराभ्यांविलक्षणः क्षराक्षरोपा

आनन्दगिरिकृतटीका

उत्तरश्लोकानांतात्पर्यंवक्तुंवृत्तंकीर्त्तयति भगवतइतिविशिष्टोपाधिरादित्यादिः संप्रत्यध्यायसमाप्तेरुत्तरसन्दर्भस्यतात्पर्यमाह अथेति नकेवलंनिरुपाधिकात्मस्वरू पंनिर्द्धारणायोत्तरग्रन्थःकिन्तुसर्व्वस्यैव गीताशास्त्रस्य अर्थनिर्णयार्थमित्याह तत्तेति क्षराक्षरोपाधिभ्यांपरमात्मनाचराशित्रयमुक्तेनसर्व्वात्मत्वेनाशुद्धादिदोषप्रसक्तावुक्तं द्वाविमौइति पुरुषोपाधित्वात्पुरुषत्वंनसाक्षादिति विवक्षित्वाह पुरुषाविति परपु रुषंव्यावर्त्तयति भगवतइति तत्रकार्यलिङ्गकमनुमानंसूचयति क्षराख्यस्येति मा याशक्तिविनाभोक्तॄणांकर्मादिसंस्कारादेवोक्तकार्योत्पत्तिरित्याशंक्य तस्यनिमित्तत्वे पिमायाशक्तिरुपादानमितिमत्वाह अनेकेति कामकर्मादीत्यादिशब्देनज्ञानंगृह्यते प्रकृतिंपुरुषंचैवेतिप्रकृतयोरिहग्रहणमिति शंकामाकांक्षद्वारानिवारयति कौतावि

भाषाअनुवाद

केसप्तमश्लोकमेकहा अपनासर्वोत्तमत्व सोतीनश्लोकसेदेखातेहैं किजोक्षरऔअक्ष रस्वरूपदुईपुरुषलोकमेप्रसिद्धहैंइनकाविशेष यहहै किब्रह्माआदिस्थावरपर्यन्त जोदेहधारीतिनकानामक्षरपुरष क्योंकिअविवेकियोंकोस्थूलशरीरमेपुरुषत्वप्रसिद्ध है औकूटस्थकहेशिलारासिपर्वतकेसमानदेहनाशभयेभीनिर्विकाररूपस्थितिकरै अैसाजोचैतन्यस्वरूपभोक्ताहै देखोविवेकीजनोकेविचारसेसोईअक्षरपुरुषहै १६

CC-0. In Public Domain. Digitized by eGangotri

उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः योलोकत्रयमाविश्यविभर्त्त्यव्ययईश्वरः १७

शाङ्करभाष्यं

धिद्वयदोषेणास्पृष्टोनित्यशुद्धबुद्धमुक्तस्वभावः उत्तमइति उत्तमःउत्कृष्टतमःपुरुषस्त्वन्यःअत्यन्तविलक्षणःआभ्यां परमात्मेति परमश्चासौदेहाद्यविद्याकृतात्मभ्यःअन्नमयादिभ्यःपञ्चकोशेभ्यःआत्माचसर्वभूतानांप्रत्यक्चेतनइत्यतःपरमात्मेत्युदाहृतः उक्तोवेदान्तेषु सएवविशिष्यते योलोकत्रयंभूर्भुवःस्वराख्यं स्वकीययाचैतन्यबलशक्त्या विश्यविभर्त्तिस्वरूपसङ्घातमात्रेण विभर्त्तिधारयत्यव्ययोनव्ययोविद्यतइत्यव्ययईश्वरः सर्वज्ञोनारायणाख्यईशनशीलःयथाव्याख्यातस्येश्वरस्यपुरुषोत्तमइत्येतन्नामप्रसिद्धं १७

आनन्दगिरिकृतटीका।

ति कूटशब्दार्थमुक्त्वातेनस्थितस्यकूटस्थतेतिसपिण्डितमर्थमाह अनेकेतितस्यकथमक्षरत्वंविनाब्रह्मज्ञानमनाशादित्याह संसारेति १६ कार्य्यकारणाख्यौराशीदर्शयित्वाराश्यान्तरंदर्शयति आभ्यामिति वैलक्षण्यफलमाह क्षरेति उपाधिद्वयकृतगुणदोषास्पर्शेफलितमाह नित्येतिआभ्यांक्षराक्षराभ्यामिति यावत् उत्तमोन्यइति पदद्वयं वस्तुतःसर्वार्थेक्षराक्षरात्मत्वाभावद्द्यर्थं जडवर्गस्यान्यत्वकृतंस्वातन्त्र्यं निरस्यति सएवेति लोकत्रयमित्युपलक्षणंसर्वं जगदभिविवक्षितञ्चैतन्यमेव बलंतत्र शक्तिर्मायातयेतियावत् जगद्भारणे परस्यव्यापारान्तरंवारयति स्वरूपेतिनचान्योधारयितास्वतोचलत्वादित्याह अव्ययइति संयुक्तमेतत्क्षरमक्षरञ्चव्यक्ताव्यक्तंभरते

स्वामिकृतटीका।

तत्दर्शयति द्वाविति बिभः क्षरश्चाक्षरश्चेति द्वाविमौपुरुषौलोकेप्रसिद्धौ तावेवाह तत्रक्षरःपुरुषोनामसर्वाणिभूतानिब्रह्मादिस्थावरान्तानिशरीराणिअविवेकिलोकस्य शरीरेष्वेवपुरुषत्वप्रसिद्धेः कूटोराशिःशिलाराशिःपर्वतइवदेहेषुनश्यत्स्वपिनिर्विकारतयातिष्ठतीति कूटस्थश्चेतनोभोक्तासत्वक्षरःपुरुषउच्यतेविवेकिभिः १६

भाषाअनुवाद

जिसहेतुक्षरऔअक्षरदोनोपुरुषलक्षितभयेहैं इससेजोउत्तमपुरुषसोइनदोनोसेभिन्नहै उसकीविलक्षणताकहतेहैं किसोपरमात्मास्वरूपहै यहश्रुतियोंमेकहा है औरआत्माअचेतनरूपक्षरसे तथापरमात्माअक्षररूपभोक्तासेभीभिन्नहैं अव उनकापरमात्मत्वदेखावतेहैं किसोईश्वरपदवाच्यनियन्ताऔअव्ययकहेनिर्विकार स्वरूपहोकेभीत्रैलोक्यकेहृदयमेप्रवेशकरि प्राणीमात्रकाप्रतिपालनकरतेहैं १७

CC-0. In Public Domain. Digitized by eGangotri

यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः अतोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः १८

शाङ्करभाष्यं

तस्यनामनिर्वचनप्रसिद्ध्यर्थत्वंनाम्नोदर्शयन्निरतिशयोऽहमीश्वरइत्यात्मानं दर्शयति भगवान्यस्मादिति यस्मात्क्षरमतीतोऽहं संसारमायाष्टत्तमतिक्रान्तोऽहमक्षरादपिसंसारवृक्षबीजभूतादपिचोत्तमउत्कृष्टतमऊर्ध्वतमोवा अतःक्षराक्षराभ्यामुक्तत्वादस्मिन्वामिलोकेवेदेचप्रथितः प्रख्यातःपुरुषोत्तमइत्येवंमांभक्तजनाविदुःकवयःकाव्यादिषुच पुरुषोत्तमइत्यनेनाभिज्ञानेनाभिगृणन्ति १८ अथेदानींयथानिरुक्तमात्मानंयोवेदतस्येदंफलमुच्यते योमामिति योमामीश्वरंयथोक्तविशेषणमेवं य

आनन्दगिरिकृतटीका

विश्वमीशइतिश्रुत्यर्थंगृहीत्वाह ईश्वरइतिकिञ्चलोकवेदयोर्भगवतोनामप्रसिद्ध्यासिद्धमप्रपञ्चत्वमित्याह यथेति १७ अश्वकर्णादिवदस्यनाम्नारूढत्वादर्थविशेषाभावाद्भगवतोपिलौकिकेश्वरवदीश्वरत्वंसातिशयमितिनेत्याह तस्येति यस्मादित्यस्यापेक्षितं निर्दिशति अतइति उत्तमःपुरुषइति वाक्यशेषः १८ आत्मनोऽप्रपञ्चत्वंज्ञानफलो

स्वामिकृतटीका।

यदर्थमेतौलक्षितौतदाह उत्तमइति एताभ्यां क्षराक्षराभ्यामन्योविलक्षणस्तूत्तमः पुरुषः वैलक्षण्यमेवाह परमश्चासावात्माचेतिउदाहृतउक्तःश्रुतिभिःआत्मत्वेन क्षरादचेतनाद्विलक्षणःपरमत्वेनाक्षराच्चभोक्तुर्विलक्षणइत्यर्थः परमात्मत्वमेवदर्शयति योलोकत्रयमिति यईश्वरईशनशीलः अव्ययश्चनिर्विकारएवसन्लोकत्रयहृदयमाविश्यविभर्त्तिपालयति १७ एवंभूतंपुरुषोत्तमत्वमात्मनोनामनिर्व्वचनेनदर्शयति यस्मादितियस्मात्क्षरंजडवर्गमतिक्रान्तोऽहंनित्यमुक्तत्वादक्षराच्चेतनवर्गादप्युत्तमश्चनियन्तृत्वादतोलोकेवेदेचपुरुषोत्तमइतिप्रथितःप्रख्यातोस्मि तथाचश्रुतिःसवाअयमात्मासर्व्वस्यवशीसर्व्वस्येशानःसर्वमिदंप्रशास्तीत्यादि १८ एवंभूतेश्वरज्ञातुःफलमाह

भाषा अनुवाद

एवम्भूतपुरुषोत्तमत्व अपना नामकहनेसेदेखावतेहैं किजिसहेतुहमक्षरजोजडसमूह तिनकोअतिक्रमणकरते औनियन्तारूपचेतनजोअक्षर उससेभीउत्तमहैं इससे सकललोकऔवेदमे हमपुरुषोत्तमनाममे प्रसिद्धहैं सोईश्रुतिकहतीहैं कि सोईजोपुरुषोत्तम वेआत्माऔतैंलोक्यकेवशकरनेवाले औतीनलोककेईश्वर सबके शासनकर्त्ताहैं यहभगवानने कहा १८ ऐसेईश्वरकाजाननेहारा ज्ञानीपुरुषके

CC-0. In Public Domain. Digitized by eGangotri

योमामेवमसम्मूढोजानातिपुरुषोत्तमं ससर्व्वविद्भजतिमांसर्वभावेनभारत १९

शाङ्करभाष्यम्।

योक्तेनप्रकारेणासंमूढःसंमोहवर्जितःसन्जानात्ययमहमस्मीति पुरुषोत्तमं ससर्व वित्सर्वात्मनासर्वंवेत्तीतिसर्वज्ञः सर्वभूतस्थं भजति मांसर्व्व भावेन सर्वात्मचिन्तया हेभारत १९ अस्मिन्नध्याये भगवत्तत्वज्ञानंमोक्षफलमुक्ताऽथेदानींतत्स्तौति इतिगुह्यतममिति इत्येतत्गुह्यतमंगोप्यतमंअत्यन्तंरहस्यमित्येतत्किन्तच्छास्त्रं य द्यपिगीताख्यंसमस्तं शास्त्रमुच्यतेतथाप्ययमेवाध्यायःइहशास्त्रमित्युच्यतेस्तुत्यर्थं प्रक रणात्सर्वोहिगीताशास्त्रार्थोस्मिन्नध्यायेसमासेनोक्तेर्नकेवलंसर्वश्चवेदार्थइह परिस माप्तोयस्तंवेदसवेदवित्वेदैश्चसर्वैरहमेववेद्यइति चोक्तमिदमुक्तं कथितंमया हेअ नघएतच्छास्त्रंयथादर्शितार्थंबुद्ध्वाबुद्धिमान्स्याद्भवेत्नान्यथाकृतकृत्यश्चभारत कृतंकृत्यं कर्त्तव्यंयेनसकृतकृत्यःविशिष्टजन्मप्रसूतेनब्राह्मणेनयत्कर्त्तव्यंतत्सर्वंभगवत्तत्त्वेविदि तेकृतंभवे दित्यर्थः नचान्यथाकर्तव्यंपरिसमाप्यतेकस्यचिदित्यभिप्रायः सर्वं कर्माखि लंपार्थज्ञानेपरिसमाप्यते इतिचोक्तं एतद्विजन्मसामर्थ्यंब्राह्मणस्यविशेषतः प्राप्यैतत् कृतकृत्योहिद्विजोभवतिनान्यथा इतिच मानवंवचनं यतएतत्परमार्थतत्त्वमतःश्रुत वानसि अतः कृतार्थस्त्वंभारतेति २० इति शाङ्करभाष्येपञ्चदशोध्यायः १५

आनन्दगिरिकृतटीका।

त्यास्तौति अथेति यथोक्तविशेषणंसर्वात्मत्वादिविशेषणोपेतमिति यावत् क्षराक्षरा तीतत्वं यथोक्तप्रकारःसंमोहवर्जितःसंमोहेनदेहादिष्वात्मात्मीयत्वबुद्ध्यारहितइत्यर्थः भगवन्तंजानतःसर्वविक्त्वंतस्यैवसर्वात्मनामेयत्वादित्याह ससर्वविदिति सर्वात्मनिमय्ये वासक्तचित्तेनेत्यर्थः १९ अध्यायार्थमनूद्योपसंहारश्लोकमवतारयति अस्मिन्निति सर्वस्यांगीतायांशास्त्रशब्देवक्तव्येकथमस्मिन्नध्यायेतत्प्रयोगःस्यादित्याशंक्याह यद्यपी

स्वामिकृतटीका

यइति एवंनियुक्तप्रकारेणासम्मूढोनिश्चितमतिःसन्योमांपुरुषोत्तमंजानाति ससर्व भावेनसर्व्वप्रकारेणमामेवभजति ततश्चसर्वज्ञोभवति १९ अध्यायार्थमुपसंहरति

भाषाअनुवाद

ज्ञानकाफलकहतेहैं किहेभारतअर्जुन इसतरहपूर्वोक्तनिश्चितप्रकारसेअसंमूढक हेनिश्चितमतिहोकेजोपुरुषोत्तमस्वरूपहमकोजानिशकैहै सोईमनुष्यसम्यकप्रका रसेहमकोभजैहै तिसके अनन्तरसर्वज्ञहोताहै ह्यजानो १९ अब अध्यायकेअर्थ

CC-0. In Public Domain. Digitized by eGangotri

इतिगुह्यतमंशास्त्रमिदमुक्तंमयाऽनघ एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत २०

इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांभीष्मपर्वणि श्रीमगवद्गीतासूपनिषत्सुयोगशास्त्रेश्रीकृष्णार्जुनसम्वादेपुरुषोत्तमयोगोनामपञ्चदशोध्यायः१५

आनन्दगिरिकृतटीका

ति सन्निहितमध्यायंस्तोतुमपिकृत्स्नवशास्त्रशब्दस्तदर्थाभावात्तत्वाह सर्वोहीति गीताशास्त्रार्थस्यसर्वस्यात्रसंक्षिप्तत्वादेवकेवलंशास्त्रशब्दोनभवतिकिन्तुवेदार्थस्यापि सर्वस्यात्रसमाप्तेर्युक्तंशास्त्रपदमित्याह नेति तत्रगमकमाह यस्मिति भगवत्तत्वज्ञानेकृतकृत्यतेत्येतदुपपादयति विशिष्टेति नान्यथेत्युक्तंप्रपञ्चयति नचेति सत्यपितत्त्वज्ञानेकर्मणांकर्त्तव्यत्वान्नकर्तव्यसमाप्तिरित्याशंक्याह सर्वमिति तत्वज्ञानेकृतार्थतेति तत्रमनोरपिसम्मतिमाह एतद्धीति भारतेतिसम्बोधनतात्पर्य्यमाह यतइति तदनेनात्मनादेहाद्यतिरिक्तत्वंचिद्रूपत्वंसर्वात्मत्वंकार्यकारणविनिर्मुक्तत्वेनाप्रपञ्चत्वंतस्याखण्डैकरसत्वज्ञातत्वज्ञानादशेषपुरुषार्थपरिसमाप्तिरित्युक्तं २० इतिसमाप्तं

स्वामिकृतटीका

इतीति इत्यनेनसंक्षेपप्रकारेणगुह्यतममतिरहस्यंसंपूर्णंशास्त्रमेवमयोक्तंनतु पुनर्विंशतिश्लोकमध्यायमात्रंहेअनघ व्यसनशून्य अतएवैतन्मदुक्तंबुद्ध्वाबुद्धिमान्सम्यक्ज्ञानीस्यात्कृतकृत्यश्चस्यात्योऽपिकोपिहेभारत त्वंकृतकृत्योऽसीति किंवक्तव्यमिति भावः संसारशाखिनंभित्त्वास्पष्टंपञ्चदशेविभुः पुरुषोत्तमयोगाख्ये परंपदमुपादिशत् २० इति श्रीधरस्वामिकृतटीकायां पञ्चदशोऽध्यायः १५

भाषाअनुवाद

काउपसंहारकरतेहैं किहेअनघनिःपापअर्जुन यहसंक्षेपसे अतिरहस्यस्वरूपजो संपूर्णशास्त्रोंकासारांशसोमैनेकहाकेवलवीसश्लोकयुक्तएकअध्यायछोडकेइससेजो कोईहोययहमेरीकहीवाक्यकोवोधकरिके बुद्धिमानकहावताऔज्ञानीहोचरितार्थकृतार्थहोताहै तोहेभरवंशीअर्जुन तुमजोचरितार्थहोउगेइसमेंऔरकुछकहनावाकीहै सर्वत्वपरिपूर्णपरमात्मारूप श्रीकृष्णजीसंसारवृक्षकोभिन्नकरके पुरुषोत्तमयोगनाम इसपंद्रहेंअध्यायमें अपनापरमपद अर्जुनको उपदेशकियाहै २०

इति श्रीजगन्नाथसुकृतविरचितमनभावनीटीकायां पञ्चदशोध्यायः १५

CC-0. In Public Domain. Digitized by eGangotri

षोडशअध्यायः

श्रीभगवानुवाच अभयंसत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानंदमश्चयज्ञश्च स्वाध्यायस्तपआर्जवं १

शाङ्करभाष्यं

दैव्यासुरी राक्षसीचेति प्राणिनां प्रकृतयोनवमेध्यायेसूचितास्तासां विस्तारप्रदर्शनायाभयं सत्त्वसंशुद्धिरित्यादिरध्यायआरभ्यते तत्रसंसारमोक्षायदैवीप्रकृतिर्निबन्धनायासुरीराक्षसीचेति दैव्यादानायप्रदर्शनंक्रियते इतरयोःपरिवर्जनायश्रीभगवानुवाच अभयमिति अभयमभीरुतासत्त्वसंशुद्धिः सत्त्वस्यान्तःकरणस्यसंव्यवहारेषुपरवञ्चनमायानृतादिपरिवर्जनंशुद्धभावेनव्यवहारइत्यर्थः ज्ञानयोगव्यवस्थितिः ज्ञानं शास्त्रतआचार्यतश्चात्मादिपदार्थानामवगमोऽवगतानामिन्द्रियाद्युपसंहारेणैकाग्रतया स्वात्मसम्बेद्यतापादनं योगस्तयोर्ज्ञानयोगयोर्व्यवस्थितिः व्यवस्थानं तन्निष्ठता एषाप्रधानादैवीसात्विकीसंपत्यत्रचयेषामधिकृतानां याप्रकृतिः सम्भवति सात्त्विकीसोच्यते दानंयथाशक्तिसम्बिभागोन्नादीनांदमश्चबाह्यकरणानांउपशमो

भाषाअनुवाद

अबइसअध्यायका तात्पर्यकहतेहैं किआसुरीसम्पत्त्यागकरकेदैवीसम्पत्के आश्रयलेनेवालेमनुष्यमुक्तहोतेहैं इसीकीनिर्णयकरनेकेअर्थ सोरहे अध्यायमेउसकाविस्तारकरतेहैं किहेअर्जुन सकलशास्त्रकेअनुरूपमेरेकहेऊये इसदृष्टान्तकेजाननेसे लोगसम्यकज्ञानीऔकृतार्थहोतेहैं यहभगवाननेपन्द्रहे अध्यायकेअन्तमेकहाहै तोकौनमनुष्यबहतत्त्वसमझसकतेहैं औरकौननहोंइसअपेक्षापरतत्त्वज्ञानकेअधिकारी औअनधिकारीकी निर्णयकरनेकेलियेसोरहे अध्यायकाआरम्भहोताहै क्योंकिजिसमेजिसकाअधिकारहै वहउसीसेपूरापरताहै इससेअबतत्त्वकेअधिकारीपुरुषकागुणस्वरूपसम्पूर्ण औदैवीसंपतकोइसश्लोकसेलेतीनश्लोकमेकहते हैं किअभयऔसत्त्वसंशुद्धिकहेबुद्धिकीप्रसन्नताऔज्ञानयोगजोआत्मज्ञानकीउपायमेव्यवस्थितिकहेपरिनिष्ठाऔदानकहे अपनेभोजनकोवस्तुअन्नआदिकाभीयथाउचितदेनातथादमअर्थात्बाह्यइन्द्रियोंकासंयमकरना औयज्ञकहे यथाविधिसेदर्शपौर्णमासआदियागकरना औस्वाध्यायकहेब्रह्मयज्ञ औतपजोसबहें अध्यायकेचौदहे श्लोकमेकहें गे देवद्विजगुरुपण्डितज्ञानीकापूजन तथाशौचसीधापनकोमलाताब्रह्मचर्यअहिंसा इनकोशारीरतपकहतेहैं सोऔआर्यवकहे सीधास्वभाव १

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ऽन्तःकरणस्योपशमंशान्तिंवक्ष्यति यज्ञश्चयोतोऽग्निहोत्रादिःस्मार्त्तश्चदेवयज्ञादिः स्वाध्यायऋग्वेदाद्यध्ययनमदृष्टार्थं तपोवक्ष्यमाणंशारीरादिआर्जवम्ऋजुत्वंसर्वदा १

किञ्च अहिंसेति अहिंसाअहिंसनंप्राणिनांपीडावर्ज्जनं सत्यमप्रियंनृतवर्ज

आनन्दगिरिकृतटीका

व्यवहितेनसम्बन्धंवदन्नध्यायान्तरमवतारयति दैवीति दैवीसूचितारात्रसीमासु रीश्चैवप्रकृतिंमोहिनीमित्यादाविति शेषः प्रकृतीनांविस्तरेणदर्शनंकुत्रोपयोगीत्याशं क्यविभजेत्रोपयोगमाहसंसारेति अतीतेचाध्यायेकर्म्मानुबन्धीन्यधश्चमूलान्यनुसन्तता नीत्यत्रकर्मबंध्यावासनाःसंसारस्यावान्तरमूलत्वेनोक्तास्तामनुष्यदेहेप्राग्भावीयक र्म्मानुसारेणाव्यज्यमानाःसात्त्विकादिभेदेन दैव्यादिप्रकृतित्रयत्वेनविभक्ताआविस्ति तीर्षुर्भगवानुक्तवानित्याह भगवानिति अभीरुताशास्त्रोपदिष्टेर्थेसन्देहंहित्वानुष्ठान निष्ठत्वं परवञ्चनापरस्यव्याजेनवशीकरणंमायाहृदयेन्यथाकृत्वावहिरन्यथाव्यवहर णंअनृतमयथादृष्टं कथनमादिपदेनविप्रलम्भविभ्रमादिग्रहः उक्तमर्थंसंक्षिप्याह शु द्धेति एषेत्यभयाद्यज्ञानादिस्थित्यन्तानिर्देशोक्तेतियावत् तामेवसात्त्विकींप्रकृतिंप्रकट यति यत्नेति ज्ञानेकर्मणिवाधिकृतानामभीरुताद्यायाप्रकृतिः सातेषान्तत्रसात्त्विकीस म्पदित्यर्थः महाभाग्यानामत्युत्तमादैवीसम्पदुक्तासम्प्रतिसर्वेषांयथासम्भवंसम्पदंव्य नक्ति दानमिति वाह्यकरणविशेषणेकारणमाह अन्तःकरणस्येति देवयज्ञादि रित्यादिशब्देनपितृयज्ञोभूतयज्ञोमनुष्ययज्ञश्चेति त्रयमुक्तं १ ब्रह्मयज्ञस्यस्वाध्याये

स्वामिकृतटीका ।

आसुरींसम्पदंत्यक्त्वादैवीमेवाश्रितानराः मुच्यन्तइतिनिर्णेतुं तद्विवेकोऽयषोडशेपू र्वाध्यायान्तेरतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारतेत्युक्तंतत्रकएतत्तत्त्वंबुध्यतेकोवान बुध्यतइत्यपेक्षायां तत्त्वज्ञानेऽधिकारिणोऽनधिकारिणश्चविवेकार्थंषोडशाध्यायस्यार म्भःनिरूपिते हिकार्य्यार्थेचाधिकारिजिज्ञासाभवति तदुक्तंभट्टैःभारोयोयेनवोढव्यः सप्रागान्दोलितोयदा तदाकस्तस्यवोढेति शक्यंकर्त्तुंनिरूपणमिति तत्राधिकारि विशेषणभूतांदैवींसम्पदमाह अभयमिति त्रिभिः अभयंभयाभावःसत्त्वस्यचित्तस्य संशुद्धिःसुप्रसन्नताज्ञानयोगेआत्मज्ञानोपायेव्यवस्थितिःपरिनिष्ठा दानंस्वभोज्यस्या न्नादेर्यथोचितसम्विभागः दमोवाह्येन्द्रियसंयमः यज्ञोयथाधिकारंदर्शपौर्णमासा दिस्वाध्यायोब्रह्मयज्ञादिः तपउत्तराध्यायेवक्ष्यमाणं शारीरादि आर्जवमवक्रता १

CC-0. In Public Domain. Digitized by eGangotri

अहिंसा सत्यमक्रोधस्त्यागःशान्तिरपैशुनं दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं २

शाङ्करभाष्यं ।

नं यथाभूतार्थवचनं अक्रोधः परैराक्रुष्टस्याभिहतस्यवाप्राप्तस्यक्रोधस्योपशमनं त्याग:संन्यास:पूर्ववदानस्योक्तत्वात् शान्तिरन्तःकरणस्योपशमः अपैशुनमपिशुनताप रस्यैपरस्यान्यप्रकटीकरणंपैशुनन्तदभावोऽपैशुनं दयाभूतेषुदुःखितेषु अलोलुप्तमिन्द्रियाणांविषयसन्निधावविक्रिया मार्दवंम्रदुता अक्रौर्यं ह्रीर्लज्जा अचापलमसतिप्रयोजने वाक्पाणिपादादीनामव्यापारयित्वं २

किञ्च तेजइति तेजःप्रागल्भ्यंनत्वक्गतादीप्तिः क्षमाआक्रुष्टस्यताडितस्यवान्तर्विक्रियानुत्पत्तिः उत्पन्नायांविक्रियायांप्रशमनअक्रोधःइत्यवोचामइत्यंक्षमायाअक्रोधस्यच विशेषःधृतिर्देहेन्द्रियेष्ववसादं प्राप्तेषुतस्यप्रतिषेधकोन्तःकरणवृत्तिविशेषोयेनोक्तम्भितानिकरणानिदेहश्चनावसीदन्ति शौचंद्विविधंमृज्जलाभ्यांकृतवाह्यमाध्यन्तरञ्चमनोबुद्धेर्निर्मल्यंमायारागादिकालुष्याभावः एवंद्विविधंशौचं अद्रोहःपरजिघांसाभा

आनन्दगिरिकृतटीका ।

नपृथक्करणाद्दैवीं सम्पदमभिजातस्यविशेषणान्तराणि दर्शयति किञ्चेति त्याग शब्देनयागदानंकस्मान्नोच्यतेतत्राह पूर्वमिमि लज्जाकार्यनिवृत्तिहेतुगर्हानिमित्तामनोवृत्तिः २ दैवीमम्पदंप्राप्तस्यविशेषणान्तराण्यपिसन्तीत्याह किञ्चेति व्या

स्वामिकृतटीका

किञ्च अहिंसेति अहिंसापरपीडावर्जनं सत्ययथादृष्टार्थभाषणं अक्रोधस्ताडित स्यापिचित्तेक्रोधानुत्पत्तिः त्यागऔदार्यं शान्तिश्चित्तोपरतिः पैशुनंपरोक्षेपरदोषप्रकाशनं तद्वर्जनमपैशुनं भूतेषुदीनेषुदया अलोलुपत्वंलोभाभावः अवर्णलोपस्त्वार्षः मार्दवंम्रदुत्वं अक्रूरता ह्रीरकार्यप्रवृत्तौलोकलज्जा अचापलंव्यर्थक्रियाराहित्यं २

भाषाअनुवाद

अहिंसाकहे परपीड़ाकात्याग औसत्यअर्थात्देखासुनाज्योंकात्योंकहना औअक्रोध कहे कोईमारैयाकुवाच्यकहैं तौभीचित्तक्रोधवशनहोनेदेनातथात्यागकहे प्रियअप्रियमेंउदासीनता औशान्तिअर्थात्विषयोंमेंचित्तकीनिवृत्ति औअपैशुन्यकहे परनिन्दावर्जन पीठिपीछेनिन्दाकरनेकोपैशुन्यकहतेहैं औदीनदरिद्रपरदया तथाअलोलुपत्वकहे निर्लोभता औमार्दवकोमलता औह्रीकहे कुकर्मकरनेमेंलोकलाजता याअचापलअर्थात् वृथाबोलना या वृथाकुछकरना जोचञ्चलताई सोनहोय २

CC-0. In Public Domain. Digitized by eGangotri

तेजःक्षमाधृतिःशौचमद्रोहोनातिमानिता भवन्तिसम्पदंदैवीमभिजातस्यभारत ३

शाङ्करभाष्य

योऽहिंसनंनातिमानितात्यर्थंमानोतिमानःसयस्यविद्यते सोतिमानी तद्भावोऽतिमा
निताआत्मनःपूज्यतातिशयभावनाभावइत्यर्थःभवन्त्यभयादीन्येतदन्तानि सम्पदमभि
जातस्यकिंविशिष्टांसम्पदंदैवीं देवानांसम्पदं तामभिलक्ष्यजातस्यदैवीविभूत्यर्हस्यभा
विकल्याणस्येत्यर्थोहेभारत ३ अथेदानीमासुरीसम्पदुच्यते दम्भोधर्मध्वजित्वंदर्पो
धनस्वजनादिनिमित्तउत्सेकोऽभिमानःपूर्वोक्तःक्रोधश्चपारुष्यमेव परुषवचनं यथा
काणश्चक्षुस्मान्निरूपंरूपवान्हेनाभिजनमुक्तमाभिजनइत्यादि अज्ञानञ्चाविवे क
ज्ञानंमित्यग्राह्यानंकर्तव्याकर्तव्यादिमित्थाप्रत्ययविषयंअभिजातस्यपार्थ किमभिजा
स्येत्याह असुराणांसम्पदासुरीतामभिजातस्येत्यर्थः ४ अनयोःसम्पदोःकार्यमुच्यते

आनन्दगिरिकृतटीका

वर्त्तंएकोर्त्तयति नेति अध्यात्माधिकारादितिशेषः क्षमाक्रोधयोरेकार्थत्वेनपौनरु
क्त्यमाशंक्य परिहरति उत्पन्नायामिति तयोरेवविशेषान्न पौनरुक्त्यं फलतीत्याह
इत्थमिति वृत्तिविशेषमेवविशदयति येनेति शौचस्य द्वैविध्यमेवप्रकटयति मृज्जले
त्यादिना नैर्मल्यमेवस्फोरयति मायेति उक्तमुपसंहरति एवमिति अतिमानित्वभा
वमेवव्यनक्ति आत्मनइति कस्यैतानिविशेषणानीत्यपेक्षायामाह भवन्तीति साधकस्य
मनुष्यदेहस्यस्यैवकथंदैवींसम्पदमभिलक्ष्य जातत्वमित्याशंक्याह दैवीमिति ३

स्वामिकृतटीका

किञ्च तेजइति तेजःप्रागल्भ्यंक्षमापरिभवादिषूत्पद्यमानेषुक्रोधप्रतिबन्धःधृतिर्दुः
खादिभिरवसादेचित्तस्यस्थिरीकरणं शौचंबाह्याभ्यन्तरशुद्धिः अद्रोहोजिघांसारा
हित्यं अतिमानिताआत्मन्यति पूज्यत्वाभिमानस्तद्भावोनातिमानिता एतान्यभया
दीनिषडविंशतिप्रकाराणि दैवीसम्पदमभिजातस्यभवन्ति देवयोग्यांसात्त्विकींसम्प
दमभिलक्ष्य तदाभिमुख्येनजातस्यभाविकल्याणस्यपुंसो भवन्तीत्यर्थः ३

भाषाअनुवाद

और तेजकहे ढिठाई औक्षमा औधृतिकहे हानितथादुखमेधीरजरखना औशौ
चअर्थात्बाहिरभीतर शुद्धताअद्रोहकहेहिंसा ईर्षारहितहोना अतिमानिताकहे
अपनीपूजामानप्रशंसाकाअभाव येईअभयआदि जोछबीसप्रकारको देवीसम्पत्हैं
सोउसीकोहोतीहैं जिसकोकल्याणभावी है अर्थात् आगेभलाहोनहारहै ३

CC-0. In Public Domain. Digitized by eGangotri

दम्भोदर्पोऽभिमानश्चक्रोधःपारुष्यमेवच अज्ञानंचाभिजातस्यपार्थसम्पदमासुरीं४

शाङ्करभाष्यं

दैवीति दैवीसम्पत्या साविमोक्षायसंसारबन्धनात् निबन्धायनियतेबन्धोनिबन्धस्त दर्थमासुरीसम्पन्मताभिप्रेता तथाराक्षसीतवैवमुक्तेसत्यर्जुनस्यान्तर्गतंभावं किमह मासुरसम्पत्युक्तःकिम्वादैवीसंपत्युक्त इत्येवमालोचनारूपमालक्ष्याह भगवान् माशुचःशोकंमाकार्षीः सम्पदंदैवीमभिजातोसि हेपाण्डव अभिलक्ष्यजातोसि भाविकल्याणस्त्वमसीत्यर्थः ५

आनन्दगिरिकृतटीका

आदेयत्वेन दैवींसम्पदमुक्त्वा हेयत्वेनासुरींसम्पदमाह अथेति उत्सेकोमदो महदवधीरणेहेतुः आत्मन्युत्कृष्टत्वाध्यारोपोतिमानःक्रोधस्तुकोपापरपर्य्यायः स्वप रापकारप्रकृतिहेतुर्नेत्रादिविकारलिङ्गोन्तःकरणवृत्तिविशेषः परुषोनिष्ठुरः प्रत्यक्ष रूक्षवाक्तस्यभावःपारुष्यन्तदुदाहरति यथेति तामभिजातस्यदम्भादीन्यज्ञानान्तानि भवन्ति इत्यनुषज्यते ४ अनयोरिति कार्यफलविभागः आसुरीत्युपलक्षणं राक्षसी चेतिद्रष्टव्यमित्याह तथेति फलविभागेसम्पदोरेवमुक्ते प्रतीत्यार्जुनस्याभिप्रायं भग वतोवचनमित्याह तवेति तवाभिजात्यंहेतुंकरोति पाण्डवेति ५

स्वामिकृतटीका

आसुरींसम्पदमाह दम्भइति दम्भोधर्मध्वजित्वं दर्पोधनविद्यादिनिमित्त चित्त स्यौत्सुक्यं अभिमानोव्याख्यातएव क्रोधःप्रसिद्धः पारुष्यं निष्ठुरत्वं अज्ञानमविवेकः आसुरीमित्युपलक्षणं असुराणांराक्षसानाञ्च यासम्पत्तिस्तामभिलक्ष्य जातस्यैतानि दम्भादीनिभवन्ति ४ एतयोःसम्पदोःकार्य्यंदर्शयन्नाह दैवीति दैवीयासम्पत्तियायुक्तो मयोपदिष्टेतत्त्वज्ञानेऽधिकारीआसुर्यासम्पदायुक्तस्तुनित्यं संसारीत्यर्थःएतच्छ्रुत्वा

भाषा अनुवाद

अबआसुरीसम्पत्कहते हैं किदम्भकहे लोगोंकेसामने अपनी धार्म्मिकता प्रकाशकेहेतु मनभावतेकल्पितधर्मोंकी ध्वजादेखलाना औदर्पकहेधनउपार्जन त थाविद्याआदिमे चित्तकीउत्साहकहेउंचाई औअभिमानकहेअपनेहरतहरकेम हत्त्वसेदूसरेकोन कुछसमझना औक्रोधतथापारुष्यकठोरता निठरता औअज्ञान कहे अविवेक ये आसुरीकहेअसुरराक्षसोंकी जोसंपत् दूनमेरुचिजिनकेहै वै असुरराक्षसहैं ४ अबदूनदोनोंसंपदोंकेकाजआचारदेखावतेऊयेकहतेहैं कि

CC-0. In Public Domain. Digitized by eGangotri

दैवीसंपद्विमोक्षायनिबन्धायासुरीमता मासुचःसम्पदंदैवीमभिजातोसिपाण्डव ५

शाङ्करभाष्यं ।

द्वौभूतेति द्वौद्विःसंख्याकौभूतसर्गौ भूतानांमनुष्याणांसर्गोसृष्टिर्भूतसर्गौ सृजेते इतिसर्गौ भूतान्येवसृज्यमानानिदैवासुरसम्पद्युक्तानि द्वौभूतसर्गावित्युच्येते द्वयाह्य प्रजापत्यादेवाश्चासुराश्चेतिश्रुतेः लोकेस्मिन्संसारेइत्यर्थः सर्वेषांद्वैविध्योपपत्तेःकौ तौभूतसर्गौ इत्युच्येते प्रकृतावेवदैवआसुरएवच उक्तयोरेवपुनरनुवादप्रयोजनमा ह दैवोभूतसर्गोऽभयंसत्त्वसंशुद्धिरित्यादिना विस्तरशोविस्तरप्रकारैःप्रोक्तः कथि तोनत्वासुरोविस्तरशोऽतस्तत्परिवर्जनार्थमासुरं पार्थमे ममवचनादुच्यमानंविस्तर शः शृणु अवधारय ६ अध्यायपरिसमाप्तेरासुरीसम्पत् प्राणिविशेषणत्वेन

आनन्दगिरिकृतटीका

निर्हयानांरज्जसांसम्पत्तृतीयास्ति साकस्मान्नोक्तेत्याशंक्यासुर्यामन्तर्भावादित्या ह द्वाविति भूतानांद्वैविध्येमानत्वेनोक्तीयब्राह्मणमुदाहरति द्वयाहेति सम्पत्द्वय युतेभ्योतिरिक्तानामपि प्राणिभेदानांसम्भवात् कुतोभूतानांद्वित्वनियतिरित्याशंक्या ह सर्वेषामिति ६ नन्वध्यायशेषेणासुरीसम्पद्वर्णनमयुक्तं तस्यास्त्याजयत्वेनप

स्वामिकृतटीका

किमहमत्राधिकारीनवेतिसन्देहाद्व्याकुलमर्जुनमाश्वासयति हेभारत माशुचः शोकंमाकार्षीः यतस्त्वंदैवींसम्पदमभिजातोऽसि ५

असुरीसम्पत्सर्वात्मनात्यजयितव्येत्येतदर्थमासुरींसम्पदं प्रपञ्चयितुमाह द्वा विति द्वौद्विःप्रकारौभूतानांसर्गौमेवचनाच्छृणु आसुरराक्षसप्रकृत्योरेकीकरणे नद्वावित्युक्तं अतोराक्षसीमासुरीञ्चैवप्रकृतिंमोहनींश्रिता इत्यादिना नवमाध्यायो क्तप्रकृतिवैविध्येनाविरोधः स्पष्टमन्यत् ६ आसुरींविस्तरशोनिरूपयति प्रवृत्ति

भाषाअनुवाद

दैवीसंपदसेयुक्तमनुष्यही मेरेकहेतत्त्वज्ञानके अधिकारीहैं औरजोमनुष्य आसुरी संपदसेयुक्तहैं तेसदाही संसारीहोतेहैं अवयेवचनभगवानके श्रवणकरके मैतत्त्व ज्ञानका अधिकारी हौंकिनहीं इससन्देहसेव्यग्रचित्तअर्जुनको समझावतें ऊयेभ गवानकहतेहैं कि हेपरन्तप तुमशोचनकरो क्योंकि तुमदैवीसम्पदकेअभिमुख जन्मेहो औरदैवीसम्पदसंयुक्तहो यहतुमारे आचरणोंसे प्रसिद्धहैदेखपडै ५

द्वौभूतसर्गौलोकेऽस्मिन्दैव आसुरएवच दैवोविस्तरशःप्रोक्तआसुरंपार्थमेशृणु ६
प्रवृत्तिञ्चनिवृत्तिञ्चजनानविदुरासुराः नशौचंनापिचाचारोनसत्यंतेषुविद्यते ७

शाङ्करभाष्यं ।

प्रदर्श्यते प्रत्यक्षीकरणेनचशक्यते अस्याःपरिवर्जनंकर्त्तुमिति प्रवृत्तिमिति प्रवृत्तिञ्च प्रवर्त्तनं यस्मिन्पुरुषार्थसाधनेकर्त्तव्येप्रवृत्तिस्तांनिवृत्तिञ्च तद्विपरीतां यस्मादनर्थ हेतोर्निवर्त्तितव्यं सानिवृत्तिस्ताञ्चजनाआसुरानविदुःनजानन्ति नकेवलंप्रवृत्तिनि वृत्तीएवनविदुर्नशौचंनापिचाचारोनसत्यन्तेषु विद्यतअशौचानाचारमायाविनोऽनृत वादिनोह्यासुराः ७ किञ्च असत्येति असत्यं यथावयमनृतप्रायास्तथेदंजगत्

आनन्दगिरिकृतटीका

ङ्कप्रक्षालनन्यायावतारादित्याशंक्याह प्रत्यक्षीकरणेनेति वर्जनीयामासुरींसम्पदंवि वृणोति प्रवृत्तिञ्चेति तांविहितांप्रवृत्तिंनजानन्तीत्यर्थः ताञ्चनिषिद्धांक्रियांनजान न्तीतिसम्बन्धः नशौचमित्यादेस्तात्पर्य्यमाह अनाचारेति शौचसत्ययोराचारा न्तर्भावेपि ब्राह्मणपरिव्राजकन्यायेन पृथक्उपादानं ७

स्वामिकृतटीका ।

ञ्चेत्यादिद्वादशभिः धर्मेप्रवृत्तिमधर्मान्निवृत्तिञ्चासुरस्वभावा जना नजानन्ति अ तःशौचमाचारः सत्यञ्चतेषु नास्तिएव ७ ननुवेदोक्तयोर्द्धर्माधर्मयोःप्रवृत्तिंनिवृ

भाषाअनुवाद

आसुरीसम्पद अच्छीप्रकारसे वर्जनकरनाङ्गीकर्त्तव्यहै इससेआसुरीसम्पद कोविस्तारकरिकहतेहैं किजोदोप्रकारकी भूतोंकीसृष्टिहै सोमेरेमुखसेश्रवण करो इसजगहअसुरराक्षससम्बन्धी दोनोप्रकृतिकीएकताकरके दैवप्रकृतिकेसाथ दोनोंमतकहाहै इससे नवयेंअध्यायके बारहे'श्लोकमे आसुरींराक्षसींचैवइत्या दिविविधप्रकृतिकेसाथ विरोधनहींहै हेअर्जुन इसलोकमे देवऔरअसुरसम्पदसे युक्त जोदोप्रकारभूतोंकीसृष्टि तिसकेमध्य दैवीसम्पदयुक्तसृष्टि मैने पूर्वविस्तार सेकहाहै अबआसुरीसंपदसेयुक्त जोसृष्टि सोहमसे सुनो ६ आसुरीसंपदइस श्लोकसेले बारहश्लोकतक दयाकरि निरूपणकरतेहैं किअसुरस्वभाववालेमनुष्य सकलधर्ममे प्रवृत्ति औअधर्मसेनिवृत्तिकैसोहोतीहै सोजानतेहीनहीं इसीसेइन लोगोंमे शौचआचार औसत्यताका लेशमात्रभी नहींरहताहै यहजानो ७

CC-0. In Public Domain. Digitized by eGangotri

असत्यमप्रतिष्ठन्तेजगदाहुरनीश्वरं अपरस्परसम्भूतंकिमन्यत्कामहेतुकं ८

शाङ्करभाष्यं

सर्वंअसत्यमप्रतिष्ठञ्च नास्त्यधर्माधर्मौप्रतिष्ठातोऽप्रतिष्ठञ्चेति तेआसुराजनाजगदाहुरनीश्वरंनचधर्माधर्मसव्यपेक्षकोस्यशासितेश्वरोविद्यतइति अतोऽनीश्वरंजगदाहुः किञ्चअपरस्परसम्भूतंकामप्रयुक्तयोःस्त्रीपुरुषयोरन्योन्यसंयोगात्जगत्सर्वंसम्भूतं किमन्यत्कामहेतुकंकामहेतुकमेव कामहेतुकमन्यज्जगतःकारणंनकिञ्चित् अदृष्टंधर्माधर्मादिकारणान्तरंविद्यते जगतः कामएवप्राणिनांकारणमितिलोकायति कदृष्टिरियं ८

आनन्दगिरिकृतटीका

असुराणांजनानांविशेषणान्तराण्यपिसन्तीत्याह किञ्चेति विद्यतइत्याहुरितिपूर्वेणसम्बन्धः शास्त्रैकगम्यमदृष्टंनिमित्तीकृत्याधिष्ठात्रात्मकेनब्रह्मणारहितंजगदिष्यतेचेत्कथन्तदुत्पत्तिरित्याशंक्याह किञ्चेति किमन्यदित्यादेराक्षेपस्यतात्पर्य्यमाह किञ्चिदिति ८ यथोक्तादृष्टिर्ब्रह्मदृष्टिवदिष्टैवेत्याशंक्याह एतामिति प्रागुपदि

भाषाअनुवाद

वेदविहित जोधर्मअधर्म तिसमेंप्रवृत्तिजोअसुरस्वभावसेमनुष्यजोंनहींजानते औधर्मअधर्मकोअङ्गीकारनकरनेसे संसारिकसुखऔ दुखआदिहोना किसप्रकार निरूपणकियाजाय औशौचतथाआचारआदिमे ईश्वरकी आज्ञाकोवा कैसेलङ्घन करतेहैं औरईश्वरकोनमानिकै जगतकीउत्पत्तिकिससेकहतेहैं सोईकहतेहैं जो वेदपुराणइतिहासको प्रमाणनहींमानते औकहतेहैं किमुनिऔषांड तथाराक्षस येईतीनोनेवेदकोबनायाहै औजिनकोधर्मअधर्मकीप्रतिष्ठा अर्थात्व्यवस्थानहीं है तेईअप्रतिष्ठकहेनास्तिकलोग अपनीपूर्व्वोक्तवाक्यकोपुष्टकरनेकेलिये इसजगतकोअप्रतिष्ठकहतेहैं अर्थात्यहजगतकीविचित्रता स्वभावसिद्धमात्रकहतेहैंऔरजिनकेमतमे ईसजगतकाईश्वरनहींहै इससे यहसंसारअनीश्वरहै ऐसेनास्तीकलोग अपनीबातकापक्षकरके जगतकोअनीश्वरकहतेहैं जोपूछोकि तौफेरिवेलोग इसजगतकीउत्पत्तिकिससेमानतेहैं इसपरउनकीकहावत कहतेहैं किअपरस्परकहे परअपरसेभिन्न जोस्त्रीपुरुष इनदोनोकेसंयोगसे संसारकीउत्पत्तिहोतीहै इसका औरकोईकारणनहींहै यहजगत कामहेतुक अर्थात्स्त्रीपुरुष इनदोनोकाजोकामसोईधारप्रवाहक्रमसे इससंसारका कारणस्वरूप चलाआवताहै नास्तीकलोग ऐसेहीकहतेहैं परकार्यविनाकारणकेनहींहै ८

CC-0. In Public Domain. Digitized by eGangotri

एतांदृष्टिमवष्टभ्यनष्टात्मानोऽल्पबुद्धयः प्रभवंत्युग्रकर्माणः क्षयायजगतोऽहिताः ९

शाङ्करभाष्यं

एतामिति एतांदृष्टिमवष्टभ्याश्रित्यनष्टात्मानोनष्टस्वभावाविभ्रष्टपरलोकसाधनाः अल्पबुद्धयोविषयविषयाअल्पैवबुद्धिर्येषान्तेअल्पबुद्धयः प्रभवंत्युद्भवन्ति उग्रकर्माणः क्रूरकर्माणोहिंसात्मकाः क्षयायजगतःप्रभवन्तीतिसम्बन्धः जगतोऽहिताः शत्रवइत्यर्थः ९ तेंच कामेति कामंइच्छाविशेषमाश्रित्यावष्टभ्यदुष्पूरमशक्यपूरणं दम्भमानम

आनन्दगिरिकृतटीका

ष्टामेतांलोकायतिकदृष्टिसवलम्बेति यावत् नष्टस्वभावत्वमेवस्पष्टयति विभ्रष्टेति विषयबुद्धेरल्पत्वं दृष्टमात्रोद्देशेन प्रवृत्तत्वं जगतःप्राणिजातस्येतियावत् ९

स्वामिकृतटीका

त्तिञ्चकथंनविदुःकुतोवाधर्माधर्मयोरनङ्गीकारेजगतःसुखदुःखादिव्यवस्थास्यात् कथंवाशौचाचारादिविषयाभीश्वराच्चामतिवर्त्तेरन् ईश्वरानङ्गीकारेचकुतोजगदुत्पतिःस्यादतआह असत्यमिति नास्तिसत्यंवेदपुराणादिप्रमाणंयस्मिंस्तादृशंजगदाहुः वेदादीनांप्रामाण्यंनमन्यन्तइत्यर्थः तदुक्तं त्रयोवेदस्यकर्त्तारोभुनिभण्डनिशाचराइत्यादि अतएवनास्तिधर्माधर्मरूपाप्रतिष्ठाव्यवस्याहेतुर्यस्यतत्स्वाभाविकंजगद्वैचित्रमाहुरित्यर्थः अतएवनास्तीश्वरःकर्त्ताव्यवस्थापकश्चयस्यतादृशंजगदाहुः तर्हिकुतोऽस्यजगतउत्पत्तिंवदन्तीत्यतआह अपरस्परसम्भूतमिति अपरश्चपरश्चेतिअपरस्परंअपरस्परतोऽन्योन्यतःस्त्रीपुंसयोर्मिथुनात्सम्भूतंजगत् किमन्यत्कारणमस्यनास्त्यन्यत्किञ्चित् किन्तुकामहेतुकमेवस्त्रीपुंसयोरुभयोःकामएवप्रवाहरूपेणहेतुरस्त्येत्यर्थः ८ किञ्च एतामिति एतांलोकायतिकानांदृष्टिंदर्शनमाश्रित्यनष्टात्मानोमलीमसचित्ताःसन्तोऽल्पबुद्धयोदृष्टार्थमात्रमतयःअतएवोग्रंहिंस्रंकर्मयेषांतेअहिता वैरिणोभूत्वाजगतःक्षयायप्रभवन्तिउद्भवन्तीत्यर्थः ९ अपिच काममाश्रित्येति दुष्पूरं

भाषाअनुवाद

देखोनिरीश्वरवादीयोंकीदृष्टिकहेतजबीजऔरकल्पनासेकल्पितबातोंऔउनके दर्शन कहेमतग्रन्थोंका आश्रयणकरके मलिनचित्तअल्पबुद्धिअर्थात् जोदेखैंसुनैउसपरतुर्त्तबेविचारविश्वासकरीमनुष्य जिनकोहिंसाहीकरनामात्रकामहै वेशत्रुस्वरूपहोके संसारके नाशकेहेतु प्रगटहोतेहैं ९ औरजोकामनाभोगादिकरनेसेभी

CC-0. In Public Domain. Digitized by eGangotri

कामभाश्रित्यदुःपूरंदम्भमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तन्तेशुचिव्रताः१०
चिन्तामपरिमेयाञ्चप्रलयान्तामुपाश्रिताः कामोपभोगपरमाएतावदितिनिश्चिताः११

शाङ्करभाष्यं

दाम्भिताःदम्भश्चमानश्चमदश्चदम्भमानमदास्तैरन्विताः मोहादविवेकतः गृहीत्वोपादायअसद्ग्रहानशुभनिश्चयान्प्रवर्त्तन्तेलोकेऽशुचिव्रताःअशुचीनिव्रतानि येषान्ते अशुचिव्रताः १० किञ्च चिन्तेति चिन्तामपरिमेयाञ्चनपरिमातुंशक्यतेऽस्या चिन्तायादृयत्तासाअपरिमेयातामपरिमेयांप्रलयान्तांमरणान्तामुपाश्रिताः सदाचिन्तापराइत्यर्थः कामोपभोगपरमाः काम्यन्तइति कामाःशब्दादयस्तदुपभोगपरमाः अयमेवपरमःपुरुषार्थो यःकामोपभोगइत्येवंनिश्चितात्मानएतावदितिनिश्चिताः ११

आनन्दगिरिकृतटीका

तानेवदुराचारानसुरान् प्रकारान्तरेणविशिनष्टि तेचेति १० तानेवविधान्त

स्वामिकृतटीका

पूरयितुमशक्यंकाममाश्रित्यदम्भादिभिर्युक्ताःसन्तः क्षुद्रदेवताराधनादौप्रवर्त्तन्ते कथं असद्ग्राहान्गृहीत्वा अनेनमन्त्रेणैतांदैवतमाराध्य महानिधीन्साधयामइत्यादीन् दुराग्रहान्मोहमात्रेणस्वीकृत्यप्रवर्त्तन्ते अशुचिव्रताःअशुचीनिमद्यमांसादिविषयाणि व्रतानि येषांते १० किञ्च चिन्तामिति प्रलयोमरणमेवान्तोयस्यास्तामपरिमेयां

भाषा अनुवाद

कभीपूरीनहींहोतीऐसीकामनाको अवलम्बनकरके दम्भमानमदसेयुक्तहो क्षुद्रदेवताभूतप्रेतआदिकी आराधनामेंप्रवृत्तहोतेहैं सोई कहतेहैं कि असतग्राहग्रहण अर्थात्इसमन्त्रकेद्वाराइसदेवताकीआराधानासे बहुतधनप्राप्तहोगाऐसादुराग्रह मोहवशते जोमनुष्यअङ्गीकारकरलेते अल्पबुद्धियोंकेअशुचिकहेमद्यमांस आदि युक्तव्रतहोतेहैं तेईमनुष्य इननिषिद्धकर्मोंमेंप्रवृत्तहोते हैं १० औरप्रलयकहेमरण कालपर्य्यन्तहै जिसकाअन्त ऐसीजोअपरिमेयचिन्ता अर्थात्कितनीहै इसकाठिकानानहीं तिसकेआश्रितकहेचिन्तापरायणमनुष्यजिनकोकामभोगकरनाही परमप्रयोजनहै औकामभोगछोड़ दूसराऔरकोई परमपुरुषार्थनहींहै इतनीही कियेहैंनिश्चय जोलोग तेकुकर्मकेद्वारा धनसञ्चयकरनेकोइच्छाकरतेहैं इसकी परश्लोकके साथ अन्वयहोतीहै बृहस्पतिका सूत्रप्रमाणदेतेहैं कामएवैकःपुरुषार्थ इति इसकाअर्थयहहै किचैतन्यविशिष्ट जोकाम उसीकोपुरुषपदसेकहते हैं ११

CC-0. In Public Domain. Digitized by eGangotri

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहन्तेकामभोगार्थमन्यायेनार्थसञ्चयान्१२

शाङ्करभाष्यं

आशापाशेति आशापाशशतैःआशाएवपाशास्तच्छतैराशापाशशतैर्बद्धानियन्त्रिताः सन्तःसर्वतःआकृष्यमाणाःकामक्रोधपरायणाः कामक्रोधौपरमयनं परआश्रयोयेषान्ते कामक्रोधपरायणाः ईहन्तेचेष्टन्ते कामभोगार्थंकामभोगप्रयोजनायनधर्मार्थमन्यायेनार्थसञ्चयानर्थप्रचयान् परः स्वापहरणादिनेत्यर्थः १२

ईदृशञ्चतेषामभिप्रायः इदमिति इदंद्रव्यंअद्यइदानींमयालब्धंइदञ्चअन्यत्प्राप्स्येमनरोथंमनस्तुष्टिकरंइदञ्चास्ति इदमपिमेभविष्यत्यागामिनिसम्वत्सरेपुनर्इदंतेनाहंधनीविख्यातोभविष्यामि १३ असौमयेति असौदेवदत्तनामा मयाहतःदुरेणविशिनष्टि किञ्चेति चिन्तामात्मयोयोगक्षेमोपायालोचनात्मिकामपरिमेयविषयत्वात् परिमातुमशक्यामाश्रिताइति सम्बन्धः एषकामोपभोगःपरमयनंसुखस्येत्येतावत् पारलिकंतु नास्ति सुखमिति निश्चयवन्तइत्याह एतावदितीति ११

आसुरानेवपुनःविशिनष्टि आशेति अशक्योपायार्थविषयाअनवगतोपायार्थविषयाप्रार्थनाआशास्ताःपाशाइवपाशास्तेषांशतैर्बद्धाइवश्रेयसःप्रच्याव्येत ततोनीयमानायइत्याह आशाएवेति १२

स्वामिकृतटीका

परिमातुमशक्यांचिन्तामाश्रितानित्यचिन्तापराइत्यर्थः कामोपभोगएवपरमोयेषांतेऐतावदितिकामोपभोगएव परमःपुरुषार्थोनान्यदस्तीतिकृतनिश्चया अर्थसञ्चयानीहन्तइत्युत्तरेणान्वयः तथाचवार्हस्पत्यसूत्रं कामएवैकःपुरुषार्थइति चैतन्यविशिष्टः कामःपुरुषइति च ११ अतएव आशेति आशाएवपाशास्तेषांशतैर्बद्धाइवस्रुतआकृष्यमाणाः कामक्रोधपरायणाःकामक्रोधौपरमयनमाश्रयोयेषांते कामभोगार्थमना तेनचौर्यादिनाथानांसञ्चयान्राशीजोहन्तइच्छन्ति १२

भाषा अनुवाद

इसीसेआशारूपसैकडों रसीयोंसेबन्धे इधरउधरखैंचेजातेहुयेलोग कामक्रोधकेआश्रयस्वरूपभूत कामउपभोगकेअर्थ अन्यायकरहेचोरीलवारीदगावाजीठगीवटपारीसे धनबटारनेकीइच्छाकरतेहैं इसीसे बहुधनकुकर्मछोड सुकर्ममेनहीं लगैहै देखो अज्ञानीआपअपनेहाथ गलेमे सैकडों पांसी लगाय लेते हैं १२

CC-0. In Public Domain. Digitized by eGangotri

इदमद्यमयालब्धमिदंप्राप्स्येमनोरथं इदमस्तीदमपिमेभविष्यतिपुनर्धनं १३
असौमयाहतःशत्रुर्हनिष्येचापरानपि ईश्वरोहमहंभोगीसिद्धोहंबलवान्सुखी १४

शाङ्करभाष्यं ।

जयःशत्रुःहनिष्येचान्यान्वराकान्परानपिकिमेतेकरिष्यन्तितपस्विन.सर्व्वथापिना स्तिमत्तुल्यईश्वरोहमहंभोगीसर्व्वप्रकारेणचसिद्धोहंसम्पन्नः पुत्रैःपौत्रैर्नप्तृभिर्नकै वलंमानुषोहंबलवान्सुखीचाहमेव अन्येतुभूमिभारायावतीर्णाः १४

आनन्दगिरिकृतटीका

तेषामभिप्रायोपिविवेकविरोधीत्याह ईदृशश्चेति द्रव्यङ्कोहिरण्यादि इदमन्य दुद्वौप्राप्यमानत्वेनविपरिवर्त्तमानमित्येतत् १३ यथोक्तेमदभिप्रायेप्रतिबन्धकः शत्रुरपिनसम्भवतीत्याह असाविति त्वत्तोविहीनानांत्वयापरिभवेपि त्वत्तुल्यानांश त्रूणांपरिभवोनिश्चितो नभतीत्याशंक्याह सर्वथेति ऐश्वर्यातिरेकेपिकुतस्तेषां भोगसामर्थ्यमित्याशंक्याह अहमिति सिद्धत्वमेवस्फुटयति सम्पन्नइति बलवानोज स्वीसुखीरोगरहितः १४ विद्यावृत्तधनाभिजनैःमत्तुल्योनास्तीत्याह आढ्योइति

स्वामिकृतटीका

तेषांमनोरथंकथयन्नरकप्राप्तिमाह इदमद्येति चतुर्भिःप्राप्तेप्राप्स्यामिमनोरथं मनसःप्रियंस्पष्टमन्यत्एतेषाञ्चत्रयाणांश्लोकानामित्यज्ञानविमोहिताः सन्तोनरके पतन्तीति चतुर्थेनान्वयः १३ किञ्च असाविति सिद्धः कृतकृत्यःस्पष्टमन्यत् १४

भाषाअनुवाद

अबअसेलोगोंके मनोरथकहिकर उनकोनरकप्राप्तिका दृष्टान्तइसश्लोकसेलेक कर चारश्लोकसेकहतेहैं किइसीअज्ञानसे विशेषमोहप्राप्तहोके नरकमेपडतेहैं देखो उनकीरुचीऔमनोरथयेहैं किआजहमको यहलाभभई औरयह मनभाव तीयारीवस्तु परेकहेआगेपावेंगे औयहधनहमाराहै जनहमारेहैं औफेरभीतज वीजलनायेहैं किवहधनभीहमाराहोगा परन्तुयहनहींशोचते किहमकिसकेहवा लेहोंगे औकिसगतिकोजायंगे १३ औरइसशत्रु को हममारडालेंगे औ इस को मारलियाहै औरहमजोचाहैंसोकरे हमकर्त्ता औहममोगीहैं हमसिद्धहै जोकुछ करनाथाकरचुके हैं हमबलवान हमसुखीहैं इनसबबातोंका स्मरणतोच णभरभीनहींभूलते परकालबलवानकी सुधकोतो एकबारगीही भूलगयेहैं किव हक्याकरेगा १४ औरहमधनीहैं हमअभिजनवान्अर्थात्कुलीन तथायज्ञदानआ

CC-0. In Public Domain. Digitized by eGangotri

आढ्योऽभिजनवानस्मि कोऽन्योऽस्तिसदृशोमया यक्ष्येदास्यामिमोदिष्य इत्य ज्ञानविमोहिताः १५ अनेकचित्तविभ्रान्ता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतन्तिनरकेऽशुचौ १६

साङ्करभाष्यं

आढ्यइति आढ्योधनेनाभिजनवान्सम्पुरुषंश्रोत्रियत्वादिसम्पन्नस्तेनापिनमम तुल्योस्तिकश्चित् कोन्योस्तिसदृशस्तुल्योमया किञ्चयक्ष्येयागेनाप्यन्यानभिभविष्यामि दास्यामिनटादिभ्यःमोदिष्येहर्षातिशयंप्राप्स्यामीत्येवंअज्ञानेनविमोहिताः अविवेक भावमापन्नाः १५ अनेकेति अनेकचित्तविभ्रान्ता उक्तप्रकारैरनेकैश्चित्तैर्विविधं भ्रान्ताअनेकचित्तविभ्रान्तामोहजालसमावृताःमोहोऽविवेकोऽज्ञानन्तदेव जालमि वावरणात्मकत्वात्तेनसमावृताःप्रसक्ताः काममोगेषुकाम्यन्तइतिकामाःविषयास्तेषासु पभोगेषुकाममोगेषुतत्रैवनिष्ठाःसन्तस्तेनोपचितकल्मषाःपतन्तिनरकेऽशुचौवैत रण्यादौ १६ आत्मेति आत्मसम्भाविताःसर्वगुणविशिष्टतयात्मनैवात्मनि सम्भावि

आनन्दगिरिकृतटीका।

तथापियागदानाभ्यान्तत्फलेनवाकश्चिदधिकोभविष्यतीत्याशंक्याह किञ्चेति नचते षामेषोऽभिप्रायःसाधीयानित्याह इत्येवमिति १५ उक्तप्रकारविपर्ययेण कृत्याह

स्वामिकृतटीका

किञ्च आढ्यइति आढ्योधनादिसम्पन्नःअभिजनवान्कुलीनःयक्ष्ये यागाद्यनुष्ठा नेनापिदीक्षितान्तरेभ्यःसकाशान्महतीं प्रतिष्ठांप्राप्स्यामिदास्यामिस्तावकेभ्यश्चमोदि ष्येहर्षंप्राप्स्यामिइत्येवमज्ञानेनविमोहितामिथ्याभिनिवेशंप्रापिताः १५ एवम्भूतायत्

भाषाअनुवाद

दिजोकभीकियातोसमझतेहैं कि हामारीबराबरऔरकिसीनेनहीं किया लोगों मेहमबडीप्रतिष्ठापावेंगेअर्थात्प्रसंसाहोगी औजोकोईहमारीस्तुतिकरेगाउसको हमधनवस्त्रादिदेंयगे औउसपरप्रसन्नहोंयगें इसप्रकारकेमनुष्य अज्ञानसे विमो हित मिथ्याअभिनिवेशकोप्राप्तकहेझूठेमनोरथोंमेडूबेहैं १५ ऐसेमनुष्य जिस प्रकारकाफलपावतेहैं सोसुनो किअनेकचित्तकहेमनकीलाषोंअभिलाषोंमे प्रवृत्त जोचित्त तिससेविक्षेपकोप्राप्तयेलोग सोईसोईमोहजालसेघेरेजुयेअर्थात्मृतके जालसेवद्धमत्स्यकेसमानबन्धेहैं औरकामभोगमेआसक्तहो अशुचिजोक्लेशयुक्त नरक तिसमेहीं पडतेहै १६ यत्नकरिकेऔरोंसे हमबडीप्रतिष्ठापावेंऐसेजो उन

CC-0. In Public Domain. Digitized by eGangotri

आत्मसम्भाविताःस्तब्धाधनमानमदान्विताः यजन्तेनामयज्ञैस्तेदम्भेनाविधिपूर्वकं १७

शाङ्करभाष्य

ताःआत्मसम्भाविताःनसाधुभिःस्तब्धाअप्रणतात्मानोधनमानमदान्विताधननिमित्तो मानमदश्चताभ्यांधनमानमदाभ्यामन्वितायजन्तेनामयज्ञैर्नाममात्रैर्यज्ञैस्तैर्दम्भेनधर्म ध्वजितया अविधिपूर्वकंविहिताङ्गेतिकर्तव्यतारहितैः १७ अहमिति अहङ्कारम

आनन्दगिरिकृतटीका

त्यविवेकविकलानांकिंस्यादित्यपेक्षायामाह अनेकेति कामाविषयास्तेषांभोगेषुतत्प्र युक्तेषूपभोगेष्विति यावत् १६ ननुतेषामपिकेषाञ्चिद्वैदिकेकर्मणि यागदानादौ प्रवृत्तिप्रतीतेरयुक्तंवैतरण्यादौपतनमितिचेत्तत्राह आत्मेति आसुरीसम्पदमभिजा तैरधर्मजातमेवसञ्चीयते प्रवृत्तेरपि वैदिकेकर्मणि नैवपुण्यमित्युक्तं १७

स्वामिकृतटीका

प्राप्नुवन्तितच्छृणु अनेकेति अनेकेषुमनोरथेषुप्रवृत्तंचित्तं अनेकचित्त तेनविभ्रान्ता विक्षिप्ताः तेनैवमोहमयेनजालेनसमावृतामत्स्याइवस्थलमयेनजालेनयन्विताः एवं कामभोगेषु प्रसक्ताअभिनिविष्टाः सन्तोऽशुचौ कश्मलेनरके पतन्ति १६

यज्ञइतिच यस्तेषांमनोरथउक्तःसकेवलंदम्भाहङ्कारादिप्रधानएव नतुसात्त्वि कइत्यभिप्रायेणाह आत्मेतिद्वाभ्यां आत्मनैवसम्भाविताःपूज्यतांनीताःनतुसाधुभिःकै श्चित्अतएवस्तब्धाअनम्राःधनेनयोमानोमदश्चताभ्यांसमन्विताःसन्तःते नाममात्रेण येयज्ञास्तेनामयज्ञाःयद्वादीक्षितःसोमयाजीष्येवमादिनाममात्रप्रसिद्धये येयज्ञास्तै र्यजन्तेकथंदम्भेन नतुश्रद्धयाअविधिपूर्वकम्श्रद्धयाभवतितथा १७ अविधिपूर्वकत्वमेव

भाषाअनुवाद

केतनोरथ जोपीछेपंद्रहेंश्लोकमेकहा वहअभिलाष केवलदम्भअहंकारआदिप्रधा नहै सतोगुणप्रधाननहींहै इसअभिप्रायपर दोश्लोकसेकहतेहैं किआपअपने मनसेसम्भावित कहेमहात्मावनेहैं परकोईसाधु उनकोप्रतिष्ठानहींकरतेहैं इसो से वेशुष्कअर्थात्अनम्रस्वभाव कहेकठोरचित्तमनुष्यधनदिसेजोमानऔरअहङ्कार तिससेयुक्तहो यज्ञदानआदिकातो केवलनाममात्रहीहै परकरतेहैं इसवास्ते किफलानाआदमी बडापूजाकरनेवालाऔदानीहैऐसेनामप्रसिद्धहोय इसवासना सेयज्ञदानकरतेहैं वहयज्ञकरनाकैसाहै सोकहतेहैं कि वेखालीअपनीख्याति लाभकोछोड औरकुछअङ्गसेनहींकरतेहैं तोअविधिपूर्वकयज्ञदानजैसेहैं यह भीतैसेहो निःफलहै यहजानो १७ अबअविधिपूर्वकत्वको प्रकाशकरतेहैं कि

CC-0. In Public Domain. Digitized by eGangotri

अहङ्कारंबलंदर्पंकामंक्रोधञ्चसंश्रिताः मामात्मपरदेहेषुप्रद्विषन्तोऽभ्यसूयकाः १८

शाङ्करभाष्यं

हङ्करणमहङ्कारः विद्यमानैरविद्यमानैश्चगुणैरात्मन्यध्यारोपितैर्विशिष्टमात्मान महमिति मन्यते सोहङ्कारोविद्याख्यःकष्टतमःसर्व्वदोषाणांमूलंसर्व्वानर्थप्रवृत्तीणा ञ्चमूलं तंपरिगृह्यतथाबलंपराभिभवनिमित्तंकामरागान्वितंदर्पंदर्पोनामयस्योद्भवे धर्ममतिक्रामतीति सोऽयमन्तःकरणाश्रयोदोषविशेषःकामंक्रोधादिविषयंक्रोधमनिष्ट विषयंएतानन्यांश्चमहतोदोषान्संश्रिताःकिञ्चतेषामीश्वरंआत्मपरदेहेषुस्वदेहेपर देहेषुच तद्वुद्धिकर्मसाक्षीभूतंमांप्रद्विषन्तोमच्छासनातिवर्त्तित्वंप्रद्वेषंकुर्व्वन्तोऽभ्य

आनन्दगिरिकृतटीका।

ब्रह्मज्ञानात्पुनरासुरा दूरादेवोद्विजन्तइत्याह अहङ्कारमिति अहङ्कारमेव स्फोरयति विद्यमानैरिति अध्यारोपितवैशिष्ट्यविषयत्वादहङ्कारस्याविद्यामूलत्वे नाविद्यात्मत्वमाह अविद्याख्यइति विवेकिभिरुत्खातियत्नादेवहेयत्वंसूचयति कष्ट तमइति तदेवस्पष्टयति सर्व्वेति तंसंश्रिताइति सम्बन्धः कार्यकारणसामर्थ्यमुक्त विशेषणंबलंअहङ्कारएव महदवधीरणापर्यन्तत्वेनपरिणतोदर्पस्तंव्याकरोति दर्पो

स्वामिकृतटीका।

प्रपञ्चयति अहङ्कारमिति अहङ्कारादीन्संश्रिताःसन्तआत्मपरदेहेषुआत्मदेहेप रदेहेषुचचिदंशेनस्थितंमांप्रद्विषन्तोयजन्तेदम्भयज्ञेषु श्रद्धायाअभावादात्मनोट्यैव पीडाभवति तथापश्वादीनामप्यविधिनाहिंसायांचैतन्यद्रोहएवावशिष्यतइति प्रद्वि षन्तइत्युक्तंअभ्यसूयकाःसन्मार्गवर्त्तिनांगुणेषुदोषारोपकाः १८

भाषा अनुवाद

अभ्यसूयककहेनिन्दाकरनेवालेमनुष्य अर्थात्भगवानकहतेहैं किमेरेपथकेअव लम्बीपुरुषोंकेगुणोंमेंदोषलगानेहारेमनुष्य अहङ्कारवलऔप्रगल्भताजोढीठाप न तथाकामऔक्रोधकाआश्रयकरअर्थात्वशहोअपनीदेहऔपरकी देहमे चेतन ज्ञानरूपमेटिकाजोमैंहूंसोसम्पूर्णरूपसेमेरेप्रति द्रोहकारीयज्ञआदिकरतेरहते हैं परन्तुमारेदम्भकेयज्ञादिमेश्रद्धाकेविनाअपनेकोट्याक्लेशदेतेहैं औरपशुआदि कोंकोभीअविधिपूर्वकहिंसाकरनेसे चैतन्यजीवकाद्रोहमात्रहीफलउत्पन्नहोताहै औरतोकुछहाथलगतानहीं इसीसेयेमनुष्य मेरेद्रोहकरनेवालेमेरेशत्रुतुल्यहैं इ समेंदूनहत्यारोंको जोफलमिलेगा वहजानलो १८ औउनकाआसुरीस्वभावकभी

CC-0. In Public Domain. Digitized by eGangotri

तानहंद्विषतःक्रूरान्संसारेषुनराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु १९
आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि मामप्राप्यैवकौन्तेयततोयान्त्यधमांगतिं २०

शाङ्करभाष्यं

सूयकाःसन्मार्गस्थानांगुणेषुअसहमानाः १८ तानहमिति तानहंसर्व्वान्सन्मार्ग प्रतिपक्षभूतान्साधुद्वेषिणोद्विषतश्चमांक्रूरान्संसारेष्वेवनरकसंसरणमार्गेषु न राधमान्अधर्मदोषवत्त्वात्क्षिपामिप्रक्षिपामिअजस्रंसन्ततमशुभान्शुभकर्मकारि णआसुरीष्वेवक्रूरकर्मप्रायासुव्याघ्रसिंहादियोनिषुक्षिपामीत्यनेनसम्बन्धः १९ आसु रीमिति आसुरींयोनिमापन्नाःप्रतिपन्नामूढाजन्मनिजन्मनिअविवेकिनः प्रतिजन्म

आनन्दगिरिकृतटीका

नामेत्यादिना अन्यांश्चदोषान्मात्सर्य्यादीन्नकेवलंउक्तमेवतेषांविशेषणंकिन्तुकष्टतम मस्तिविशेषणान्तरमित्याह किञ्चेति यद्यपीश्वरंप्रतिद्वेषस्तेषांसम्भाव्यते तथापि कथंस्वदेहेपरदेहेषुच तंप्रतिद्वेषः नहितत्प्रभोक्तारमन्तरेणेश्वरस्यावस्थानमित्याशं क्याह तद्द्वीति तेषामीश्वरंप्रतिद्वेषमेवप्रकटयति मच्छासनेति ईश्वरस्यशासनंश्रुति स्मृतिरूपन्तदतिवर्त्तित्वंतदुक्तार्थज्ञानानुष्ठानपराङ्मुखत्वं १८ तेषामुक्तविशेषण वतामासुराणांकिंस्यादिति तदाह तामिति भगवतोनैर्घृण्यप्रसङ्गंप्रत्यादिशति अध र्मेति १९ ननुतेषामधिक्रमेणबहूनांजन्मनामन्तेश्रेयोभविष्यति नेत्याह आसुरी

स्वामिकृतटीका।

तेषाञ्चकदाचिदप्यासुरस्वभावप्रच्युतिर्नभवतीत्याह तानितिद्वाभ्यांतानहंमांद्वि षतः क्रूरान्संसारेषुजन्ममृत्युमार्गेषुतत्राप्यासुरीष्वेवातिक्रूरासु व्याघ्रसर्पादियोनि ष्वजस्रमनवरतंक्षिपामितेषांपापकर्म्मणांतादृशंफलंददामीत्यर्थः १९ किञ्च आसु

भाषाअनुवाद

जातानहींयहदोश्लोकसेकहतेहैं कि हमसेद्वेषकरनेवाले क्रूरस्वरूप नराधमों को मैजन्ममृत्युकीमार्गरूपसंसारमे आसुरीकहेअतिक्रूरव्याघ्रसर्पआदि दुष्टयोनि मे हमेसाफेंकाकरताहूंअर्थात् उनकोवहीनिषिद्धयोनिमिलाकरतीहैं १९ औरएव कहनेसे इसश्लोकमे यहकहाकिहेकौन्तेयअर्जुन वज्रतजन्मआसुरीयोनिमे प्राप्त जोमूढ़जनउनकोमेरीप्राप्तिकीशङ्काकहांहै वल्किमेरीप्राप्तिकीउपायजोसतमार्ग उसकोभीनपाके असुरादियोनिसेभीअधम जोघ्रमिकीटादिगति तिसदुर्गतिको वे जाते हैं २० पूर्वकहेऊयेसबआसुरीदोषोंकेमध्यमे सकलदोषकेकारणस्वरू

CC-0. In Public Domain. Digitized by eGangotri

त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत् २१

शाङ्करभाष्यं।

तमोवज्रलास्त्वेवयोनिषुजायमानाअधिगच्छन्तितेमूढामामीश्वरंअप्राप्यअनासाद्यैव हेकौन्तेयततस्तस्मादपियान्त्यधमांनिकृष्टतमाङ्गतिंमामप्राप्येतिनमत्प्राप्तौकाचिदप्याशङ्का ततोमच्छ्रुतिसाधुमार्गप्राप्तिमप्राप्येत्यर्थः२० सर्वस्याःआसुर्याःसम्यदः संक्षेपोयमुच्यतें यस्मिंस्त्रिविधेसर्वआसुरसम्पद्भेदोनन्तोप्यन्तर्भवति यत्परिहारेणपरिहृतश्चभवति यन्मूलंसर्वस्यानर्थस्यतदेतदुच्यते त्रिविधमिति त्रिविधंनरकद्वारं त्रिःप्रकारंनरकस्यप्राप्तिद्वारंनाशनमात्मानः यद्द्वारंप्रविशन्नेवनश्यतिआत्माकस्मैचित् पुरुषार्थायोग्योनभवतीत्येतदुच्यते द्वारंनाशनमात्मनइति किंतत्कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत् यतएतद्द्वारंनाशनमात्मनस्तस्मात् कामादित्रयमेतत्त्यजेत् त्यागस्तुतिरियं २१ एतैरिति एतैर्विमुक्तःकौन्तेय तमोद्वारैस्तमसोनरकस्यदुःखमोहात्मकस्यद्वाराणिकामादयस्तैरेतैस्त्रिभिर्विमुक्तोनरआचरत्यनुतिष्ठति

आनन्दगिरिकृतटीका

मिति तेषामीश्वरप्राप्तिशङ्काभावेकथन्तन्निषेधःस्यादित्याशंक्याह मामित्यादिना यस्मादासुरीसम्पदनर्थपरम्परयासर्वपुरुषार्थपरिपन्थिनी तस्माद्यावत्पुरुषःस्वतन्त्रोनकाञ्चित्पारवश्यकरींयोनिमापन्नस्तावदेवतेनासौपरिहरणीयेतिसमुदायार्थः २० कथमासुरीसम्पदनन्तभेदवतीपुरुषायुषेनापिपरिहर्तुंशक्येत्याशंक्याह सर्वस्येति संक्षेपोक्तिफलमाह यस्मिन्निति कामादौत्रिविधेसर्वस्यासुरसम्पद्भेदस्यान्तर्भावेपिकथमसौपरिह्रियतेतत्राह यत्परिहारेणेति कामादिपरिहारेणासुरीसम्पद्भेदपरिहारेपिकथंसर्वानर्थपरिवर्जनमित्याशंक्याह यन्मूलमिति कथमात्मनोनित्यस्यनाशाशङ्केतितत्राह कस्मैचिदिति त्रिविधमपिसामान्यतोदर्शितमाकांक्षाद्वाराविशे

स्वामिकृतटीका

रीमिति तेचमामप्राप्यैवेत्येवकारेणमत्प्राप्तिशङ्कापिनकृतश्चैषांमत्प्राप्त्युपायंसन्मार्गमप्राप्य ततोप्यधमांक्रमिकोटादिगतिं यान्तीत्युक्तं शेषंस्पष्टं २० उक्तनामासुरदो

भाषाअनुवाद

षजो तीनिदोष तिनकोसदाहीत्यागकरनायोग्यहै सोईकहतेहैं किकामक्रोधऔलोभयेतीनदोष नरकके द्वारस्वरूपहैं तोक्यों ननीचयोनिप्राप्तिकारकहोयं इसीसेमुमुक्षुकहेमुक्तिकोइच्छारखनेवाले इनतीनोदोषोंकोसबतरहसेत्यागकरैं येअनर्थके मूलहैं औदेखो दुखदाईहैं २१ अबइनतीनदोषोंकेत्यागकरनेमे विशेषफलकहते

CC-0. In Public Domain. Digitized by eGangotri

एतैर्विमुक्तः कौन्तेयतमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनःश्रेयस्ततोयातिपरांगतिं २२
यःशास्त्रविधिमुत्सृज्यवर्त्ततेकामचारतः नससिद्धिमवाप्नोतिनसुखंनपरांगतिं २३

शाङ्करभाष्यं

किमात्मनःश्रेयोयत्प्रतिबन्धःपूर्वेनाचरति तदपगमादाचरति ततस्तदाचरणतया याति परांगतिंमोक्षमित्यर्थः २२ सर्वस्यैतस्यासुरीसम्पत्परिवर्जनस्य श्रेयआचरणस्यशास्त्रंकारणंशास्त्रप्रमाणादुभयंशक्यंकर्त्तुंनान्यथाअतःयःशास्त्रेति यः शास्त्रविधिंशास्त्रंवेदःतस्यविधिंकर्त्तव्याकर्त्तव्यज्ञानकारणं विधिप्रतिषेधाख्यमुत्सृज्य त्यक्त्वावर्त्ततेकामकारतःकामप्रयुक्तःसन्नससिद्धिं पुरुषार्थयोग्यतामाप्नोति नाप्यस्मिन्लोकेसुखंनापिपरांप्रकृष्टांगतिंस्वर्गंमोक्षंवा २३ तस्मादिति तस्मात्शास्त्रं प्रमाणंज्ञानंसाधनन्ते तवकार्याकार्यव्यवस्थितौकर्त्तव्याकर्तव्यव्यवस्थायामतोज्ञात्वाबु

आनन्दगिरिकृतटीका ।

षतोदर्शयति किंतदिति तस्मादिति व्याचष्टे यतइति कामादित्यागेसतिअनर्थाचरणश्रेयःप्रतिबन्धनिवृत्तीस्यातामिति भावः २१ नकेवलंश्रेयःसमाचरन्नासुरींच सम्पदंवर्जयन्मोक्षमेवसम्यग्धीद्वारालभते किन्तुलौकिकमपिसुखमित्यपेरर्थः २२

स्वामिकृतटीका ।

षाणांमध्येसकलदोषमूलभूतदोषत्रयंसर्वथावर्जनीयमित्याह त्रिविधमिति कामःक्रोधोलोभश्च इतीदंत्रिविधंनरकस्यद्वारंअतएवात्मनोनाशनंनीचयोनिप्रापकं तस्मादेतत्त्रयंसर्वात्मनात्यजेत् २१ त्यागेविशिष्टंफलमाह एतैरिति तमसोनरकस्यद्वारभूतैरेतैस्त्रिभिःकामादिभिर्विमुक्तोनरआत्मनःश्रेयःसाधनंतपोयोगादिकमाचरति ततश्चमोक्षंप्राप्नोति २२ कामादित्यागश्चस्वधर्माचरणंविना नसम्भवतीत्याह यइति शास्त्रविधिंवेदविहितं धर्ममुत्सृज्यय:कामचारतोयथेष्टंवर्त्ततेससिद्धिंतत्त्वज्ञानं न

भाषाअनुवाद

हैं किहेकौन्तेयअर्जुन तमकहेनरकके द्वाररूपकामआदितीनदोषसे अच्छीतरह मुक्तपुरुष अपनेकल्याणकेसाधनस्वरूप तपयोगआदिआचरणकरतेहैं औरतिसकेअनन्तर मुक्तिपावते हैं २२ कामादित्यागकरनाभी स्वधर्म्मआचरणकेबिनानहींहोसकैहै यहीकहतेहैं किशास्त्रऔविधिकहे वेदविहितधर्म्मत्यागकरके जोमनुष्य अपनीइच्छाकेअनुसार कर्मकरतेहैं वेसिद्धिकहे तत्त्वज्ञानको नहींपावतेहैं औरउपशमअर्थात् शान्तिरूपसुखभी नहींपावते औरनउत्तमगति जोमुक्तितिसकोपवतेहैं २३ अबतात्पर्यकहतेहैं कियहकाजऔयहअकाज इसकीव्यवस्थाकहे

CC-0. In Public Domain. Digitized by eGangotri

तस्माच्छास्त्रंप्रमाणन्तेकार्य्याकार्य्यव्यवस्थितौ ज्ञात्वाशास्त्रविधानोक्तंकर्मकर्त्तुमिहार्हसि २४ इतिदैवासुरसम्पद्विभागयोगोनाम षोडशोऽध्यायः १६

शाङ्करभाष्यम्।

ज्ञा शास्त्रविधानोक्तंविधिर्विधानंशास्त्रमेवविधानंशास्त्रविधानंकुर्य्यान्नकुर्यादित्येवं लक्षणंतेनोक्तस्वकर्मयत्तत्कर्त्तुमिहार्हसिइहइतिकर्माधिकारभूमिप्रदर्शनार्थंइति २४

आगिरिनन्दकृतटीका।

आसुर्यां सम्पदोवर्जने श्रेयसश्चकरणे किंकारणंतदाह सर्व्वस्येति तस्यकारणत्वंसाधयति शास्त्रेति उक्तमुपजीव्यान्तरश्लोकंप्रवर्त्तयति अतइति शिष्यते बोध्यतेऽनेनापूर्व्वोर्थइति शास्त्रं तच्चविधिनिषेधात्मकमित्युपेत्यव्याचष्टे कर्त्तव्येति कामस्यकरणंकामकारःतस्माद्धेतोरित्युपेत्यकामाधीना शास्त्रविमुखस्यप्रवृत्तिरित्याह कामेतिकामाधीनप्रवृत्तेःसदापुमर्थायोग्यस्यसर्व्वपुरुषार्थासिद्धिरित्याह नापीति २३ शास्त्राद्दृष्टे कर्म्मणोनिस्फलत्वेफलितमाह तस्मादिति कर्त्तव्याकर्त्तव्यौ धर्म्माधर्म्मौ तत्रशास्त्रस्यप्रमाणत्वेपि ममकिंकर्त्तव्यमित्याशंक्याह अतइति स्वकर्म्मच्चत्रियस्ययुद्धादि इतिशब्दोऽध्यायसमाप्त्यर्थः तदनेनाध्यायेन प्राग्भवीयकर्म्मवासनानुसारेणाभिव्यज्यमानसात्त्विकादि प्रकृतित्रयविभागेनदैव्यासुरीतिसम्पद्वयमादानहानाभ्यामुपदिश्य कामक्रोधलोभानपहाय पुरुषार्थिना शास्त्रश्रवणेनतदुक्तकारिणाभवितव्यमिति निर्द्धारितं २४

स्वामिकृतटीका

कामादित्यागश्च स्वधर्म्माचरणंविनानसम्भवतीत्याह यइति शास्त्रविधिंवेदविहितं धर्म्ममुत्सृज्य यःकामचारतोयथेष्टंवर्त्तते ससिद्धिंतत्त्वज्ञानंनप्राप्नोति न चसुखमुपशमं नचपरांगतिं मोक्षं प्राप्नोति २३ फलितमाह तस्मादिति इदं कार्यमिदमकार्यञ्चेत्यस्यांव्यवस्थायांते तवशास्त्रश्रुतिस्मृतिपुराणादिकमेवप्रमाणं अतःशास्त्रविधिनोक्तंकर्म्मज्ञात्वा इहकर्म्माधिकारेवर्त्तमानः यथाधिकारंकर्म्मकर्त्तुमर्हसि तन्मूलत्वात् सत्त्वशुद्धिसम्यग्ज्ञानमुक्तीनामित्यर्थः देवदैतेयसम्पत्तिसम्बिभागेन षोडशे तत्त्वज्ञानेऽधिकारस्तुसात्त्विकस्येतिदर्शितं २४ इतिषोडशोध्यायः १६

भाषाअनुवाद

निर्णयमे तुमकोशास्त्रऔवेदस्मृतिकहे धर्मशास्त्र पुराण प्रमाणस्वरूपहैं इससेशास्त्रकीविधिमे कहेजोकर्मतिनकोजानिकर इसकर्मअधिकारमेवर्त्तमान तुमअपनेअधिकारके अनुरूप कर्मकरनेकोयोग्यहोउ जिसहेतुसत्त्वशुद्धिऔसम्यक्ज्ञान औमुक्तिकेविषयमेभी करसहीमूलकहे कारणस्वरूपहै २४ षोडशोध्यायः १६

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता

सप्तदशोध्यायः

अर्जुनउवाच येशास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः तेषां निष्ठातुका कृष्णसत्त्वमाहोरजस्तमः १

शाङ्करभाष्यं

तस्माच्छास्त्रं प्रमाणन्तइतिभगवद्वाक्यात्लब्धप्रश्नबीजोऽर्जुनऊवाच येशास्त्रे ति येकेचित्अविशेषिताःशास्त्रविधिंशास्त्रविधानंश्रुतिस्मृतिशास्त्र चोदनामुत्सृज्यपरित्यज्य यजन्ते देवादीन्पूजयन्तिश्रद्धयान्विताः श्रद्धयास्तिक्यबुध्यान्वितासंयुक्ताःसन्तःश्रुति स्मृतिलक्षणंवाकञ्चित्शास्त्रविधिंपश्यन्तोदृष्टव्यवहारदर्शनादेवश्रद्दधानतयादेवादी न्पूजयन्तितेइहशास्त्रविधिमुत्सृज्ययजन्ते श्रद्धयान्विताः इत्येवंगृह्यन्ते येपुनःक ञ्चित्शास्त्रविधिमुपलभमानाएव तमुत्सृजन्तायथाविधिदेवादीन्पूजयन्ति तेइह येशास्त्रविधिमुत्सृज्ययजन्तइतिनपरिगृह्यन्ते कस्मात्श्रद्धयान्वितत्वविशेषणात्देवा दिपूजाविधिपरंकञ्चित्शास्त्रं पश्यन्तएव तदुत्सृज्याश्रद्धानतयातद्विहितायांदेवा दिपूजायांश्रद्धयान्विताःप्रवर्त्तन्तेइतिनशक्यंपरिकल्पयितुं यस्मात्तस्मात्पूर्वोक्ताएवये शास्त्रविधिमुतसृज्ययजन्तेश्रद्धयान्विताःइत्यत्रगृह्यन्तेतेषामेवम्भूतानांनिष्ठातुश्रवस्था नंकाकृष्णसत्त्वमाहोरजस्तमःकिंसत्त्वनिष्ठावस्थानमाहोस्वित्रजोऽथवातमइति १

भाषाअनुवाद

तत्वज्ञानकेअधिकारीहोनेमेंजोसात्वकीश्रद्धाहै सोईमुख्यकारणहैं यहपूर्वक हाहैं इससेअबसत्रहेंअध्यायमे भगवानश्रद्धाकेतीनिभेदकहैंगे औरजोसोरहे अ ध्यायमें यःशास्त्रविमुत्सृज्यवर्त्तते कामचारतः इसतेईसवेंश्लोकमेंकहा किवेदशा स्त्रकीविधिछोडि अपनीइच्छाकेअनुसार कर्मकरनेवालेको तत्वज्ञानन हींहोताहै तोविधित्यागकरि श्रद्धासेकर्ममे वर्त्तमानजनोकोतत्वज्ञानकाअधिकारहै कि न हीं यहीज्ञातहोनेकीइच्छासे अर्जुनकहतेहैं किजोमनुष्य वेदशास्त्रकोविधिको दुखसमझकर अथवा आलस्यसेत्यागकरिके केवललोकाचारकेअनुसारश्रद्धायुक्त होय यज्ञदानआदिकर्मकरतेहैं उनकीनिष्ठाकहे स्थितिकैसीहोतीहै इसीको पूछतेहैं किहेकृष्ण उनकोजोदेवपूजा अथवा यज्ञआदिहै सोसात्विकीराजसी किम्वा तामसीहै यहतीनप्रकारकी शंकाहोतीहै जोयेपूर्वोक्तकर्मकारीलोग सत गुणीहोयं तो सात्तिकहेतुसेतत्वज्ञानमे उनकाअधिकारहोसकैहै औरजोसतो गुणयुक्तनहोंय तोनहींहोसकताहै यहअर्जुनकेपूछनेका तात्पर्यहै १

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका ।

आस्तिकानांनास्तिकानाञ्चशास्त्रैकचक्षुषांगतिरुक्तासम्प्रत्यास्तिकानामेव शास्त्रानभिज्ञानांगतिंजिज्ञासयाप्रच्छतीत्याह तस्मादिति यजन्तइतियागग्रहणं दानादेरुपलक्षणंयदिवेदोक्तंविधिमपश्यन्तस्तमुत्सृजन्तिकथंतर्हिश्रद्दधानायागादिकुर्वन्तिनहि मानंविना श्रद्धयायागादिकर्त्तुंशक्यमित्याशंक्याह श्रुतीतिननुशास्त्रीयंविधिंपश्यन्तोपिवैचित्तमुपेक्ष्य स्वोत्प्रेक्षयायागादिकुर्वन्तोदृश्यन्ते तेषामिह येशास्त्रविधिमुत्सृजेतिग्रहोभवष्यिति नेत्याह येपुनरिति तेषामत्रापरिग्रहेप्रश्नपूर्वकंहेतुमाह कस्मादिति शास्त्रज्ञानान्तदुपेक्षावतांग्रहेपिविशेषणमविरुद्धमित्याशंक्याव्याघातान्नैवमित्याह देवादीति अश्रद्दधानतयातदुत्सृज्येतिसम्बन्धः शास्त्रोक्तं विधिमधिगच्छतामपितमवधीर्यस्वेच्छयादेवपूजादौ प्रवृत्तानामासुरेष्वेवान्तर्भावोयस्मादनन्तराध्यायेसिद्धस्तस्मादास्तिकाधिकारेतेषांप्रसङ्गोनास्तीत्युपसंहरति यस्मादिति पूर्वोक्तशास्त्रानभिज्ञादृष्टव्यवहारानुसारिणइतियावत् तैःश्रद्धयाक्रियमाणंकर्म कुतःपर्यवस्यतीतिपृच्छति तेषामिति कानिष्ठ्येतद्विवृणोति सत्त्वमिति १

स्वामिकृतटीका ।

उक्ताधिकारहेतूनांश्रद्धामुख्याचसात्त्विकी इतिसप्तदशेगौणश्रद्धाभेदस्त्विधोच्यते पूर्वाध्यायान्तेयःशास्त्रविधिमुत्सृज्यवर्त्ततेकामचारतः नससिद्धिमवाप्नोतीत्यनेनशास्त्रोक्तविधिमुत्सृज्यकामचारेणवर्त्तमानस्यज्ञानेऽधिकारोनास्तीत्युक्तं तत्रशास्त्रविधिमुत्सृज्यकामचारंविनाश्रद्धयावर्त्तमानानांकिमधिकारोऽस्तिनास्तिवेति बुभुत्सया अर्जुनउवाच यइति अत्रचशास्त्रविधिमुत्सृज्ययजन्तइत्यनेनशास्त्रार्थंबुद्धातमुल्लङ्घ्यवर्त्तमाना नगृह्यन्तेतेषांश्रद्धयायजनानुपपत्तेःआस्तिक्यबुद्धिर्हिश्रद्धानचासौशास्त्रविरुद्धेऽर्थेशास्त्रज्ञानवतांसम्भवतितानेवाधिकृत्यत्रिविधाभवतिश्रद्धेतियजन्तेसात्त्विकादेवानित्याद्युत्तरानुपपत्तेश्च अतोनात्रशास्त्रमुल्लङ्घ्यनोगृह्यन्ते अपितुल्लङ्घ्यबुद्ध्यावाआलस्याद्वाशास्त्रार्थज्ञानेप्रयत्नमकृत्वाकेवलमाचारपरम्परावशेनश्रद्धयाक्वचिद्देवताराधनादौप्रवर्त्तमानागृह्यन्तेअतोऽयमर्थः येशास्त्रविधिमुत्सृज्यदुःखबुद्ध्याआलस्याद्वाअनादृत्य केवलमाचारप्रामाण्येनश्रद्धयान्विताःसन्तोयजन्ते तेषान्तुकानिष्ठाकास्थितिःकआश्रयः तामेवविशेषेणप्रच्छति किंसत्त्वंआहोकिंरजःअथवातमइति तेषांताद्दृशीदेवपूजादिप्रवृत्तिःकिंसत्त्वसंश्रितारजःसंश्रितातमःसंश्रितावेत्यर्थः श्रद्धायाःसात्वि

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच त्रिविधाभवतिश्रद्धादेहिनांसास्वभावजा सात्विकीराजसीचैव तामसीचेतितांशृणु २

शाङ्करभाष्यं

एतदुक्तंभवति यातेषांदेवादिविषयापूजासाकिंसात्विकाऽहोस्विद्राजस्युत तामसीति सामान्यविषयोयंप्रश्नोनाप्रविभज्यप्रतिवचनमर्हतीति त्रिविधेति श्रीभगवानुवाच त्रिविधात्रिःप्रकाराभवतिश्रद्धायस्यांनिष्ठायांत्वंपृच्छसि देहिनांसास्वभावजा जन्मान्तरकृतोधर्मादिसंस्कारोमरणकालेभिव्यक्तःस्वभावउच्यते ततोजातास्वभावजासात्विकीसत्वनिर्वृतादेवपूजादिविषयाराजसीरजोनिर्वृतायक्षरक्षःपूजादिविषयातामसीतमोनिर्वृता प्रेतपिशाचादिपूजाविषयैवंत्रिविधान्तासुच्यमानां श्रद्धां शृणु सैवं त्रिविधाभवति २

आनन्दगिरिटीका

कार्य्याणां कारणैर्व्यपदेशमाश्रित्य तात्पर्यमाह एतदिति विशेषनिष्ठमुत्तरंसामान्येनवक्तुंनशक्यमित्याशयेन परिहरति सामान्येति किमिति श्रद्धात्रैविध्यंप्रश्नानुपयुक्तमुच्यते तत्राह यस्यामिति श्रद्धापूर्विकायां क्रियायामिति यावत् श्रद्धात्रैविध्येहेतु

स्वामिटीका

कत्वात्क्षेशबुद्ध्याआलस्येनचशास्त्रानादरस्यराजसतामसत्वात्त्रिधासन्देहः यदिसत्वसंस्थितातर्हिकेषामपिसात्विकत्वाद्यथोक्तात्मज्ञानेधिकारःस्यादन्यथानेतितात्पर्यार्थः

भाषाअनुवाद

इसकाउत्तर भगवानश्रीकृष्णकहते हैं कियहजोवेदशास्त्रके क्रमसेभगवदर्चन करनेवालोंकी सात्विकीश्रद्धा एकहीप्रकारकीहै परहां लोकाचारअनुसारकर्म अनुष्ठानकरनेवालोंकी जोश्रद्धासोईसात्विकीराजसीतामसी तीनप्रकारकीहोती है तिसकाकारणयह किस्वभावकहेपूर्वकर्मकेसंस्कारवशते उत्पन्नजोश्रद्धाउसको स्वभावजा कहतेहैं इससेस्वभावको अन्यथाकरनेमेंनिश्चितसमर्थजोशास्त्रोक्तविवेकज्ञान सोलोकाचारकर्मकरनेवालोंकोनहींहै इससेशुद्धपूर्वस्वभावके क्रमसेउत्पन्न जोश्रद्धा सोतीनप्रकारकीहोतीहै सोतीनभेद हमसेसुनो परन्तुभगवतअर्जुनविषयक सात्विकीश्रद्धा जोएकहीप्रकारहै सोभी व्यवसायात्मिकाबुद्धिरेकेहकुरुनन्दनइसदूसरेअध्यायके एकतालीसवेंश्लोकमे कहीगईहै यहजानो २

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

सत्त्वेति सत्वानुरूपाविशिष्टसंस्कारोपेतान्तःकरणानुरूपा सर्व्वस्यप्राणिजातस्यश्रद्धाभवति भारत यद्येवन्ततः किंस्यादित्युच्यते श्रद्धामयःश्रद्धाप्रायः अयंपुरुषःसंसारीजीवःकथंयोयच्छ्रद्धोयाश्रद्धायस्यजीवस्यसयत्श्रद्धःस एवतत्श्रद्धानुरूपःसएव सजीवः ३ ततश्च कार्य्येण लिंगेन देवादिपूजया सत्त्वादिनिष्ठानुमेयेत्याह

आनन्दगिरिकृतटीका

माह सास्वभावजेति स्वभावशब्दार्थंप्रकृतोपयोगितयाकथयति जन्मान्तरेति कथं त्रिविधेत्यपेक्षायामाह सात्त्विकीत्यादिना कथमुक्ताश्रद्धास्वभावजेति तत्राह तामिति २ प्राचीनकर्म्मोद्बोधिता त्रिविधावासना स्वभावशब्दिता त्रिविधायाः श्रद्धायानिमित्तमित्युक्तमिदानीमुपादानन्तस्यादर्शयति सत्वमिति विशिष्टचित्तोपादानाश्रद्धातत्त्रैविध्येत्रिविधेति पूर्व्वार्द्धस्यार्थः कथंनिष्ठायांसात्विकादिप्रश्नद्वारा श्रद्धायास्त्रैविध्यनिरूपणमुपयुक्तमिति मन्वानःशङ्कते यद्येवमिति श्रद्धेयंविषयमभिध्यायंस्तयातत्रैववर्त्ततइति मन्वानःपरिहरति उच्यतइति श्रद्धामयत्वंप्रश्नपूर्व्वकंकथयति कथमिति श्रद्धास्वत्वधिकृतेपुरुषेप्राचुर्य्येणप्रवृत्तेपितस्यश्रद्धामयत्वसिद्धिरित्यर्थः ३ तथापिकथंसत्वादिनिष्ठा यथोक्तस्यपुरुषस्यज्ञातुंशक्येत्याशंक्याह

स्वामिकृतटीक

अत्रोत्तरं श्रीभगवानुवाच त्रिविधेति अयमर्थःशास्त्रतत्वज्ञानतः प्रवर्त्तमानांपरमेश्वरपूजाविषया सात्विकीएकविधैवभवति श्रद्धालोकाचारमात्रेणतुप्रवर्त्तमानानांदेहिनां याश्रद्धासातुसात्विकीराजसीतामसीचेति त्रिविधाभवति तत्रहेतुः स्वभावजा स्वभावःपूर्वसंस्कारस्तस्माज्जाता स्वभावमन्यथाकर्त्तुंसामर्थ्यंहिशास्त्रोत्थं विवेकज्ञानंतेषांनास्ति अतःकेवलंपूर्वस्वभावेनभवन्ती श्रद्धा त्रिविधाभवति तामिमांत्रिविधांश्रद्धांशृणुइति तदुक्तं व्यवसायात्मिकाबुद्धिरेकेह कुरनन्दनेत्यादिना २

ननुश्रद्धासात्विकेवसत्वकार्य्यत्वेनत्वयैवश्रीभागवतेउद्धवंप्रतिनिर्दिष्टत्वात् यथोक्तंशमोदमस्तितिक्षेक्षातपःसत्यंदयास्मृतिः तुष्टित्यागोऽस्पृहाश्रद्धाह्रीर्दयादिःस्वनिर्हृतिः इत्येताःसत्वसृष्टयइति अतःकथंतस्यास्त्रैविध्यमुच्यते सत्यंतथापिरजस्तमोमिश्रितत्वेनसत्वस्य त्रैविध्यात् श्रद्धायाअपित्रैविध्यंघटतइत्याह सत्वेति सत्वानुरूपासत्वतारतम्यानुसारिणी सर्व्वस्यविवेकिनोऽविवेकिनोवा लोकस्यश्रद्धाभवति तस्मादयंपुरुषोलौकिकःश्रद्धाविकारःत्रिविधयाश्रद्धयाविक्रियतइत्यर्थः तदेवाह योय

CC-0. In Public Domain. Digitized by eGangotri

सत्त्वानुरूपासर्व्वस्यश्रद्धाभवतिभारत श्रद्धामयोऽयंपुरुषोयोयच्छ्रद्धःसएवसः ३

शाङ्करभाष्यं ।

यजन्तइति यजन्ते पूजयन्ति सात्त्विकाः सत्वनिष्ठादेवान्यक्षरक्षांसिराजसोः प्रे तान्भूतगणांश्चसप्तमातृकादींश्चअन्ये जयन्ते तामसाजनाः ४

आनन्दगिरिकृतटीका

तथापिकथंसत्वादिनिष्ठा यथोक्तस्यपुरुषस्यज्ञातुं शक्येत्याशंक्याह ततश्चेति अ धिकृतस्यपुरुषस्यश्रद्धाप्रधानत्वादितियावत् देवा वस्वादयोयक्षाः कुबेरादयोरक्षां

स्वामिकृतटीका

क्षद्धःयादृशीश्रद्धायस्यसएवसःतादृशश्रद्धायुक्तः सएवसइति यःपूर्व्वंसत्वोत्कर्षेणसा त्विकश्रद्धायुक्तःपुरुषःसपुनस्तत्संस्कारेण सात्विकश्रद्धायुक्तएवभवतियस्तुरजसउ त्कर्षेणराजसश्रद्धायुक्तःसपुनस्तादृशएवभवति यस्तुतमसउत्कर्षेण तामसश्रद्धया युक्तःसपुनस्तादृशएवभवतीति लोकाचारमात्रेणप्रवर्त्तमानेएवं सात्विकराजसता मसश्रद्धाव्यवस्थाशास्त्रजनितविवेकज्ञानयुक्तानान्तुस्वभावविजयेनसात्विको एकै वश्रद्धेतिप्रकरणार्थः ३

भाषाअनुवाद

पूर्व्वपक्षकहतेहैं किहां श्रद्धासात्विकीहै क्योंकि श्रीभगवानने एकादशस्कन्ध केपचीशयेंअध्यायकेद्वितीयश्लोकमेंसत्वकार्य्यरूपहीउद्धवकेप्रतिनिर्देश कियाहै कि शमदमतितिक्षाज्ञानतपसत्यदयास्मृतितुष्टित्यागअनिच्छाश्रद्धालज्जाऔआत्मनिर्ति कहेआत्मसुख येसबहतीसतोगुणहीकीहैं इससेश्रद्धातीनप्रकार कैसेकहतेहैं जोऐसाकहो तोसुनो किहां सत्यकहतेहोपरतथापिरजोगुणऔतमोगुणके संयो गसेसत्वगुणकीतीनप्रकारताहेतुकसात्विकश्रद्धाभीजोतीनप्रकारहोतीहै सोईकह तेहैं किजोपूर्व्वसात्विकस्वभावथासोउसकेसंस्कारसेफेरभीसात्विकश्रद्धायुक्तहोताहै औरजो रजोगुणप्रकाशथासोरजोगुणस्वभावहोता, औतमोगुणवालोंकीतमोगुणी श्रद्धाहोतीअर्थात्तामसयुक्तहोताहै इसकारणलोकाचारकर्मकारी ऐसेसात्विक राजसतामससस्वरूप तीनप्रकारश्रद्धाकानिर्देशमात्रकहेदेखायाहै परन्तुजोलोगशा स्त्रज्ञानसे प्रगटविवेकज्ञानसेयुक्तहैं तिनकास्वभावसर्वोत्तमहोनेकेवास्तेएकहीप्रका रश्रद्धाहोतीहै इतनाहीइसप्रकरणका तात्पर्य्यार्थ है ३ सात्विकआदिजोगुण

CC-0. In Public Domain. Digitized by eGangotri

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ४
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ५

शाङ्करभाष्यं

एवं कार्य्यतो निर्णीताः सत्वादिनिष्ठाः शास्त्रविध्युत्सर्गे तत्र कश्चिदेव सहस्रेषु पूजादितत्परः सत्त्वनिष्ठो भवति वाङ्ल्येन तु रजोनिष्ठाः तमोनिष्ठाश्चैव प्राणिनो भवन्ति कथं अशास्त्रेति अशास्त्रविहितं तच्च शास्त्रविहितं अशास्त्रविहितं घोरं क्रौडाकरं प्राणिनामात्मनश्च तपस्तप्यन्ते निर्वर्त्तयन्ति ये तपोजना ये ते च दम्भाहङ्कारसंयुक्ताः दम्भश्चाहङ्कारश्च

आनन्दगिरिकृतटीका

सिनैर्ऋतादयः स्वधर्म्मात्प्रच्युता विप्रादयो देहपातादूर्द्ध्वं वायुदेहमापन्नाः प्रेताः एभ्यश्च यथायथमाराध्यदेवादयः सात्विकराजसतामसान्प्रकामान्प्रयच्छन्तीति सामर्थ्यादवगन्तव्यं ४ ननु सत्त्वादिनिष्ठाः शास्त्रेण ज्ञातुं शक्यन्ते कुतः कार्यलिङ्गकानुमा

स्वामिकृतटीका

सात्विकादिभेदमेव कार्य्यभेदेन प्रपञ्चयति यजन्त इति सात्विकाजनाः सत्वप्रकृतीन्देवानेव यजन्ते पूजयन्ति राजसास्तु रजःप्रकृतीन्यक्षान्राक्षसांश्च यजन्ते एतेभ्योन्ये विलक्षणास्तामसाजनास्तामसानेव प्रेतान्भूतगणांश्च यजन्ते सत्वादिप्रकृतीनां तत्तदेवादीनां पूजारुचिभिस्तत्तत्पूजकानां सात्विकादित्वं ज्ञातव्यमित्यर्थः ४ राजस

भाषा अनुवाद

भेद उसीको कार्य्यभेदसे विस्तारकरके कहते हैं कि सात्विकस्वभावजन सत्वप्रकृतिदेवतोंको पूजते हैं ऐसेही राजसस्वभाव रजःप्रकृतिदेवता यक्षराक्षसादिकोंको पूजते औ तामसी तमोगुणीभूत प्रेतोंको पूजते हैं ४ और राजसतामसके मध्यमें भोजो विशेष है सोफेर दोश्लोकसे कहते हैं कि शास्त्रविन जानेभी पूर्वसंस्कारवलसे कोई कोई उत्तमपुरुष सात्विकस्वभावहोते हैं कोई मध्यमजन राजसस्वभाव औ कोई अधम लोग तामसस्वभावहोते हैं और जो अत्यन्तमन्दभाग्यलोग अन्धपरम्परामें पाखण्डियोंके सङ्गसे पाखण्डआचारके अनुवर्ती हो शास्त्रविधानसे भिन्न लोकभयङ्करूप तपस्याकरते हैं तिनके विषयमें हेतुस्वरूप दम्भ औ अहङ्कारसे संयुक्त तथा कामक हे अभिलाष और रागकहे अभिलषितवस्तुमें चित्तरञ्जनके अनुरूप जो अधिक आशक्ति औ बलकहे विषयोंका आग्रह इससबसे युक्तहो इसश्लोकका अर्थ दूसरेश्लोकके साथ है ५ शरीरस्थकहे शरीरके कारणरूप देहमें वर्त्तमान जो पृथिवी अप तेज वायु आ

CC-0. In Public Domain. Digitized by eGangotri

कर्षयन्तः शरीरस्थंभूतग्राममचेतसः मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ६

शाङ्करभाष्य

दम्भाहङ्कारौताभ्यांसंयुक्ताद्दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताःकामश्चरागश्च कामरागौतत्कृतंबलङ्कामरागबलन्तेनान्विताःकामरागबलैर्ब्बान्विताः ५ कर्षयन्त इति कर्षयन्तःकृषीकुर्ब्बन्तःशरीरस्थभूतग्रामङ्करणससुदायमचेतसोऽविवेकिनोमाञ्चैवतत्कर्म्मबुद्धिसाक्षिभूतमन्तःशरीरस्थं कर्षयन्तः मदनुशासनाकरणमेवमत्कर्षणंतान्विद्ध्यासुरनिश्चयान्आसुरोनिश्चयोयेषान्तेआसुरनिश्चयास्तान्परिहरणार्थं विद्धिइत्युपदेशः ६ आहाराणाञ्चरस्यस्निग्धादिवर्गत्रयरूपेणभिन्नानांयथाक्रमं

आनन्दगिरिकृतटीका

नेनेति तत्राह एवमिति सत्वादिनिष्ठानांजन्तूनामवान्तरविशेषंप्रचुरत्वाप्रचुरत्वरूपंदर्शयतितत्रेत्यादिनाराजसानाञ्चतामसानाञ्चप्राचुर्य्यंप्रश्नद्वाराविष्टणोति कथमित्यादिना कामश्चकाम्यमानविषयोरागश्चतद्विषयभोगाभिलाषःतत्कृतंतन्निमित्तमितियावत् ५ रजोनिष्ठान्प्राधान्येनप्रदर्श्यतमोनिष्ठान्प्राधान्येनदर्शयति कर्षयन्त इतिकथंशरीरादिसाक्षिणमीश्वरंप्रतिकृषीकरणंप्राणिनांप्रकल्पतेतत्राह मदनुशासनेति तेषांविपर्य्यासनिश्चयवतांपरिज्ञानंकुतोपयुज्यतेतत्राह परिहरणार्थमिति ६

स्वामिकृतटीका

तामसेष्वपिपुनर्विशेषान्तरमाह अशास्त्रविहितमितिद्वाभ्यांशास्त्रविधिमजानन्तोऽपि केचित्प्राचीनपुण्यसंस्कारेणोत्तमाःसात्विकाएवभवन्ति केचिन्मध्यमाराजसाभवन्त्यधमास्तामसाभवन्ति येपुनरत्यन्तंमन्दभाग्यास्तेगतानुगत्यापाषण्डसङ्गेनच तदाचारानुवर्त्तिनःसन्तोऽशास्त्रविहितंघोरंभूतभयङ्करंतपस्तप्यन्ते कुर्वन्ति तत्रहेतवःदम्भाहङ्काराभ्यांसंयुक्ताःतथाकामोऽभिलाषःरागआसक्तिर्बलमाग्रहःएतैरन्विताः सन्तस्तानासुरनिश्चयान्विद्धीत्युत्तरेणान्वयः ५ किञ्च कर्षयन्तइति शरीरस्थंआरम्भकत्वेनदेहेस्थितंभूतानांपृथिव्यादीनांग्रामंसमूहंकर्षयन्तोदृथैवोपवासादिभिःक्षपंकु

भाषा अनुवाद

काशपंचभूत तिनकोदृथाउपासकरनेसे दुर्बलकर औअन्तर्यामीरूपदेहकेबीचटिकेऊपयेमेरेकोभी लङ्घनकरदुखदाईहो जोअविवेकीलोग तपकरतेहैं तिनकोआसुरनिश्चयकहेअतिक्रूरबुद्धिजानो तात्पर्ययहकिमेरीआज्ञालङ्घनकरनाही मुझेदुखदेनाहै ६ और आहारादिभेदसे भी सात्विकादिगुणभेददेखानेके मनोरथसे

CC-0. In Public Domain. Digitized by eGangotri

आहारस्त्वपिसर्व्वस्यत्रिविधोभवतिप्रियः यज्ञस्तपस्तथादानंतेषांभेदमिमंशृणु ७

शाङ्करभाष्यं

सात्विकराजसतामसपुरुषप्रियत्वदर्शनमिहक्रियते यतोरस्यस्निग्धादिष्वाहारविशेषेष्वात्मनःप्रीत्यतिरेकेणलिङ्गेनसात्विकत्वंराजसत्वन्तामसत्वञ्चबुद्ध्वा रजस्तमोलिङ्गानामाहाराणांपरिवर्जनार्थंसत्वलिङ्गानाञ्चोपादानार्थतयायज्ञादीनामपि सत्वादिगुणभेदेनत्रिविधत्वप्रतिपादनमिहराजसतामसान्बुद्ध्वाकथंनु नामपरित्यजेत्सात्विकानेवानुतिष्ठेदित्येवमर्थमाह आहारस्त्विति आहारस्त्वपिसर्व्वस्यभोक्तुस्त्रिविधो भवति प्रियइष्टस्तथायज्ञस्तपस्तथादानंतेषामाहारादीनाभेदमिमंवक्ष्यमाणंशृणु ७

आयुरिति आयुश्चसत्वञ्चबलञ्चआरोग्यञ्चसुखञ्चप्रीतिश्चतासांविवर्द्धनाःआयुसत्वबलारोग्यसुखप्रीतिविवर्द्धनाःरस्यस्निग्धाःतेचरस्यारसोपेताःस्निग्धाःस्नेहवन्तःस्थिराश्चिरकालस्थायिनोदेहेहृद्याहृदयप्रियाआहाराःसात्विकस्येष्टाः भवन्ति ८

आनन्दगिरिकृतटीका

उत्तरश्लोकपूर्व्वार्द्धतात्पर्यमाह आहाराणामितिरस्यादिवर्गस्यसात्विकपुरुषप्रियत्वंकट्वादिवर्गस्य राजसप्रियत्वंयातयामादिवर्गस्यतामसप्रियत्वमिति दर्शनंकुतोपयुज्यतेतत्राह रस्येतिश्लोकोत्तरार्द्धतात्पर्यमाह तथेति आहारत्रैविध्यवदिति यावत् कथमेतेषांप्रत्येकं त्रैविध्यन्तत्राह तेषामिति ७ सात्विकप्रीतिविषयमाहा

स्वामिकृतटीका।

र्व्वन्तोऽचेतसोऽविवेकिनः माञ्चान्तर्यामितयाअन्तःशरीरस्यंदेहमध्येस्थितंमदाज्ञालङ्घनेनैवकर्षयन्तोयेतपस्यन्तितानासुरनिश्चयान्आसुरोऽतिक्रूरोनिश्चयोयेषां तान्विद्धि ६ आहारादिभेदादपिसात्विकादिभेदंदर्शयितुमाह आहारस्त्वित्यादित्रयोदशभिः सर्व्वस्यापिजनस्ययआहारोऽन्नादिःसतुयथायथंत्रिविधःप्रियोभवति तथायज्ञतपोदानानित्रिविधानिभवन्ति तेषांवक्ष्यमाणंभेदमिमंशृणु एतच्चराजसतामसाहारयज्ञादिपरित्यागेनसात्विकाहारयज्ञादिसेवयासत्वशुद्धौयत्नःकर्त्तव्यइत्येतदर्थंकथ्यते७

भाषाअनुवाद

इससेलेकरत्रयोदशश्लोकपर्यन्तकहतेहैं किसकलमनुष्योंकाआहार जोअन्नआदिसोभी यथायोगतीनप्रकारसेप्रियलगताहै औयज्ञतपतथादानादिभीतीनप्रकारकेहोतेहैं सोसबभेदसुनो किराजसतामसआहार औयज्ञदानादिपरित्यागकरके सतोगुणकीवृद्धिकेनिमित्त सात्विकआहार औयज्ञादिकेविषयमे जोयत्नकरना कर्त्तव्यहै यहभगवानकहतेहैं ७ अबपूर्व्वोक्तसात्विकादिआहारके तीन

CC-0. In Public Domain. Digitized by eGangotri

आयुःसत्ववलारोग्य सुखप्रीतिविवर्द्धनाः रस्याःस्निग्धाःस्थिराहृद्या श्चाहाराः सात्विकप्रियाः ८ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनःआहाराराज सस्येष्टादुःखशोकामयप्रदाः ९

शाङ्करभाष्यं

कट्वेति कटु अम्ललवणअत्युष्णः अतिशब्दःकट्वादिषुसर्वत्रयोज्याऽतिकटुरति तीक्ष्णइत्येवंकट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनःएवम्विधाआहाराराजसस्येष्टा दुःखशोकामयप्रदा दुःखञ्चशोकञ्चआमयञ्चप्रयच्छन्तीति दुःखशोकामयप्रदाः ९

आनन्दगिरिकृतटीका

रविशेषमुदाहरति आयुरिति आयुर्जीवनं सत्वञ्चित्तस्थैर्य्यंवीर्यंवाबलंकार्यकारण सामर्थ्यं आरोग्यन्नीरोगता सुखंअन्तराह्लादः प्रीतिःपरेषामपिसम्पन्नानांदर्शनात् परमोहर्षस्तासांविवर्द्धनाः विवर्द्धयन्तीति व्युत्पत्ते रसोपेतारसयितव्याःसरसाःदे हेचिरकालस्थायित्वंचिरशरीरोपकारहेतुत्वं ८ राजसप्रीतिविषयमहार

स्वामिकृतटीका

तत्राहारवैविध्यमाह आयुरिति त्रिभिः आयुर्जीवनं सत्त्वमुत्साहः बलंशक्तिः आरोग्यं रोगराहित्यं सुखं चित्तप्रसादः प्रीतिरभिरुचिः आयुरादीनांविवर्द्धनाः विशेषेण दृद्धिकराः तेचरस्यारसवन्तःस्निग्धाःस्नेहयुक्ताः स्थिरादेहेसारांशेनचि रकालावस्थायिनः हृद्याःदृष्टिमात्रादेवहृदयङ्गमा एवम्भूताआहारा भक्ष्यभोज्या दयःसात्विकप्रियाः ८ तथाकटुरिति अतिशब्दः कट्वादिषुसप्तस्वपि सम्बध्यते

भाषाअनुवाद

प्रकारभेद तीनश्लोकसेकहतेहैं किआयुकहेजीवन सत्वकहेऊत्साह बलकहेसक्ति औआरोग्य सुखकहेचित्तकीप्रसन्नता प्रीतिकहेअभिरुचि इससेयहआयाकिआयु सत्वआदिकेवढ़ानेवाले औरस्यकहेरसयुक्त औस्निग्धकहेचिकनेघृतयुक्तऔस्थि रकहेरसांशकेद्वारा चिरकालदेहमेरहनेवाले औहृद्यकहेदेखतेमात्र भोजनकी इच्छाहो ऐसेसुन्दरस्वरूप आहार भक्ष्यभोज्यआदि सात्विकरूप सात्विकस्वभा व पुरुषोंको प्रियहोतेहैं ८ औरअतिकटुनींबआदिऔअतिअम्लऔअतिल वणऔअतिउष्णकहेगरमऔअतितीक्ष्णमरिचादिऔअतिरूक्षऔअतिउग्रसरसों आदि येसवराजसस्वभावमनुष्यको प्रियहोते हैं परन्तु येसबवस्तु दुखकहे भोज नसमयमे हृदयकोसन्तापआदि औशोककहे भोजनकेअनन्तर अप्रसन्नता औ आमयकहेरोग येसवखानेवालेकोदेतेहैं क्योंकि येसवदुखशोकमयहै ९

CC-0. In Public Domain. Digitized by eGangotri

यातयामंगतरसंपूतिपर्य्युषितञ्चयत् उच्छिष्टमपिचामेध्यंभोजनंतामसप्रियं १०

शाङ्करभाष्यं

यातयाममिति यातयामंमन्दपक्वंनिर्वीर्यंयद्गतरसेनोक्तत्वात् गतरसंरसवियुक्तंपूति दुर्गन्धिपर्युषितञ्चपक्वं सत्राह्नयन्तरितञ्चयत् उच्छिष्टमपिचभुक्तशिष्टमप्यमेध्यम यज्ञार्हंभोजनमोदृशन्तामसप्रियं १० अथेदानींयज्ञस्त्रिविधउच्यते अफलेति अफलाकांक्षिभिरफलार्थिभिर्यज्ञोविधिदृष्टःशास्त्रचोदनादृष्टोयोयज्ञइज्यते निर्व्वर्त्त्यते यष्टव्यमेवेति यज्ञस्वरूपनिर्व्वर्त्तनयैवकार्यमितिमनःसमाधाय नानेनपुरुषार्थोमम कर्त्तव्यइत्येवंनिश्चित्य ससात्विकोयज्ञउच्यते ११ अभिसन्धायेति अभिस

आनन्दगिरिकृतटीका

विशेषं दर्शयति कटुरिति कटुकस्तीक्ष्णशब्देनोक्तत्वात् रूक्षोविस्नेहः विदाह्यसन्तापकः अतिशब्दस्यसर्व्वत्रयोजनामेवाभिनयति अति कटुरिति दुःखंतात्कालिकीपीडा इष्टवियोगजंदुःखं शोकः आमयोरोगः ९ तामसप्रियमाहारमुदाहरति यातयाममिति ननु निर्वीर्यं यातयाममुच्यते न पुनःत्वाभिपक्वमितिनेत्याह निर्वीर्य्येति १० हानादानार्थं आहारवैविध्यमेवंविभज्य क्रमप्राप्तंय

स्वामिकृतटीका।

तेनअतिकटुर्निम्बादिःअत्यम्लोऽतिलवणोऽत्युष्णश्चप्रसिद्धःअतितीक्ष्णोमरिचादिःअतिरूक्षःकंगुकोद्रवादिःअतिविदाह्यी सर्षपादिःअतिकट्वादय आहाराराजसस्येष्टाःप्रियाः दुखंतात्कालिकहृदयसन्तापादि शोकः पश्चाद्भाविदौर्म्मनस्यं आमयोरोगःएतान्प्रददति प्रयच्छन्तीति तथा ९ यातयाममिति यातोयामःप्रहरोयस्यपक्वस्यौदनादेःतद्यातयामं शैत्यावस्थांप्राप्तमित्यर्थः गतरसंनिष्पीडितसारं पूतिर्दुर्गन्धंपर्युषितं दिनान्तरपक्वं उच्छिष्टंअन्यभुक्तावशिष्टं अमेध्यंअभक्ष्यंकलञ्जादिएवम्भूतं भोजनंभोजंत्र तामसस्यप्रियं १० यज्ञोऽपि त्रिविधस्तत्रसात्विकं यज्ञमा

भाषा अनुवाद

औरजोअन्न यातयामकहे जिसको एकप्रहरबीतगया औठंढाहोगया औगतरस कहेजिसकारससूखगया औपूतिकहे दुर्गन्धयुक्तजोहै औपर्य्युषितकहे बासीअन्न औउच्छिष्टकहे दूसरेकाजूठा औअमेध्यकहे अपवित्र अभक्ष्यमांसआदि ऐसेआहार तामसस्वभावमनुष्योंकों प्रियलगतेहैं १० औयज्ञभी तीनप्रकारहैं तिनके

CC-0. In Public Domain. Digitized by eGangotri

अफलाकांक्षिभिर्यज्ञोविधिदिष्टोयइज्यते यष्टव्यमेवेतिमनःसमाधायससात्विकः ११
अभिसन्धायतुफलंदम्भार्थमपिचैवयत् इज्यतेभरतश्रेष्ठ तंयज्ञंविद्धिराजसं १२
विधिहीनमसृष्टान्नंमन्त्रहीनमदक्षिणं श्रद्धाविरहितंयज्ञंतामसंपरिचक्षते १३

शाङ्करभाष्यं

न्यायेहिदृश्यफलंदम्भार्थमपि चैवयत्इज्यते भरतश्रेष्ठ तंयज्ञंविद्धिराजसं १२
विधिहीनमिति विधिहीनं यथाचोदितविधिविपरीतं असृष्टान्नं ब्राह्मणेभ्योन सृष्टमन्नंयस्मिन्यज्ञेसोऽसृष्टान्नस्तमसृष्टान्नं मन्त्रहीनंमन्त्रतः स्वरतोवर्णतश्चवियुक्तं

आनन्दगिरिकृतटीका

नन्वैविध्यंकथयति अथेति तत्रसात्विकंयज्ञंज्ञापयति अफलेति फलाभिसन्धिं विनायज्ञस्वरूपमेवभाव्यमितिबुद्ध्याशास्त्रतोनुष्ठीयमानोयज्ञः सात्विकइत्यर्थः ११
राजसंयज्ञंहानार्थंदर्शयति अभिसन्धायेति स्वर्गाद्युद्दिश्य धार्म्मिकत्वख्यापनार्थं च्चयद्यजनंक्रियते तद्यज्ञंरजसानिर्वृत्तं त्याजयमवगच्छेत्यर्थः १२

स्वामिकृतटीका

ह अफलाकांक्षिभिरिति त्रिभिः फलाकांक्षारहितैःपुरुषैर्व्विधानादिष्टआवश्यकतया विहितोयोयज्ञइज्यते अनुष्ठीयतेससात्विकोयज्ञःकथमिज्यते यष्टव्यमेवेतियज्ञानुष्ठानमेव कार्य्यंनान्यत्फलंसाधनीयमित्येवंमनःसमाधायैकाग्र्यंकृत्वेत्यर्थः ११
राजसंयज्ञमाह अभिसन्धायेति फलमभिसन्धायउद्दिश्ययस्त्विज्यते यज्ञःक्रियतेदम्भार्थञ्च स्वमहत्वख्यापनायतंयज्ञंराजसंविद्धि १२ तामसंयज्ञमाह विधीति

भाषाअनुवाद

वीचमेसात्विकजोयज्ञ सोतीनश्लोकमेकहतेहैं किजोपुरुष फलकी आकांक्षारहित अवश्यकर्त्तव्यहैयहजानियज्ञकरते सोसात्विककहावतीहै औवेमनुष्यकिसकारणसेयज्ञअनुष्ठानकरतें इसपरकहतेहैं कियज्ञकर्म्मकरनाहीचाहियेऔरकोई फलकेअर्थ कर्त्तव्यनहीं है ऐसाविचारि मनकोएकाग्रकरके यज्ञकरतेहैं ११
राजस यज्ञकहतेहैं किहेभरत श्रेष्ठअर्जुन फलकीकामनापूर्व्वक अपनेमहत्व को जनावनेकेअर्थ जोयज्ञकीजाय सोराजस यज्ञजानो १२
अवतामसयज्ञकहतेहैं किविधिहीन औअसृष्टान्नकहे जोयज्ञकेअर्थ अन्नब्राह्मणक्षत्रियवैश्यसे नहींमिलाहो सोअन्न औमन्त्रहीन औदक्षिणादानरहितहो तथाश्रद्धावर्जित यज्ञको तामसयज्ञ कहतेहैं १३ तपस्याकोभी सात्विकादिभेद

CC-0. In Public Domain. Digitized by eGangotri

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्य्यमहिंसाचशारीरं तपउच्यते १४

शाङ्करभाष्यं।

मन्त्रहीनंअदक्षिणमुक्तदक्षिणारहितं यज्ञंतामसंपरिचक्षते तमोनिर्वृत्तंकथयन्ति १३ अथेदानीं तपस्त्रिविधमुच्यते देवेति देवाश्चद्विजाश्च गुरवश्च प्राज्ञाश्चदेवद्विज गुरुप्राज्ञास्तेषांपूजनंशौचआर्जवंऋजुत्वं ब्रह्मचर्य्यमहिंसाचशरीरनिर्वृत्तंप्रशारीरं शरीरप्रधानैःसर्वैरेवकार्यकारणैः कर्त्रादिभिःसाध्यं शारीरन्तपउच्यते १४

पञ्चैते तस्यहेतवइति ह्यिवक्ष्यति अनुद्वेगेति अनुद्वेगकरंप्राणिनांअदुःखक रंवाक्यं सत्यंप्रियंहितञ्चयत्प्रियहिते दृष्टादृष्टार्थे अनुद्वेगकरत्वादिभिधर्म्मैर्व्वाक्यं विशिष्यते विशेषणधर्म्मसमुच्चयार्थश्च शब्दःपरप्रत्ययनार्थंप्रयुक्तस्यवाक्यस्यसत्यप्रियाहि तानुद्वेगकरत्वादीनामन्यतमेनद्वाभ्यांत्रिभिर्व्वाहीनतास्यात्यदिनतद्वाङ्मयन्तप्रस्तन्त

आनन्दगिरिकृतटीका

तामसंयज्ञंहानार्थमेवोदाहरति विधीति १३ सात्त्विकादिभावंनिरूपयि तुंसर्व्वस्यतपसःस्वरूपंत्रिविधंनिरूपयति अथेति तत्रशारीरन्तपोनिर्दिशति देवें ति देवाब्रह्मविष्णुशिवादयःद्विजाःपूजयत्वात्द्विजोत्तमाःगुरवःपित्रादयःप्राज्ञाःपण्ड ताविदितवेदितव्यास्तेषांपूजनंप्रणामशुश्रूषादिशौचंमज्जलाभ्यांशरीरशोधनंआर्ज्ज वमृजुत्वंविहितप्रतिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तिमत्वं ब्रह्मचर्य्यंमैथुनासमाचरणं अहिंसाप्राणिनामपीड़नं शरीरमात्रस्यनिर्वर्त्तयत्वमस्यतपसो नसंभवतीति मत्वा विशिनष्टि शरीरेति १४ कथंकर्त्रादिसाध्यत्वेतपसःशरीरत्वं शरीरत्वेवाकथंक

स्वामिकृतटीका

विधिहीनंशास्त्रोक्तविधिशून्यंअसृष्टान्नंवाह्मणादिभ्योऽसृष्टंननिष्पादितमन्नंयस्मिंस्तं मन्त्रैर्हीनंयथोक्तदक्षिणारहितं श्रद्धाशून्यञ्चयज्ञंतामसंपरिचक्षतेकथयन्तिशिष्टाः १३ तपसःसात्विकादिभेदंदर्शयितुं प्रथमंतावच्छारीरादिभेदेनतस्यवैविध्यमाह देवेत्यादित्रिभिः तत्रशारीरमाह देवेति प्राज्ञा गुरुव्यतिरिक्ता अन्येऽपितत्व विदः देवब्राह्मणादिपूजनशौचादिकञ्च शारीरं शरीरनिर्वर्त्यं तपउच्यते १४

भाषाअनुवाद

देखानेकेमानससे प्रथमशरीरादिकेभेद क्रमसेत्रिविधहैं सोतीनश्लोकसे कहते हैं किप्राज्ञकहेगुरुजनसेभिन्न औरऔरतत्वज्ञानी औब्राह्मणतथागुरुजनकीपू जा औशौचआदिक्रिया इनसबको शिष्टपुरुषशरीरसम्पादित तपस्याकहतेहैं १४

CC-0. In Public Domain. Digitized by eGangotri

अनुद्वेगकरंवाक्यं सत्यंप्रियहितञ्चयत् स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते १५

शाङ्करभाष्यं

या सत्यवाक्यस्येतरेषामन्यतमेन द्वाभ्यांत्रिभिर्व्याहीनतायां नवाङ्मयंतपस्तंतथाप्रियवाक्यस्यापीतरेषामन्यतमेनद्वाभ्यांत्रिभिर्हीनस्यनवाङ्मयंतपस्तन्तथाहितवाक्यस्यापीतरेषामन्यतमेनद्वाभ्यांत्रिभिर्व्यावियुक्तस्यनवाङ्मयंतपस्त्वं किंपुनस्तत्तपोयत् सत्यं वाक्यमनुद्वेगकरंप्रियंहितञ्चयत् तत्परमतपोवाङ्मयंयथाशास्त्रोभगवत्सस्वाध्यायं योगंवानुतिष्ठतथातेश्रेयोभविष्यतिस्वाध्यायाभ्यसनञ्चैवयथाविधिवाङ्मयंतपउच्यते१५

आनन्दगिरिकृतटीका।

वादिसाध्यत्वमित्याशंक्याह पञ्चेतिसम्मतिवाङ्मयंतपोव्यपदिश्यति अनुद्वेगकरमिति सत्यंयथादृष्टार्थवचनंप्रियंश्रुतिसुखंहितंपरिणामपथ्यं प्रियहितयोर्विधान्तरेणविभागमाह प्रियेतिकथमत्रविशेषणविशेष्यत्वंतदाह अनुद्वेगेति विशेषणानांधर्मिणामनुद्वेगकरत्वादीनांविशेषणवाक्येनसमुदितानांपरस्परमपिसमुच्चयद्योतीचकारइत्याह विशेषणेति किमितिवाक्यमेतैर्विशेष्यते किमितिवातेषांमिथःसमुच्चयस्तत्राह परेतियद्यपिविधायकवाक्यमात्रस्याविशेषितस्यवाङ्मयतपस्त्वानुपपत्तिस्तथापिसत्यवाक्यस्यवाक्यविशेषणान्तरामावेपिवाङ्मयतपस्त्वमित्याशंक्याह तथेतितथापिप्रियवाक्यमात्रस्यतथात्वंस्यादित्याशंक्याह तथेति तथापिपरिणामपथ्यंवाक्यमात्रन्तथाभविष्यति नेत्याह तथाहितेति कोदृक्तर्हितयोर्वाङ्मयत्वमिति प्रश्नपूर्वकंविशदयति किंपुनरिति विशिष्टेवाङ्मयेतपसिदृष्टान्तमाह यथेति प्रांमुखत्वंपवित्रपाणित्वमित्यादिविधानमनतिक्रम्यस्वाध्यायस्यावर्त्तनमपि वाङ्मयेतपस्यान्तर्भवतीत्याह स्वाध्यायेतिवाक्प्राचुर्येणप्रस्तुतास्मिन्निति वाङ्मयंवाक्प्रधानमित्यर्थः १५ मानसन्तपः

स्वामिकृतटीका

वाचिकंतपआह अनुद्वेगकरमिति उद्वेगंभयं नकरोतीत्यनुद्वेगकरं वाक्यंसत्यंश्रोतुःप्रियं हितञ्चपरिणामेसुखकरं स्वाध्यायमभ्यसनंवेदाभ्यासश्चवाङ्मयं वाचानिर्वर्त्तंतपः १५ मानसंतपआह मनइति मनःप्रसादःस्वच्छतासौम्यत्वमक्रूरता

भाषाअनुवाद

औरवचनसम्बन्धी तपस्याकहतेहैं किकोईमनुष्य जिनसेभयनहो ऐसेअनुद्वेगकरवचन औसत्य तथाश्रोताको प्रियलगें औ परिणामकहे अन्तकोसुखदाई होंऔरवेदअभ्यासकरनेवाले वचनोकोभी वाङ्मतपस्या कहतेहैं १५

CC-0. In Public Domain. Digitized by eGangotri

मनःप्रसादःसौम्यत्वंमौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्तपोमानसमुच्यते १६

शाङ्करभाष्य

मनइति मनःप्रसादोमनसःप्रशान्तिः स्वच्छतापादनं मनसःप्रसादसौम्यत्वंयत् सौमनस्यमाहुर्मुखादिसंप्रमादकार्य्यान्तःकरणस्यवृत्तिःमौनंवाक्संयमोपि मनःसंयमपूर्वकोभवति इति कार्येणकारणमुच्यते मनःसंयमोमौनमिति आत्मविनिग्रहोमनोनिरोधः सर्वतःसामान्यरूपआत्मविनिग्रहोवाग्विषयस्यैवमनसः संयमोमौनमिति विशेषः भावसंशुद्धिः परैर्व्यवहारकालेऽमायावित्वं भावसंशुद्धिरित्येतत्तपोमानसमुच्यते १६ ययोक्तं कायिकंवाचिकंमानसञ्च तपस्तन्नरैः सत्त्वादिभेदेनकथंत्रिविधमवतीत्युच्यते श्रद्दयास्तिक्यबुद्ध्यापरयाप्रकृष्टयातप्तमनुष्ठितंतपस्तत्प्रकृतंत्रिविधंत्रिःप्रकारंअधिष्ठानंनरैरनुष्ठातृभिरफलाकाङ्क्षिभिः फलाकांक्षारहितैर्युक्तैः समाहितैर्यदीदृशन्तपस्तत् सात्त्विकंसत्वनिर्वृत्तंपरिचक्षते कथयन्ति शिष्टाः १७ सत्कारेति सत्कारःसाधुकारःसाधुरयंतपस्वीब्राह्मणःइत्येवमर्थंमानोमान

आनन्दगिरिकृतटीका

संक्षिपतिमनइतिप्रशान्तिफलमेवव्यनक्तिस्वच्छतेतिमनसःस्वाच्छ्यमनाकुलतानैश्चिन्त्यमित्यर्थः सौमनस्यंसर्वेभ्योहितैषित्वमहिताचिन्तनञ्चतत्कथंगम्यते तत्राह मुखादीति तस्यस्वरूपमाह अन्तःकरणस्येति ननु मौनंवाङ्नियमनंवाङ्मयेतपस्यन्तर्भवति तत्कथंमानसेतपसिव्यपदिश्यते तत्रवाचःसंयमस्य कार्यत्वान्मनःसंयमस्यकारणत्वात्कार्येणकारणग्रहणात् मानसेतपसिमौनमुक्तमित्याह वागिति यद्वामौनंमुनिभावोमननंआत्मनोमनसोविनिग्रहोनिरोधः नन्वेवंमौनस्यमनोनिग्रहस्यचमनःसंयमत्वेनैकत्वात् पौनरुक्त्यंनेत्याह सर्वतइति भावस्यहृदयस्यसंशुद्धीरागादिमलविकलतेंतिव्याचष्टे परैरिति मानसंमनसाप्रधानेन निर्वर्त्यमित्यर्थः १६

स्वामिकृतटीका

मौनंमुनेर्भावोमननमित्यर्थः आत्मनोमनसोविनिग्रहोविषयेभ्यःप्रत्याहारः भावसंशुद्धिर्व्यवहारे मायाराहित्यमित्येतन्मानसंतपः १६ तदेवंशरीरवाङ्मनोभि

भाषाअनुवाद

अबमानसिक तपस्या कहतेहैं किमनकी निर्मलता औसौम्यत्वकहे क्रूरता औमौनकहे मुनिधर्म जोमननकरना आत्मविनिग्रहकहे विषयोंसे इन्द्रियोंकोनिग्रह जोरोकना औभावसंशुद्धिकहे व्यवहारमे निष्कपटरहना येसबमानसिकतपस्या स्वरूप कहेजातेहैं १६ शरीरवचनमनकेद्वारा तीनप्रकारतपदेखा

CC-0. In Public Domain. Digitized by eGangotri

श्रद्धयापरयातप्तंतपस्तत्त्रिविधंनरैः अफलाकांक्षिभिर्युक्तैःसात्त्विकंपरिचक्षते १७
सत्कारमानपूजार्थंतपोदम्भेनचैवयत् क्रियतेतदिहप्रोक्तं राजसंचलमध्रुवं १८

शाङ्करभाष्यं

नंप्रत्युत्थानाभिवादनादिस्तदर्थं पूजापादप्रक्षालनार्चनाद्यर्थितत्वादितदर्थञ्चतपः सत्कारमानपूजार्थंदम्भेनैवचक्रियतेतपस्तदिह प्रोक्तं कथितं राजसञ्चलतुकादाचित्क फलत्वेनाध्रुवं १८ मूढेति मूढग्राहेण विवेकनिश्चयेनात्मनःपीड़या क्रियते

आनन्दगिरिकृतटीका।

त्रिविधस्यतपसोयथासम्भवंसात्विकादिभावेनतत्त्रैविध्यमाकांक्षाद्वारानिक्षिप ति यथोक्तमिति तत्रैवअधिष्ठानंदेहवाङ्मनोनिर्व्वर्त्यमित्यर्थः समाहितैः सिद्ध्यसिद्ध्यो र्निर्व्विकारैरिति यावत् १७ राजसन्तपोनिर्दिशति सत्कारेति साधुकार मेवस्फोरयति साधुरिति दम्भेनचैवनास्तिक्येनकेवलधर्मध्वजित्वेनेत्यर्थः तदिहप्रो क्तमस्मिन्नेवलोकेफलप्रदमित्यर्थःकादाचित्कफलत्वंक्षणिकफलत्वमध्रुवमनियतमनै कान्तिकफलमितियावत् १८ तामसन्तपः संगृह्णाति मूढेति मूढोत्यन्ता

स्वामिकृतटीका।

निर्व्वर्त्त्यंत्रिविधंतपोदर्शितं तस्यत्रिविधस्यापितपसःसात्विकादिभेदेनत्रैविध्यमाह श्रद्धयेत्यादित्रिभिः तत्त्रिविधमपितपःश्रेष्ठयाश्रद्धयाफलाकांक्षाशून्यैर्युक्तैरेकाग्रचि त्तैर्नरैस्तप्तं सात्विकं कथयन्ति १७ राजसमाह सत्कारेति सत्कारःसाधुकारः साधुरयमितितापसोऽयमित्यादिवाक्पूजा मानःअभ्युत्थानाभिवादनादिदैहिकीपू जा पूजाअर्थलाभादिः एतदर्थंदम्भेनचतपःक्रियते अतएवचलमनियतं अध्रुवञ्चक्ष णिकं यदेवम्भूतंतपस्तदिह राजसंप्रोक्तं १८ तामसतपआह मूढेति मूढग्राहे

भाषाअनुवाद

यासोईतीनप्रकारतपजोसात्विकादिगुणभेदसेभी तीनप्रकारहै सोतीनश्लोकसे क हतेहैं किजोउत्कृष्टश्रद्धासेफलकी कामनारहित औरएकाग्रचित्तहो मनुष्यलोग विविधप्रकारकरतें तिनकोपण्डितलोग सात्त्विककहतेहैं १७राजसकहतेहैं कि जोसत्कार अर्थात् यहपुरुषसाधुऔरयहतपस्वी ऐसेप्रतिष्ठावचनोंसे जोपूजाऔमा नकहेउनकोदेख उठखड़होनाऔप्रणामकरनाआदिजोदैहिकपुजा औपूजाकहे अर्थलाभादि इनसबकेनिमित्त औअपनेमहत्वके प्रकाशकेअर्थ कीजाय जोअनि त्य औक्षणिकरूप तपस्या उसीको इसलोकमें श्रेष्ठलोग राजस कहतेहैं १८

CC-0. In-Public Domain. Digitized by eGangotri

मूढ़ग्राहेणात्मनोयत्पीड़याक्रियतेतपः परस्योत्सादनार्थंवातत्तामसमुदाहृतं १९
दातव्यमितियद्दानंदीयतेऽनुपकारिणे देशेकालेचपात्रेचतद्दानंसात्त्विकंस्मृतं २०

शाङ्करभाष्यं ।

तत्तपःपरस्योत्सादनार्थं विनाशार्थंवा तत्तामसन्तप उदाहृतं १९ इदानीन्दा नभेदमुच्यते दातव्यमिति दातव्यमितिएवंमनःकृत्वायद्दानंदीयतेऽनुपकारिणेप्रत्यु पकारासमर्थाय समर्थायादिनिरपेक्षन्दीयते देशेपुण्येकुरुक्षेत्रादौ कालेसंक्रान्त्या दौ पात्रेचषडङ्गविद्वेदपारगइत्यादौ आचारनिष्ठायइत्यर्थः तद्दानंसात्विकंस्मृतं २०

आनन्दगिरिकृतटीका

विवेकी तस्यग्रहोनामाग्रहाभिनिवेशस्तेनेत्याह अविवेकेति आत्मनःस्वस्यदेहादेरि त्यर्थः १९ क्रमप्राप्तंदानस्यगुणनिमित्तभेदमाह इदानीमिति दातव्यमि त्येवंमनःकृत्वादानमेवमयाभाव्यं नफलमित्यभिसन्धायेत्यर्थः २० राजसताम

स्वामिकृतटीका

णाविवेककृतेनदुराग्रहेणात्मनःपीड़यायत्तपःक्रियते परस्योत्सादनार्थंम्वाअन्यस्यवि नाशार्थमभिचाररूपं तत्तामसमुदाहृतंकथितं १९ पूर्वंप्रतिज्ञातमेव दानस्यत्रै विध्यमाह दातव्यमिति दातव्यमेवेत्येवंनिश्चयेन यद्दानंदीयते अनुपकारिणेप्र त्युपकारासमर्थायदेशेकुरुक्षेत्रादौकालेग्रहणादौपात्रेचेतिदेशकालसाहचर्यात् स प्तमीप्रयुक्तापात्रेपात्रभूतायतपःश्रुतादिसम्पन्नायब्राह्मणायेत्यर्थः यद्वाचतुर्थ्यैवैषापात्रे इतिकृजन्तंरक्षकाय इत्यर्थः सहिसर्वस्मादापद्गणाद्दातारंपातीतिपाता तस्मैयदेवंभू तंदानंतत् सात्विकं २० राजसंदानमाह यत्विति कालान्तरेऽयंमांप्रत्युपकरि

भाषाअनुवाद

तामसतपस्या कहतेहैं किअविवेकसे कुचेष्टाकर शरीरकोक्लेशदेयकिम्वाऔर किसीके विनाशदुखकेअर्थ अभिचारस्वरूपजोतपतिसकोपण्डितजनतामसतपक हतेहैं १९ पूर्वकथित अङ्गीकृत दानके विषयमेभी सात्विकादि तीनप्रकार कह तेहैं किदानकरनाहीं चाहियेऐसीनिश्चयसे जोदानऔरउससेप्रत्युपकारनहो अर्थात्अपनाउपकार नचाहै नवहउपकारकेजोग्यहो जिसकोदानदेय औरकु रुक्षेत्रकाशीप्रयागतीर्थस्थानमे तथाग्रहणसंक्रान्तिपर्वआदिमे औरवेदशास्त्रयुक्तब्रा ह्मणोंकोअथवायहपात्रसकलआपदोंसे दाताकीरक्षाकरैएवंभूतपाताकहेपात्रको जोदानदियाजाय उसीकोपण्डितजनसात्विकदानकहतेहैं २० राजसदानकहते

CC-0. In Public Domain. Digitized by eGangotri

यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः दीयतेचपरिक्लिष्टंतद्दानंराजसंस्मृतं २१
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतं २२

शाङ्करभाष्यम्।

यत्विति यत्तुदानंप्रत्युपकारार्थंकालेत्वयंमांप्रत्युपकरिष्यतीत्येवमर्थं फलंवास्यदानस्यमेभविष्यत्युद्दिष्टमिति तदुद्दिश्यपुनर्दीयतेचपरिक्लिष्टंखेदसंयुक्तंतद्राजसंस्मृतं २१ अदेशेति अदेशकालेअपुण्यदेशेम्लेच्छाशुच्यादिसङ्कीर्णेअकालेपुण्यहेतुत्वेनाऽप्रख्यातेसंक्रांत्यादिविशेषरहिते अपात्रेभ्यश्चमूर्खतस्करादिभ्योदेशादिसंयतौवा असत्कृतंप्रियवचनपादप्रक्षालनपूजादिरहितमवज्ञातं पात्रपरिभवयुक्तञ्चतद्दानं तामसमुदाहृतं २२ यज्ञदानतपःप्रभृतीनां साङ्गुण्यकरणायायमुपदेशउ

आगिरिनन्दकृतटीका।

सदानविभजनं स्पष्टार्थं २१ विहितानां कर्म्मणांप्रमादयुक्ते वैगुण्ये कथंपरिहारः स्यादित्याशंक्याह यज्ञेति ओमिति ब्रह्मेत्यादिश्रुतेः ओमिति तावद्ब्रह्मणो नामनिर्देशःतत्त्वमसीतिश्रुतेःतदित्यपि ब्रह्मणोनामनिर्देशःसदेवसौम्येदमितिश्रुतेः सदित्यपि तस्यनामेतिमत्वाह ओमिति कथंनिर्देशेनतेषांविधानमित्याशंक्याह निर्देशेति यज्ञादीनांवैगुण्यप्रतीतिकालेयथोक्तनामान्यतमोच्चारणाद्वैगुण्यंसिध्यतीतिभावः कर्म्मसाद्गुण्यकारणंविविधनामस्तौति ब्राह्मणाइति २२। २३

स्वामिकृतटीका

ष्यतीत्येवमर्थंफलंवास्वर्गादिकमुद्दिश्ययत्पुनर्दानंदीयतेपरिक्लिष्टं चित्तक्लेशयुक्तं यथावत्येवंभूतंतत्दानंराजसमुदाहृतंकथितं २१ तामसंदानमाह अदेशेति अदेशेअशुचिस्थानेअकालेअशौचादिसमये अपात्रेभ्योबिधनटादिभ्योयद्दानंदीयतेतद्देशकालपात्रसम्पत्तावपिअसत्कृतं पादप्रक्षालनादिसत्कारशून्यं अवज्ञातंपात्रतिरस्कारयुक्तं एवम्भूतं तामसमुदाहृतं २२

भाषाअनुवाद

हैं किसमयकेअनुसार यहमेराप्रत्युपकारकरेगाइससे अथवास्वर्गफलभोगकेअर्थचित्तक्लेशयुक्तकहेदेतेसमयकष्टहोअैसाजोदानतिसकोशिष्टलोगराजसकहते २१
अवतामसदानकहतेहैं किअदेशकहे अपवित्रस्थानमेअकालकहे अशौचादिसमयमे औअपात्रकहे चोरलवारनाचनेगावनेनकलकरनेवालोंको जोदानअथवादेशकालविद्यावानकेरहतेभी असत्कृतकहे पादप्रक्षालनआदिसत्काररहितया अनादरसेजोदानसुपात्रकोभीदियाजाय तिसकोशिष्टलोग तामसकहतेहैं २२

CC-0. In Public Domain. Digitized by eGangotri

ओंतत्सदिति निर्देशो ब्रह्मणस्त्रिविधःस्मृतः ब्राह्मणास्तेनवेदाश्च यज्ञाश्च विहितापुरा २३

शाङ्करभाष्यं

च्यते ओंतत्सदिति एषनिर्देशः निर्दिश्यतेऽनेनेति निर्देशः त्रिविधोनामनिर्देशो ब्रह्मणःस्मृतश्चिन्तितोवेदान्तेषु ब्रह्मविद्भिर्ब्राह्मणास्तेन निर्देशेनत्रिविधेनवेदाश्च यज्ञाश्चविहितानिर्मिताःपुरा पूर्वमिति २३ निर्देशस्तुत्यर्थमुच्यते तस्मादोमि

स्वामिकृतटीका

नन्वेवंविचार्यमाणेसर्वमपियज्ञतपोदानादि राजसतामसप्रायमेवेति व्यर्थोयज्ञादिप्रयासइत्याशंक्य तथाविधस्यापिसात्विकत्वोपपादनप्रकारंदर्शयितुमाह ओमिति ओंतत्सदिति त्रिविधोब्रह्मणःपरमात्मनोनिर्देशोनाम्नाव्यपदेशःस्मृतःशिष्टैःतत्रतावदोमिति त्रिवृद्ब्रह्मेत्यादिश्रुतिप्रसिद्धेरोमिति ब्रह्मणोनामजगत्कारणत्वेनातिप्रसिद्धत्वात् विदुषांअपरोक्षत्वाच्चतच्छब्दोऽपिब्रह्मणोनामपरमार्थसत्वसाधुत्वप्रशस्त्वादिभिःसच्छब्दोऽपिब्रह्मणोनाम सदेवसौम्येदमग्रआसीदित्यादिश्रुतेः अयंत्रिविधोऽपिनामनिर्दिशोविगुणमपि सगुणंकर्त्तुंसमर्थइत्याशयेनस्तौति तेनत्रिविधेन

भाषाअनुवाद

जोकहोकि ऐसाविचारकरनेसे प्राय सबयज्ञऔतप तथादानआदि राजस औतामसमालूहोते हैं इसकारणयज्ञआदिकर्म्मसे यत्नकरनाव्यर्थहै इसशङ्कापर पूर्वोक्तयज्ञदानआदि वज्रधाराजसतामसहोनेसेभी सात्विकत्वप्रतिपादनकीउपाय देखायकरकहतेहैं किओंतत्सत् येजोतीनशब्द सोपरमात्माकेनामके अनुरूपनिर्दिष्टहैं इनकेमध्यमे अकारउकारऔमकारका स्वरूप जोओंकार सोब्रह्महै यहश्रुतियोंमेप्रसिद्धहै सोओंशब्द ब्रह्महीकानामहै औरजगत्कारणहेतुसेज्ञानियोंकोअपरोक्षहै तत्भीब्रह्मऔपरमार्थऔविद्यमानत्वऔसाधुत्वऔप्रशस्तत्वादिप्रयुक्त औरहेसौम्य इसजगतकीसृष्टिकेपूर्वसत्स्वरूपमैया ऐसेश्रुतियोंकेकहनेसेसत्शब्दभीब्रह्महीकानामहै औरयह त्रिविधनामकहनेसे निकृष्टकोभीउत्कृष्टकरनेकों नामसमर्थहैं इसअभिप्रायसे प्रसंशाकरतेहैं किविधाताने सृष्टिकेप्रथम इसपरमात्माके त्रिविधनामकाउदेशकर ब्राह्मणऔ वेदऔयज्ञकानिर्माणकिया अथवाजोपरमात्माकायहतीनप्रकारनिर्देश सोई परमात्मानेब्राह्मणअतिपवित्रको सृष्टकिया इससे ओंतत्सत् यहकहना अतिप्रशस्त कहेउत्तमहै २३

CC-0. In Public Domain. Digitized by eGangotri

तस्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः प्रवर्त्तन्तेविधानोक्ताःसततंब्रह्मवादिनां २४
तदित्यनभिसन्धायफलंयज्ञतपःक्रियाः दानक्रियाश्चविविधाःक्रियन्तेमोक्षकांक्षिभिः २५

शाङ्करभाष्यं

त्युदाहृत्योच्चार्य्ययज्ञदानतपःक्रियाःयज्ञादिस्वरूपाःक्रियाःप्रवर्त्तन्ते विधानोक्ताःशास्त्रचोदिताः सततंसर्व्वदा ब्रह्मवादिनांब्रह्मवदनशीलानां २४ तदिति तदित्यनभिसन्धाय तदितिब्रह्माभिधानमुच्चार्य्य अनभिसन्धायचकर्म्मणःफलंयज्ञतपःक्रियाःयज्ञक्रियास्तपःक्रियाश्चयज्ञतपःक्रियाश्चदानक्रियाश्चविविधाः क्षेत्रहिरण्यप्रदानादिलक्षणाः क्रियन्ते निर्व्वर्त्तन्ते मोक्षकांक्षिभिः २५

आनन्दगिरिकृतटीका

पूर्वंसर्गादौनिर्माणञ्चप्रजापतिकर्त्तृकं यस्माद्ब्राह्मणादीनांकारणंयस्माच्चब्रह्मणोनिर्देशस्तस्मादित्युपसंहरति तस्मादिति ब्रह्मवादिनामित्यवब्रह्मवेदः २४
ओंशब्दस्य विनियोगमुक्त्वा तच्छब्दस्य विनियोगमाह तदित्यादिना २५

स्वामिकृतटीका

ब्रह्मणोनिर्देशेनब्राह्मणाश्चवेदाश्चयज्ञाश्चपुरासृष्ट्यादौविहितविधानानिर्म्मिताः सगुणीकृताइतिवा यद्वायस्मायंविविधोनिर्देशस्तेनपरमात्मना ब्राह्मणादयः प्रविभक्तमाःसृष्टाश्च तस्मात्तस्मायंनिर्देशोऽतिप्रशस्तइत्यर्थः २३ इदानींप्रत्येकमोङ्कारादीनां प्राशस्त्यं दर्शयिष्यन्नोंकारस्यतदेवाह तस्मादिति यस्मादेवंब्रह्मणोनिर्देशःप्रशस्तस्तस्मादोमित्युदाहृत्यतदुच्चार्य्यकृतावेदवादिनांयज्ञाद्याः शास्त्रोक्ताश्चक्रियाःसततंसर्व्वदाअङ्गवैकल्येऽपि प्रकर्षेणवर्त्तन्ते सगुणाभवन्तीत्यर्थः २४ द्वितीयंनामस्तौति

भाषाअनुवाद

अबओंकारआदिशब्दोंकी प्रशस्तादेखानेके मनोरथसे ओंकारका प्रशस्तत्व कहतेहैं किजिसहेतुपरमात्माकानिर्देश इसीरूपसेप्रशस्तहै इससेओंमालउच्चारणपूर्व्वक वेदादिकृतयज्ञदानऔतपस्याआदि शास्त्रोक्तक्रियासकलयथावत् संपूर्णनहोनेसे अर्थात् हीनहोनेसेभी अच्छीतरह गुणसंपन्नसर्वाङ्गपूर्णहोतीहैं २४
दूसरेनामकी प्रशंशाकरतेहैं किइससथलमेपूर्व्वोक्तओंशब्दकेसाथ तत्पदकासम्बन्धहै शुद्धचित्तमुमुक्षुपुरुषोंकी अकृतफलरूपकामना ब्रह्मरूपयज्ञआदिक्रिया तत्शब्दउच्चारणपूर्व्वक कीजातीहैं इसीसेचित्तशुद्धिकेद्वारा फलसङ्कल्पत्यागपूर्व्वक मुमुक्षुत्वसम्पादकत्वहेतुसे तत्शब्दकानिर्देशकरना भीप्रशस्तहै २५ सत्शब्द

CC-0. In Public Domain. Digitized by eGangotri

सद्भावेसाधुभावेचसदित्येतत्प्रयुज्यते प्रशस्तेकर्म्मणितथासच्छब्दःपार्थयुज्यते २६
यज्ञे तपसिदानेचस्थितिःसदितिचोच्यते कर्म्मचैवतदर्थीयंसदित्येवाभिधीयते २७

शाङ्करभाष्यं

ओंतच्छब्दयोर्विनियोगउक्तोऽथेदानींसच्छब्दस्यविनियोगःकथ्यते सद्भावइति सतःसद्भावेयथाअविद्यमानस्यपुत्रस्यजन्मनि तथासाधुभावेअसद्वृत्तस्यासाधोःसद्वृत्ता साधुभावस्तस्मिन्साधुभावेच सदित्येतदभिधानंब्रह्मणःप्रयुज्यते तत्रोच्यतेऽभिधीयतेप्रशस्तेकर्म्मणि विवाहादौच तथासच्छब्दःपार्थयुज्यते प्रयुज्यतइत्येतत् २६
यज्ञेयज्ञकर्म्मणि यास्थितिस्तपसिच यास्थितिर्दानेच यास्थितिः साच सदित्युच्यते

आनन्दगिरिकृतटीका।

इत्तमनूद्यानन्तरश्लोकतात्पर्य्यमाह ओंतच्छब्दयोरिति २६ प्रकारान्तरेण

स्वामिकृतटीका।

तदिति उदाहृत्येति पूर्व्वस्यानुषङ्गः तदित्युदाहृत्यउच्चार्य्यशुद्धचित्तैर्मोक्षाकांक्षिभिःपुरुषैःफलाभिसन्धिमकृत्वायज्ञाद्याःक्रियाःक्रियन्ते अर्थाच्चित्तशोधनद्वाराफलसंकल्पत्यजनेन मुमुक्षुत्वसम्पादकत्वात्तच्छब्दनिर्देशः प्रशस्तइत्यर्थः २५

सच्छब्दस्यप्रासस्त्यमाह सद्भावइति द्वाभ्यां सद्भावेअस्तित्वेदेवदत्तस्यपुत्रादिकमस्तीत्यस्मिन्नर्थेसाधुभावेचसाधुत्वेदेवदत्तस्यपुत्रादिश्रेष्ठमित्यस्मिन्नर्थेसदित्येतत्पदं प्रयुज्यते प्रशस्तेमाङ्गलिकेविवाहादिकर्म्मणिचसदितिकर्म्मेति सच्छब्दोयुज्यतेप्रयुज्यते सङ्गच्छत इति वा २६ किञ्चयज्ञइति यज्ञादिषुयास्थितिस्तात्पर्य्येणाव

भाषाअनुवाद

जोप्रशस्तहै यहदोश्लोकसे कहतेहैं किसत्भावकहे अस्तित्वऔ साधुभावक हेसाधुत्व इनदोनोअर्थको सत्शब्दकहताहै औरहेअर्जुन प्रशस्तकहे माङ्गलिक विवाहादिकर्ममेभी यहसत्कर्म इनविषयोंमे सत्शब्दका प्रयोगयोग्यहै औमङ्गलादिअर्थकोभीकहताहै २६ औरयज्ञतपदानमे जोस्थितिकहै इनकातात्पर्यजानिज अवस्थानहै उसकोभी विद्वानजन सत्कहतेहैं औपरमात्माकेअर्थ अथवा यज्ञतपदानकेअर्थ जोकर्मकियेजां वेभीसत्कहेजातेहैं जोयज्ञदानतपआदिकर्म परमात्माकीसेवाकेअर्थ औजोकर्मसवअसात्विक किम्बाविगुणअङ्गहीनभीहों पर श्रद्धापूर्वककियेहों औब्रह्मकेनाम जोओंतत्सत् इनसेयुक्तकियेहों तोसगुणसात्विकहोतेहैं २७ अवमनुष्य श्रद्धापूर्वक कर्ममेप्रवृत्तहोय इसलियेअश्रद्धालुतक

CC-0. In Public Domain. Digitized by eGangotri

अश्रद्धयाहुतंदत्तं तपस्तप्तंकृतञ्चयत् असदित्युच्यतेपार्थनचतत्प्रेत्यनोइह २८
इति श्रीभगवद्गीतायां ब्रह्मविद्यायां श्रद्धात्रयविभागयोगोनाम सप्तदशोऽध्यायः १७

शाङ्करभाष्यं

विद्वद्भिःकर्मचएवतदर्थीयंयज्ञदानतपोर्थीयमथवा यस्याभिधानत्रयंप्रकृतं तदर्थीय मीश्वरार्थीयमित्येतत् सदित्येवाभिधीयते तदेतत्यज्ञदानतपआदिकर्मअसात्त्विकं विगुणमपि श्रद्धापूर्वकंब्रह्मणोभिधानत्रयप्रयोगेणसगुणंसात्त्विकंसम्पादितम्भवति २७ तत्रचसर्वत्रश्रद्धाप्रधानतयासर्वंसम्पाद्यते यस्मात्अश्रद्धयेति तस्मात्अ

आनन्दगिरिकृतटीका

सच्छब्दस्यविनियोगमाह यज्ञइति नामत्रयोच्चारणेनसाङ्गुण्यंसिध्यतीति प्रक रणार्थमुपसंहरति तदेतदिति २७ अश्रद्धान्वितस्यापि कर्मणोनामत्रयोच्चा

स्वामिकृतटीक

स्यानंतदपिसदित्युच्यते यस्यचेदंनामत्रयंसएवपरमात्माअर्थःफलंयस्यतत्तदर्थंकर्म पूजोपहारगृहाङ्गणपरिमार्जनोपलेपनरङ्गमाङ्गलिकादिक्रिया तत्सिद्ध्येयदन्यत् कर्मक्रियतेउद्यानशालित्वेधनार्जनादिविषयंतत्कर्म तदर्थीयं तच्चातिव्यवहितम पि सदित्येवाभिधीयते यस्मादेवमतिप्रशस्तमेतन्नामायंतस्मादेतत्सर्वंकर्मसाङ्गुण्या र्थंसङ्कीर्त्तयेदिति तात्पर्य्यार्थः अत्रचार्थवादानुपपत्त्याविधिःकल्प्यतेविधेयंस्तूयते वस्त्वितिन्यायात् अपरेतु प्रवर्त्तन्तेविधानोक्ताःक्रियतें मोक्षकांक्षिभिरित्यादिवर्त्त मानोपदेशःसमिधोयजतीत्यादिवद्विधितयापरिणमनीयइत्याहुस्तत्तुसङ्गावेसाधुभा वेचेत्यादिषु प्राप्तार्थत्वान्नसंगच्छतइति पूर्वोक्तक्रमेणविधिकल्पनैवज्यायसी २७

भाषाअनुवाद

र्मकीनिन्दाकरतेहैं किअश्रद्धासे होमतपदानऔपूजाआदिकर्म जोकियेजातेहैं उनको ज्ञानीशिष्टकहे भलेलोग असत्मात्रकहतेहैं क्योंकि अङ्गविकलहोनेसे इ नकर्मोकाफल परलोकमेभी नहींहोताहै औअयशकरनेवालेहैं इससेइहलोकमे भीकुछफलनहींहै तोशरीरकाक्लेश औधनकीखरावीकरनेसेभी क्याफलहै अ यशतोकरके नकरकेभी मिलेहीगाजोइसफलकीइच्छातुमकोहोय २८
इति श्रीजगन्नाथशुक्लविरचितमनभावनीनामभाषाटीकायांसप्तदशोऽध्यायः १७

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

अश्रद्धयाहुतंहवनंकृतंदत्तञ्चब्राह्मणेभ्योऽश्रद्धयातपस्तप्तमनुष्ठितमश्रद्धया तथाऽश्रद्धयैवकृतंयत्स्तुतिनमस्कारादितत्सर्व्वमसदित्युच्यते मत्प्राप्तिसाधनमार्गवाह्यत्वात् पार्थ नचतद्वह्वायासमपिप्रेत्यफलाय नाऽपोहार्थंसाधुभिर्निन्दितत्वादिति २८

इति शाङ्करभाष्येसप्तदशोऽध्यायः १७

आनन्दगिरिकृतटीका

रणादवैगुण्येश्रद्धाप्राधान्य'नस्यादित्याशंक्याह तत्रचेति सप्तमीभ्यांप्रकृतंयज्ञादि गृह्यतेसर्वयज्ञादिसगुणमितिशेषः तस्यासत्वंसाधयति मत्प्राप्तीति ऐहिकामुष्मिक स्वाफलमश्रद्धितेनापिकर्मणासम्पत्स्यतेकुतोऽस्यासत्त्वमित्याशंक्याह नचेति तस्यो भयविधफलाहेतुत्वेहेतुमाह साधुभिरिति निन्दन्तिहिसाधवःश्रद्धारहितंकर्मअतो नैतदुभयफलौपयिकमित्यर्थः तदनेनशास्त्रानभिज्ञानामपिश्रद्धावतांश्रद्धयासात्विक त्वादिलैविध्यभाजांराजसतामसाहारादित्यागेन सात्विकाहारादिसेवयासत्वैकग्र रणानांप्राप्तमपियज्ञादिवैगुण्यंब्रह्मनामनिर्देशेनपरिहरतांपरिशुद्धबुद्धीनां श्रवणा दिसामग्रीसञ्जाततत्वसाक्षात्कारवतांमोक्षोपपत्तिरितिस्थितं २८

इति आनन्दगिरिकृतटीकायां सप्तदशोऽध्यायः १७

स्वामिकृतटीका

इदानींसर्वकर्मसु श्रद्धयैवप्रवर्त्तयर्थमश्रद्धयाकृतं सर्वंनिन्दति अश्रद्धेति अश्रद्धया हुतंहवनंदत्तंदानंतपस्तप्तंनिवर्त्तितंयच्चान्यदपिकृतंतत्सर्वमसदित्युच्यतें यतस्तत्प्रे त्यलोकान्तरेनफलतिविगुणत्वात् नोइह नचास्मिन्लोकेफलतिअयज्ञस्करत्वात्र जस्तमोमयींत्यक्त्वाश्रद्धांसत्वमयींश्रितः तत्वज्ञानेऽधिकारीस्यादितिसप्तदशेस्थितं २८

इति स्वामिकृतटीकायां सप्तदशोऽध्यायः १७

CC-0. In Public Domain. Digitized by eGangotri

श्रीमद्भगवद्गीता

अष्टादशोध्यायः ।

अर्जुनउवाच संन्यासस्यमहाबाहो तत्त्वमिच्छामिवेदितुं त्यागस्यचहृषीकेश पृथक्केशिनिसूदन १

शाङ्करभाष्यं

सर्व्वस्यैवगीताशास्त्रस्यार्थोस्मिन्नध्यायेउपसंहृत्यसर्व्वश्रुतिवेदार्थोवक्तव्यइत्येवमर्थो यमध्यायआरभ्यतेसर्वेषुह्यतीतेष्वध्यायेषु उक्तोर्थोऽस्मिन्नध्यायेवगम्यतेऽर्जुनस्तुसन्न्या सत्यागशब्दार्थयोरेवविशेषंबुभृत्सुरुवाच सन्न्यासस्येति सन्न्यासशब्दार्थस्यइत्येत द्वेमहाबाहोतत्त्वन्तस्यभावस्तत्त्वं याथात्म्यमित्येतत्इच्छामिवेदितुं ज्ञातुं त्यागस्यचत्या गशब्दार्थस्येत्येतत्हृषीकेशपृथक् इतरेतरविभागंकेशिनिसूदनकेशिनामाकश्चित् असुरस्तन्निसूदितवान्भगवान् वासुदेवस्तेन तन्नाम्नासम्बोध्यतेऽर्ज्जुनेन १

भषा अनुवाद

अबप्रथमसमग्रअष्टादशअध्यायका तात्पर्य्यसंक्षेपसेश्रीधरस्वामीकहतेहैं कि भगवानश्रीकृष्णने समग्रगीताशास्त्रकाजोसंग्रहार्थ सोईपरमार्थहै यहनिर्णयकर नेकेअर्थ अठारहें अध्यायमे न्यासऔत्यागभिन्नभिन्नकरके स्पष्टरूपसेकहाहै औ सर्वकर्म्माणिमनसासंन्यस्यास्तेसुखंवशी यह ५ अध्यायका १३ श्लोकऔशुभाशुभ फलैरेवंमोक्ष्यसेकर्मबन्धनैःसंन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसियह ९ अध्याय का २८ श्लोकऔत्यक्त्वाकर्मफलासङ्गंनित्यतृप्तोनिराश्रयःयह ४ अध्यायका २० श्लो कऔसर्वकर्मफलत्यागंततःकुरुयतात्मवान् यह १२ अध्यायका ११ श्लोकइनसबश्लो कोंसेऔरऔरअध्यायमेभीतौनतौनश्लोकोंसेफलमात्रत्यागकरकेनिष्कामसमस्तकर्म करनेकाउपदेशदियाहै परन्तुपरमकरुणामयसर्वज्ञ जोभगवानश्रीकृष्ण सोपर स्परविरुद्धबचनकभीभीउपदेशनकरैंगे इसीसेकर्म्मोकेत्यागऔकर्मोकेकरनेकेविष यमेंजिसप्रकारसेविरोधनपडे सोईजाननेकीइच्छाकरिअर्जुनकहतेहैं किहेहृषी केशअर्थात्इन्द्रियोंकेनियामकप्रवर्त्तक औहेकेशिनिषूदनकेशीनामदैत्यविजलीला केसमैअश्वरूपधरकेआया तोभगवानउसकेमुखमे अपनाहाथडाल ककरीकेसमा नचीरके डालदियाथा सोईकहाकिहेमहाबाहो श्रीकृष्ण संन्यासऔ त्यागशब्द का तत्त्वअर्थ मैभिन्नभिन्नकरके जानाचहूंहौं सोदयाकरके कहिये १

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

तत्र तत्रनिर्दिष्टौ संन्यासत्यागशब्दौननिर्लुण्ठितार्थौपूर्वेष्वध्यायेष्वतोऽर्जुनायदृष्टव तेतन्निर्णयायभगवानुवाच काम्येति काम्यानांअश्वमेधादीनांकर्मणांन्यासम्परित्या गंसंन्यासंसंन्यासशब्दार्थमनुष्ठेयत्वेनप्राप्तस्यानुष्ठानंकवयःपण्डिताः केचिद्विदुर्विजा नन्तिनित्यनैमित्तिकानामनुष्ठीयमानानां सर्वकर्मणामात्मसम्बन्धितयाप्राप्तस्यफल स्यत्यागःसर्वकर्मफलत्यागःतमाहुःकथयन्ति त्यागंत्यागशब्दार्थंविचक्षणाःपण्डिताः २

आनन्दगिरिकृतटीका

पूर्वैरध्यायैर्विस्तरेणयतस्ततोविच्छिन्नतयोक्तमर्थं सुखप्रतिपत्त्यर्थं संक्षेपेणोप संहृत्याभिधातुमध्यायान्तरमवतारयति सर्व्वस्यैवेति उपसंहृत्यवक्तव्यइतिसम्बन्धः किञ्चोपनिषत्सुयतस्ततोविस्मृतस्यार्थस्यबुद्धिसौकर्य्यार्थमस्मिन्नध्याये संक्षिप्ताभिधा नंकर्त्तव्यमुपनिषदांगीतानाञ्चैकार्थत्वादित्याह सर्वञ्चेति कथंसर्वोपिशास्त्रार्थोस्मि न्नध्यायेसंक्षिप्योपसंह्रियतें तत्राह सर्वेषुहीति ननुवेदार्थश्चेदशेषतोत्रसङ्क्षिप्तोर्षि तस्तर्हिकिमिति त्यागेनैकेसंन्यासयोगादितिच वेदार्थैकदेशविषयंप्रश्नप्रतिवचनन्त त्राह अर्जुनस्त्विति दृष्टयगनयोस्तत्त्वंवेदितुमिच्छामीति विशेषणाद्दृष्टयर्थंस्तयोरस्ती तिगम्यतें बुभुत्सितस्यद्रष्टव्यत्वादेकदेशेतदभावादुक्तप्रश्नोपपत्तिरितिभावः १

ननुपूर्वेष्वध्यायेषुतत्रसन्न्यासत्यागयोरुक्तत्वात् किमितिपुनस्तौपृच्छेतेत्राह द्वयोगात्तत्राह तत्रतत्रेति ननिर्लुण्ठितार्थौननिकृष्टार्थौनविविक्तार्थावित्यर्थः बुभु

स्वामिकृतटीका

न्यासत्यागविभागेनसर्वगीतार्थसंग्रहंस्पष्टमष्टादशेप्राह परमार्थविनिर्णये अ त्रचसर्वकर्म्माणिमनसासंन्यास्यास्तेसुखंवशी संन्यासयोगयुक्तात्मेत्यादिषु कर्म्मसंन्या सउपदिष्टस्तथात्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयःसर्वकर्मफलत्यागं ततःकुरु यतात्मवानित्यादिषुचफलमात्रत्यागेनकर्म्मानुष्ठानमुपदिष्टंनचपरस्परविरुद्धंसर्वज्ञः परमकारुणिकोभगवानुपदिशेत्अतःकर्म्मसंन्यासस्यतदनुष्ठानस्यचाविरोधप्रकारंबु भुत्सुरर्जुनउवाच संन्यासस्येति भोहृषीकेशसर्वेन्द्रियनियामकहेकेशिनिसूदनके शिनाम्नोमहतोहयाक्षतेर्दैत्यस्ययुद्धेसुखंव्यादायभक्षितुमिच्छतोऽत्यन्तंव्याप्तसुखेवाम वाङ्मुखंप्रवेश्यतत्क्षणमेवविदृङ्गनतेनैववाङ्गनाकर्कटिकाफलवत्तंविदार्य्यनिस्फुटितवा नतएवहेमहाबाहोइतिसम्बोधनंसंन्यासस्यत्यागस्यचतत्वंपृथग्विवेकेनवेदितुमिच्छा मि १ अत्रोत्तरंश्रीभगवावाच काम्यानामिति काम्यानांपुत्रकामोयजेतस्व

CC-0. In Public Domain. Digitized by eGangotri

श्रीभगवानुवाच काम्यानांकर्म्मणांन्यासं संन्यासंकवयोविदुः सर्वकर्मफल त्यागंप्राहुस्त्यागं विचक्षणाः २

आनन्दगिरिकृतटीका

त्वयाप्रश्नस्यप्रदत्तत्वात्प्रष्टुरभिप्रायंप्रश्नेनप्रतिपद्यभगवानुत्तरमुक्तवानित्याह अत इति पक्षद्वयोपन्यासेनसन्न्यासत्यागशब्दयोरर्थभेदंकथयति काम्यानामिति २

स्वामिकृतटीका

र्गकामोयजेतेत्यादिकामोपबन्धेनविहितानांकर्मणां न्यासंपरित्यागंसन्न्यासंकवयो विदुःसम्यक्फलैःसह कर्मणामपिन्यासंसन्न्यासंपण्डिताजानन्तीत्यर्थःसर्वेषांकाम्या नांनित्यनैमित्तिकानांचकर्मणांफलमात्रत्यागंप्राहुस्त्यागंविचक्षणानिपुणाः नतुस्व रूपतःकर्मत्यागं ननुनित्यनैमित्तिकानांफलाश्रवणादविद्यमानस्यफलस्यकथंत्यागः स्यात्नहिवन्ध्यायाःपुत्रत्यागःसंभवतिउच्यतेयद्यपिस्वर्गकामःपशुकामइत्यादिवत् अ हरहः सन्ध्यामुपासीतयावज्जीवमग्निहोत्रं जुहोतीत्यादिषुफलविशेषोनश्रूयते त थाप्यपुरुषार्थेव्यापारेप्रेक्षावन्तंप्रवर्त्तयितुमशक्नुवन् विधिर्ब्विश्वजितायजेतेत्यादि ष्विवसामान्यतः किमपिफलमाक्षिपत्येव नचातीवगुरुमतश्रद्धयास्वसिद्धिरेवविधेः प्रयोजनंमन्तव्यं पुरुषप्रवृत्त्यनुपपत्तेर्दुष्परिहरत्वात् श्रूयतेचनित्यादावपिपरंसर्व

भाषा अनुवाद

इसअर्जुनकोप्रश्नकाउत्तरभगवानकहतेहैं किदेखोपुत्रकोकामनाकरिपुत्रइष्टियज्ञ करैऔस्वर्गकीकामनाकरिअश्वमेधयज्ञकरै तथाऔरऔरकामनाकरिजोजोकर्म विहितहैं एसेजोकाम्यकर्म तिनसबकेपरित्यागकरनेकोहीपण्डितलोगसंन्यास जानतेहैं अर्थात्फलसहितसकलकर्मकेत्यागको संन्यासज्ञानकरतेहैं औरजि तनेकर्मअकर्मकहे कुत्सितकर्मऔनित्यनैमित्तिककर्मोकेफलमात्रत्यागकोविचक्ष णकहे निपुणलोग त्यागकहतेहैं परविचारसेतो कर्मत्यागकरनेकोतोत्यागनहीं कहतेहैं फलत्यागवतुत्यागहोसकैहै क्योंकि वेऽतेरेकर्मएसेहैं किजिन का शरीररहतेत्यागनहींहोसकताहै तोशास्त्रोक्तकर्मनित्यनैमित्तकउपासनाआ दिजिनसेवुद्धिकीशुद्धिऔज्ञानकीयोग्यताहोतीउनकात्यागलोकविरुद्धसंसारअवस्था मेंअनुचितहै परन्तुजिसकोतत्त्वज्ञान नहींभयाहै उसकोकर्मफलकेत्यागकरने हीकोत्यागजानो औजिसकोतत्वज्ञानहै उसीकोसमस्तकर्मका संन्यासहोसकैहै औरउचितहै यहभगवाननेकहा २ मतान्तरकोनिषेधकरतेऽये उक्तविष

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

यदि काम्यकर्मपरित्यागः फलपरित्यागो वार्थो वक्तव्यः सर्वथा परित्यागमात्रं सन्न्यासत्यागशब्दयोरेकोऽर्थः स्यात् तद्घटपटशब्दादिवजात्यन्तरभूतार्थौ ननु नित्यनैमित्तिकानां कर्मणां फलमेव नास्तीत्याहुः कथमुच्यते तेषां फलत्यागः यथा वन्ध्यायाः पुत्रत्यागो नैष दोषः नित्यानामपि कर्मणां भगवता फलवत्त्वस्येष्टत्वात् वक्ष्यति भगवान् अनिष्टमिति न तु सन्न्यासिनामिति च सन्न्यासिनामेव हि केवलं कर्मफलासम्बन्धं दर्शयन्न सन्न्यासिनां नित्यकर्मफलप्राप्तिर्भवत्यत्यागिनां प्रेत्येति दर्शयति त्याज्यं दोषेति त्याज्यन्त्यक्तव्यं दोषवत् दोषो स्यास्तीति दोषवत् किं तत् कर्मबन्धहेतुत्वात् सर्व्वमेव अथवा दोषो यथा रागादिस्त्यज्यते तथा त्याज्यमित्येके कर्म प्राहुर्मणीषिणः पण्डिताः सांख्यादिदृष्टिमाश्रिता अधिकृतानान्तु कर्म्मिणामपीति तत्रैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे कर्मिण एवाधिकृतास्तानपेक्षैते विकल्पाः न तु ज्ञाननिष्ठान् व्युत्थापिनः सन्न्या

स्वामिकृतटीका

एते पुण्यलोका भवन्तीति कर्मणा पितृलोक इति धर्मेण पापमपनुदतीत्यादिषु तस्माद्युक्तमुक्तं सर्वं कर्मफलत्यागं प्राहुस्त्यागं विचक्षणा इति ननु फलत्यागे पुनरतिनिष्फलेषु कर्मसु प्रवृत्तिरेव न स्यात् तन्न सर्वेषां कर्मणां संयोगपृथक्त्वेन विविदिषार्थतया विनियोगात् तथा च श्रुतिः तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति ततश्च श्रुतिपदोक्तं सर्वफलं बन्धकत्वेन त्यक्त्वा विविदिषार्थं सर्वकर्मानुष्ठानं घटत एव विविदिषा च नित्यानित्यवस्तुविवेकेन निवृत्तदेहाद्यभिमानतया बुद्धेः प्रत्यक्प्रवणता तावत्पर्य्यन्तञ्च सत्त्वशुद्ध्यर्थं ज्ञानविरुद्धं यथोचितमावश्यकं कर्म कुर्वतस्तत्फलत्याग एव कर्मत्यागो नामनस्वरूपेण तथा च श्रुतिः कुर्व्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति ततः परन्तु सर्व्वकर्मनिवृत्तिः स्वत एव भवति तदुक्तं नैष्कर्मसिद्धौ प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव उक्तञ्च भगवता यस्त्वात्मरतिरेव स्यादित्यादि वशिष्ठेन चोक्तं न कर्माणि त्यजेद्योगी कर्मभिस्त्यज्यते ह्यसाविति ज्ञाननिष्ठाविक्षेपकत्वमालक्ष्य त्यजेद्वा तदुक्तं श्रीभागवते तावत् कर्माणि कुर्व्वीत न निर्व्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचर इत्यादि अलमतिप्रसङ्गेन प्रकृतमनुसरामः अविदुषः फलत्यागमात्रमेव त्यागशब्दार्थो न कर्मत्याग इति २

CC-0. In Public Domain. Digitized by eGangotri

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपःकर्म न त्याज्यमिति चापरे ३

शाङ्करभाष्यं

सिनोपेक्ष्य ज्ञानयोगेन सांख्यानां निष्ठा मया पुरा प्रोक्ता इति कर्माधिकारादपावृत्ता ये तान्प्रति विहिता चिन्ता ननु कर्मयोगेन योगिनामिति अधिकृताः पूर्वं विभक्तनिष्ठा अपीह सर्वशास्त्रोपसंहारप्रकरणे यथा विचार्यन्ते तथा सांख्या अपि ज्ञाननिष्ठा विचार्यन्तामिति न तेषां मोहक्लेशदुःखनिमित्तत्यागानुपपत्तेर्न कायक्लेशनिमित्तानि दुःखनिसांख्या आत्मनि पश्यन्ति इच्छादीनां क्षेत्रधर्मत्वेनैव दर्शितत्वात् अतस्तेन कायक्लेशदुःखभावात् कर्म परित्यजन्ति नापि ते कर्माण्यात्मनि पश्यन्ति येन नियतं कर्ममोहात् परित्यजेयुर्गुणानां कर्मणैव किञ्चित्करोमीति हि ते सन्न्यस्यन्ति सर्वकर्माणि मनसा सन्न्यस्येत्यादिभिर्हि तत्त्वविदः संन्यासप्रकार उक्तस्तस्माद्येन्येऽधिकृताः कर्मण्यनात्मविदो येषाञ्च मोहात्त्यागः सम्भवति कायक्लेशभयाच्च त एव तामसास्त्यागिनो राजसाश्चेति निन्दते कर्मिणामनात्मज्ञानां कर्मफलत्यागस्तुत्यर्थं सर्वारम्भपरित्यागी मौनासन्तुष्टो येन केनचिदनिकेतः स्थिरमतिरिति परमार्थसंन्यासिनो विशेषितत्वात् वक्ष्यति च ज्ञानस्य या परा निष्ठेति तस्मात् ज्ञाननिष्ठाः संन्यासिनो नेह विवक्षिताः कर्मफलत्याग एव सात्विकत्वेन गुणेन तामसत्वाद्यपेक्षया संन्यास उच्यते न मुख्यः सर्वकर्मसंन्यासः सर्वकर्मसंन्यासासम्भवे च न हि देहभूतेति हेतुवचनान्मुख्य एवेति चेन्न हेतुवचनस्य स्तु

भाषा अनुवाद

एतदेव मतान्तरनिरासेन द्रढीकर्त्तुं मतभेदं दर्शयति यको दृढ़करनेकी इच्छासे मतभेद देखाते हैं कि हिंसादिकर्म दोषयुक्त औ अनर्थहेतुसे बन्धस्वरूप हैं इसलिये सब कर्मका त्याग करना उचित यह सांख्यमतवाले विवेकी माहिंस्यात्सर्वभूतानि इससे कहते हैं और अग्नीषोमीयं पशुमालभेत इस श्रुतिसे अग्निष्टोम यज्ञमे पशुहिंसाको यज्ञक्रियाका अङ्ग विधान किया है और सकल कर्मोंके करनेमे जीवहिंसा ज्ञान अज्ञानपूर्व्वक होती ही है इससे कर्म्ममात्रका त्याग कहा है औ कर्मकाण्डी मीमांसामतवाले अग्नीषोमीयं पशुमालभेत् इस विधिसे कहते हैं कि यज्ञकर्ममे हिंसा हिंसा नहीं है तो करनी ही चाये औ यज्ञ छोडकर हिंसा करनेसे पुरुषको पाप होता है इस अभिप्रायपर भगवान कहते हैं कि कोई बुद्धिमान तो कहते कि दोषवत कहे दोषयुक्त कर्म त्याग करना चाहिये औ कोई यज्ञदानतप कर्मका त्याग नहीं कहते हैं क्योंकि विधिकृत हिंसासे दोष नहीं होता है पर अहिंसा परमधर्म है ३ इस प्रकारसे अन्य मत कहिकर अब अपने मत कहनेकी इच्छासे भगवान

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

त्यर्थत्वात्ययात्यागाच्छान्तिरनन्तरमितिकर्मफलत्यागस्तुतिरेव यथोक्तानेकपक्षानुष्ठानाशक्तिमन्तं अर्जुनं प्रतिविधानात्तथेदमपिनहिदेहभृताशक्यमिति कर्मफलत्यागस्तुत्यर्थंनसर्व्वाणिकर्माणिमनसासंन्यस्यनैवकुर्व्वन्नकारयन्नास्ते इत्यस्यपक्षस्यापवादः केनचिद्दर्शयितुं शक्यस्तस्मात् कर्म्मण्यधिकृतान्प्रत्येवैषसंन्यासत्यागविकल्पः येतुपरमार्थदर्शिनःसांख्यास्तेषां ज्ञाननिष्ठायामेव सर्व्वकर्म्मसंन्यासलक्षणायामधिकारो नान्यत्रेति नतेविकल्पार्हास्तथोपपादितमस्माभिर्व्वेदाविनाशिनमित्यस्मिन्प्रदेशे तृतीयादौच ३ तत्रतेषुविकल्पभेदेषु निश्चयमिति निश्चयंशृणु अवधारयमे

आनन्दगिरिकृतटीका

तत्किमिदानीं संन्यासत्यागशब्दयोरात्यन्तिकंभिन्नार्थत्वन्तथाचप्रसिद्धिविरोधःस्यादित्याशंक्यावान्तरभेदेपि नात्यन्तिकभेदोस्तीत्याह यदीति पुत्राभावाद्वन्ध्यायास्तत्त्यागायोगवन्नित्यनैमित्तिककर्मणामफलानां फलत्यागानुपपत्तेरुक्तत्यागशब्दार्थोनसिध्यतीतिशङ्कते नन्विति नित्यनैमित्तिककर्मफलस्यवन्ध्यापुत्रसादृश्याभावात्तत्त्यागसंभवादुक्तत्यागशब्दार्थःसम्भवतीति समाधत्ते नैषदोषइति भगवतातेषांफलवत्त्वमिष्टमित्यत्रवाक्यशेषमनुकूलयति वक्ष्यतीति तर्हिसंन्यासिनामसंन्यासिनाञ्चनित्याद्यनुष्ठायिनामविशेषेण तत्फलंस्यादिति चेन्नैवेत्याह नत्विति वक्ष्यतीत्यनुकर्षणञ्चकारार्थः प्रसक्तस्यवचसोर्थंप्रकृतोपयोगित्वेनसंगृह्यस्मारयति संन्यासिनामिति काम्यानिवर्जयित्वानित्यनैमित्तिकानिफलाभिलाषाद्यैते कर्त्तव्यानीत्युक्तंपक्षंप्रतिपक्षनिरासेनदृढ़यितुंविप्रतिपत्तिमाह त्याज्यमिति कर्मणःसर्वस्यदोषवत्त्वेहेतुमाह वन्ध्येति दोषवदित्येतद्दृष्टान्तत्वेनव्याचष्टे अथवेति कर्मण्यनधिकृतानामकर्मिणामेवकर्मत्याज्यंकर्मिणान्तत्त्यागेप्रत्यवायादित्याशंक्याह अधिकृतानामिति नहितेषामपिकर्मत्यजतांप्रत्यवायोहिंसादियुक्तस्यकर्म्मणोनुष्ठानेपरं प्रत्यवायादिति भावःसांख्यादिपक्षसमाप्तावितिशब्दः मीमांसकपक्षमाह तत्रवैवेति कर्माधिकृतेष्ववेति यावत्कर्मनित्यनैमित्तिकञ्च काम्यानांकर्मणामित्यारभ्यश्लोकाभ्यांकर्मिणोधिकृतामनधिकृतांश्चापेक्ष्यदर्शितविकल्पानांप्रवृत्तिरित्याशंक्याह कर्मिणइति एवकारव्यवच्छेद्यमाह नत्विति तदेवस्फुटयति ज्ञानेति कर्माधिकृतानां ज्ञाननिष्ठातोविभक्तनिष्ठावत्त्वेन पूर्वोक्तानामपि शास्त्रार्थोपसंहारेपुनर्विचार्यत्वव्यज्ञातनिष्ठानामपि विचार्यत्वमत्राविरुद्धमितिशङ्कते नन्विति सांख्यानांपरमार्थज्ञाननिष्ठानांनात्र

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

विचार्य्यतेऽउत्तरमाह नतेषामिति ननुतेषामपिस्वात्मनिक्लेशदुःखादिपश्यतान्तद नुरोधेनराजसकर्मत्यागसिद्धेर्विचार्यत्वंनेत्याह नकार्येति तत्रचैवाध्यायोक्तंहेतूक रोति इच्छादीनामिति स्वात्मनिसांख्यादीनांक्लेशाद्यप्रतिपत्तौफलितमाह अतइ ति ननुतेषांक्लेशादर्शनेपिस्वात्मनिकर्माणि पश्यतान्तत्तत्रागोक्तरूपांकायक्लेशादिकरत्वान्नेत्याह नापीति अज्ञानान्मोहमाहात्म्यात्नियतमपिकर्मत्यक्तुंश क्यंनतत्त्वविदांस्वात्मनिकर्मादर्शनेतत्तत्रागेहेत्वभावादिमत्वाह मोहादिति कथंत र्हितेषामात्मनि कर्माण्यपश्यतांप्राप्तप्रभावेतत्तत्राग संन्यासस्तत्राह गुणानामिति अ विवेकप्राप्तानांकर्मणांत्यागस्तत्त्वविदामित्युक्तंस्मारयन्नप्राप्तप्रतिषेधंप्रत्यादिशति सर्वे तितत्त्वविदामत्राविचार्यत्वेफलितमाह तस्मादिति येनात्मविदस्तएवेत्युत्तरवाक्यसम्ब न्धः कर्मण्यधिकृतानामनात्मविदांकर्मत्यागसम्भावनांदर्शयति येषाञ्चेति तन्निबन्धाकु त्वोपयुक्तेत्याशंक्याह कर्मिणामिति किञ्चपरमार्थसंन्यासिनांप्रशस्यत्वोपलम्भान्मनि न्दाविषयत्वमित्याह सर्वेति किञ्चात्रापिसिद्धिंप्राप्तोयथेत्यादिना ज्ञाननिष्ठायावक्ष्यमा णत्वात्तद्वतानेहविचार्य्यतेत्याह वक्ष्यतीति कर्माधिकृतानामेवात्रविवक्षितत्वान्नज्ञा ननिष्ठानामित्युपसंहरति तस्मादिति ननुसंन्यासशब्देनसर्वकर्मसंन्यासस्यग्राह्यत्वात्त थाविधसंन्यासिनामिह विवक्षितत्वंप्रतिभातीतत्राह कर्मेति संन्यासशब्देनमुख्यस्यैव संन्यासस्यग्रहणंगौणमुख्ययोर्मुख्येसम्प्रत्ययादन्यथातदसम्भवे हेतूक्तिवैयर्थ्यादप्राप्तप्र तिषेधादितिशङ्कते सर्वेति नेदंहेतुवचनंसर्वकर्मसंन्यासासम्भवसाधकंकर्मफल त्यागस्तुतिपरत्वादिति परिहरति नेत्यादिना एतदेवदृष्टान्तेनस्पष्टयति यथेति दृ ष्टान्तेपियथाश्रुतार्थत्वंकिंनस्यादित्याशंक्याह यथोक्तेति नहिफलत्यागादेवज्ञानंवि नामुक्तिर्युक्तामुक्तेश्चानैकाधीनत्वसाधकश्रुतिस्मृतिविरोधादइष्टेत्यादिनाचानन्तरमेव ज्ञानसाधनविधानानर्थक्यात्त्यागस्तुतिरेवात्रग्राह्येत्यर्थः दृष्टान्तगतमर्थंदार्ष्टान्तिकें योजयति तथेति प्रागुक्तपक्षापवादविवक्षयाहेतूक्तेर्मुख्यार्थत्वमेवकिंनस्यादित्याशं क्य तदपवादेहेत्वभावान्नैवमित्याह नसर्वेति नचेयमेवहेतूक्तिस्तदपवादिकान्यथा सिद्धेरुक्तत्वादितिभावः मुख्यसंन्यासापवादासम्भवेसंन्यासत्यागविकल्पस्यकथंसाव काशतेत्याशंक्याह तस्मादिति ज्ञाननिष्ठान्प्रत्युक्तविकल्पानुपपत्तौकुतस्तेषामधि कारस्तत्राह येत्विति संन्यासिनांविकल्पानर्हत्वेनज्ञाननिष्ठायामेवाधिकारस्यभूयः सुप्रदेशेषुसाधितत्वान्नसाधनीयत्वापेक्षेत्याह तथेति ३

CC-0. In Public Domain. Digitized by eGangotri

निश्चयंशृणुमेतत्रत्यागेभरतसत्तम त्यागोहिपुरुषव्याघ्रत्रिविधःसंप्रकीर्त्तितः ४

शाङ्करभाष्यम्।

ममवचनात्तत्रत्यागेत्यागसंन्यासविकल्पेयथादर्शितेभरतसत्तममरतानांसाधुतम त्यागोहि त्यागसंन्यासशब्दवाच्योहि योर्थःसएकएवेत्यभिप्रेत्याह त्यागोहीति पुरुषव्याघ्रत्रिविधस्त्रिप्रकारस्तामसादिप्रकारैःसंप्रकीर्त्तितःशास्त्रेषुसम्यक्कथितःयस्मात्तामसादिभेदेन त्यागसंन्यासशब्दवाच्योऽर्थोधिक्रियतेकर्म्मिणोऽनात्मज्ञस्यत्रिविधःसम्भवति नपरमार्थदर्शिनइत्ययमर्थोदुर्ज्ञानस्तस्मात् अवतत्त्वज्ञान्योवक्तुंसमर्थस्तस्मान्निश्चयंपरमार्थशास्त्रार्थविषयमध्यवसायमैश्वरं मेममशृणु ४ कःपुनरसौ

स्वामिकृतटीका

त्याज्यमिति दोषवद्धिंसादिदोषवत्त्वेनबन्धकमितिहेतोःसर्व्वमपिकर्मत्याज्यमित्येकेसांख्याःप्राऊर्मणीषिणइति अस्यायंभावःमाहिंस्यात्सर्व्वाभूतानीतिनिषेधःपुरुषस्यानर्थहेतुर्हिंसेत्याह अग्नीषोमीयंपशुमालभेतेत्यादिप्राकरणिकीविधिस्तुहिंसायाःक्रतूपकारकत्वमाह अतोभिन्नविषयत्वेनसामान्यविशेषन्यायागोचरत्वात्द्रव्यसाध्येषुसर्व्वेष्वपिकर्मसुहिंसादेःसम्भवात्सर्वमपिकर्मत्याज्यमेवेति तदुक्तंदृष्टवदानुश्रविकःसह्यविशुद्धिक्षयातिशययुक्तइति अपरेतुमीमांसका यज्ञादिकंकर्मनत्याज्यमेवेतिप्राहुः अयंभावःक्रत्वर्थापिसतीयंहिंसापुरुषेणकर्त्तव्या साचान्योद्देशेनापिकृतापुरुषस्यप्रत्यवायहेतुरेवतथाहिविधिर्विधेयस्यतदुद्देशेनानुष्ठानंविधत्तेतादर्थ्यस्तुक्षणत्वात्तच्छेषस्यनत्वेवंनिषेधोनिषेधस्यतादर्थ्यमपेक्षतेप्राप्तिमात्रापेक्षकत्वात् अन्यथाअज्ञानप्रमादादिकृतेदोषाभावप्रसङ्गात् तदेवंसमानविषयत्वेनसामान्यशास्त्रस्यविशेषेणबाधानास्ति दोषवत्त्वं अतोनित्यंयज्ञादिकर्म नत्याज्यमिति ३

भाषाअनुवाद

कहतेकिहेभरतसत्तमभरतवंशीअर्जुन इसपूर्वोक्तपरस्परविरुद्धमतकेविषयमेनिश्चयकरूप जोमेरेवचनसोसुनो औरत्यागकीलोकमेप्रसिद्धिहै तोउसकेविषयमेऔरक्यासुनैं ऐसाअनादरनकरना यहीकहतेहैं किहेपुरुषव्याघ्रकहेपुरुषश्रेष्ठअर्जुन त्यागपदार्थबडाकठिनदुर्ब्बोधहै जिसहेतु इसकाम्यकर्मकात्याग तत्वदर्शीलोगोंनेअच्छीतरहसेविचारकर तामसादिभेदसेत्रिविधकहेतोनप्रकारकहाहै सोत्यागविषयकतीनप्रकार इसीअध्यायकेसतयेंश्लोकसेकहेंगे कियतस्यतुसंन्यासःइति ४

CC-0. In Public Domain. Digitized by eGangotri

यज्ञदानतपःकर्मनत्याज्यंकार्य्यमेवतत् यज्ञोदानंतपश्चैवपावनानिमनीषिणां ५

शाङ्करभाष्यं

निश्चयदृत्याह यज्ञइति यज्ञोदानन्तपइत्येतत्त्रिविधंकर्मनत्याज्यं नत्यक्तव्यंकार्यंकरणीयमेवतत् यस्मात्यज्ञोदानंतपश्चैवपावनानिविशुद्धिकारणानिमनीषिणांफलानभिसन्धीनामित्येतत् ५ एतान्यपीति एतान्यपितुकर्माणि यज्ञदानतपांसिपावनान्युक्तानिसङ्गमासक्तिन्तेषुत्यक्त्वा फलानिचतेषांपरित्यजयकर्त्तव्यानीतिअनुष्ठेयानीति मेममनिश्चितंमतमुत्तमंनिश्चयंशृणुमेतवेतिप्रतिज्ञायपावनत्वंचसहेतुमुक्त्वा

आनन्दगिरिकृतटीका।

कर्माधिकृतान्प्रत्येवोक्तविकल्पप्रवृत्तावपिकुतोनिर्द्धारणसिद्धिरित्यत्राह तत्रेतितमेवनिश्चयंदर्शयितुमादौत्यागगतमवान्तरविभागमाह त्यागोहीति ननुत्यागसंन्यासयोरुभयोरपिप्रकृतत्वाविशेषेत्यागस्यैवावान्तरविभागाभिधाने संन्यासस्योपेक्षिकत्वमापद्येतनेत्याह त्यागोहीति सात्त्विकोराजसस्तामसश्चेत्युक्तेर्थेत्रैविध्येपिस्वयमेवनिश्चयसद्भावोक्तिमत्वभागवतेननिश्चयेनेत्याशंक्याह यस्मादिति भगवतोन्योनोक्तविभागेतत्वानिश्चयाद्भागवतनिश्चयस्यश्रोतव्यतेतिनिगमयति तस्मादिति ४

तमेवभगवतोनिश्चयंविशेषतोनिर्द्धारयितुं प्रश्नपूर्वकमनन्तरश्लोकप्रवृत्तिंदर्शयति कःपुनरिति यज्ञादीनांकर्त्तव्यत्वेहेतुमाह यज्ञइति नकेवलंनत्याज्यंकिन्तुकर्त्तव्यमेवेत्याह कार्य्यमिति प्रतिज्ञामेवंविभजयहेतुंविभजते कस्मादिति ५

स्वामिकृतटीका।

एवंमतभेदमुपन्यस्यस्वमतंकथयितुमाह निश्चयंशृणुइति तत्रैवंविप्रतिपन्नेत्यागेनिश्चयंमेवचनाच्छृणु त्यागस्यलोकप्रसिद्धत्वात्किमत्रश्रोतव्यमितिमावमंस्थाइत्याह हेपुरुषव्याघ्रपुरुषश्रेष्ठ त्यागोहिदुर्बोधःहियस्मादयंकर्मत्यागस्तत्त्वविद्भिस्तामसादिभेदेनत्रिविधःसम्यग्विवेकेनप्रकीर्त्तितः त्रैविध्यञ्चनियतस्यतुसंन्यासःकर्मणइत्यादिनावक्ष्यति ४ प्रथमंतावन्निश्चयमाह यज्ञेतिद्वाभ्यां मनीषिणांविवेकिनांपावनानि चित्तशुद्धिकराणि ५ येनप्रकारेणकृतान्येतानिपावनानिभवन्ति

भाषाअनुवाद

अबप्रथम अपनेनिश्चितवचनको दोश्लोकसेकहतेहैं कियज्ञदानऔतपरूपकर्म त्यागकरनेयोगनहींहैं वरनअवश्यहीकर्त्तव्यहैं क्योंकि येयज्ञदानतपपूजनआदिसत्कर्म विवेकीपुरुषोंकोपावनकरतेहैं अर्थात्चित्तकेशुद्धिकरनेवालेहैं ५

CC-0. In Public Domain. Digitized by eGangotri

एतान्यपितुकर्माणिसङ्गंत्यक्त्वाफलानिच कर्त्तव्यानीतिमेपार्थनिश्चितंमतमुत्तमं ६

शाङ्करभाष्यं

एतान्यपिकर्माणिकर्त्तव्यानीत्येतन्निश्चितंमतंअनुत्तममिति प्रतिज्ञातार्थोपसंहारएवनापूर्व्वार्थंवचनमेतान्यपीति प्रकृतसन्निकृष्टार्थतोपपत्तेः सासङ्गस्यफलार्थिनोबन्धहेतून्येतान्यपिकर्माणिमुमुक्षोःकर्त्तव्यानीति अपिशब्दस्यार्थःनत्वन्यानि कर्माण्यपेक्ष्यैतान्यपीत्युच्यन्तेअन्येवर्णयन्तिनित्यानांकर्म्मणांफलाभावात्सङ्गंत्यक्त्वाफलानिचेतिनोपपद्यते एतान्यपीतियानिकाम्यानिकर्माणि नित्येभ्योऽन्यानि एतानिअपिकर्त्तव्यानिकिमुतयज्ञदानतपांसिनित्यानिइति तदसत्नित्यानामपिकर्मणांफलवत्त्वस्योपपादितत्वात् यज्ञोदानंतपश्चैवपावनानीत्यादिवचनेननित्यान्यपिकर्माणिबन्धहेतुत्वाशङ्क्याजिहासोर्भुमुक्षोःकुतःकाम्येषुप्रसङ्गः दूरेणह्यवरङ्कर्म्मेतिचनिन्दितत्वात् यज्ञार्थात्कर्मणोन्यत्रेति चकाम्यकर्मणां बन्धहेतुत्वस्यनिश्चितत्वात् त्रैगुण्यविषयावेदास्त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयन्तेतेपुण्यमासाद्यसुरेन्द्रलोकंविशन्तीतिच दूरव्यवहितत्वाच्चनकाम्येष्वेतान्यपीतिव्यपदेशः ६ तस्माद्यज्ञस्याधिकृतस्यमुमुक्षोः नियतस्येतिनियत

आनन्दगिरिकृतटीका

प्रतिज्ञातमर्थमुपसंहरति एतान्यपीति उपसंहारश्लोकाक्षराणिव्याकरोति एतानीत्यादिना अक्षरार्थमुक्त्वा तात्पर्य्यार्थमाह निश्चयमिति प्रकृतार्थोपसंहारे गमकमाह एतान्यपीति अपिशब्दस्यविवक्षितमर्थंदर्शयति सासङ्गस्येति व्यावर्त्तं कीर्त्तयति नत्विति एतान्यपीत्यादिवाक्यं ननित्यकर्मविषयमितिमतमुपन्यस्यति अन्यइति नचेदिदंनित्यकर्मविषयंतर्हिइत्याशंक्यवाक्यमवतार्य्य व्याकरोति एतानीत्यादिना नित्यानामफलत्वमुपेत्ययज्ञोद्यन्तदयुक्तमितिदूषयति तदसदिति यत्तुकाम्यान्यपिकर्त्तव्यानीतितन्निरस्यति नित्यान्यपीति किञ्चकाम्यानांभगवतानिन्दितत्वा

भाषाअनुवाद

जिसप्रकारसेकियेगये येकर्म विवेकीजनोकेचित्तको शुद्धकरतेहैं सोईप्रकारसेइनकर्मोका अनुष्ठानदेखावतेहुयेकहतेहैं किहेपार्थअर्जुन सङ्गकहेकर्तृत्वाभिनिवेश अर्थात्हमकर्त्ताइसकर्म्मकोकरतेहैं इसअहङ्कारकोछोडकर केवलईश्वरकेआधीनरूपसे कर्मकाअनुष्ठानकरनाउचितहै औरफलकीकामनाकोभीत्यागकरके जोकर्मकाकरनाहै यहीहमारानियतअभिमतसिद्धान्तहै इसीसेवहकर्मउत्तमहैं यहभगवान अर्जुनसेकहाहै ६ अबइसश्लोकसे देखावतेहैं

CC-0. In Public Domain. Digitized by eGangotri

नियतस्यतुसंन्यासःकर्म्मणोनोपपद्यते मोहात्तस्यपरित्यागस्तामसःपरिकीर्त्तितः ७

शाङ्करभाष्यं

स्यतुनित्यस्यसंन्यासःपरित्यागःकर्म्मणोपपद्यतेअत्रस्यपावनत्वस्येष्टत्वात् मोहादज्ञानात्तस्यनियतस्यपरित्यागोनियतञ्चावश्यंकर्त्तव्यं त्यजतेंचेति विप्रतिषिद्धमतोमोहनिमित्तः परित्यागस्तामसः परिकीर्त्तितोमोहश्च तमइति ७

आनन्दगिरिकृतटीका।

नतेषुमुमुक्षोरनुष्ठानमित्याह दूरेणेति किञ्चमुमुक्षोरपेक्षितमोक्षापेक्षयाविरुद्धफलवत्त्वात्काम्यकर्मणोनतेषुतस्यानुष्ठानमित्याह यज्ञार्थादिति काम्यानांबन्धहेतुत्वंनिश्चितमित्यत्रैवपूर्वोत्तरवाक्यानुकूल्यंदर्शयति त्रैगुण्येति किञ्चपूर्वश्लोकेयज्ञादिनित्यकर्मणांप्रकृतत्वादेतच्छब्देनसन्निहितवाचिनापरामर्शात् काम्यकर्मणाञ्चकाम्यानांकर्मणामितिव्यवहितानांसन्निहितपरामर्शकैतच्छब्दाविषयत्वान्नकाम्यकर्माण्येतान्यपीति व्यपदेशमर्हन्तीत्याह दूरेति ६ नित्यकर्मणामवश्यकर्त्तव्यत्वमुक्तमुपजीव्यापेक्षितं पूरयन्ननन्तरश्लोकमवतारयति तस्मादिति ननुकश्चिन्नियतमपिकर्मत्यजन्नुपलभ्यते तत्राह मोहादिति अज्ञानंपावनत्वापरिज्ञानंअज्ञस्यनित्यकर्मत्यागोमोहादित्येतदुपपादयति नियतञ्चेति नित्यकर्मत्यागस्यमोहकृतत्वेकृतस्तामसत्वमित्याशंक्याह मोहश्चेति ७ इतश्चनित्यकर्मत्यागोनाज्ञस्यसम्भा

स्वामिकृतटीका

तत्प्रकारंदर्शयन्नाह एतान्यपीति यानियज्ञादीनिकर्माणि मया पावनानीत्युक्तान्येतान्यप्येवंकर्त्तव्यानि कथंसङ्गंकर्त्तृत्वाभिनिवेशं त्यक्त्वाकेवलमीश्वराधीनतया कर्त्तव्यानिफलानिचत्यक्त्वा कर्त्तव्यानीति मेमतं निश्चितं अतएवोत्तमं ६

प्रतिज्ञातंत्यागत्रैविध्यमिदानींदर्शयति नियतस्येतित्रिभिः काम्यस्यकर्मणोव

भाषाअनुवाद।

किसकलकाम्यकर्मोंको बन्धकत्वहै अर्थात्कामनाकरिकेकियेकर्म बन्धनकरतेहैं इसहैतुसेउनकात्यागकरनाहींकर्त्तव्यहै परन्तुनियतकहेनित्यकर्मोंकात्यागकरनायोग्यनहींहै क्योंकि नित्यकर्मसत्वशुद्धिकेद्वारा मोक्षकेसाधनस्वरूपहैं इससे यद्यपिकर्मकापरित्यागकरनाठीकहैं तौभी नित्यकर्मकात्याग मोहसेहीहोता अर्थात्तामसहै क्योंकि मोहतमोगुणसेहोताहै इससेउसत्यागको शिष्टलोगोंनेतामसहीकहाहै ७ राजसत्यागकोकहतेहैं किजोमनुष्य आत्मज्ञानविना के

CC-0. In Public Domain. Digitized by eGangotri

दुःखमित्येवयत्कर्म्मकायक्लेशभयात्त्यजेत् सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत् ८

शाङ्करभाष्यं

किञ्च दुःखमितिदुःखमित्येवयत्कर्मकायक्लेशभयात्शरीरदुःखभयात्त्यजेत् सकृत्वाराजसंरजोनिर्व्वर्त्यंत्यागं नैवत्यागफलंज्ञानपूर्व्वकस्यसर्व्वकर्मत्यागस्यफलंमोक्षाख्यंनलभेन्नैवलभते ८ कःपुनःसात्विकस्त्यागःकार्यमिति कार्यंकर्त्तव्यमित्येव यत्कर्म्मनियतंनित्यंक्रियतेनिर्व्वर्त्त्यते हेअर्जुनसङ्गफलञ्चैवनित्यानांकर्म्मणांफलवत्वे भगवद्वचनंप्रमाणमवोचामाथवायद्यपिफलंनश्रूयते नित्यस्यकर्म्मणस्तथापिनित्यकर्म्म कृतमात्मसंस्कारंप्रत्यवायपरिहारंवाफलंकरोत्यात्मनइतिकल्पयत्येवाज्ञस्तत्तामपि कल्पनांनिवारयति फलंत्यक्त्वेत्यनेनातः साधूक्तंसङ्गंत्यक्त्वाफलञ्चेति सत्यागोनित्य कर्म्मसुसङ्गफलपरित्यागःसात्विकः सत्वनिष्ठत्वोमतोऽभिमतः ९

आनन्दगिरिकृतटीका ।

वतीत्याह किञ्चेति ननुमोहंविनैवदुःखात्मकंकर्मकायक्लेशभयात्त्यजतिकरणानि हि कार्यंजनयन्तिश्राम्यन्तितथाचनतत्त्यागस्तामसोयुक्तस्तत्वाह दुःखमित्येवेति यत् कर्मदुःखात्मकमशक्यसाध्यमित्येवालोच्यतन्निर्व्वर्त्तेदेहस्येन्द्रियाणाञ्चक्लेशात्मनो भयात्त्यजति सतत्त्यक्त्वाराजसोनिमित्तंत्यागंकृत्वापिनतत्फलंमोक्षंलभतेकिन्तुकृते नैवराजसेनत्यागेनतदनुरूपंनरकंप्रतिपद्येतेत्याह दुःखमित्येवेत्यादिना कर्मत्या गस्तामसोराजसश्चेति द्विविधोदर्शितः ८ सम्प्रतिसात्विकंत्यागंप्रश्नपूर्व्वकंवर्णयति

स्वामिकृतटीका ।

ब्धकत्वात्संन्यासोयुक्तः नियतस्यतुनित्यस्यपुनःकर्मणः संन्यासस्त्यागोनोपपद्यते स त्त्वशुद्धिद्वारा मोक्षहेतुत्वात् अतस्तस्यपरित्यागउपादेयत्वेऽपि त्याज्यमित्येवंलक्ष णान्मोहादेवभवेत् सचमोहस्तामसत्वात्तामसः परिकीर्त्तितः ७

राजसंत्यागमाह दुःखमिति यःकर्त्तात्मबोधंविनाकेवलंदुःखमित्येवंमत्वाश रीरायासभयान्नित्यंकर्मत्यजेदितियत्ताद्दशस्त्यागोराजसोदुःखस्यराजसत्वात् अत स्तंराजसंत्यागंकृत्वासराजसःपुरुषस्त्यागफलंज्ञाननिष्ठालक्षणंनैवलभतइत्यर्थः ८

भाषाअनुवाद

वलकर्मकरना दुखमात्रविचारिके शरीरक्लेशकेभयसे नित्यकर्मकात्यागकरताहै सोत्याग राजसहै क्योंकि दुखरजोगुणका धर्म्महै इसीसे राजसत्यागकारीरजो गुणीपुरुषको ज्ञानमेंनिष्ठा जोत्यागकाफल सोकभूं नहींमिलैहै ८

CC-0. In Public Domain. Digitized by eGangotri

कार्य्यमित्येवयत्कर्म्मनियतंक्रियतेऽर्जुन सङ्गंत्यक्त्वाफलञ्चैवसत्यागःसात्त्विकोमतः ६

शाङ्करभाष्यं ।

ननुकर्मपरित्यागस्त्रिविधःसंन्यासइति चप्रकृतस्तत्तामसोराजसश्चोक्तस्त्यागः कथमिहसङ्गफलत्यागस्तृतीयत्वेनोच्यते यथात्रयेब्राह्मणाआगतास्तत्रषड्ङ्गविदौ द्वौचत्रियस्तृतीयइति तद्वत् नैषदोषस्त्यागसामान्येनस्तुत्यर्थत्वादस्तिहि कर्म्मसंन्यास स्यफलाभिसन्धित्यागस्यचत्यागत्वसामान्यन्तत्रराजसतामसत्वेन कर्म्मत्यागनिन्द्या कर्मफलाभिसन्धित्यागःसात्विकत्वेनस्तूयते सत्यागःसात्विकोमतइति यस्त्वधिकृतःस ङ्गंत्यक्त्वाफलाभिसन्धिञ्चनित्यंकर्मकरोति तस्यफलरागादिनाकलुषीक्रियमाणमन्तः करणंनित्यैश्चकर्म्मभिःसंष्क्रियमाणंविशुध्यति तत्विशुद्धंप्रसन्नमात्मालोचनक्षमञ्चव ति तस्यैवनित्यकर्मानुष्ठानेनविशुद्धान्तःकरणस्यात्मज्ञानाभिमुषस्यक्रमेणयथातन्निष ठस्यात्तद्वक्तव्यमित्याह नद्वेष्टिअकुशलंअशोभनंकाम्यंकर्म्मशरीरारम्भद्वारेणसंसारका रणंकिमनेनेत्यंकुशलेशोभनेनित्यकर्म्मणि सत्वशुद्धिज्ञानोत्पत्तितन्निष्ठाहेतुत्वेनमो

आनन्दगिरिकृतटीका

कःपुनरितिकर्त्तव्यमित्येवेत्येवकारेण नित्यस्वभाव्यान्तरंनिषिध्यते नित्यानांविध्युद्दे शेफलाश्रवणात् तेषांफलंत्यक्त्वेत्ययुक्तमित्याशंक्याह नित्यानामिति फलंत्यक्त्वेत्य स्यविधान्तरेणतात्पर्यमाह अथवेति नहिविधानाकृतंकर्म अनर्थकं विध्यानर्थक्या त्तेनस्वौतफलाभावेपिनित्यंकर्म विधितोनुतिष्ठन्नात्मानमजानन्ननुपकृतमनस्तोत्या तस्मिन्कर्मण्यात्मसंस्कारंफलंकल्पयति तदकरणेप्रत्यवायस्मृत्या तत्करणंकर्त्तुरात्म नस्तन्निवृत्तिंकरोतीतिवा नित्यकर्मण्युक्तांकल्पनामनुनिष्पादितफलकल्पनाञ्चफलं त्यक्त्वेत्यनेनभगवान्निवारयतीत्यर्थः नित्यकर्मसुफलत्यागोक्तेः सम्भवेफलितमाह अत इति ६ कर्मतत्फलत्यागस्य त्यागसन्न्यासशब्दाभ्यां प्रकृतस्यत्यागोहीतिवैवि

स्वामिकृतटीका

सात्त्विकंत्यागमाह कार्यमिति कार्यमित्येववुद्ध्या नियतमवश्यंकर्त्तव्यतया विहितंक र्मसङ्गंफलञ्चत्यक्त्वाक्रियतइति यत्ताद्दशस्त्यागः ससात्त्विकोमतः ६

भाषाअनुवाद

अबसात्त्विकरूप त्यागकहतेहैं किहेअर्जुन कर्म सबकर्त्तव्यहैं ऐसेविचारसे नियतकहेअवश्यकर्त्तव्यरूप विहितकर्मोंको कर्तृत्वअभिनिवेशकहे अहंबुद्धि औ फलकी कामनारहित जोत्यागकरना सोसात्त्विकत्यागकहे उत्तमत्यागहै ६

CC-0. In Public Domain. Digitized by eGangotri

नद्वेष्यकुशलंकर्मकुशलेनानुषज्जते त्यागीसत्त्वसमाविष्टोमेधावीच्छिन्नसंशयः १०

शाङ्करभाष्यं

त्वकारणमिदमित्येवंनानुषज्जते तत्रापिप्रयोजनमपश्यन्ननुसङ्गंप्रीतिंनकरोतीत्येतत् कःपुनरसौत्यागीपूर्वोक्तेनसङ्गफलपरित्यागेनतद्वांस्त्यागी यःकर्म्मणिसङ्गंत्यक्त्वातत् फलेचनित्यकर्मानुष्ठायी सत्यागीकदापुनरसावकुशलंकर्म नद्वेष्टि कुशलेचनानुषज्ज तइत्युच्यतेसत्त्वसमाविष्टोयदासत्त्वे नात्मानात्मविवेकविज्ञानहेतुनासमाविष्टःसंव्या प्तःसंयुक्तइत्येतत् अतएवचमेधावीमेधयात्मज्ञानलक्षणयाप्रज्ञया संयुक्तस्तद्वान्मेधा वीमेधावित्वादेवच्छिन्नसंशयःच्छिन्नोऽविद्याकृतः संशयोयस्यआत्मस्वरूपावस्थानमेव परंनिःश्रेयससाधनं नान्यत्किञ्चिदित्येवंनिश्चयेन च्छिन्नसंशयः १०

आनन्दगिरिकृतटीका

ध्यंप्रतिज्ञायप्रतिज्ञानुरोधेनद्विविधेव्युत्पाद्यतृतीयांविधान्तद्विरोधेनव्युत्पादयतोभग वतोऽकौशलमापतितमितिशङ्कते नन्विति प्रक्रमप्रतिकूलमुपसंहारवचनमनुचि तमित्यत्र दृष्टान्तमाह यथेति पूर्वोत्तरविरोधेनप्राप्तमकौशलंप्रत्यादिशति नैष दोषइति कर्मत्यागफलत्यागयोस्त्यागत्वेनसादृश्यात्कर्मत्यागनिन्द्यातत्फलत्याग स्तुत्यर्थमिदम्वचनमित्युपगमात् नविरोधोस्तीत्युक्तमेवव्यक्तीकुर्वन्नादौत्यागसामान्यं विशदयति अस्तीति सतिसामान्येनिर्देशस्यस्तुत्यर्थत्वंसमर्थयते तत्रेति एवंपूर्वापर विरोधंपराकृत्यअनन्तरश्लोकतात्पर्यमाह यस्त्विति फलरागादिनेत्यादिशब्देन कर्मस्वरूपासङ्गोगृह्यते अन्तःकरणमकलुषीक्रियमाणमितिच्छेदः विशुद्धेन्तःकर णेकिंस्यादित्याशंक्याह विशुद्धमिति मलविकलत्वंविशुद्धत्वंसंस्कारत्वंप्रसन्नत्वमिति

भाषा अनुवाद

एवम्भूतसात्विकत्यागमे प्रकृष्टनिष्ठायुक्तपुरुषके लक्षणकहतेहैं किसतोगुण सेसात्विकत्यागीपुरुष अकुशलकहेदुखदायीअर्थात् शिशिरकहे जाडेमेंप्रातःस्ना नआदिकर्मसेद्वेषनहींकरते औरअकुशलकहे ग्रीष्मकालकेमध्यानस्नानआदिकर्ममे प्रीतिनहींरखतेहैं इसकाकारणयह किवेलोगस्थिरबुद्धिअर्थात्विवेकसे अन्यकृतप राभवअनादरआदि महादुखभी सहतेहैं औस्वर्गादिसुखकोभी त्यागकरतेहैं फेरिसुखऔदुख जोक्षणिककहेक्षणमात्र रहनेवालाहै यहनिश्चयजानतेहैं औ जिसकादैहिकसुखदुखका ग्रहणऔत्यागकाइच्छारूप जोमिथ्याज्ञान नष्टहोगया है सोछिन्नसंशयपुरुषहैं १० जोकहोकि पूर्वोक्तकर्मोकेफल त्यागसेकर्मोहीं

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

योऽधिकृतःपुरुषःपूर्व्वोक्तेनप्रकारेणकर्मयोगानुष्ठानेनक्रमेणसंस्कृतात्मासन्ज न्मादिविक्रियारहितत्वेन निःक्रियमात्मानमात्मत्वेनसम्बुद्धः ससर्व्वकर्माणिमनसासं न्यस्यनैवकुर्व्वन्नकारयन्नासीनोनैस्कर्म्यलक्षणांज्ञाननिष्ठामश्नुत इत्येतत्पूर्वोक्तस्यकर्म्म योगस्यप्रयोजनमनेनश्लोकेनोक्तं यःपुनरधिकृतःसन्देहात्माभिमानित्वेनदेहश्चेदज्ञो वाधितात्मकर्त्तृत्वविज्ञानतयाहंकर्त्तेतिनिश्चितबुद्धिस्तस्याशेषकर्म्मपरित्यागस्याशक्य त्वात्कर्म्मफलत्यागेनचोदितकर्मानुष्ठानएवाधिकारोनत्याग इत्येतमर्थंदर्शयितुमाह नहीति नहियस्माद्देहश्चताद्देहंविभर्त्तीतिदेहभृद्देहात्माभिमानवान्देहभृदुच्यतेन हिविवेकीसन्हिवेदाविनाशिनमित्यादिनाकर्त्तृत्वाधिकारान्निवर्त्तितोतस्तेनदेहभृता ऽज्ञेन नशक्यंत्यक्तुंसंन्यसितुंकर्माण्यशेषतोनिःशेषेण तस्माद्यस्त्वज्ञोधिकृतोनित्यानि

आनन्दगिरिकृतटीका

भेदः क्रमेणश्रवणाद्यावृत्तिद्वारेणेत्यर्थः तन्निष्ठेत्यात्मज्ञाननिष्ठोक्ता काम्यकर्मणि तत्राज्यत्वेनद्वेषमभिनयति किमिति उभयत्रद्वेषंप्रीतिञ्चनकरोतीतिसामान्येनोक्तं कर्त्तारंप्रश्नपूर्व्वकंविशेषतोनिर्दिशति कःपुनरिति त्यागीत्युक्तं तत्रागिनमभिव्यनक्ति पूर्व्वोक्तेनेति कर्मणिसङ्गस्यतत्फलस्यचतत्रागेनेतियावत् उक्तमेवतत्रागिनंविशिष्टो ति यःकर्म्मणीति तत्फलंतत्रत्यागीतिसम्बन्धः काम्येनिषिद्धेचकर्म्मणिबन्धहेतुरितिन द्वेष्टिनित्यनैमित्तिकेचमोक्षहेतुरितिनप्रीयते तत्रकालविशेषंदृष्टान्तति कदेति नि त्यादिकर्मणाफलाभिसन्धिवर्जितेनचयितकल्पसम्पन्नत्वं यथार्थग्रहणसमर्थमुद्बुध्य तें तेनसमावेशदशायासुक्तप्रीतिद्वेषयोरभावोभवतीत्याह उच्यतइति चतुर्थपादं व्याकरोति अतएवेति समुद्बुद्धयथार्थग्रहणसामर्थ्येसमाविष्टत्वादितर्थः छिन्नसंश यत्वमेवविशदयति आत्मेति परनिःश्रेयसन्तस्यचसाधनंसम्यग्ज्ञानमेवेतियोजना १०

स्वामिकृतटीका

एवंभूतसात्विकत्यागपरिनिष्ठितस्यलक्षणमाह नद्वेष्टीत्यादि सत्वसमाविष्टः सत्वेनव्याप्तःसात्विकत्यागीअकुशलंदुःखावहंशिशिरेप्रातःस्नानादिकंकर्म्मनद्वेष्टिकु शलेचसुखकरेकर्म्मणिनिदाघेमध्याह्नस्नानादौ नानुषज्जतेप्रीतिंनकरोति तत्रहे तुःमेधावीस्थिरबुद्धिःयत्रपरपरिभवादिमहदपिदुःखंसहते स्वर्गादिसुखञ्चतत्रजति तत्रकियदेतत्तत्कालिकंसुखंदुःखञ्चेत्येवमनुसन्धानवानितर्थः अतएवच्छिन्नःसं शयोमिथ्याज्ञानदैहिकसुखदुःखयोरुपादित्यागपरिजिहीर्षा लक्षणंयस्यसः १०

CC-0. In Public Domain. Digitized by eGangotri

नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते ११

शाङ्करभाष्यं।

कर्माणिकुर्व्वन् कर्म्मफलत्यागीकर्मफलाभिसन्धिमात्रसंन्यासीसत्यागीत्यभिधीयतेक र्माण्यपिसन्नितिस्तुत्यभिप्रायेणतस्मात्परमार्थदर्शित्वेनैवदेहभृतादेहात्मभावरहि तेनाशेषकर्मसंन्यासःशक्यतेकर्त्तुं ११ किंपुनस्तत्प्रयोजनं यत्सर्व्वकर्मपरि

आनन्दगिरिकृतटीका

नद्वेष्टीत्यादिनाश्लोकेनोक्तमर्थंसङ्क्षिप्यानुवदति योऽधिकृतइति पूर्व्वोक्तप्र कारेणेतिकर्माणितत्फलेचसङ्गत्यागेनेत्यर्थःकर्मात्मयोगस्यानुष्ठानेनसंस्कृतात्मासन् क्रमेणश्रवणाद्यनुष्ठानद्वारेणकूटस्थंब्रह्मप्रत्यक्षेनसम्बुद्धइति सम्बन्धः परस्यनिः क्रियत्वेहेतुमाह जन्मादीति उक्तज्ञानवतःसर्वकर्मत्यागद्वारामुक्तिभाक्त्वं दर्शयति ससर्व्वेति आत्मज्ञानवतःसर्वकर्मत्यागसम्भावनामुक्त्वातद्धीनस्यतदसम्भवेहेतुवचन त्वेनअनन्तरश्लोकमवतारयति यःपुनरिति नवाधितमात्मनिकर्त्तृत्वविज्ञानमस्येत्य ज्ञस्तथातस्यभावस्तत्ता तयेतियावत् एतमर्थंदर्शयितुमज्ञस्य सर्वकर्मसंन्यासासम्भवे हेतुमाहेतियोजना यस्मादित्यस्यतस्मादित्युत्तरेणसम्बन्धः विवेकिनोपिदेहधारि तयादेहभृत्वाविशेषेकर्माधिकारःस्यादित्याशंक्याह नहीति कर्त्तृत्वाधिकारस्तत्पू र्वकंकर्मानुष्ठानंतस्मादितियावत् ज्ञानवतोदेहधारणेपितदभिमानित्वाभावोऽतःश ब्दार्थः अज्ञस्यसर्वकर्मत्यागायोगमुक्तंहेतूकृत्यफलितमाह तस्मादिति कर्मानु ष्ठायिनस्त्यागित्वोक्तिरयुक्तेत्याशंक्याह कर्मणीति कर्मिणोपिफलत्यागेनत्यागित्ववच नंफलत्यागस्तुत्यर्थमित्यर्थः कस्यतर्हिसर्वकर्मत्यागः सम्भवतीत्याशंक्य विवेकवैरा ग्यादिमतोदेहाभिमानहीनस्येत्युक्तंनिगमयति तस्मादिति ११

स्वामिकृतटीका

नन्वेवंभूतात्कर्मफलत्यागाद्वरंसर्वकर्मत्यागस्तथासतिकर्मविक्षेपाभावेनज्ञाननि

भाषाअनुवाद

कात्यागकर्नाहींश्रेष्ठयोंनहोय जिसहेतुविक्षेपकरनेवालेकर्मदूरहोनेसे अविक्षेप क्रमसेज्ञाननिष्ठारूपजोसुख सोसम्पन्नहोगा इसपरकहतेहैं किदेहअभिमानयुक्त मनुष्य तावत्सर्व्वकर्मोका सम्पूर्णत्यागनहींकरसकतेहैं इसमेप्रमाण तीसरेअध्या यकेपञ्चयेंश्लोकादिसेकहाहै किनकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत्इति इससे जोसकलकर्मका अनुष्ठानकरकेभी फलकेत्यागीहैं वेइपुरुष प्रधानत्यागीहैं ११

CC-0. In Public Domain. Digitized by eGangotri

अनिष्टमिष्टंमिश्रञ्चेतिविधंकर्मणःफलं भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित् १२

शाङ्करभाष्यं

त्यागात् स्यादित्युच्यते अनिष्टं नरकतिर्यगादिलक्षणं इष्टं देवादिलक्षणं मिश्रं इष्टा निष्टसंयुक्तंमनुष्यलक्षणञ्चैवंत्रिविधंत्रिःप्रकारं कर्मणोधर्माधर्मलक्षणस्यफलंवाच्या नेकाकारकरूपं व्यापारनिष्पन्नंसदविद्याकृतमिन्द्रजालमायोपमंमहामोहकरंप्रत्य गात्मोपसर्पीव फल्गुतयालयमदर्शनंगच्छतीतिफलनिर्वचनं तदेतदेवलक्षणंफलं भ वत्यत्यागिनामज्ञानां कर्मिणामपरमार्थसंन्यासिनां प्रेत्यशरीरपातादूर्ध्वं नतुपर मार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञाननिष्ठानांक्वचिन्नहिकेवलं स म्यक्दर्शननिष्ठाऽविद्यादिसंसारबीजं नोन्मूलयन्ति कदाचिदित्यर्थः १२

आनन्दगिरिकृतटीका

उक्ताधिकारिणःसर्वकर्मसंन्यासासम्भवेपिफलाभावेकृतस्तस्यकर्त्तव्यतेतिशङ्क ते किंपुनरिति गौणस्यमुख्यस्यचासंन्यासस्यफलंपिपृच्छिषितमितिविकल्पयति उच्य तइति सर्वकर्मत्यागोनामतदनुष्ठानेपितत्फलाभिसन्धित्यागःसचामुख्यसंन्यासस्तस्य फलमाह अनिष्टमिति मुख्येतुसंन्यासेसर्वकर्मत्यागेसम्यग्धीद्वारासर्वसंसारोच्छित्ति

स्वामिकृतटीका।

ष्ठासुखंसंपद्यतेतत्राह नहीति देहभृतादेहाभिमानवतानिःशेषेणसर्वाणिकर्माणि त्यक्तुंनहिशक्यानि तदुक्तं नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृदित्यादिना तस्मा द्यस्तुकर्माणिकुर्वन्नपि कर्मफलत्यागी सएवमुख्यःत्यागीत्यभिधीयते ११

भाषाअनुवाद

अबपूर्वोक्तत्यागका फलकहतेहैं किअनिष्टकहेनरक औइष्टकहेदेवत्व तथामि श्रकहेमनुष्यत्व येईपापपुन्यमिलेहुये कर्मोंकेफलहैं सोकाम्यकर्मकरनेवालोंको दे हान्तहोनेपर प्राप्तहोतेहैं क्योंकि सकाममनुष्योंको पापपुन्यओदोनोसे मिलेत्रिवि धकर्मसम्भवहैं परन्तु येकर्मसंन्यासीपुरुषको किसोतरहसम्भवनहोंहोते औसं न्यासीइसप्रसङ्गमे कर्मफलकात्यागीहो लेतेहैं यहांप्रमाणसुनोकि अनाश्रितःकर्म फलंकार्यंकर्मकरोतियः ससंन्यासीचयोगीचइतिछठेंअध्यायकेप्रथमश्लोकसेलेकरक हाहै औकर्मफलत्यागीपुरुषको सबजगहसंन्यासीकहा इससेयहफलत्यागी सात्त्वि कमनुष्यको पापकेअसम्भवहेतुसे औभगवत्कोअर्पणकरनेसे पुन्यफलकेत्यागहो नेसे त्रिविधजोकर्मफल वेकिसीप्रकारसेभी नहींहोतेहैं १२

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

अतःपरमार्थदर्शिनएवाशेषकर्मसंन्यासित्वंसम्भवत्यविद्याध्यारोपितत्वादात्मनिक्रियाकारकफलानां नत्वक्षस्याधिष्टानादीनिक्रियाकर्तृणिकारकान्यात्मत्वेनपश्यतोऽशेषकर्मसंन्यासःसम्भवति तदेतदुत्तरैःश्लोकैर्दर्शयति पञ्चेतिपञ्चइमानिवक्ष्यमाणानि हेमहाबाहो कारणानिनिवर्त्तकानिनिबोध मेममइत्युत्तरत्रचेतःसमाधानार्थंवस्तुवैषम्यप्रदर्शनार्थंच तानिचकारणानिज्ञातव्यतयास्तौति सांख्येज्ञातव्याःपदार्थाःसंख्यायन्तेयस्मिन्शास्त्रेतत्सांख्यंवेदान्तःकृतान्तइतितस्यैवविशेषणंकृतमितिकर्मोच्यते त

आनन्दगिरिकृतटीका।

रेवफलमित्याह नत्विति पादत्रयंव्याकरोति अनिष्टमित्यादिना तिर्य्यगादीत्यादिपदमवशिष्टनिकृष्टयोनिसंग्रहार्थं देवादीत्यादिपदंविशिष्टोत्कृष्टयोनिग्रहणायेति विभागः फलशब्दंव्युत्पादयति वाह्येति कारणद्वारकमनेकविधत्वमुक्त्वामिथ्यात्वमाह अविद्येति तत्कृतत्वेनदृष्टिमात्रदेहत्वेदृष्टान्तमाह इन्द्रेति प्रतीतितोरमणीयत्वंसूचयति महाबोहेति अविद्योत्थाश्चाविद्याश्रितत्वादात्माश्रितत्ववस्तुतोनास्तीत्याह प्रत्यगिति उक्तंफलंकर्मिणामिष्यतेचेदमुख्यसंन्यासफलोक्तिपरत्वंपादत्रयस्य कथमिष्टमित्याशंक्याह अपरमार्थेति फलाभिसन्धिविकलानांकर्मिणांदेहपातादूर्द्धंकर्मानुरोधिफलमावश्यकमित्यर्थः कर्मिणामेवसतामफलाभिसन्धीनाममुख्यसंन्यासित्वात्तदीयामुख्यसंन्यासस्यफलमुक्त्वाचतुर्थपादंव्याचष्टे नत्विति अमुख्यसंन्यासमनन्तरप्रकृतंव्यवच्छिनत्ति परमार्थेति तेषांप्रधानंधर्ममुपदिशति केवलेति क्वचिद्देशेकालेवानास्तियथोक्तंफलंतेषामितिसम्बन्धः तर्हिपरमार्थसंन्यासोऽफलत्वात् नानुष्ठीयेतेत्याशंक्य तस्यमोक्षावसायित्वान्नैवमित्याह नहीति १२

स्वामिकृतटीका

एवंभूतस्यकर्मफलत्यागस्यफलमाह अनिष्टमिति अनिष्टंनारकित्वं इष्टंदेवत्वं मिश्रंमनुष्यत्वं एवंत्रिविधंपापस्यपुण्यस्यचोभयमिश्रस्यचकर्मणोयत्फलं प्रसिद्धंतत् सर्वमत्यागिनांसकामानामेवप्रेत्यभवेभवति तेषांत्रिविधकर्मसम्भवात् नतुसन्यासिनांक्वचिदपिभवति संन्यासिशब्देनात्रफलत्यागसाम्यात् प्रकृताःकर्मफलत्यागिनोगृह्यन्ते अनाश्रितःकर्मफलंकार्य्यंकर्मकरोति यः ससंन्यासीचयोगीचेत्येवमादौ कर्मफलत्यागिषुसंन्यासिशब्दप्रयोगदर्शनात् तेषांसात्त्विकानांपापासम्भवादीश्वरार्पणेनचपुण्यफलस्यत्यक्तत्वात् त्रिविधमपिकर्मफलं नभवतीत्यर्थः १२

CC-0. In Public Domain. Digitized by eGangotri

पञ्चैतानिमहाबाहोकारणानिनिबोधमे सांख्येकृतान्तेप्रोक्तानिसिद्धयेसर्वकर्मणां १३

शाङ्करभाष्यं

स्यान्तःपरिसमाप्तिर्यत्रसकृतान्तःकर्मान्तइत्येतत्यावानर्थउदप्रानेसर्वकर्माऽखिलंपा र्थज्ञानेपरिसमाप्यतइत्यात्मज्ञानेसञ्जातेसर्वकर्मणांनिवृत्तिंदर्शयति अतस्तस्मिन्ना त्मज्ञानार्थेसांख्येकृतान्तेवेदान्तेप्रोक्तानिकथितानिसिद्धयेनिष्पत्तयेसर्वकर्मणां १३

आनन्दगिरिकृतटीका।

ननुअपरमार्थसंन्यासवदविशेषाज्ज्ञानंपरमार्थसंन्यासोऽपिकिंनस्यात्तत्रागस्यसु करत्वात्तत्राह अतःपरमार्थेति तस्यसम्यग्दर्शनादविद्यानिवृत्तौतदारोपितक्रिया कारकादिनिवृत्तेरितिहेत्वर्थः विद्यावतःसर्वकर्मसंन्यासित्वसम्भावनामुक्ता एवका रव्यावर्त्तंप्रदर्शयति नत्विति अविदुषोऽशेषकर्मणांतद्धेतूनाञ्चरागादीनांत्यागायो गेकारकेष्वधिष्ठानादित्यात्मदर्शनंहेतुमाह क्रियेति कथमधिष्ठानादीनांक्रियाक र्तृत्वं कथम्बाविदुषस्तेष्वात्मत्वधीरित्याशंक्यानन्तरश्लोकचतुष्टयस्यतात्पर्य्यमाह त देतदिति कर्माधिष्ठानादीनामप्रामाणिकत्वाशङ्कामादावुद्धरति पञ्चेतिउत्तर त्रेत्यधिष्ठानादिषुवक्ष्यमाणेष्वित्यर्थः वस्तूनांतेषामेववैषम्यंनिर्दिदर्शयिषितं नहिचे तःसमाधानादृतेज्ञातुंशक्यं तत्सांख्यशब्दंव्युत्पादयति ज्ञातव्येति आत्मा त्वं पदार्थस्तत्पदार्थाब्रह्मतयोरैक्यधीस्तदुपयोगिनश्चश्रवणादयः पदार्थास्तेसंख्यायन्तेव्यु त्पाद्यन्ते कृतान्तशब्दस्यवेदान्तविषयत्वंविभजते कृतमित्यादिना वेदान्तस्यतत्वधी

भाषा अनुवाद

जोकहोकिकर्मीपुरुषको कर्मफलक्योंनहोंगे इसशङ्कापर सङ्कल्पागीविद्वानमनु ष्यको जोकर्मबन्धनहीं यहसिद्धकरनेकीइच्छासे यहांसेपांचश्लोकसेकहतेहैं किहे महाबाहो कर्मोकीनिष्पत्तिमे येपांचकारण मेरेवचनसे जानो औअपनेकर्तृत्वरू प अभिमानको निवृत्तिकेअर्थ इनकारणोको अवश्य जाननाचाहिये किइसप्रकार परमात्मा सम्यकरूपसे प्रसिद्धअर्थात्ज्ञानका विषयहोताहै इसअर्थका सूचनकर नेवाला जोसांख्यभावार्थ यहकि तत्त्वज्ञानमे प्रकाशमान आत्मबोधहीको सांख्यक हतेहैं औरऐसेकर्मोका अन्तकहेसमाप्ति इसमेहै इसअर्थकासूचक जोकृतान्तअ र्थात्सांख्यकृतान्तकहे वेदान्तसिद्धान्तमे अथवाइसमे सबतत्त्वगनेहैं इसअर्थकासूच क सांख्यऔर इसतरहसे कियाहै अन्तअर्थात् सकलनिर्णय इसमेहै इसअर्थका सूचक जोकृतान्तपद इनदोनोपदार्थोको सांख्यकहतेहैं सोईसांख्यने येपांचोका रण अच्छीप्रकारसे कहाहै इससेतुम सम्यकप्रकारसेइनकारणोंकोजानो १३

CC-0. In Public Domain. Digitized by eGangotri

अधिष्ठानंतथाकर्त्ताकरणञ्चपृथग्विधं विविधाश्चपृथक्चेष्टादैवञ्चैवात्रपञ्चमं १४

शाङ्करभाष्यं।

कानितानीत्युच्यते अधिष्ठानमिति अधिष्ठानमिच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयोधिष्ठानंशरीरन्तथाकर्त्ताउपाधिलक्षणोभोक्ता करणञ्चश्रोत्रादिकंशब्दाद्युपलब्धयेपृथग्विधं ननाप्रकारंद्वादशसंख्यं विविधाश्चपृथक्चेष्टावायवीयाः

आनन्दगिरिकृतटीका

द्वाराकर्मावसानभूमित्वेवाक्योपक्रमानुकूल्यंदर्शयति यावानिति उदपानेकूपादौ यावानर्थःस्नानादिःतावानर्थःसमुद्रेसम्पद्यतेऽतोयथाकूपादिकृतंकार्य्यंसर्वंसमुद्रेन्तर्भवति तथासर्वेषु वेदेषु कर्मार्थेषु यावत्फलं तावत्सर्वंज्ञानवतोब्राह्मणस्यज्ञानेन्तर्भवति ज्ञानंप्राप्यकर्त्तव्यानवशेषादित्यर्थः तत्रैववाक्यान्तरमनुक्रामति सर्वमिति उदाहृतवाक्ययोस्तात्पर्यमाह आत्मेति आत्मज्ञानेसतिसर्वकर्मनिवृत्तावपिकथंवेदान्तस्यकृतान्तत्वमित्याशंक्याह अतइति तानिमद्वचनतोनिबोधेति पूर्वेणसम्बन्धः १३

स्वामिकृतटीका

ननु कर्म्मकुर्व्वतः कर्म्मफलंकथंनभवेदित्याशंक्य सङ्गत्यागिनोनिरहङ्कारस्यकर्मलेपोनास्तीत्युपपादयितुमाह पञ्चेति पञ्चभिः सर्व्वकर्मणांसिद्धयेनिष्पत्तये इमानि वक्ष्यमाणानिपञ्चकारणानि मेवचनान्निबोधजानीहि आत्मनःकर्त्तृत्वाभिमाननिवृत्त्यर्थमवश्यमेतानिज्ञातव्यानीत्येवंतेषांस्तुत्यर्थमेवाह सांख्यइति सम्यक्ख्यायतेज्ञायतेपरमात्माअनेनेतिसांख्यंतत्त्वज्ञानंतस्मिन्प्रकाशमानआत्मात्मबोधःसांख्यःतस्मिन्कृतंकर्म तस्यान्तःसमाप्तिरस्मिन्नितिकृतान्तस्तस्मिन् वेदान्तसिद्धान्तइत्यर्थः यद्वा संख्यायन्तेगण्यन्तेतत्त्वान्यस्मिन्नितिसांख्यं कृतोऽन्तोनिर्णयोस्मिन्नितिकृतान्तंसांख्यशास्त्रमेव तस्मिन्प्रोक्तानि अतःसम्यङ्निबोधेत्यर्थः १३

भषा अनुवाद।

सोईसर्व्वकर्म्मसम्पत्तिकेविषयमे कारणकहतेहैं किअधिष्ठानकहेशरीरऔकर्त्ताकहे चितऔजडकीग्रन्थिरूप अहङ्कार औभिन्नभिन्नअनेकप्रकारकरणस्वरूप चक्षुआदिइन्द्री औविविधकहे कार्यसे या स्वरूपमेभिन्नभिन्नचेष्टा अर्थात् प्राणअपानादिवायुके व्यापारसमूह औअत्रकहे अधिष्ठानशरीरआदि सबकेमध्यमे पञ्चमस्वरूप दैवअन्तर्यामी सर्व्वनियन्ता अथवा चक्षुआदिइन्द्रियोंके अनुकूलकारी सूर्यआदिदेवताजानो अथवा अन्तर्यामी इहांचित्काअर्थज्ञानहै १४

CC-0. In Public Domain. Digitized by eGangotri

शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः न्याय्यंवाविपरीतंवापञ्चैतेतस्यहेतवः १५

शाङ्करभाष्यं

प्राणापानाद्यादैवञ्चैवदेवमेवातएतेषुचतुर्षुपञ्चमंपञ्चानांपूरणमादित्यादिचक्षुरा द्यनुग्राहकं १४ शरीरेतिशरीरवाङ्मनोभिर्यत्कर्म्मविभिरेतैःप्रारभते निर्व र्त्तयति नरःन्याय्यम्बाधर्मंशास्त्रीयंविपरीतंवाऽशास्त्रीयं अधर्म्म्यंयच्चापिनिमित्तचे ष्टादिजीवनहेतुस्तदपिपूर्व्वकृतधर्म्माधर्मयोरेवकार्य्यमिति न्याय्यविपरीतयोरेवग्रह णेनगृहीतंपञ्चैतेयथोक्तास्तस्यसर्व्वस्यैवकर्मणोहेतवःकारणानि ननु अधिष्ठानादी निसर्वकर्मणांकारणानिकथमुच्यते शरीरवाङ्मनोभिः प्रारभ्यतइतिनैषदोषःविधि प्रतिषेधलक्षणंसर्व्वंकर्मशरीरादित्रयप्रधानं तदङ्गतयादर्शनश्रवणादिचजीवनलक्ष

आनन्दगिरिकृतटीका

कर्मार्थान्यधिष्ठानादीनिमानमूलत्वात् ज्ञेयानीत्युक्तमिदानींप्रश्नपूर्व्वकंविशेषतस्ता निनिर्द्दिशति कानीत्यादिना प्रतीकमादायव्याकरोति अधिष्ठानमिति उपाधिलक्ष णोबुद्ध्यादिरुपाधिस्तल्लक्षणस्तत्स्वभावोबुद्ध्याद्यनुविधायीतद्धर्म्मात्मनिपश्यन्नुपहित स्तत्प्रधानइत्यर्थः तत्कार्य्यलिङ्गकमनुमानंसूचयति शब्दादीति ज्ञानेन्द्रियाणिपञ्च पञ्चकर्म्मेन्द्रियाणिमनोबुद्धिश्चेतिद्वादशसंख्यात्वं चेष्टायाविविधत्वंननाप्रकारत्वंतदे वस्पष्टयति वायवीयाइति पृथक्त्वमसङ्कीर्णत्वंनहिप्राणापानादिचेष्टानांमिथः सङ्क रोस्ति दैवंविशदयति आदित्यादीति १४ पञ्चानामधिष्ठानादीनामुक्तानां सर्व

स्वामिकृतटीका

तान्येवाह अधिष्ठानमिति अधिष्ठानंशरीरं कर्त्ताचिदचिद्ग्रन्थिरहङ्कारः पृ थग्विधमनेकप्रकारं करणंचक्षुःश्रोत्रादिविविधाःकार्य्यतःस्वरूपतश्चपृथग्भूताश्चे ष्टाःप्राणापानादीनांव्यापाराः अत्रएतेष्वेवपञ्चमंदैवंचक्षुराद्यनुग्राहकमादित्यादि सर्वप्रेरकोऽन्तर्यामीवा १४ एतेषामेव सर्वकर्महेतुत्वमाह शरीरेति य

भाषाअनुवाद

इन्द्रीपांचोंको सर्वकर्ममे कारणत्वकहतेहैं किइन्द्रीपांचोकेकारणसे आरम्भ कियेजाते जोकर्मसकल तिनकोशरीरादिमे अन्तर्गतकहे मानिके इसश्लोकमेक हाहै किजिसहेतुकर्ममात्र जोशारीरिक औवाचनिक तथामानसिक होतेहैं येपञ्च सिद्धहैं श्लोककाअर्थ यहहै किशरीरवचनऔमनकेद्वारा सबमनुष्य जोकोईधर्म या अधर्मकेकारणहै येईअधिष्ठानकहे शरीरआदिपांच कर्मोकेहेतुहैं १५

CC-0. In Public Domain. Digitized by eGangotri

तत्रैवंसतिकर्त्तारमात्मानंकेवलन्तुयः पश्यत्यकृतबुद्धित्वान्नसपश्यतिदुर्मतिः १६

शाङ्करभाष्यं

णंविधेवराशीकृतमुच्यते शरीरादिभिरारभ्यतइति फलकालेपितत्प्रधानैर्भुज्यतेइ तिपञ्चानामेवहेतुत्वं नविरुध्यते १५ तत्रेति तत्रेतिप्रकृतेनसम्बध्यते एवं सतिएवंयथोक्तैःपञ्चभिर्हेतुभिर्निर्वर्त्तेसति कर्मणितत्रैवंसतीतिदुर्मतित्वस्यहेतुत्वे नसम्बध्यतेतत्रैतेषामात्मानमन्यत्वेनाविद्ययापरिकल्पितैःक्रियमाणस्य कर्मणोऽहमे वकर्त्तेति कर्त्तारमात्मानंकेवलंशुद्धंतुयःपश्यत्यविद्वान्कस्माद्देदान्ताचार्योपदेशन्या यैरकृतबुद्धित्वादसंस्कृतबुद्धित्वाद्योपि देहादिव्यतिरिक्तात्मवाद्यन्यमात्मानमेव केवलं कर्त्तारंपश्यत्यसावप्यकृतबुद्धिरेवातोऽकृतबुद्धित्वान्नसपश्यत्यात्मनस्तत्त्वं कर्मणोवेत्य

आनन्दगिरिकृतटीका

कर्म्मसिद्ध्यर्थत्वंस्फुटयति शरीरेति ननुजीवनकृतंनिमिषोन्मेषादिकर्मान्तरंसाधा रणमस्तितत्कथंराशिद्वयकरणमितितत्राह यच्चेति अधिष्ठानादीनांकर्ममात्रहेतुत्वं प्रतिज्ञायशरीरादिविविधकर्महेतुत्वोक्तिरयुक्तेति शङ्कते नन्विति पूर्वापरविरोधं परिहरति नैषदोषइति ननु जीवनकृतानिस्वाभाविकानिकर्म्माणिदर्शनादीनिविधि निषेधवाह्यत्वान्नदेहादिनिर्वर्त्तयानीत्याशंक्याह तदकृतयेति तस्यदेहादित्रयस्यप्रधान स्याङ्गञ्चक्षुरादितन्निष्पाद्यत्वेनजीवनकृतंदर्शनादिप्रधानकर्मण्यन्तर्भूतमिति वैविध्य मविरुद्धमित्यर्थः देहाद्यारम्भेविविधेकर्मणिसर्वकर्मान्तरभावेपि कथंपञ्चानामेवाधि ष्ठानादीनांतत्रहेतुत्वंफलोपभोगकाले करणान्तरापेक्षासम्भवादित्याशंक्य जन्मका लभाविनोभोगकालभाविनश्च सर्वस्यकारणस्यतेष्वेवान्तर्भावान्नैमित्याह फलेति १५

स्वामिकृतटीका ।

थोक्तैःपञ्चभिःप्रारभ्यमानंकर्मत्रिष्वेवान्तर्भाव्यं शरीरवाङ्मनोभिरित्युक्तं शारीरं वाचिकं मानसञ्च त्रिविधंकर्मेति प्रसिद्धःशरीरादिभिर्यत्कर्मधर्म्यमधर्म्यंवाकरोति नरस्तस्यसर्वस्य कर्मण एतेपञ्चहेतवः १५ ततःकिमतआह यत्रेति तत्र

भाषाअनुवाद

तोइससे फेरिक्याहोताहै इसअपेक्षापर कहतेहैं किउनकर्मोंके हेतुजोअ धिष्ठानादिपांचमात्रहैं औरकोईहेतुनहींहै सोहोनेसेभी शास्त्रऔआचार्यके उप देशसे नहींशोधीगईबुद्धि इसकारण जोदुर्मतिमनुष्य उपाधिरहित असङ्गरूप आत्माको कर्त्तारूप देखतेहैं इससे येदुर्मतिमनुष्य सम्यक्दर्शी नहींहैं १६

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

योऽतोदुर्मतिःकुत्सितविपरीतादुष्टाजन्मजननमरणाप्रतिपत्तिहेतुभूता मतिरस्ये तिदुर्मतिः सपश्यन्नपिनपश्यति यथातैमरिकोऽनेकञ्चन्द्रं यथाबाभ्येषु धावत्सुचन्द्रं धावन्तं यथा वाहनउपविष्टोऽन्येषुधावत्स्वात्मानंधावन्तंपश्यति १६

कःपुनःसुमतिर्यःसम्यक्पश्यतीत्युच्यते यस्येति यस्यशास्त्राचार्योपदेशन्याय संस्कृतात्मनोनभवत्यहंकृतीअहंकर्त्तेत्येवंलक्षणोभावनाप्रत्ययअतएव पञ्चाधिष्ठाना दयोऽविद्ययात्मनिकल्पिताःसर्वकर्मणांकर्त्तातोनाहमहन्तुतद्व्यापाराणांसाक्षिभूतः अप्राणोह्यमनाःशुभ्रोऽक्षरात्परतःपरःकेवलोविक्रियइत्येवंपश्यतीतिएववुद्धिरन्तः

आनन्दगिरिकृतटीका।

क्रियाकर्तृत्वमधिष्ठानादीनामाप्याद्यविदुषस्तेष्वात्मदृष्टिमनुवदति तत्रेति तत्प पदपरामर्शयोग्यंप्रकृतंसर्वंकर्मप्रतीकमादायपूर्वेणसहाक्षरार्थंकथयति एवमिति अ धिष्ठानादीनामुक्तरीत्याकर्तृत्वेसत्यन्यगतं कर्तृत्वमात्मनोध्यारोप्यपश्यतोदुर्मतिरि त्यात्मनिकर्तृत्वंपश्यन्नित्याह तत्रैवमिति कर्त्तारमित्यादिव्याचष्टे तत्रेत्यादिना ते ष्वधिष्ठानादिषुतैरधिष्ठानादिभिरारोपितात्मभावैरित्यर्थः अकर्त्तारमात्मानंकर्त्ता रंपश्यतीत्यत्रप्रश्नद्वाराहेतुमाह कस्मादिति ननुशास्त्रसंस्कृतबुद्धिरेवातिरिक्ता त्मवादीकर्तृत्वंतस्यानुमन्यतेनासौकर्तृत्वमात्मनिपश्यन्नपिभवत्यकृतबुद्धिरित्याह यो पीति तस्यापिशास्त्रपूर्वकमाचार्योपदेशेनतदनुसारिन्यायैश्चानाहितबुद्धित्वादकृ तबुद्धित्वंसिद्धमित्यर्थः कौटस्थ्यमात्मनस्तत्त्वंयाथात्म्यंकर्मणोपितत्त्वमविद्याकृताधि ष्ठानादिकृतत्वेनात्मास्पर्शित्वकर्मणोस्तत्त्वदर्शनाभावोऽतःशब्दार्थः दुष्टत्वेस्पष्टीकर्तुं दुर्मतित्वंविवृणोति जननेति अहंकर्त्तेत्यात्मदर्शनवतोपिनाविदुषस्तद्दर्शनमस्तीत्य तदृष्टान्तमाह यथेति तिमिरोपहतचक्षुरनेकञ्चन्द्रंपश्यन्नपितत्त्वतोनतंपश्यत्येव मविद्वानात्मानंकर्त्तारंपश्यन्नपि तत्त्वतोनतंपश्यतीत्यर्थः अधिष्ठानादिष्वविद्यया सम्बद्धात्मनःस्वात्मनितद्गतक्रियारोपेदृष्टान्तमाह यथावेति अन्येषुवाहकेषुपुरुषेषु धावनकर्तृषुवाहनेस्थितःस्वात्मानंप्रधावनकर्त्तारमविवेकादभिमन्यते तथाधिष्ठाना दिषुक्रियाकर्तृषुतद्गतंस्वात्मानंकर्त्तारंमन्यमानोदुर्मतिरित्यर्थः १६

स्वामिकृतटीका।

सर्वस्मिन्कर्मणिएतेपञ्चहेतवइत्येवंसति केवलंनिरुपाधिमसङ्गमात्मानं यःकर्त्तारं पश्यति शास्त्राचार्योपदेशाभ्यांसंस्कृतबुद्धित्वात् दुर्मतिरसौ सम्यक्नपश्यति १६

CC-0. In Public Domain. Digitized by eGangotri

यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते हत्वापिसइमांल्लोकान्नहन्तिननिबध्यते १७

शाङ्करभाष्यम्।

करणंयस्यात्मनउपाधिभूतानलिप्यतेनानुशयिनीभवतीदमहमकार्षन्तेनाहं नरकं गमिष्यामीत्येवंयस्यबुद्धिर्नलिप्यतेसमुमतिःसपश्यतिहत्वापिसइमान्लोकान्सर्व्वान् प्राणिनइत्यर्थः नहन्तिहननक्रियांनकरोति ननिबध्यते नापितत्कार्य्येणाधर्मफलेनस म्बध्यते ननुहत्वापिनहन्तीतिविप्रतिषिद्धमुच्यतेयद्यपिस्तुतिः नैषदोषःलौकिकपार मार्थिकदृष्ट्यपेक्षयातदुपपत्तेःदेहाद्यात्मबुद्ध्याहन्ताहमितिलौकिकींदृष्टिमाश्रित्यह त्वापीत्याह यथादर्शितांपारमार्थिकींदृष्टिमाश्रित्यनहन्तिननिबध्यतइतितदुभय मुपपद्यतएव नन्वधिष्ठानादिभिः सम्भूयकरोत्येवात्माकर्त्तारमात्मानंकेवलंवितिं केवलशब्दप्रयोगान्नैषदोषःआत्मनोऽविक्रियस्वभावत्वेऽधिष्ठानादिभिःसंहतत्वानुपप त्तेःविक्रियावतोह्यन्यैःसंहननंसम्भवामिसंहत्येवाकर्त्तृत्वंस्यान्नत्वविक्रियस्यात्मनःकेन चित्संहननमस्तिइतिनसम्भूयकर्त्तृत्वमुपपद्यतेअतःकेवलत्वंआत्मनःस्वाभाविकमि तिकेवलशब्दोऽनुवादमात्रंअविक्रियत्वञ्चात्मनःश्रुतिस्मृतिन्यायप्रसिद्धंअविकार्य्योय मुच्यतेगुणैरेवकर्माणिक्रियन्तेशरीरस्थोपिनकरोतीत्याद्यसकृदुपपादितंगीतास्वेव तावत्श्रुतिषुचध्यायतीवलेलायतीवेत्येवमाद्यासुयानिवाक्यानिदर्शितंन्यायतश्चनिरव यवमपरतन्त्रमविक्रियमात्मतत्त्वमितिराजमार्गः विक्रियावत्त्वाभ्युपगमेह्यात्मनःस्व

भाषाअनुवाद

जिसकोकर्मलेपनहींहै ऐसासुमतिकौनहै इसअपेक्षासे कहतेहैं किमैने यहकर्मकिया औमैकर्ताहूं ऐसीवासनाजिसकेनहींहै अथवा शरीरऔइन्द्रीआदि को कर्त्तृत्वदेखनेसे अहङ्कारस्वभावरूप कर्त्तृत्वकाभीलेशजिसकोनहींहै इसहेतु से जिसकीबुद्धि इष्टअनिष्टविचारसे सकलकर्ममेंआसक्तनहींहोतीहै ऐसाजोदेहा दिसेभिन्नरूप आत्मदर्शीपुरुष सोप्राणियोंकी लोकदृष्टिसे हननकरकेभी सबमे अभिन्नरूप आत्मदृष्टिहेतुसे किसीकाभीं हनन नहींकरता औकर्मफलसे बन्ध कोनहींपावताहै सत्वशुद्धिकेद्वारा अपरोक्षकहे प्रत्यक्षज्ञानउत्पन्नहेतुसे निष्का मकर्मकेद्वारा उसकोबन्धनकीशङ्का औरक्याहै यहपूअध्यायके१०श्लोकमे कहचु केहैं किजोकर्मफलकी आशक्तिछोड़ भगवदर्पणपूर्वक कर्मकाअनुष्ठानकरतेहैं ते मनुष्य जलकेबीच वर्त्तमान पद्मपत्रकेसमान पुण्यपापसमस्तकर्मसे अलगरहते लि प्तनहींहोतेहैं अर्थात् पुन्य औ पाप उनको कभी नहीं लगता है १७

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

कीयैवविक्रियायस्यमवितुमर्हति नाधिष्ठानादीनांकर्माण्यात्मकर्तृकाणिस्युर्नहिपर स्यकर्मप्रेरणाकृतमागन्तुमर्हतियत्वविद्ययागमितंनतत्तस्ययथारजतत्वंनशुक्तिकायां यथावातलमलवत्त्वंवालैर्गमितमविद्ययानाकाशस्यतथाधिष्ठानादिविक्रियापितेषामे वेतिनात्मनःतस्मात्युक्तमुक्तंअहंकृतत्वबुद्धिलेपाभावात् विद्वान्नहन्तिननिबध्यतइति नायंहन्तिनहन्यतइति प्रतिज्ञायनजायतइत्यादिहेतुवचनेनाविक्रियत्वमात्मनउक्त्वा वेदाविनाशिनमितिविदुषःकर्माधिकारनिवृत्तिशास्त्रादौसङ्क्षेपतउक्त्वामध्येप्रसारि तञ्चतत्रतत्रप्रसङ्गंकृत्वाइहोपसंहरति शास्त्रार्थपिण्डीकरणायविद्वान्नहन्तिननिब ध्यतइति एवञ्चसति देहस्थत्वाभिमानानुपपत्तावविद्याकृताशेषकर्मसंन्यासोपपत्तेः संन्यासिनामनिष्टादित्रिविधंकर्मणःफलंनभवतीत्युपपन्नंतद्विपर्ययाच्चेतरेषांभवतीत्ये तच्चापरिहार्यमित्येषगीताशास्त्रस्यार्थउपसंहृतः सएषसर्ववेदार्थसारोनिपुणमति भिः परिशुद्धैर्विचार्यप्रतिपत्तव्यइतितत्रतत्रप्रकरणविभागेनदर्शितोऽस्माभिःशास्त्र न्यायानुसारेण १७

आनन्दगिरिकृतटीका

विपरीतदृष्टेर्दुर्मतित्वंशिष्ट्वासम्यग्दृष्टेःसुमतित्वंप्रश्नपूर्वकमाह कःपुनरित्यादिना अहंकर्त्तेत्यात्मनिकर्तृत्वप्रत्ययाभावेकुलकर्तृत्वधीरित्याशंक्याह एवंतर्हिअकर्तृत्वधीरात्मनीत्याशंक्याधिष्ठानादीनां तद्व्यापाराणाञ्चसाक्षित्वादित्याशंक्या ह अहंत्विति आत्मनोनस्वतोस्तिक्रियाशक्तिमत्त्वमित्यत्रप्रमाणमाह अप्राणोहीति नापितस्यस्वतोज्ञानशक्तित्वमित्याह अमनाइति उपाधिद्वयासम्बन्धेशुद्धत्वं फलितमाह शुभ्रइति कारणसम्बन्धादशुद्धिमाशंक्योक्तं अक्षरादिति कार्यकार णयोरात्मन्यर्पितत्वेनपार्थक्येसद्वितीयत्वमाशंक्य तयोराविद्यकपारवश्यत्वान्नैवमि त्याह केवलइति जन्मादिसर्वविक्रियारहितत्वेन कौटस्थ्यमाह अविक्रियइति बु द्धिर्यस्येत्यादिव्याचष्टे बुद्धिरिति नानुशयिनी नानुशयवती नक्लेशशालिनीत्यर्थः द्वितीयपादस्याक्षरार्थमुक्त्वावाक्यार्थमाह इदमिति पापंकर्मइदमापरामृश्यते लो कानांप्राणसम्बन्धाभावेकुतोहिंसेत्याशंक्याह प्राणिनइति विरुद्धार्थोक्तास्तुतिरपि नयुक्तेति शङ्कते नन्विति विरोधंपरिहरति नैषदोषइति लौकिकदृष्टिमवष्टभ्या ह हत्वापीति निर्देशंविघटयति देहादीति तात्त्विकींदृष्टिमास्थायनहन्तीति निर्दे शमुपपादयति यद्येति नाहंकर्त्ताकिन्तुकर्तृतद्व्यापारयोःसाक्षीक्रियाज्ञानशक्तिमद्

आनन्दगिरिकृतटीका

माविद्यविनिर्मुक्तःशुद्धःसन्कार्यकारणासम्बद्धोद्वितीयोऽविक्रियइत्येवं पारमार्थिकद
ष्टेर्यथादर्शितत्वं द्रष्टव्यं हत्वापीत्येतन्नहन्तीत्यादिचोभयं दृष्टिद्वयावष्टम्भादुपपन्नि
मित्युपसंहरति तदुभयमिति केवलमेवात्मानंकर्त्तारंपश्यन् दुर्म्मतिरित्यत्रात्मविशेष
णसमर्पकंकेवलशब्दसामर्थ्यादात्मनोविशिष्टस्यकर्त्तृत्वमितिशंकते नन्विति आत्म
नोवैशिष्ट्यायोगान्नविशिष्टस्यापिकर्त्तृत्वमिति दूषयति नैषदोषइति अविक्रियस्वा
भाव्येपिकथमात्मनोसंहतत्वमित्याशंक्याह अविक्रियेति अधिष्ठानादिभिरात्मनःसं
हननेपिनकर्त्तृत्वमविक्रियस्यक्रियान्वयव्याघातादित्याह संहत्येतिसंहतत्वानुपपत्तिं
व्यक्तीकरोति नत्विति असंहतत्वेफलितमाह इतिनेति कथंतर्हिकेवलत्वमात्मनिकेव
लशब्दादुक्तंतदाह ततइतिकर्त्तृत्वमात्मनोध्युपपन्नंनाम्याविक्रियत्वमुपैतीत्याशंक्याह
अविक्रियत्वञ्चेति तत्रस्मृतिवाक्यान्युदाहरति अविकार्योयमिति नायंहन्तिनहन्यत
इत्यादिवाक्यमादिशब्दार्थः उक्तवाक्यानामात्माविक्रियत्वेतात्पर्यंशुचयति असङ्गदि
ति निःकलंनिःक्रियंशान्तमित्यादिवाक्यंश्रुतावादिशब्दार्थःयानिवाक्यानि तैरात्मनो
विक्रियत्वंदर्शितमितियोजनान्यायतश्चतद्दर्शितमिति पूर्वेणसम्बन्धः न्यायमेवदर्शय
ति निरवयवमिति नतावदात्माखतोविक्रियते निरवयवत्वादाकाशवन्नापिपरतोस
ङ्गस्याकार्यस्यपराधीनत्वायोगादित्यर्थः किंवात्मनःस्वनिष्ठावाविक्रियाधिष्ठानादिनि
ष्ठावानाद्यःस्वनिष्ठाविक्रियानुपपत्तेरात्मनोदर्शितत्वादित्याशयेनाह विक्रियावत्वेति
साचायुक्तेत्युक्तमितिशेषः द्वितीयंदूषयति नेत्यादिना अधिष्ठानादिकृतमपिकर्म्म त
द्योगादात्मन्यागच्छतोत्याशंक्यतदागमनंवास्तवमाविद्यंवेति विकल्प्याद्यंदूषयति नही
ति द्वितीयंनिरस्यति यत्त्विति आत्मन्यविद्याप्रापितंकर्म्मनात्मीयमित्येतद्दृष्टान्ताभ्या
मुपपादयति यथेत्यादिना आत्मनोविक्रियत्वेनकर्त्तृत्वाभावेफलितमाह तस्मादिति
ननुप्रागेवात्मनोविक्रियत्वंप्रतिपादितंतदिहकस्मादुच्यतेतत्राह नायमिति शास्त्रादौ
प्रतिज्ञायहेतुपूर्वकंसंक्षिप्योक्तामध्येतत्प्रसङ्गंकृत्वाप्रसारितां कर्म्माधिकारनिवृत्ति
मिहोपसंहरतीतिसम्बन्धः प्रतिज्ञातस्य हेतुनोपपादितस्यान्ते निगमनं किमर्थमि
त्याशंक्याह शास्त्रार्थेति कर्म्माधिकारोविदुषोनेति स्थितेतस्यदेहाभिमानाभावेसत्यवि
द्योत्थसर्वकर्म्मत्यागसिद्धेरनिष्टमिष्टंमिश्रञ्चेति त्रिविधंकर्म्मफलंसंन्यासिनां नेति
प्रागुक्तंयुक्तमेवेति परमप्रकृतमुपसंहरति एवञ्चेति ये पुनरविद्वांसोदेहाभिमानि
नस्तेषांत्रिविधंकर्म्मफलम्भवत्येवेति हेतुवचनमिदमर्थंनिगमयति तद्विपर्ययाच्चेति
अधिष्ठानादिकृतंकर्म्मनात्मकृतमविदुषामेवकर्म्माधिकारोदेहाभिमानित्वेनतत्त्यागा

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

अथेदानीं तेषां कर्मणां प्रवर्त्तकमुच्यते ज्ञानमिति ज्ञानं ज्ञायतेऽनेनेति सर्व्वं विषयमविशेषेणोच्यते तथा ज्ञेयं ज्ञातव्यं तदपि सामान्येनैव सर्वमुच्यते तथा परिज्ञातोपाधिलक्षणोऽविद्याकल्पितो भोक्ता इत्येतत्त्रयमेषां मविशेषेण सर्व्वकर्मणां प्रवर्त्तकानि विविधानि: प्रकाराकर्मचोदना ज्ञानादीनांहि त्रयाणां सन्निपाते हानोपादानादिप्रयोजनः सर्वकर्मारम्भः स्यात्ततः पञ्चभिरधिष्ठानादिभिरारभ्यं वाङ्मनःकायात्रयभेदेन त्रिधाराशीभूतं त्रिषुकरणादिषु संगृह्यते इत्येतदुच्यते करणं क्रियतेऽनेनेति वाह्यं योवाद्यन्तस्थबुध्यादिधर्म्मोऽसिततमं कर्त्तुः क्रियया व्याप्यमानं कर्त्ता करणानां व्यापारयितोपाधिलक्षणइति त्रिविधः त्रिप्रकारः कर्म्मसंग्रहः संगृह्यते अस्मिन्निति संग्रहः कर्म्मणः संग्रहः कर्म्मसंग्रहः कर्म्मएषुहित्रिषुसमवैति तेनायं त्रिविधः कर्म्मसंग्रहः १८

आनन्दगिरिकृतटीका

योगाद्देहाभिमानाभावात्तु विदुषां कर्माधिकारनिवृत्तिरित्युपसंहृतमर्थं संक्षिप्याह इत्येषइति उक्तञ्च गीतार्थवेदार्थत्वादुपादेयइत्याह सएषइति कथमयमर्थो वेदार्थोपि प्रतिपत्तुं शक्यतेतत्राह निपुणेति भाष्यकृता मानयुक्तिभ्यांविभज्यानुक्तत्वान्नास्यार्थस्योपादेयत्वमित्याशंक्याह तत्रेति १७

शास्त्रार्थोपसंहारानन्तर्यमथेत्युक्तमिदानीमिति प्रवर्त्तकापदेशापेक्षावस्योक्ता कर्म्मणांयेषु विदुषांनाधिकारोऽविदुषाञ्चाधिकारस्तेषामित्यर्थः ज्ञानशब्दस्यकरण व्युत्पत्त्याज्ञानमात्रार्थत्वमाह ज्ञानमिति ज्ञेयशब्दस्यापितद्वदेवज्ञातव्यमात्रार्थत्व माह तथेति उपाधिलक्षणत्वं तत्प्रधानत्वमुपहितत्वं तस्यावस्तुत्वार्थमविद्याकल्पि

स्वामिकृतटीका

कस्तर्हि सुमतिर्यस्य कर्मलेपोनास्तीत्युक्तमित्यपेक्षायामाह यस्येतिअहमिति कृतोऽहङ्कर्त्तेत्येवंभूतोभावोऽभिप्रायोयस्यनास्ति यद्वा अहंकृतोऽहङ्कारस्यभावःस्वभावः कर्त्तृत्वाभिनिवेशोयस्यनास्तिशरीरादीनामेवकर्मकर्त्तृत्वालोचनादित्यर्थः अतएव यस्यबुद्धिर्नलिप्यते इष्टानिष्टबुद्ध्याकर्मसुनसज्जते सएवम्भूतोदेहादिव्यतिरिक्तात्मदर्शीइमान्लोकान्सर्वानपिप्राणिनोलोकदृष्ट्याहत्वापिविविक्ततयास्वदृष्ट्या नहन्ति नचतत्फलैर्निबध्यतेबन्धनंप्राप्नोति किंपुनःसत्त्वशुद्धिद्वारा परोक्षज्ञानोत्पत्तिहेतुभिःकर्मभिस्तस्यबन्धाशङ्केत्यर्थः तदुक्तं ब्रह्मण्याधायकर्माणि सङ्गंत्यक्त्वाकरोति यः लिप्यतेनसपापेन पद्मपत्रमिवाम्भसेति भगवदुक्तत्वादित्यर्थः १७

CC-0. In Public Domain. Digitized by eGangotri

ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचोदना कारणंकर्मकर्त्तेति त्रिविधःकर्मसंग्रहः१८

आनन्दगिरिकृतटीका।

तविशेषणमेतदेवत्रयंसर्वकर्म्मप्रवर्त्तकमित्याह इत्येतदिति सर्वकर्म्मणांप्रवर्त्तकमित्यध्याहर्त्तव्यं चोदनेतिक्रियायाःप्रवर्त्तकंवच्चनमिति भाष्यानुसारेणचोदनाशब्दार्थमाह प्रवर्त्तिकेति सर्वकर्मणामिति पूर्वेणसम्बन्धः त्रैविध्यंज्ञानादीनांप्रागुक्तंकर्मणांचोदनेति विग्रहः तेषांसर्वकर्म्मप्रवर्तकत्वमनुभवेनसाधयति ज्ञानादीनामिति ज्ञानोपादानादीत्यादिपदेनोपेक्षाविवक्षिता करणमित्यादेस्तात्पर्यमाह ततइति ज्ञानादीनांप्रवर्त्तकत्वादित्यर्थः उक्तेर्थेश्लोकभागमवतारयति इत्येतदिति वाक्यमन्तस्थञ्चद्विविधंकरणव्युत्पत्तिप्राकथयति करणमिति उक्तलक्षणंकर्म्मैवस्फुटयति कर्त्तुरिति स्वतन्त्रोहिकर्त्तास्वातन्त्र्यञ्चकारप्रयोज्यस्यतत्प्रयोक्तृत्वमित्याह कर्त्तेति कथमुक्तेस्त्रिविधेकर्मसंगृह्यते तत्राह कर्मेति कर्मणोहिप्रसिद्धंकारकाश्रयत्वमिति भावः १८ अनन्तरश्लोकनवकतात्पर्यमाह अथेति ज्ञानादिप्रस्तावा

भाषाअनुवाद

कर्मसेअभिनिवेशजोइच्छाऔआशक्तिकहे तनमनसेलगेरहनाइनदोनोसेरहितपुरुषहननकरकेभीहननहीं करतेऔवन्धकोनहींप्राप्तहोतेइसपूर्वोक्तवाक्यमात्रके कहनेकेलियेकर्मकीविधिहै औकर्मश्रेयकहेकल्याणकरहै औकर्मफलआदिसबकोत्रिगुणात्मकत्वहेतुसे गुणातीतजोआत्मातिसकोइसकर्मविधिआदिकेसाथकुछसम्बन्धनहींहै इसकहनेकोअभिप्रायसेकर्मविधिऔकर्मश्रेयकहतेहैं किज्ञानकहेयही इष्टकासाधनहै ऐसाजोवेदऔज्ञेयकहेइष्टकेसाधनस्वरूपजोकर्मऔपरिज्ञाताकहेऐसेज्ञानकाआश्रयभूतजोमनुष्यइनत्रिविधकर्मविधिकहेप्रेरणाहै अर्थात् इसीप्रेरणासेलोगकर्ममेप्रवृत्तहोतेहैं श्लोकार्थयहहैं किकर्मविषयकजोविधिसोउक्तरूपत्रिगुणात्मकज्ञानआदिकोअवलम्बनकरकेप्रवृत्तहोतीहै यहदूसरेअध्यायके४५ श्लोकमेकहाहै किहेअर्जुनत्रिगुणात्मकसकामअधिकारीकेसम्बन्धमेफलसम्बन्धवेदमेकहाहै औकरणकहेसाधनऔकर्मकहेकर्त्ताकीअत्यन्तइच्छाकीअधिकईसे कियाजायजोव्यापारऔकर्त्ताकहे क्रियाकाकरनेहाराऔरसबकर्मसम्पूर्णरूपसेइसीमेगृहीतहोतेहैं इसअर्थके सूचनकरनेवालेपदकोकर्मसंग्रहकहतेहैं करणकर्मकर्त्तारूपतीनकारकयेक्रियाकेआश्रयहैं औरसंप्रदान अपादानऔअधिकरणयेतीनकेवलपरस्पर आक्रमणसे क्रियाकेप्रवर्त्तकहैं साक्षात्क्रियाके आश्रयस्वरूप नहींहैं इसीसे पूर्वोक्ततीनकरणोंकोक्रियाके आश्रयस्वरूप कहा है १८

CC-0. In Public Domain. Digitized by eGangotri

ज्ञानंकर्मचकर्ताचत्रिधैवगुणभेदतः प्रोच्यतेगुणसंख्यानेयथावच्छृणुतान्यपि १९

शाङ्करभाष्यं

अथेदानींक्रियाकारकफलानांसर्वेषांगुणात्मकत्वात् सत्वरजस्तमोगुणभेदतः त्रिविधोभेदोवक्तव्यइत्यारभ्यते ज्ञानंकर्मचेति ज्ञानंज्ञायतेऽनेनेतिकर्मच कर्मक्रियानकारकं पारिभाषिकमीप्सिततमंकर्मकर्ताचनिवर्तकः क्रियाणांत्रिधैवावधारणं गुणव्यतिरिक्तजात्यन्तराभावप्रदर्शनार्थंगुणभेदतःसत्वादिधेदेनेत्यर्थःप्रोच्यतेकथ्यते गुणसंख्यानेकापिलेशास्त्रेकापिलमपिगुणसंख्यानंशास्त्रन्तदपिगुणभोक्तृविषयेप्रमाणमेवपरमार्थब्रह्मैकत्वविषयेयद्यपिविरुध्यतेतथापितेहिकापिलागुणगौणव्यापारनिरूपणेऽभियुक्ताइतितच्छास्त्रमपिवक्ष्यमाणार्थस्तुत्यर्थत्वेनोपादीयतइतिनविरोधः यथावद्यथान्यायंयथाशास्त्रंशृणु तान्यपिज्ञानादीनितद्भेदजातानिगुणभेदकृतानि शृणुवक्ष्यमाणेऽर्थे मनःसमाधिं कुर्वित्यर्थः १९

स्वामिकृतटीका

हत्वापिनहन्तिननिबध्यत इत्येतदेवोपपादयितुं कर्मचोदनायाःकर्माश्रयस्यच कर्मफलादीनाञ्चत्रिगुणात्मकत्वान्नित्रगुण्यस्यआत्मनस्तत्सम्बन्धोनास्तीत्यभिप्रायेणकर्मचोदनांकर्म्माश्रयञ्चाह ज्ञानमिति ज्ञानमिष्टसाधनमेतदितिबोधः ज्ञेयमिष्टसाधनंकर्मपरिज्ञाताएतत्ज्ञानाश्रयःएवंत्रिविधाकर्मचोदनाचोद्यते प्रवर्त्ततेऽनयेति चोदनाज्ञानादित्रयंकर्मप्रवृत्तिहेतुरित्यर्थः यद्वाचोदनेतिविधिरुच्यतें तदुक्तंभट्टैः चोदनाचोपदेशश्चविधिश्चैकार्थवाचिनइति ततश्चायमर्थः उक्तलक्षणंत्रिगुणात्मकं ज्ञानादित्रयमवलम्ब्यकर्मविधिःप्रवर्त्ततइति तदुक्तंत्रैगुण्यविषयावेदाइति तथाकरणंसाधकतमंकर्मचकर्त्तुरीप्सिततमंकर्त्ताक्रियानिवर्त्तकः कर्मसंगृह्यतेऽस्मिन्निति कर्मसंग्रहःकारणादित्रिविधंकारकंक्रियाश्रयइत्यर्थः संप्रदानादिकारकत्रयन्तु परम्परयाक्रियाप्रवर्त्तनमेवकेवलंनतुसाक्षात् क्रियायाश्चाश्रयःअतःकरणादित्रयमेव क्रियाश्रयइत्युक्तं १८ ततःकिमतआह ज्ञानंकर्मचेति गुणाःसम्यक्कार्यभेदेन

भाषाअनुवाद।

अबक्रियाकारक औफलको गुणात्मतासे सत्व रजतमकृत त्रिविधभेदकहाचाहतेहैं इसअपेक्षापर कहतेहैं किइसीमे गुणकार्यभेदसे सम्पूर्णप्रतिपादन करके कहतेहैं इसअर्थकासूचनकरनेवला संख्यानकहेसांख्यशास्त्र तिसमेसात्विकआदि गुणभेदक्रमसे तथाकार्यकेद्वारा ज्ञानऔकर्मतथाकर्त्ता येप्रत्येकत्रिविधस्वरूप कहे गयेहैं सोई मैयथावत्कहताहूं तिनकोभी तुमसम्यक् श्रवणकरो १९

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ज्ञानस्यतुतावत्त्रिविधत्वमुच्यते सर्वेति सर्वभूतेषुअव्यक्तादिस्थावरान्तेषुभूतेषुयेनज्ञानेनैकंभावंवस्तुभावशब्दोवस्तुवाचीएकमात्मवस्त्वित्यर्थःअव्ययंनव्येति स्वात्मनातद्धर्म्मेणावाकूटस्थंनित्यमित्यर्थःईक्षतेयेनज्ञानेनपश्यतितज्ज्ञानंविभक्तं प्रतिदेहं विभक्तेषुदेहभेदेषुनविभक्तंतदात्मवस्तुव्योमवन्निरन्तरमित्यर्थःतत्ज्ञानंअद्वैतात्मदर्शनंसात्विकंसम्यक्दर्शनंविद्धीति २० यानिद्वैतदर्शनान्यसम्यक्तानिरा

आनन्दगिरिकृतटीका

नन्तर्यमर्थशब्दार्थःइदानींप्रस्तुतज्ञानाद्यवान्तरभेदापेक्षायामित्यर्थःतेषां गुणभेदानां त्रैविध्येहेतुमाह गुणात्मकत्वादिति वक्तव्योवक्ष्यमाणश्लोकंनकेनेतिशेषः एवं स्थितेप्रथममवान्तरभेदप्रतिज्ञाक्रियतइत्याह इत्यारभ्यतइति कर्तुरीप्सिततमंकर्म्मेतियत्तत्परिभाष्यतेतन्नात्रकर्मशब्दवाच्यमित्याह नेति गुणातिरेकेणविधान्तरंज्ञानादिषुनेतिनिर्द्धारयितुमवधारणमित्याह गुणेति ज्ञानादीनांप्रत्येकंगुणभेदप्रयुक्तैत्रैविध्येप्रमाणमाह प्रोच्यतइति ननुकापिलंप्रातञ्जलमित्यादिशास्त्रंविरुद्धार्थत्वादप्रमाणं कथमिहप्रमाणीक्रियतेतत्राह तथापीति विषयविशेषविरोधेपिप्रकृतेऽर्थेप्रामाण्यमविरुद्धमित्यर्थः यद्यपिकापिलादयोगुणवृत्तिविचारेगौणव्यापारस्यभोगादेर्निरूपणेच निपुणास्तथापिकथंतदीयंशास्त्रमत्रप्रमाणीकृतमित्याशंक्याह तेहीति ज्ञानादिषुप्रत्येकमवान्तरभेदोवक्ष्यमाणोर्थस्तस्यतन्त्रान्तरेपिप्रसिद्धकथनंस्तुतिस्तदर्थेनकापिलादिमतोपादानमिहोपयोगीत्यर्थः तृतीयपादस्याविरुद्धार्थत्वंनिगमयति नेति यथावदित्यादिव्याचष्टे यथान्यायमिति १९

स्वामिकृतटीका

ख्यायन्तेप्रतिपाद्यन्तेऽस्मिन्नितिगुणसंख्यानंसांख्यशास्त्रंतस्मिन्ज्ञानञ्चकर्मचकर्त्ताचप्रत्येकंसत्वादिगुणभेदेनत्रिधैवोच्यते तान्यपिज्ञानादीनिवक्ष्यमाणानियथावच्छृणुत्रिधैवेत्येवकारोगुणत्रयोपाधिव्यतिरेकेणात्मनःस्वतःकर्मादिप्रतिषेधार्थः चतुर्दशाध्यायेतत्रसत्वंनिर्मलत्वादिनागुणानांबन्धत्वप्रकारोनिरूपितःसप्तदशाध्यायेयज्ञेसात्त्विकादेवानित्यादिना गुणकृतत्रिविधस्वभावनिरूपणेन रजस्तमःस्वभावंपरित्यज्यसात्विकाहारादिसेवयासात्विकस्वभावः सम्पादनीयइत्युक्तंइहतुक्रियाकारकफलादीनामात्मसम्बन्धोनास्तीति दर्शयितुंसर्वेषांत्रिगुणात्मकत्वमुच्यत इतिविशेषोज्ञातव्यः १९

CC-0. In Public Domain. Digitized by eGangotri

सर्वभूतेषुयेनैकंभावमव्ययमीक्ष्यते अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्त्विकं २०
पृथक्त्वेनतुयज्ज्ञानंनानाभावान्पृथग्विधान् वेत्तिसर्वेषुभूतेषुतज्ज्ञानंविद्धिराजसं२१

शाङ्करभाष्यं

जसानितामसानिचेतिनसाक्षात्संसारोच्छित्तयेभवन्तिपृथक्त्वेनेति पृथक्त्वेनतुभेदे नप्रतिशरीरमन्यत्वेनयत्ज्ञानंनानाभावान्भिन्नमात्मनःपृथक्विधान्पृथक्प्रकारान् भिन्नलक्षणानित्यर्थः वेत्तिविजानातियत्ज्ञानंसर्वेषुभूतेषुज्ञानस्यकर्तृत्वासम्भवा द्येनज्ञानेनवेत्तीत्यर्थः २१ यत्विति यत्तुज्ञानंकृत्स्नवत्समस्तवत्सर्वविषय

आनन्दगिरिकृतटीका ।

ज्ञानादीनांप्रत्येकंत्रैविध्यंज्ञातव्यंप्रतिज्ञायज्ञानत्रैविध्यार्थंश्लोकत्रयमवतारय ति ज्ञानस्येति तत्रसात्विकंज्ञानमुपन्यस्यति सर्वेति भूतानिकार्यकारणात्मकान्यु पाधिजातानिअद्वितीयमखण्डैकरसंप्रत्यगात्मभूतमबाधितत्वंज्ञेयत्वेनविवक्षितमि त्याह एकमिति विवक्षितमव्ययत्वंसङ्क्षिपति कूटस्थेति प्रतिदेहमविभक्तमि त्युक्तंव्यनक्ति विभक्तेष्विति तत्ज्ञानमित्यादिव्याकरोति अद्वैतेति २०

ह्यैतदर्शनान्यपिकानिचिद्भवन्तिसत्त्वनिष्ठत्तानिसम्यञ्चीत्याशंक्याह यानीति तेषामसत्त्वेहेतुमाह राजसानीति प्रतिदेहमन्यत्वेनभिन्नात्मनोयेनज्ञानेनजाना तितत्ज्ञानंराजसमितिव्याचष्टे भेदेनेति पृथक्त्वंपृथग्विधत्वञ्चपुनरुक्तमित्याशंक्य हेतुहेतुमत्त्वेनविभागंविवक्षित्वाह भिन्नेति ज्ञानस्यज्ञानकर्तृत्वमयुक्तमित्याशंक्या ह येनेति २१ यत्विति सत्त्वमेवव्यनक्ति एतावानिति एकस्मिन्कार्येज्ञा

स्वामिकृतटीका

तत्रज्ञानस्यसात्त्विकादित्रैविध्यमाह सर्वेतित्रिभिः सर्वेषुभूतेषुब्रह्मादिस्था वरान्तेषुविभक्तेषुपरस्परं व्यावृत्तेषु अविभक्तमनुस्यूतंएकमव्ययं निर्विकारंभावंपर मात्मतत्त्वंयेनज्ञानेनेक्षते आलोचयति तत्ज्ञानंसात्त्विकंविद्धि २० राजसं

भाषा अनुवाद

इसश्लोकसेले तीनश्लोकसे इसज्ञानकासात्त्विकआदिभेदसेतीनप्रकारकहतेहैंकि ब्रह्मादिस्थावरपर्यन्तपरस्परभिन्नभिन्नसकलवस्तुमेप्राप्तएकनिर्विकारस्वरूपअव्यय परमात्मतत्वकाजिसज्ञानसेआलोचननकियाजायउसज्ञानकोसात्विकज्ञानजानो२० इसश्लोकमेराजसज्ञानकहतेहैं किभूतकहेदेहधारीमात्रमेनानाभावअर्थात्सबकी शरीरमेंचेतनआत्माप्रथक्प्रथक्सुखीदुखीरूपसेभिन्नभिन्नभीजानाजायजिसज्ञान सेसोज्ञान राजसजानो २१ तामसज्ञानकहतेहैं किएककार्यमेअर्थात् स्थूलशरीर

CC-0. In Public Domain. Digitized by eGangotri

यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहैतुकं अतत्वार्थवदल्पञ्चतत्तामसमुदाहृतं २२

शाङ्करभाष्यं ।

मिवएकस्मिन्कार्यदेहेवहिर्वाप्रतिमादौसक्तं एतावानेवात्मेश्वरोवानातःपरमस्तीति यथानग्नक्षपणकादीनांशरीरान्तर्वर्तिदेहपरिमाणोजीवईश्वरोवा पाषाणादावर्चादिमात्रइत्येवंएकस्मिन्कार्येसक्तमहैतुकंहेतुवर्जितं अयुक्तिकंनिःप्रमाणकमतत्वार्थवत्अयथाभूतोऽर्थस्तत्वार्थःसोऽस्यज्ञेयभूतोस्तीतितत्वार्थवदतत्वार्थवदहैतुकत्वादेवाल्पविषयत्वादल्पफलत्वाद्यातत्तामसमुदाहृतं तामसानांहिप्राणिनामविवेकिनामीदृशं ज्ञानंदृश्यते २२ अथकर्मणांत्रैविध्यमुच्यते नियतमिति नियतंनित्यंसङ्गरहितमासक्तिवर्जितमरागद्वेषतःकृतंरागप्रयुक्तेनद्वेषप्रयुक्तेनचकृतंतद्विपरीतं कृतमरागद्वेषतःकृतमफलप्रेप्सुना फलंप्रेप्सतीतिफलप्रेप्सुःफलतृष्णस्तद्विपरीतेनाफलप्रेप्सुनाकर्त्रा कृतंकर्मयत्तत्सात्विकमुच्यते २३

आनन्दगिरिकृतटीका ।

नन्वसक्तत्वमेवदृष्टान्तेनसाधयति यथेत्यादिना यन्निर्युक्तिकन्तदेव ज्ञानस्याभासत्वे कारणमित्याह अहैतुकत्वादिति स्वरूपतोविषयतश्चाभासत्वंफलतोवेत्याह अल्पमितितामसंज्ञानमुक्तलक्षणमित्यज्ञानानुभवंप्रमाणयति तामसानांहीति २२ त्रिविधं कर्मवक्तुमनन्तरश्लोकत्रयमित्याह अथेति तत्रसात्त्विकंकर्मनिरूपयति नियतमिति२३

स्वामिकृतटीका ।

ज्ञानमाह पृथक्त्वेनेतिपृथक्त्वेनतुयत्ज्ञानमित्यस्यैवविवरणंसर्वेषुभूतेषुदेहे नानाभावान्वस्तुतएवानेकान्क्षेत्रज्ञानप्रथग्विधान्सुखदुःखत्वादिरूपेणविलक्षणान्येनज्ञानेन वेत्तितत्ज्ञानंराजसंविद्धि २१ तामसंज्ञानमाहयत्त्विति एकस्मिन्कार्यदेहे प्रतिमादौवाकृत्स्नवत्परिपूर्णवत्सक्तंएतावानेवात्मेश्वरोवेत्यभिनिवेशयुक्तं अहैतुकं निरूपपत्तिकंअतत्वार्थवत्परमार्थावलम्बनशून्यं अतएवाल्पंतुच्छं अल्पविषयत्वात् अल्पफलत्वाच्चयदेवम्भूतंज्ञानंतत्तामसमुदाहृतं २२ इदानींत्रिविधंकर्माह नियतमिति त्रि

भाषा अनुवाद

मेअथवाप्रतिमाआदिमेंसक्तकहेशरीरहीआत्माऔप्रतिमाहीं ईश्वरहै ऐसेनिश्चयसे युक्त औअहेतुककहेयुक्तिविरुद्ध औपरमार्थअवलम्बनरहित जोज्ञान उक्तकारणों सेअल्पविषयअल्पफलहेतुसेतुच्छहै उसज्ञानकोशिष्टजनोंनेतामसरूपनिरूपणकियाहै २२ अबइससेश्लोकसेले तीनश्लोककेद्वारा सकलकर्मको त्रिविधकहतेहैं किफ

CC-0. In Public Domain. Digitized by eGangotri

नियतंसङ्गरहितमरागद्वेषतःकृतं अफलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते २३
यत्तुकामेप्सुनाकर्मसाहङ्कारेणवापुनः क्रियतेबहुलायासंतद्राजसमुदाहृतं २४

शाङ्करभाष्यं

यत्त्विति यत्तुकामेप्सुनाकर्मफलप्रेप्सुनेत्यर्थः कर्मसाहङ्कारेणेतिनतत्त्वज्ञा नापेक्षयाकिंतर्हिलौकिकश्रोत्रियनिरहङ्कारापेक्षया योहि परमार्थनिरहङ्कारआ त्मविन्नतस्यकामेप्सुत्वबहुलायासकर्तृत्वप्राप्तिरस्ति सात्त्विकस्यापिकर्मणोऽनात्मवि त्साहङ्कारःकर्त्ताकिमुतराजसतामसयोर्लोकेऽनात्मविदपि श्रोत्रियनिरहङ्कारःउ च्यते निरहङ्कारोयोयंब्राह्मणइति तस्मात्तदपेक्षयैवसाहङ्कारेणवेत्युक्तं पुनःशब्दः पादपूरणार्थःक्रियते बहुलायासंकर्ममहतायासेननिर्वर्त्यते तत्कर्मराजसमुदाहृ तं २४ अनुबन्धमिति अनुबन्धःपश्चाद्भावि यद्वस्तुसोऽनुबन्धउच्यते तच्चानु

आनन्दगिरिकृतटीका

राजसंकर्मनिर्दिशति यत्त्विति फलप्रेप्सुनाकर्त्तायत्कर्मक्रियतेतद्राजसमि त्युत्तरवसम्बन्धः तत्त्वज्ञानवतानिरहङ्कारेणसाहङ्कारेणातत्त्वज्ञेनक्रियतेकर्मेति विवक्षांवारयति साहङ्कारेणेति तत्त्वज्ञानवतानिरहङ्कारेणकृतंकर्मापेक्ष्यसाहङ्का रेणाज्ञेनकृतमेतत्कर्मेतिनविवक्ष्यतेचेत्तर्हिकिमत्रविवक्षितमितिपृच्छति किंतर्हीति योहिदुरितरहितःश्रोत्रियोलोकादनपेतस्तस्यदहङ्कारवर्जितंकर्मतदपेक्षयेदंसा

स्वामिकृतटीका

भिः नियतंनित्यतयाविहितंसङ्गरहितमभिनिवेशशून्यं अरागद्वेषतः पुत्रादिप्रीत्या त्राग्रहद्वेषेणवायत्कृतंनभवतिफलंप्राप्तुमिच्छतीतिफलप्रेप्सुस्तद्विलक्षणेन निः कामेनकर्त्रा यत्कृतंकर्म तत्सात्विकमुच्यते २३

भाषाअनुवाद

लप्राप्तिकोइच्छाकरतेहैं ऐसे जोफलकेलोभीजनोंसे कियेजातेहैं उनसेभिन्न रू पनिःकामकर्मके अनुष्ठानकरनेवालोंसे नियतकहेनित्यरूपसे विहित औ अभि निवेशआग्रहशून्य जोकर्मकियेजायं औरजोपुत्रआदिकेप्रीत्यर्थ अथवा शत्रुपरको धकरमसे कियेनहोंय ऐसेकर्म सात्विकहैं २३

औरकर्मफलप्राप्तिकाइच्छुक अथवा अहङ्कारीकहे जोअपनेसमान औरकोन हीमानताहै ऐसेअहङ्कारयुक्तमनुष्यसे कियेगये अथवा जोकर्म अतिक्लेशयुक्तहों य उन्हींको श्रेष्टजन राजसस्वरूपकहतेहैं २४ अबतामस कर्मकहतेहैं कि

CC-0. In Public Domain. Digitized by eGangotri

अनुबंधंक्षयंहिंसामनपेक्ष्यचपौरुषं मोहादारभ्यतेकर्मयत्तत्तामसमुच्यते २५

शाङ्करभाष्यं।

बन्धंक्षयंयस्मिन् कर्मणिक्रियमाणेशक्तिक्षयोऽर्थक्षयोवास्यात्तत्क्षयंहिंसांप्राणिपीडाञ्चानपेक्ष्यचपौरुषंपुरुषकारंशक्तोमीदंकर्मसमापयितुमित्येवमात्मसामर्थ्यं इत्येतान्यनुबन्धादीन्यनपेक्ष्यपौरुषान्तानिमोहादविवेकतआरभ्यतेकर्मयत् तत्तामसन्तमोनिर्वृत्तिमुच्यते २५ मुक्तेति मुक्तसङ्गोमुक्तःपरित्यक्तःसङ्गोयेनसमुक्तसङ्गोऽनहम्वादीनाहं वदनशीलोऽत्युत्साहसमन्वितोधृतिर्द्धारणमुत्साहमुद्यमस्ताभ्यांसमन्वितःसंयुक्तोऽत्युत्साहसमन्वितःसिद्ध्यसिद्ध्योःक्रियमाणस्यकर्मणःफलस्सिद्धावसिद्धौचसिद्ध्यसिद्ध्योःनिर्व्विकारःकेवलंशास्त्रप्रमाणप्रयुक्तफलरागादिना युक्तोयःसनिर्विकारउच्यते एवम्भूतःकर्त्तायः ससात्विकउच्यते २६ रागीति रागीरागो

आनन्दगिरिकृतटीका।

हङ्कारेणकृतंकर्मेत्युक्तमित्याह लौकिकेति ननुतत्त्वज्ञानवतोनिरहङ्कारस्यकर्मकर्तृत्वमपेक्षसाहंकारेणेत्यादिकिंनेष्यतेतत्राह योऽहीति विशेषणान्तरवशादेतत्तत्त्वविदोनिवारितत्वान्नतदपेक्षमिदंविशेषणमित्यर्थः साहंकारस्यैवराजसेकर्मणिकर्तृत्वमित्येतत्कैमुतिकन्यायेनसाधयति सात्विकस्येति नन्वात्मविदोन्यस्यनिरहंकारत्वायोगात्कथंतदपेक्षयासाहङ्कारेणेत्युक्तंतत्राह लोकइति २४

सम्प्रतितामसंकर्मोदाहरति अनुबन्धमित्यादिना २५

इदानींकर्तृवैविध्यंब्रुवन्नादौसात्विकंकर्त्तारंदर्शयति मुक्तेति सङ्गोनामफलाभिसन्धिर्वाकर्तृत्वाभिमानोवानाहंवचनशीलःकर्त्ताहमिति वदनशीलोनभवतीत्यर्थः

स्वामिकृतटीका

राजसंकर्माह यत्विति यत्तुकर्मकामेप्सुनाफलंप्राप्तुमिच्छतासाहङ्कारेणवामत्तमःकोऽन्यःश्रोत्रियोऽस्तीत्येवं निरूढाहङ्कारयुक्तेनचक्रियतेतच्चपुनर्बहुलायासमतिक्लेशयुक्तं तत्कर्मराजसमुदाहृतं २४ तामसंकर्माह अनुबन्धमिति अनुबध्यतइत्यनुबन्धंपश्चाद्भाविशुभाशुभंक्षयं वित्तक्षयंहिंसापरपीड़ांपौरुषञ्चस्वसामर्थ्यमनपेक्ष्यापर्य्यालोच्य केवलंमोहादेव यत्कर्मारभ्यते तत्तामसमुदाहृतं २५

भाषाअनुवाद

पश्चात्बन्धकरै ऐसेअनुबन्धकहैपश्चात् भावी शुभअशुभ शोधनक्षय औअपनीसामर्थ्यनविचारि केवलमोहसे जोकर्म आरम्भकियेजाय वेई तामस कर्महैं २५

CC-0. In Public Domain. Digitized by eGangotri

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्तासात्विक उच्यते २६ रागीकर्मफलप्रेप्सु र्लुब्धोहिंसात्मकोऽशुचिः हर्षशोकान्वितः कर्त्ता राजसःपरिकीर्त्तितः २७

शाङ्करभाष्यं

स्यास्तीतिरागीकर्मफलप्रेप्सुःकर्मफलार्थलुब्धःपरद्रव्येषुसञ्जातदृष्णः तीर्थादौचस्व द्रव्यापरित्यागीहिंसात्मकःपरपीड़कस्वभावः अशुचिर्बाह्यान्तःशौचवर्जितोहर्षशो कान्वितः इष्टप्राप्तौहर्षोऽनिष्टप्राप्तावनिष्टवियोगेचशोकस्ताभ्यांहर्षशोकाभ्यांसमन्वि तःसंयुक्तः तस्यैवचकर्मणःसम्पत्तिविपत्त्योर्हर्षशोकौस्यातां ताभ्यांसमन्वितः संयुक्तो यःकर्त्तासराजसःपरिकीर्त्तितः २७

आनन्दगिरिकृतटीका

धारणंधैर्यंक्रियमाणस्यकर्मणोयदिफलासिद्धिस्तर्हिनानुष्ठानविश्रम्भः सम्भवेदित्याशं क्याह केवलमिति फलरागादिनेत्यादिशब्देनकर्मरागोगृह्यते अयुक्तइतिच्छेदः २६

राजसंकर्त्तारंकथयति रागीति कर्मविषयोरागःकर्मफलप्रेप्सुरिति फलरा गस्यपृथक्कथनात्स्वाभिप्रायाप्रकटीकरणपूर्वकंपरपीड़नंपरवृत्तिविच्छेदनंतेनस्वा र्थपरइत्यर्थः २७ दीर्घंस्नायितुंशीलमस्येतिव्युत्पत्तिंगृहीत्वाविवक्षितार्थमाह

स्वामिकृतटीक

कर्त्तारंत्रिविधमाह मुक्तसङ्गइतित्रिभिः मुक्तसङ्गस्त्यक्ताभिनिवेशःअनह म्वादीगर्व्वोक्तिरहितःधृतिर्धैर्यंउत्साहउद्यमस्ताभ्यांसमन्वितः संयुक्तःआरब्धस्यकर्म्म णःसिद्धावसिद्धौचनिर्विकारोहर्षविषादशून्यःसएवम्भूतःकर्त्तासात्विकउच्यते २६

राजसंकर्त्तारमाह रागीति रागोपुत्रादिप्रीतिमान्कर्म्मफलप्रेप्सुःकर्म्मफल कामीलुब्धःपरस्वाभिलाषी हिंसात्मकोमारकस्वभावः अशुचिःविहितशौचशून्यः लाभालाभयोर्हर्षशोकाभ्यांसमन्वितः कर्त्तारजसः २७

भाषाअनुवाद

इसश्लोकसेलें तीनश्लोकसे कर्म्मकर्त्तासबको त्रिविधकरकेकहतेहैं किकर्म्मअ नुष्ठाई पुरुष कर्तृत्वअभिनिवेशबुद्धिरहित औगर्ववचनरहित औधैर्यउत्साह जो उद्यम इनदोनोंकेद्वारा युक्तसमस्तकर्म्मसे सिद्धिअसिद्धिकीअपेक्षा हर्षविषादशून्य होयं ऐसेकर्त्तापुरुषोंको सात्त्विकस्वरूपकहतेहैं २६ औरपुत्रआदिमे स्नेहयुक्त औकर्मफलकाकामीऔपरधनका अभिलाषी औनिर्दयस्वभाव औशौचरहितऔ हानिलाभमे शोकहर्षयुक्त कर्मकारीमनुष्य राजसस्वरूप कहे रजोगुणीहै २७

CC-0. In Public Domain. Digitized by eGangotri

अयुक्तःप्राकृतस्तब्धःशठोनैष्कृतिकोऽलसः विषादीदीर्घसूत्रीचकर्त्तातामसउच्यते २८ बुद्धेर्भेदंधृतेश्चैवगुणतस्त्रिविधंशृणु प्रोच्यमानमशेषेणपृथक्त्वेनधनञ्जय २९

शाङ्करभाष्यं।

अयुक्तइति अयुक्तोऽसमाहितःप्राकृतोत्यन्तासंस्कृतबुद्धिःप्रकृतिपरवशोवालिशः स्तब्धोदण्डवत्ननमतिकस्मैचिच्छठःमायावीशक्तिगूहनकारीमायावान्नैष्कृतिकःपरवृत्तिच्छेदनपरःअलसोऽप्रवृत्तिशीलःकर्त्तव्येष्वपि विषादीसर्वदाअवसन्नस्वभावःदीर्घसूत्रीचकर्त्तव्यानांदीर्घप्रसारणःसर्वदानन्दस्वभावःयदद्यश्वोवाकर्त्तव्यं तन्मासेनापिनकरोति यश्चैवम्भूतःसकर्त्तातामसउच्यते २८ बुद्धेर्भेदमिति बुद्धेर्भेदं धृतेश्चैवभेदंगुणतःसत्त्वादिगुणतःत्रिविधंशृणुइतिसूत्रोपन्यासःप्रोच्यमानंकथ्यमान

आनन्दगिरिकृतटीका

कर्त्तव्यानामिति एवंक्रियमाणेसतिअनिष्टमिदंकथञ्चिदापद्येत यदापुनरेवंक्रियते तदात्वनिष्टमेवसम्भावनोपनीतमिति चिन्तापरम्परायांमन्थरवृत्तिरित्यर्थः तदेवस्पष्टयति यदद्येति २८ ज्ञानादीनांप्रत्येकंत्रैविध्यमुक्त्वा वृत्तिमत्त्वाबुद्धेस्तद्वृत्तेश्च

स्वामिकृतटीका

तामसंकर्त्तारमाह अयुक्तइति अयुक्तोऽनभिहितःप्राकृतोविवेकसून्यःस्तब्धोऽनम्रःशठःशक्तिगूहनकारीनैष्कृतिकःपरापमानीअलसोऽनुद्यमशीलःविषादीशोकशीलःयदद्यश्वोवाकर्त्तव्यंतन्मासेनापिनसम्पादयतियःसदीर्घसूत्रीएवंभूतःकर्त्तातामसः कर्त्तृत्रैविध्येनैवज्ञातुरपित्रैविध्यमुक्तं कर्म्मत्रैविध्येनचज्ञेयस्यापित्रैविध्यमुक्तंज्ञातव्यं बुद्धेस्त्रैविध्येनचकरणस्याप्युक्तंभविष्यति २८ इदानींबुद्धेर्धृतेश्चत्रैविध्यंप्रतिजानी

भाषाअनुवाद

औरअयुक्तकहेअसावधान औप्राकृतकहेविवेकरहित औस्तब्धजोअनम्रस्वभाव औशठकहेकर्मचोर औनैःकृतिककहेपरका अपमानकरनेवाला तथाआलसी औविषादीजोसदाशोगी औदीर्घसूत्रीकहे जोकर्मतुर्तकरनेकाहो उसेमहीनोंटाले ऐसे मनुष्यतामसकर्त्ता कहातेहैं ऐसेहीकर्त्ताकीत्रैविध्यसे ज्ञाताभी तीनप्रकारहैं औकर्मकीत्रैविध्यसे ज्ञेयमात्रकोत्रैविध्यकहा औबुद्धित्रिविधकहनेसे कारणभी तीनप्रकारकेहैं २८ अबबुद्धि औधृतिकहेधैर्यकी त्रैविध्यकहनेकी प्रतिज्ञाकरतेहैं किहेधनञ्जयअर्जुन बुद्धिऔधैर्यके सत्त्वआदि गुणक्रमसे तीनभेदजोहैं उनकोमै भिन्नभिन्न कहताहूं तुमसावधानहो सुनो २९

CC-0. In Public Domain. Digitized by eGangotri

प्रवृत्तिञ्चनिवृत्तिञ्चकार्य्याकार्य्येभयाभयेबन्धंमोक्षञ्चयावेत्तिबुद्धिःसापार्थसात्विकी ३०

शाङ्करभाष्यं

मशेषेणनिरवशेषतोयथावत्पृथक्त्वेनविवेकतोधनञ्जय दिग्विजयेमानुषंदैवञ्चप्रभू तंधनंजयते तेनासौधनञ्जयोऽर्जुनः २९ प्रवृत्तिञ्चेति प्रवृत्तिञ्चप्रवृत्तिः प्रवर्त्तनंव न्धहेतुःकर्ममार्गःनिवृत्तिञ्चनिवृत्तिर्मोक्षहेतुः संन्यासमार्गःबन्धमोक्षसमानवाक्य त्वात्प्रवृत्तिनिवृत्तीकर्मसंन्यासमार्गावित्यवगम्यतेऽथवाकार्य्याकार्यविहितप्रतिषि द्धे लौकिकेवाशास्त्रबुद्धे र्वाकर्त्तव्याकर्त्तव्येकरणाकरणेइत्येतत् कस्यदेशकालाद्यपेक्ष यावेजानाति दृष्टादृष्टार्थानांकर्मणांभयाभये विभेत्यत्मादितिभयंतद्विपरीतमभयं भयञ्चाभयञ्चभयाभयेदृष्टादृष्टयोर्भयाभययोःकारणेइत्यर्थःबन्धंसहेतुकंमोक्षञ्च स हेतुकंयावेत्तिविजानातिबुद्धिःसापार्थसात्त्विकीतज्ज्ञानंबुद्धे र्वृत्तिर्बुद्धिस्तुवृत्तिमती धृ तिरपिवृत्तिविशेषएवबुद्धेः ३० ययेति ययाधर्मंशास्त्रचोदितंअधर्मञ्चप्रतिषिद्धं

आनन्दगिरिकृतटीका

धृत्याख्यायास्त्रैविध्यंसूचयति बुद्धेरिति सूत्रविवरणंप्रतिजानीते प्रोच्यमानमिति अर्जुनस्यधनञ्जयत्वंव्युत्पादयति दिगिति २९ तत्रादौसात्त्विकींबुद्धिंनिर्दिशति प्र वृत्तिञ्चेति प्रवृत्तिराचरणमात्रंअनाचरणमात्रञ्चनिवृत्तिरितिकिंनेष्यतेतत्राह व न्धेति यस्मिन्वाक्येबन्धमोक्षावुच्येतेतस्मिन्नेवप्रवृत्तिनिवृत्योरुक्तत्वात्कर्ममार्गस्यबन्ध हेतुत्वान्मोक्षहेतुत्वाच्चसंन्यासमार्गस्यतावेवात्रग्राह्यावित्यर्थः करणाकरणयोर्निर्विष यत्वायोगाद्विषयापेक्षामवतार्य्ययोगंविषयंनिर्दिशति कस्येति अनिष्टसाधनंभयमि ष्टसाधनमभयमिति विभजतेभयेति बन्धादिज्ञानमात्रस्यबुद्ध्यन्तरेपिसम्भवाद्विशेषणं नबुद्धिशब्दितस्यज्ञानस्यप्रागेवत्रैविध्यप्रतिपादनात्किमिति बुद्धेरिदानींत्रैविध्यं प्र

स्वामिकृतटीका

तेबुद्धेर्भेदमिति स्पष्टोऽर्थः २९ तत्रबुद्धेस्त्रैविध्यमाह प्रवृत्तिमितित्रिभिः प्रवृत्तिं

भषा अनुवाद।

अबइस श्लोकसेले तीनश्लोकसेबुद्धिकी त्रैविध्यकहतेहैं किधर्म्मसेप्रवृत्ति औअ धर्मसेनिवृत्ति औ देशकालके अनुसार जोकर्त्तव्य औ अकर्त्तव्य औ काजअकाज जानि अर्थअनर्थज्ञान तथाबन्धहीकैसे औ मोक्षहीवा कैसेहोता इसविचारसे भ यअभय येसब बुद्धिकेहेअन्तःकरण जानिएकै जोऐसीबुद्धि सात्विकीहै इस जग ह बुद्धिकेद्वारा पुरुष सबजानताहै यहकहनेकोथे, पर बहरीतिछोड इसीतरह कहा करणको कर्त्ता करके कहा है ३०

CC-0. In Public Domain. Digitized by eGangotri

यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ३१
अधर्म्मं धर्ममिति या मन्यते तमसावृता सर्व्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ३२

शाङ्करभाष्यं

कार्यञ्चाकार्यमेव च पूर्वोक्तेष्वेवकर्याकार्ये अयथावन्नयथावत्सर्व्वतो निर्णयेन नप्रजानातियाबुद्धिः सापार्थ राजसी ३१ अधर्ममिति अधर्मं प्रतिषिद्धं धर्मं विहितमिति या मन्यतेजानाति तमसावृताऽसतीसर्वार्थान् सर्व्वानेवज्ञेयपदार्थान्विपरीतानेव जानाति बुद्धिः सापार्थ तामसी ३२ धृत्येति धृत्याययाऽव्यभिचारिण्येतिव्यवहितेन

आनन्दगिरिकृतटीका।

तिज्ञायव्युत्पाद्यतेतत्राह ज्ञानमिति तर्हिज्ञानेनगतत्वान्नपुनर्धृतिर्व्युत्पादनीयेत्याशं क्याह वृत्तिरपीति विशेषशब्देनज्ञानाद्यावृत्तिरिष्टा ३० कार्य्याकार्ययोर्ब्रह्मधर्म्मा भ्यांपौनरुक्त्यंपरिहरति पूर्व्वोक्तइति पूर्वश्लोकेकार्याकार्यशब्दाभ्यांदृष्टादृष्टार्थानां क र्मणांकरणाकरणेनिर्दिष्टयोरेवात्रापिग्रहान्नधर्माधर्माभ्यां पूर्वपर्यायाभ्यांकृतार्थते त्यर्थः यावुद्धियया बुद्ध्या बोद्धा निर्णयेन नजानातीत्यर्थः ३१ धर्मशब्दोनपुंस कलिङ्गोपीत्यभिप्रेत्य धर्ममित्युक्तं तमसावृताऽविवेकेनवेष्टितेत्यर्थः कार्याकार्यादीन्

स्वामिकृतटीका।

धर्म्मेनिवृत्तिमधर्मेयस्मिन्देशेकालेचयत्कार्यमकार्यञ्चभयाभयेकार्य्याकार्यनिमित्तौ अर्थानर्थौकथंबन्धःकथंवामोक्षइति यावुद्धिरन्तःकरणंवेति सासात्त्विकी ययापुमा न्वेत्तीति वक्तव्येकरणेकर्तृत्वोपचारः काष्ठानिपचन्तीतिवत् ३० राजसींबु द्धिमाह ययेति अयथावत्सन्देहास्पदत्वेनेत्यर्थः स्पष्टमन्यत् ३१

भाषाअनुवाद

और हेपार्थअर्जुन जिसबुद्धिसे धर्मअधर्म औकाजअकाज अयथावत्कहेठी कठीक नजानाजाय सोबुद्धिराजसीहै ३१ और तमोगुणसे आवृत कहे घेरी जोबुद्धि अधर्मकोभीजानि धर्मकेसकल विषयको विपरीतकहे उलटाजानै ऐसी विपरीत ग्रहणकरनेवाली बुद्धि तामसी है यहांभी करणता बुद्धिकीउचित थी पर कर्त्तारूपसे कहाहै अथवा धर्मरूप अन्तःकरणकीवृत्ति बुद्धि औनिश्चय तथा इच्छाद्वेषआदिरूप अन्तःकरण की वृत्तिवज्रतभी रहते धर्म अधर्म औ भय अ भय की साधनरूप बुद्धिको प्रधानकियाहै औरसब उपलक्षणरूपसे त्रिविधकहे गयेहैं ३२ अबदूसश्लोकको अवधिकरके तीनश्लोकसेधृति की त्रैविध्य कह

CC-0. In Public Domain. Digitized by eGangotri

धृत्याययाधारयतेमनःप्राणेन्द्रियक्रियाःयोगेनाव्यभिचारिण्याधृतिःसापार्थसात्त्विकी[३३]

शाङ्करभाष्यं।

सम्बन्धःधारयतें किंमनःप्राणेन्द्रियक्रियाःमनश्चप्राणाश्चेन्द्रियाणितेषांक्रियाश्चेष्टा स्ताउच्छास्त्रमार्गप्रवृत्तेर्धारयति धृत्याहिधार्यमाणानुच्छास्त्रमार्गविषयाभवन्ति यो गेनेति योगेन समाधानेनाव्यभिचारिण्यानित्यसमाधानानुगतयेत्यर्थःएतदुक्तं भव त्यव्यभिचारिण्याधृत्यामनःप्राणेन्द्रियक्रियाःधार्यमाणायोगेनधारयतीति यैवंलक्ष णाधृतिःसापार्थसात्त्विकी ३३ ययेति ययातुधर्मकामार्थान्धर्मञ्चकामाञ्चार्थञ्चतें

आनन्दगिरिकृतटीका

ताननुक्तांश्चसंग्रहीतुंसर्व्वार्थानित्युक्तंतद्व्याचष्टे सर्वानेवेति विपरीतांश्चेति चका रमवधारणेगृहीत्वाविपरीतानेवेत्युक्तं ३२ इदानींधृतित्रैविध्यंव्युत्पिपाद यिषुरादौसात्त्विकींधृतिंव्युत्पादयति धृत्येति निर्दिष्टानाञ्चेष्टानांकथंधृत्याधारणं तत्राह ताइति तदेवानुभवेनसाधयति धृत्याहीति ध्रियतेऽनयेतिधृतिर्यत्रविशेषः तयाधृत्याधार्यमाणायथोपदिष्टाश्चेष्टाःशास्त्रमतिक्रम्य नार्थान्तराकगाहिन्योभवन्ती त्यर्थः धृतिमेवसमाध्यविनाभूतत्वेनविशिनष्टि योगेनइति ननुधृतेर्नियमेनसमा ध्यनुगतत्वंकथमुक्तक्रियाधारणोपयोगीत्याशंक्याह एतदिति उक्तक्रियाधार्यमाणा योगेनब्रह्मणिसमाधानेनैकाग्र्येणाव्यभिचारिण्याऽविनाभूतयाधृत्याधारयत्यथतदवि नाभावाभावेनियमेन तद्धारणासिद्धेरित्यर्थः ३३

स्वामिकृतटीका

तामसींवुद्धिमाह अधर्ममिति विपरीतग्राहिणीवुद्धिस्तामसीत्यर्थः वुद्धिरन्तःक रणंपूर्वोक्तं ज्ञानन्तद्वृत्तिंधृतिरपि तद्वृत्तिरेव यद्वाअन्तःकरणस्य धर्मिणोवुद्धिरध्य वसायलक्षणाऽवृत्तिरेव इच्छाद्वेषादीनांतद्वृत्तीनांवक्ष्यमाणत्वेऽपि धर्माधर्मभयाभयसाध नत्वेन प्राधान्यादेतासांत्रैविध्यमुक्तं उपलक्षणञ्चैतदन्यासां ३२ इदानींधृ तेस्त्रैविध्यमाह धृत्येतितिसृभिः योगेनचित्तैकाग्र्येणहेतुनाऽव्यभिचारिण्याविषया

भाषाअनुवाद

तेहैं कि हेअर्जुन योगकहे चित्तकी एकाग्रतासे औरऔर विषयका धारण न करके जोधैर्यसे मन औप्राण तथा सब इन्द्रियोंकी सकलक्रिया की जाय वही धृति सतोगुणी है ३३

CC-0. In Public Domain. Digitized by eGangotri

ययातुधर्मकामार्थान्धृत्याधारयतेऽर्जुन प्रसङ्गेनफलाकांक्षीधृतिःसापार्थराजसी ३४
ययास्वप्नंभयंशोकंविषादंमदमेवच नविमुञ्चतिदुर्मेधाधृतिःसातामसीमता ३५

शाङ्करभाष्यं

धर्मकामार्थाःतान्धर्मकामार्थान्धृत्याययाधारयते मनसिनित्यकर्त्तव्यरूपानेवधार यतेहेअर्जुन प्रसङ्गेनयस्ययस्यधर्मादेर्धारणप्रसङ्गस्तेनतेनप्रसङ्गेनफलाकांक्षीचभव तियःपुरुषःतस्यधृतिर्यासापार्थराजसी ३४ ययेति ययास्वप्नंनिद्राम्भयन्नाशंशोकंस न्तापंविषादमवसादंविषण्णवदनतां मदंविषयसेवां आत्मनोवऋमन्यमानोमतइव मदमेवचमनसि नित्यमेवकर्त्तव्यरूपतया कुर्वन्नविमुञ्चतिधारयत्येवदुर्मेधाःकुत्सि तमेधाः पुरुषोयस्तस्यधृतिर्यासातामसीमता ३५ गुणभेदेनक्रियाणांकारकाणाञ्च

आनन्दगिरिकृतटीका

राजसींधृतिंदर्शयति ययात्विति तेषांधारणप्रकारमभिनयति मनसीति फला कांक्षीतिकर्त्रविशेषणंतत्राह यःपुरुषइति ३४ तामसीं धृतिंव्याचष्टे ययेति शो कंप्रियवियोगनिमित्तंसन्तापंविषण्णतामिन्द्रियाणांग्लानिःविषयसेवा कुमार्गप्रव त्तेरुपलक्षणमुक्तं स्वप्नादिमदान्तंसर्वमेवकर्त्तव्यतयात्मनोवऋमन्यमानोमनसि नि त्यमेवकुर्वन्दुर्मेधाःन मुञ्चति किन्तुधारयत्येवेति योजना ३५ धृतिमनूद्यानन्त

स्वामिकृतटीका।

न्तरमवधारयन्त्राययाधृत्यामनसःप्राणस्येन्द्रियाणाञ्च क्रियाधारयते नियच्छति साधृतिःसात्विकी ३४ राजसींधृतिमाह ययात्विति ययातुधृत्याधर्मार्थकामान् प्राधान्येनधारयते नविमुञ्चति तत्प्रसङ्गेनतत्फलाकांक्षीचभवतिसाराजसी धृतिः ३४ तामसींधृतिमाह ययेति दुष्टा अविवेकवऋलामेधायस्यसदुर्मेधाः पुरुषोयया धृत्यास्वप्नादीन्नविमुञ्चति पुनःपुनरावर्त्तयति स्वप्नोनिद्रा साधृतिस्तामसी ३५

भाषाअनुवाद

अब राजसीधृतिकहतेहैं कि हेअर्जुन तिससेभिन्नजोधृति किजिससे धर्मअर्थ औकाम सबश्रेष्ठरूपसे धारणकियेजांय परित्यक्तनहोंय औउनकेसङ्गसे धर्मादि के फलकीआकांक्षा भीहोय ऐसीधृतिका नाम राजसीहैं ३४ अबतामसीधृति कहतेहैं किहेअर्जुन जिसमनुष्यकी दुर्मेधाकहे अविवेकिनी नीचबुद्धिहै और वहदुर्बुद्धिमनुष्य जिसधृतिकहेधैर्यसे निद्राऔभयशोक तथा विषादकहेदुख औ मद इनकोनही छोडताहै वहधृति तामसीहै ३५ अबसुखभी तीनप्रकारका है य

CC-0. In Public Domain. Digitized by eGangotri

सुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ अभ्यासाद्रमतेयत्रदुःखान्तञ्चनिगच्छति ३६
यत्तदग्रेविषमिवपरिणामेऽमृतोपमं तत्सुखंसात्त्विकंप्रोक्तमात्मबुद्धिप्रसादजं ३७

शाङ्करभाष्यं

त्रिधाभेदउक्तोऽथेदानींफलस्यसुखस्यत्रिविधोभेदउच्यते सुखमिति सुखन्तुइदानीं त्रिविधंशृणुसमाधानंकुर्वित्येतन्मेममभरतर्षभअभ्यासात्परिचयादाकृत्तेरमतेरतिं प्रतिपद्यतेयत्रयस्मिन्सुखानुभवेदुःखान्तञ्चदुःखावसानंदुःखोपशमञ्चनिश्चयेन प्राप्नोति ३६ तदिति यत् सुखमग्रे पूर्वंप्रथमसन्निपातेज्ञानवैराग्यध्यानसमाध्यारम्भेऽत्यन्तायासपूर्वकत्वाद्विषमिव दुःखात्मकंभवति परिणामेज्ञानवैराग्यादिपरिपाकजंसुखममृतोपमन्तत्सुखंसात्विकंप्रोक्तंविद्वद्भिरात्मनोबुद्धिरात्मबुद्धेःप्रसादोनैर्मल्यंसलिलवत् स्वच्छता ततोजातमात्मबुद्धिप्रसादजमात्मविषयावात्मावलम्बनाबुद्धिरात्मबुद्धिस्तत्प्रसादे प्रकर्षाद्राजातमित्येतत्तस्मात्सात्विकंतन्मतं ३७

आनन्दगिरिकृतटीका

श्लोकतात्पर्य्यमाह गुणेत्यादिना क्रियमाणंकारकाणांगुणतस्त्रैविध्योक्त्यनन्तरं फलस्यसुखस्यत्रैविध्योक्त्यवसरेसतीत्याह इदानीमितिहेयोपादेयभेदार्थंत्रैविध्यंसमाधानमैकाग्र्यंममवचनादितिशेषः यत्रेत्युभयत्रसम्बध्यतेतत्त्रिविधंसुखमितिपूर्वेण सम्बन्धः ३६ तत्रसात्विकंसुखमादेयत्वेन दर्शयति यत्तदिति प्रथमसन्निपातं विभजते ज्ञानेति कृतस्तस्यदुःखात्मकत्वंतत्राह अत्यन्तेति दुःखात्मकत्वेदृष्टान्तमाह

स्वामिकृतटीका

इदानीं सुखस्यत्रैविध्यं प्रतिजानीते सुखन्त्विति स्पष्टोऽर्थः ३६

भाषाअनुवाद

ह प्रतिज्ञाआधे श्लोकसेकहतेहैं कि हेभरतवंशीअर्जुन अबत्रिविधसुखभी हमसेसुनो किजोपुरुष नित्यअभ्यासकेहेतुसे सुखभोगकरताहै औरविषयीलोगोंकेसमान विषयवासनासे अतिहठधरके सुखभोग नहीकरता प्रीतिको नहीप्राप्त होताहै ऐसाजोसुखभोगीपुरुष सोहठात्दुखके अन्तकोप्राप्त होताअर्थात्दुखसेछूटजाताहै ३६ औरवहसुखकैसाहै इसपर कहते हैं किजोसुखअग्रे कहे प्रथमविषकेतुल्य है औअन्तको अमृतसमानहोताहै वहसुखसात्विकहै औआत्मा तथाबुद्धिकी प्रसन्नतासे उत्पन्नहै अर्थात्मलरूप रजोगुणतमोगुण तिनको सतोगुण दूरकरैहै तब वहसुखप्रगटैहै ३७ अबराजस सुखकहते हैं किविषय वासनासहि

CC-0. In Public Domain. Digitized by eGangotri

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमं परिणामेविषमिवतत्सुखंराजसंस्मृतं ३८

शाङ्करभाष्यं

विषयेति विषयेन्द्रियसंयोगाद्यत्सुखंजायतेप्रथमंप्रथमक्षणेऽमृतोपममप्रतसंप्रपरिणामेविषमिववलवीर्यरूपप्रज्ञामेधात्मनोत्साहहानिहेतुत्वादधर्मतज्जनितनरकादिहेतुत्वाच्चपरिणामेतदुपभोगविपरिणामान्तेविषमिवतत्सुखंराजसंस्मृतं ३८

यदग्रेचेति यदग्रेचानुवन्धेचावसानोत्तरकालेच सुखंमोहकरमात्मनोनिद्रालस्यप्रमादोत्थनिद्राचालस्यञ्चप्रमादश्चतेभ्यःसमुत्तिष्ठतीति निद्रालस्यप्रमादोत्थन्तत्तामससमुदाहृतं ३९ अथेदानींप्रकरणोपसंहारार्थः श्लोकआरभ्यतें नेति न

आनन्दगिरिकृतटीका

विषमिवेति ज्ञानादिपरिपाकावस्थापरिणामस्तस्मिन्सति ततोजातमितियोजना तत्रैव हेत्वन्तरमाह आत्मनइति आत्मबुद्धिशब्दार्थान्तरमाह आत्मविषयेति अन्तःकरणनैर्मल्याद्वा सम्यक्ज्ञानप्रकर्षाद्वा जातत्वादिति तच्छब्दार्थः ३७

राजसंसुखंहेयत्वायकथयति विषयेति वलंसङ्घातसामर्थ्यंवीर्यं पराक्रमकृतं यशोरूपंशरीरसौन्दर्य्यंप्रज्ञाश्रुतार्थग्रहणसामर्थं मेधागृहीतार्थस्याविस्मरणेनधारणशक्तिःधनंगोहिरण्यादिउत्साहस्तुकार्यंप्रत्युपक्रमादिः एतेषां नाशकत्वाद्वैषयिकंसुखंविषसममित्यर्थः तत्रैवहेत्वन्तरमाह अधर्मेति ३८

स्वामिकृतटीका

तत्रसात्विकंसुखमाह अभ्यासादिति सार्द्धेन यत्र यस्मिन्सुखे अभ्यासाद्रमतेनतुविषयसुखइवसहसारतिंप्राप्नोतियस्मिन्रममाणश्चदुःखस्यान्तमवसानं नितरांगच्छतिप्राप्नोति कीदृशंयत्तत् किमपिअग्रे प्रथमंविषमिव मनःसंयमाधीनत्वात्दुःखावहमिवभवति परिणामेत्वमृतसदृशंआत्मविषयावुद्धिरात्मबुद्धिस्तस्याप्रसादोरजस्तमोमलत्यागेन स्वच्छतयावस्थानंततोजातं यत् सुखं तत्सात्विकंप्रोक्तंयोगिभिः ३७

राजसंसुखमाह विषयेति विषयाणामिन्द्रियाणाञ्चसंयोगात् यत्तत्प्रसिद्धं स्त्रीसंसर्गादिसुखं अमृतमुपमायस्य तादृशंभवति अग्रे प्रथमंपरिणामेच विषतुल्यं इहामुत्रचदुःखहेतुत्वात्तत् सुखं राजसंस्मृतं ३८

भाषाअनुवाद

त इन्द्रियोंकेसंयोगसे जोप्रियसङ्गमआदि सुखहोताहै और पहलेतो अमृततुल्य लगताहै औअन्तको दुखदाईहेतुसे विषसमान होता सोई सुख राजस है ३८

CC-0. In Public Domain. Digitized by eGangotri

यदग्रे चानुवन्धे चसुखं मोहनमात्मनः निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतं ३९
नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः सत्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः ४०

शाङ्करभाष्यम् ।

तदस्तितन्नास्तिपृथिव्यांवामनुष्यादिसत्वंप्राणिजातमन्यद्वाऽप्राणिजातंदिविदेवेषुवा पुनःसत्वंप्रकृतिजैःप्रकृतितोजातैरेभिस्त्रिभिर्गुणैःसत्वादिभिर्मुक्तं परित्यक्तं यत्स्याद्व वेन्नतदस्तीति पूर्व्वेणसम्बन्धः सर्व्वःसंसारःक्रियाकारकफललक्षणः सत्त्वरजस्तमोगु णात्मकोऽविद्यापरिकल्पितः समूलोऽनर्थउक्तःदृक्षरूपपरिकल्पनतयाचोर्ध्वमूलमि त्यादिना तञ्चासङ्गशस्त्रेणछेदनंकृत्वा ततः पदन्तत्परिमार्गितव्यमितिचोक्तं तत्रचसर्व्वस्यत्रिगुणात्मकत्वात्संसारकारणनिवृत्त्यनुपपत्तौप्राप्तायांयथातन्निवृत्तिः स्यात्तथावक्तव्यंसर्व्वञ्चगीताशास्त्रार्थउपसंहर्त्तव्यएतावानेवचसर्वोवेदःस्मृत्यर्थश्च ४०

आनन्दगिरिकृतटीका

तामसं सुखंत्यागार्थमेवोदाहरति यदग्रेचेति अनुवन्धशब्दार्थमाह अवसानेति मोहनं मोहकरन्तदुत्पत्तिहेतुमाह निद्रेति ३९ क्रियाकारकफलात्मनःसं सारस्यप्रत्येकंसात्विकादिभेदेनत्रैविध्यमुक्त्वासंसारान्तर्भूतमेवकिञ्चित् गुणत्रयास्य ष्टमपिक्वचिद्भविष्यतीत्याशंक्याह अथेति संसारस्यसर्व्वस्यैवगुणत्रयसंसृष्टत्वंप्रकरणं अन्यद्वाऽप्राणीत्यत्राप्राणिशब्देनप्रसिद्ध्यास्थावरादिगृह्यन्ते प्रकरणार्थमुपसंहृतम

स्वामिकृतटीका ।

तामसंसुखमाह यदिति अग्रे चप्रथमक्षणेअनुवन्धे चपश्चादपियत्सुखमात्मनो मोहकरंतदेवाह निद्राचआलस्यञ्चप्रमादश्चकर्त्तव्यावधारणराहित्येनमनोग्राह्य मेतेभ्यउत्तिष्ठतियत्सुखं तत्तामसमुदाहृतं ३९

भाषाअनुवाद

तामससुख कहते हैं कि अग्रे कहेपहिले औअनुवन्धकहेपीछेभी जोसुखमो हकारी विशेषसे निद्राऔआलस्य तथाप्रमादकहे चित्तकीअसावधानी औमनकी जडतासे जोसुखहोयसोईतामस सुखहै ३९ अबजोपूर्वअध्यायोंमे कहींनहीं कहा सोइसश्लोकसेले तीनश्लोकसे कहतेहैं किइनसतोगुणआदिप्रकृतिकेगुणोंसे मुक्तअर्थात छूटाहुआ सत्त्व कहेप्राणीमात्रनहींहै अथवा और कोईवस्तु क्या पृथिवीमे मनुष्यआदि क्यास्वर्गमे देवताआदिमे कोई भी गुन रहित नहीं है ४०

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

पुरुषार्थमिच्छद्भिरनुष्ठेयइत्येवमर्थंब्राह्मणक्षत्रियविशामित्यादिरारभ्यतेब्राह्मणेतिब्राह्मणाश्चक्षत्रियाश्चविशश्चब्राह्मणक्षत्रियविशस्तेषांब्राह्मणक्षत्रियविशांशूद्राणाञ्चशूद्राणामसमासकरणमेकजातित्वेसतिवेदेऽनधिकारात्हेयरन्तपकर्माणिप्रविभक्तानीतरेतरविभागेनव्यवस्थापितानिकेनस्वभावप्रभवैर्गुणैःस्वभावईश्वरस्यप्रकृतिःत्रिगुणात्मिका माया साप्रभवोयेषांगुणानांतेस्वभावप्रभवास्तैःशमादीनिकर्माणिप्रविभक्तानिब्राह्मणादीनामथवाब्राह्मणस्वभावस्यसत्वगुणप्रभवःकारणंतथाचक्षत्रियस्वभावस्यसत्त्वोपसर्जनंरजःप्रभवःवैश्यस्वभावस्यतमउपसर्जनंरजःप्रभवःशूद्रस्वभावस्य रजउपसर्जनंतमःप्रभवःप्रशान्तैश्वर्येहामूढस्वभावदर्शनाच्चतुर्णांअथवाजन्मान्तरकृतसंस्कारःप्राणिनांवर्त्तमानजन्मनिस्वकार्य्याभिमुखत्वेनाभिव्यक्तःस्वभावःसप्रभवोयेषांगुणानान्तेस्व

आनन्दगिरिकृतटीका

नुवर्तति सर्वइति तस्यानेकात्मकत्वेनहेयत्वंसूचयति क्रियेति निर्गुणादात्मनोवैलक्षण्याच्चतस्यहेयतेत्याह सत्वेतिअनर्थत्वाच्चतस्यत्याज्यत्वमनर्थत्वञ्चाविद्याकल्पितत्वेनावस्तुत्वादित्याह अविद्येतिनकेवलमष्टादशेसंसारोदर्शितःकिन्तुपञ्चदशेपीत्याह दृश्येतिचकारात्सर्वःसंसारःइत्यनुकृष्यतेसंसारध्वस्तिसाधनंसम्यक्ज्ञानञ्च तत्रैवोक्तमित्याह असङ्गेति दृश्यमनूद्यानन्तरसन्दर्भतात्पर्यमाह तत्रचेतिउक्तोविनिवर्त्तयिषितःसंसारःसति सप्तम्यापरामृश्यते सर्वोहिसंसारोगुणत्रयात्मकोनच गुणानांप्रकृत्यात्मकानांसंसारकारणीभूतानांनिवृत्तियुक्ताप्रकृतेर्नित्यत्वादित्याशङ्कायां स्वधर्मानुष्ठानात्तत्त्वज्ञानोत्पन्नागुणानामज्ञानात्मकानांनिवृत्तिर्यथाभवतितथास्वधर्मजातं वक्तव्यमित्युत्तरग्रन्थप्रवृत्तिरित्यर्थः तत्तद्वर्णप्रयुक्तधर्मजातमुपदेशेचोपसंहारप्रकरणप्रकोपःस्यादित्याह सर्वञ्चेति उपसंहृते गीताशास्त्रार्थेयद्यपिसर्वोवेदार्थः सूत्रार्थश्च सर्वउपसंहृतस्तथापिमुमुक्षुभिरनुष्ठेयमस्तिवक्तव्यमवशिष्टमित्याशंक्याह एतावानिति अनुष्ठेयपरिमाणनिर्द्धारणवदुक्तशङ्कानिवर्त्तनंशास्त्रार्थोपसंहारश्चेत्येतदुभयञ्चकारार्थः ४० सम्प्रतिवर्णचतुष्टयस्यअनुष्ठेयंधर्मजातंसंकीर्णमितिस्थूलमुपन्यस्य

स्वामिकृतटीका

अनुक्तमपिसंगृह्णन्प्रकरणार्थमुपसंहरति नतदितिभिः एभिःप्रकृतिसंभवैःसत्वादिभिर्गुणैर्मुक्तंहीनंसत्वंप्राणिजातंअन्यद्वायत्स्यात्तत्पृथिव्यांमनुष्यादिषु दिविदेवेषुचकापि नास्तीत्यर्थः ४० ननु यद्येवंसर्वमपिक्रियाकारकफलादिकं प्रा

CC-0. In Public Domain. Digitized by eGangotri

ब्राह्मणक्षत्रियविशांशूद्राणाञ्चपरन्तप कर्माणिप्रविभक्तानिस्वभावप्रभवैर्गुणैः ४१

शाङ्करभाष्यं

भावप्रभवागुणाःगुणप्रादुर्भावस्यनिःकारणत्वानुपपत्तेःस्वभावः कारणमिति कारण विशेषोपादानंएवंस्वभावप्रभवैःप्रकृतिप्रभवैःसत्वरजस्तमोभिर्गुणैः स्वकार्य्यानुरूपेणशमादीनिकर्माणिप्रविभक्तानि ननु शास्त्रप्रविभक्तानिशास्त्रेणविहितानि ब्राह्मणादीनांशमादीनिकर्माणिकथमुच्यते सत्वादिगुणप्रविभक्तानीतिनैषदोषः शास्त्रेणापिब्राह्मणादीनां सत्वादिगुणविशेषापेक्षयैव शमादीनि कर्माणिप्रविभक्तानि न गुणाननपेक्षयेति शास्त्रप्रविभक्तान्यपिकर्माणि गुणप्रविभक्तानीत्युच्यते ४१

आनन्दगिरिकृतटीका

ति ब्राह्मणेति उपनयनसंस्कारवत्त्वेसति वेदाधिकारित्वंसमानमितित्रयाणांसमासकरणमितरेषामसमासे हेतुमाह शूद्राणामिति एकजातित्वमुपनयनवर्जितत्वंकर्मणामसंकीर्णत्वेन व्यवस्थापकं प्रश्नपूर्वकंप्रकटयति कैरित्यादिना स्वभावप्रभवैर्गु

भाषाअनुवाद

जो समस्तक्रियाओंकारककहे क्रियोंके साधन तथा फलआदि औ प्राणीमात्र सबभी त्रिगुणात्मककहे त्रिगुणमय भयेहैं तो इनलोगोंकी मुक्तिकैसेघटै कहे होसकै है इस शङ्कानिवारण के अर्थ अपनेअपने अधिकारअनुसार कर्मअनुष्ठानकेद्वारा भगवतआराधनसेभई भगवतकी कृपाप्राप्तिसेप्रगट जोतत्वज्ञान तिसकेद्वाराही जोमुक्तिहोगी यहजोगीताकासारसंग्रह सोदेखावनेकासानसकर इस श्लोकसेअध्यायसमाप्तितक प्रकारान्तर कहे दूसरीरीत कहनेका आरम्भकरते हैं किहेपरन्तप शत्रुनाशकअर्जुन ब्राह्मणक्षत्रीवैश्यऔशूद्र इनके कर्मप्रविभक्त कहे प्रकटरूपसे भिन्नभिन्नविहित हैं और द्विजपदसे शास्त्रमे ब्राह्मणआदि तीन वर्णकहेजाते हैं इससे शूद्रको अलगकरके कहा हैं सोई लक्षण कहते हैं कि स्वभावकहे सतोगुणआदि जिनसेसबका प्रभवकहे उत्पत्तिहै उन्हींकेअनुसार ब्राह्मणआदि के कर्म प्रथकप्रथक विहितहैं अथवा स्वभावकहेपूर्वजन्मका संस्कार उसके अनुसार जोब्राह्मणआदिकी गुणक्रमसेकर्मोमे प्रवृत्तिहै विशेषयहकि ब्राह्मण सतोगुणप्रधान हैं औक्षत्री कुछसतोगुणसहित रजोगुणप्रधान हैं और वैश्य कुछसतोगुणतमोगुणले कर रजोगुणप्रधान है और शूद्रकुछ रजोगुणयुक्ततमोगुणप्रधान है इससेशास्त्रनेउनकोवैसेहीकर्मकहायहजानो ४१

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

कानि पुनस्तानि कर्माणीत्युच्यते शमइति शमदमोचयथाव्याख्यातार्थौ तपोयथोक्तंशारीरादि शौचंव्याख्यातंक्षान्तिःक्षमा अर्जवंऋजुतैवच ज्ञानंविज्ञानं आस्तिक्यंअस्तिभावःश्रद्दधानता परमार्थेषुआगमार्थेषु ब्रह्मकर्मब्राह्मणजातेःकर्मब्रह्मकर्म स्वभावजं यदुक्तं स्वभावप्रभवैर्गुणैःप्रविभक्तानीति तदेवोक्तं स्वभावजमिति ४२

आनन्दगिरिकृतटीका।

णैरित्यस्यार्थान्तरमाह अथवेति उक्तव्यवस्थायांकार्यदर्शनंप्रमाणयति प्रशान्तैरिति स्वभावशब्दस्यार्थान्तरमाह अथवेति किमितिगुणाभिव्यक्तेरुक्तवासनाधीनत्वन्तदाह गुणेतिननुनास्तिगुणप्रादुर्भावस्यनिर्द्धारणत्वंप्रकृतिजैर्गुणैरिति प्रकृतेर्गुणकारणत्वाभिधानादतआह स्वभावइति वासनाकारणमिति गुणाव्यक्तेर्निमित्तकारणत्वं विवक्षितंप्रकृतिस्तुउपादानमितिभावः उक्तमुपसंहरति एवमिति स्वभावप्रभवैः सत्त्वादिगुणैःब्राह्मणादीनांकर्माणिप्रविभक्तानीत्युक्तमाक्षिपति नन्विति शास्त्रस्यधर्मविभागहेतोःसत्वादिविशेषापेक्षयैव विभागज्ञापकत्वादुभयत्रविभागहेतुत्वोक्तिर्विरुद्धेति परिहरति नैषदोषइति ४१ प्रविभक्तानि कर्माण्येवप्रश्नद्वाराविविच्यदर्शयति कानीत्यादिना अन्तःकरणोपशमःशमोदमोवाह्यकरणोपरतिरित्युक्तंस्मारयति यथेति त्रिविधस्तपःसप्तदशेदर्शितमित्याह तपइति शौचमपिवाह्यान्तरभेदेन प्रागेवोक्तमित्याह शौचमिति क्षमानामाक्रुष्टस्य ताडितस्यवा मनसिविकारराहित्यं ज्ञानं शास्त्रीयं पदार्थज्ञानं विज्ञानं शास्त्रार्थस्यस्वानुभवपर्यन्तत्वापादनंविधा व्याख्यातं स्वभावशब्दार्थमुपेत्याह यदुक्तमिति ४२

स्वामिकृतटीका

णिजातञ्चत्रिगुणात्मकमेवतर्हिकथमस्यमोक्षइत्यपेक्षायांस्वस्वाधिकारेणविहितैःकर्मभिःपरमेश्वराराधनात्तत्प्रसादलब्धज्ञानेनेत्येवंसर्वगीतार्थसारंसंगृह्य दर्शयितुं प्रकारान्तरमारभते ब्राह्मणेत्यादियावदध्यायसमाप्ति हेपरन्तपहेशत्रुतापनब्राह्मणानांक्षत्रियाणांवैश्यनांशूद्राणाञ्चकर्माणिप्रविभक्तानिप्रकर्षेणविभागतोविहितानि शूद्राणांसमासात्पृथककरणंद्विजत्वाभावेनवैलक्षण्यंविभागोपलक्षणमाह स्वभावःसात्विकराजसादिःप्रभवति प्रादुर्भवतियेभ्यस्तैर्गुणैरुपलक्षणभूतैःयद्वास्वभावप्रभवैःपूर्वजन्मसंस्कारप्रादुर्भूतैरित्यर्थः तत्रसत्वप्रधानाब्राह्मणाः सत्वोपसर्जनरजःप्रधानाः क्षत्रियाः तमउपसर्जनरजःप्रधाना वैश्याःरजउपसर्जनतमःप्रधानाः शूद्राः ४१

CC-0. In Public Domain. Digitized by eGangotri

शमोदमस्तपःशौचंक्षान्तिरार्जवमेवच ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजं ४२
शौर्य्यंतेजोधृतिर्दाक्ष्यं युद्धेचाप्यपलायनं दानमीश्वरभावश्चक्षात्रकर्मस्वभावजं ४३

शाङ्करभाष्यं

शौर्यमिति शौर्यंशूरस्यभावस्तेजः प्रागल्भ्यं धृतिर्द्वारणं सर्व्वावस्थास्वनवसादोभवति यथाधत्योत्तम्भितस्य दाक्ष्यंदक्षस्यभावः सहसाप्रत्युत्पन्नेषुकार्येष्वव्यामोहेनप्रवृत्तिर्युद्धेचाप्यपलायनमपराङ्मुखीभावःशत्रुभ्यः दानंदेयेषुमुक्तहस्तता ईश्वरभावः ईश्वरस्यभावःप्रभुशक्तिप्रकटीकरणमीप्सितव्यान्प्रति क्षात्रंकर्मक्षत्रियजातेर्विहितंकर्म क्षात्रंकर्मस्वभावजं ४३ कृषीति कृषिगोरक्ष्यवाणिज्यं कृषिश्चगो

आनन्दगिरिकृतटीका।

शूरस्यभावोविक्रमोबलवत्तरानपिप्रहर्त्तुं प्रवृत्तिः प्रागल्भ्यंपरैरधर्षणीयत्वं महत्यामपिविपदिदेहेन्द्रियोत्तम्भनीचित्तवृत्तिर्धृतिरितिव्याचष्टे सर्व्वावस्थास्विति दक्षस्यभावमेवविभजते सहसेति ४३

स्वामिकृतटीका

तत्रब्राह्मणस्यस्वाभाविकानिकर्माण्याह शमइति शमश्चित्तोपरमःदमोबाह्येन्द्रियोपरमःतपः पूर्व्वोक्तंशारीरादि शौचंबाह्याभ्यन्तरंक्षान्तिः क्षमाआर्जवमवक्रता ज्ञानंशास्त्रीयंविज्ञानमनुभवः आस्तिक्यमस्तिपरलोकइतिनिश्चयःएतच्छमादिब्राह्मणस्यभावाज्जातंकर्म ४२ क्षत्रियस्यस्वाभाविकंकर्माह शौर्यंमिति शौर्यंपरा

भाषाअनुवाद

तो वेस्वाभाविक कौनकर्महैं सोई कहते हैं कि शमकहे चित्तकी शान्तिऔ दमकहे बाह्य इन्द्रियोंकी शान्ति औ तपजो १७अध्यायके १४ श्लोकमें शरीरकी तपस्या कहाहै तथा शौचअर्थात् बाहरभीतरकीशुद्धि औक्षान्तिकहे क्षमा आर्जव कहेसीधापन औज्ञानकहे शास्त्रकेअर्थकाबोधऔविज्ञानकहे अनुभव तथाआस्तिक्यकहेपरलोकहै ऐसोनिश्चयरूपबुद्धियेसबब्राह्मणोंकेस्वभावसिद्धकर्महैं सोजानो ४२ अबक्षत्रियकेस्वभावज जोकर्म उनकोकहतेहैं किशौर्यकहे पराक्रम औतेज कहेढीठापन धृतिकहे धैर्य औदाक्ष्यकहे निपुणता औसंग्राम आनपड़नेसे पीठि दे नभागना तथा दानकहे उदारता औईश्वरभावअर्थात् विषय सम्बन्धी नियम आदिकरनेकी शक्ति येसब क्षत्रियके स्वभावहीसे उत्पन्नकर्महैं ४३

CC-0. In Public Domain. Digitized by eGangotri

कृषिगोरक्ष्यवाणिज्यंवैश्यकर्मस्वभावजं परिचर्य्यात्मकंकर्मशूद्रस्यापिस्वभावजं ४४

शाङ्करभाष्यं ।

रक्ष्यञ्चवाणिज्यञ्च कृषिगोरक्ष्यवाणिज्यं कृषिर्भूमेर्व्विलेखनं गांरक्षतीतिगोरक्ष स्तद्भावोगोरक्ष्यंपाशुपाल्यं वाणिज्यंवणिक्कर्म्मक्रयविक्रियादिलक्षणं वैश्यकर्म वैश्य जातेःकर्मवैश्यकर्मस्वभावजं परिचर्य्यात्मकंशुश्रूषास्वभावंकर्मशूद्रस्यापिस्वभावजं ४४

एतेषांजातिविहितानांकर्मणांसम्यगनुष्ठितानांस्वर्गप्राप्तिःफलंस्वभावतःवर्णा आश्रमादयश्चस्वकर्मनिष्ठाः प्रेत्यकर्मफलमनुभूय ततःशेषेणविशिष्टदेशजातिकुलध र्मायुःश्रुतवृत्तसुखमेधसोजन्मप्रतिपद्यन्तेइत्यादिस्मृतिभ्यः पुराणेचवर्णानामाश्रमा णाञ्चलोकफलभेदविशेषस्मरणात् कारणान्तरात्त्विदंवक्ष्यमाणंफलंशृणुस्वेस्वेइति स्वेस्वेयथोक्तलक्षणभेदेकर्मण्यभिरतस्तत्परःसंसिद्धिंस्वकमानुष्ठानादशुद्धिक्षये सति कार्यमिन्द्रियाणांज्ञानाधिष्ठानयोग्यतालक्षणांसंसिद्धिंलभते प्राप्नोतिनरोधिकृतःपु रुषःकिंस्वकर्मानुष्ठानादेवसाक्षात्संसिद्धिंनकथंतर्हिस्वकर्मनिरतःसिद्धिंयथा येन प्रकारेणविन्दति तच्छृणु ४५ यतइति यतोयस्मात्प्रवृत्तिरुत्पत्तिश्चेष्टावा

आनन्दगिरिकृतटीका ।

वैश्यशूद्रयोःकर्म्मविवक्षयाऽनुवदति कृषिवाणिज्यगोरक्ष्येतिस्पष्टार्थः ४४

स्वामिकृतटीका ।

क्रमः तेजःप्रागल्भ्यं धृतिधैर्य्यं दाक्ष्यंकौशलं युद्धेचाप्यपलायनं अपराङ्मुखता दा नमौदार्यं ईश्वरभावोनियमनशक्तिः एतत्क्षत्रियस्य स्वाभाविकंकर्म ४३

वैश्यशूद्रयोःकर्माह कृषीति कृषिःकर्षणं गांरक्षतीतिगोरक्षस्तस्यभावोगो रक्ष्यंपाशुपाल्यमित्यर्थः वाणिज्यंक्रयविक्रयादि एतद्वैश्यस्यस्वाभाविकंकर्म त्रैव र्णिकपरिचर्यात्मकं शूद्रस्यापि स्वभावजंकर्म ४४

भाषा अनुवाद

अववैश्यकेस्वभावज कहेस्वभावसिद्धकर्म कहतेहैं किकृषीकहे खेती औगोर क्षा जोदोप्रकारकीहै एकतो गउकारक्षण दूसरा अपनेआश्रितका पालनकरना औवाणिज्यव्यापार खरीदनावेचना तथा ब्राह्मणऔ देवतामे श्रद्धारखना येसव वैश्यवंशकेस्वाभाविक कर्महैं अवशूद्रका कर्मसुनो किइनतीनोवर्णकी सेवारूप व्यापार शूद्रका स्वभावज कर्महै शूद्रको सेवाछोड़ औरकोईभी कमनहींहै ४४

CC-0. In Public Domain. Digitized by eGangotri

स्वेस्वे कर्मण्यभिरतःसंसिद्धिंलभतेनरः स्वकर्मनिरतःसिद्धिंयथाविन्दतितच्छृणु ४५

आनन्दगिरिकृतटीका ।

स्वभावस्तुपूर्ववच्छमादिपरिचर्यान्तकर्मणांविभज्योक्तानामभ्युदयंफलमादावुपन्यस्यति एतेषामिति स्वभावतोविहितत्वादेवमोक्षापेक्षामन्तरेणानुष्ठानादित्यर्थः तत्प्रमाणमाह वर्णादिति शेषशब्देनभुक्तकर्मणोतिरिक्तं कर्मानुशयशब्दितमुच्यते प्रत्येकंदेशादिभिर्विशिष्टशब्दःसम्बध्यते आदिशब्देनतद्यथाअन्नफलार्थेनिर्मितेच्छायागन्धाद्यनुत्पद्यतेएवंधर्मंचर्यमाणमर्थाअनुत्पद्यन्ते नधर्महानिर्भवतीतिस्मृतिर्गृह्यते इतश्चोक्तानांकर्मणांस्वर्गफलत्वंयुक्तमित्याह पुराणेचेति उक्तंहियस्तुसम्यक्करोत्येवंगृहस्थः परमंविधिन्तद्वर्णवन्धमुक्तोसौलोकानाप्नोत्यनुत्तमानिति यस्त्वेतांनियतश्चर्यांवानप्रस्थश्चरेत्मुनिःसंहृत्यग्निबहून्जयेल्लोकांश्चशाश्वतान् इति मोक्षाश्रयश्चरतेयथोक्तंशुचिःसुसंकल्पितबुद्धियुक्तः अनिन्धनज्योतिरिवप्रशान्तंसब्रह्मलोकान्श्रयतेद्विजातिरितिच सर्वएतेपुण्यलोकाभवन्तीतिश्रुतिश्चकारार्थः यदिपुनर्मोक्षापेक्षयोक्तानिकर्माण्यनुष्ठीयेरंस्तदामोक्षफलत्वंतेषांसेत्स्यतीत्याह कारणान्तरादिति तदेवकारणान्तरंयन्मोक्षापेक्षयातेषामनुष्ठानंमोक्षोपायेषुसाक्षिकेषुब्राह्मणधर्मेषुक्षत्रियादीनामनधिकारात् ब्राह्मणानामेवमोक्षोनक्षत्रियादीनामित्याशंक्याह स्वेस्वे इति यथास्वे कर्मण्यभिरतस्यबुद्धिशुद्धिद्वाराज्ञाननिष्ठायोग्यताप्राप्ताप्राप्तज्ञानस्यमोक्षोपपत्तेर्ब्राह्मणातिरिक्तस्यापि ज्ञानवतोमुक्तिरितिमत्वापूर्वार्द्धंव्याचष्टे स्वेस्वे इत्यादिना संसिद्धिशब्दस्यमोक्षार्थत्वंगृहीत्वास्वधर्मनिष्ठत्वमात्रेण तल्लाभेतादर्थ्येनसंन्यासादिविधानानर्थक्यमितिमन्वानःशङ्कते किमिति नतावन्मात्रेण साक्षान्मोक्षोज्ञाननिष्ठायोग्यताचेति परिहरति नेति तर्हिकथंस्वधर्मनिष्ठस्यसंसिद्धिरितिपृच्छति कथंतर्हीति उत्तरार्द्धेनोत्तरमाह स्वकर्मेति तच्छृणु तंप्रकारमेकाग्रचेतोभूत्वाश्रुत्वावधारयेत्यर्थः ४५ तमेव प्रकारंस्फुटयति यतइति यतः

भाषाअनुवाद

ब्राह्मण आदि वर्णोंके इनसबकर्मोंको ज्ञानका हेतुत्वकहते हैं कि अपने अपने अधिकार के अनुसार विहितकर्ममे निरतकहे निष्ठासे लगेहुये मनुष्य संसिद्ध कहे ज्ञानकी योग्यता लाभकरते हैं औ कर्मके द्वारा ज्ञानप्राप्ति की प्रकार इस श्लोकके आधेसे लें डेढ़श्लोकसे कहतेहैं कि अपने कर्ममे सब तरह निष्ठायुक्त पुरुष जिस प्रकार से तत्वज्ञान लाभकरते हैं सो प्रकार तुम श्रवण करो ४५

CC-0. In Public Domain. Digitized by eGangotri

यतः प्रवृत्तिर्भूतानांयेनसर्व्वमिदंततं स्वकर्मणातमभ्यर्च्यसिद्धिं विन्दतिमानवः ७६

शाङ्करभाष्यं

यस्मादन्तर्यामिणईश्वरात्भूतानांप्राणिनांस्यात् येनेश्वरेणसर्व्वमिदंततंजगद्व्याप्तंस्व कर्मणापूर्व्वोक्तेनप्रतिवर्णन्तमीश्वरमभ्यर्च्य पूजयित्वाराध्यकेवलंज्ञाननिष्ठायोग्यताल क्षणांसिद्धिंविन्दतिमानवोमनुष्यः ४६ यतएवमतःश्रेयानिति श्रेयान्प्रशस्य तरः स्वधर्मः विगुणोपीत्यपिशब्दोद्रष्टव्यःपरधर्मात्स्वनुष्ठितात् स्वभावनियतं स्वभा वेननियतंयदुक्तंस्वभावजमिति तदेवोक्तंस्वभावनियतमिति यथाविषजातस्यदूवक्रमेः विषं न दोषकरं तथा स्वभावनियतंकर्मकुर्व्वन्नाप्नोति ल्विषंपापं भावनियतं कर्मकु र्व्वाणोविषजातदूव क्रमिःकिल्विषं नाप्नोतीत्युक्तं ४७

आनन्दगिरिकृतटीका

शब्दार्थंयस्मादित्युक्तं व्यक्तीकरोति यास्मादिति प्राणिनामुत्पत्तिर्यस्मादीश्वरात्तेषां चेष्टा च यस्मादन्तर्यामिणोयेनच सर्व्वंव्याप्तंमन्देवघटादिकार्यस्य कारणातिरिक्तस्व रूपाभावात्तंस्वकर्मणाभ्यर्च्य मानवःसंसिद्धिं विन्दतीति सम्बन्धः नहि ब्राह्मणादीन यथोक्तधर्मनिष्ठया साक्षान्मोक्षउपलभ्यते तस्यज्ञानैकलभ्यत्वात् किन्तु तन्निष्ठानांशु द्धबुद्धीनांकर्मसु फलमपश्यतामीश्वरप्रसादासादितविवेकवैराग्यवतां संन्यासिनां ज्ञाननिष्ठायोग्यतावतां ज्ञानप्राप्या मुक्तिरित्यभिप्रेत्याह केवलमिति ४६

स्वामिकृतटीका

एवं भूतस्यापि ब्राह्मणादिकर्मणोज्ञानहेतुत्वमाह स्वेस्वेइति स्वस्वाधिकारवि हिते कर्मण्यभिरतः परिनिष्ठितोनरः संसिद्धिं ज्ञानयोग्यतां लभते ४५

कर्मणा ज्ञानप्राप्तिप्रकारमाह स्वकर्मेतिसार्द्धेन स्वकर्मपरिनिष्ठितोयथायेनप्र कारेण तत्त्वज्ञानं लभते तंप्रकारंशृणुतमेवाह यतइति यतोऽन्तर्यामिणः परमेश्व राद्भूतानांप्राणिनांप्रवृत्तिश्चेष्टाभवति येनात्मनासर्व्वमिदं विश्वंततंव्याप्तंतमीश्वरं स्वकर्मणाऽभ्यर्च्य पूजयित्वासिद्धिं लभते मनुष्यः ४६ स्वकर्मणेति विशेषणस्यफल

भाषाअनुवाद

अब कर्म से ज्ञानप्राप्तिका प्रकार कहतेहैं कि अन्तर्यामीरूप जोपरमेश्वर जिससे प्राणीमात्र चेष्टाकरतेहैं औ कारणस्वरूप जोईश्वर जिसईश्वरसे यह समस्तजगत व्याप्तहै उस ईश्वर को समस्त कर्मकेद्वारा अभ्यर्च्यकहेपूजन करके मनुष्य सम्पूर्णज्ञानकी योग्यतास्वरूप सिद्धिको प्राप्तहोते हैं ४६

CC-0. In Public Domain. Digitized by eGangotri

श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात्स्वभावनियतंकर्मकुर्व्वन्नाप्नोतिकिल्बिषं४७

शाङ्करभाष्यं

परधर्मश्चभयावह इत्यनात्मज्ञश्चनहिकश्चित् क्षणमप्यकर्मकृत्तिष्ठतीत्यतः स हजमिति सहजं सहजन्मनेवोत्पन्नंकिं सहजं तत कर्मकौन्तेय सदोषमपिविगु णत्वान्नत्यजेत् सर्वारम्भा आरम्भान्तइत्यारम्भाःसर्वकर्माणीत्येतत्प्रकरणात् यः कश्चिदारम्भः स्वधर्मःपरधर्मश्च ते सर्वेसदोषाः हियत्मात्त्रिगुणात्मकत्वमत्र हेतुः त्रिगुणात्मकत्वादोषेण धूमेनसहजेनाग्निरिवावृताःसहजस्यकर्मणः स्वधर्माख्यस्य

आनन्दगिरिकृतटीका

स्वधर्मानुष्ठानस्यबुद्धिशुद्ध्यादिद्वारा मोक्षावसायित्वात्तदनुष्ठानमावश्यकमित्याह यतइति ननुयुद्धादिलक्षणंस्वधर्मंकुर्वन्नपिहिंसाधीनंपापंप्राप्नोति तत्कथंस्वधर्मः श्रेयानिति तत्राह स्वभावेति स्वकीयंवर्णाश्रमंनिमित्तीकृत्यविहितं स्वभावजमित्यध स्तादुक्तमित्याह यदुक्तमिति निग्रहात्मकमपिविहितंकर्मकुर्व्वन्पापंनाप्नोतीत्यत्र दृ ष्टान्तमाह यथेति इतश्चविहितंकर्मदोषवदपिकर्त्तव्यं प्रकारान्तरासम्भवादित्युक्ता नुवादपूर्व्वकंकथयति स्वभावेत्यादिना नहि कृमिर्विषजोविषनिमित्तंमरणं प्रतिपद्य ते तथापापाधिकृतःपुरुषोदोषवदपिविहितंकर्मकुर्व्वन्पापंनाप्नोतीत्युक्तमित्यर्थः४७

स्वामिकृतटीक

माह श्रेयानिति विगणोपिस्वधर्मःसम्यगनुष्ठितादपिपरधर्मात्श्रेष्ठःनच वन्धुवधा दियुक्तादुद्धादेःस्वधर्माद्भिक्षाटनादिपरधर्मः श्रेष्ठइति मन्तव्यं यतः स्वभावेनपू र्वोक्तेननियतं नियमेनोक्तंकर्म कुर्व्वन्किल्बिषं नाप्नोति ४७

भाषाअनुवाद।

और पूर्व श्लोकमे कहाजो स्वकर्मणातमभ्यर्च्य उसीस्वकर्मविशेषणवचन का फ लकहते हैं किस्वनुष्ठितकहेअच्छीतरहसे किये ऊये परायेकेधर्मकी अपेक्षासे स्वधर्मकहे अपनाधर्म्म विगुणअर्थात्अङ्गहीनभीश्रेयकहेअति उत्तमहै इसहेतुसे वन्धुवधआदिसे युक्तभीक्षत्रीका धर्म जोयुद्ध तिससेभिक्षाटनरूप परधर्मश्रेष्ठनहीं है औ पूर्वोक्तस्वभावक्रमसे नियत कहेनियमरूपशास्त्रोक्तस्वधर्मका अनुष्ठानक र्त्ताऊआ कोईभी पुरुष किल्बिष जो पाप तिसकोनहीं प्राप्तहोताहै सोअर्जुन तुम किसविचारके वखेडेमेपडे हौ अपनेकामकोदेखो इसचिन्तासे कुछफलनहींहै ४७

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

परित्यागेनपरधर्मानुष्ठानेपि दोषात्नैवमुच्यते मयावश्चपरधर्मः नचशक्यतेऽशेष तस्त्यक्तुमज्ञेनकर्मवतात्स्मान्नत्यजेदित्यर्थःकिमशेषतस्त्यक्तुमशक्यंकर्मेतिनत्यजेत् किं वासहजस्यकर्मणस्त्यागेदोषोभवतीति किञ्चातोयदि तावदशेषस्त्यक्तुमशक्यमिति नत्याज्यंसहजंकर्मैवन्तर्ह्यशेषतस्त्यागेगुणएवस्यादिति सिद्धंभवति सत्यमेवमशेषत स्त्यागएवनोपपद्यतेइतिचेत्किंनित्यप्रचलितात्मकःपुरुषोयथासांख्यानांगुणाःकिम्बा क्रियैवकारकंयथावौद्धानांपञ्चस्कन्धाःक्षणप्रध्वंसिनःउभयथापिकर्मणोशेषतस्त्यागो नभवत्यथतृतीयोपि पक्षोयदाकरोतितदा सक्रियंवस्तुयदानकरोतितदानिःक्रियंवस्तु तदेवतत्रैवंसति शक्यंकर्माशेषतस्त्यक्तुं अयंत्वस्मिन्तृतीयेपक्षेविशेषोननित्यप्रचलि तंवस्तुनापिक्रियैवकारकंकिंतर्हिव्यवस्थितेद्रव्येऽविद्यमानाक्रियोत्पद्यते विद्यमाना चविनश्यति शुद्धंद्रव्यंशक्तिमदवतिष्ठतइति एवमाहुःकाणादास्तदेवचकारकमित्य स्मिन्पक्षेकोदोषइत्ययमेवतुदोषोयतस्त्वभागवतंमतमिदंकथंज्ञायते यतआह भग वान्नासतोविद्यतेभावइत्यादि काणादादीनांह्यसतोभावःसतश्चाभावइतीदंमतमभा गवतत्वेपिन्यायत्वेकोदोषइतिचेदुच्यते दोषवत्विदंसर्वंप्रमाणविरोधात् कथंयदि तावद्द्व्यणुकादिद्रव्यंप्रागुत्पत्तेरत्यन्तमेवासदुत्पन्नञ्चस्थितंकञ्चित्कालंपुनरत्यन्तमे वासत्त्वमापद्यते तथाच सत्यसदेवसज्जाते अभावोभावोभवतिभावश्चाभावइति त त्राभावोजायमानःप्रागुत्पत्तेःशशविषाणकल्पःसमवाय्यसमवायिनिमित्ताख्यं कारण मपेक्ष्यजायतइति नचैवभावउत्पद्यतेकारणञ्चापेक्षतइति शक्यंवक्तुमसतां शश विषाणादीनामदर्शनाद्भावात्मकाश्चेत्घटादयउत्पद्यमानाःकिञ्चिदभिव्यक्तमात्रेका रणमपेक्ष्योत्पद्यन्तइति शक्यंप्रतिपत्तुं किञ्चासतश्चसद्भावेसतश्चासद्भावेनक्व चित्प्रमाणप्रमेयव्यवहारेषु विश्वासःकस्यचित्स्यात् सत्सदेवासदसदेवेतिनिश्च यानुपपत्तेःकिञ्चोत्पद्यतइति द्व्यणुकादेर्द्रव्यस्य स्वकारणसत्तासम्बन्धमाहप्रागुत्पत्तेश्चा त्पश्चात्स्वकारणव्यापारमपेक्ष्यस्वकारणैःपरमाणुभिःसत्तयाच समवायलक्षणेनस म्बन्धेनसम्बद्धतेसम्बद्धंसत्कारणसमवेतंसन्भवति तत्र वक्तव्यं कथमसतःसत्कार णंभवेत्सम्बन्धोवाकेनचित् नहि वन्ध्यापुत्रस्यसत्तासम्बन्धोवाकारणंवाकेनचित् प्रमाणतःकल्पयितुंशक्यंननुनैवंवैशेषिकैरभावस्यसम्बन्धःकल्प्यतेद्व्यणुकादीनांहिद्र व्याणांस्वकारणेनसमवायलक्षणःसम्बन्धःसतामेवोच्यतेइतिनसम्बन्धात्प्राक्सत्वान भ्युपगमान्नहि वैशेषिकैःकुलालदण्डचक्रादिव्यापारात्प्राक्घटादीनामस्तित्वमि

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ष्यते नच सदएव घटाद्याकारप्राप्तिमिच्छन्तितत्रासतएवसम्बन्धः परिशेष्यादि ष्टोभवति नन्वसतोऽपि समवायलक्षणःसम्बन्धोनविरुद्धः नवन्ध्यापुत्रादीनामदर्शना त्घटादेरेवप्रागभावस्यस्वकारणसम्बन्धोभवति नवन्ध्यापुत्रादेरभावस्यतुल्यत्वेपीति विशेषोऽभावस्यवक्तव्यःएकस्याभावोद्वयोरभावःसर्वस्याभावःप्राग्भावःप्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभावइतिलक्षणतो नकेनचिद्विशेषोदर्शयितुंशक्यःअसतिच वि शेषेघटस्यप्रागभावएवकुलालादिभिर्घटभावमापद्यतेसम्बध्यतेच भावेनकपालाख्ये नकारणेनसर्वव्यवहारयोग्यश्चभवति ननुघटस्यैवप्रध्वंसाभावोऽभावत्वेसत्यपीतिप्र ध्वंसाद्यभावानां नक्वचिद्व्यवहारयोग्यत्वं प्रागभावस्यैवद्व्यणुकादिद्रव्यस्योत्पा दिव्यवहारार्हत्वमित्येतदसमञ्जसममभावत्वाविशेषादत्यन्तप्रध्वंसाभावयोरिव ननु नैवास्माभिःप्रागभावस्याभावापत्तिरुच्यते किंतर्हिभावस्यैव हि भावापत्तिर्यथाघटस्य घटापत्तिःपटस्यपटापत्तिःएतदप्यभावस्याभावापत्तिवदेवप्रमाणविरुद्धं सांख्यस्या प्रियःपरिणामपक्षः सोप्यपूर्वधर्मोत्पत्तिविनाशाङ्गीकरणाद्वैशेषिकपक्षान्नविशिष्य तेऽभिव्यक्तितिरोभावाङ्गीकरणेप्यभिव्यक्तितिरोभावयोर्विद्यमानाविद्यमाननिरूप णेपूर्ववदेवप्रमाणविरोधः एतेनकारणस्यैवसंस्थानमुत्पत्तादित्येतदप्ययुक्तं परि शेष्यात्सदेकमेववस्त्वविद्ययोत्पत्तिविनाशादिधर्मैरनेकधाविकल्प्यतइतीदंभागव तं मतमुक्तं नासतोविद्यतेभाव इत्यस्मिन्श्लोके सत्प्रत्ययस्याव्यभिचारात् व्यभिचा राच्चेतरेषामिति कथंतर्हिआत्मनोऽविक्रियत्वेनाशेषतः कर्मणस्त्यागोनोपपद्यतइ ति यदिवस्तुभूतागुणाः यदिवा अविद्याकल्पितास्तद्धर्म्मकर्मतदात्मन्यविद्याध्यारोपि तमेवेत्यविद्वान्न हि कश्चित्क्षणमप्यशेषतस्त्यक्तुं शक्नोतीत्युक्तं विद्वांस्तु पुनर्विद्ययाअ विद्यायांनिवृत्तायां शक्नोत्येवाशेषतःकर्मपरित्यक्तुं अविद्याऽध्यारोपितस्यशेषानुपप त्तेः नहि तैमिरिकदृष्टाऽध्यारोपितस्यद्विचन्द्रादेस्तिमिरापगमेशेषोऽवतिष्ठत एव ञ्चसतीदंवचनमुपपन्नं सर्वकर्माणिमनसेत्यादिस्वेस्वेकर्मण्यभिरतःसंसिद्धिं लभते नरः स्वकर्मणातमभ्यर्च्यसिद्धिं विन्दति मानवइति च ४८

आनन्दगिरिकृतटीका

तर्हि दोषरहितमेवभिक्षाटनादिसर्वैरनुष्ठीयतामतो नपापप्राप्तिरित्याशंक्याह प्रेति उक्तमित्यनुवर्त्तने तर्हि पापप्राप्तिशङ्कांपरिहर्त्तुमकर्मनिष्ठत्वमेवसर्वेषां स्यादित्याशंक्यज्ञानाभावान्नैवमित्याह अनात्मज्ञइति पूर्ववदत्रापिसम्बन्धः प्रकारा

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

न्तरासम्भवकृतं फलमाह अतइति सहजायतइतिसहजं स्वभावनियतं नित्यं कर्मत द्विहितत्वान्निर्दोषमपिहिंसात्मकतयासदोषमित्यत्र हेतुमाह त्रिगुणेति सत्वादिगु णत्रयारब्धतयाहिंसादिदोषवदपिकर्मविहितमत्याज्यमित्यर्थः कर्मणांदोषवत्वं प्रप ञ्चयति सर्वेति आरम्भशब्दस्यकर्मव्युत्पत्त्यास्वपरसर्वकर्मार्थत्वेकर्मणांस्वकृतत्वं हे तुमाह प्रकरणादिति दोषेणेत्यादि व्याचष्टे यःकश्चिदिति तेसर्वेदोषेणावृताइति स म्बन्धः सर्वकर्मणांदोषावृतत्वेहिशब्दोपात्तंयस्मादित्युक्तं हेतुमेवाभिनयति त्रिगुणा त्मकत्वमिति स्वभावनियतस्यकर्मणोदोषवत्वात्तत्त्यागद्वारा परधर्ममातिष्ठमानस्या पिनैवदोषाद्विमोकःसम्भवति नच परधर्मोनुष्ठातुं शक्यते भयावहत्वान्नचतर्हि कर्म णोऽशेषतोऽनुष्ठानमेवाज्ञस्याशेषकर्मत्यागायोगादतःसहजंकर्मसदोषमपि नत्याज्य मिति वाक्यार्थमाह सहजस्येति सहजं कर्मसदोषमपिनत्यजेदित्यत्रविचारमव तारयति किमिति नहिकश्चिदिति न्यायादितिशेषः दोषोविहितनित्यत्यागे प्रत्य वायः सन्दिग्धस्यसप्रयोजनस्यविचार्यत्वादुक्तसन्देहेप्रयोजनंपृच्छति किञ्चातइति तत्राद्यमनूद्य फलंदर्शयति यदीति अशक्यानुष्ठानस्य गुणत्वेनप्रसिद्धत्वात्प्रसिद्धं हि महोदधिमगस्त्यस्यचुलकीकृत्यपिवतोगुणवत्वन्तदाह एवन्तर्हीति अशेषकर्मत्याग स्यगुणवत्यपिप्रागुक्तन्यायेनतदयोगात्तस्याशक्यानुमानतेतिशङ्कते सत्यमिति चोद्य मेवविवृन्वन्नाद्यं भिजते किमिति सत्त्वादिगुणवदात्मनोनित्यप्रचलितत्वेनाशेषतस्ते न नकर्मत्यक्तुं शक्यंनापिरूपविज्ञानवेदनासंस्कारसंज्ञानांक्षणध्वंसिनां स्कन्धाना मिवक्रियाकारकभेदाभावात् कारकस्यैवात्मनःक्रियात्वमित्युक्ते कर्माशेषतस्त्यक्तुं श क्यमुभयथापिस्वभावसङ्गादित्याह उभयथेति पक्षद्वयानुरोधेनाशेषकर्मत्यागायोगेवै शेषिकश्चोदयति अथेति कदाचिदात्मा सक्रियोनिःक्रियश्चकदाचिदितिस्थिते फलितमाह तत्रेति उक्तमेवपक्षंपूर्वोक्तपक्षद्वयाद्विशेषदर्शनेनविशदयति अयंत्विति आगमापायित्वे क्रियायास्तद्वतोद्रव्यस्यकथंस्थायितेत्याशंक्याह शुद्धमिति क्रियाश क्तिमत्त्वेपि क्रियावत्त्वाभावेकथं कारकत्वं क्रियांकुर्वन्हि कारणं कारकमित्यभ्युप गमादित्याशंक्याह तदेवेति क्रियाशक्तिमदेवकारकंनक्रियाधिकरणंपरस्पराश्रया दित्यर्थः वैशेषिकपक्षे दोषाभावादस्तिसर्वैः स्वीकार्य्यतेत्युपसंहरति इत्यस्मिन्नि ति भगवन्मतानुसारित्वाभावादस्यपक्षस्यत्याज्यतेति दूषयति अयमेवेति भगव न्मतानुसारित्वमस्याप्राणिकमितिशङ्कते कथमिति भगवद्वचनमुदाहरनपरमप

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

च्चस्यतदनुगुणत्वाभावमाह यतइति परेषामपि तमेतदनुगुणमेवकिंनस्यादित्याशं क्याह कारणवादीनांहीति भगवन्मतानुगुणत्वाभावेपि न्यायानुगुणत्वेनदोषरहितं काणादादीनांमतमुपादेयमेवनहिकाणादमतंविरोधादुपेक्षणीयमितिशङ्कते अभा गवतत्वेपीति न्यायवत्त्वमसिद्धमिति दूषयति उच्यतइति सर्वप्रमाणानुसारिणोम तस्यनतद्विरोधितेत्याक्षिपति कथमिति वैशेषिकमतस्यसर्वप्रमाणविरोधं प्रकटयन्ना दौतन्मतमनुवदति यदीति असतोजन्मसतश्चनाशइति स्थितेफलितमाह तथाचेति उक्तमेववाक्यंव्याकरोति अभावइति सदेवासत्त्वमापद्यतइत्युक्तंव्याचष्टे भावश्चेति इति मतमिति शेषः तत्रैवाभ्युपगमान्तरमाह तत्रेति प्रकृतंमतंसम्यग्व्यर्थःइत्यभ्युपग म्यतइतिशेषः परकीयमभ्युपगमंदूषयति नचेति एवमिति परपरिभाषानुसारेणे त्यर्थःअदर्शनादुत्पत्तेरपेक्षायाश्चेति शेषः कथन्तर्हित्वन्मतेपिघटादीनांकारणापेक्षा णामुत्पत्तिर्नहिभावानां कारणापेक्षोत्पत्तिर्वायुक्तेतितत्राह भावेति घटादीनाम स्मत्पक्षे प्रागपिकारणात्मनासतामेवाव्यक्तनामरूपाणामभिव्यक्तिसामग्रीमपेक्ष्य पृथ गभिव्यक्तिसम्भवान्नकिञ्चिदनवद्यमित्यर्थः असत्कार्यवादेदोषान्तरमाह किञ्चेति प र मतेमानमेयव्यवहारेक्वचिदपिविश्वासोनकस्यचिदित्यत्रहेतुमाह सत्सदेवेति नहि सतथैवेति निश्चितंतस्यैवपुनरसत्त्वप्राप्तेरिष्टत्वान्नवासतथैवेतिनिश्चयःतथैवसत्त्वप्राप्ते रुपगमादतोयन्मानेनसदसदानिश्चतं तत्तथेतिविश्वासाभावात्मानवैफल्यमित्यर्थः इ तश्चासत्कार्यवादोनयुक्तिमानित्याह किञ्चेति तदेवहेत्वन्तरंस्फोरयितुंपरमतम नुवदतिउत्पद्यतइतीति परकीयंवचनमेवव्याचष्टेप्रागिति सम्बन्धंसदित्यनेन का रणसम्बन्धे सतिकार्यस्यसम्बन्धोभवतीत्युक्तंतदेवस्फुटयति कारणति परमतमेवम नुभाष्यदूषयति तत्रेति कार्यस्यासतोपिकारणं सम्भवति तस्यचकार्येणसम्बन्धःसिध्य तीत्याशंक्याह नहीति असत्त्वादेवासतःसम्बन्धाभावेकारणस्यसतोपिनतेनसम्बन्ध नुमातुंशक्यतेसदसतोःसम्बन्धासम्भवादित्यर्थः कार्यस्यात्यन्तासत्त्वानभ्युपगमात्कार णसम्बन्धःस्यादितिशंकते नन्विति सतामेवद्व्यणुकादीनांकारणसम्बन्धंशंकित्वा दूषयति न सम्बन्धादिति अनभ्युपगममेवविशदयतिनहीति सदेवकारणंकार्यं कारमापद्यकार्यव्यवहारंनिर्वर्त्तयतीत्यभ्युपगमान्नास्तिसम्बन्धानुपपत्तिरित्याशंक्या परान्तान्नैवमित्याह नचेति कार्यस्यकारणसम्बन्धात् पूर्वंसत्त्वाभावेपरिशेष सिद्धमर्थंदर्शयति ततश्चेति तत्रचानुपपत्तिरुक्तेतिशेषः सम्बन्धि नोःसदसतोर

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

संयोगेपिसमवायः सदसतोःभवेदिति तस्यनित्यत्वादन्यतरसम्बन्धाभावेपि स्थितेरावश्यकत्वादिति शंकते नन्विति सदसतोर्मिथःसंबंधस्यादृष्टत्वान्नेतिनिराचष्टे नबन्धेति घटादिप्रागभावस्यात्यन्ताभावत्वाभावाद्बन्ध्यापुत्रादिविलक्षणतया स्वकारणसंबंधःसिध्यतीत्याशंक्याह घटादेरिति उभयत्राभावस्वभावाविशेषेपि कस्यचित् कारणसंबन्धोनेतरस्येति विशेषेहेत्वभावान्नप्रागभावस्यकारणसंबंधः सम्भवतीत्यर्थः घटादिप्रागभावस्यसप्रतियोगिकत्वं वंध्यापुत्रादेर्नैवमितिविशेषमाशंक्य दूषयति एकस्येति प्रागभावस्येवप्रध्वंसाभावादेरपि सप्रतियोगिकत्वाविशेषे स्वकारणेनसम्बन्धाविशेषःस्यादित्यर्थः प्रागभावप्रध्वंसाभावयोर्विशेषाभावे फलितमाह असतिचेति कपालशब्दोघटकारणेमृतन्मृदवयवविषयः सर्वोव्यवहारोघटाश्रितोजन्मनाशादिव्यवहारःप्रध्वंसाभावस्तुघटस्यैवाभावत्वेसत्यपिनघटत्वमापद्यतेनापिकारणेनसम्बध्यतेनचोत्पत्त्यादि व्यवहारयोग्योभवतीत्येतदयुक्तं प्रागभावेनास्यविशेषाभावादित्याह नन्विति असमञ्जसमित्यनेनेतिशब्दःसम्बध्यते असमञ्जसान्तरमाह प्रध्वंसादीति अन्योन्याभावात्यन्ताभावावादिपदार्थौ क्वचिदिति देशकालयोर्ग्रहणं व्यवहारोजन्मादिरेवप्रागभावोनोत्पत्त्यादिव्यवहारयोग्योभावत्वात्प्रध्वंसादिवदित्यर्थः प्रागभावस्यघटभावानभ्युपगमादनुमानंसिद्धसाधनमितिशङ्कतेनन्विति अभावस्यभावापत्त्यनभ्युपगमेभावस्यैवभावापत्तिरित्यनिष्टंस्यादिति दूषयति भावस्यैवेति तस्यतदापत्तेरयोग्यत्वेदृष्टान्तमाह यथेति भावस्यभावापत्तिरनिष्टेतिदार्ष्टान्तिकंस्फुटयति एतदपीति आरम्भवादोक्तदोषंपरिणामवादेपिसञ्चारयति सांख्यस्येति धर्मःपरिणामः असतोऽपूर्वपरिणामस्योत्पत्तेःसतश्चपूर्वपूर्वपरिणामस्यनाशादसदेवसञ्चसदेवेति व्यवस्थावापि दुर्घटेत्यर्थः ननुकार्यं कारणात्मना प्रागपिसदेवाव्यक्तंकारकव्यापाराद्व्यज्यते तेनव्यक्ताव्यक्तयोर्जन्मनाशव्यवहारात्मत्वात्तद्विशेषसिद्धिस्तत्राह अभिव्यक्तीति कारकव्यापारात्प्रागनभिव्यक्तिवदभिव्यक्तेःसत्त्वमसत्त्वंवासत्त्वेकारकव्यापारवैयर्थ्यात्तद्विषयप्रमाणविरोधःद्वितीये पक्षान्तरवदत्यन्तासतःतन्निर्वर्त्तत्वायोगेसएवदोषःकारकव्यापारादूर्ध्वं व्यक्तिवदव्यक्तेरपिसत्त्वेसएवदोषःअसत्त्वेपि सतोऽसत्त्वाङ्गीकारात् मानमेयव्यवहारे नक्वापिविश्वासःसत्सदेवासदसदेवेत्यनिर्द्धारणादित्यर्थः सांख्यपक्षप्रतिक्षोपन्यासेनपक्षान्तरमपिप्रतिक्षिप्तमित्याह एतेनेति कारणस्यैवकार्यरूपापत्तिरुत्पत्तिस्तस्यैवतद्रूपत्यागेनस्वरूपाप

CC-0. In Public Domain. Digitized by eGangotri

सहजंकर्मकौन्तेयसदोषमपिनत्यजेत् सर्वारम्भाहिदोषेणधूमेनाग्निरिवावृताः४८

आनन्दगिरिकृतटीका

त्तिर्नाशइत्येतदपिनपूर्व्वरूपेस्थितेनष्टे च परस्यपररूपापत्तेरनुपपत्ते र्नचप्राप्तिरू पंस्थितेन नष्टेनवात्यक्तुं शक्यमित्यर्थः आरम्भवादे परिणामवादेच उत्पत्त्यादिव्यव हारानुपपत्तौ परिशेषायातंदर्शयति पारिशेष्यादिति एकस्यानेकविधविरुद्धानुप पत्तिमाशंक्याह अविद्येति अस्यापि मतस्य भगवन्मतानुरोधित्वाभावाद्विशिष्टात् त्यज्यतेत्याशङ्क्याह इतीदमिति उक्तमेवभगवन्मतंविशदयति सत्प्रत्ययस्येति सदैक मेववस्त्वस्तीतिशेषः इतरेषां विकारप्रत्ययानां रजतादिधीवदर्थव्यभिचारादवि द्यातदेवसद्वस्त्वनेकधाविकल्पतइत्याह व्यभिचाराच्चेतिइतिमतंश्लोकेदर्शितमिति सम्बन्धः आत्मनश्चेदविक्रियत्वंभगवतेष्टंतर्हिसर्वकर्मपरित्यागोपपत्तेःसहजस्यापि कर्मणस्त्यागसिद्धिरितिशंकते कथमिति किंकार्यकारणात्मनां गुणानामकल्पिता नांकल्पितानांवाकर्मधर्मत्वेनेष्टं द्विधापिनिःशेषकर्मत्यागोविदुषोऽविदुषोवा नाद्य इत्याह यदीत्यादिना अविद्यारोपितमेवगुणशब्दितकार्यकारणारोपद्वाराकर्मेतिशे षः द्वितीयंप्रत्याह विद्वांस्त्विति आरोपशेषवशाद्विदुषोपि नाशेषकर्मत्यागसिद्धि रित्याशंक्याह अविद्येति तामेवानुपपत्तिंदृष्टान्तेनस्पष्टयतिनहीति विदुषोऽशेषक र्मत्यागेपाञ्चभौतिकमपि वचोनुकूलमित्याहएवञ्चेति अविदुषःसर्वकर्मत्यागायोगेचप्र कृताध्यायस्यैवं वाक्यमनुगुणमित्याह स्वेस्वे इति वाक्यान्तरमपि तत्रैवार्थेयुक्तार्थ मित्याह स्वकर्मणेति ४८

भाषाअनुवाद

परन्तु स्वधर्म्ममे जोसांख्यमतके अनुसार हिंसाको दोषरूप जानिके औ अहिंसा हेतुसेपरधर्मश्रेष्ठयहजोविचारकरोतौपरधर्मकेआचरणमेभीदोषहै इसअभिप्रायप रकहतेहैं किहेकौन्तेयअर्जुन मनुष्योंको सहजकहे स्वभावसिद्ध औशास्त्रविहित जोस्वधर्मसोदोषयुक्तहोनेसेभी त्यागकरनेयोग्यनहींहै क्योंकि समस्तआरम्भअर्था त् दृष्टअदृष्टकर्ममात्र सबदोषयुक्तहैं तोजैसे स्वाभाविक धूमसे आवृतअग्निको दोष युक्तरहतेभी लोगधूमरूपदोष परित्यागकरके केवलअंधकार औशीतवारणकेअर्थ सेवनकरतेहैं तैसेही स्वकर्मभी दोषअंशछोडके गुणअंशमात्र सत्ववृद्धिकेअर्थ से वनकरने योग्यहै सोई कहा किहेअर्जुन सहजकहे स्वाभाविकदोषयुक्तभीअपना कर्मछोडना नचाहिये क्योंकि सबआरम्भकहेकर्मसदोषहैं जैसे धूमदोषसेयुक्तअ ग्निको कौनछोडैहै ४८ जोकहो दोषछोडिके गुणमात्रही ग्रहणकरिके कर्म

CC-0. In Public Domain. Digitized by eGangotri

असक्तबुद्धिःसर्वत्रजितात्माविगतस्पृहः नैष्कर्म्यसिद्धिंपरमांसंन्यासेनाधिगच्छति ४९

शाङ्करभाष्यं

याच कर्म्मजासिद्धिरुक्ताज्ञाननिष्ठायोग्यतालक्षणा तस्याःफलभूतानैःकर्म्यसिद्धि र्ज्ञाननिष्ठालक्षणावक्तव्येति श्लोकआरभ्यते असक्तबुद्धिरसक्तासङ्गरहिता बुद्धिरन्तः करणंयस्यसोऽसक्तबुद्धिःसर्वत्रपुत्रदारादिषु आसक्तिनिमित्तेषुजितात्माजितोवशीकृत आत्माअन्तःकरणंयस्यसजितात्मा विगतास्पृहाटृष्णादेहजीवितभोगेषुयस्मात् सवि गतस्पृहोयएवम्भूतआत्मज्ञःसनैःकर्म्यसिद्धिंगतानि कर्माणियस्मान्निःक्रियब्रह्मात्मस म्बोधात् सनिःकर्मातस्यभावोनैःकर्म्यं नैःकर्म्यञ्चतत्सिद्धिश्चनैःकर्म्यसिद्धिःनैःक र्म्यस्यवासिद्धिःनिःक्रियात्मस्वरूपावस्थालक्षणस्यसिद्धिर्निष्पत्तिस्तांनैःकर्म्यसिद्धिंपर मांप्रकृष्टांकर्मजासिद्धिविलक्षणां सद्योमुक्त्यवस्थानरूपां संन्यासेन सम्यक्दर्शनेन तत्पूर्वकेणवा सर्वकर्मसंन्यासेनाधिगच्छति प्राप्नोति ४९

आनन्दगिरिकृतटीका ।

विदुषःसर्वकर्म्मत्यागोनावदुषस्तथेत्युक्तं इदानीमुक्तमनूद्यानन्तरश्लोकतात्प र्यमाह याचकर्मजेतिचोवधारणार्थोभिन्नक्रमोवक्तव्यइत्यत्रसम्बध्यतेसाधनान्युपदि श्यन्नैःकर्म्यसिद्धिंव्यपदिशति असक्तेति पुत्रादिविषयेचेतसःसङ्गाभावेपि तस्यास्वाधी

स्वामिकृतटीका ।

यदिपुनःसांख्यदृष्ट्यास्वधर्मेहिंसालक्षणंदोषंमत्वा परधर्म्मंश्रेष्ठंमन्यसे तर्हिस दोषत्वंपरधर्म्मेऽपितुल्यमित्याशयेनाह सहजमिति सहजंस्वभावविहितंकर्म्म सदोष मपिनत्यजेत् हियस्मात्सर्वेष्यारम्भाहृष्टाहृष्टानिसर्व्वाण्यपिकर्माणिदोषेणकेनचिदा वृताव्याप्तानएवयथासहजेनधूमेनाग्निरावृतस्तद्वत् अतोयथाग्नेर्धूमरूपंदोषमपाकृत्य प्रतापएव तमःशीतादिनिवृत्तयेसेव्यते तथाकर्मणोऽपिदोषांशंविहायगुणांशएवशुद्ध येसेव्यतइत्यर्थः ४८ ननु कर्म्मणि क्रियमाणेतत्कथंदोषांशप्रहाणेनगुणांशएव

भाषाअनुवाद

किसप्रकार कियेजासकैंगे इसअपेक्षापर कहतेहैं किजिनकीबुद्धि असङ्गकहेआ शक्तिरहितहै औजितात्माअर्थात् जोनिरहङ्कारहैं और जिनकीइच्छा कर्मके फ लसे दूरहोगईहै ऐसेपुरुष सङ्गजोआशक्ति औफल इनदोनोकोभी छोडकर इस अध्यायके नवमश्लोकमे कहेहुयेअनुसारजोआशक्ति औफलत्यागरूप संन्यासके द्वारा परमनैःकर्म्यसिद्धिकहे सर्वकर्मनिवृत्तिरूप जोसत्त्वशुद्धि सोपावते हैं ४९

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम्

तथाचोक्तं सर्वकर्माणिमनसा संन्यस्यनैवकुर्वन्नकारयन्नास्तेइतिपूर्वोक्तेन स्वकर्मानुष्ठानेन ईश्वराभ्यर्चनस्वरूपेणजनितांप्रागुक्तलक्षणांसिद्धिं प्राप्तस्योत्पन्नात्मविवेकज्ञानस्यकेवलात्मज्ञाननिष्ठारूपानैःकर्म्मलक्षणासिद्धिर्यैनक्रमेणभवति तद्वक्तव्यमित्याह सिद्धिमिति सिद्धिं प्राप्तःस्वकर्मणेश्वरंसमभ्यर्च्यतत्प्रसादजां कार्येन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं प्राप्तइतितदनुवादउत्तरार्थःकिन्तदुत्तरंयदर्थोनुवादइत्युच्यतेयथायेनप्रकारेणज्ञाननिष्ठारूपेणब्रह्मपरमात्मानमाप्नोति तथातंप्रकारंज्ञाननिष्ठाप्राप्तिक्रमंममम वचनान्निबोधत्वंनिश्चयेनावधारयेत्यतत्किंविस्तरेणेनेत्याहसमासेनैवसंक्षेपेणैवहेकौन्तेय यथाब्रह्मप्राप्नोतितथानिबोधेतिअनेनप्रकारेणयाप्रतिज्ञाताब्रह्मप्राप्तिस्तामिदन्तयादर्शयतुमाहनिष्ठाज्ञानस्ययापरेतिनिष्ठापर्यवसानंपरिसमाप्तिरित्येतत्कस्यब्रह्मज्ञानस्ययापरापरिसमाप्तिःकीदृशीसायादृशमात्मज्ञानंकीदृक्तत् यादृशआत्माकीदृशोऽसौयादृशोभगवतोक्तउपनिषद्वाक्यैश्चन्यायतश्चननुविषयाकारंज्ञानंनविषयोनाप्याकारवानात्मेष्यतेक्वचित्नन्वादित्यवर्णोभारूपःस्वयंजोतिरित्याकारवत्त्वमात्मनःश्रूयतेनतमोरूपत्वप्रतिषेधात्तेषांवाक्यानां

आनन्दगिरिकृतटीका

नत्वमाशंक्याह जितात्मेति आसक्तिमुक्त्वास्पृहामावंदन्नपुनरुक्तिरिष्टेत्याशंक्याह देहेति उक्तमनूद्यतत्फलंलभ्यतियएवमिति कर्मणांनिर्गतौहेतुमाह निर्द्वयेतिसम्यक्ज्ञानार्थत्वेन नैःकर्म्यसिद्धिशब्दंव्याख्यायार्थान्तरमाह नैःकर्म्यस्येति प्रकर्षमेवप्रकटयति कर्मजेति संन्यासस्यश्रुतिस्मृत्योःसम्यग्दर्शनसाधनत्वप्रसिद्धेरयुक्तन्तादात्म्यमित्याशंक्य पक्षान्तरमाह तत्पूर्वकेणेति ४९

स्वामिकृतटीका

संपद्यतइत्यपेक्षायामाह असक्तबुद्धिरिति असक्तासंगशून्याबुद्धिर्यस्य जितात्मानिरहङ्कारःविगतास्पृहा फलविषयायस्मात्सएवम्भूतःसङ्गंत्यक्त्वा फलंचैवसत्यागः सात्त्विकोमतइत्येतत्पूर्वोक्तेनकर्मासक्तिफलयोस्त्यागलक्षणेनसंन्यासेननैःकर्म्यसिद्धिंसर्वकर्मनिवृत्तिलक्षणःसत्त्वशुद्धिमधिगच्छति यद्यपिसङ्गफलयोस्त्यागेन कर्मानुष्ठानमपिनैःकर्म्यमेवकर्तृत्वाभिनिवेशाभावात् तदुक्तं नैवकिञ्चित्करोमीति युक्तोमन्येततत्त्वविदित्यादिश्लोकचतुष्टयेन तथाप्यनेनोक्तलक्षणेनसंन्यासेनपरमांनैःकर्म्यसिद्धिंसर्वकर्माणिमनसासंन्यस्यास्तेसुखंवशीत्येवंलक्षणां पारमहंस्यचर्यामाप्नोति ४९

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

द्रव्यगुणाद्याकारप्रतिषेधेऽात्मनस्तमोरूपत्वे प्राप्ते तत्प्रतिसेधनार्थान्यादित्यवर्णमित्यादिवाक्यानि अरूपमितिचविशेषतोरूपप्रतिषेधोद्रव्यगतत्वाच्च नसंदृशेतिष्ठतिरूपमस्यनचक्षुषापश्यतिकश्चनैनं अशब्दमस्पर्शमित्याद्यैस्तस्मादात्माकरंज्ञानमित्यनुपपन्नं कथंतर्ह्यात्मनोज्ञानं सर्वंहि यद्विषयंज्ञानंतत्तदाकारंभवति निराकारश्चात्मेत्युक्तं ज्ञानात्मनोश्चोभयोर्निराकारत्वे कथंतज्ज्ञानिष्ठेतिनात्यन्तनिर्मलत्वस्वच्छत्वसूक्ष्मत्वोपपत्तेरात्मनोबुद्धेश्चात्मसमनैर्मल्याद्युपपत्तेरात्मचैतन्याकारभासत्वोपपत्तिःबुद्ध्याभासंमनस्तदाभासानीन्द्रियाणि इन्द्रियाभासश्च देहोऽतोलौकिकैर्देहमात्रएवात्महृष्टिःक्रियते देहचैतन्यवादिनश्चलोकायतिकाश्चैतन्यविशिष्टःकायःपुरुषःइत्याहुः तथान्येइन्द्रियचैतन्यवादिनोऽन्येमनश्चैतन्यवादिनोऽन्येबुद्धिचैतन्यवादिनस्ततोप्यन्तरमव्यक्तमव्याकृताख्यमविद्यावस्थमात्मत्वेनप्रतिपन्नाःकेचित्प्रकृतिचैतन्यवादिनःसर्वत्रहिबुद्ध्यादिदेहान्तेआत्मचैतन्याभासतात्मभ्रान्तिःकारणमित्यतश्चात्मविषयंज्ञानंनविधातव्यं किंतर्हिनामरूपाद्यनात्माध्यारोपेणनिवृत्तिरेवकर्या नात्मचैतन्यविज्ञानंसर्वैरभ्युपगम्यते अविद्याध्यारोपितसर्वपदार्थाकारैरेवविशिष्टतयागृह्यमाणत्वात् अतएवविज्ञानवादिनोबौद्धाःविज्ञानव्यतिरेकेणवस्त्वेवनास्तीतिप्रतिपन्नाःप्रमाणान्तरनिरपेक्षताज्ञस्वसंविदितत्वाभ्युपगमेन तस्मादविद्याध्यारोपणनिराकरणमात्रंब्रह्मणिकर्त्तव्यं नतु ब्रह्मविज्ञानेयत्नोऽत्यन्तप्रसिद्धत्वादविद्याकल्पितनामरूपविशेषाकारप्रकृतबुद्धित्वादत्यन्तसिद्धं सुविज्ञेयमासन्नतरमात्मतत्त्वमप्यप्रसिद्धं दुर्विज्ञेयमतिदूरंअन्यदिवचप्रतिभाति अविवेकिनां वाह्याकारनिवृत्तबुद्धीनान्तु लब्धगुर्वात्मप्रसादानांनातःपरंसुखंसुप्रसिद्धंसुविज्ञेयमासन्नमस्ति तथाचोक्तंप्रत्यक्षावगमंधर्म्यमित्यादि केचित्तुपण्डितंमन्यानिराकारत्वादात्मवस्तुनोपैति बुद्धिरतोदुःसाध्या सम्यक्ज्ञाननिष्ठेत्याहुः सत्यमेवं गुरुसंप्रदायरहितानामश्रुतवेदान्तानामत्यन्तबहिर्विषयासक्तबुद्धीनां सम्यक्प्रमाणेष्वकृतश्रमाणांतद्विपरीतानान्तुलौकिकग्राह्यग्राहकद्वैतवस्तुनिसद्बुद्धिर्निवर्तेतरान्दुःसम्पाद्या आत्मचैतन्यव्यतिरेकेणवस्त्वन्तरस्यानुपलब्धेः यथाचैतदेवमेवनान्यथेत्यवोचाम उक्तञ्चभगवतायस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेरिति तस्माद्बाह्याकारभेदबुद्धिनिवृत्तिरेवात्मस्वरूपालम्बनेकारणंनह्यात्मानामकस्यचित्कदाचिदप्रसिद्धःप्राप्तोहेयउपादेयोवा अप्रसिद्धेहितस्मिन्नात्मनिस्वार्थाःसर्वाःप्रवृत्तयःव्यर्थाःप्रसज्येरन् नच देहाद्यचेतनार्थत्वंशक्यंकल्प्य

CC-0. In Public Domain. Digitized by eGangotri

सिद्धिंप्राप्नोयथाब्रह्मतथाप्नोतिनिबोधमे समासेनैवकौन्तेयनिष्ठाज्ञानस्ययापरा ५० ।

शाङ्करभाष्य

यितुं नचसुखार्थंसुखंदुःखार्थंवादुःखमात्मावगत्यवसानार्थत्वाच्चसर्वव्यवहारस्य तस्मा द्यथास्वदेहस्यपरिच्छेदाय नप्रमाणान्तरापेक्षा ततोऽात्मनोन्तरतमत्वात्तदवगतिं प्रतिनप्रमाणान्तरापेक्षेत्यात्मज्ञाननिष्ठाविवेकिनांसुप्रसिद्धेतिसिद्धं येषामपिनिराका रंज्ञानमप्रत्यक्षन्तेषामपिज्ञानवसेनेवज्ञेयावगतिरितिज्ञानमत्यन्तंप्रसिद्धं सुखादि वदेवेत्यभ्युपगन्तव्यं जिज्ञासानुपपत्तेश्चाप्रसिद्धञ्चेत्ज्ञानंज्ञेयवज्जिज्ञास्येत यथाज्ञेयं घटादिलक्षणंज्ञानेनज्ञाताव्याप्तुमिच्छति तथाज्ञानमपिज्ञानान्तरेणज्ञानाव्याप्तमि च्छेन्नचैतदस्ति अतोऽत्यन्तप्रसिद्धंज्ञानंज्ञाताप्यतएवप्रसिद्धइति तस्मात्ज्ञानेयत्नोन कर्त्तव्यः किंत्वनात्मबुद्धिनिवृत्तावेव तस्मात्ज्ञाननिष्ठा सुसम्पाद्या ५० ।

आनन्दगिरिकृतटीका

संन्यासान्नैःकर्म्यप्राप्तिरित्यत्र वाक्योपक्रमानुकूल्यमाह तथाचेति ज्ञानस्यप्राप्तियो ग्यतावतोजातसम्यग्धियस्तत्फलप्राप्तौ मुक्तावुक्तायाम् वक्तव्यशेषोनास्तीत्याशंक्याह पूर्वोक्तेनेति प्रमाख्यं वस्तुतदित्युच्यते सिद्धिप्राप्तइत्युक्तमेवकस्मादनूद्यते तत्राह तद नुवादइति उत्तरमेवप्रश्नपूर्वकंस्फोरयति किंतदित्यादिना ज्ञाननिष्ठाप्राप्तिक्रमस्य विस्तरेणोक्तौदुर्बोधत्वमाशंक्यपरिहरति किमिति चतुर्थपादस्य पूर्वेणासङ्गतिमाशं क्याह यथेतिनिष्ठायाःसापेक्षत्वात्प्रतिसम्बन्धिनिर्देष्टव्यमित्याह कस्येति याब्रह्मज्ञा नस्यपरानिष्ठासाप्रकृतस्यज्ञानस्यनिष्टेत्याह ब्रह्मेति तस्यपरानिष्ठानप्रसिद्धेति क्र त्वासाधनानुष्ठानाधीनतया साध्येतिमत्वा पृच्छति कीदृशीति प्रसिद्धमात्मज्ञानम नुरुध्यब्रह्मज्ञाननिष्ठा मुक्तातेत्याह यादृशमिति तत्रापि प्रसिद्धिरसिद्धेति शंक ते कीदृगिति अर्थेनैवविशेषोहीति न्यायेनोत्तरमाह यादृशइति तस्मिन्नपि विप्रति पत्तेरप्रसिद्धमभिसन्धायपृच्छति कीदृशइति भगवद्वाक्यान्युपनिषद्वाक्यानि वाश्रित्य परिहरति यादृशइति न जायते म्रियतेवेत्यादीनिवाक्यानि कूटस्थत्वमसङ्गमित्या

भाषाअनुवाद

पूर्वोक्त ऐसेपरमहंस पुरुषको ज्ञाननिष्ठाक्रमसे ब्रह्मभावकी प्राप्तिका प्रकार इ सश्लोकसेले साठिकेश्लोकतक कहतेहैं किहेकौन्तेयअर्जुन नैःकर्म्यसिद्धिको पाय करके ज्ञानविषयक प्रकृष्टनिष्ठासे जेसेपुरुष ब्रह्मकोप्राप्तहोतेहैं सोप्रकार संक्षेप रूप हमसेश्रवणकरो अर्थात् ज्ञानकी जोश्रेष्ठनिष्ठाहै सोसुनो ५० ।

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका।

दिन्यायः ज्ञानस्यविषयाकारत्वादात्मनश्चाविषयत्वादनाकारत्वाच्चतदाकारकज्ञाना योगादात्मप्रसिद्धावपि नात्मज्ञानप्रसिद्धिरितिशङ्कते नन्विति आकारवत्त्वमात्मनः श्रुतिसिद्धमितिसिद्धान्तीशंकते नन्वादित्येति उक्तवाक्यानामन्यार्थत्वदर्शनेन पूर्ववा दीपरिहरति नित्यादिना संग्रहवाक्यंप्रपञ्चयति द्रव्येति इतश्चाकारवत्त्वमात्मनो नास्तीत्याह अरूपमिति यदात्मनोविषयत्वाभावात्तद्विषयंज्ञानंनसम्भवतीत्युक्तंतदु पपादयति अविषयत्वाच्चेति आत्मनोविषयत्वे श्रुतिमुदाहरति नेत्यादिना संदृशे सम्यग्दर्शनविषयत्वाय, यस्यात्मनोरूपंनतिष्ठतीत्यर्थः तदेवकरणागोचरत्वेनोपपा दयति नेति शब्दादिशून्यत्वाच्चात्मा विषयोनभवतीत्याह अशब्दइति आत्मनोविष यत्वाकारवत्त्वयोरभावेफलितमाह तस्मादिति ज्ञानस्यात्माकारत्वाभावेसत्यात्मज्ञा नमिति व्यपदेशासिद्धिरित्येकदेशीशङ्कते कथंतर्हिइति कात्रानुपपत्तिरित्याशंक्या ह सर्वंहीति आत्मनोपि तर्हिविषयत्वेनज्ञानस्यतदाकारत्वंस्यादित्याशंक्याह निरा कारश्चेति आत्मनोविषयराहित्यं चकारार्थः आत्मवत्तत्ज्ञानस्यापि तर्हिनिराका रत्वम्भविष्यतीत्यत्राह ज्ञानेति तच्छब्देनात्मज्ञानंगृह्यते तस्यभावनापौनःपुन्येनानु सन्धानंतस्यनिष्ठासमाप्तिरात्मनिसाक्षात्कारदार्ढ्येनवैतत्सर्वमात्मनोज्ञानस्यवानि राकारत्वेसिध्यतीत्यर्थः ज्ञानात्मनोःसाम्योपन्यासेनसिद्धान्तीसमाधत्ते नेत्यादिना य थोक्तसाम्यानुसारात्मचैतन्याभासव्याप्ताज्ञानपरिणामवती बुद्धिःसाभासबुद्धिःव्याप्तं मनःसाभासमनोव्याप्तानीन्द्रियाणि साभासेन्द्रियव्याप्तःस्थूलदेहस्तत्र लौकिकभ्रा न्तिंप्रमाणयतिअतइति आत्मदृष्टेदेहमात्रेदृष्टत्वात्तत्रचैतन्याभानव्यापिरिन्द्रियद्वा राकल्यते इन्द्रियेषुचतद्दृष्टिदर्शनाच्चैतन्याभासवत्वं मनोद्वारासिध्यति मनसिचात्म दृष्टेश्चैतन्याभासवत्वंबुद्धिद्वारालभ्यते बुद्धौवात्मदृष्टेरज्ञानद्वाराचैतन्याभाससिद्धि रित्यर्थः देहेलौकिकमात्मत्वदर्शनंन्यायाभावादुपेक्षितमित्याशंक्याह देहेति तथापि कथमिन्द्रियाणांन्यायहीनमात्मत्वमित्याशंक्याह तथेति तथापिमनसोयदात्मत्वंतत् न्यायशून्यमित्याशंक्याह अन्यइति बुद्धेरात्मत्वमितिन्यायोपेतमितिसूचयति अन्ये बुद्धीति देहादौ बुध्यन्तेऽपसमात्मत्वबुद्धिर्नान्यत्रेति नियमंवारयति ततोपीति त त्रहिसाभासेन्तर्यामिणि करणोपासकानामात्मधीरस्तीत्यर्थः बुद्ध्यादौदेहान्ते लौकि कपरीक्षकाणामात्मत्वभ्रान्तौसाधारणकारणमाह सर्वत्रेति आत्मज्ञानस्य लौकिक परीक्षकप्रसिद्धत्वादेवविधिविषयत्वमपिपरेष्टंपरास्तमित्याह इत्यतइति ज्ञानस्य

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

विधेयत्वाभावेकिंकर्त्तव्यं द्रष्टव्यादिवाक्यैरित्याशंक्याह किंतर्हीतिआत्मज्ञानस्याविधेयत्वेप्रागुक्तमतःशब्दितंहेतुंविवृणोति अविद्येति देहेन्द्रियमनोबुद्ध्यव्यक्तैरुपलभ्यमानैःसहोपलभ्यमानेचैतन्यंनान्यथातेषामुपलम्भोजड़त्वादित्यत्र विज्ञानवादिभ्रान्तिंप्रमाणयति अतएवेति सर्वंज्ञेयंज्ञानव्याप्तमेवज्ञायते तेनज्ञानातिरिक्तंनास्त्येववस्तुसंमतंहि स्वप्नदृष्टंवस्तुज्ञानातिरिक्तंनास्तीतिते भाष्यन्तीत्यर्थः ज्ञानस्यापिज्ञेयत्वात्ज्ञातृवस्त्वन्तरमेष्टव्यमित्याशंक्याह प्रमाणान्तरेति ज्ञप्तेरप्येनैवज्ञेयत्वोपगमेनातिरिक्तप्रमाणनिरपेक्षताञ्चप्रतिपन्नाद्वैतिसम्बन्धःब्रह्मात्मविज्ञानस्यसिद्धत्वेनाविधेयत्वेफलितमाह तस्मादिति यतआत्मभावंनाब्रह्मणस्तज्ज्ञानस्यचात्यन्तप्रसिद्धत्वेकथंब्रह्मण्यन्यथाप्रथालौकिकानामित्यत्राह अविद्येति यथाप्रतिमासुर्दुर्विज्ञेयत्वादिरूपमेवब्रह्मकिंनस्यात्तत्राह वाच्येति गुरुप्रसादंशुश्रूषयातोषितबुद्धेणचार्यस्यकरुणातिरेकात्तत्त्वंबुध्यतामितिनिरवग्रहोनुग्रहः आत्मप्रसादस्त्वधिगतपदशक्तितात्पर्यवाक्यस्य श्रौतयुक्त्यनुसन्धानादात्मनोमनसोविषयव्याप्तस्यप्रत्यगेकाग्रतया तत्प्रावण्यमितिविवेकः आत्मज्ञानस्यात्मद्वाराप्रसिद्धत्वे वाक्योपक्रमंप्रमाणयति तथाचेति आत्मनोनिराकारत्वात्तस्मिन् बुद्धेरप्रवृत्तेःसम्यक्ज्ञाननिष्ठानसम्पाद्येति मतमुत्थापयति केचित्क्षितिवह्निर्मुखानामन्तर्मुखानांवाब्रह्मणिसम्यग्ज्ञाननिष्ठादुःसाध्येतिविकल्प्याद्यंअङ्गीकरोति सत्यमिति पूर्वविशेषणमुत्तरोत्तरविशेषणेहेतुत्वेनयोजनीयं द्वितीयंदूषयति तद्विपरीतानामिति अन्तर्निष्ठानांह्यैतविषयेसम्यग्बुद्धेरतिशयेनदुःसम्पाद्यत्वेहेतुमाह आत्मेति तद्व्यतिरेकेणवस्त्वन्तरस्यासत्वंकथमित्याशंक्याह यथाचेति अद्वैतमेववस्तुद्वैतंत्वाविद्यकंनान्यथातात्त्विकमित्येतदेवयथास्यात्तथोक्तवन्तोवयं तत्रतत्राध्यायेष्वितियोजना अन्तर्निष्ठानामद्वैतदर्शिनांह्यैतेनास्तिसदुद्विरित्यत्र भगवतोपि सम्मतिमाह उक्तञ्चेति परमतंनिराकृत्यप्रकृतमुपसंहरन्नात्मनोनिराकारत्वेज्ञानस्यतदालंबनत्वेकिंकारणमित्याशंक्याह तस्मादिति नन्वात्माकथञ्चित्ज्ञानक्रियासाध्यश्चेत्तस्य हेयोपादेयान्यतरकोटिनिवेशात् प्राप्तं स्वर्गादिवत् क्रियासाध्यत्वे नासिद्धत्वंनेत्याह नहीति आत्मत्वादेवप्रसिद्धत्वेनप्राप्तत्वादनात्मवत्तस्यहेयोपादेयत्वयोरयोगान्नक्रियासाध्यतेत्यर्थःआत्मनश्चेष्टतेक्रियासिद्धत्वात्तदासर्वप्रवृत्तीनामभ्युदयनिःश्रेयसार्थानां आत्मार्थत्वायोगादर्थिनोभावेऽर्थत्वमप्रामाणिकंस्यादित्याह अप्रसिद्धेहीति नप्रवृत्तीनांस्वार्थत्वंदेहादीनांअन्य

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

सेयंज्ञानस्यपरानिष्ठोच्यतेकथंकार्येति बुद्ध्याध्यवसायात्मिकयाविशुद्धयामायारहित यायुक्तःसम्पन्नोदृत्याधैर्येणआत्मानंकार्यकरणसंघातंनियम्यचनियमनंकृत्वा वशीकृ

आनन्दगिरिकृतटीका

तरस्यार्थित्वेनतादर्थ्यादित्याशंक्यघटादिवदचेतनस्यार्थित्वायोगान्नैवमित्याह नचे ति ननु प्रवृत्तीनांफलावसायितयासुखदुःखयोरन्यतरार्थत्वान्नस्वार्थत्वन्तत्राह न चेति प्रवृत्तीनांसुखदुःखार्थत्वेपितयोःस्वार्थत्वासिद्धेरर्थित्वेनात्मासिद्ध्यतीत्यर्थःकि ञ्चसर्वाप्रेक्षान्यायादात्मावगत्यवसानःसर्वोव्यवहारःनचात्मन्यप्रसिद्धेयज्ञादिव्यवहा रस्य तत्त्वज्ञानार्थत्वेनात्मप्रसिद्धिरेष्टव्येत्याह आत्मेति ननुवात्माप्रसिद्धोपि प्रमाण द्वाराप्रसिध्यति तत्प्रमाणादेवेति न्यायात्तत्राह तस्मादिति मानमेयादिसर्वव्यवहा रस्यात्मावगत्यन्तत्वोपगमात्प्रागेवप्रमाणप्रवृत्तेरात्मप्रसिद्धेरेष्टव्यत्वादित्यर्थःआत्मा वगतेरेवंस्वाभाविकत्वे विवेकवतामारोपनिवृत्तप्राज्ञाननिष्ठासुप्रसिद्धेत्युपसंहरति इत्यात्मेति नन्वनाकारामेवानुमिमीमहे बुद्धिमिति वदतान्तमनाकारमप्रत्यक्षमि च्छतांप्रागर्थावगतेरप्रसिद्धमेवज्ञानंनेत्याह येषामिति सुखादिवन्नित्यानुभवगम्य ज्ञानंनानुमेयंविषयावगत्यातदनुमितावितरेतराश्रयादिति भावः इतश्चज्ञानंप्रसि द्धमन्यथातत्रजिज्ञासाप्रसङ्गान्नचज्ञानेजिज्ञासाप्रसिद्धाप्रसिद्धच तदयोगादित्याह जिज्ञासेति तदेवप्रपञ्चयति अप्रसिद्धञ्चेदिति दृष्टान्तमेवव्याचष्टे यथेति दृष्टा न्तिकंविवृणोति तथेति दृष्टापत्तिंनिराचष्टे नचेति ज्ञानस्यज्ञानान्तरेणज्ञेयत्वमेत च्छब्दार्थःअनवस्थापत्तेरित्यर्थः ज्ञानेजिज्ञासानुपपत्तौफलितमाह अतइति प्रसि द्धेपिज्ञानेज्ञातर्यात्मनिकिमायातन्तदाह ज्ञातापीतिज्ञानस्यविनाज्ञातारमपर्यवसा नादित्यर्थः ज्ञानस्यप्रसिद्धत्वे तत्रभावनापर्यायोविधिर्नास्तीत्याह तस्मादिति कुत्रत र्हिप्रयत्नाख्याभावनेत्याशंक्याह किंत्विति अविषयेनिराकारेचात्मनिज्ञाननिष्ठायाः दुःसम्पाद्यस्वभावेफलितं निगमयति तस्मादिति ५०

स्वामिकृतटीक

एवम्भूतस्यपारमहंस्यज्ञाननिष्ठयाब्रह्मभावप्रकारमाह सिद्धिंप्राप्त इति षड्भिः नैःकर्म्यसिद्धिंप्राप्तःसन्यथायेनप्रकारेणब्रह्मप्राप्नोति तथातंप्रकारंसंक्षेपेणैव मेवच नान्निबोध प्रतिष्ठितायाब्रह्मप्राप्तिस्तामिमांतथादर्शयितुमाह निष्ठाज्ञानस्यया परे तिनिष्ठापर्यवसानं परिसमाप्तिरित्यर्थः ५०

CC-0. In Public Domain. Digitized by eGangotri

बुद्ध्याविशुद्धयायुक्तोधृत्यात्मानंनियम्यच शब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युदस्यच५१

शाङ्करभाष्यं ।

त्यशब्दादीन्शब्दआदिर्येषान्ते शब्दादयस्तान् विषयांस्त्यक्त्वा सामर्थ्यात्शरीरस्थितिमात्रान्केवलान्मुक्त्वा ततोधिकान् सुखार्थान्त्यक्त्वेत्यर्थःशरीरस्थित्यर्थत्वेनप्राप्तेषुचरागद्वेषौव्युदस्यचपरित्यज्य ५१ ततःविविक्तसेवीअरण्यनदीपुलिनगिरिगुहादीन्देशान्सेवितुंशीलमस्येति विविक्तसेवी लघ्वाशीलघ्वशनशीलोविविक्तसेवालघ्वशनयोर्निद्रादिदोषनिवर्त्तकत्वेनचित्तप्रसादहेतुत्वात्ग्रहणं यतवाक्कायमानसोवाक्चकायश्चमानसश्चयतानियतानिसंयतानियस्यज्ञाननिष्ठस्यसज्ञाननिष्ठोयतिर्यतवाक्कायमानसःस्यादेवमुपरतकरणः सन्ध्यानयोगपरोध्यानमात्मस्वरूपंचिन्तनंयोगआत्मस्वरूपविषयएवैकाग्रीकरणंन्तौध्यानयोगौपरत्वेनकर्त्तव्यौयस्यसध्या

आनन्दगिरिकृतटीका

ब्रह्मज्ञानस्यपरांनिष्ठांप्रतिष्ठापितामनूद्यश्लोकान्तरमवतारयितुं पृच्छति सेयमिति सेयंब्रह्मज्ञानस्यपरानिष्ठासमारोपितातद्धर्मनिवृत्तिद्वाराब्रह्मणिपरिसमाप्तिर्ज्ञानसन्तानरूपोच्यते साकार्य्या सुसम्पाद्येति यदुक्तं तत्कथंकेनोपायेनेतिप्रश्नार्थः पृष्टमुपायभेदमुदाहरति बुद्ध्येति अध्यवसायोब्रह्मात्मनिश्चयःमायारहितत्वंसंशयविपर्ययशून्यत्वंशब्दादिसमस्तविषयत्यागेदेहस्थितिरपिदुःस्यादित्याशंक्याह सामर्थ्यादिति विषयमात्रत्यागेदेहस्थित्यनुपपत्तेर्ज्ञाननिष्ठासिद्धिप्रसङ्गादित्यर्थः देहस्थित्यर्थत्वेनार्थानुज्ञातेष्वर्थेषु प्राप्तारागादिज्ञाननिष्ठाप्रतिबन्धकंव्युदस्यति शरीरेति परित्यज्य विविक्तसेवीत्यादिति सम्बन्धः ५१

स्वामिकृतटीका ।

तदेवाह बुद्ध्येति उक्तेनप्रकारेणविशुद्धयापूर्व्वोक्तयासात्त्विकयाबुद्ध्या युक्तधृत्यासात्विक्याआत्मानंतामेवबुद्धिंनियम्यनिश्चलांकृत्वाशब्दादीन् विषयांस्त्यक्त्वातद्विषयौरागद्वेषौव्युदस्यबुद्ध्याविशुद्धयायुक्तइत्यादीनांब्रह्मभूयायकल्पतइतितृतीयेनान्वयः ५१

भाषा अनुवाद

सोईकहतेहैं किउक्तप्रकारक्रमसे पूर्वोक्तविशुद्धस्वरूप सात्विकबुद्धियुक्त पुरुष सात्त्विकीधृतिसे आत्माकहे इसबुद्धिको निग्रहकहे निश्चलकरके शब्दआदिसर्व विषय त्यागकरनेके अनन्तर औविषयप्रयुक्त रागद्वेषभी दूरकरके ब्रह्मभावको प्राप्तहोतेहैं इसश्लोकसेले तीनश्लोकका अर्थ एकसाथ होताहै ५१

CC-0. In Public Domain. Digitized by eGangotri

विविक्तसेवीलघ्वाशीयतवाक्कायमानसः ध्यानयोगपरोनित्यंवैराग्यंसमुपाश्रितः ५२

शाङ्करभाष्यं

नयोगपरोनित्यंनित्यग्रहणंमन्त्रजपाद्यन्यकर्तव्याभावदर्शनार्थं वैराग्यं विरागाभावो दृष्टादृष्टेषु विषयेषुवैतृष्ण्यंसमुपाश्रितोनित्यमेवेत्यर्थः ५२

किञ्चअहंकारंबलंदर्पंकामंक्रोधंपरिग्रहंविमुच्यनिर्ममःशान्तोब्रह्मभूयायकल्पते ५३

अहंकारोदेहेन्द्रियादिषुतंबलंसामर्थ्यंकामरागादियुक्तंनेतरच्छरीरादिसामर्थ्यंस्वाभाविकत्वेनत्यागस्याशक्यत्वात् दर्पोनामहर्षानन्तरभावीधर्मातिक्रमहेतुः हृष्टःतृप्यतितत्प्रोधर्म्ममतिक्रामतीतिस्मरणात् तञ्चकाममिच्छांक्रोधंद्वेषञ्चपरिग्रहंविनिद्रियमनोगतदोषपरित्यागेशरीरधारणप्रसङ्गेन धर्मानुष्ठाननि

आनन्दगिरिकृतटीका

वुद्ध्यैर्वैशारद्ययत्नेनकार्यकरणनियमनन्देहस्थितिहेत्वतिरिक्तविषयत्यागःदेहस्थित्यर्थेष्वपितेषु रागद्वेषवर्जनमित्यपायभेदेसिद्धेसत्यपायान्तराण्यप्रियत्नसाध्यानीत्याह ततइति चित्तैकाग्र्यप्रसादार्थंविविक्तसेवित्वं व्याकरोति अरण्येति निद्रादिदोषनिवृत्त्यर्थंलघ्वाशित्वंविवृणोति लघ्विति लघुपरिमितं हितंमेध्यं वाशितुंशीलमस्येति तथोच्यते विशेषणयोस्तात्पर्यंविवृणोति विविक्तेति निद्रादीत्यादिशब्दादालस्यप्रमादादयोबुद्धिविक्षेपकाविवक्षिताः वक्ष्यमाणध्यानयोगयोरुपायत्वेनविशेषणान्तरंविभजते वाक्चेति वागादिसंयमस्यावश्यकत्वद्योतनार्थंस्वादित्युक्तं संयतवागादिकरणग्रामस्यानायासेनकर्त्तव्यमुपदिशति एवमिति मन्त्रजपादीत्यादिपदेन प्रदक्षिणप्रणामादयोध्यानयोगप्रतिबन्धकागृहीताः उक्तयोरेवध्यानयोगयोरुपायत्वेनोक्तंविरागभावंविभजते दृष्टेति सम्यक्त्वमेवव्यनक्ति नित्यमिति ५२

स्वामिकृतटीका

किञ्च विविक्तेति विविक्तसेवीशुचिशब्देस्थायी लघ्वाशीमितभोजी एतैरूपायैर्यतवाक्कायमानसः संयतवाग्देहचित्तोभूत्वानित्यंसर्वदा ध्यानेनयोयोगोब्रह्मसंस्पर्शस्तत्परःसन्ध्यानाविच्छेदार्थं पुनःपुनर्दृढंवैराग्यं सम्यगाश्रितोभूत्वा ५२

भाषाअनुवाद

विविक्तसेवी कहेपवित्रदेशवासीऔलघ्वासीकहे परिमितआहारकारीहोऔरइनउपायोंसे यतवाककायमानस अर्थात्वचनदेहऔमनको वशकरके सदाध्यानक्रमसे जोयोगकहे अविद्याअज्ञाननिवृत्तिरूप ब्रह्मसाक्षात्कारतिसमेतत्यहो अपनेध्यानके अविच्छेदकेलियेसम्पूर्णरूपसे वारवारदृढ़वैराग्यकाआश्रयलेकर ५२

CC-0. In Public Domain. Digitized by eGangotri

अहङ्कारंबलंदर्पंकामंक्रोधंपरिग्रहं विमुच्यनिर्ममःशान्तोब्रह्मभूयायकल्पते ५३

शाङ्करभाष्यं

मित्तेनवा वाह्यःपरिग्रहःप्राप्तस्तञ्चविमुच्यपरित्यज्यपरमहंसपरिव्राजकोभूत्वादेह जीवनमात्रेपिनिर्गतममभावोनिर्ममोऽतएव शान्तउपरतःयःसंन्यासतायासोयतिर्ब्रह्मा ननिष्ठोब्रह्मभूयाय ब्रह्मभवनाय कल्पते समर्थोभवति ५३

अनेनक्रमेणब्रह्मभूतोब्रह्मप्राप्तःप्रसन्नात्मालब्ध्याध्यात्मप्रसादस्वभावोनशोचति किञ्चिदर्थवैकल्यं आत्मनोबावैगुण्यङ्कोद्दिश्यनशोचतिनसन्तप्यतेनकांक्षतिन ब्रह्मप्रा प्तविषयाकांक्षाब्रह्मविदउपपद्यतें अतोब्रह्मभूतस्यायंस्वभावोऽनूद्यतेनशोचतिनकां

आनन्दगिरिकृतटीका

ज्ञाननिष्ठस्यतेर्विशेषणान्तरंसमुच्चिनोति किञ्चेति नित्यध्यानयोगपरत्वे समु च्चितंकारणान्तरंविष्टणोति अहङ्करणमिति सामर्थ्यमात्रेबलशब्दादुपलभ्यमाने किमितिविशेषवचनमित्याशंक्याह स्वाभाविकत्वेनेति उक्तोदर्पमानमाह हृष्टइति वै राग्यशब्देनलब्धस्यापिकामत्यागस्यपुनर्वचनंप्रकृष्टत्वख्यापनार्थमहङ्कारादित्यगे प रिग्रहप्राप्त भावात्तत्त्यागोक्तिरयुक्तेत्याशंक्याह इन्द्रियेतिपरिग्रहाभावेममत्वविष याभावान्निर्ममत्वं कथमित्याशंक्याह देहेतिअहङ्कारममकारयोरभावेनप्राप्तामन्तः करणोपरतिमनुवदति अतएवेति उक्तमनूद्यजीवन्नेवासौब्रह्मोभवतीति फलित माह यःसंन्यस्तेति ज्ञाननिष्ठपदादुर्ध्वंसशब्दोद्रष्टव्यःब्रह्मणोभवनमनुसन्धानपरि पाकपर्यन्तंसाक्षात्करणं तदर्थमितियावत् ५३

स्वामिकृतटीका

ततश्च अहङ्कारमिति विरक्तोऽहमित्याद्यहङ्कारंबलंदुराग्रहं दर्पंयोगबलादुन्मा र्गप्रवृत्तिलक्षणंप्रारब्धवशात्अप्राप्यमानेष्वपिविषयेषुकामंक्रोधंपरिग्रहञ्च विमुच्य विशेषेणत्यक्त्वाबलादापन्नेषुनिर्ममःसन्शान्तःपरमोपशान्तिं प्राप्तोब्रह्मभूयायब्रह्मा हमिति नैश्चल्येनावस्थानाय कल्पते योगस्थोभवति ५३

भाषाअनुवाद

औरअहङ्कार औबलकहे निन्दवस्तुकीइच्छा औदर्पकहैंयोगबलसे आकाश गमनरूपआदिमायामे प्रवृत्ति औप्रारब्धवशतें अप्राप्यवस्तुमे जोकामक्रोधका रोकना औअदृष्टवशतें हठात् प्राप्तवस्तुमेंभी ममतारहितहोके शान्तिकोप्राप्तपु रुष ब्रह्मकेसाथसमता अर्थात्अहंब्रह्मऐसाअचलरूप अवस्थानकरने योग्यहै ५३

CC-0. In Public Domain. Digitized by eGangotri

ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्षति समःसर्वेषुभूतेषुमद्भक्तिं लभते परां ५४

शाङ्करभाष्यं

क्षतीतिनहृष्यतीति वा पाठः समःसर्वेषुआत्मौपम्येनसर्वेषुभूतेषुसुखदुःखंवाससमेव पश्यतीत्यर्थोनात्मशमदर्शनमिहतस्यवच्यभाणत्वात्मत्यामामभिजानातीतिचएवंभूतोज्ञाननिष्ठोमद्भक्तिंमयिपरमेश्वरेभक्तिंभजनंपरामुत्तमांज्ञानलक्षणांचतुर्थीं लभतें चतुर्विधाभजन्तेमामित्युक्तं ५४ ततोज्ञानलक्षणयाभक्त्या मामभिजानाति

आनन्दगिरिकृतटीका।

अपेक्षितुंपूरयन्नुत्तरश्लोकमवतारयति अनेनेति बुद्धाविशुद्धयेत्यादिरत्नक्रमः ब्रह्मप्राप्तोजीवन्नेवनिष्टत्ताशेषार्थो निरतिशयानन्दब्रह्मात्मत्वेनभवन्नित्यर्थः अध्यात्मं प्रत्यगात्मातस्मिन्प्रसादःसर्वानर्थनिष्टत्यापरमानन्दाविर्भावः सलब्धोयेनजीवन्मुक्तेनसतथानशोचतीत्यादौतात्पर्यमाह नहीति प्राप्तव्यपरिहार्य्याभावनिश्चयादित्यर्थः स्वभावानुवादमुपपादयति ब्रह्मभूतस्येति तस्याप्राप्तविषयाभावान्नापिपरिहार्य्यपरिहारप्रयुक्तःशोकपरिहार्य्यस्यैवाभावादित्यर्थः पाठान्तरे तुरमणीयंप्राप्यप्रमोदते तदभावादित्यर्थः विवक्षितंसमदर्शनंविशदयति आत्मेति ननुसर्व्वेषुभूतेष्वात्मनःसमस्यनिर्व्विशेषस्य दर्शनमत्राभिप्रेतंकिंनेष्यते तत्राह नात्मेति उक्तविशेषणवतो जीवन्मुक्तस्यज्ञाननिष्ठाप्रागुक्तक्रमेणप्राप्ता सुप्रतिष्ठितामवतीत्याह एवम्भूतइतिश्रवणमननिदिध्यासनाभ्यासवतःशमादियुक्तस्याभ्यस्तेश्रवणादिभिःब्रह्मात्मन्यपरोक्षंभोक्षफलंज्ञानंसिध्यतीत्यर्थः आर्त्तादिभक्तित्रयापेक्षयाज्ञानलक्षणांभक्तिं चतुर्थीमित्युक्तां तत्र सप्तमस्थवाक्यमनुकूलयति चतुर्व्विधाइति ५४

स्वामिकृतटीका

ब्रह्माहमितिनैश्चल्येनावस्थानस्यफलमाह ब्रह्मेति ब्रह्मभूतोब्रह्मण्यवस्थितःप्रसन्नचित्तःनष्टं नशोचति नचाप्राप्तंकांक्षतिदेहाद्यभिमानाभावात् अतएव सर्व्वेष्वपि भूतेषुसमःसन् रागद्वेषादिकृतविक्षेपाभावात् सर्व्वभूतेषुसद्भावनालक्षणांपरां मद्भक्तिं लभते ५४

भाषाअनुवाद

अहंब्रह्म ऐसोनिश्चयरूप अवस्थितिका फलकहतेहैं कि ब्रह्मभूतकहे ब्रह्मभावकोप्राप्त प्रसन्नचित्तपुरुष देहआदिमे अभिमानके अभावसे नष्टजो संसारीविषय तिनकाशोच नहीं करतेहैं और अप्राप्तविषयकीभी आकांक्षा नहीं करते इसीसे रागद्वेषादिकृत विक्षेपके अभावसे भूतमात्रमे समभावयुक्त होनेके अनन्तरवेपुरुष सकलप्राणीयोंमे सद्भावरूप जो मेरी उत्तमभक्ति तिसको प्राप्तहोते हैं ५४

CC-0. In Public Domain. Digitized by eGangotri

भक्त्यामामभिजानातियावान्यश्चास्मितत्वतः ततोमांतत्त्वतोज्ञात्वाविशतेतदनन्तरं५५

शाङ्करभाष्य

यावानहमुपाधिकृतविस्तरभेदः यस्माऽहंविध्वस्तसर्व्वोपाधिभेदोभिमतउत्तमपुरुष आकाशकल्पस्तंमामद्वैतंचैतन्यमात्रैकरसमजमजरममरमभयमनिधनन्तत्त्वतोभि जानाति ततोमामेवन्तत्त्वतोज्ञात्वाविशते तदनन्तरंमामेव नात्मज्ञानानन्तरप्रवेश क्रियेभिन्ने विवक्षितेज्ञात्वाविशतें तदनन्तरमिति किंतर्हि फलान्तराभावात् ज्ञान मात्रमेवत्वेतज्ज्ञञ्चापि मांविद्वीत्युक्तत्वात्ननुविरुद्धमिदमुक्तंज्ञानस्यायापरानिष्ठा तया मामभिजानातीति कथंविरुद्धमिति चेदुच्यतें यदैवयस्मिन्विषयेज्ञानमुत्पद्यते ज्ञा तुस्तदैवतं विषयमभिजानाति ज्ञातेति न ज्ञाननिष्ठांज्ञानवृत्तिलक्षणामपेक्षतइति ततश्चज्ञानेननाभिजानातिज्ञानवृत्त्यातु ज्ञाननिष्ठयाभिजानातीतिनैषदोषोज्ञानस्य स्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्यप्रतिपक्षविहीनस्य यदात्मानुभवनिश्चयावसानत्वन्त स्यनिष्ठाशब्दाभिलापात्शास्त्राचार्योपदेशेनज्ञानोत्पत्तिपरिपाकहेतुसहकारिकार णंबुद्धिविशुद्ध्याद्यमानित्वादिगुणंचापेक्ष्यजनितस्यचैतन्यपरमात्मैकत्वज्ञानस्यकर्त्रादि कारकभेदबुद्धिनिबन्धनसर्व्वकर्मसंन्याससहितस्यस्वात्मानुभवनिश्चयरूपेणयदवस्था नंसापराज्ञाननिष्ठेत्युच्यतेसेयंज्ञाननिष्ठाआर्त्तादिभक्तित्रयापेक्षयापराचतुर्थीभक्ति रित्युक्ता तयापरयाभक्त्याभगवन्तंतत्त्वतोभिजानाति यदनन्तरमेवेश्वरश्चैतन्यभेदबु द्धिरशेषतोनिवर्त्ततेअतोज्ञाननिष्ठालक्षणयाभक्त्यामामभिजानातीतिवचनं नविरु ध्यते अत्रचसर्व्वंनिवृत्तिविधायिशास्त्रवेदान्तेतिहासपुराणस्मृतिलक्षणंप्रसिद्धमर्थव द्भवति विदित्वाव्युत्थायाथभिक्षाचर्यंचरन्तितस्मात्न्यासमेषान्तपसामतिरिक्तमाऽ र्न्यासएवात्यरेचयदिति संन्यासःकर्मणांन्यासोवेदानिश्चलोकमसुञ्चपरित्यज्यत्य जधर्ममधर्मंचेत्यादिइहचदर्शितानिवाक्यानि नचतेषांवाक्यानांआनर्थक्यंयुक्तंचार्थवा दत्वंस्वप्रकरणस्थत्वात्प्रत्यगात्माविक्रियस्वरूपनित्यत्वाच्चमोक्षस्यनहिपूर्व्वसमुद्रंजि

भाषाअनुवाद ।

तिसके अनन्तर वहीउत्तम भक्तिकेद्वारा हमको यथार्थरूपसे जानतेहैं औ रमैकैसा हूं इसअपेक्षापर कहतेहैं किजिसरूपसे हमसर्वव्यापी औ घनचिदान न्दस्वरूपहैं तैसा हमको जानतें हैं औ तिसके अनन्तर हमको ऐसेयथार्थ रूप सेजानिकै फेरउसज्ञानके उपर कहे शास्त्रहोनेपर हमारेहीमे प्रवेशकरतें अ र्थात् परमानन्द स्वरूप होतेहैं ५५

शाङ्करभाष्यं

गमिषोःप्रातिलोम्येणप्रत्यक्समुद्रजिगमिषुणासमानमार्गत्वंसम्भवति प्रत्यगात्माविषयप्रत्ययसन्तानकरणाभिनिवेशश्चज्ञाननिष्ठासाचप्रत्यक्समुद्रगमनवत्कर्मणासहभावित्वेनविरुध्यते पर्वतसर्षपयोरिवान्तरवान्विरोधःप्रमाणविदा निश्चितस्तस्मात् सर्वकर्मसंन्यासेनैव ज्ञाननिष्ठा कार्येति सिद्धं ५५

नन्दगिरिकृतटीका

ननु समाधिसाध्येन परमभक्त्यात्मकेनज्ञानेनकिंअपूर्वमवाप्यतेतत्राह ततइति भक्त्यासमाधिजन्ययामांब्रह्माभिमुख्येनप्रत्यक्षयाजानातिव्याप्नोतीत्यर्थः तदेवज्ञानंभक्तिपराधीनंविष्टणोति यावानिति आकाशकल्पत्वमनवच्छिन्नत्वमसङ्गत्वञ्चैतन्यस्य विषयसापेक्षत्वंप्रतिक्षिपति अद्वैतमिति येतुद्रव्यबोधात्मत्वमात्मनोमन्यन्तेतान्प्रत्युक्तं चैतन्यमात्रेति आत्मनि तन्मात्रेपिधर्मान्तरमुपेत्य धर्मधर्मित्वंप्रत्याह एकरसमिति सर्वविक्रियारहित्योक्त्या कौटस्थ्यमात्मनोव्यवस्थापयति अजरमिति उक्तविक्रियाभावेतद्वेत्वज्ञानासम्बन्धंहेतुमाह अभयमिति तत्त्वज्ञानमनूद्यतत्फलंविदेहकैवल्यंलभ्यति ततइति तत्त्वज्ञानस्यतस्मादनन्तरप्रवेशक्रियायाश्च भिन्नत्वंप्राप्तंप्रत्याह नान्येति भिन्नत्वाभावे का गतिर्भेदोक्तैरित्याशंक्यौपचारिकत्वमाह किंतर्हीति प्रवेशइतिशेषः ब्रह्मप्राप्तिरेव फलान्तरमित्याशंक्य ब्रह्मात्मनोर्भेदाभावान्नज्ञानातिरिक्तातत्प्राप्तिरित्याह त्वेवज्ञस्येति ज्ञाननिष्ठया परयाभक्त्या मामभिजानातीत्युक्तमाक्षिपति नन्विति विरुद्धत्वंस्फोरयितुंपृच्छति कथमिति विरोधस्फुटीकरणंप्रतिजानीते उच्यतइति तत्र ज्ञानस्योत्पत्तिरेवविषयाभिव्यक्तिरित्याह यदेति एवकारनिरस्यंदर्शयति नज्ञानेति इत्यावयोःसिद्धमितिशेषः ज्ञानस्योत्पत्तिरेव विषयाभिव्यक्तत्वेपिकथंप्रकृते विरोधीत्याशंक्याह ततश्चेति विरुद्धमिति शेषः शंकितंविरोधंनिरस्यति नैषदोषइति उक्तमेवहेतुंप्रपञ्चयति शास्त्रेति योहि शास्त्रानुसार्याचार्योपदेशस्तेनज्ञानोत्पत्तिः आचार्यवान् पुरुषोवेदेतिश्रुतेः तस्याश्च परिपाकः संशयादिप्रतिबन्धध्वंसस्तत्रहेतुभूतमुपदेशस्यैवसहकारिकारणं यदुद्दिश्योद्यादितदपेक्ष्य तस्मादेवोपदेशाज्जनितं यदैक्यज्ञानंतस्यकारकभेदबुद्धिनिबन्धनानि यानि सर्वाणिकर्माणि तेषांसंन्यासेनसहितस्य फलरूपेणस्वात्मन्येवसर्वप्रकल्पनारहिते यदवस्थानं साज्ञानस्यपरानिष्ठेति व्यवह्रियतेप्रामाणिकैरित्यर्थः यदियथोक्तापराज्ञाननिष्ठा कथंतर्हिसाचतुर्थीभक्तिरित्युक्तेति तत्राह सेयमिति यथोक्तया भ

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

स्वकर्म्मणाभगवतोऽर्च्चनभक्तियोगस्य सिद्धिप्राप्तिःफलं ज्ञाननिष्ठायोग्यता यन्नि मित्ताज्ञाननिष्ठामोक्षफलावसाना सभगवद्भक्तियोगोधुना स्तूयते शास्त्रार्थोपसंहा रप्रकरणे शास्त्रार्थनिश्चयदार्ढ्याय सर्वकर्म्माणि प्रतिषिद्धान्यपि सदा कुर्वाणोऽनुतिन् मद्व्यपाश्रयोहं वासुदेवईश्वरोव्यपाश्रयोयस्यसमद्व्यपाश्र योमय्यर्पितसर्वात्मस्वभावद् त्यर्थः सोपिमत्प्रसादान्ममेश्वरस्यप्रसादादवाप्नोतिशाश्वतंनित्यंवैष्णवंपदमव्ययं ५६

आनन्दगिरिकृतटीका।

त्याभगवत्तत्वज्ञानंसिध्यतीत्याह तयेति तत्त्वज्ञानस्यफलमाह यदनन्तरमितिज्ञान निष्ठारूपायाभगवद्भक्तेस्तत्वज्ञानातिरेकात्तत्फलस्यचाज्ञाननिष्टत्तेस्तन्मात्रत्वात्वे दोक्तेश्चौपचारिकत्वात्प्रकृतंवाक्यमविरुद्धमुपसंहरति अतइति औपदेशिकैक्यज्ञान स्यसर्व्वकर्मसंन्याससहितस्यस्वरूपावस्थानात्मकस्य परमपुरुषार्थोपयिकत्वमित्यस्मि न्नर्थेमानमाह अत्रचेति तदेवशास्त्रमुदाहरति विदित्वेत्यादिना दर्शितानिवाक्यानि सर्व्वकर्माणि मनसेत्यादीनि नन्वेषां वाक्यानामविवक्षितार्थत्वान्नास्ति सार्थेप्रामा ण्यमित्याशंक्याध्ययनविध्युपात्तत्वात् वेदवाक्यानान्तदनुरोधित्वाच्चेतरेषां नैवमि त्याह नचेति तथापि सरोदीदित्यादिवन्नस्वार्थेमानतेत्याशंक्याह नचार्थवादत्वमि ति इतश्चसमुच्चोरपेक्षितमोक्षौपयिकज्ञाननिष्ठस्यसंन्यासेधिकारोनकर्म्मनिष्ठायामि त्याह प्रत्यमिति ज्ञाननिष्ठस्यकर्म्मनिष्ठाविरुद्धेत्यत्रदृष्टान्तमाह नहीति ज्ञाननिष्ठास्व रूपानुवादपूर्वकंकर्म्मनिष्ठया तस्याःसहभावित्वं विरुद्धमिति दार्ष्टान्तिकमाह प्रत्य गात्मेति कथं ज्ञानकर्म्मणोर्विरोधधीरित्याशंक्यकर्म्मणां ज्ञाननिवर्त्यत्वश्रुति स्मृ तिसिद्धत्वादित्याह पर्वतेति अन्तरवानुभयोरेकधर्म्मिनिष्ठत्वेनसांसार्यभावसम्पा दकभेदवानित्यर्थः ज्ञानकर्म्मणोरसमुच्चये फलितमुपसंहरति तस्मादिति ५५

तर्हि ज्ञाननिष्ठयैवमोक्षसम्भवान्न कर्मानुष्ठानसिद्धिरित्याशंक्याह स्वकर्म्मणेति तामेव सिद्धिप्राप्तिंविधिनष्टि ज्ञानेति ज्ञाननिष्ठायोग्यतायैस्वकर्म्मानुष्ठानं भगवद् र्च्चनरूपेकर्त्तव्यमित्यर्थः ज्ञाननिष्ठायोग्यतापि किमर्थेत्याशंक्य ज्ञाननिष्ठासिद्धेर्थे

स्वामिकृतटीका

ततश्चभक्त्येति तयाच परयाभक्त्यातत्वतोमामभिजानाति कथंभूतंयावान्सर्व व्यापीयश्चास्मि सच्चिदानन्दघनस्तथाभूतं ततश्च मामेवंतत्त्वतोज्ञात्वा तदनन्तरंतस्य ज्ञानस्योपरमे सति मांविशते परमानन्दरूपोभवतीत्यर्थः ५५

CC-0. In Public Domain. Digitized by eGangotri

सर्वकर्माण्यपिसदाकुर्वाणोमद्व्यपाश्रयः मत्प्रसादादवाप्नोतिशाश्वतंपदमव्ययं ५६

शाङ्करभाष्यं ।

यस्मादेवन्तस्मात् चेतसाविवेकबुद्ध्यासर्वकर्माणिहृष्टादृष्टार्थानिमयीश्वरे संन्यस्य यत् करोषियदश्नासीत्युक्तन्यायेनमत्परोहंवासुदेवःपरोयस्यतव सत्वंमत्परः सन्

आनन्दगिरिकृतटीका

त्याह यन्निमित्तेति ज्ञाननिष्ठापि कुतोपयुक्तेत्यत्राह मोक्षेति स्वकर्मणा भगवदर्चनात्मनोभक्तियोगस्य परम्परयामोक्षफलस्य कार्यत्वेन विधेयत्वे विध्यपेक्षितांस्तुतिमवतारयति सभगवदिति ज्ञाननिष्ठाकर्मनिष्ठेत्युभयंप्रतिज्ञायतत्रविभागेनप्रतिपादितं किमितोदानीं कर्मनिष्ठापुनस्तुत्याकर्त्तव्यतयोच्यते तत्राह शास्त्रार्थेति तत्र तत्रोक्तस्यैवकर्मानुष्ठानस्य प्रकरणबलादिहोपसंहारः सर्वशास्त्रार्थनिश्चयस्यदृढतांद्योतयतीत्यर्थः यद्यपि कस्यचित् कर्मानुष्ठायिनोबुद्धिशुद्धिद्वारा कैवल्यंसिध्यति तथापि प्रायवाऊल्यादकर्मानुष्ठायिनोपि कस्यचिद्बुद्धिशुद्धिभावे कैवल्यासिद्धिरित्यत्राह सर्वकर्माणीति सर्वशब्दानुरोधादीश्वराराधनस्तुतिपरत्वेन श्लोकं व्याचष्टे प्रतिषिद्धान्यपीति नित्यनैमित्तिकवदित्यपेरर्थः निषिद्धाचरणस्य प्रामाणिकत्वंव्यावर्त्तयति सदेति अनुतिष्ठन्वैष्णवं पदमाप्नोतीति सम्बन्धः पापकर्मकारिणोयथोक्तपदप्राप्तौपापस्यापि मोक्षफलत्वमुपगतंस्यादित्यत्राह मद्व्यपाश्रयइति तत्रैवतात्पर्यमाह मयीति तर्हिज्ञानस्यमोक्षहेतुत्वमुपेक्षितं स्यादित्यत्राह सोपीति ५६

स्वामिकृतटीका ।

स्वकर्मभिः परमेश्वराराधनादुक्तंमोक्षप्रकारमुपसंहरति सर्वकर्माणीति सर्वाणिनित्यानि नैमित्तिकानि च कर्माणि पूर्वोक्तक्रमेण सर्वदाकुर्वाण.मद्व्यपाश्रयः अहमेव व्यपाश्रायआश्रयणीयो नतुस्वर्गादिफलंयस्य समत्प्रसादात्शाश्वतमनादि अव्ययं नित्यंसर्वोत्कृष्टं पदं प्राप्नोति ५६

भाषाअनुवाद

अपने अधिकार अनुसार कर्मके क्रमसे भगवत्की आराधना हेतुसे कहाजो मुक्तिका प्रकार सोकहतेहैं कि नित्यऔ नैमित्तिक पूर्वकहेहुये सर्वकर्मका निरन्तर अनुष्ठानकारी औ मत् व्यपाश्रय कहे जिस का मैं हीं आश्रयणीयहौं और स्वर्ग आदि फल आश्रयणीय नहींहै ऐसापुरुष मेरी अनुग्रहसे साश्वत अर्थात् अनादि औ अव्यय कहेनित्यजो सर्वश्रेष्ठ ब्रह्मपद तिसको प्राप्तहोते हैं ५६

CC-0. In Public Domain. Digitized by eGangotri

चेतसासर्वकर्माणिमयिसंन्यस्यमत्परः बुद्धियोगमुपाश्रित्यमच्चित्तःसततंभव ५७
मच्चित्तःसर्वदुर्गाणिमत्प्रसादात्तरिष्यसिअथचेत्त्वमहङ्कारान्नश्रोष्यसिविनंक्ष्यसि५८

शाङ्करभाष्यं

मय्यर्पितसर्वात्मभावःबुद्धियोगमपिसमाहितबुद्धित्वं बुद्धियोगस्तंबुद्धियोगमुपाश्रित्य आश्रयोऽनन्यशरणत्वं मच्चित्तः मय्येवचित्तंयस्य समच्चित्तःसततं सर्वदाभव ५७

आनन्दगिरिकृतटीका

प्रसादोऽनुग्रहः सम्यक्ज्ञानोदयःपदं पदनीयंउपनिषत्तात्पर्य्यगम्यमव्ययमपक्षयरहितं परमेश्वरप्रसादस्यैवंमाहात्म्यं यतःसिद्धन्तस्मात्तत्प्रसादार्थं भवताप्रयतितव्यमित्याह यस्मादिति भगवत्प्रसादासादितसम्यक्ज्ञानादेवमुक्तिर्नकर्म्ममात्रादिति मानंविवेकबुद्धिः आश्रयशब्दार्थमाह अनन्येति किमतोभवतितदाह मच्चित्तइति ५७ भीत्यापिप्रवर्त्तेत इतिमन्वानोविपर्य्ययेदोषमाह अथचेदिति ५८

स्वामिकृतटीका

यस्मादेवं तस्मात्चेतसेति सर्वाणि कर्माणिचेतसामयिसंन्यस्यसमर्प्यमत्परःअहमेवपरःप्राप्यः पुरुषार्थोयस्यसव्यवसायात्मिकयाबुद्ध्यायोगमुपाश्रित्यसततं कर्मानुष्ठानकालेऽपि ब्रह्मार्पणंब्रह्महविरिति न्यायेन मय्येवचित्तंयस्य तथाभूतोभव ५७

भषा अनुवाद ।

जिसहेतु नित्यआदिकर्मके अनुष्ठानसे ब्रह्मप्राप्तिहोती है इससे सर्वकर्म बुद्धिके द्वारा हमकोसमर्पणकरिके मत्परकहे महीं हैं। परम प्रार्थनीय प्राप्यपरम पुरुषार्थ सर्वस्वरूप जिसके अथवा व्यवसायात्मिका बुद्धिकेद्वारा कर्मयोगको आश्रय करके सतत कहे कर्मअनुष्ठानकालमे भी मग्नतचित्तपुरुष ब्रह्मार्पणंब्रह्महविः ब्रह्माग्नौ ब्रह्मणाहुतं इसीअध्याय के २४ श्लोकसे कहेहुये ज्ञान के द्वारा मेरेमे चित्तसमर्पित होताहै सो अर्जुन तुम बुद्धियोगसे तद्रूप सेमतचित्तहोउ ५७

और ममचित्तहोनेसे जोहोगा सोसुनो तात्पर्ययहकि मग्नतचित्तहोके मेरी कृपासे तावतदुर्ग अर्थात् दुस्तरसांसारिक दुखसमूहसे तरिजावगे और इसके विपरीत आचरणमे दोषकहते हैं कि और जो इस प्रकार कहने परभी तुमअपनेअहंकार अर्थात् हम बडे ज्ञानी इस अभिमान से हमारे कहनेपर कान नकरो तोपुरुषको उचित औहित करनेवाला जोधर्म तिससे भ्रष्टहोउगे अर्थात् विनष्टहो जावगे औ दुर्गति भी भोगना पडैगा ५८ और जो कहो कि अच्छा हम

CC-0. In Public Domain. Digitized by eGangotri

यदहङ्कारमाश्रित्य नयोत्स्यइतिमन्यसे मिथ्येवव्यवसायस्तेप्रकृतिस्त्वांनियोक्ष्यति५९

शाङ्करभाष्यं।

मच्चित्तःसर्वदुर्गाणिसर्वाणि दुस्तराणिसंसारहेतुजातानि मत्प्रसादात्तरिष्यसिअतिक्रमिष्यसिअथचेत्यदि त्वं मेमदुक्तमहङ्कारात् पण्डितोऽहमिति नश्रोष्यसि नग्रहीष्यसि ततस्त्वंविनंक्ष्यसि विनाशङ्गमिष्यसि ५८

इदञ्च त्वया नमन्तव्यं स्वतन्त्रोहं किमर्थं परोक्तं करिष्यामीति यदि चैतत्त्वमहङ्कारमाश्रित्य नयोत्स्यइति न युद्धंकरिष्यामीति मन्यसेचिन्तयसिनिश्चयंकरोषि मिथ्यैवव्यवसायोनिश्चयस्तेतव यस्मात् प्रकृतिः त्वत्स्वभावस्त्वां नियोक्ष्यति ५९

आनन्दगिरिकृतटीका

स्वातन्त्र्येसति भीतेरवकाशोनास्तीत्याशंक्याहं इदञ्चेति इतश्चत्वयायुद्धान्नवैमुख्यंकर्त्तुमुचितमित्याह मिथ्येति ५९ यस्माच्चेति स्वभावजेनकर्मणानिबद्धस्त्वमिति सम्बन्धः इतोपि त्वयायुद्धं कर्त्तव्यमेवेत्याह यस्मादिति ६०

स्वामिकृतटीका

ततोयद्भविष्यति तच्छृणु मच्चित्तइति मच्चित्तःसन् मत्प्रसादातुसर्वाण्यपि दुर्गाणिदुस्तराणिसांसारिक दुःखानि तरिष्यसिविपक्षेदोषमाह अथ चेत् यदिपुनस्वमहङ्कारात्त्राढत्वाभिमानात् मदुक्तमेवं न श्रोष्यसितर्हिविनंक्ष्यसिपुरुषार्थात् भ्रष्टोभविष्यसि ५८ कामं विनंक्ष्यामि ननु बन्धुभिर्युद्धंकरिष्यामीति चेत्तत्राह यदहङ्कारमिति मदुक्तमनादृत्यकेवलमहङ्कारमवलम्ब्य युद्धं न करिष्यामीतियन्मन्यसेत्वमध्यवस्यसिएषतव व्यवसायोमिथ्यैवास्वतन्त्रत्वात्तवतदेवाह प्रकृतिस्त्वांरजोगुणरूपेणपरिणता सती नियोक्ष्यति युद्धेप्रवर्त्तयिष्यत्येव ५९ किञ्चस्वभावजेनेति

भाषाअनुवाद

धर्म से भ्रष्ट होंय परन्तु तौ भी भाई औवन्धुवों के साथ युद्ध न करैंगे तिसपर कहतेहैं कि मेरी कही सबबातोंको अनादर पूर्वक अहङ्कारके भरोसेसेजोकहोकिमै युद्ध न करूंगा ऐसी जोतुम मनमे निश्चय करते हौ तो तुमारा यह निश्चयकरना स्वाधीनता के अभाव हेतुसे अर्थात् तुमस्वाधीन नहीं हौ मिथ्या कहे झूठमूठ है सोई कहते हैं कि जो तुमारी प्रकृति कहे स्त्रीको रजोगुणको अधिकाईसो तुमको अवश्य ही युद्धमे प्रवृत्तकरेगी अन्तको फरष मारोगे औ लडोगेऔइसपीटनेसे केवल जगत मे दुर्यशछोड औरकुछ हाथलगना नहींहै ५९

CC-0. In Public Domain. Digitized by eGangotri

स्वभावजेनकौन्तेयनिबद्धःस्वेनकर्मणा कर्त्तुंनेच्छसियन्मोहात्करिष्यस्यवशोपितत् ६०
ईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठति भ्रामयन्सर्वभूतानियन्त्रारूढ़ानिमायया ६१

शाङ्करभाष्यं

यस्माच्चस्वभावजेनशौर्यादिना कौन्तेययथोक्तेन निबद्धनिश्चयेनबद्धःस्वेनात्मीयेनक र्मणाकर्त्तुंनेच्छसियत्कर्म मोहाद्विवेकतः करिष्यस्यवशोपिपरवशएवतत्कर्मय स्मात् ६० ईश्वरःईशनशीलोनारायणःसर्वभूतानांसर्वप्राणिनांहृद्देशेहृदयदेशेऽर्जुन

स्वामिकृतटीका ।

स्वभावः क्षत्रियत्वहेतुः पूर्वसंस्कारस्तस्माज्जातेनस्वीयेनकर्मणा शौर्यादिनापूर्वो क्तेननिबद्धोयन्त्रितस्त्वंमोहात्यत् कर्मयुद्धलक्षणंकर्त्तुंनेच्छसि अवशःसंस्तत्कर्मक रिष्यस्येव ६०

भाषाअनुवाद

और हे कौन्तेय कुन्तीनन्दन अर्जुन स्वभावकहेजो पूर्वकर्मकासंस्कार जिससे रजोगुणविशिष्ट क्षत्रीकेजामाको प्राप्तहो औ शूरताआदि गुणकर्मोसे निबद्धकहे वशीभूत तुम मोहकेमारे जोइस क्षणमे युद्धकर्म करने की इच्छा नहीं करतेहो पर इसके बाद अवशहो यहीकर्म अवश्यही करोगे इसमे कुछ झूठन मानो ६०

इस से पिछिले दोनोश्लोकमे सांख्यआदि मतानुसारी मनुष्योंको प्रकृतिपा रतन्त्र कहे स्वभावाधीनता कहीगई अब दोश्लोक से निज कहे अपना मत क तेहैं किहेअर्जुन सकल भूतोंके हृदयमे नियामक रूपसे अन्तर्यामी ईश्वर स्थि ति करते हैं तो किस प्रकारसे टिके हैं इस आकांक्षापर कहते हैं कि भूतमा त्रको माया जो अपनी शक्ति तिस्रके जोरसे भ्रमण कहे उपस्थित समस्त कर्मो मे प्रवृत्तकरावते भये सबमे टिकेहैं जैसे कठपुतलीको सूत्रधार बाजीगर लोगों के सामने नचावैहै अथवा यन्त्रकहे शरीर आरूढ़कहे जीव को भ्रमण करावते स्थिति करते हैं इस पर श्वेताश्वतर उपनिषद के मन्त्रका प्रमाणदे तेहैं कि एक स्वयंप्रकाश जोपरमात्मा सो भूतों मे निगूढ़भावसे स्थित औ सर्व व्यापी सबका अन्तर्यामी औ कर्मोका नियन्ताऔ भूतोंका आधाररूप औ द्रष्टा देखने वाला औ भूतमात्र को चेतनकारी अद्वितीय औ गुणातीत हैं और अन्त र्यामी जो बुद्धिमे स्थिति करके बुधिका नियम करै है और जिस को बुद्धिनहीं जानती औ बुद्धिही जिस की उपाधिहै सोई तुमारे आत्मा औ अन्तर्यामी तथा कैवल्यस्वरूप है ६१

CC-0. In Public Domain. Digitized by eGangotri

तमेवशरणंगच्छसर्वभावेनभारत तत्प्रसादात्परांशान्तिंस्थानंप्राप्स्यसिशाश्वतं ६२

शाङ्करभाष्यं

शुद्धान्तरात्मस्वभावोविशुद्धान्तःकरणइति अहङ्कृत्वेतिदर्शनात्तिष्ठतिस्थितिंलभतेसकथन्तिष्ठतीत्याह भ्रामयन्भ्रमणङ्कारयन्सर्वभूतानिबन्धारूढानीवयन्त्राण्यारूढान्यधिष्ठितानीवेति इवशब्दोवद्रष्टव्यो यथादारुकृत्पुरुषादीनि यन्त्रारूढानि माययाच्छन्नाभ्रामयन् तिष्ठतीतिसम्बन्धः ६१ तमेवेश्वरंशरण

आनन्दगिरिकृतटीका ।

अर्जुनशब्दस्योक्तार्थत्वे श्रुतिमुदाहरति अहश्चेति अहश्चकृष्णमहरर्जुनञ्चविवर्त्ततेरजसीवेद्याभिःइत्यत्रकिञ्चिदहस्तावत्कृष्णमच्छङ्कलुप्तिर्तामवलक्ष्यतेकिञ्चित्पुनरहरर्जुनमतिस्वच्छं शुद्धभावमुपलभ्यतेएवमर्जुनशब्दस्यशुक्लशब्दपर्य्यायतया प्रयोगदर्शनादुक्तार्थत्वमुचितमित्यर्थः यन्त्रारूढानीवेतिकथमुच्यतेतत्राह इवशब्दइति तदेवप्रपञ्चयति यथेति दारुमयानियन्त्राणियथालौकिकोमायावी मायया भ्रामयन्वर्त्ततै तथेश्वरोपिसर्वाणिभूतानि भ्रामयन्नेव हृदयेतिष्ठतीत्यर्थः ६१

स्वामिकृतटीका ।

तदेवंश्लोकद्वयेनसांख्यादिमतेनप्रकृतिपारतन्त्र्यंस्वभावपारतन्त्र्यंचोक्तं इदानींस्वमतमाह ईश्वरइतिद्वाभ्यां सर्वभूतानांहृन्मध्येईश्वरोऽन्तर्यामीतिष्ठतिकिंकुर्वन्सर्वाणिभूतानिमाययानिजशक्त्याभ्रामयंस्तत्तत्कर्म्मसुप्रवर्त्तयन्यथादारुयन्त्रमारूढानिकृत्रिमाणिभूतानिसूत्रधारोलोकेभ्रामयति तद्वदित्यर्थः यद्वायन्त्राणिशरीराणिआरूढानिभूतानिदेहाभिमानिनोजीवान्भ्रामयन्नित्यर्थः तथाचश्वेताश्वतराणां मन्त्रःएकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतान्तरात्माकर्माध्यक्षःसर्वभूताधिवासः साक्षीचेताःकेवलोनिर्गुणश्चेति अन्तर्यामिब्राह्मणञ्च यआत्मनितिष्ठन्नात्मानमन्तरोयमयतियंआत्मानवेद यस्यात्माशरीरंयेषते अन्तर्याम्यमृतइत्यादि ६१

भाषाअनुवाद

जबकि ईश्वरही सर्वभूतमात्रका प्रेरकहै औउसीकी प्रेरणासे सकल कर्मप्राणी करतेहैं तो फेरि अपनापुरुषार्थ करनाव्यर्था है इसअभिप्रायसे कहतेहैं किजिस हेतुसे जीवमात्र परमेश्वरके वशीभूतहैं इससे हेभारत अर्जुन तुम अहङ्कारको परित्याग करके सम्यक प्रकारसे उसी ईश्वरकी शरण ग्रहण करो तदनन्तर तिन की कृपासे पराकहे उत्तम शान्ति औ परमेश्वर सम्बन्धीनित्यजोस्थान सो पावोगे यह भगवान अर्जुन से कहा ६२

CC-0. In Public Domain. Digitized by eGangotri

इतितेज्ञानमाख्यातंगुह्याद्गुह्यतरंमया विमृश्यैतदशेषेणयथेच्छसितथाकुरु ६३

शाङ्करभाष्यम्

माश्रयसंसारार्त्तिहरणार्थंगच्छआश्रयसर्वभावेनसर्वात्मनाहेतमारत तत्प्रसादा दीश्वरानुग्रहात्परांप्रकृष्टांशान्तिंपरामुपरतिंस्थानञ्चममविष्णोःपरमंपदमवाप्स्यसि शाश्वतंनित्यं ६२ इत्येतत्ते तुभ्यंज्ञानमाख्यातंकथितं गुह्यात् गह्यात् गुह्यतरंअतिशयेनगुह्यंरहस्यमित्यर्थः मयासर्वज्ञेनेश्वरेणविमृश्यविमर्शनमालोचनंकृत्वैतद्यथोक्तं शास्त्रमशेषेणसमस्तं यथोक्तंचार्थजातं यथेच्छसि तथाकुरु ६३

आनन्दगिरिकृतटीका

ईश्वरःसर्वाणिभूतानिप्रेरयतिचेत्प्राप्तंकैवल्यार्थस्यापिपुरुषकारस्यानर्थक्यमित्याशंक्याह तमेवेति सर्वात्मनामनोवृत्तिवाचाकर्मणाचेत्यर्थः ईश्वरस्यानुग्रहात्तत्त्वज्ञानोत्पत्तिपर्यन्तादितिशेषः मुक्तास्तिष्ठन्त्यस्मिंस्तिष्ठतिस्थानं ६२

शास्त्रमुपसंहर्त्तुमिच्छन्नाह इतितेज्ञानमिति ज्ञानंकरणव्युत्पत्त्यागीताशास्त्रंयथेच्छसितथाकुरु ज्ञानंकर्मोपदिष्टं तदनुतिष्ठेत्यर्थः ६३ गीताशास्त्रस्य

स्वामिकृतटीका

तमिति यस्मादेवंसर्वेजीवाःपरमेश्वरपरतन्त्रास्तस्मादहङ्कारंपरित्यज्यसर्वभावेनसर्वात्मनातमीश्वरमेवशरणंगच्छ ततश्चतस्यैवप्रसादात्परामुत्तमामुपशान्तिंस्थानञ्च पारमेश्वरं शाश्वतंनित्यं प्राप्स्यसि ६२

सर्वगीतार्थमुपसंहरन्नाह इतीति इत्यनेनप्रकारेणतेतुभ्यंसर्वज्ञेनपरमकारुणिकेनमयाज्ञानमाख्यातमुपदिष्टंकथंभूतंगुह्यात्गोप्यात् रहस्यमन्त्रयोगादिभ्या

भाषाअनुवाद

अबसमस्त भगवद्गीताका अर्थ कहे तात्पर्यकहते हैं कि इस प्रकारसे मैंने दया करके तुम को ज्ञान उपदेश दिया और सो ज्ञान कैसा है इस अपेक्षासे कहते हैं कि गुह्यकहे गोपन करने योग्य तथा मन्त्रयोग आदिसे भी जो ज्ञान गुह्यतर अति रहस्य है सोई मैंने कहा इससे तुम गीताशास्त्रको अच्छीतरह आलोचन करके फेर तुमारी जैसी इच्छा होय तैसा करो भावार्थ यह कि इस गीताके अर्थ को विचार करनेसे अवश्यही तुमारा मोह निवृत्त हो जायगा यह भगवानने कहा ६३ अति गूढ अर्थसे युक्त जो गीताशास्त्र तिसको सम्यक

CC-0. In Public Domain. Digitized by eGangotri

सर्वगुह्यतमंभूयःशृणुमेपरमंवचः इष्टोऽसिमेदृढमितिततोवक्ष्यामितेहितं ६४

शाङ्करभाष्यं

तथाभूयोपिमयोच्यमानंशृणुसर्वगुह्यतमंसर्वगुह्येभ्योऽत्यन्तगुह्यतमंरहस्यंउक्तमप्यसकृद्भूयःपुनःशृणुमेममपरमंप्रकृष्टंवचोवाक्यंनभयात्नार्थकारणाद्वावक्ष्यामितर्हिइष्टःप्रियोसिमेसमदृढमव्यभिचारेणेतिकृत्वाततस्तेनकारणेनवक्ष्यामिकथयिष्यामि तेतवहितंपरंज्ञानप्राप्तिसाधनं ६४

तद्विसर्वहितानां हिततमङ्किन्तदित्याह मन्मनाभवमच्चित्तोभव मद्भक्तोभव मद्याजनोभवमद्याजीमयियजनशीलोभव मांनमस्कुरुनमस्कारंमयिमामेवकुरुतत्वैवं वर्त्तमानोवासुदेवेएव सर्व्वसमर्पितसाध्यसाधनप्रयोजनोमामेवैष्यसि आगमिष्यसि सत्यन्तेव प्रतिजाने सत्यां प्रतिज्ञां करोम्येतस्मिन्वस्तुनीत्यर्थो यतः प्रियोसिमे एवं

आनन्दगिरिकृतटीका

पौर्वापर्य्येणविमर्शनद्वारातात्पर्य्यार्थंप्रतिपत्तुमसमर्थंप्रत्याह भूयोपीति किमर्थमिच्छन्पुनःपुनरभिदधासीत्याशंक्याह नभयादिति ६४

स्वामिकृतटीका

नाटपिगुह्यतरं एतन्मयोपदिष्टंगीताशास्त्रमशेषतोविमृश्यपर्य्यालोच्यपश्चाद्यथेच्छसि तथाकुरु एतस्मिन्पर्य्यालोचितेसति तवमोहोनिवर्त्तिष्यत इतिभावः ६३

अतिगम्भीरंगीताशास्त्रमशेषतःपर्य्यालोचितुमशक्नुवतःकृपयास्वयमेवतस्यसारं संगृह्यकथयति, सर्वगुह्यतममितित्रिभिः सर्वेभ्योऽपिगुह्येभ्योगुह्यतमंमेवचस्तवत्वोक्तमपिभूयःपुनरपिवक्ष्यमाणं शृणु पुनःपुनःकथनेहेतुमाह दृढमत्यन्तमिष्टःप्रियोऽसीति मत्वाततएवहेतोस्तेहितंवक्ष्यामि यद्वाममत्वमिष्टोऽसिमयावक्ष्यमाणं दृढं सर्वप्रमाणोपेतमितिनिश्चित्यततस्तेवक्ष्यामीत्यर्थःदृढामतिरिति क्वचित्पाठः ६४

भाषाअनुवाद

आलोचना करने को असमर्थ जो अर्जुन तिनसे अनुग्रह करके श्रीभगवान आप ही गीता का सारसंग्रह करि इस श्लोकसेले तीन श्लोकके द्वारा कहते हैं कि उस सब गोपनीयसे भी अति गुह्य तम जो हमारे वचन यद्यपि प्रसंग प्रसंगपर कहे भीगयेहैं परतौभी फेर कहता हूं सो तुम सुनो और वार वार कहनेमे हैं तुकहते हैं कितुम हमारे दृढ़ कहे अत्यन्त प्रियहौ इसीसे तुमारी प्रीति औ हित के अर्थ फेर भीकहूंगा अथवा मेरी वाक्यको तुमने दृढप्रमाण करके जाना इस से तुम हमै अतिप्रियहौ इससे फेरि तुमारे हितको जो वचनहैं सो कहूंगा ६४

CC-0. In Public Domain. Digitized by eGangotri

मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु मामेवैष्यसिसत्यं तेप्रतिजानेप्रियोऽसिमे ६५

शाङ्करभाष्यं ।

भगवतः सत्यप्रतिज्ञत्वं बुद्ध्वाभगवद्भक्तेरवश्यम्भाविमोक्षफलमवधार्य्यभगवच्छरणैकपरायणोभवेदिति वाक्यार्थः ६५ कर्मयोगनिष्ठायाःपरमरहस्यमीश्वरशरणतामुपसंहृत्याथेदानीं कर्मयोगत्यागनिष्ठाफलं सम्यग्दर्शनंसर्ववेदान्तविहितं वक्तव्यमित्याह सर्वधर्मान् सर्वेच ते धर्माश्च सर्वधर्माः तान् धर्मशब्देनाऽधर्मोपि गृह्यते नैःकर्म्यस्य विवक्षितत्वात् नाविरतोदुश्चरितादिमुच्यतइति त्यज धर्ममधर्मञ्चेत्यादिस्मृतिभ्यः सर्वधर्मान् परित्यज्यसंन्यस्यसर्वकर्माणीत्येतन्मामेकं सर्वात्मानंसर्वभूतस्थमीश्वरंअच्युतं गुरुं जन्ममरणविवर्जितमहमेवेत्येवमेकं शरणं व्रज नमत्तोऽ

आनन्दगिरिकृतटीका

हितमिति साधारणनिर्देशे कथं परमित्यादिविशेषणमित्याशंक्याह तद्धीति तदेव प्रश्नद्वारा विवृणोति किं तदित्यादिना उत्तरार्द्धं व्याचष्टे तदेति एवमुक्तया रीत्यावर्त्तमानत्वं तस्मिन्नेववासुदेवे भगवति अर्पितसर्वभावोमामेवागमिष्यसीति सम्बन्धः सत्यप्रतिज्ञाकरणे हेतुमाह यतइति इदनीं वाक्यार्थं श्रेयोर्थिनांप्रवृत्तिप्रयोगित्वेन संगृह्णाति एवमिति ६५ वृत्तमनूद्यानन्तरश्लोकतात्पर्य्यमाह कर्मयो

स्वामिकृतटीका

तदेवाह मन्मनाइति मन्मनामच्चित्तोभवमद्भक्तोभजनशीलोभवमद्याजीमद्यजनशीलोभवमामेवनमस्कुरुएवंवर्तमानस्त्वं मत्प्रसादलब्धज्ञानेन मामेवैष्यसि प्राप्स्यसिअत्रच संशयं माकार्षीःत्वंहि मेप्रियोऽसि अतःसत्यंयथा भवत्येवंतुभ्यमहंप्रतिजाने प्रतिज्ञांकरोमि ६५ ततोऽपिगुह्यतममाह सर्वेति मद्भक्तौसर्वंभविष्यतीति

भाषाअनुवाद

अब समस्त हितों से बढके हित क्या है इस शंङ्कापर कहने को अङ्गीकार कियेहुये गीतार्थ सारको कहते हैं कि मन्मना कहेमत्चित्तहोउ औमेरेही भक्तकहे आश्रितहोउ औ मतयाजी कहे मेरेही पूजनकारीहोउ औ हमीको नमस्कारकरो इस प्रकारवर्त्तमान रहनेपरमेरी अनुग्रहसे प्राप्ततत्त्वज्ञानकेद्वारा जोहमको प्राप्त होउगे इस मे कुछ संशय नकरो क्योंकि तुम हमारेप्रियपात्र हौ इसपर तुमकोसत्यप्रत्यय कहे प्रतीति जिसमे होय इससे तुमको प्रतिज्ञाकरके कहते हैं ६५ पूर्वकही गुह्यतमबातसेभी जो गुह्यकहे गोपनीय सोकहतेहैं

CC-0. In Public Domain. Digitized by eGangotri

सर्व्वधर्म्मान्परित्यज्यमामेकंशरणंव्रज अहंत्वांसर्वपापेभ्योमोक्षयिष्यामिमाशुचः ६६

शाङ्करभाष्यं

न्यदस्तीत्यवधारयेत्यर्थः अहं तु त्वामेवंनिश्चित बुद्धिं सर्वपापेभ्यः सर्वधर्माधर्मबन्ध नरूपेभ्योमोक्षयिष्यामि स्वात्मभावप्रकाशीकरणेन उक्तञ्चनाशयाम्यात्मभावस्थोज्ञा नदीपेन भास्वता इत्यतोमाशुचः शोकं माकार्षीरित्यर्थः ६६

अस्मिन् हि गीताशास्त्रेपरंनिःश्रेयससाधनंनिश्चितं किंज्ञानंकिंकर्म्मवा आहोस्विदुभयमिति कुतः सन्देहः यत्ज्ञात्वामृतमश्नुते ततोमान्तत्त्वतोज्ञात्वाविशते तदनन्तरमित्यादीनि वाक्यानि केवलात् ज्ञानात्निश्रेयसप्राप्तिंदर्शयन्ति कर्मण्ये वाधिकारस्तेमाकर्म्मवेत्येवमादीनिकर्मणां अवश्यकर्त्तव्यतां दर्शयन्ति एवं ज्ञानकर्म णोः कर्त्तव्यतोपदेशात् समुच्चितयोरपिनिःश्रेयसहेतुत्वंस्यादिति भवेत् संशयःकिं पु नरत्र मीमांसाफलं नन्वेतदेवएषामन्यतमस्यपरमनिःश्रेयससाधनत्वावधारणमतो

आनन्दगिरिकृतटीका।

गेति धर्म्मविशेषणादधर्मानुज्ञांवारयति धर्मेति ज्ञाननिष्ठेन मुमुक्षुणा धर्माध र्म्मयोरत्याज्यत्वे श्रुतिस्मृती उदाहरति नाविरतइति मामेकमित्यादेस्तात्पर्यमाह नमत्तोन्यदिति अर्जुनस्यक्षत्रियत्वादुक्तसंन्यासद्वारा ज्ञाननिष्ठायांमुख्यानधिकारे पितंपुरःकृत्याधिकारिभ्यस्तस्योपदिदिक्षुत्वादविरोधमभिप्रेत्याह अहंत्विति उक्तार्थे दाशमिकं वाक्यमनुकूलयति उक्तञ्चेति ईश्वरस्यत्वदीयबन्धननिरसनद्वारा तत्प्रा लयितृत्वान्नते शोकावकाशोस्तीत्याह अतइति ६६ पूर्वापरालोचनातोगीता

स्वामिकृतटीका

दृढविश्वासेनविधिकैङ्कर्य्यंत्यक्त्वामदेकशरणोभव एवंवर्तमानःकर्मत्यागनिमित्तंपापं स्यादितिमाशुचःशोकंमाकार्षीअतस्त्वांमदेकशरणंसर्वपापेभ्योहंमोक्षयिष्यामि ६६

भाषाअनुवाद

कि हमारी भक्तिहीसे सकलसिद्धि होती है इस प्रकार दृढ विश्वास करिके वि धि कहे प्रारब्ध औवेदशास्त्रकेविधानका भरोसा छोड़ि एक हमारीही शरण लेउ अर्थात् मेरेकहेपर विश्वासकरो तो ऐसीहमारी शरणागत रूपमे वर्त्तमा न तुमारे कर्मयोगसे जो फेरि औरपाप होंगे ऐसाशोच नकरना क्योंकि एक मेरे शरणमे प्राप्ततुमको मै यावत पापसे उद्धार औ मुक्त करूंगा इस से तुम शोक दूर करो औ अपना काम देखो ६६

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्य

विस्तीर्णतरं मीमांस्यमेतत् आत्मज्ञानस्यतुकेवलस्यनिःश्रेयसहेतुत्वंभेदप्रत्ययनिवर्त्तकत्वेनकैवल्यफलावसानत्वात् क्रियाकारकफलभेदबुद्धिरविद्ययात्मनिनित्यप्रवृत्तामम कर्माहं कर्त्ताऽमुष्मैफलायेदं कर्मकरिष्यामीतीयमविद्या अनादिकालप्रवृत्ताअस्या अविद्यायानिवर्त्तकमयमहमस्मिकेवलोऽकर्त्ताक्रियोऽफलोनमत्तोऽन्योस्तिकश्चिदित्येवं रूपमात्मविषयं ज्ञानमुत्पद्यमानंकर्मप्रवृत्तिहेतुभूतायाभेदबुद्धेनिवर्त्तकत्वात् तुशब्दः पक्षद्वयव्यावृत्तयर्थः नकेवलेभ्यःकर्मभ्यः नचज्ञानकर्मभ्यांसमुच्चिताभ्यांनिःश्रेयसप्राप्तिरितिपक्षद्वयं निवर्त्तयति अकार्यत्वाच्चनिःश्रेयसस्यकर्मसाधनत्वानुपपत्तिःन हि नित्यं वस्तु कर्मणा ज्ञानेन वाक्रियते केवलज्ञानमपि अनर्थकं तर्हि न अविद्यानिवर्त्तकत्वे सति दृष्टकैवल्यफलावसानत्वादविद्यातमोनिवर्त्तकस्यज्ञानस्यदृष्टं कैवल्यफलावसानत्वंरज्वादिविषयेसर्पाद्यज्ञानतमसोनिवर्त्तकप्रदीपप्रकाशफलवत् विनिवृत्तसर्पादिविकल्परज्जुकैवल्यावसानंहि प्रकाशफलंज्ञानंतथाहृष्टार्थायाञ्चछिदिक्रियाग्निमन्थनादीनांव्यापृतकर्त्तादिकारकाणां द्वैधीभावाग्निदर्शनादिफलाद्व्य

आनन्दगिरिकृतटीका ।

शास्त्रं व्याख्यायोपसंहृत्यतत्तात्पर्यार्थंनिर्द्धारितमपिविचारद्वारानिर्द्धारयितुंविचारमवतारयति अस्मिन्निति किंशब्दार्थमेवव्याचष्टे ज्ञानमिति निमित्ताभावेसंशयस्याभासत्वान्ननिरस्यतामितिमत्वाशङ्कते कुतइति तत्तदर्थावद्योतकानेकवाक्यदर्शनं तन्निमित्तमित्याह यत्ज्ञात्वेतिकर्मणामवश्यकर्तव्यत्वोपलम्भात्तेभ्योपिनिःश्रेयसप्राप्तिर्भातीत्याह कर्मण्येवेति तथापिसमुच्चयप्रापकंनास्तीत्याशंक्याह एवमिति सत्यांसाग्र्यांकार्यमवश्यम्भावीत्युपसंहरति इति मवेदिति सन्दिग्धं सफलञ्चविचार्यमिति स्थितेसति फलंसन्दिग्धमपिनविचार्य्यमिति बुद्ध्याशङ्कते किंपुनरितिप्रत्येकं ज्ञानकर्मणोःसमुच्चितयोर्वामुक्तिं प्रति परमसाधनतेत्यवधारणमेवविचारफलमिति परिहरति नन्विति सन्देहप्रयोजनयोर्विचारप्रयोजकयोर्भावात् विचारद्वारा परममुक्तिसाधनंनिर्द्धारणीयमितिनिगमयति अतइतिएवंविचारमवतार्य्यसिद्धान्तं संगृह्णाति आत्मेति संग्रहवाक्यंविवृण्वन्आदावात्मज्ञानापोह्यामविद्यांदर्शयतिक्रियेति आश्रयोत्यातदनादित्वमाह आत्मनीति तामेवाविद्यामनाद्यविद्योत्यामनर्थात्मिकांप्रपञ्चयति ममेति अनाद्यविद्याकार्यत्वात्प्रवाहरूपेणानादित्वमस्याविवक्षित्वाविशिनष्टि अनादीति तत्कारणाविद्यानिवर्त्तकत्वमात्मज्ञानस्योपन्यस्यति अस्या

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

फलेकर्मान्तरेवाव्यापारानुपपत्तिर्यथातथाज्ञाननिष्ठाक्रियायांसुदृष्टार्थायां व्याप्तस्य ज्ञानादिकारकस्यात्मकैवल्यफलादन्यफलेकर्मान्तरे वाप्रवृत्तिरनुपपन्नेतिनज्ञाननिष्ठाकर्मसहितोपपद्यते ज्ञाननिष्ठाभुजिक्रियाग्निहोत्रादिक्रियावत्स्यादिति चेत्न कैवल्यफलेज्ञानेक्रियाफलार्थित्वानुपपत्तेः कैवल्यफलेहि ज्ञानेप्राप्तेसर्वतःसंप्लुतोदके फलेकूपतडागादिक्रियाफलार्थित्वाभाववत्फलान्तरे तत्साधनभूतायांवा क्रियायामर्थित्वानुपपत्तेःनहि राज्यप्राप्तिफलेकर्मणिव्याप्तस्यक्षेत्रमात्रप्राप्तिफलेव्यापारोपपत्तिरस्तिविषयञ्चार्थित्वंतस्मान्नकर्मणोस्तिनिःश्रेयससाधनत्वंनचज्ञानकर्मणो समुच्चितयोर्नापिज्ञानस्यकैवल्यफलस्यकर्मसाहाय्यापेक्षाअविद्यानिवर्तत्वेनच विरोधात् नहि तमस्तमसोनिवर्त्तकमतःकेवलमेवज्ञाननिःश्रेयससाधनमितिननित्याकरणे प्रत्यवाप्राप्तेःकैवल्यस्यच नित्यत्वात्यथावत्केवलज्ञानात् कैवल्यप्राप्तिरित्येतत्तदसत्यतोनित्यानांकर्मणांश्रुत्युक्तानामकरणे प्रत्यवायोनरकादिप्राप्तिलक्षणः स्यात् नन्वेवंतर्हि कर्मभ्योमोक्षोनास्ति इत्यनिर्मोक्षप्रसङ्गएव नैषदोषोनित्यत्वान्मोक्षस्य

आनन्दगिरिकृतटीका

इति ननुनेदमुत्पन्नंज्ञानंनिवर्त्तयत्यविरोधेनोत्पन्नत्वान्नचानुत्पन्नमलब्धात्मकस्यार्थक्रियाकारित्वाभावात्तत्राह उत्पद्यमानमिति कथंतस्यकारणाविद्यानिर्त्तवकत्वमित्याशंक्यकार्याविद्यानिवर्त्तकत्वदृष्टेरित्याह कर्मेति आत्मज्ञानस्येत्यादिसंग्रहवाक्ये तुशब्दयोग्यविशेषाभावादानर्थक्यमाशंक्याह तुशब्दइति पक्षद्वयव्यावर्त्तकत्वमेवास्यस्फुटयति नेत्यादिना इतश्चकर्मासाध्यतासुक्तेरित्याह अकार्यत्वाच्चेति एषनित्योमहिमेतिश्रुतेः नित्यत्वेनमोक्षस्याकार्यत्वान्नतत्र हेत्वपेक्षेत्युपपादयति नहीति ज्ञानेनापि मोक्षोनक्रियते चेत्तर्हि केवलमपिज्ञानंमुत्यनुपयुक्तमिति कुतस्तस्यतत्रहेतुत्वधीरित्याशंकतें केवलेति ज्ञानानर्थक्यंदूषयति नेति तदेवप्रपञ्चयति अविद्येति यदुक्तमविद्यानिवर्त्तकज्ञानस्यकैवल्यफलावसायित्वंदृष्टमितितत्रदृष्टान्तमाह रज्वादीति उक्तेविषयेतमोनिवर्त्तकप्रकाशस्य कस्मिन्फलेपर्यवसानंतत्राह विनिवृत्तेति प्रदीपप्रकाशस्यसर्पभ्रमनिवृत्तिद्वारारज्जुमात्रेपर्यवसानवदात्मज्ञानस्यापि तदविद्यानिवृत्तप्रात्मकैवल्यावसानमिति दार्ष्टान्तिकमाह तथेतिज्ञानादीनांज्ञाननिष्ठाहेतूनां कर्मान्तरेप्रवृत्तिसम्भवात्कर्म्मसहितैवसाकैवल्यावसायिनीतिचेत्तत्राह दृष्टार्थायामिति कर्मसाहित्यंज्ञाननिष्ठायादृष्टान्तेनसाधयन्नाशंकते भुजीति भुजिक्रियायालौ

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

नित्यानांकर्मणामनुष्ठानात्प्रत्यवायस्याप्राप्तिःप्रतिषिद्धस्यचाकरणादनिष्टशरीरानुपपत्तिःकाम्यानाञ्चप्रवर्जनादिष्टशरीरानुपपत्तिःवर्त्तमानशरीरारम्भकस्यचकर्मणःफलोपभोगक्षयेपतितेऽस्मिन्शरीरेदेहान्तरोत्पत्तौच कारणाभावादात्मनःरागादीनांचाकरणात्स्वरूपावस्थानमेवकैवल्यमित्ययत्नसिद्धंकैवल्यमिति अतिक्रान्तानेकजन्मान्तरकृतस्यस्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगोपपत्तेः क्षयाभावदृतिचेन्ननित्यकर्मानुष्ठानायासदुःखोपभोगस्यतत्फलोपभोगत्वोपपत्तेः प्रायश्चित्तवदपूर्वोपात्तदुरितक्षयार्थत्वं नित्यकर्मणांआरब्धानाञ्चउपभोगेनैव कर्मणांक्षीणत्वादपूर्वाणाञ्चकर्म्मणामनारम्भेऽयत्नसिद्धंकैवल्यमितिन तमेवविदित्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयनायेति विद्यायाश्रुन्य :पन्थामोक्षायनविद्यतइति श्रुतेश्चर्मवदाकाशवेष्टनासम्भववदविदुषोमोक्षासम्भवश्रुतेःज्ञानात्कैवल्यमाप्नोति इतिच पुराणस्मृतेरनारब्धफलानांपुण्यानांकर्मणांक्षयानुपपत्तेश्च यथा पूर्वोपात्तानांदुरितानामनारब्धफलानांसम्भवस्तथापुण्यानामप्यनारब्धफलानांसम्भवस्तथापुराणश्रुतेरनारब्धफलानांस्यात् सम्भवश्चैषांचदेहान्तरमकृत्वाक्षयानुपपत्तौमोक्षानुपपत्तिःधर्माध

आनन्दगिरिकृतटीका

किञ्चावैदिक्याश्चाग्निहोत्रादिक्रियायाः सहानुष्ठानवदग्निहोत्रादिक्रियायाज्ञाननिष्ठायाश्चसाहित्यमित्यर्थः भुजिफले तृष्णाख्येप्राप्तेपि स्वर्गादौतद्धेतौचाग्निहोत्रादावर्थित्वदृष्टेर्युक्तंतत्रसाहित्यं न तथा मुक्तिफलज्ञाननिष्ठालाभे स्वर्गादौतद्धेतौवाकर्मण्यर्थित्वन्तेनज्ञाननिष्ठाकर्मणोर्नसाहित्यमिति परिहरति नेत्यादिना संग्रहवाक्यंविवृणोति कैवल्येति ज्ञानेफलवति लब्धे फलान्तरेतद्धेतौच नार्थितेत्यत्रदृष्टान्तमाह सर्वतइति सर्व्वत्रसंप्लुतं व्याप्तमुदकमिति समुद्रोक्तिस्तत्फलं स्नानादितस्मिन् प्राप्तेतड़ागादिनिर्माणक्रियायांतदधीनेचस्नानादौ कस्यचिदर्थित्वंतथाप्रकृतेपीत्यर्थःनिरतिशयफलेज्ञानेलब्धे सातिशयफलेकर्मणिनार्थित्वमित्येतद्दृष्टान्तेनस्फुटयतिनहीति कर्मणःसातिशयफलत्वमुक्तमुपजीव्यफलितमाह तस्मान्नेति ज्ञानकर्मणोःसाहित्यसम्भवमपिपूर्वोक्तंनिगमयति नचेति नहिप्रकाशतमसोरिवमिथोविरुद्धयोस्तयोःसाक्षादेकस्मिन्फलेसाहित्यमित्यर्थः ननुज्ञानमेवमोक्षंसाधयदात्मसहायत्वेनकर्मापेक्षते करणस्योपकरणापेक्षत्वात्तत्राह नापीति ज्ञानमुत्पत्तौयज्ञाद्यपेक्षमपिनोत्पन्नं फले तदपेक्षंसोत्पत्तिनान्तरीयकत्वेनमुक्तेस्तन्नायतत्वादित्यर्थः यदुक्त

शाङ्करभाष्यं

र्महेतूनाञ्चरागद्वेषमोहानामत्युत्पन्नात्मज्ञानादुच्छेदानुपपत्तेःधर्माधर्मोच्छेदानुपपत्तिःनित्यानाञ्चकर्मणांपुण्यलोकफलश्रुतेर्वर्णाश्रमाश्चस्वकर्मनिष्ठाः पुण्यलोकाभवन्तीत्यादिस्मृतेश्चकर्मत्वयानुपपत्तिः येत्वाऽनित्यानिकर्माणिदुःखरूपत्वात्पूर्वकृतदुरितकर्मणांफलमेवनतुतेषांस्वरूपव्यतिरेकेणान्यत्फलमस्तिश्रुतत्वात् जीवनादिनिमित्तेचविधानादिति नाप्रवृत्तानाञ्चफलदानासम्भवात्दुःखफलविशेषानुपपत्तिःकर्मणांस्यात्यदुक्तंपूर्वजन्मकृतदुरितानांकर्मणांफलंनित्यकर्मानुष्ठानायासदुःखंभुज्यतइति तदसन्नहिमरणकालेफलदानायानंकुरीभूतस्यकर्मणःफलमन्यमारब्धेजन्मन्युपभुज्यतइत्युपपत्तिःअन्यथास्वर्गफलोपभोगायाग्निहोत्रादिकर्मारब्धेजन्मनिनरकफलोपभोगानुपपत्तिर्नस्यात्तस्यदुरितदुःखविशेषफलत्यागानुपपत्तेश्चअनेकेषुहिदुरितेषुसम्भवत्सुभिन्नदुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमात्रफलेषुकल्पप्रमानेषुद्वंद्वरोगादिबाधानिमित्तंदुःखं नहिशक्यतेकल्पयितुं नित्यकर्मानुष्ठानायासदुःखमेवपूर्वोपात्तदुरितफलंनशिरसापाषाणवहनादिदुःखमितिअप्रकृतञ्चेदमुच्यते नित्यकर्मानुष्ठानायासदुःखंपूर्वकृतदुरितकर्मफलमितिकथमप्रस्तुतफलस्यहिपूर्वकृतदुरितस्यचयोनोपपद्यतइतिप्रकृतं तत्राप्रस्तुतफलस्यकर्मणःफलं नित्यकर्मानु

आनन्दगिरिकृतटीका।

मिति कर्त्तव्यत्वेनज्ञानंकर्मापेक्षमिति तत्राह अविद्येति ज्ञानस्याज्ञाननिवर्त्तकत्वात्तत्रकर्मणोविरुद्धतयासहकारित्वायोगान्नफलेतदपेक्षेत्यर्थः कर्मणोपि ज्ञानवद्ज्ञाननिवर्त्तकत्वेकथंविरुद्धतेत्याशंक्याह नहीति केवलस्यसमुच्चितस्यवा कर्मणोमोक्षेसाक्षादनन्वयेफलितमाह अतइति केवलज्ञानंमुक्तिसाधनमित्युक्तंतन्निषेधयन्नशंकतेनेत्यादिना निषेध्यमनूद्यनञर्थमाह यत्तावदिति नित्याकरणेप्रत्यवायप्राप्तेरितिहेतुंप्रपञ्चयति यतइति ज्ञानवतोपिनित्यानुष्ठानस्यावश्यकत्वान्नकेवलज्ञानस्यकैवल्यहेतुतेत्यर्थः कैवल्यस्य च नित्यत्वादित्यस्यव्यावर्त्यंदर्शयति नन्विति यदिनित्यनैमित्तिककर्माणिश्रौतान्यकरणेप्रत्यवायकारीण्यवश्यानुष्ठेयान्येवं तर्हि तेभ्यःसमुच्चितेभ्योऽसमुच्चितेभ्यश्चमोक्षोनेत्युक्तत्वात् केवलज्ञानस्यवातद्धेतुत्वादनिवन्धनामुक्तिर्नसिध्येदित्यर्थःकैवल्यस्यचेत्यादिव्याकुर्वन्ननिर्मोक्षप्रसङ्गंप्रत्यादिशति नैषदोषइतिमुक्तेर्नित्यत्वेनायत्नसिद्धेर्नतदभावशङ्केत्युक्तंप्रपञ्चयति नित्यानामिति काम्यकर्मवशादिष्टशरीरापत्तिंशङ्कित्वोक्तंकाम्यानाञ्चेतिआरब्धकर्मवशात्तर्हिदेहान्तरंनेत्याह

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ष्ठानायासदुःखमाह भवान्नप्रसूतफलस्येत्यर्थसर्वमेवपूर्वकृतंदुरितंतत्प्रसूतफलमेवेति मन्यतेभवांस्ततोनित्यकर्मानुष्ठायासदुःखमेवफलमितिविशेषणमयुक्तं नित्यकर्मविध्यानर्थक्यप्रसङ्गश्चोपभोगेनैवप्रसूतफलस्यदुरितकर्मणःक्षयोपपत्तेःकिञ्च श्रुतस्य नित्यस्यदुःखञ्चेत्फलंनित्यकर्मानुष्ठानायासादेवतत्दृश्यतेव्ययामादिवत्तदन्यस्येतिकल्पनानुपपत्तिःजीवनादिनिमित्तेचविधानान्नित्यानांकर्मणांप्रायश्चित्तवत् पूर्वकृतदुरितफलत्वानुपपत्तिः यस्मिन् पापकर्म्मनिमित्तेयद्विहितंप्रायश्चित्तं नतु तस्यपापस्य तत्फलमथतस्यैवपापस्यनिमित्तस्यप्रायश्चित्तदुःखंफलंजीवनादिनिमित्तमपिनित्यकर्मानुष्ठानायासदुःखजीवनादिनिमित्तस्यैवतत्फलंप्रसज्येत नित्यप्रायश्चित्तयोर्नैमित्तिकत्वाविशेषात् किञ्चान्यन्नित्यस्यकाम्यस्यचाग्निहोत्रादेरनुष्ठानायासदुःखस्य तु

आनन्दगिरिकृतटीका

वर्त्तमानेति तर्हिदेहान्तरंशेषकर्मणास्यादित्याशंक्यकर्माशयस्यैकभविकत्वान्नेत्याह प्रतितेस्मिन्निति रागादिनाकर्मान्तरंततोदेहान्तरञ्चभविष्यतीत्याशंक्याह रागादीनाञ्चेति आत्मनःस्वरूपावस्थानमिति सम्बन्धः अतीतासंख्यजन्मभेदेष्वर्जितस्य कर्मणोनानाफलस्यानारब्धस्यभोगेनाक्षयात् ततोदेहान्तरारम्भादेकभविकत्वस्याप्रमाणिकत्वान्नमुक्तेरयत्नसिद्धतेति चोदयति अतिक्रान्तेति नोक्तकर्मनिमित्तंदेहान्तरंशङ्कितव्यमित्याह नेतिनित्यनैमित्तिककर्माणिश्रौतान्यवश्यमनुष्ठेयानितदनुष्ठानेच महानायासस्ततो दुःखोपभोगस्तस्योक्तानारब्धकर्मफलभोगत्वोपगमान्नततोदेहान्तरमित्याह नित्येति नित्यादिनादुरितनिवृत्तावप्यविरोधान्नमुक्ततनिवृत्तिस्ततोदेहान्तरमित्याशंक्यसुकृतस्यनित्यादेरन्यत्वेनारब्धत्वेचन्यायविरुद्धस्यतस्यासिद्धत्वात्ततोदेहान्तरायोगान्नित्यादेरनन्यत्वेचनतस्यफलान्तरमितिमत्वायथाप्रायश्चित्तमुपात्तदुरितनिबर्हणार्थं नफलान्तरापेक्षन्तथेदंसर्वमपिनित्यादिकर्मोपात्तपापनिराकरणार्थंतस्मिन्नेवपर्यवस्यन्नदेहान्तरारम्भकमितिपक्षान्तरमाह प्रायश्चित्तवदितितथापिप्रारब्धवशादेवदेहान्तरंशंकतें नानाजन्मारम्भकाणामपितेषांयावदधिकारन्यायेनसम्भवादित्याशंक्याह आरब्धानाञ्चेति पूर्वार्जितकर्मणामेवक्षीणत्वेपिकानिचिदपूर्वकर्माणिदेहान्तरमारभेरन्नित्याशंक्याह अपूर्वाणाञ्चेति विनाज्ञानं कर्मणैव मुक्तिरितिपक्षश्रुत्यवष्टम्भेननिराचष्टे नेत्यादिना विद्यतेयनायेतिश्रुतेरितिसम्बन्धः एवकारार्थंविवृण्वन्नेत्यादिभागंव्याकरोति अन्यइति यद्वाचर्मवदाकाशंवेष्टयिष्यन्ति

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ल्यत्वान्नित्यानुष्ठानायासदुःखमेवपूर्वकृतदुरितस्यफलंनतु काम्यानुष्ठानायासदुःखमि
तिविशेषोनास्तीति तदपिपूर्वकृतदुरितफलंप्रसज्येत तथाचसतिनित्यानांफलाश्रव
णात्तद्विधानान्यथानुपपत्तेश्चनित्यानुष्ठानायासदुःखंपूर्वकृतदुरितफलमित्यर्थापत्तिक
ल्पनाचानुपपन्नाएवंविधानान्यथानुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमा
नाच्चनित्यानांविरोधाच्चविरुद्धच्छेदमुच्यतेनित्यकर्मणानुष्ठीयमानेनास्यान्यस्यकर्मणफ
लंभुज्यतइत्यभ्युपगम्यमानेसकलोपभोगोनित्यस्यकर्मणःफलमितिनित्यस्यकर्मणःफला
भावइति विरुद्धमुच्यतेकिञ्चकाम्याग्निहोत्रादावनुष्ठीयमानेनित्यमप्यग्निहोत्रादित
न्त्रेणैवानुमितम्भवतीति तदायासदुःखेनैवकाम्याग्निहोत्रादिफलमुपक्षीणंस्यात्तन्त्र

आनन्दगिरिकृतटीका

मानवाःतदाहेवमविज्ञायदुःखस्यान्तोभविष्यतीति श्रुतिमर्थतोनुवदति चर्मवदिति
श्रौतार्थस्मृतिंसम्भावयति ज्ञानादिति किञ्चत्वदीयन्यायस्यानुग्राह्यमानहीनत्वेना
भासतया पुण्यकर्मणामनारब्धफलानांक्षयाभावेदेहान्तरारम्भसम्भवान्नज्ञानंविना
मुक्तिरित्याह अनारब्धेतितथाविधानांकर्मणांनास्तिसम्भावनेत्याशंक्याह यथेतिअना
रब्धफलपुण्यकर्माभावेपि कथंमोक्षानुपपत्तिरिति तत्राह तेषाञ्चेति इतश्चकर्मच
यानुपपत्त्यमोक्षानुपपत्तिरिति तत्राह धर्मेति कर्मणापितृलोकइतिश्रुतिमाश्रित्य
कर्माक्षयेहेत्वन्तरमाह नित्यानामितिस्मृत्यापियथोक्तार्थंसमर्थयते वर्णइतिप्रेत्यकर्म
फलमनुभूयततःशेषेणविशिष्टजात्यादिभाजोजन्मप्रतिपद्यतइत्येतदादिपदार्थः यत्तु
नित्यानुष्ठानायासदुःखभोगस्य तत्फलभोगत्वमिति तदिदानीमनुवदति येत्विति
नित्याननुष्ठीयमानान्यायासपर्यन्तानीतिशेषः तथापिनित्यानांकाम्यानामिवस्वरूपा
तिरिक्तंफलमाशंक्यविध्युद्देशेतदश्रवणान्नैवमित्याह नत्विति विध्युद्देशेफलाश्रुतौत
त्कामनायानिमित्तस्याभावान्ननित्यानिविधीयेरन्नित्याशंक्याह जीवनेति ननित्यानां
विध्यसिद्धिरितिशेषः अनुभाषितंदूषयति नेत्यादिना तदेवविवृण्वन्निषेध्यमनूद्यनञ
र्थमाह यदुक्तमिति अप्रवृत्तानामित्यादिहेतुं प्रपञ्चयति नहीति कर्मान्तरारब्धेपि
देहेदुरितफलंनित्यानुष्ठानायासदुःखंभुज्यताङ्गानुपपत्तिरित्याशंक्याह अन्यथेतिय
दुक्तंदुःखफलविशेषानुपपत्तिश्चस्यादिति तदुपपादयति तस्येति सम्भावितानितावद
न्तातिसञ्चितातिदुरितानिचनानादुःखफलानियदितानिनित्यानुष्ठानायासरूपं
दुःखंतन्मात्रफलानिकल्पेरन्तदातेष्वेवंकल्प्यमानेषुसत्सुनित्यस्यानुष्ठितस्यायास

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

त्वादथकाम्याग्निहोत्रादिफलमन्यदेवस्वर्गादि तदनुष्ठानायासदुःखमपिभिन्नं प्रसज्येत नचेत्तदस्तिदृष्टविरोधात् नहिकाम्यानुष्ठानायासदुःखात्केवलनित्यानुष्ठानायासदुःखंभिद्यतेकिञ्चान्यदविहितमप्रतिषिद्धञ्चकर्म्मतत्कालफलंनतुशास्त्रचोदितं प्रतिषिद्धंवातत्कालफलंभवेद्यदिभवेत्तदासर्गादिष्वप्यदृष्टफलशासनेचोद्यमोनस्यात् अग्निहोत्रादीनामेवकर्म्मस्वरूपाविशेषेऽनुष्ठानायासदुःखमात्रेणोपक्षयः काम्यानाञ्चस्वर्गादिमहाफलत्वशंकेतिकर्त्तव्यताद्याधिक्येत्वसति तत्फलकामित्वमात्रेणेति नशक्यं कल्पयितुं तस्मान्ननित्यानांकर्म्मणामदृष्टफलाभावः कदाचिदप्युपपद्यते

आनन्दगिरिकृतटीका

मासाद्यतोयोदुरितकृतोदुःखविशेषोनतत्फलंदुरितफलानां दुःखानांवज्रत्वादतो नित्यंकर्मयथाविशेषंतंदुरितकृतदुःखविशेषफलकमित्ययुक्तमित्यर्थःकिञ्चनित्यानुष्ठानायासदुःखमात्रफलानिचेत्दुरितानिकल्प्यन्तेतदाहंद्वेष्टिरागादिवाधस्यरोगादिवाधायाश्चदुरितनिमित्तत्वानुपपत्तेः सुकृतफलत्वस्यचासम्भवादनुपपत्तिरेवोदीरितवाधायाःस्यादित्याह इन्द्रेति इतश्चनित्यानुष्ठानायासदुःखमेवदुरितफलमित्ययुक्तमित्याह नित्येति दुःखमितिनशक्यतेकल्पयितुमिति पूर्वेणसम्बन्धःयदितदेवतत्फलंनतर्हिशिरसापाषाणवहनादिदुःखंदुरितकृतंनचतत्कारणंसुकृतंदुःखात्तत्कार्यत्वादतस्तदाकस्मिकंस्यादित्यर्थः नित्यानुष्ठानायासदुःखमुपात्तदुरितफलमित्येतदप्रकृतत्वाच्चायुक्तंवक्तुमित्याह अप्रकृतञ्चेतितदेवप्रपञ्चयितुंष्टच्छति कथमितितत्रादौप्रकृतमाह अप्रस्तुतेति तथापिकथमस्माकमप्रकृतवादित्वंतत्राह तत्रेतिप्रस्तुतफलत्वमप्रस्तुतफलत्वमिति प्राचीनदुरितगतविशेषानुपगमादविशेषेणसर्व्वस्यैवतस्यप्रस्तुतफलत्वान्नित्यानुष्ठानायासदुःखफलत्वसम्भवान्नाप्रकृतवादितेतिशंकतें अथेति पूर्वोपात्तदुरितस्यापिशेषेणारब्धफलत्वेविशेषणानर्थक्यमितिपरिहरति ततश्चदुरितमात्रस्यारब्धफलत्वेनानारब्धफलस्यतस्योक्तफलविशेषवत्त्वानुपपत्तेरित्यर्थः पूर्वोपात्तदुरितमारब्धफलञ्चेद्भोगेनैवतत्क्षयसम्भवात्तन्निवृत्त्यर्थंनित्यंकर्मनविधातव्यमिति दोषान्तरमाह नित्येति इतश्चनित्यानुष्ठानायासदुःखंनोपात्तदुरितफलमित्याह किञ्चेतितदेवस्फोरयति श्रुतस्येति यथाव्यायामगमनादिकृतंदुःखंनान्यस्यदुरितस्येष्यतेतत्फलत्वसम्भवात्तथानित्यस्यापिश्रुत्युक्तस्यानुमितस्यायासपर्यन्तस्यत्वर्थान्तरानुपगमा

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

अतश्चाविद्यापूर्वकस्यकर्म्मणोविद्यैवशुभस्याशुभस्यवाक्षयकारणंअशेषतोन नित्य कर्मानुष्ठानमविद्याकामबीजंहिसर्व्वमेवकर्म्मतथाचोपपादितंअविद्वद्विषया सर्व्वकर्म संन्यासपूर्विकाज्ञाननिष्ठाउभौतौनविजानीतोवेदाविनाशिनंनित्यंज्ञानयोगेनसांख्या नांकर्म्मयोगेन योगिनामज्ञानांकर्म्मसङ्गिनांतत्त्ववित्तु गुणागुणेषु वर्त्तन्तइतिमत्वाना सज्जतेसर्व्वकर्माणिमनसा संन्यस्यास्तेनैवकिञ्चित्करोमीतियुक्तोमन्येततत्त्वविदर्था दज्ञःकरोमीत्यारुरुक्षोःकर्म्मकारणमारूढस्ययोगस्यशमएवकारणमुदारास्त्रयो व्यज्ञा ज्ञानीत्वात्मैवमेमतअज्ञाःकर्म्मिणोगतागतंकामकामालभन्तेअनन्याश्चिन्तय न्तोमांनित्ययुक्तायथोक्तमात्मानमाकाशकल्पमुपासते ददामिबुद्धियोगन्तंयेनमामु

आनन्दगिरिकृतटीका।

दनुष्ठानायासदुःखमेवचेत्फलंतर्हितस्मादेवतद्दर्शनात्तस्यनदुरितफलत्वंकल्प्यंनित्य फलत्वसम्भवादित्यर्थः दुःखफलत्वेनित्यानामननुष्ठानमेवश्रेयः स्यादित्याशंक्याह जीव नादिति नित्यानांदुरितफलत्वानुपपत्तौहेत्वन्तरमाह प्रायश्चित्तवदितिदृष्टान्तंप्रप ञ्चयतियस्मिन्निति तथाजीवनादिनिमित्तेविहितानांनित्यानांदुरितफलत्वासिद्धिरि तिशेषः सत्यंप्रायश्चित्तंननिमित्तस्यपापस्यफलंकिन्तुतदनुष्ठानायासदुःखंतस्यपापस्य फलमितिशङ्कते अथेति प्रायश्चित्तानुष्ठानायासदुःखस्यनिमित्तभूतपापफलत्वे जीव नादिनिमित्तनित्याद्यनुष्ठानायासदुःखमपि जीवनादेरेवफलं स्यान्नोपात्तदुरितस्ये ति परिहरति जीवनादीति प्रायश्चित्तदुःखस्यतन्निमित्तपापफलत्ववज्जीवनादिनिमि त्तमित्यादि कर्मकृतमपिदुःखंजीवनादिफलमित्यत्रहेतुमाह नित्येतिइतश्चनित्यानुष्ठा नायासदुःखमेवोपात्तदुरितफलमित्याशंक्यवक्तुमित्याह किञ्चेति काम्यानुष्ठानाया सदुःखमपिदुरितफलमित्यनुपगमात्प्रसङ्गस्येष्टत्वमाशंक्याह तथाचेति विहितानि तावन्नित्यानिनचतेषुफलंश्रुतंनचविनाफलंविहितानिदुरितनिवर्हणार्थानिनित्यनी त्यर्थापत्तातेषुचसायुक्ताकाम्यानुष्ठानादपिदुरितनिवृत्तिसम्भवादित्यर्थः किञ्चनित्या न्यनुष्ठानायासदुःखातिरिक्तफलानिविहितत्वात्काम्यवदित्यनुमानात्तेषां दुरितनिह त्यर्थतेत्याह एवमिति काम्यादिकर्म दृष्टान्तयितुमेवमित्युक्तं स्वोक्तिव्याघाताच्चनित्या नुष्ठानात्दुरितफलभोगोक्तिरयुक्तेत्याह विरोधाच्चेतितदेवप्रपञ्चयतिविरुद्धञ्चेति इदंशब्दार्थमेवविशदयति नित्येति अन्यस्यकर्मणोदुरितस्येतियावत् मएवेतियदन न्तरंयद्भवति तत्तस्यकार्यमिति नियम दित्यर्थः इतश्च नित्यानुष्ठानेदुरितफलभोगोन

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

पयान्तिते अर्थान्नकर्म्मिणोऽज्ञाउपयान्ति इतिभगवत्कर्म्मकारिणोयेयुक्ततमाअपि कर्मिणोऽज्ञास्तेउत्तरहीनफलत्यागावसानसाधनाअनिर्देश्याक्षरोपासकास्त्वद्वेष्टा सर्वभूतानामित्यध्यायपरिसमाप्त्युक्तसाधनाः क्षेत्राध्यायाद्यत्रयोक्तज्ञानसाधनाना ञ्चाधिष्ठानादिपञ्चहेतुकसर्वकर्मसंन्यासिनामात्मैकत्वाकर्त्तृत्वज्ञानवतांपरस्यां ज्ञा ननिष्ठायांवर्त्तमानानांभगवत्तत्वविदामनिष्टादिकर्मफलत्रयंपरमहंसपरिव्राजकाना मेवलब्धभगवत्स्वरूपात्मैकत्वशरणानांनभवति भवत्येवमन्येषामज्ञानांकर्मिणांसं न्यासिनामिष्टेषुगीताशास्त्रोक्तस्यकर्तव्याकर्त्तव्यार्थस्यविभागः अविद्यापूर्वकत्वंसर्वस्य कर्मणोसिद्धमिति चेन्नब्रह्महत्यादिलक्षणवत्यद्यपिशास्त्रागतंनित्यंकर्मतथाप्यविद्या वतएवभवति यथाप्रतिषेधशास्त्रावगतमपिब्रह्महत्यादिलक्षणंकर्मानर्थकारणं अवि

आनन्दगिरिकृतटीका।

सिध्यतीत्याह किञ्चेति काम्यानुष्ठानस्यनित्यानुष्ठानस्यचयौगपद्यान्नित्यानुष्ठानाया सदुःखेन दुरितफलभोगवत्काम्यफलस्यापिभुक्तत्वसम्भवादिति हेतुमाह तन्त्रत्वा दितिनित्यकाम्यानुष्ठानयोर्यौगपद्येपिनित्यानुष्ठानायासदुःखादन्यदेव काम्यानुष्ठान फलं श्रुतत्वादितिशंकते अथेति काम्यानुष्ठानफलं नित्यानुष्ठानायासदुःखाद्भिन्न ञ्चेत्तर्हिकाम्यानुष्ठानायासदुःखंनित्यानुष्ठानायासदुःखञ्चमिथोभिन्नंस्यादित्याह त दनुष्ठानेतिति प्रसङ्गस्येष्टत्वमाशंक्यनिराचष्टे नचेति दृष्टविरोधमेवस्पष्टयति नही ति आत्मज्ञानवदग्निहोत्रादीनांमोक्षेसाक्षादन्वयोनेत्यत्रान्यदपि कारणमस्तीत्याह किञ्चान्यदिति तदेवकारणंविवृणोति अविहितमिति यत्कर्म्ममर्दनभोजनादितत्र शास्त्रेविहितंनिषिद्धंवा तदनन्तरफलंतथानुभवादित्यर्थः शास्त्रीयंकर्मतु नानन्तर फलमानन्तर्यस्याचोदितत्वादतोज्ञानेदृष्टफलेनादृष्टफलकर्म्मसहकारिभवति नापि स्वयमेव दृष्टफलेमोक्षेकर्मप्रवृत्तिःक्षमेति विवक्षित्वाह नत्विति शास्त्रीयस्याग्निहो त्रादेरपिफलानन्तर्येस्वर्गादीनामनन्तरमनुपलब्धिर्विरुध्येत ततस्तेष्वपितथाविध फलापेक्षया प्रवृत्तिरग्निहोत्रादिषुनस्यादित्याह तदेति किञ्च नित्यानामग्निहो त्रादीनामनादृष्टफलंतेषामेवकाम्यानांतादृक्फलं नचहेतुंविनायंविभागोभागीत्या ह अग्निहोत्रादीनामिति फलकामित्वमात्रेणेतिनस्यादिति पूर्व्वेण सम्बन्धः या निनित्यान्यग्निहोत्रादीनियानिचकाम्यानि तेषामुभयेषामेवकर्मस्वरूपविशेषाभा वेपिनित्यानांतेषांअनुष्ठानायासदुःखमात्रेण क्षयोनफलान्तरमस्ति तेषामेवकाम्य

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम

द्याकामादिदोषतोभवति अन्यथाप्रवृत्त्यनुपपत्तेस्तथानित्यनैमित्तिककाम्याद्यपीति व्यतिरिक्तात्मन्यज्ञानेप्रवृत्तिर्नित्यादिकर्मस्वनुपपन्नेतिचेन्न चलनात्मकस्यकर्मणोऽनात्मकर्त्तृकस्याहङ्करोमीति प्रवृत्तिदर्शनात् देहादिसङ्घातेअसंप्रत्ययो गौणोनमिथ्याइतिचेत् नतत्कार्य्येष्वपिगौणत्वोपपत्तेरात्मीयेदेहादिसंघातेअहंप्रत्ययो गौणो यथात्मीयपुत्रेआत्मावैपुत्रनामासीति लोकेचापिममप्राणएवायङ्गौरितितद्वन्नैवंमिथ्याप्रत्ययोमिथ्याप्रत्ययस्तुस्थाणुपुरुषयोरगृह्यमाणविशेषयोर्नगौणप्रत्ययस्य मुख्यकार्य्योर्थत्वंअधिकरणस्तुत्यर्थत्वाल्लुप्तोपमाशब्देनयथासिंहोदेवदत्तोग्निर्माणवकइतिसिंहइवाग्निरिवक्रौर्य्यपैङ्गल्यादिसामान्यवत्त्वात्देवदत्तमाणवकाधिकरणकस्तुत्यर्थमेव नतुसिंहकार्य्यमग्निकार्यंवागौणशब्दप्रत्ययनिमित्तं किञ्चित्साध्यते मिथ्याप्रत्ययका

आनन्दगिरिकृतटीका

नामङ्गाद्याधिक्याभावेपिफलकामित्वमधिकारिण्यस्तीत्येतावन्मात्रेणस्वर्गादिमहाफलत्वमित्ययंविभागोनप्रमाणवानित्यर्थः उक्तविभागायोगेफलितमाह तस्मानेति

काम्यवन्नित्यानामपिपितृलोकाद्यदृष्टफलवत्त्वेदुरितनिवृत्त्यर्थत्वायोगादर्थेनात्मविद्यैवाभ्युपगन्तव्येत्याह अतश्चेति शुभाशुभात्मकंकर्म्मसर्वमविद्यापूर्वकञ्चेदशेषतस्तर्हितस्यक्षयकारणंविद्येत्युपपद्यते नतत्सर्वंकर्माविद्यापूर्वकमिति सिद्धमित्याशंक्याह अविद्येतितत्रहिशब्दद्योतितांयुक्तिंदर्शयतितथेतिइतश्चाविद्वद्विषयंकर्म्मेत्याह अविद्वदिति अधिकारिभेदेन निष्ठाद्वयमित्यत्रवाक्योपक्रममनुकूलयताआत्मनिकर्तृत्वंकर्म्मत्वम्बारोपयन्नजानात्यात्मानमितिवदता कर्माज्ञानमूलमितिदर्शितमित्याह उभाविति आत्मानं याथातथ्येनजानन्कर्तृत्वादिरहितोभवतीतिब्रुवता कर्मसंन्यासेज्ञानवतोधिकारित्वंसूचितमित्याहवेदेति निष्ठाद्वयमधिकारिभेदेनवोद्धव्यमित्यत्रैववाक्यान्तरमाह ज्ञानेति नबुद्धिभेदंजनयेदित्यत्रचाविद्यामूलत्वंकर्मणःसूचयता कर्मनिष्ठाविद्वद्विषयानुमोदितेत्याह अज्ञानामितियदुक्तं विद्वद्विषयासंन्यासपूर्व्विकाज्ञाननिष्ठेति तत्र तत्त्ववित्तुमहाबाहोगुणमर्म्मविभागयोरित्यादिवाक्यमुदाहरति तत्त्ववित्त्विति तत्रैववाक्यान्तरंपठति सर्व्वेति विदुषोज्ञाननिष्ठेत्यत्रैवपाञ्चमिकं वाक्यान्तरमाह नैवेति तत्रैवार्थसिद्धमर्थंकथयति अज्ञइति मन्यतइति सम्बन्धः अज्ञस्य चित्तशुद्ध्यर्थंकर्म्मशुद्धचित्तस्यकर्मसंन्यासोज्ञानप्राप्तौहेतुरित्यत्रवाक्यान्तरमाह आरुरुक्षोरिति यथोक्तेविभागेसप्तमिकंवाक्यमनुगुणमित्याह उदाराइति एवंत्रयोधर्म

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं।

र्यत्वंत्वनर्थमनुभवति गौणप्रत्ययस्य विषयञ्चजानाति नैवंसिंहोदेवदत्तः स्यान्नायमग्निर्माणवकइति तथागौणेनदेहादिसङ्घातेनात्मनाकृतं कर्मनमुख्येनाहंप्रत्ययविषयेनात्मनाकृतं स्यान्न हिगौणसिंहाग्निभ्यां कृतंकर्म्ममुख्यसिंहाग्निभ्यांकृतं स्यान्न च क्रौर्येणपैङ्गल्येनवामुख्यसिंहाग्न्योःकार्यंकिञ्चित्क्रियते स्तुत्यर्थनोपक्षीणत्वात्स्तूयमानौचजानीतोनाहंसिंहोनाहमग्निरिति नसिंहस्यकर्म्ममाग्नेयेति तथानसङ्घातजंकर्ममममुख्यस्यात्मनइति प्रत्ययोयुक्ततरःस्यान्नपुनरहंकर्त्तामममकर्मेतियच्चाऽऽत्मीयैःस्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्माकरोतीति नतेषांमिथ्याप्रत्ययपूर्व्वकत्वात् मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्व्वकाहिस्मृतीच्छाप्रयत्नादयोयथास्मिन् जन्मनिदेहादिसङ्घाताभिमानरागद्वेषादिकृतौधर्माधर्मौतत्फलानुभवश्च ततोऽतीतेऽतीतेतरेपिजन्मनीत्यनादिरविद्याकृतः संसारोतीतोनागत

आनन्दगिरिकृतटीका

मित्यादि नावमिकंवाक्यमविद्वद्विषयंकर्मेत्यत्रप्रमाणयति अत्राहुइति विदुषःसंन्यासपूर्व्विकाज्ञाननिष्ठेत्यत्रैवनावमिकंबाक्यान्तरमाह अनन्याइति मामित्येतद्व्याचष्टेयथोक्तमिति तेषांसततयुक्तानामित्यादिदाशमिकंवाक्यंतत्रैवप्रमाणयति ददामीतिविद्यावतामेवभगवत्प्राप्तिर्निर्देशादितरेषान्तदप्राप्तिः सूचितेत्यर्थसिद्धमर्थमाह अथार्तादिति ननुभगवत्कर्मकारिणां युक्ततमत्वात्कर्मिणोपिभगवन्तंयान्तीत्याशंक्याह भगवदिति येमत्कर्मकृदित्यादिन्यायेनभगवत्कर्मकारिणस्तेयद्यपियुक्ततमाःतथापिकर्मिणोऽज्ञाःसन्तोनभगवन्तंसहसागन्तुमर्हन्तीत्यर्थः तेषामज्ञत्वेगमकंदर्शयति उत्तरोत्तरेति चित्तसमाधानमारभ्य फलत्यागपर्यन्तंपाठक्रमेणोत्तरोत्तरंहीनसाधनोपादानाद्व्यासासमर्थस्य भगवत्कर्मकारित्वाभिधानाद्भगवत्कर्मकारिणामज्ञत्वंविज्ञातमित्यर्थः येत्वक्षरमनिर्देश्यमित्यादिवाक्यावष्टम्भेनविद्वद्विषयत्वं संन्यासपूर्व्वकज्ञाननिष्ठायानिर्द्धारयति अनिर्देश्येति उक्तसाधनास्ते संन्यासपूर्वकज्ञाननिष्ठायामधिक्रियेरन्निति शेषःकिञ्चत्रयोदशेयान्यमानित्वादीनिचतुर्दशेच प्रकाशञ्चप्रवृत्तिञ्चेत्यादीनिपञ्चदशेचयान्यसङ्गत्वादीनिउक्तानितैःसर्वैःसाधनैःसहितामवन्तंनिर्देश्याक्षरोपासकास्ततोपितेज्ञाननिष्ठायामेवाधिक्रियेरन्नित्याह क्षेत्रेति निष्ठाद्वयमविकारिभेदेनप्रतिष्ठापज्ञाननिष्ठानामनिष्टमिष्टंमिश्रितमिति त्रिविधंकर्मफलंनभवति किन्तुमुक्तिरेवकर्मनिष्ठानान्तुत्रिविधंकर्मफलंनमुक्तिरिति शास्त्रार्थविभाग

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

ज्ञानुमेयः ततश्चसर्वकर्मसंन्यासात् ज्ञाननिष्ठायांआत्यन्तिकःसंसारोपरमइति सिद्धं अविद्यात्मकत्वाच्चदेहाभिमानस्यतन्निष्टत्तौदेहाद्यनुपपत्तेःसंसारानुपपत्तिःदेहादिसङ्घाते आत्माभिमानोऽविद्यात्मकःनहिलोकेगवादिभ्योऽन्योहंमत्तश्चान्योगवाद यइति जानन्तेष्वहमितिप्रत्ययंमन्यतेकश्चिदजानंस्तुमन्यते स्थाणौपुरुषविज्ञानवत् अविवेकतोदेहादिसङ्घाते कुर्य्यादहमितिप्रत्ययंनहिविवेकतोजानन्यत्त्वात्मावैपुत्रनामासीतिपुत्रेहंप्रत्ययःनतुजन्यजनकसम्बन्धनिमित्तोगौणोगौणेनचात्मानाभोजनादिवत्परमार्थकार्य्यंनशक्यते कर्तुं गौणसिंहाग्निभ्यां मुख्यसिंहाग्निकार्यवत् अदृष्टविषयचोदनाप्रामाण्यादात्मकर्त्तव्यं गौणैर्देहेन्द्रियात्मभिःक्रियतइतिचेन्नअविद्याकृतात्मकत्वात् तेषांगौणात्मानोदेहेन्द्रियादयःकिंतर्हिमिथ्याप्रत्ययेनैवासङ्गस्या

आनन्द गिरिकृतटीका

मभिप्रेतमुपसंहरति अधिष्ठानादीति यदुक्तमविद्याकामबीजंसर्वंकर्मेतितन्नशास्त्रावगतस्यकर्मणोऽविद्यापूर्वकत्वानुपपत्तेरित्याक्षिपति अविद्येति दृष्टान्तेनसमाधत्तेनेति तत्राभिमतांप्रतिज्ञांविभजते यद्यपीति उक्तंदृष्टान्तंव्याचष्टे यथेति अविद्यादिमतोऽत्रज्ञइत्यादिकर्मैतत्रहेतुमाह अन्ययेति दार्ष्टान्तिकंगृह्णाति तथेति तान्यथविद्यादिमतोभवन्तीत्यविद्यादिपूर्वकत्वंतेषामेषितव्यमित्यर्थः पारलौकिकमसद्देहाद्यतिरिक्तात्मज्ञानंविना प्रवृत्तत्रयोगान्नतेषामविद्यापूर्वकतेतिशंकते व्यतिरिक्तइतिसत्यपिव्यतिरिक्तात्मज्ञानेपारमार्थिकात्मज्ञानाभावान्मिथ्याज्ञानादेवनित्यादिकर्मसुप्रवृत्तेरविद्यापूर्वकत्वंतेषामप्रतिहतमिति परिहरति नेत्यादिना कर्मणश्चलनात्मकत्वान्नात्मकर्तृत्वंतस्यनिःक्रियात्वात्देहादिसंघातस्यतुसक्रियत्वात्तत्कर्तृकंकर्मयुक्तंतथापिसंघातेहंममाभिमानद्वाराहंकरोमित्यात्मनोमिथ्याधीपूर्विकाकर्मणिप्रवृत्तिर्दृष्टा तेनाविद्यापूर्वकत्वंतस्ययुक्तमित्यर्थः यदुक्तंदेहादिसंघातेहंममाभिमानस्यमिथ्याज्ञानत्वंतदाक्षिपति देहादीति अहंधियोगौणत्वेतत्पूर्वककर्मस्वपिगौणत्वापत्तेरात्मनोऽनर्थाभावात्तन्निवृत्त्यर्थंहेत्वन्वेषणंनस्यादिति दूषयति नेति एतदेवप्रपञ्चयन्नादौचोद्यंप्रपञ्चयति आत्मीयेति तत्रश्रुत्यवष्टम्भेनदृष्टान्तमाह यथेति दर्शितश्रुतेरात्मीयेपुत्रेहंप्रत्ययोगौणस्तथासंघातेष्वात्मीयेहंप्रत्ययस्तथायुक्तइत्यर्थः भेदधीपूर्वकत्वंगौणधियोलोकेप्रसिद्धमित्याह लोकेचेति लोकवेदानुरोधेनात्मीयेसंघातेहंधीरपिगौणीस्यादितिदार्ष्टान्तिकमाह तद्वदिति मिथ्याधियोपि भेदधीपूर्वकत्वसम्भवादात्मीय

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं ।

त्मनःसङ्घात्मत्वमापाद्यन्तेतद्भावेभावात्तदभावेचभावादविवेकिनांह्यज्ञानकालेवाला नांदृश्यतेदीर्घोहङ्गौरोहमिति देहादिसङ्घातेहंप्रत्ययोभवति नतुविवेकिनांअन्यो हंदेहादिसङ्घातादिति ज्ञानवतांतत्कालेदेहादिसङ्घातेहंप्रत्ययोभवति तस्मात् मिथ्याप्रत्ययाभावेऽभावात् तत्कृतएवनगौणः पृथक्गृह्यमाणविशेषसामान्ययोर्हि सिंहदेवदत्तयोरग्निमाणवकयोर्वागौणःप्रत्ययःशब्दप्रयोगोवास्यान्नागृह्यमाणसा मान्यविशेषयोःयथाशुक्तिरजतयोर्यत्तूक्तं श्रुतिप्रमाण्यादिति नतत्प्रामाण्यदृष्टवि षयत्वात्प्रत्यक्षादिप्रमाणानुपलब्धेर्विषयेऽग्निहोत्रादिसाध्यसाधनसम्बन्धःश्रुतेः प्रमाण्यंनप्रत्यक्षादिविषयेऽदृष्टदर्शनार्थविषयत्वात्प्रामाण्यस्य तस्मान्नदृष्टामिथ्या ज्ञाननिमित्तस्याहंप्रत्ययस्यदेहादिसङ्घातेगौणत्वंकल्पयितुंशक्यं नहिश्रुतिशतमपि शीतोऽग्निरप्रकाशोवेति ब्रुवन्प्रामाण्यमुपैति यदिब्रुयात्शीतोऽग्निरप्रकाशोवेति त थाप्यर्थान्तरंश्रुतेर्विवक्षितंकल्पंप्रप्रामाण्यान्यथानुपपत्तेःनतुप्रमाणान्तरविरुद्धंवाकर्म

आनन्दगिरिकृतटीका

संघातेहंधियोमिथ्यात्वमेवकिंनस्यादित्याशंक्याह नैवमिति भेदधीपूर्वकत्वाभावेकथं मिथ्याधीरुदेतीत्याशंक्याह मिथ्येति अधिष्ठानारोप्ययोर्विवेकाग्रहात्तदुत्पत्तिरि त्यर्थःदेहादावहंधियोगौणतेतिचोद्यंविवृणोतिने त्यादि हेतुभागंविभजते यथेति सिंहोदेवदत्तइति वाक्यंदेवदत्तःसिंहइवेत्युपमया देवदत्तं क्रौर्याद्यधिकरणंस्तोतुं प्रवृत्तंअग्निर्माणवकइत्यपिवाक्यंमाणवकोग्निरिवेत्युप मयामाणवकस्यैवाग्न्यधिकरणस्यस्तुत्यर्थमेवमतथामनुष्योहमिति वाक्यस्यअधिक रणस्तुत्यर्थतामातीत्यर्थः देवदत्तमाणवकयोरधिकरणत्वंकथमित्याशंक्याह क्रौर्येति किञ्च गौणशब्दंतत्प्रत्ययञ्चनिमित्तंकृत्वासिंहकार्यं नकिञ्चिद्देवदत्तेसाध्यते ना पिमाणवके किञ्चिदग्निकार्यंमिथ्याधीकार्यंत्वनर्थमात्मानुभवत्यतोनदेहादावहंधी र्गौणीत्याह नत्विति इतोपिदेहादौनाहंधीःगौणीत्याह गौणेति योदेवदत्तोमाणव कोवागौण्याधियोविषयस्तंपरोनैषसिंहोनायमग्निरिति जानाति नैवमविद्वानात्म नःसंघातस्यचसत्यपिभेदसङ्घातस्यानात्मत्वंप्रत्येत्यतोनसङ्घातेहंशब्दप्रत्ययौगौणावि त्यर्थः सङ्घातेतयोर्गौणत्वेदोषान्तरंसमुच्चिनोति तथेति तथासत्यात्मनिकर्तृत्वादि प्रतिभासासिद्धिरितिशेषः गौणेकृतंनमुख्येनकृतमित्युदाहरणेनस्फुटयति नहीति यद्यपिदेवदत्तमाणवकाभ्यांकृतंकार्यंमुख्याभ्यांसिंहाग्निभ्यांनक्रियते तथापिदेवदत्त

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

णोमिथ्याप्रत्ययवत्कर्तृकत्वात्कर्तुरभावेश्रुतेरप्रामाण्यमितिचेत् नब्रह्मविद्याया मर्थवत्त्वोपपत्तेःकर्मविधिश्रुतिवत्ब्रह्मविधिश्रुतेरप्रामाण्यप्रसङ्गइति चेन्नबाधकप्रत्य यानुपपत्तेर्यथात्रब्रह्मविद्याविधिश्रुत्यात्मन्यवगतेदेहादिसङ्घातेऽहंप्रत्ययोबाध्यते तथा त्मन्येवात्मप्रवृत्तिर्नकदाचित्केनचित्कथञ्चिदपिबाधितुंशक्याफलाव्यतिरेकावगतेर्य थाग्निरुष्णःप्रकाशश्चेति नचकर्मविधिश्रुतेरप्रामाण्यंपूर्वपूर्वप्रवृत्तिनिरोधेनोत्तरा पूर्वापूर्वप्रवृत्तिजननस्यप्रत्यगात्माभिमुख्यप्रवृत्त्युत्पादनार्थत्वात् मिथ्यात्वेष्युपायस्यो पेयसत्यतयासत्यत्वमेवस्याद्यथानुवादानांविधिशेषाणांलोकेपिवालोन्मत्तादीनांपयआ दिपाययितव्ये चूडावर्द्धनाधिवचनंप्रकारान्तरस्यानाश्वासाच्चादेवप्रामाण्यसिद्धिःप्रा गात्मज्ञानात्देहाभिमानप्रत्यक्षादिप्रामाण्यवत् यत्तुमन्यतेस्वयमव्याप्रियमाणोप्यात्मा संनिधिमात्रेणकरोति तदेवचमुख्यंकर्तृत्वमात्मनो यथाराजा युध्यमानेषुयोधेषु यु ध्यतइतिप्रसिद्धं स्वयमयुध्यमानोऽपिसन्निधानादेवजितःपराजितश्चेति तथासेनाप तिर्वानैवकरोति क्रियाफलसम्बन्धश्चराजसेनापतेश्चदृष्टः यथाच ऋत्विक्कर्म यज

आनन्दगिरिकृतटीका

गतक्रौर्येणमुख्यसिंहस्यमाणवकनिष्ठपैङ्गल्येनमुख्याग्निरिवचसङ्घातगतेनापिजडत्वे नात्मनोमुख्यस्य किञ्चित्कार्यंकृतंभविष्यतीत्याशंक्याह नचेति देहादावहंधियोगौ णत्वायोगेहेत्वन्तरमाह स्तूयमानाविति देवदत्तमाणवकयोःसिंहाग्निभ्यांमेदधीपूर्व कंतद्व्यापारवत्त्वाभावधीवदात्मनोपि मुख्यस्यसङ्घाताद्भेदधीद्वारा तदीयव्यापारद्वा हित्यमात्मनिदृष्टंस्यादित्यर्थः व्यावर्त्तंप्रदर्शयति कपुनरितिसङ्घातेहंधियोमिथ्याधीत्व मपिनतत्कृतमात्मनि कर्तृत्वंकिञ्चात्मायज्ञानेच्छाप्रयत्नैरस्यकर्तृत्ववास्तवमिति मतमनुवदति यच्चेति ज्ञानादिकृतमपिकर्तृत्वंमिथ्याधीकृतमेवज्ञानंमिथ्याधीकार्य त्वादिति दूषयति नतेषामिति तदेवप्रपञ्चयति मिथ्येति मिथ्याज्ञानंनिमित्तंकृत्वा किञ्चिदिष्टंकिञ्चिदनिष्टमित्यारोप्य तद्वारानुभूतेतस्मिन्प्रेषाजिहासाभ्यांक्रियां निर्वर्त्यतयेष्टमनिष्टफलंभुक्त्वातेनसंस्कारेण तत् पूर्विकाःस्मृत्यादयःस्वात्मनिक्रि यांकुर्वन्तीति युक्तंकर्तृत्वस्यचमिथ्यात्वमित्यर्थः अतीतानागतजन्मनोरिववर्त्तमाने पिजन्मनि कर्तृत्वादिसंसारस्यवस्तुत्वमाशंक्याह यथेति विमतौकालावविद्याकृत संसारवन्तौकालत्वाद्वर्त्तमानकालवदित्यर्थः संसारस्याविद्याकृतत्वेफलितमाह तत श्चेति तस्याविद्यकत्वेनविद्योच्छेद्यत्वेहेत्वन्तरमाह अविद्येति कुतोस्याविद्याकृत

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यम्

मानस्यतथादेहादीनांकर्मआत्मकृतंस्यात् तत्फलस्यात्मगामित्वात् यथावाभ्रामकस्य लोकभ्रामयितृत्वादव्याप्तस्यैवमुख्यमेवकर्तृत्वं तथाचात्मनइतितदसदकुर्वतः कारकत्वप्रसङ्गात् कारकमनेकप्रकारमिति चेन्नराजप्रभृतीनांमुख्यस्यापिकर्तृत्वस्यदर्शनात् राजातावत्स्वव्यापारेणापियुध्यतेयोधानांयोधयितृत्वेनधनदानेनचमुख्यमेव कर्तृत्वंतथाजयपराजयफलोपभोगेनतथायजमानस्यापिधनत्यागेनदक्षिणादानेनच मुख्यमेवकर्तृत्वंतस्माद्व्याप्तस्यकर्तृत्वोपचारः यःसगौणइत्यवगम्यते यदिमुख्यमन्यत्कर्तृत्वंस्वव्यापारलक्षणंनोपलभ्यते राजयजमानप्रभृतीनांतदासन्निधिमात्रेणापि कर्तृत्वंमुख्यंपरिकल्पेत यथाभ्रामणेन नतथाराजयजमानादीनांस्वव्यापारोनोपलभ्यते तस्मात्सन्निधिमात्रेणापिकर्तृत्वं गौणमेवतथाचसतितत्फलसम्बन्धोऽपिगौणएवस्यान्नगौणेनमुख्यंकार्यंनिवर्त्तते तस्मादसदेवैतदीयते देहादीनांव्यापारेणाव्याप्तआत्माकर्त्ताभोक्ताच स्यादिति भ्रान्तिनिमित्तन्तुसर्वमुपपद्यते यथास्वप्ने मा

आनन्दगिरीकृतटीका

त्वंधर्माधर्मकृतत्वसम्भवादित्याशंक्याह देहादीति आत्मनोधर्मादिकर्तृत्वस्याविद्यकत्वान्नाविद्यांविनाकर्मिणांदेहाभिमानः सम्भवत्यतश्च आत्मनःसंघातेहमभिमानस्याविद्ययाऽद्यमानतेत्यर्थः आत्मनोदेहाद्यभिमानस्याविद्यकत्वमन्वयव्यतिरेकाभ्यांसाधयन्व्यतिरेकंदर्शयति नहीति अन्वयंदर्शयन्व्यतिरेकमनुवदति अजानन्निति पुत्रेपितुरहंधीरनात्मीयेदेहादावहंधीर्गौणीत्युक्तमनुवदति यत्त्विति तत्र दृष्टान्तश्रुतेर्गौणात्मविषयत्वमुक्तमङ्गीकरोति सत्त्विति तर्हि देहादावपितथैवस्वकीयेस्यादहंधीर्गौणीत्याशंक्याह गौणेनेति नहिस्वकीयेनपुत्रादिनागौणात्मनापि तुभोजनादिकार्यंक्रियते तथादेहादेरपिगौणात्मत्वेतेनकर्तृत्वादिकार्यमात्मनोनबास्तवंसिद्धमित्यर्थः गौणात्मनामुख्यात्मनोनास्तिबास्तवंकार्यमित्यत्र दृष्टान्तमाहगौणेति नहिगौणेनसिंहेनदेवदत्तेनमुख्यसिंहकार्यंक्रियतेनापिगौणाग्निनामाणवकेन मुख्याग्निकार्यंदाहपाकादि तथादेहादिनागौणात्मना मुख्यात्मनोनवास्तवंकार्यं कर्तृत्वादिकर्तुंशक्यमित्यर्थः स्वर्गकामादिवाग्रामाण्यात्आत्मनोदेहाद्यतिरेकज्ञानस्यचकेवलस्याकर्तृत्वात्तत्कर्त्तव्यंकर्मगौणैरेव देहादावात्मभिःसम्पाद्यते नहिसत्येवस्मौतातिरेकज्ञानेदेहादावात्मत्वमात्मनोमुख्ययुक्तमिति चोदयति अदृष्टेति नदेहादीनामात्मत्वंगौणंतदीयात्मत्वस्याविद्यत्वेनसिद्धत्वादतोनगौणात्मभिरात्मकर्त्तव्यंकर्मक्रियते किन्तुमिथ्यात्मभिरिति परिहरति नाविद्येतितदेवविवृण्वन्नर्थंस्फुटयति

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

यायाञ्चैवं नचदेहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषुसुषुप्तिसमाध्यादिषुकर्तृत्वभो क्तृत्वाद्यनर्थ उपलभ्यतेतस्मात्भ्रान्तिप्रत्ययनिमित्तएवायंसंसारभ्रमःनपरमार्थ इति सम्यग्दर्शनादत्यन्तमेवोपरमइतिसिद्धं सर्वंगीताशास्त्रार्थ मुपसंहृत्यास्मिन्नध्याये विशेषतश्चान्त इहशास्त्रार्थदार्ढ्यायसंक्षेपतउपसंहारं कृत्वाऽथेदानींशास्त्रसम्प्रदाय विधिमाह इदंशास्त्रंतेतवहितायमयोक्तंसंसारविच्छित्तये अतपस्कायतपोरहिताय नवाच्यमिति व्यवहितेनसंबध्यते तपस्विनेऽभक्तायगुरुदेवभक्तिरहितायकदाचन कस्याश्चिदप्यवस्थायांनवाच्यं भक्तस्तपस्व्यपिसत्वशुश्रूषुर्योभवति तस्माच्चापिनवाच्यं नचयोमांवासुदेवंप्राकृतं मनुष्यं मत्वाअभ्यसूयति आत्मप्रशंसादिदोषाध्यारोपणेन ममेश्वरत्वमजानन्नसहतेऽसावप्ययोग्यस्तस्माच्चापिनवाच्यं भगवत्यनसूयायुक्तायतप स्विनेभक्तायशुश्रूषवेशुश्रूषवेच वाच्यं शास्त्रमिति सामर्थ्यादुच्यते

आनन्दगिरिकृतटीका।

गौणाइति कथंतर्हि देहादिविषयात्मत्वप्रथेत्याशंक्याविद्याकृतेत्यादिहेतुं विभजते किंतर्हीति देहादीनामनात्मनामेवसतामात्मत्वं मिथ्याप्रत्ययकृतमित्यन्वयव्यतिरे कमुदाहरति तद्भावइति उक्तेन्यायेशास्त्रीयसंस्कारशून्यानामनुभवं प्रमाणयति अविवेकिनामिति व्यतिरेकेपिदर्शिते शास्त्राभिज्ञानामनुभवमनुकूलयति नत्विति अन्वयव्यतिरेकाभ्यामनुभवानुसारिभ्यांसिद्धमर्थमुपसंहरति तस्मादिति तत्कृतएव देहादावहंप्रत्ययइति शेषः किञ्चव्यवहारभूमौभेदग्रहस्यगौणत्वव्यापकत्वात्तस्य प्रकृतेऽभावान्नदेहादावहंशब्दप्रत्ययौगौणावित्याह इष्टेविषयचोदना प्रामाण्यत्कर्तुरात्मनोव्यतिरेकावधारणात्तस्यदेहादावहंममाभिमानस्यगौणतेत्युक्त मनुवदति यद्यपीति श्रुतिप्रामाण्यस्याज्ञातार्थविषयत्वात्मानान्तरसिद्धेव्यतिरिक्तात्म निचोदनाप्रामाण्याभावान्नतदवष्टम्भेनदेहादावात्माभिमानस्यगौणतेत्युत्तरमाह नत दिति श्रुतिप्रामाण्यस्याद्दष्टविषयत्वंस्पष्टयति प्रत्यक्षादीति अज्ञातार्थज्ञापकं प्रमा णमिति स्थितेनज्ञातेश्रुतिप्रामाण्यमित्याह अदृष्टेति अज्ञातसाध्यसाधनसम्बन्धवो धिनःशास्त्रस्यातिरिक्तात्मन्यौदासीन्येफलितमाह तस्मादिति अन्वयव्यतिरेकाभ्यां दृ ष्टोमिथ्याज्ञाननिमित्तोदेहादिसंघातोहंप्रत्ययस्येतियावत् अन्यविषयत्वाच्चोदना यानातिरिक्तात्मविषयतेत्युक्तमिदानीन्तद्विषयत्वाङ्गीकारेपि न तन्निर्वोढुं शक्यमध्य क्षविरोधादित्याह नहीतिअपौरुषेयाश्रुतेरसम्भावितदोषायाःमानान्तरविरोधेपि

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

तत्रमेधाविनेतपस्विनेवेत्यनयोर्व्विकल्पदर्शनात्शुश्रूषामभियुक्तायतपस्विनेभक्तायमेधाविनेवा वाच्यंशुश्रूषाभक्तिवियुक्तायनतपस्विनेनापिमेधाविनेवाच्यंभगवत्यसूयायुक्तायसमस्तगुणवतेपिनवाच्यं गुरुशुश्रूषाभक्तिमतेचवाच्यमित्येष शास्त्रसम्प्रदाय विधिः ६७

आनन्दगिरिकृतटीका

प्रामाण्यमप्रत्याख्येयमित्यभिप्रेत्याह यदीति स्वार्थंबोधयत्याः श्रुतेरविरोधापेक्षत्वाद्विरुद्धार्थवादित्वेतत्परिहारायविवक्षितमर्थान्तरमविरुद्धंतस्याःस्वीकर्त्तव्यं विरोधे तत्प्रामाण्यानुपपत्तेरित्याह तथापीति अविरोधमवधार्य्यश्रुत्यर्थकल्पना नयुक्तेति व्यावर्त्यमाह नत्विति अविद्यावत्कर्तृत्वंकर्म्मेति त्वयोपगमादुत्पन्नायां विद्यायामविद्याभावेतदधीनकर्तुरभावादन्तरेणकर्त्तारमनुष्ठानासिद्धौ कर्म्मकाण्डाप्रामण्यमित्यध्ययनविधिविरोधःस्यादितिशंकते कर्म्मणइति कर्म्मकाण्डश्रुतेर्विद्योदयात्पूर्वंव्यवहारिकप्रामाण्यस्यतात्त्विकप्रामाण्याभावेपि सम्भवाद्ब्रह्मकाण्डश्रुतेश्चतात्विकप्रामाण्यस्यब्रह्मविद्याजनकत्वेनोपपन्नत्वान्नाध्ययनविधिविरोधइति परिहरति नब्रह्मेति कर्म्मकाण्डश्रुतेस्तात्त्विकप्रामाण्याभावेब्रह्मकाण्डश्रुतेरपितदसिद्धिरविशेषादितिशंकते कर्मेति उत्पन्नायाब्रह्मविद्यायाबाधकाभावेनप्रमाणत्वात्तद्धेतुश्रुतेस्तात्त्विकं प्रामाण्यमिति दूषयति नबाधकेति ब्रह्मविद्यायाबाधकानुपपत्तिं दृष्टान्तेनसाधयति यथेति देहादिसङ्घातवदित्यपेरर्थः लौकिकावगतेरिवात्मावगतेरपिफलाव्यतिरेकमुदाहरणेनस्फोरयति यथेति फलमज्ञाननिवृत्तिःकर्मविधिश्रुतिवदित्युक्तं दृष्टान्तंविघटयति नचेति अनादिकालप्रवृत्तस्वाभाविकप्रवृत्तिव्यक्तीनांप्रतिबन्धेन योगाद्यलौकिकप्रवृत्तिव्यक्तीर्जनयति कर्मकाण्डश्रुतिस्तज्जननञ्चचित्तशुद्धिद्वारा प्रत्यगात्माभिमुख्यप्रवृत्तिमुत्पादयति तथाच कर्मविधिश्रुतीनांपारंपर्येणप्रत्यगात्मज्ञानार्थत्वात्तात्त्विप्रामाण्यसिद्धिरित्यर्थः नन्वेवमपिश्रुतेर्मिथ्यात्वादाभासवदप्रामाण्यमिति चेन्नेत्याह मिथ्यात्वेपीति स्वरूपेणासत्यत्वेपिसत्योपेयद्वाराप्रामाण्यमित्यत्रदृष्टान्तमाह यथेति मन्त्रार्थवादेतिहासपुराणानांश्रुतेर्थेप्रामाण्याभावेपिशेषविध्यनुरोधेनप्रामाण्यवत्प्रकृतेपिश्रुतेःस्वरूपेणासत्यायाविषयसत्यतयासत्यत्वङ्गतायाःप्रामाण्यमविरुद्धमित्यर्थःवाक्यस्यशेषविध्यनुरोधेनप्रामाण्यंनालौकिकमित्याह लोकेपीति कर्मकाण्डश्रुतीनामुक्तरीत्यापरम्परयाप्रामाण्यमपिसाक्षात्प्रामाण्यमुपेक्षितमित्याशंक्याहप्रका

आनन्दगिरिकृतटीका

रान्तरेति आत्मज्ञानोदयात्प्रागवस्थाप्रकारान्तरं तत्स्थितानांकर्मकाण्ड श्रुतीना मज्ञातसम्बन्धबोधकत्वेनसाक्षादेवप्रामाण्यमिष्टमित्यर्थः ज्ञानात् पूर्वंकर्मश्रुतीनां व्यावहारिकप्रामाण्येदृष्टान्तमाह प्रागिति प्रतीचिकर्तृत्वस्याविद्यकत्वेपि श्रुतिप्रा माण्यमप्रत्यूहमित्युक्तं संप्रतिकर्तृत्वस्यप्रकारान्तरेणपारमार्थिकत्वमुत्थापयति य त्विति स्वव्यापाराभावेसन्निधिमात्रेणकुतोमुख्यकर्तृत्वमित्याशंक्यदृष्टान्तमाह यथेति स्वयमयुध्यमानत्वेकथंतत्फलवत्वमित्याशंक्यप्रसिद्धिवशादित्याह जितइति कायिक व्यापाराभावेपिकर्तृत्वस्यमुख्यत्वेदृष्टान्तमाह सेनापतिरिति तस्यापिफलवत्त्वंराज वदविशिष्टमित्याह क्रियेति अन्यकर्मणाअन्यस्यसन्निहितस्यमुख्ये कर्तृत्वेवैदिकमुदा हरणमाह यथाचेति कथमृत्विजांकर्मयजमानस्येत्याशंक्याह तत्फलस्येति स्वव्यापा राद्दृतेसन्निधेरेवान्यव्यापारहेतोर्मुख्यकर्तृत्वेदृष्टान्तमाह यथावेति क्रियांकुर्वत्का रणंकारकमित्यंगीकारविरोधान्नैतदिति दूषयति तदसदिति कारकविशेषविषय त्वेनाङ्गीकारोपपत्तिरितिशंकते कारकमिति स्वव्यापारमन्तरेणनकिञ्चिदपिकार कमिति परिहरति नराजेति दर्शनमेवविशदयति राजेति यथाराज्ञोयुद्धेयोद्धयितृ त्वेन धनदानेनच मुख्यंकर्तृत्वंतथाफलभोगेपि मुख्यमेवतस्यकर्तृत्वमित्याह तथेति यदुक्तमृत्विककर्मयजमानस्येतितत्राह यजमानस्यापीति स्वव्यपारादेवमुख्यंकर्तृत्व मितिस्थितेफलितमाह तस्मादिति तदेवप्रपञ्चयति यदीति तर्हिसन्निधानादेव मुख्यंकर्तृत्वंराजादीनामुपगतमिति नेत्याह नयथेति राजादीनांस्वव्यापारकत्वेपू र्वोक्तंसिद्धमित्याह तस्मादिति राजप्रभृतीनांसन्निधेरेवकर्तृत्वस्यगौणत्वेजयादिफ लवत्वस्यापिसिद्धंगौणत्वमित्याह तथाचेति तत्पूर्वोक्तं हेतुत्वेनस्मारयति नेति अन्य व्यापारेणान्यस्यमुख्यकर्तृत्वाभावेफलितमुपसंहरति तस्मादिति कथंतर्हित्वयात्मनि कर्तृत्वादिस्वीकृतं नहिवुद्धेस्तदिष्टंकर्त्तृशास्त्रार्थवत्त्वादिति न्यायात्तत्राह भ्रान्तीति कर्तृत्वाद्यात्मनिभ्रान्तिमित्येतदुदाहरणेनस्फोरयति यथेति मिथ्याज्ञानकृतमात्मनि कर्तृत्वादीत्यत्रव्यतिरेकंदर्शयति नचेति उक्तव्यतिरेकेफलंकथयति तस्मादिति सं सारभ्रमस्याविद्याकृतत्वेसिद्धेपरमप्रकृतमुपसंहरति इति सम्यगिति शास्त्रतात्पर्या र्थं विचारद्वारानिर्द्धार्यानन्तरश्लोकमवतारयति सर्वमिति प्रकृते त्वष्टादशाध्याये गीताशास्त्रार्थं सर्वं प्रतिपत्तिसौकर्यार्थमुपसंहृत्यान्ते च सर्वधर्मान्परित्यज्येत्या दौविषयतस्यसंक्षेपेणोपसंहारंकृत्वासंप्रदायविधिवचनस्यावसरेसतीदानीमिति

CC-0. In Public Domain. Digitized by eGangotri

इदन्तेनातपस्कायनाभक्तायकदाचन नचाशुश्रूषवेवाच्यंनचमांयोभ्यसूयति ६७

आनन्दगिरिकृतटीका

योजना किमिति विस्तरेणोपसंहृतः शास्त्रार्थःसंक्षिप्योपसंह्रियतेतत्राह शास्त्रार्थेति संक्षेपविस्ताराभ्यामुक्तेर्थे सर्वेषांदृढतयाबुद्धिमधिरोहतीत्यर्थः हितायेत्यतदेवव्याचष्टेसंसारेति कदाचनेति सर्वैःसंबध्यते प्रतिषेधसामर्थ्यसिद्धमर्थं कथयति भगवतीति अर्थसिद्धेर्थे स्मृत्यन्तरमनुसृत्यमेधावित्वमन्तर्भावयति तत्रेति विकल्पदर्शनात्तेषु मेधावित्वमपि प्रविशतीत्यर्थः विकल्पपक्षेकथमधिकारिप्रतिपत्तिरितितत्राह शुश्रूषेति ताभ्यां युक्ताय भगवत्यसूयारहिताय तपस्विनेवाच्यमिति सम्बन्धः तदुक्तायशुश्रूषाभक्तियुक्ताय भगवति अनसूयासहितायेत्यर्थः तपस्वित्वं मेधावित्वं वानिरूपेक्षमधिकारिविशेषणमिति शंकांज्ञातयति शुश्रूषवेति भगवद्विषयासूयाराहित्यतात्पर्यं सूचयति भगवतीति कस्मैतर्हिवाच्यमेतदित्याशंक्य पूर्वोक्तसर्वगुणसम्पन्नायेत्याह गुरुशुश्रूषेति अनुक्तेतरविशेषणोपलक्षणार्थमुभयग्रहणं मेधाविनस्तपस्वित्वं नातीवापेक्षते सर्वमन्यदधिकारिभावादपेक्षितमेवेति भावः ६७

स्वामिकृतटीका।

एवंगीतार्थतत्त्वमुपदिश्य तत्सम्प्रदायप्रवर्त्तनेनियममाह इदमिति इदंगीतार्थतत्त्वं तेत्वया अतपस्काय धर्मानुष्ठानहीनाय नवाच्यं नचाभक्ताय गुरावीश्वरेच भक्तिशून्याय कदाचिदपिवाच्यं नचाशुश्रूषवे परिचर्यामकुर्वतेवाच्यं मांपरमेश्वरंयोऽभ्यसूयति मनुष्यदृष्ट्या दोषारोपेणनिन्दति तस्मैच नवाच्यं ६७ एतैर्दोषैरहिते

भाषाअनुवाद

इसप्रकारसे श्रीमगवतगीताका तत्त्वअर्थ उपदेशकर अब गीताको संप्रादाय रूप प्रवर्त्तन करने मे अर्थात् दूसरेको उपदेशदेनेमें नियमकहतेहैं किहेअर्जुन इसगीतार्थकेतत्व को तुम अतपस्क कहे स्वधर्मअनुष्ठानरहित मनुष्यसे न कहना औ नकभी अभक्तकहे ईश्वरगुरुतथाब्राह्मणकी भक्तिविहीनको कहना औ अशुश्रूषुअर्थात् ब्राह्मणगुरुतथाईश्वरकी शुश्रूषासेवा जो नहीं करता अथवागीताश्रवणकरनेकी जिसको अनिच्छाहोय ऐसे मनुष्यों कोभी कभी न कहि यो और जो परमेश्वर स्वरूप हमारे मे मनुष्य बुद्धि लायकर दोष आरोप करता ऊसा निन्दा करै उसको भी न कहना यह तुम से हम प्रत्युपकार चाहते हैं ६७

CC-0. In Public Domain. Digitized by eGangotri

यइमंपरमंगुह्यंमद्भक्तेष्वभिधास्यति भक्तिंमयिपरांकृत्वामामेवैष्यत्यसंशयः ६८

शाङ्करभाष्यं

सम्प्रदायस्यकर्तुःफलमिदानीमाह यइमंयथोक्तंपरमंनिःश्रेयसार्थंकेशवार्जुनयोःसम्बादरूपंग्रन्थंगुह्यंगुह्यानांगोप्यतमंमद्भक्तेषुमयि भक्तिमत्स्वभिधास्यति व्यक्ति ग्रन्थतोर्थतश्चख्यापयिष्यतीत्यर्थः यथात्वयि मया भक्तेःपुनर्ग्रहणात्तद्भक्तिमात्रेणकेवलेनशास्त्रसम्प्रदानेपात्रंभवतीतिगम्यते कथमभिधास्यतीत्युच्यते भक्तिंमयिपरांकृत्वा भगवतःपरमगुरोरच्युतस्यशुश्रूषा मयाक्रियतइत्येवंकृत्वेत्यर्थः तस्येदंफलं मामेवैष्यति मुच्यतएवात्र संशयो नकर्त्तव्यः ६८

आनन्दगिरिकृतटीका।

शास्त्रसम्प्रदायप्रवृत्त्यर्थमुत्तरश्लोकप्रवृत्तिंदर्शयति सम्प्रदायेति यइत्यध्यायकोनिर्दिश्यते परंमत्संग्रन्थस्यनिरतिशयपुरुषार्थसाधनत्वमित्याह परममिति गोप्यत्वमस्यरहस्यार्थविषयत्वाद्यथोक्तसम्बादस्यग्रन्थतोर्थतश्चभक्तेषुख्यापनेदृष्टान्तमाह यथेति मयिवासुदेवेभगवति अनन्यभक्तेत्वयि यथामयाग्रन्थोऽर्थतःख्यापितस्तथामद्भक्तेष्वन्येष्वपियोग्रन्थमिमंख्यापयिष्यति तस्येदंफलमित्युत्तरवस्सम्बन्धः नाभक्तायेति भक्तेरधिकारिविशेषणत्वोक्तेर्मद्भक्तेष्विति पुनर्भक्तिग्रहणमनर्थकमित्याशंक्याह भक्तेरिति शुश्रूषादिसहकारिराहित्यंकेवलशब्दार्थोयद्यपिमात्रशब्देनसूचितमेतत्तथापीतरेणस्फुटीकृतमिति विरोधः प्रश्नपूर्वकमभिधानप्रकारमभिनयति कथमित्यादिना भगवतिभक्तिकरणप्रकारंप्रकटयति भगवतइति यच्छब्दापेक्षितंपूरयति तस्येति मामेवैष्यत्येवेत्यन्वयंगृहीत्वाव्याचष्टे मुच्यतएवेति ६८ ननुसर्वेषांमुक्तिसाधनानांश्रवणस्यश्रेष्ठत्वात्तन्निष्ठस्यमुमुक्षोर्नास्तिविद्यासम्प्रदानेप्रवृत्तिरितितत्राह किञ्चेति

स्वामिकृतटीका

व्योगीताशास्त्रोपदेष्टुःफलमाह यइममिति मद्भक्तेष्वभिधास्यति मद्भक्तेभ्योवक्ष्यति समयि परांभक्तिंकरोति ततोनिःसंशयःसन् मामेव प्राप्नोतीत्यर्थः ६८

भाषाअनुवाद

पूर्व कहे हुये सब दोषों से वर्जित भक्तजनों को गीतार्थ के उपदेश करने वाले पुरुष का फल कहते हैं कि जो यह परम गुह्य गीतार्थ का उपदेश मेरे भक्तोंको करैगा सो मनुष्य मेरी पर कहे उत्तम भक्तिकारी होगा और तदनन्तरसो मनुष्य सर्व संशयसे रहित हो हमको प्राप्त होगा अर्जुन यह जानो ६८

CC-0. In Public Domain. Digitized by eGangotri

नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः भवितानचमेतस्मादन्यःप्रियतरोभुवि ६९
अध्येष्यतेचयइमंधर्म्यंसम्वादमावयोः ज्ञानयज्ञेनतेनाहमिष्टःस्यामितिमेमतिः७०

शाङ्करभाष्यं ।

किञ्च नच तस्माच्छास्त्रसम्प्रदायकृतोमनुष्येषुमनुष्याणांमध्येकश्चिन्मेमम प्रियकृत्तमोऽतिशयेनप्रियकृत्तमोऽन्यःप्रियकृत्तमोनास्त्येवेत्यर्थःवर्त्तमानेषुभवितानचभविष्यत्यपिकाले तस्मात्द्वितीयोऽन्यःप्रियकृत्तरोभुविलोकेऽस्मिन् भविता ६९

योऽपिअध्येष्यतेचपठिष्यतियइमंधर्म्यंधर्मादनपेतंसम्वादरूपंग्रन्थमावयोः तेनेदंकृतंस्यात् ज्ञानयज्ञेनविधिजपोपांशुमानसानांयज्ञानांज्ञानयज्ञोमानसयज्ञा

आनन्दगिरिकृतटीका

दूतश्चविद्यासम्प्रदानंमुमुक्षुणायथोक्तविशेषणवताकर्त्तव्यमित्यर्थः वर्तमानेषुमध्ये त्वत्तोऽन्योनास्त्येवप्रियकृत्तमोनाप्यतीतेषुतादृक्कश्चिदासीदितिशेषः तस्माद्विद्यास म्प्रदायकर्त्तुःसकाशादित्यर्थः ध्याननिष्ठस्यश्रेष्ठत्वेपिस्वसम्प्रदायप्रवक्तुःश्रेष्ठतमत्वा दुचितविद्यासम्प्रदानेप्रवृत्तिरितिभावः ६९ सम्प्रदायप्रवक्तुःसर्वाधिकंफलंस

स्वामिकृतटीका

किञ्च नचेति तस्मान्मद्भक्तेभ्योगीताशास्त्रव्याख्यातुः सकाशादन्योमनुष्येषु मध्येकश्चिदपिमम प्रियकृत्तमोऽत्यन्तंपरितोषकर्त्तानास्ति नचकालान्तरेभविष्यति ममापितस्मादन्यःप्रियतरोऽधुनाभुवितावन्नास्ति नचकालान्तरेऽपिभविष्यतीर्थः ६९

भाषाअनुवाद

तिससे हेअर्जुन उपदेशकरने औ संप्रदायचलानेवाले मनुष्यों के मध्यमे मेरा भक्त गीताका उपदेशकारी जो है उसके समान और कोईभी नहीं मेरा अत्यन्त परितोष करनेवाला है औ न होगा और पृथिवीमे उससे अधिक प्रिय हमारे और कोई नहीं है न होगा ६९

अब गीता पाठ करने का फल कहते हैं कि जो मनुष्य हमरा औ तुमारा यह धर्मयुक्त संवाद नियम से पाठ करैगा सो पुरुष समस्तयज्ञोंमे श्रेष्ठ ज्ञानयज्ञ से हमारा पूजन किया यह मेरी निश्चित बुद्धि है भावार्थ यह कि जो अर्थ न जानिके भी जप के समान गीता पढ़ै तो उसके श्रोता हम उसपर प्रसन्न होते हैं ज्ञान अज्ञान किसी तरह हमको स्मरण करे हम उसके निकट जायंगे जैसे अजामिल औ व्याध आदिकों के निकट हम गये हैं ७०

CC-0. In Public Domain. Digitized by eGangotri

शाङ्करभाष्यं

विशिष्टतमदूत्यतस्तेनज्ञानयज्ञेनगीताशास्त्राध्ययनंस्तूयते फलविधिरेववा देवतादिविषयज्ञानयज्ञफलतुल्यमस्यफलंभवतीति तेनाध्ययनेनाहमिष्टःपूजितःस्याम्भवेयमिति मे मम मतिर्निश्चयः ७० अथश्रोतुरिदंफलं श्रद्धावान्अहंधानोनसूयश्चासूयावर्जितः सन्इमं ग्रन्थं शृणुयादपि योनरोपिशब्दात् किमर्थंज्ञानवान् सोपि पापान्मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्मिणामग्निहोत्रादिकर्मवतां ७१

आनन्दगिरिकृतटीका।

वक्तासम्प्रदायप्रवक्तृःसर्वाधिकंफलं सवक्तृविष्णुरित्युक्तोनसविस्तरंविदैवतमिति न्यायेनोक्तांसंप्रत्यध्येतुर्विवक्षितंफलमाह योमीति ययोक्तस्यशास्त्रस्ययोध्येष्यतेतेनेदंकृतंस्यादिति सम्बन्धः तदेवाह अध्येष्यतइति तेनेदंकृतमित्यत्रेदंशब्दार्थंविशदयति ज्ञानेति तेनाहमिष्टःस्यामिति सम्बन्धः चतुर्विधानां यज्ञानांमध्ये ज्ञानयज्ञस्यश्रेयान्द्रव्यमयात्यज्ञात्ज्ञानयज्ञइतिविशिष्टत्वाभिधानात्तेनाहमिष्टःस्यामित्यध्ययनस्यस्तुतिरभिमतेत्याह विधीति पक्षान्तरमाह फलेति फलविधिमेवंप्रकटयति देवतादीति यद्विज्ञानयज्ञस्यफलं कैवल्यत्वेनतुल्यमस्याध्येतुःसम्पद्यते तद्विदैवताद्यात्मत्वमित्यर्थः कथमध्ययनादेव सर्वात्मकंफलंलभ्यते तस्मात्तंसर्वमभवदितिश्रुतिस्तलाह तेनेति तेनाध्येतृज्ञानयज्ञतुल्येनाध्ययनेनभगवानिष्टस्तथाच तत् ज्ञानादुक्तंफलमविरुद्धमित्यर्थः ७० प्रवक्तुरध्येतुश्चफलमुक्त्वाश्रोतुरिदानींफलं कथयति अथेति आचार्येणशिष्याय यावदज्ञानसंशयविपर्य्यासं तावदनेकधो

स्वामिकृतटीका।

पठतःफलमाह अध्येष्यतइति आवयोः श्रीकृष्णार्जुनयोरिमंधर्म्यं धर्मादनपेतंसंवादंयोऽध्येष्यतेजपरूपेणपठिष्यति तेनपुंसासर्वयज्ञेभ्यःश्रेष्ठेनज्ञानयज्ञेनाहमिष्टःस्यांभवेयमिति मेमतिःयद्यप्यसौगीतार्थमबुध्यमानएव केवलंजपति तथापि ममतच्छृणतोमामेवासौप्रकाशयतीतिबुद्धिर्भवति यथालोकेयदृच्छयापियदाकश्चित् कस्यचिन्नाम गृह्णाति तदासौ मामाह्वयतीतिमत्वा तत्पार्श्वमागच्छति तथाहमपि सत्यसन्निहितोभवेयं अतोयथा अजामिलश्चबन्धुप्रमुखाणां कथञ्चिन्नामोच्चारणमात्रेणप्रसन्नोऽस्मि तथैवतस्यापिप्रसन्नोभवेयमितिभावः ७०

अन्यस्यजपतोयोऽन्यः कश्चिच्छृणोति तस्यापिफलमाह श्रद्धावानिति योनरःश्रद्धायुक्तःकेवलं शृणुयादपिश्रद्धावानपियःकश्चित् किमर्थमयमुच्चैर्जपति अवज्ञंवा ज

CC-0. In Public Domain. Digitized by eGangotri

श्रद्धावाननसूयश्च शृणुयादपियोनरः सोपिमुक्तःशुभान्लोकान् प्राप्नुयात्पुण्य कर्मणां ७१

शाङ्करभाष्य

शिष्यस्यशास्त्रार्थग्रहणविवेकबुभुत्सयापृच्छति तदग्रहणेज्ञाते पुनर्ग्राहयिष्या म्युपायन्तरेणापिइतिप्रष्टुरभिप्रायोयत्नान्तरमास्थायशिष्यःकृतार्थःकर्त्तव्यइत्याचा र्यधर्मःप्रदर्शितोभवति कच्चित्किमेतत्मयोक्तंश्रुतंश्रवणेनावधारितंपार्थकिंत्वया एकाग्रेणचेतसाएकचित्तेन किम्वाप्रमादितंकच्चिदज्ञानसम्मोहोऽज्ञाननिमित्तः स म्मोहोवैचित्यभावोऽविवेकतास्वाभाविकःकिंप्रनष्टोयदर्थोयंशास्त्रश्रवणायासस्तवमम चोपदेष्टृत्वायासःप्रवृत्तिस्तेतुभ्यंधनञ्जय ७२ अर्जुनवाच नष्टमोहोऽज्ञानजंतमः

आनन्दगिरिकृतटीका

पदेष्टव्यमिति दर्शयितुंभगवानर्जुनंप्रति पृष्टवानित्याह शिष्यस्येति प्रष्टुरभिप्रायंप्रक टयति तदग्रहणइति शिष्यश्चेदुक्तं गृहीतुंनेष्टेतर्हितंप्रत्यौदासीन्यमाचार्यस्योचितं तस्यमन्दबुद्धित्वादित्याशंक्याह यत्नान्तरमिति कच्चिदिति कोमलप्रश्ने तमेवव्याचष्टे किमेतदिति द्वितीयंकिंपदंपूर्वस्य व्याख्यानतया सम्बध्यते कच्चिदिति द्वितीयंप्रश्नंवि भजते किंप्रश्न इतिमोहप्रणाशस्य प्रसङ्गं दर्शयति यदर्थइति ७२

स्वामिकृतटीका

पतीति दोषदृष्टिंकरोति तद्व्यावृत्त्यर्थमाह अनसूयश्चासूयारहितोयःशृणुयात् सो पिसर्वैःपापैर्मुक्तःसन्नश्वमेधादिपुण्यकृतांलोकान् प्राप्नुयात् ७१

सम्यग्बोधानुपपत्तौ पुनरुपदेक्ष्यामीत्याशयेनाह कच्चिदिति कच्चिदितिप्रश्नार्थेअ ज्ञानसम्मोहस्तत्त्वाज्ञानकृतोविपर्ययःस्पष्टमन्यत् ७२ कृतार्थःसन्नर्जुनउवाच नष्टो

भषा अनुवाद ।

अब गीता श्रवण करने का फल कहतेहैं कि जो कोई मनुष्य श्रद्धाकहेविश्वा स युक्तहो केवल गीता पाठ श्रवण करै औ अनसूय कहें यह मनुष्य क्यों चि ल्लाय के पढता है अथवा अशुद्ध निकले तो इसे टोकैंऐसे दोष न देखैं ऐसे मनु ष्य तावत सकल पाप से मुक्त हो अश्वमेध यज्ञ आदि कर्म करनेवाले जो लोक पावते हैं येभी उसी लोकको प्राप्त होंगे और जो अर्थयुक्त अति प्रीति पूर्वक श्र वण करैं तो वे जीवनन्मुक्त हैं औ अन्तको साक्षात् ब्रह्मस्वरूप होयंगे इस मे कुछ सन्देह नहीं है ७१

CC-0. In Public Domain. Digitized by eGangotri

कच्चिदेतच्छ्रुतं पार्थत्वयैकाग्रेणचेतसा कच्चिदज्ञानसम्मोहःप्रनष्टस्ते धनञ्जय ७२ अर्जुनउवाच नष्टोमोहःस्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत स्थितोऽस्मिगतसन्देहः करिष्येवचनंतव ७३

शाङ्करभाष्यं

समस्तसंसारानर्थहेतुःसागरइवदुस्तरःस्मृतिश्चात्मत्त्वविषयालब्धायस्यालाभात् सर्व्वग्रन्थीनांविप्रमोक्षःत्वत्प्रसादात्तवप्रसादान्मयात्वत्प्रसादमाश्रितेनाच्युतअनेनमोहनाशप्रश्नप्रतिवचनेनसर्व्वशास्त्रार्थज्ञानफलमेतावदेवेति निश्चितंदर्शितंभवतीति यदुक्ताज्ञानसम्मोहनाश आत्मस्मृतिःलाभश्चेति तथाचश्रुतावनात्मवित्शोचामीति उपन्यस्यात्मज्ञानेसर्व्वग्रन्थिविप्रमोक्षोभिद्यतेहृदयग्रन्थिस्तत्कोमोहःकःशोकएकत्वमनुपश्यतइतिच मन्त्रवर्णःअथेदानींत्वच्छासनेस्थितोस्मिगतसन्देहोमुक्तसंशयःकरिष्येवचनन्तवाहं त्वत्प्रसादात् कृतार्थो नमें कर्त्तव्यमस्तीत्यभिप्रायः ७३

आनन्दगिरिकृतटीका

प्रेमोपदिष्टात्मज्ञानस्यअज्ञानसन्देहविपर्य्यासरहितस्येष्टस्य भगवदनुग्रहप्राप्तिकथनेन भगवन्तंपरितोषयिष्यन्नर्जुनोविज्ञापितवानित्याह अर्जुनइति अज्ञानोत्थस्याविवेकस्यनष्टत्वमेवस्पष्टयति समस्तइति स्वयंज्योतिषिप्रतीचिब्रह्मण्यविद्याध्वंसंविघातयति नाविदितंप्रकाशयतीतिमत्वाह स्मृतिश्चेति स्मृतिलाभेकिंस्यादितिचे

भाषाअनुवाद

जो सम्यकप्रकार बोध नभयाहो तो हम फेरभी तुमको उपदेश करैंगे इस आशयसे भगवानपूछतेहैं किहे पार्थ अर्जुन कहोतो मैंने जोकहा सोसब एकाग्र चित्त हो तुमने सुना औ हेधनञ्जय संमोहकहे तत्वज्ञान के बिषयमे अज्ञानजनित तुम्हारी विपरीत बुद्धि नष्ट भई कि नहीं अर्थात् मेरेवचनो से अज्ञान दूर भया कि नहीं यही भगवान ने पूछा ७२ तबतो भगवत की वाणीसे परम कृतार्थ हो अर्जुन कहते हैं कि हे अच्युत श्रीकृष्ण आपकी कृपासे अब मेरा आत्मज्ञान के विषय मे मोह नष्टहोगया औ स्मृति जो ज्ञान सो पाया औ आत्मस्वरूप के अनुसन्धान मे चित्तकीस्थिति भई अर्थात् आत्मस्वरूपका ज्ञान प्रकाश भया औ धर्म के बिषय मे संदेह मेरे चित्तसे चली गई ऐसा जो मैंहूं सो अब आपकी आज्ञा प्रतिपालन करूंगा और युद्धकरने के लिये तयारखड़ा हूंजो आज्ञा होय सो करूं यह अर्जुनने सावधानहो श्रीभगवानसे कहा ७३

CC-0. In Public Domain. Digitized by eGangotri

सञ्जयउवाच इत्यहंवासुदेवस्यपार्थस्यचमहात्मनः संवादमिममश्रौषमद्भुतं लोमहर्षणम् ७४

शाङ्करभाष्यं।

परिसमाप्तःसकलोवेदायशास्त्रार्थोऽथेदानींकथासम्बन्धप्रदर्शनार्थं सञ्जयउवाच इत्येवमहंवासुदेवस्यपार्थस्यचमहात्मनः संवादमिमंयथोक्तमश्रौषंश्रुतवानस्मि अद्भुतमत्यन्तविस्मयकरंरोमहर्षणंरोमाञ्चकरं ७४

आनन्दगिरिकृतटीका

त्तदाह यस्याइति मोहनाशेस्मृतिप्रतिलम्भेवाऽसाधारणकारणमाह त्वत्प्रसादादि ति प्रकृतेनप्रश्नप्रतिवचननलब्धमर्थंकथयति अनेनेति यदुक्तंस्मृतिप्रतिलंभादशे षतोहृदयग्रन्थीनांविप्रमोक्षःस्यादिति तत्प्रमाणमाह तथाचेति ज्ञानादज्ञानत त्कार्यनिवृत्तौश्रुत्यन्तरमपिसम्वादयति भिद्यतइति भगवदनुग्रहादज्ञानकृतमोहहा नन्तदनन्तरमात्मज्ञानेप्रतिलब्धेवदाज्ञाप्रतीतोहमित्युत्तरार्द्धंव्याकरोति अथेह त वनंकरिष्येहमित्यवतात्पर्यमाह अहमिति ७३ शास्त्रार्थेसमाप्तेसत्यस्यामवस्थायां ञ्जयवचनंकुतोपयुक्तमितितदाह परिसमाप्तइति वासुदेवस्यसर्वज्ञस्यसर्वेश्वरस्यक्ष र्जुनस्यपार्थस्यपृथासुतस्यार्जुनस्यमहात्मनोऽक्षुद्रबुद्धेः सर्वाधिकारिगुणसम्पन्नस्यसम्य ग्वादंसम्वादंगुरुशिष्यभावेनप्रश्नप्रतिवचनाभिधानमिममनुक्रान्तमद्भुतं विस्मयकरं रोमाणिहर्षन्तिपुलकाभवन्त्यनेनेति रोमहर्षणमाह्लादकरंयथोक्तंश्रुतवानस्मीत्याह इत्येवमिति ७४

स्वामिकृतटीका।

मोहइति आत्मविषयोमोहोनष्टःयतोऽहमस्मीति स्वरूपानुसन्धानरूपा स्मृतिरूवत् प्रसादान्मयालब्धा अतःस्थितोऽस्मिगतोऽधर्मविषयःसन्देहोयस्यसोऽहं तवाज्ञांकरि ष्यामीति ७३ तदेवंधृतराष्ट्रंप्रति श्रीकृष्णार्जुनसंवादंकथयित्वाप्रस्तुतांकथामनुस न्दधानः सञ्जयउवाच इत्यहमिति लोमहर्षणंलोमाञ्चकरंसंवादमश्रौषं श्रुतवानहं स्पष्टमन्यत् ७४

भाषाअनुवाद

सोई श्रीकृष्ण अर्जुनका संवाद राजाधृतराष्ट्र से सञ्जय कहतेहैं कि महा [illegible] पौ अर्जुन का यह अद्भुत संवाद रोवांखडे करनेवाला मैनेजो सुना [illegible]ोंकातों कह सुनाया है ७४

SPS
891.237 A 47 S
6055
CC-0. In Public Domain. Digitized by eGangotri

व्यासप्रसादाच्छ्रुतवानिमंगुह्यमहंपरं योगंयोगेश्वरात्कृष्णात्साक्षात्कथ यतःस्वयं७५

शाङ्करभाष्यम्

तच्चेमंश्रीकृष्णार्जुनसम्बादंव्यासप्रसादात्ततोदिव्यचक्षुलाभात् श्रुतवान्ज्ञातवा नेतंसम्बादंगुह्यमहंपरंयोगंयोगार्थत्वात् ग्रन्थोपियोगस्तंसम्बादमिमंयोगेश्वरात्कृ ष्णात्साक्षात् कथयतःस्वयंनपरम्परातः ७५

आनन्दगिरिकृतटीका

प्रकृष्टंसम्बादंकथमश्रौषीरितिचेत्तत्राह तच्चेति एतत्पदंसम्बादपरत्वा त्तल्लिङ्गत्वेननेतव्यमित्याह एतमिति परमपुरुषार्थैपयिकत्वात्परत्वंपरंगुह्यम तिशयेनगुह्यंरहस्यमितिवा योगोज्ञानंकर्म्मचतदर्थत्वादयंसम्बादोयोगःउक्तअथवा चित्तवृत्तिनिरोधस्ययोगस्याङ्गत्वादयंसम्बादयोगइत्याह सम्बादमितियोगानामीश्व रोयोगेश्वरस्तदनुग्रहहेतुत्वाद्योगतत्फलयोःततः साक्षादव्यवधानेनश्रुतवान् नप रम्परयेत्याह योगेश्वरादिति स्वयंस्वेनपरमेश्वरेणातिरस्कृतज्ञानैश्वर्यरूपेण क थयतोव्याचक्षाणादित्यर्थः ७५

स्वामिकृत टीका

आत्मनस्तस्यश्रवणेसम्भावनामाह व्यासप्रसादादिति भगवताव्यासेन दिव्यंचक्षुःश्रोत्रादिमच्चदत्ततोव्यासस्यप्रसादादेतच्छ्रुतवानस्मि किंतदित्यपेक्षया माह परंयोगंपरत्वमाविष्करोति योगेश्वरात्श्रीकृष्णात् स्वयमेवसाक्षात्कथयतः श्रुतवानिति ७५

भाषा अनुवाद

अब सञ्जय यह वृत्तान्त अपने श्रवण करने का समाचार कहतेहैं कि भगवान व्यासदेव ने हम को दिव्य चक्षु श्रोत्रकर्ण दिया हैं ति उनकी कृपासे परा योगरूप जो परम गुह्य अर्जुन के प्रति साक्षात् योगमाया के ईश्वर श्रीकृ ष्णः आप कहा सो मैने श्रवण किया औसोई आपसे कहा ७५

CC-0. In Public Domain. Digitized by eGangotri

राजन्संस्मृत्यसंस्मृत्यसम्वादमिममद्भुतं केशवार्जुनयोःपुण्यंहृष्यामिचमुहुर्मुहुः ७६
तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः विस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः ७७

शाङ्करभाष्य

हेराजन्धृतराष्ट्र संस्मृत्यसंस्मृत्यसम्वादमिममद्भुतंकेशवार्जुनयोःपुण्यंश्रवणादपि पापहरंश्रुत्वाहृष्यामिच मुहुर्मुहुःप्रतिक्षणं ७६

तच्चसंस्मृत्यरूपमत्यद्भुतंहरेर्विश्वरूपं विस्मयोमेमहान् हेराजन् हृष्यामिच पुनःपुनः ७७

आनन्दगिरिकृतटीका।

यद्योत्तंसंवादंभगवतःश्रुत्वाकिमुपेक्ष्यसेनेत्याह राजन्नितिपुण्यत्वंसाधयति श्रवणादपीति ७६ यत्तुविश्वरूपाख्यंरूपंसगुणमर्जुनायभगवान्दर्शितवान्ध्यानार्थंतदिदानींस्तौति तच्चेति ७७ द्वयोरपिकृष्णार्जुनयोःनरनारायणयोःसख्यप्रामाण्यर्थंपरमुत्कर्षंदर्शयति किंवक्ष्यतेति कथंसर्वेषांयोगानामीश्वरोभवति तत्राह तत्प्रभवत्वादिति सर्वयोगोज्ञानंकर्मचतस्यबीजंशास्त्रीयं ज्ञानादि तद्धिभगवद्धीनंतदनुग्रहविहीनस्यतदयोगादतोयोगतत्फलयोर्भगवदनुग्रहायत्तत्वाद्भगवतोयोगेश्वरत्वमित्यर्थः श्रीर्लक्ष्मीर्विजयःपरमउत्कर्षःराज्ञोधृतराष्ट्रस्यस्वपुत्रेषुविजयाशांशिथिलीकृत्यपाण्डवेषुजयप्राप्तिमैकान्तिकीमुपसंहरति इत्येवमिति उपायोपेयभावेननिष्ठाद्वयस्यप्रतिष्ठापितत्वात् कर्मनिष्ठापरंपरयाज्ञान

स्वामिकृतटीका

किञ्च राजन्निति हृष्यामिरोमाञ्चितोभवामिहर्षंप्राप्नोमीति वा स्पष्टमन्यत् ७६

किञ्च तच्चेति विश्वरूपंनिर्दिशति स्पष्टमन्यत् ७७

भाषाअनुवाद

सो हे महाराज धृतराष्ट्र यह परम पवित्र केशव औ अर्जुनका अद्भुत संवाद स्मरण करके मै वारवार हर्षित होता हूं अथवा वारबार मेरे रोम खडे होते हैं ७६

और तत् शब्द से भगवान के विश्वरूप का निर्देश करते अर्थात् कहते हैं कि हे महाराज हरि श्रीकृष्ण के उस अद्भुत विश्वरूप का स्मरण करके हमको अत्यन्त विस्मय होती है अर्थात् आश्चर्यहोताहै और वारबार रोमांचहोता है ७७

CC-0. In Public Domain. Digitized by eGangotri

यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ७८ इतिश्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्व्वणि श्रीमद्भगवद्गीता सूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसम्वादे मोक्षयोगोनामअष्टादशोऽध्यायः १८

शाङ्करभाष्यं

किंबहुना यत्रयस्मिन्पक्षेयोगेश्वरःसर्व्वयोगानामीश्वरस्तत्प्रभवत्वात् सर्व्वयोग बीजश्चकृष्णो यत्रपार्थोयस्मिन्पक्षेधनुर्द्धरोगाण्डीवधन्वा तत्रश्रीस्तस्मिन् पाण्डवानां पक्षेविजयस्तत्रैवभूतिः श्रियोविशेषविस्तारोभूतिर्ध्रुवाऽव्यभिचारिणीनीतिर्नयइत्ये वंमतिर्ममेति ७८ इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्रा जकाचार्यस्य श्रीमच्छङ्करभगवतःकृतौ गीताभाष्येऽष्टादशोऽध्यायः १८

स्वामिकृतटीका

पादरजःश्रीधारिणाधुना श्रीधरस्वामियतिनाकृतागीतासुबोधिनी स्वप्रागल्भ्यव लाद्विलोड्यभगवद्गीतांतदन्तर्गतं तत्वंप्रेप्सुरुपैति किं गुरुकृपापीयूषदृष्टिंविना अ मुस्माच्जलिनानिरस्य जलधरादत्सुरन्तमणिमर्णवंसुखं निर्गच्छति जनःसत्क र्णधारं विना ७८ इति श्रीधरस्वामियतिकृतायां श्रीमगवद्गीताटीकायांसु बोधिन्यांपरमार्थनिर्णयोनामाष्टादशोध्यायः १८

भाषा अनुवाद

इससे हे महाराज अबतुम अपने पुत्रों के राज्यलाभ की शंकाभी परित्याग करो इस आशय पर कहते हैं कि जिसके पक्षमे योगेश्वर श्रीकृष्ण बर्त्तमानहैं और जहांगांडीव धनुर्द्धारी अर्जुन तयारहै तहांई श्रीकहे राज्यलक्ष्मीश्रीविजय तथाभूति कहे उत्तरउत्तर अभिवृद्धिकहे बढती औनीति जोन्याय सो सब निश्चय सेहै ऐसी मेरीमतिहै इससे अबतुम पुत्रोंकोसाथले श्रीकृष्णजीकी शरणमे जायके औ पाण्डवोंको अपना सर्वस्व दे प्रसन्न करावते ज्ये अपने पुत्रोंकी प्राणरक्षा मात्र करो यह सञ्जयने धृतराष्ट्रको कहा ७८ सम्वत् १९२७ श्रावण

इति श्रीजगन्नाथशुक्लविरचित मनभावनीभाषाटीकायां अष्टादशोऽध्यायः १८

ज्ञानरत्नाकरयन्त्रे यन्त्रिता समाप्ताचेयं श्रीमद्भगवद्गीता

CC-0. In Public Domain. Digitized by eGangotri

आनन्दगिरिकृतटीका

निष्ठाहेतुः ज्ञाननिष्ठातुसाक्षादेवमोक्षहेतुरितिशास्त्रार्थमुपसंहर्त्तुमितीत्युक्तं काण्डत्रयात्मकंशास्त्रंपदवाक्यार्थगोचरं आदिमध्यान्तषट्केषुव्याख्ययागोचरीकृतं संक्षेपविस्तराभ्यांयोलक्षणैरुपपादितः सोर्थोन्तिमेनसंक्षिप्यलक्षणेनविवक्षितः गीताशास्त्रमहार्णवोत्थममृतंवैकुण्ठकण्ठोद्गतं श्रीकण्ठापरमामवन्मुनिकृतंनिष्ठाद्वयद्योतितं निष्ठायत्नमतिप्रसादजननीसाक्षात्कृतंकुर्व्वती मोक्षेपर्यवमास्यति प्रतिदिनंसेवध्वमेतद्बुधाः प्राचाञ्चामार्यपादानांपदवीमनुगच्छता गीताभाष्येकृताटीकाटीकातांपुरुषोत्तमं ७८ इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपाद्यशिष्यभगवदानन्दगिरिविरचिते श्रीगीताभाष्यविवेचनेष्टादशोध्यायः १८

स्वामिकृतटीका

अतस्त्वंपुत्राणांराज्यादिशङ्कां परित्यजेत्याशयेनाह यत्रेति यत्र येषांपक्षेयोगानामीश्वरःश्रीकृष्णोवर्त्तते यत्रचपार्थोगाण्डीवधनुर्द्धरस्तत्रैव श्रीराज्यलक्ष्मीस्तत्रैवचविजयस्तत्रैवचभूतिरुत्तरोत्तराभिवृद्धिः नीतिर्न्यायोऽपितत्रैवध्रुवानीतिः मम मतिर्निश्चयः अतइदानीमापतावत् सपुत्रस्त्वंश्रीकृष्णशरणमुपेत्य पाण्डवान्प्रसाद्यसर्व्वस्वंतेभ्योनिवेद्य पुत्रप्राणरक्षांकुर्व्वितिभावः भगवद्भक्तियुक्तस्यतत्प्रसादात्मबोधतः सुखंबन्धविमुक्तिः स्यादिति गीतार्थसंग्रहः तथाहिपुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया भक्त्यात्वनन्ययाशक्यमहमेवंविधोर्जुनइत्यादौ भगवद्भक्तेर्मोक्षंप्रतिसाधकत्वस्मरणात्तदेकान्तभक्तिरेवमत्प्रसादोत्थज्ञानावान्तरव्यापारयुक्तामोक्षहेतुरिति स्फुटं प्रतीयते ज्ञानस्यच भक्त्यावान्तरव्यापारत्वमेवतेषांसततयुक्तानांभजतांप्रीतिपूर्व्वकं ददामिबुद्धियोगंतं येनमामुपयान्ति ते मद्भक्तएतद्विज्ञायमद्भावायोपपद्यते इत्यादिवचनात् नचज्ञानमेवभक्तिरितियुक्तं समःसर्व्वेषुभूतेषुमद्भक्तिंलभते परां भक्त्यामामभिजानाति यावान्यश्चास्मितत्त्वतः इत्यादौभेददर्शनात् नचैवंसति तमेवविदित्वाऽतिमृत्युमेति नान्यःपन्थाविद्यतेऽनायेति श्रुतिविरोधःशङ्कनीयःभक्त्यवान्तरव्यापारत्वात् ज्ञानस्यनहिकाष्ठैःपचतीत्युक्तेऽनलादिनानासाधकत्वमुक्तंभवति किञ्च यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशन्तेमहात्मनां देहान्ते देवःपरंब्रह्मतारकंव्याचष्टे यमेवैषवृणुते तेनलभ्यइत्यादिश्रुतिस्मृतिपुराणवचनान्येवंसति समञ्जसानिभवन्ति तस्माद्भगवद्भक्तिरेवमोक्षहेतुरितिसिद्धं तेनैवदत्तयामत्यातद्गीताविवृतिःकृता सएव परमानन्दस्तयाप्रीणातुमाधवः परमानन्दश्री

CC-0. In Public Domain. Digitized by eGangotri

CC-0. In Public Domain. Digitized by eGangotri